नमो नमो निम्मल दंसणस्स

आगमसुत्ताणि (सटीकं)

भागः - १८

: संशोधक सम्पादकश्च :

मुनि दीपरत्नसागर

Jain Education International For Private & Personal Use Only www.jainelibrary.org

बालब्रह्मचारी श्री नेमिनाथाय नमः

नमो नमो निम्मल दंसणस्स

श्री आनंद-क्षमा-ललित-सुशील-सुधर्मसागर गुरूभ्योनमः

आगम सुत्ताणि (सटीकं)

भागः-१८ बृहत्कल्पछेदसूत्रम्-१

"पीटिका"- एवं - उद्देशकः-१ (मू. १...७ पर्यन्तः)

-: संशोधकः सम्पादकश्चः :-

मुनि दीपरत्नसागर

ता. १४/४/२००० रविवार २०५६ चैत्र सुद ११

४५- आगम सुत्ताणि-सटीकं
मूल्य रू. ११०००/-

卐 आगम श्रुत प्रकाशन 卐

-: संपर्क स्थल :-

"आगम आराधना केन्द्र" शीतलनाथ सोसायटी विभाग-१,
फ्लेट नं-१३, ४-थी मंझिल, व्हायसेन्टर, खानपुर,
अहमदाबाद (गुजरात)

Jain Education International For Private & Personal Use Only www.jainelibrary.org

बृहत्कल्पछेदसूत्रस्य विषयानुक्रमः

पीठिका एवं उद्देशकः-१ (मू-७ पर्यन्तः)

मूलाङ्कः	विषयः	पृष्ठाङ्कः	मूलाङ्कः	विषयः	पृष्ठाङ्कः
	पीठिका	३	१-७	उद्देशकः-१	२१७
	मङ्गलं			- प्रलम्ब सूत्रं -	
	नन्दी - (ज्ञानपञ्चकः)			द्वार - आदिनकार, ग्रन्थ,	
	सम्यक्त्वं			आम, ताल, प्रलम्ब, भिन्न	
	सम्यक् श्रुतं			- प्रलम्बग्रहणे प्रायश्चित्तम्	
	निक्षेप द्वारं			- प्रलम्बग्रहण स्वरूपम्	
	एकार्थिक द्वारं			- गीतार्थ स्वरूपम्	
	निरुक्त द्वारं			- ज्ञान द्वारं	
	विधि द्वारं			- ग्रहण द्वारं	
	प्रवृतिद्वारं			- तुल्ये रागद्वेषाभावे द्वारं	
	''केन वा'' द्वारं			- अनंतकायवर्जन द्वारं	
	कस्यवा द्वारं			- द्वीतीय प्रलम्बसूत्र	
	अनुयोग द्वारं			- तृतीयादि प्रलम्बसूत्राणि	
	भेद द्वारं			- मासकल्पप्रकृत सूत्राणि	
	लक्षण द्वारं			- जिन कल्पीकस्वरूपं	
	तदर्ह द्वारं			- समवसण वक्तव्यता	
	पर्षद् द्वारं			द्वारं, समवसण,	
	कल्पिक द्वारं			केवइया, रूप, पृच्छा,	
	सूत्र, अर्थ, तदुभय,			व्याकरण, श्रोतृपरिणाम,	
	उपस्थपना, विचार,			दान, देवमाल्य, देवमाल्यानय,	
	स्थंडिलभूमि, शोधि,			उपरितीर्थ	
	अपाय, वर्जना, अनुज्ञा			- जिनकल्पिक सामाचारी	
	लेप, पिण्ड, शय्या,			- गच्छावासीस्वरूपम् एवं	
	वस्त्र, इत्यादिकल्प			इत्तर द्वाराणि	

Jain Education International For Private & Personal Use Only www.jainelibrary.org

આર્થિક અનુદાતા

-પ.પૂ. માલવભુષણ તપસ્વી આચાર્યદેવ શ્રી નવરત્નસાગર સૂરીશ્વરજી મ.સા.ની પ્રેરણાથી શ્રી લાલભાઈ દેવચંદ શાહ તરફથી - નકલ એક.

-પ.પૂ. સરળ સ્વભાવી-શ્રીમદ્ ભગવતીસૂત્ર વ્યાખ્યાન પટુ આચાર્યદેવ શ્રી નરદેવસાગરસૂરીશ્વરજી મ.સા. તથા પૂજ્યશ્રીના શિષ્યરત્ન તપસ્વી ગણિવર્યશ્રી ચંદ્રકીર્તિસાગરજી મ.સા.ની પ્રેરણાથી શ્રી પુરુષાદાનીય પાર્શ્વનાથ શ્વે. મૂર્તિ. જૈન સંઘ, દેવકીનંદન સોસાયટી, અમદાવાદ તરફથી નકલ એક.

-પ.પૂ. શાસન પ્રભાવક-ક્રિયારાગી આચાર્યદેવશ્રી વિજય ઋચકચંદ્ર સૂરીશ્વરજી મ.સા.ની પ્રેરણાથી એક સદ્ગૃહસ્થ તરફથી નકલ એક.

-પ.પૂ. સાહિત્યપ્રેમી મુનિરાજ શ્રી સર્વોદય સાગરજી મ.સા.ની પ્રેરણાથી-"અચલગચ્છાધિપતિ પ.પૂ.આ.ભ.શ્રી ગુણસાગરસૂરીશ્વરજી મ.સા.ના શિષ્યરત્ન પ.પૂ. મુનિરાજ શ્રી ચારિત્રરત્નસાગરજી મ. ની ૧૯મી અઠ્ઠાઇ નિમિત્તે-શ્રી ચારિત્રરત્ન ફા.ચે.ટ્રસ્ટ તરફથી નકલ એક.

-પ.પૂ. વૈયાવૃત્યકારિકા સાધ્વી શ્રી મલયાશ્રીજી મ.સા.ના શિષ્યા વ્યવહાર વિચક્ષણા પૂ. સાધ્વી શ્રી હિતજ્ઞાશ્રીજી મ.ની પ્રેરણાથી જૈન આરાધના મંદિર-"જ્ઞાનખાતા" તરફથી નકલ એક.

-પ.પૂ. સૌમ્યમૂર્તિ સાધ્વીશ્રી સૌમ્યગુણાશ્રીજી મ.ની પ્રેરણાથી પ.પૂ. ગુરુમાતા-વાત્સલ્યમૂર્તિ સા.શ્રી રત્નત્રયાશ્રીજી મ.ની પંચમી પુન્યતિથિ નિમિત્તે શ્રીમતી લીલમબેન પ્રાણલાલ પી. દામાણી તરફથી નકલ એક.

-પ.પૂ. સ્વનામધન્યા સા. શ્રી સૌમ્યગુણાશ્રીજી તથા તેઓના શિષ્યા સા.શ્રી સમજ્ઞાશ્રીજીની પ્રેરણાથી-૨૦૫૩ના યશસ્વી ચાતુર્માસ નિમિત્તે શ્રી પાર્શ્વપદ્માવતી જૈન સંઘ, પારૂલનગર, અમદાવાદ તરફથી નકલ બે.

-પ.પૂ. રત્નત્રયારાધકા સાધ્વીશ્રી સૌમ્યગુણાશ્રીજી તથા તેઓશ્રીના શિષ્યા સા. શ્રી સમજ્ઞાશ્રીજીની પ્રેરણાથી સંવત ૨૦૫૪ના નિર્મળ આરાધનામય ચાતુર્માસની સ્મૃતિમાં-ઘાટલોડિયા (પાવાપુરી) જૈન શ્વે. મૂર્તિ. સંઘ, અમદાવાદ તરફથી નકલ એક.

Jain Education International For Private & Personal Use Only www.jainelibrary.org

-પ.પૂ. સાધ્વી શ્રી રત્નત્રયાશ્રીજી મ.ના પરમ વિનેયા સા.શ્રી સૌમ્યગુણાશ્રીજીની પ્રેરણાથી તેઓના સંસારીભાઈશ્રી ઇન્દ્રવદનભાઈ દામાણીના અનુમોદનીય પુરુષાર્થથી "આગમ દીપ-સંપુટ"ના બદલામાં પ્રાપ્ત રકમમાંથી-નકલ ચાર.

-પ.પૂ. પ્રશમરસનિમગ્ના સાધ્વીશ્રી પ્રશમશીલાશ્રીજી મ.ની પ્રેરણાથી-સમ્મેતશિખર તિર્થોદ્ધારિકા પ.પૂ. સાધ્વીશ્રી રંજનશ્રીજી મ.સા.ના શિષ્યા અપ્રતિમ વૈયાવૃત્યકારિકા સા.શ્રી મલયાશ્રીજી તત્ શિષ્યા સા. શ્રી નરેન્દ્રશ્રીજી-તત્ શિષ્યા સા. શ્રી પ્રગુણાશ્રીજી મ.ના. આત્મશ્રેયાર્થે-અરિહંત ટાવર, જૈન સંઘ, મુંબઇ તરફથી નકલ એક.

-પ.પૂ. આગમોદ્ધારક આચાર્યદેવશ્રી ના સમુદાયવર્તી પ.પૂજ્ય વૈયાવૃત્યકારિકા સા.શ્રી મલયાશ્રીજી મ.ના શિષ્યા પૂ.સા. શ્રી કૈવલ્યશ્રીજી મ.ના શિષ્યા પૂ.સા.શ્રી ભવ્યાનંદશ્રીજી મ.સા.ના સુશિષ્યા મિષ્ટભાષી સાધ્વીશ્રી પૂર્ણપ્રજ્ઞાશ્રીજી મ.સા. તથા તેમના વિનિત શિષ્યા સા. શ્રી પૂર્ણદર્શિતાશ્રીજી તથા સા. પૂર્ણનંદીતાશ્રીજીની પ્રેરણાથી-સર્વોદય પાર્શ્વનાથ ચેરીટેબલ ટ્રસ્ટ, મુલુન્ડ મુંબઈ તરફથી નકલ એક.

-પ.પૂ. વૈયાવૃત્યકારિકા સાધ્વીશ્રી મલયાશ્રીજી મ.ના પ્રશિષ્યા સા. શ્રી ભવ્યાનંદશ્રીજીમ.ના સુવિનિતા સા.શ્રી કલ્પપ્રજ્ઞાશ્રીજી તથા કોકીલકંઠી સા. શ્રી કૈરવપ્રજ્ઞાશ્રજી ની પ્રેરણાથી -મેહુલ સોસાયટી, આરાધનાભવન, સુભાષનગર, વડોદરાની બહેનો તરફથી નકલ એક

-શ્રી વિશાશ્રીમાળી તપગચ્છજ્ઞાતિ-જ્ઞાનખાતું, જૈન પાઠશાળા, જામનગર તરફથી નકલ બે.

-શ્રી મંગળ પારેખનો ખાંચો-જૈન શ્વે. મૂર્તિ. સંઘ, અમદાવાદ. તરફથી ૨૦૫૪ના ચાતુર્માસ નિમિત્તે નકલ બે.

- શ્રી આકોટા જૈન સંઘ, વડોદરાની બહેનો તરફથી નકલ એક.

-શ્રીમતી નયનાબેન રમેશચંદ્ર શાહ, વડોદરાની પ્રેરણાથી આગમોના સેટના બદલામાં પ્રાપ્ત રકમમાંથી નકલ પાંચ.

શેષ સર્વે રકમ "અમારા"આજ પર્યન્ત પ્રકાશનોના બદલામાં પ્રાપ્ત થયેલી છે.

Jain Education International For Private & Personal Use Only www.jainelibrary.org

नमो नमो निम्मल दंसणस्स

पंचम गणधर श्री सुधर्मास्वामिने नमः

३५/१ बृहत्कल्प -छेदसूत्रम्

सटीकं

[द्वितीयं छेद सूत्रम्]

पीठिका एवं मू. ७ पर्यन्त : उद्देशकः -१-

[भद्रबाहुस्वामि रचितं मूलं (स्वोपज्ञनिर्युक्तियुक्तं) + संघदासगणि विरचितं भाष्यं + मलयगिरि आचार्य एवं क्षेमकीर्ति आचार्य विरचिता वृत्तिः]

बृहत्कल्प - पीठिका

|| १ || प्रकटीकृतनिःश्रेयसपदहेतुस्थविरकल्प-जिनकल्पम् ।
नम्राशेषनरा-ऽमरकल्पितफलकल्पतरुकल्पम् ।।

|| २ || नत्वा श्रीवीरजिनं, गुरुपदकमलानि बोधविपुलानि ।
कल्पाध्ययनं विवृणोमि लेशतो गुरुनियोगेन ।।

|| ३ || भाष्यं क चाऽतिगम्भीरं ?, क्व चाऽहं जडशेखरः ।
तदत्र जानते पूज्या, ये मामेवं नियुञ्जते ।।

|| ४ || अद्भुतगुणरत्ननिधौ, कल्पे साहायकं महातेजाः ।
दीप इव तमसि कुरुते, जयति यतीशः स महातेजाः ।।

वृ- इह शिष्याणां मङ्गलबुद्धिपरिग्रहाय शास्त्रस्याऽऽदौ मध्येऽवसाने चावश्यं मङ्गलमभिधातव्यम्, यत आदिमङ्गलपरिगृहीतानि शास्त्राणि परगामीनि भवन्ति, मध्यमङ्गलपरिगृहीतानि शिष्यबुद्धिष्वारोपितानि स्थिरपरिचितान्युपजायन्ते, पर्यन्तमङ्गल-समलङ्कृ तानि शिष्य-प्रशिष्यपरम्परागमनतः स्फातीभवन्ति । उक्तं च-

तं मंगलमादीए, मज्झे पज्ञंतए य सत्थस्स ।
पढमं सत्थत्थाविग्घपारगमनाय निद्दिट्ठं ।।
तस्सेव य थेज्जत्थं, मज्झिमयं अंतिमं पि तस्सेव ।
अव्वोच्छित्तिनिमित्तं, सिस्स-पसिस्सादिवंसस्स ।।

वृ- तत्राऽऽदिमङ्गलं पापप्रतिषेधकत्वादिदं सूत्रम्- "नो कप्पइ निग्गंथाण वा निग्गंथीण वा आमे तालपलंबे अभिन्ने पडिगाहित्तए" (मू १) इति, मध्यमङ्गलं "कप्पति निग्गंथाण वा निग्गंथीण वा पुरत्थिमेणं जाव अंगमगहातो इत्तए" एवमादि, पर्यवसानमङ्गलं "छव्विहा कप्पट्ठिती पन्नत्ता" इत्यादि । तच्च मङ्गलं चतुर्धा वक्ष्यमाणस्वरूपम् । तत्र यद् नोआगमतो भावमङ्गलं तद् द्विविधं सूत्रभणितं सूत्रस्पर्शिकनिर्युक्तिभणितं च, भाष्यभणितमित्यर्थः, सूत्रस्पर्शिकनिर्युक्तेर्भाष्यस्य

Jain Education International For Private & Personal Use Only www.jainelibrary.org

च सम्प्रत्येकग्रन्थत्वेन जातत्वात्। अथ कः सूत्रमकार्षीत् ? को वा निर्युक्तिम् ? को वा भाष्यम् ? इति, उच्यते-

इह पूर्वेषु यद् नवमं प्रत्याख्याननामकं पूर्वं तस्य यत् तृतीयमाचाराख्यं वस्तु तस्मिन् विंशतितमे प्राभृते मूलगणेषूत्तरगुणेषु चापराधेषु दशविधमालोचनादिकं प्रायश्चित्तमुपवर्णितम्, कालक्रमेण च दुःषमानभावतो धृति-बल-वीर्य-बुद्धया-ऽऽयुःप्रभृतिषु परिहीयमानेषु पूर्वाणि दुरवगाहानि जातानि, ततो 'मा भूत् प्रायश्चित्तव्यवच्छेदः' इति साधूनामनुग्रहाय चतुर्दशपूर्वधरेण भगवता भद्रबाहुस्वामिना कल्पसूत्रं व्यवहारसूत्रं चाकारि, उभयोरपि च सूत्रस्पर्शिकनिर्युक्ति। इमे अपि च कल्प-व्यवहारसूत्रे सनिर्युक्तिके अल्पग्रन्थतया महार्थत्वेन च दुःषमानुभावतो हीयमानमेधा-ऽऽयुरादिगुणानामिदानीन्तनजन्तूनामल्पशक्तीनां दुर्ग्रहे दुरवधारे जाते, ततः सुखग्रहण-धारणाय भाष्यकारो भाष्यं कृतवान्, तच्च सूत्रस्पर्शिकनिर्युक्त्यनुगतमिति सूत्रस्पर्शिकनिर्युक्तिर्भाष्यं चैको ग्रन्थो जातः। एष शास्त्रस्योपोद्घातः। अनेन चोपोद्घातेनाभिहितेन सूत्रादयोऽर्था अतिव्यक्ता भवन्ति, यथा दीपेनाऽपवरके तमसि। उक्तं च-

वत्तीभवंति दव्वा, दीवेण अप्पगासे उव्वरए।
वत्तीभवंति अत्था, उवघाएणं तहा सत्थे ॥

उपोद्घाताभिधानमन्तरेण पुनः शास्त्र स्वतोऽतिविशिष्टमपि न तथाविधमुपादेयतया विराजते, यथा नभसि मेघच्छन्नश्चन्द्रमाः। उक्तं च-

मेघच्छन्नो यथा चन्द्रो, न राजति नभस्तले।
उपोद्घातं विना शास्त्र, न राजति तथाविधम् ॥

तत्र सूत्रभणितं "नो कप्पति निग्गंथाण वा निग्गंथीण वा आमे तालपलंबे" इत्यादि। सूत्रस्पर्शिकनिर्युक्तिभणितमिदम्-

[भा.१] काऊण नमोक्कारं, तित्थयराणं तिलोगमहियाणं।
कप्पव्यवहाराणं, वक्खाणविहिं पवक्खामि ॥

वृ- 'कृत्वा' विधाय 'नमस्कारं' प्रणामम्, केभ्यः ? इत्याह-'तीर्थकरेभ्यः' तीर्यते संसार-समुद्रोऽनेनेति तीर्थं-द्वादशाङ्गं प्रवचनं तदाधारः सङ्घो वा, तत्करणशीलास्तीर्थकरास्तेभ्यः। गाथायां षष्ठी चतुर्थ्यर्थे प्राकृतत्वात्। उक्तं च- छट्ठिविभत्तीए भन्नइ चउत्थी इति।

किंविशिष्टेभ्यः ? इत्याह-'त्रिलोकमहितेभ्यः' त्रयो लोकाः समाहृताः, समवसरणे त्रयाणामपि सम्भवात्। तथाहि-समागच्छन्ति भगवतां तीर्थकृतां समवरणेष्वधोलोकवासिनो भवनपतयः, तिर्यग्लोकवासिनो वानमन्तर-तिर्यक्पञ्चेन्द्रिय मनुष्य ज्योतिष्काः, ऊर्ध्वलोकवासिनः कल्पोपपन्नका देवाः। त्रिलोकेन महिताः-पूजिताः त्रिभिर्वा लोकैर्महितास्त्रिलोकमहितास्तेभ्यः। नमस्कारं कृत्वा किम् ? इत्याह-कल्पश्च व्यवहारश्च कल्प-व्यवहारौ तयोः 'व्याख्यानविधिम्' अनुयोगविधिं प्रकर्षेण भृशं वा वक्ष्यामि प्रवक्ष्यामि ननु कल्पो व्यवहारश्चेति द्वौ ग्रन्थौ, ततः 'कल्प-व्यवहारयोः' इति प्राप्तम्, कथमुच्यते 'कल्प-व्यवहाराणाम्' ? इति, अत आह भाष्यकृत्-

[भा.२] सक्कयपाययवयणाण विभासा जत्थ जुज्जते जं तु।
अज्झयणनिरुत्ताणि य, वक्खाणविही य अनुओगो ॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

वृ-मलयगिरिप्रभृतिव्याकरणप्रणीतेन लक्षणेन संस्कारमापादितं वचनं संस्कृतम्, प्रकृतौ भवं प्राकृतं स्वभावसिद्धमित्यर्थः, तेषां संस्कृत-प्राकृतवचनानां 'विभाषा' वैविक्त्येन भाषणं कर्त्तव्यम् । तच्चैवम्-

ए-ओकारपराइं, अंकारपरं च पायए नत्थि ।
व-सगारमज्झिमाणि य, क-चवग्ग-तवग्गनिहणाइं ।।

अस्या इयमक्षरगमनिका-एकारपर ऐकारः, ओकारपर औकारः, अंकारपर अः इति विसर्जनीयाख्यमक्षरम्, तथा वकार-सकारयोर्मध्यगे ये अक्षरे श-षाविति, यानि च कवर्ग-चवर्ग-तवर्गनिधनानि ङ-ञ-ना इति, एतान्यक्षराणि प्राकृते न सन्ति ।। तत एतैरक्षरैर्विहीनं यद् वचनं तत् प्राकृतमवसातव्यम् । एभिरेव ऐ औ अः श ष ङ ञ न इत्येवंरूपपैरुपेतं संस्कृतम् । एषां संस्कृत-प्राकृतवचनानां विभाषा "जत्थ जुञ्जते जं तु" 'यत्र' प्राकृते संस्कृते वा 'यद्' वचनम्-एकवचन-द्विवचनादि 'युज्यते' घटामटति तद् वक्तव्यम् । तत्र संस्कृते एकवचनं द्विवचनं बहु-वचनं च भवति, यथा-वृक्षः वृक्षाः; प्राकृते त्वेकवचनं बहुवचनं वा, न तु द्विवचनम्, तस्य बहु-वचननाभिधानात्, "बहुवयणेण दुवयण"मिति वचनात् । ततः 'कप्पव्ववहाराण' मित्यदोषः।।

अथः ल्पशब्दस्य व्यवहारशब्दस्य च कोऽर्थः ? को वा तयोः कल्प-व्यवहाराध्ययनयोः प्रतिविशेषः ? तत आह-'अध्ययननिरुक्तानि च' वक्तव्यानि, निश्चितमुक्तं निरुक्तम्, अक्षरार्थ इत्यर्थः, अध्ययनयोः निरुक्तानि अध्ययननिरुक्तानि, तानि च वक्तव्यानि । तद्यथा-कल्पशब्दोऽनेकार्थाभिधायी-क्वचित् सामर्थ्ये, यथा-वर्षाष्टप्रमाणश्चरणपरिपालने कल्पः, समर्थ इत्यर्थः । क्वचिद् वर्णनायाम्, यथा-अध्ययनभिदमनेन कल्पितम्, वर्णितमित्यर्थः । क्वचिच्छेदने, यथा-केशान् कर्त्तर्या कल्पयति, छिनत्तीत्यर्थः । क्वचित् करणे क्रियायाम्, यथाकल्पिता मयाऽस्याऽऽजीविका, कृता इत्यर्थः । क्वचिदौपम्ये, यथा-सौम्येन तेजसा च यथाक्रममिन्दु-सूर्यकल्पाः साधवः । क्वचिदधिवासे, यथा-सौधर्मकल्पवासी शक्रः सुरेश्वरः । सक्तं च-

सामर्थ्ये वर्णनायां च, छेदने करणे तथा ।
औपम्ये चाऽधिवासे च, कल्पशब्दं विदुर्बुधाः ।।

इह सर्वेष्वप्यर्थेषु गृह्यते, सर्वत्रापि घटमानत्वात् । तथाहि-सामर्थ्ये तावदेवम्-कल्पा-ध्ययनमधीस्यातीचारमलिनस्य साधोः समर्थ प्रायश्चित्तेन विशोधोमापादयितुम् । वर्णनेऽपि-यावन्तः प्रायश्चित्तप्रकारास्तान् वर्णयतीदमध्ययनम्; अथवा मूलगुणान् उत्तरगुणांश्च कल्पयति वर्णयतीति कल्पः । उक्तं च-

कप्पम्मि कप्पिया खलु, मूलगुणा चेव उत्तरगुणा य ।
ववहारे ववहरिया, पायच्छित्ता-ऽऽभवंते य ।।

छेदनेऽपि-तपःशोधिमतिक्रान्तस्य पञ्चाकादिच्छेदनेन पर्यायं छिनत्ति । करणेऽपि-यद् दत्तं प्रायश्चित्तं तत्र तथा प्रयत्नं करोति कल्पाध्ययवेत्ता यथा तत् पारं नयति; अथवा कल्पयति जनयत्याचार्यकमिति कस्मः, तथाहि-करोत्याचार्यकं कल्पाध्ययनवेत्ता सम्यगिति । औपम्येऽपिकल्पाध्ययनवेदनाद् भवति पूर्वधराणां कल्पः सदृश इति कल्पः, तथाहि-कल्पाध्ययनेऽधीते भवति पूर्वधरसदृशः प्रायश्चित्तविधावाचार्य । अधिवासेऽपि-कल्पाध्ययनवेत्ता

Jain Education International For Private & Personal Use Only www.jainelibrary.org

कल्पे मासकल्पे वर्षाकल्पे वा कारणमन्तरेण परिपूर्ण कारणवशत ऊनमतिरिक्तं वा, अथवा कल्पे स्थविरकल्पे जिनकल्पे वाऽधिवसतीति कल्पः ॥ तथा विधिवद् अवहरणाद् व्यवहारः, यदि वा विधिवद्वपाद् हरणाच्च व्यवहारः; यस्य नाऽऽभवति तस्य हायपति, यस्याऽऽभवति तस्मै ददाति व्यवहाराध्ययनवेत्तेति व्यवहार इत्यर्थः उक्तं च-

अत्थिय-पच्चत्थीणं, हाउं एकस्स ववति बीयस्स।
एएण उ ववहारो, अहिगारो एत्थ उ विहीए ॥

तदेवं कल्पस्य व्यवहारस्य व पृथग् विभिन्नं निरुक्तमिति महान् प्रतिविशेषः ॥ "वक्खाणविहि" इत्यस्य व्याख्यानम् अनुयोग इति ॥

तत्र तमेव व्याख्यानविधिमभिधातुकाम इदमाह-

[भा.३] नंदी य मंगलट्ठा, पंचग कुग तिग दुगे य चोइसए।
अंगगयमनंगगए, कायव्व परूवणा पगयं ॥

अनुयोगारम्भाय प्रशमतो मङ्गलार्थ नन्दिर्वक्तव्यः। सत्तु "पंचग" त्ति ज्ञानपञ्चकात्मानः। ज्ञानपमकं द्विकेन भेदेन व्यवस्थितम्, तद्यथा-प्रत्यक्षं च परोक्षं च। प्रत्यक्षस्य त्रिको भेदोऽवधिन्म-पर्याय-केवलमेदात्, परोक्षस्य द्विक भेदः आभिनिबोधिकश्रुतभेदात्। तत्र श्रुतस्य चतुर्दशको भेदः। तथा कुतोऽपि विशेषात् श्रुतं 'अङ्गगतमनङ्गगतं' अङ्गप्रविष्टमङ्गबाहयं चेत्यर्थः। एतेषां पदानां प्ररूपणा कर्त्तव्या। ततः प्रकृतमभिधातव्यम्॥ तत्र "नंदी य मंगलट्ठा" इत्यस्य भावनार्थमाह-

[भा.४] नंदी मंगलहेउं, न यावि सा मंगलाहि वइरित्ता।
कज्जाभिलप्पनेया, अपुढो य पुढो य जह सिद्धा ॥

वृ- 'नन्दि' ज्ञानपञ्चकरूपः 'मङ्गलहेतोः' मङ्गलनिमित्तं वक्तव्यः। आह यदि मङ्गलनिमित्तं नन्दिर्वक्तव्यः ततः स मङ्गलादेकान्तेन भिन्नः प्राप्तः, अन्यथा 'तदुत्पादननिमित्तं तस्योपादान'मिति व्यवहारानुपपत्तेः; उपादानं हि तस्य सिद्धस्य सतो भवंति, उत्पाद्यं चाद्याप्यसिद्धम्, ततः कथमनयोरभेदः ? किन्तु भेद एव; तत आह-न चापि 'सः' नन्दिर्मङ्गलाद् व्यतिरिक्तः, अपिशब्दाद् व्यतिरिक्तोऽपि स्यादव्यतिरिक्त इत्यर्थः। कथमेतच्छ्रद्धेयम् ? इति चेत्, अत आह- "कज्जे" त्यादि। यथा कार्या-ऽभिलाप्य-ज्ञेयानि कारणा-ऽभिलाप-ज्ञानेभ्यः पृथक्त्वा-ऽपृथक्त्वसिद्धानि तथा नन्देर्मङ्गलमपि। तथाहि-कार्यं पटः, कारणं तन्तवः, तत्र तन्तव एव पुरुषव्यापारम-पेक्ष्याऽऽ-तानवितानभावेन परिणममानाः पटकार्यरूपतया परिणमन्ते, तेषु च तथापरिणतेषु सत्सु नकार्य-कारणयोर्भेदः किन्तु अभेदः; एवमिहापि नन्दिर्ज्ञानिपञ्चकाभिधानरूप उत्तरत्तरशुभाध्यवसाय-विशेषसम्भवसव्यपेक्षतर-त्तमभावेन परिणममानो वाञ्छिताधिगतिलक्षणमङ्गलरूपतया परिममत इति नन्दि-मङ्गलयोरभेदः। प्राचीनां त्ववस्थामपेक्ष्य भेदः, यथा तन्तुभ्यः पटस्य। तथाऽभिलापशब्देन कदाचिदभिलाप्यस्याभिलाप्यमानता उच्यते, 'अभिलपनमभिलापः' इति व्युत्पत्तेः; कदाचित् तद्वाचकशब्दः, 'अभिलाप्यते वस्त्वभिलाप्यमनेने'ति व्युत्पादनात्। तत्र यधाऽभिलाप्यमानतोच्यते तदाऽभिलापा-ऽभिलाप्ययोरभेदः, धर्म-धर्मिभावात्; यदा तु तद्वाचकशब्दस्तदा भेदः, शब्दा-ऽर्थयोर्भिन्नदेशस्थत्वाद् भिन्नस्वरूपत्वाच्च। ज्ञानशब्देनापि क्वचिद् ज्ञेयस्य ज्ञानभत्तोच्यते, 'ज्ञातिर्ज्ञान'मिति भावे व्युत्पादनात्; कदाचिदात्मधर्म, 'ज्ञायतेऽनेनेति ज्ञान'मिति करणे

Jain Education International For Private & Personal Use Only www.jainelibrary.org

व्युत्पत्तेः । तत्र यदा ज्ञायमानता तदा ज्ञान-ज्ञेययोरभेदः, धर्म-धर्मभावात्; यदा त्वात्मधर्मस्तदा भेदः, भिन्नस्वरूपत्वात् । एवमिहापि नन्दिशब्दो यदा भाववचनः 'नन्दनं नन्दि'रिति तदा नन्दनं-समृद्धीभवनं वाञ्छितस्याधिगतिरित्यनर्थान्तरम्, मङ्गलमपि चैवंस्वरूपमिति परस्परम भेदः; यदा तु प्राचीनावस्थामपेक्ष्य करणसाधनो नन्दिशब्दः 'नन्द्यतेऽनेनेति नन्दि'रिति तदा भेदः, कालभेदेन भेदादिति ।। सम्प्रति नन्देर्मङ्गलस्य च प्ररूपणा कर्तव्या, तत्र मङ्गलशब्दोच्चारणमिति स्पष्टं मङ्गलबुद्धिहेतुर्भवतीति प्रथमतो मङ्गलशब्दस्य प्ररूपणामाह-

[भा.५] नामं ठवणा दविए, भावम्मि य मंगलं भवे चउहा ।
एमेव होइ नंदी, तेसिं तु परूवणा इणमो ।।

वृ-मङ्गलं 'चतुर्धा' चतुःप्रकारं भवति, तद्यथा-नाममङ्गलं स्थापनामङ्गलं द्रव्यमङ्गलं भावमङ्गलं च । 'एवमेव' नानादिभेदेन चतुःप्रकारो भवति नन्दि । 'तेषां च' नाममङ्गलादीनाम् 'इयं' वक्ष्यमाणस्वरूपा प्ररूपणा ।। तामेवाह-

[भा.६] एगम्मि अनेगेसु व, जीवद्दव्वे वे तव्विवक्खे वा ।
मंगलसन्ना नियता, तं सन्नामंगलं होइ ।।

वृ- एकस्मिन् जीवद्रव्ये 'तद्विपक्षे वा' अजीवद्रव्ये अनेकेषु वा जीवद्रव्येष्वजीवद्रव्येषु वा या मङ्गलमिति संज्ञा 'नियता' नियमिता तद् नाम-नामवतोरभेदोपचारात् 'संज्ञामङ्गलं' नाममङ्गलं भवति ।। उक्तं नाममङ्गलम्, स्थापनामङ्गलमाह-

[भा.७] जा मंगल त्ति ठवणा, विहिता सब्भावतो व असतो वा ।
तत्थ पुण अस्भावे, मंगलठवणागतो अक्खो ।।

वृ- या मङ्गलमिति स्थापना 'सद्भावतो वा' सद्भूताकारनिवेशनेन 'असतो वा' सद्भूताकारस्याभावतो विहिता सा स्थापनामङ्गलम् । तत्र पुनरसद्भावे स्थापना मङ्गल-स्थापनागतोऽक्षः, उपलक्षणमेतद्, वराटकादिर्वा । इयमत्र भावना-अक्ष-वराटकादिषु या मङ्गलमिति स्थापना विहिता, न तत्र कश्चिन्मङ्गलानुगत आकार इत्यसद्भावतः स्थापनामङ्गलम्

[भा.८] जे चित्तमित्तिविहिया, उ घडादी ते य हुंति सब्भावे ।
तत्थ पुन आवकहिया, हवंति जे देवलोगेसु ।।

वृ. ये तु चित्रमित्तौ-चित्रकुड्ये विहिता घटादयः, आदिशब्दात् स्थालादिपरिग्रहः, ते 'सद्भावे' सद्भावतः स्थापनामङ्गलानि भवन्ति । तत्र ये देवलोकेषु चित्रमित्तौ विहिता घटादयस्ते स्थापनामङ्गलानि यावत्कथिकानि भवन्ति, अर्थादापन्नं यानि मनुष्यलोके तानीत्वराणि । यावत्कथिकानि नाम शाश्वतिकानि, इत्वराण्यशाश्वतानि ।। द्रव्यमङ्गलमाह-

[भा.९] उत्तरगुणनिप्फन्ना, सलक्खणा जे उ होंति कुंभाई ।
तं दव्वमंगलं खलु, जह लोए अट्ठ मंगलगा ।।

वृ- इह उत्तरगुणनिष्पन्नत्वं मूलगुणनिष्पन्नापेक्षया, ततः प्रथमतस्तद् भाव्यते-मूलो नाम पृथिवीकायादिजीवः, तस्य गुणात्-प्रयोगात् पुद्गलानां द्रव्यादित्वेन व्यापारणाद् निष्पन्नं मूलगुणनिष्पन्नं मृद्रव्यादि । तस्मादुत्तरगुणेन-परापरप्रयोगेण चक्र-दण्ड-सूत्रोदकादिपुरुष-प्रयत्नेनेत्यर्थः, ये निष्पन्नाः 'सलक्षणाः' लक्षणसम्पन्नाः "अच्छिद्रा अखण्डा वारिपूर्णा

Jain Education International   For Private & Personal Use Only   www.jainelibrary.org

पद्मोत्पलप्रतिच्छन्नाः'' इत्यादिलक्षणोपेताः कुम्भादयः, आदिशब्दात् स्थालादिपरिग्रहः, तद् द्रव्यमङ्गलं भवति। यथा लोकेऽष्टौ मङ्गलानि॥

[भा.१०/१] नेगंतियं अनच्चंतियं च दव्वे उ मंगलं होइ।

वृ. तत् पुनरनन्तरोक्तं द्रव्यमङ्गलमनैकान्तिकमनात्यन्तिकं च भवति। तथाहि-न पूर्णकलश एकान्तेन सर्वेषां मङ्गलम्, येन चौरस्य कर्षकस्य च शकुनतया रिक्तं घटं प्रशंसन्ति शकुनविदः, गृहप्रवेशे पुनः पूर्णम्॥ उक्तं च-

चोरस्स करिसगस्स य, रित्तं कुड्यं जनो पसंसेइ।
गेहपवेसे मन्नइ, पुन्नो कुंभो पसत्थो उ॥

तत एवमनैकान्तिकम्। नाप्यात्यन्तिकम्, यथा कोऽपि शोभनैर्द्रव्यमङ्गलैर्विनिर्गतः, तेन चाग्रे किञ्चिदशोभनं दृष्टम्, येन तानि सर्वाण्यपि प्राक्तनानि प्रतिहतानि, तत एवमनात्यन्तिकमिति। उक्तं द्रव्यमङ्गलम्, अधुना भावमङ्गलमाह-

(भा. १०/२] तव्विवरीयं भावे, तं पि य नंदी भगवती उ॥

वृ- 'तद्विपरीतम्' ऐकान्तिकमात्यन्तिकं च 'भावे' भावविषयं मङ्गलम्। तथाहि-न तद् भावमङ्गलं कस्यचिद्‌भवति कस्यचिन्न भवति, किन्तु सर्वस्याविशेषेण भवतीत्यैकान्तिकम्; न च केनाप्यन्येन प्रतिहन्यत इत्यात्यन्तिकम्। 'तच्च' भावमङ्गलं भगवान् नन्दिर्वक्ष्यमाणोऽवगन्तव्यः। गाथायां स्त्रत्वं प्राकृतत्वात्॥ आह यथा नामादीनि चत्वारि मङ्गले समवतारितानि तथा किमन्येष्वप्य-वतार्यन्ते ? किं वा न ? इति, उच्यते-अवतार्यन्त, सर्वस्यापि चतुःप्रत्यवतारान्तर्गतत्वात्॥ एतदेवाह-

[भा.११] जह इंदो त्ति य एत्थं, तु मग्गणा होति नाममादीणं।
सव्वानुवायि सन्ना, ठवणादिपया उ पत्तेयं॥

वृ- यथा इन्द्र इति उक्ते 'अत्र' इन्द्रे नामादीनां चतणां मार्गणा भवति। तथाहि-किमनेन नामेन्द्र उक्तः ? उत स्थापनेन्द्रः ? उत स्थापनेन्द्रः ? आहोस्विद् द्रव्येन्द्रः ? उताहो भावेन्द्रः ? इति। तथा सर्वत्रापि द्रष्टव्या। उक्तं च-

जत्थ य जं जाणिज्जा, निक्खेवं निक्खिवे निरवसेसं।
जत्थ वि य न जाणिज्जा, चउक्कयं निक्खवे तत्था॥

वृ- तत्र 'संज्ञा' नाम सर्वेषु-नाम-स्थापना-द्रव्य-भावेषु अनुपाति-अनुवर्तनशीलम्। तथाहि-नामेन्द्रऽपि स्थापनेन्द्रोऽपि द्रव्येन्द्रोऽपि भावेन्द्रोऽपि च इन्द्र इत्यभधानेनाविशेषत उच्यते। स्थापनादीनि तु पदानि 'प्रत्येकं' स्वस्वव्यवस्थितानि, न परस्परमनुगमनशीलानि, ततो न नामप्रवृत्तिमात्रदर्शनतो नामेन्द्रप्रतिपत्तयः किन्तु भिन्नलक्षणवशात्॥ अतस्तल्लक्षणमाह-

[भा.१२] अत्ताभिप्पायकया, सन्ना चेयणमचेयणे वा वि।
ठवणादीनिरविक्खा, केवल सन्ना उ नामिंदो॥

वृ- चेतनेऽचेतने वा द्रव्ये या आत्माभिप्रायेण-स्वेच्छया इन्द्रप्रभृति संज्ञा कृता, साऽपि स्थापनादिसापेक्षा स्यादत आह-स्थापनादीनां-स्थापना-द्रव्य-भावानां निरपेक्षा, किमुक्तं भवति ? -यत्र स्थापनादीनामेकमपि नास्ति किन्तु 'केवला' एका संज्ञा तदर्थनिरपेक्षा स नामेन्द्रः॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

उक्तं नामेन्द्रलक्षणम्, अधुना स्थापनेन्द्रलक्षणमाह-

[भा.१३] सब्भावमसब्भावे, ठवणा पुण इंदकेउमाईया।
इत्तरमनित्तरा वा, ठवणा नामं तु आवकहं ॥

वृ- 'स्थापना' स्थापनेन्द्रः पुनः सद्भावेऽसद्भावे च 'इन्द्रकेत्वादिका' इन्द्रकेतुप्रभृतिको द्रष्टव्यः, अत्राऽऽदिशब्दादिन्द्रप्रतिमा-ऽक्ष-वराटकादिपरिग्रहः। इयमत्र भावना-या इन्द्र इति स्थापना अक्ष-वराटिकादिषु असदभावेन, या चेन्द्रकेत्विन्द्रप्रतिमादिषु सद्भावतः स स्थापनेन्द्रः॥ आह नाम-स्थापनयोः कः प्रतिविशेषः ? उच्यते- "इत्तर" इत्यादि। स्थापना इत्वरा अनित्वरा च भवति, यावद्रव्यभाविनी अथावदद्रव्यभाविनी चेत्यर्थः; नाम पुनर्नियमात् 'यावत्कथिकं' यावद्रव्यभावि; एष प्रतिविशेषः ॥ द्रव्येन्द्रमाह-

[भा.१४] दव्वे पुन तल्लद्धी, जस्सातीता भविस्सते वा वि।
जो वा वि अनुवउत्तो, इंदस्स गुणे परिकहेइ ॥

वृ- 'द्रव्ये' द्रव्यविषयः पुनः इन्द्रो यस्य 'तल्लब्धि' इन्द्रलब्धि अतीता भविष्यति च स प्रतिपत्तव्यः। किमुक्तं भवति ?-यः पूर्वमिन्द्रत्वं प्राप्तो यश्च प्राप्स्यति स यथाक्रमं भूतभावत्वाद् भाविभावत्वाच्च द्रव्येन्द्रः। उक्तं च-

भूतस्य भाविनो वा, भावस्य हि कारणं तु यल्लोके।
तद् द्रव्यं तत्त्वज्ञैः, सचेतना-ऽचेतनं कथितम् ॥

यो वाऽपि इन्द्रस्य गुणान् परस्मै परिकथयति, परमनुपयुक्तः, सोऽपि द्रव्येन्द्रः, "अनुपयोगोद्रव्य"मिति वचनात् ॥ उक्तो द्रव्येन्द्रः, सम्प्रति भावेन्द्रमाह-

[भा.१५] जो पुन जहत्थजुत्तो, सुद्धनयाणं तु एस भाविंदो।
इंदस्स व अहिगारं, वियाणमाणो तदुवउत्तो ॥

वृ-यः पुनः 'यथार्थेन' यथावस्थितेनार्थेन परमैश्वर्यलक्षणेन "इदु परमैश्वर्ये" इति वचनात् साक्षादिन्द्रनाम-गोत्राणि कर्माणि वेदयत इत्यर्थः, स भावेन्द्रः। एषः 'सुद्धनयानां' शब्दादीनां यथावस्थितार्थग्राहकाणां वर्त्तमानविषयिकाणां सम्मतः, न शेषो नामेन्द्रादि। अथवा 'इन्द्रस्य इन्द्रसब्दस्य' 'अधिकारम्' अर्थं जानन् 'तदुपयुक्तः' तस्मिन्-इन्द्रशब्दार्थे उपयुक्तो भावेन्द्रः, "उपयोगो भावनिक्षेपः" इति वचनात् ॥ अत्र पर आह-

[भा.१६] न हि जो घडं वियाणइ, सो उ घडीभवइ ने य वा अग्गी।
नाणं ति य भावो त्ति य, एगट्ठमतो अदोसो त्ति ॥

वृ-न हि यो घटं विजानाति स घटीभवति, यस्य वा अग्निविज्ञानं सोऽग्नि, प्रत्यक्षविरोधात् ततो यदुक्तं "इंदस्स वाऽहिगारं विजाणमाणो तदुवउत्तो" इति तन्मिथ्या। अत्र सूरिराह-ज्ञानमिति भाव इति वा, चशब्दादध्यवसाय इति वा उपयोग इति वा एकार्थम् अतोऽदोषः। इयमत्र भावना-अर्था-ऽभिधान-प्रत्ययास्तुल्यनामधेयाः, तथाहि-घटोऽपि वाह्यो घट इत्युच्यते, घटशब्दोऽपि घट इति, घटज्ञानमपि घट इति; ज्ञानं च ज्ञानिनोऽपृथग्भूतम्, अतो घटज्ञान्यपि घट इत्युच्यते; अग्निज्ञान्यपि अग्निरित्यदोषः ॥ एतदेव भावयति-

Jain Education International For Private & Personal Use Only www.jainelibrary.org

[भा.१७]   जमिदं नाणं इंदो, न व्वतिरिच्चति ततो उ तन्नाणी।
तम्हा खलु तब्भावं, वयंति जो जत्थ उवउत्तो ॥

वृ- यद् इदं इन्द्र इति ज्ञानं तस्मान्न 'ज्ञानी' इन्द्रज्ञानी व्यतिरिच्यते। तस्माद् यो 'यत्र' इन्द्रादौ उपयुक्तः तस्य 'तद्भावं' इन्द्रादिभावं तत्त्वविदस्सूरयो वदन्ति ॥ ज्ञान-ज्ञानिनोरभेद एव कथं सिद्धः ? इति चेत्, उच्यते-विपक्षेऽनेकदोषप्रसङ्गात्। तमेवाह-

[भा.१८]   चेयण्णस्स उ जीवा, जीवस्स उ चेयणाओ अन्नत्ते।
दवियं अलक्खणं खलु, हविज्ज न य बंधमोक्खा उ ॥

वृ-चैतन्यस्य जीवात् जीवात् चेतनाया अन्यत्वे 'द्रव्यं' जीवद्रव्यं 'अलक्षणं' "चेतनालक्षणो जीवः" इतिलक्षणरहितं भवेत्। चेतनाया घटादिवज्जीवादप्येकान्तव्यतिरिक्तत्वात् "लक्षणाभावे च लक्ष्यस्याऽप्यभावः" इति खरशृङ्गवदत्यन्तासन् जीवः। यश्चाऽत्यन्तासन् स न बध्यते, बन्धस्य वस्तुधर्मत्वात्; नाऽपि मुच्यते, बन्धाभावादिति बन्ध-मोक्षावपि न स्याताम्। अथ मन्येथाः 'अचेतनोऽपि स बध्यते मुच्यते च' इति तदप्यऽयुक्तम्, अचेतनानामप्येवं धर्मास्तिकायादीनां बन्ध-मोक्षप्रसक्तेः। तस्मात्साधूक्तम् "इन्द्रशब्दार्थं जानन् तदुपयुक्तो भावेन्द्रः" इति ॥

सम्प्रति नामेन्द्र-स्थापनेन्द्रयोः प्रकारान्तरेण प्रतिविशेषमभिधित्सुराह-

[भा.१९]   जह ठवणिंदो थुव्वइ, अनुग्गहत्थीहिं तह न नामिंदो।
एमेव दव्वभावे, पूयाथुतिलद्धिनाणत्तं ॥

वृ- यथा स्थापनेन्द्रो अनुग्रह एवार्थोऽनुग्रहार्थं स येषामस्ति तेऽनुग्रहार्थिनस्तैः वाग्भि स्तूयते पुष्पादिभिरर्च्यते च, न तथा नामेन्द्रो माणवकः। ततो महान् नामेन्द्र-स्थापनेन्द्रयोः प्रतिविशेषः। 'एवमेव' अनेनैव प्रकारेण द्रव्येन्द्रे भावेन्द्रे च पूजा-स्तुति-लब्धिभिर्नानात्वमवसातव्यम्। तद्यथा-द्रव्येन्द्रोऽपि नामेन्द्र इवाऽनुग्रहार्थिभि न स्तूयते नाऽपि पूज्यते, यस्तु भावेन्द्रः स स्थापनेन्द्र इव स्तूयते पूज्यते च; ततो द्रव्येन्द्र-भावेन्द्रयोरपि महान् प्रतिविशेषः। अन्यच्च द्रव्येन्द्र इन्द्रलब्धिहीनः, यस्तु भावेन्द्रः स तल्लब्धिसम्पन्नः। तथाहि-स सामानिकत्रायस्त्रिंशकादिपरिवृतो विशिष्टद्युतिमान् स्फीतं राज्यमनुभवति। उपयोगचिन्तायामपि भावेन्द्र उपयोगलब्धिमान्, द्रव्येन्द्र उपयोगलब्ध्या परित्यक्तः ॥ तदेवमुक्तः सर्वत्र चतुष्कनिक्षेपप्रदर्शनायेन्द्रशब्दस्य निक्षेपः। सम्प्रति प्रस्तुतमुच्यते-तत्र परः प्रश्नयति 'किमर्थं मङ्गलग्रहणम् ?' इति, आह-

[भा.२०]   विग्घोवसमो सद्धा, आयर उवयोग निज्जराऽधिगमो।
भत्ती पभावणा वि य, निवनिहिविज्जाइ आहरणा ॥

वृ- मङ्गले प्रकृते सति रोगादिविघ्नोपशमो भवति। तदुपशमे च प्रतिबन्धकाभावान्महता प्रबन्धेनाऽऽचार्येणाऽनुयोगः प्रारभ्यते। तथाऽनुयोगप्रारम्भे शिष्यस्य शास्त्रग्रहणे महती श्रद्धोपजायते। श्रद्धावतश्च शास्त्रवधारणे महानाऽऽदरः। कृतादरस्य शास्त्रविषयेऽनवरतमुपयोगः। यदा यदा चोपयोगस्तदा तदा सम्यग्ज्ञानत्वान्महती ज्ञानावरणीयस्य कर्मणो निर्जरा। ज्ञानावरणकर्मनिर्जरणाच्च स्फुटः स्फुटतरः शास्त्रस्याधिगमः। अधिगतशास्त्रस्य च गुरौ शास्त्र प्रवचने च निकृत्रिमा भक्तिरुल्लसति। ततः प्रभावना, तां दृष्ट्वाऽन्येषामपि तथा श्रद्धादीनां करणात्। यदि पुनर्न क्रियते मङ्गलं तत एषां विघ्नोपशमादिभावानामप्रसिद्धि। अत्र 'उदाहरणानि'

Jain Education International   For Private & Personal Use Only   www.jainelibrary.org

दृष्टान्ता नृप-निधि-विद्यादयः, आदिशब्दाद् योगो मन्त्राश्च परिगृह्यन्ते। तत्रेयं नृपदृष्टान्तस्य भावना, यथा-कोऽपि पुरुषः कार्यार्थी राजानमधिगन्तुकामो मङ्गलभूतानि पुष्पादीन्यादाय तत्समीपमुपगच्छति। उक्तं च-

पुप्फपुडियाइ जं पइ, गोरसघडओ करेइ कज्जाइं।
मणिबंधम्मि पयलिते, सानुग्गह होंति सव्वगहा॥

उपगत्य चाऽञ्जलिं करोत, पादयोश्च प्रणिपतति, ततो राजा तुष्यति, तुष्टे च तस्मिन् यस्तदधीनोऽर्थः स सिध्यति। अथैवमुपचारं न करोति तदा न तुष्यति, तोषाभावे च तदधीनस्यार्थस्याप्रसिद्धि॥ एवं निधिमुत्खनितुकामो विद्यां मन्त्रं वा साधयितुकामो यदि द्रव्य-क्षेत्र-काल-भावयुक्तमुपचारं करोति, तद्यथा-द्रव्यतः पुष्पादिषु, क्षेत्रतः स्मशानादिषु, कालतः कृष्णपक्ष-चतुर्दश्यादिषु, भावतः प्रतिलोमा-ऽनुलोमोपसर्गसहिते, तदा निधिं विद्यां मन्त्रं वा साधयति। द्रव्याद्युपचाराभावे ते निध्यादयो न सिध्यन्ति। तस्माद् यो यत्रोपचारः स तत्र कर्त्तव्यः॥

एतदेवाह-

[भा.२१] जो जेन विना अत्थो, न सिज्झई तस्स तव्विहं करणं।
विवरीय अभावेन य, न सिज्झई सिज्झई इहरा॥

वृ. योऽर्थो येन विना न सिध्यति तस्य निष्पत्तये तद्विधं करणमवश्यमुपादातव्यम्, यथा घटं साधयितुकामेन चक्र-दण्ड-मृत्पिण्डादिकम्। यतो विपरीतैः करणैः सर्वथा करणानामभावेन च सौऽधिकृतोऽर्थो न सिध्यति, यथा घटं साधयितुकामस्य विपरीततुरि-वेमाद्युपकरणोपादाने सर्वथा चक्र-दण्ड-सूत्रोदकादीनामुपकरणानामभावे वा घटः। 'इतरथा' अविपरीतोपकरणसद्भावे सिध्यति, यथा घटं साधयितुकामस्य यथावस्थितानां चक्र-दण्ड-सूत्रोदकादीनामुपादाने घटम्। न सिध्यन्ति च मङ्गलमन्तरेण विघ्नोपशमादयो भावा इति मङ्गलोपादानं पुनरपि॥

आह यदि शास्त्रस्याऽऽदि-मध्या-ऽवसानेषु मङ्गलम्, ततः सामर्थ्यादिदमायातम् 'अपान्तरालद्वयममङ्गलम्' इति, अत्राह-

[भा.२२] जयवि य तिट्ठाण कयं, तहि वि हु दोसो न बाहए इयरो।
तिसमुब्भवदिट्ठंता, सेसं पि हु मंगलं होइ॥

वृ- यद्यपि 'त्रिषु स्थानेषु' आदि-मध्या-ऽवसानरूपेषु कृतं मङ्गलं तथापि 'इतरः' अपान्तरालद्वयामङ्गलत्वलक्षणो दोषो न बाधते, तस्यैवाभावात्। कथमभावः ? इति चेत्, अत आह-"तिसमुब्भवे" त्यादि। त्रिभ्यः-गुड-समिति-धृतेभ्यः समुद्भवो यस्य स मोदकः तद्दृष्टान्तात् शेषमपि 'हुः' निश्चितं मङ्गलं भवति। इयमत्र भावना-मोदक इव सकलं शास्त्र त्रिधा विभज्यते, तत्राऽऽदिमो भाग आदिमङ्गलेन मङ्गलीकृतः, मध्यमो मध्यमङ्गलेन, अन्तिमोऽन्तमङ्गलेन, ततः कुतोऽपान्तरालद्वयामङ्गलत्वप्रसङ्गः॥

स्यादेतत्, यदिदं शास्त्रमारब्धमेतदाऽऽदि-मध्या-ऽवसानेषु सर्वात्मना मङ्गलम् ततो यद्यन्यत् तस्य मङ्गलमुपादीयते तदाऽनवस्थाप्रसङ्गः-कृतेऽपि मङ्गले पुनरन्यन्मङ्गलमुपादेयम् विशेषाभावात्, तत्राऽप्यन्यदित्येवं मङ्गलानन्त्यप्रसक्तेः। अथ नन्दी मङ्गलम्, शास्त्र पुनरमङ्गलम्, केवलं तद् नन्द्या मङ्गलीक्रियते, नन्वेवं तर्हि यदा नन्दीव्याख्यानमकृत्वा शास्त्र व्याख्यातुमारभ्यते

Jain Education International For Private & Personal Use Only www.jainelibrary.org

तदा शास्त्रममङ्गलम्, अमङ्गलत्वाच्च न ज्ञानम्, ज्ञानाभावाच्च न कर्त्तव्यस्तस्याऽनुयोग इति, अत्राह-

[भा.२३] न वि य हु होयऽनवत्था, न वि य हु मंगलममंगलं होइ।
अप्पपराभिव्वत्तिय, लोणुण्हपदीवमादि व्व ॥

वृ- नाऽपि च 'हुः' निश्चितं भवत्यनवस्था, यतो नन्दी शास्त्रदनर्थान्तरभूता, शास्त्र च स्वतः समस्तं मङ्गलम्, न च तस्य मङ्गलभूतस्य सतोऽन्यन्मङ्गलमुपादीयते, ततो नाऽनवस्था-प्रसङ्गः। यदापि नन्द्या व्याख्यानमकृत्वा शास्त्रमारभ्यते तदापि तच्छास्त्र मङ्गलमिति तदमङ्गलं न भवति। एवंतावनन्न्द्या अनर्थान्तरतायाममङ्गलत्वमनवस्था च परिहृता। सम्प्रत्यर्थान्तरत्वमधिकृत्य परिह्रियते- यद्यपि शास्त्रदर्थान्तरभूता नन्दी तथाप्यमङ्गलत्वमनवस्था च न भवति, कथम् ? इत्याह-"अप्पपर" इत्यादि। नन्दी आत्मनापि मङ्गलं शास्त्रमपि च मङ्गलीकरोति, शास्त्र-मप्यात्मनाऽपि मङ्गलं नन्दीमपि च मङ्गलीकरोति। एवमात्म-पराभिव्यक्तितो द्वयोरपि मङ्गलयोरे-कीभूतयोः सुष्टुतरो मङ्गलभावो भवति। कथमिव ? इत्यत आह-"लोणुण्हपदीवमादि व्व"। यथा द्वयोर्लवणयोरेकीभूतयोः सुष्ठुतरो लवणभावः, द्वयोर्वा उष्णयोरेकत्र मिलितयोः सुष्ठुतर उष्णतरभावः, यथा वा द्वयोः परदीपयोः समीचीनतरः प्रकाशभावः, आदिशब्दान्मधुर-शीतल-स्नेहादिद्रव्याणां परिग्रहः; एवमिहापि द्वयोर्मङ्गलयोरेकीभूतयोः सुष्ठुतरो मङ्गलभावः। स्यादेतत् एवमपि प्रसजत्यनवस्था, तृतीयादिमङ्गलोपादाने सुष्ठुतरमङ्गलभावोपपत्तेः; न प्रजति, प्रयोजनाभावात्, तथा लोकव्यवहारदर्शनात्। तथाहि-लोके कस्यचिदातुरस्य शर्करापलद्वयमौषधं केनाऽपि भिषग्वरेणोपादेशि, तत्र यद्यपि तृतीयादिशर्कराप्रलप्रक्षेपे विशिष्टतमो मधुरभावो भवति तथापि तत्र प्रक्षिप्यते, प्रयोजनाभावात्। एवमिहाप्यन्यत् तृतीयादिकं मङ्गलं नोपादीयते, प्रयोजनाभावादिति ॥ तदेवं "नदी य मंगलट्ठा" इति व्याख्यातम्।

अधुना मङ्गलस्येव नन्दया अपि चतुःप्रकारं निक्षेपमाह-

[भा.२४] नंदी चतुक्क दव्वे, संखबारसग तूरसंघातो।
भावम्मि नाणपनगं, पच्चक्खियरं च तं दुविहं ॥

वृ- नन्धाश्चतुष्को निक्षेपः, तद्यथा-नामनन्दी स्थापनानन्दी द्रव्यनन्दी भावनन्दी च। तत्र नामस्थापने सुप्रतीते। द्रव्यनन्दी द्विधा-आगमतो नोआगमतश्च। तत्राऽऽगमतो नन्दिशब्दार्थज्ञाता तत्र चाऽनुपयुक्तः, "अनुपयोगो द्रव्यम्" इति वचनात्। नोआगमतस्त्रधा-ज्ञशरीरं भव्यशरीरं तद्यतिरिक्ता च। तत्र यद् नन्दीशब्दार्थज्ञस्य शरीरं जीवविप्रमुक्तं तद् भूतभावत्वाद् ज्ञशरीरद्रव्यनन्दी। यस्तु बालको नेदानीं नन्दीशब्दार्थमवबुध्यतेऽथ चाऽवश्यमायत्यां मोत्स्यते स भाविभावत्वाद् भव्यशरीरद्रव्यनन्दी। तद्व्यतिरिक्ता शङ्खद्वादशकस्तूर्यसङ्घातः। स चायम्-

भंभा मुकुंद मद्दल, कडंब झल्लरि हुडुक्क कंसाला।
काहल तलिमा वंसो, पणवो संखो य बारसमो ॥

भावतो द्विधा-आगमतो नोआगमतश्च। तत्राऽऽगमतो नन्दिशब्दार्थस्य ज्ञाता तत्र चोपयुक्तः। तत्र मूलद्वारगाथायां यत् "पंचके" ति भणितं तस्य व्याख्यानमाह-भावे नोआगमतो नन्दी 'ज्ञानपञ्चकं' पञ्चविधं ज्ञानम्-आभिनिबोधिकज्ञानं श्रुतज्ञानमवधिज्ञानं मनः पर्यवज्ञानं केवलज्ञानं च। "दुग" त्ति भणितं तस्य व्याख्यानमाह-भावे नोआगमतो नन्दी 'ज्ञानपञ्चकं'

Jain Education International For Private & Personal Use Only www.jainelibrary.org

पञ्चविधं ज्ञानम्-आभिनिबोधिकज्ञानं श्रुतज्ञानमवधिज्ञानं मनःपर्यवज्ञानं केवलज्ञानं च। "दुग" त्ति अस्य व्याख्यानम्-'तद्' ज्ञानपञ्चकं द्विविधं प्रज्ञप्तम्, तद्यथा-प्रत्यक्षम् 'इतरच्च' परोक्षम् ॥

सम्प्रति प्रत्यक्ष-परोक्षयोः स्वरूपमाह-

[भा.२५] जीवो अक्खो तं पइ, जं वट्टति तं तु होइ पच्चक्खं।
परतो पुन अक्खस्सा, वट्टंतं होइ पारुक्खं ॥

वृ- "अश् भोजने" अश्नाति-भुङ्क्ते यथायोगं सर्वानर्थानिति अक्षः, यदि वा "अशौङ् व्याप्तौ" अश्नुते-ज्ञानेन व्याप्नोति सर्वान् ज्ञेयानिति अक्षः-जीवः, उभयत्राऽप्यौणादिकः सक्प्रत्ययः, तं प्रत्यव्यवधानेन यद् वर्त्तते ज्ञानं भवति परोक्षम्। तथा द्रव्येन्द्रिय-मनांसि पुद्गलमयत्वात् पराणि, तेभ्यः पुनरक्षस्य वर्त्तमानं ज्ञानं भवति परोक्षम्। किमुक्तं भवति ?-यदिन्द्रियद्वारेण मनोद्वारेण वाऽऽत्मनो ज्ञानमुपजायते तत् परोक्षम्, पृषोदरादित्वात् परशब्दात् परः सकारागमः। यदि वा परैर्द्रव्येन्द्रिय-मनोभिरक्षसम्बन्धो यस्मिंस्तत् परोक्षमिति व्युत्पत्ति ॥

अत्रैव मतान्तरं दूषयितुमाह-

[भा.२६] केसिंचि इंदियाइं, अक्खाइं तदुवलद्धि पच्चक्खं।
तं तु न जुज्जइ जम्हा, अग्गाहगमिंदियं विसए ॥

वृ- 'केषाञ्चिद्' वैशेषिकादीनामक्षाणीन्द्रियाण्यभिप्रेतानि, तेषामुपलब्धि प्रत्यक्षम्, एवं च "चाक्षुषादिविज्ञानं प्रत्यक्षम्" इत्यापन्नम्। एतद् दूषयति-"तं तु" इत्यादि। 'तद्' वैशेषिकाद्युक्तं 'न युज्यते' न घटामञ्चति, यस्मादि 'इन्द्रियं' चक्षुरादि पुद्गलमयत्वेनाचेतनत्वात्स्वरूपेणाग्राहकं 'विषयस्य' रूपादेः। ततः कथमुपपद्यते 'तदुपलब्धि प्रत्यक्षम्' ? उपलब्धेरेवाभावात् ॥

तमेवोपलब्ध्यभावं भावयति-

[भा.२७] न वि इंदियाइं उवलद्धिमंति विगतेसु विसयसंभरणा।
जह गेहगवक्खाइं, जो अनुसरिया स उवलद्धा ॥

वृ- न वै इन्द्रियाण्युपलब्धिमन्ति, तेषु विगतेष्वपि तद्विषयस्य संस्मरणात्, यथा गेहगवाक्षाः। किमुक्तं भवति ? - यथा गेहगवाक्षैरुपलब्धेष्वर्थेषु गेहगवाक्षाणामुपरमेऽपि पुरुषस्य संस्मरणभावान्न ते गवाक्षा उपलब्धारः, तथा विगतेष्वपीन्द्रियेषु तद्विषय उपलभ्यत आत्मनेति व्यापकविरुद्धोपलब्धि, 'तस्योपलम्भः' इतिव्यवस्था हि तस्य स्मरणेन व्याप्ता, अन्यथा तद्व्यवस्थायाः कर्त्तुमशक्यत्वात्, तद्विरुद्धं चात्रान्यस्य स्मरणमुपलभ्यत इति। कथम् ? कस्तत्रोपलब्धा ? इति चेत्, अत आह-योऽनुस्मर्त्ता स तत्रोपलब्धा, आत्मा उपलब्धा इत्यर्थः। तथा च प्रयोगः-येषु विगतेष्वपि यद्विषयो येन स्मर्यते स तत्रोपलब्धा, यथा गेहगवाक्षेषु पुरुषः, विगतेष्वपि चेन्द्रियेषु तद्विषयः स्मर्यत आत्मना। स्मरणं हि प्रतिनियतत्वन्निमितवत्त्वेन संव्याप्तम्, न चोपलम्भादन्यन्निमित्तमस्ति, ततो विपक्षाद् व्यापकानुपलब्ध्या निवर्त्तमानमुपलम्भपूर्वकत्वेन व्याप्तत इति प्रतिबन्धसिद्धिः ॥

अन्यच्च-

[भा.२९] अपरायत्तं नाणं, पच्चक्खं तिविहमोहिमाईयं।
जं परतो आयत्तं, तं पारोक्खं हवइ सव्वं ॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

वृ- यद् ज्ञानम् 'अपरायत्तं' नोत्पत्तौ परस्य वशवर्त्ति तत् प्रत्यक्षम् । तच्च वक्ष्यमाणं त्रिविधमवध्यादिकम् । यच्चोत्पत्तौ 'परतः' परस्याऽऽयत्तं तत् सर्वं भवति परोक्षम् । चाक्षुषादिकमपि च विज्ञानमुत्पत्त परस्य चक्षुरादेरायत्तम् अतः परोक्षम् ॥

सम्प्रति त्रिविधं प्रत्यक्षं द्विविधं च परोक्षमुपदर्शयति-

[भा.३०] ओहि मनपज्जवे या, केवलनाणं च होंति पच्चक्खं ।
आभिनिबोहियनाणं, सुयनाणं चेव पारोक्खं ॥

वृ- अवधिज्ञानं मनःपर्यवज्ञानं केवलज्ञानं च भवति प्रत्यक्षम् । आभिनिबोधिकज्ञानं श्रुतज्ञानं च परोक्षम् ॥ तत्राऽवधिज्ञानं चतुर्विधम्, तद्यथाः द्रव्यतः क्षेत्रतः कालतो भावतश्च, तत्र द्रव्यतस्तावदाह-

[भा.३१] विवरीयवेसधारी, विज्जंजणसिद्ध देवताए वा ।
छाइय सेवियसेवी, बीयादीओ वि पच्चक्खा ॥

वृ- नेपथ्यपरावर्त्ततो गुटिकाप्रयोगतः स्वरपरावर्त्ततो वर्णपरावर्त्ततो विपरीतं वेषं धारयन्तीति विपरीतवेषधारिणस्ते, तथा ये विद्यासिद्धा अञ्जनसिद्धा देवतया वा च्छादिताः, ये च तैः सेवितसविनः, ये च बीजादयः कुशूलादिन्यस्तास्ते सर्वेऽवधिज्ञानिनः प्रत्यक्षाः ॥

[भा.३२] पुढवीइ तरुगिरिया सरीरादिगया य जे भवे दव्वा ।
परमाणू सुहदुक्खादओ य ओहिस्स पच्चक्खा ॥

वृ. तथा-यानि पृथिव्यां यानि तरुषु यानि च गिरिषु, गाथायामेकवचनं समाहारत्वात्, द्रव्याणि, यानि च शरीरादिगतानि द्रव्याणि, ये च परमाणवः, ये 'सुख-दुःखादयः' इन्द्रियमनः-शरीरस्वास्थ्या-ऽस्वास्थ्यरूपास्तेऽप्यवधेः प्रत्यक्षाः ॥

[भा.३३] अच्चंतमनुवलद्धा, वि ओहिनाणस्स होंति पच्चक्खा ।
ओहिन्नाण परिगया, दव्वा असमत्तपज्जाया ॥

वृ- अत्यन्तं चक्षुरादिनाऽनुपलब्धा अपि पदार्था अवधिज्ञानस्य भवन्ति प्रत्यक्षाः । अवधिज्ञानेन च द्रव्याणि 'परिगतानि' परिज्ञातानि भवन्ति असमाप्तपर्यायाणि, न समस्ताः पर्याया द्रव्याणां ज्ञातुं शक्यन्त इति भावः । यदि हि समस्तानपि पर्यायान् जानीयात्ततः स केवली भवेत् ॥ उक्तं द्रव्यतोऽवधिज्ञानम्, अधुना क्षेत्रादित आह-

[भा.३४] खित्तम्मि उ जावइए, पासइ दव्वाइँ तं न पासइ या ।
काले नाणं भइयं, को सो दव्वं विना जम्हा ॥

वृ- क्षेत्रे जघन्यत उत्कर्षतो वा यावन्ति द्रव्याणि पश्यति तत् क्षेत्रं न पश्यति, अवधिज्ञानस्य मूर्त्तविषयत्वात्, "रूपिष्ववधेः" इति वचनात्, क्षेत्रस्य चामूर्त्तत्वात् । तत्र जघन्यतः क्षेत्रपरिमाणं "जावतिया तिसमयाऽऽहारगस्स०" इत्यादिना, उत्कर्षतः "सव्वबहुअगनिजीवा०" इत्या-दिनाऽभिहितम् । शेषं तु तदन्तर्गतं मध्यममिति । तथा 'काले' कालविषये ज्ञानं 'भक्तं' विकल्पितम्, भवति वा न वेति भावः । कथम्? इति चेत्, उच्यते-इह यदि कालद्रव्यं समयक्षेत्रभावि समयमात्रं परिणाम्यभ्युपगम्यते तदा तदमूर्त्तत्वान्नाऽवधिज्ञानविषयः । यदि पुनः कोऽसौ नाम 'द्रव्यं' द्रव्यपर्यायं विनाऽन्यः कालः ? यस्माद् द्रव्यस्यैवाऽवस्थाविशेषः कालः, यत उक्तम्- दव्वस्स चेव सो

Jain Education International For Private & Personal Use Only www.jainelibrary.org

पज्ञातो इति। तदा सोऽवधिज्ञानिनः प्रत्यक्षः, पर्यायाणामपि कतिपयानामवधिज्ञानगोचरत्वात्। भावतोऽनन्तान् भावान् जानाति सर्वभावानामनन्तभागम्। शेषं तु वक्तव्यमावश्यकटीकातोऽवसातव्यम्॥ उक्तमवधिज्ञानम्, अधुना मनःपर्यवज्ञानमाह-

[भा.३५] तं मनपज्जवनाणं, जेन वियाणाइ सन्निजीवाणं।
दट्टुं मनिज्जमाणे, मनदव्वे मानसं भावं॥

वृ- येन संज्ञिजीवानां मनोद्रव्याणि ''मणिज्जमाणे'' इति 'मन्यमानानि' मननेन व्यापार्यमाणानि दृष्ट्वा 'मानसं भावं जानाति' चिन्तितमर्थमवबुध्यते तन्मनः पर्यवज्ञानम्॥

एतदेव सनिदर्शनं भावयति-

[भा.३६] जाणइ य पिहुजणो वि हु, फुडमागारेहिं मानसं भावं।
एमेव य तस्सुवमा, मनदव्वपगासिए अत्थे॥

वृ- 'पृथग्जनोऽपि' लोकः 'हुः' निश्चितं स्फुटम् आकारैर्मानसं भावं जानाति, एवमेव 'तस्यापि' मनःपर्यवज्ञानिनो मनोद्रव्यप्रकाशितेऽर्थे उपमा द्रष्टव्या। किमुक्तं भवति ?-यथा प्राकृतो लोकः स्फुटमाकारैर्मानसं भावं जानाति तथा मनःपर्यवज्ञान्यपि मनोद्रव्यगतानाकारनवलोक्य तं तं मानसं भावं जानातीति। एतदपि द्रव्य-क्षेत्र-काल भावैर्यथा नन्द्यध्ययने तथा चिन्तनीयम्॥ गतं मनःपर्यवज्ञानम्, अधुना केवलज्ञानमाह-

[भा.३७] पंकसलिले पसाओ, जह होइ कमेण तह इमो जीवो।
आवरणे झिज्झंते, विसुज्झए केवलं जाव॥

वृ-यथा पङ्ककलुषिते सलिले तकतकचूर्णयोगतः 'प्रसादः' प्रसन्नता क्रमेण भवति, तथाऽयं जीवोऽपूर्वकरणगुणस्थानकादारभ्य क्षपकश्रेणिमारूढो विशुद्ध-विशुद्धतराध्यवसायप्रभावतः क्षीयमाणे आवरणे तावद् विशुध्यति यावत् क्षीणकषायगुणस्थानकचरमसमये ज्ञानावरणपञ्चकाऽन्तरायपञ्चक-दर्शनावरणचतुष्टयक्षयं कृत्वाऽनन्तरसमये केवलज्ञानमासादयति॥

कथम्भूतं यत्केवलम्? इत्याह-

[भा.३८] दव्वादिकसिणविसयं, केवलमेगं तु केवलन्नाणं।
अनिवारियवावारं, अनंतमविकप्पियं नियतं॥

वृ-केवलज्ञानं 'द्रव्यादिकृत्स्नविषयं' द्रव्यादीनि कृत्स्नानि-समस्तानि विषयो यस्य तत्तथा, 'केवलम्' असहायं मत्यादिज्ञाननिरपेक्षत्वाद्, 'एकम्' असाधारणमन्यसदृशत्वात्, अनिवारितव्यापारं अविरहितोपयोगत्वात्, अनन्तं ज्ञेयानन्तत्वाद्, 'अविकल्पितं' विकल्परहितं-भेदरहितमितयर्थः, प्रथमत एवाशेषतदावरणविगमात्, 'नियतं' सर्वकालभावि॥

उक्तं केवलज्ञानम्, अधुना परोक्षमाभिनोबोधिकज्ञानमभिधित्सुराह-

[भा.३९] पच्चक्ख परोक्खं वा, जं अत्थं ऊहिऊण निद्दिसइ।
तं होइ अभिनिबोहं, अभिमुहमत्थं न विवरीयं॥

वृ-'प्रत्यक्षम्' इन्द्रियविषयं 'परोक्षम्' इन्द्रियविषयातिक्रान्तं यद् अर्थमूहित्वा 'निर्दिशति' निर्णयपुरस्सरं ब्रूते 'एष एवंभूतोऽर्थ' इति, तद् अर्थं प्रति 'अभिमुखं' यथार्थविषयं आभिनिबोधिकम्, 'न विपरीतं' नाऽनर्थाभिमुखम्, तस्यायथार्थतया मिथ्यारूपत्वात्॥ तच्च द्विधा-इन्द्रियनिश्रित-

Jain Education International For Private & Personal Use Only www.jainelibrary.org

मनिन्द्रियनिश्रितं च। अनिन्द्रियं मनः। सम्प्रतीन्द्रिया-ऽनिन्द्रिययोर्विषयविभागमाह-

[भा.४०] अत्थानंतरचारिं, नियतं चित्तं तिकालविसयं तु।
अत्थे य पडुप्पन्ने, विनियोगं इंदियं लहइ ॥

वृ-अर्थे-शब्दादाविन्द्रियव्यापारदनन्तरं चरति-व्याप्रियत इत्येवंशीलमर्थानन्तरचारि इन्द्रिये प्रथमं व्यापृते पश्चान्मनो व्याप्रियत इति भावः; 'नियतं' नियतार्थविषयम्, नैककालमनेक-विषयमित्यर्थः, 'चित्तं' मनः। पुनः कथम्भूतम्? इत्याह-'त्रिकालविषयं' त्रिष्यपि कालेषु यथायोग्यं विषयो यस्य तत्तथा। 'इन्द्रियं पुनः' चक्षुरादिकं 'विनियोगं' व्यापारं लभते 'प्रत्युत्पन्ने' वर्त्तमानेऽर्थे, वर्त्तमानार्थविषयम् नाऽतीता-ऽनागतार्थविषयमिति भावः ॥

[भा.४१] मतिविसयं मतिनाणं, मतिपुव्वं पुन भवे सुयन्नाणं।
तं पुन समतिसमुत्थं, परोवदेसा स सव्वं पि ॥

वृ-मतिज्ञानं 'मतिविषयं' मत्यनुसारि, यस्य यादृशी मतिस्यस्य तदनुसारं मतिज्ञानं प्रवर्त्तत इत्यर्थः। श्रुतज्ञानं पुनर्भवति 'मतिपूर्वं' मतिकारणकम्, श्रुतज्ञानं हि वाच्य-वाचकभावेन शब्दप्लावितस्याऽर्थस्य ग्रहणम्, वाच्य-वाचकभावेन च शब्दः प्रवर्त्तते मत्यवधारितेऽर्थ इति। 'तत् पुनः' श्रुतज्ञानं सर्वमपि मूलभेदापेक्षया द्विविधम्, तद्यथा-स्वमतिसमुत्थं 'परोपदेशाद्वा' परोपदेशसमुत्थं चेत्यर्थः। तत्र स्वमतिसमुत्थं प्रत्येकबुद्धानां पदानुसारिप्रज्ञानां वा, परोपदेशसमुत्थमस्मदादीनाम् ॥ तत् कतिविधम्? इति तद्भेदप्रदर्शनार्थमाह-

[भा.४२] अक्खर सण्णी सम्मं, साईयं खलु सपज्जवसियं च।
गमियं अंगपविट्ठं, सत्त वि एए सपडिवक्खा ॥

वृ- अक्षरश्रुतं संज्ञिश्रुतं सम्यक्श्रुतं सादिश्रुतं सपर्यवसितं गमिकम् अङ्गप्रविष्टमिति। एतानि सप्ताऽपि पदानि सप्रतिपक्षाण्यवगन्तव्यानि, ततश्चतुर्दशप्रकारं भवति। तद्यथा-अक्षर-श्रुतमनक्षरश्रुतं संज्ञिश्रुतमसंज्ञिश्रुतं सम्यक्श्रुतं मिथ्याश्रुतं सादिश्रुतमनादिश्रुतं सपर्यवसि-तमपर्यवसितं गमिकमगमिकम् अङ्गप्रविष्टमनङ्गप्रविष्टं च ॥ तत्राऽक्षरश्रुतप्रतिपादनार्थमाह-

[भा.४३] अक्खरतिगरूवणया, पढमनयादेसतो न तं खरति।
अभिलप्पा पुण बावा, होंति खरा अक्खरा चेव ॥

वृ- अक्षरत्रिकस्य-संज्ञाक्षरस्य लब्ध्यक्षरस्य व्यञ्जनाक्षरस्य चेत्यर्थः रूपणका-प्ररूपणा कर्त्तव्या। तत्र यद् व्यञ्जनाक्षरं तत् प्रथमनयः-नैगमनयस्तस्याऽऽदेशेन 'न क्षरति' न स्वभावाच्चलति, नित्यमित्यर्थः। तथा च तन्मतानुसारिणो मीमांसका नित्यं शब्दमातिष्ठमानाः प्रतीता एव। ये पुनरभिलाप्या भावास्ते क्षराश्च भवन्त्यक्षराश्च। तत्र क्षरा घटादयः, अक्षरा धर्मास्तिकायादयः ॥

अथ कीदृशं संज्ञाक्षरम्? इति तत्प्रतिपादनार्थमाह-

[भा.४४/१] संठाणमगाराई, अप्पाभिप्पायतो व जं जस्स।

वृ- यद् लिपिभेदतः संस्थानमकारादेः, यथा-कलशाकृतिष्टकारः, तत् तथासंस्थान-विशिष्टमकारादि संज्ञाक्षरम्। अथवा 'आत्माभिप्रायतः' आत्मेच्छया यद् यस्य संस्थानं चिह्नविशेष-रूपं क्रियते तत् संज्ञाक्षरम् ॥ सम्प्रति लब्ध्यक्षरमाह-

[भा.४४/२] लद्धी पंचविगप्पा, जस्सुवलब्भो उ जो अत्थो ॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

वृ- लब्धिः 'पञ्चविकल्पा' पञ्चभेदा । अत्र 'लब्धि' इति पदैकदेशे पदसमुदायोपचाराद् 'लब्ध्यक्षरम्' इति प्रतिपत्तव्यम् । ततोऽयमर्थः-पञ्चविधं लब्ध्यक्षरम्, तद्यथा-श्रोत्रेन्द्रियलब्ध्यक्षरं जिह्वेन्द्रियलब्ध्यक्षरं चक्षुरिन्द्रियलब्ध्यक्षरं घ्राणेन्द्रियलब्ध्यक्षरं स्पर्शनेन्द्रियलब्ध्यक्षरं च । उपलक्षणमेतत्, तेन षष्ठं नोइन्द्रियलब्ध्यक्षरमप्यवगन्तव्यम् । अथ कीदृशं षट्प्रकारमपि लब्ध्यक्षरम् ? अत आह-'यस्य' श्रोत्रादेः श्रोत्र-चक्षु-र्घ्राण-जिह्वा-स्पर्शनेन्द्रियाणां मनसश्च य उपलभ्यः 'अर्थ' शब्दादिस्तमुपलभ्य याऽक्षराणां लब्धिरुपजायते तत् श्रोत्रेन्द्रियादिलब्ध्यक्षरम् । किमुक्तं भवति ? -श्रोत्रेण शङ्खशब्दमुपलभ्य तदनन्तरं 'शङ्ख' इत्येवंरूपयोर्द्वयोरक्षरयोर्या लब्धिस्तत् श्रोत्रेन्द्रियलब्ध्यक्षरम् ॥ प्रकारान्तरेण लब्ध्यक्षरभेदानाह-

[भा.४५] सामन्न विसेसेण य, दुविहुवलद्धी उ पढमिय अभेया ।
तिविहा य अनुवलद्धी, उवलद्धी पंचहा बिइया ॥

वृ- अथवा 'उपलब्धि' उपलब्ध्यक्षरं 'द्विविधं' द्विप्रकारम्, तद्यथा-'सामान्येन विशेषेण च' सामान्यलब्ध्यक्षरं विशेषलब्ध्यक्षरं चेति भावः । तत्र 'प्रथमिका' सामान्योपलब्धिसामान्पोयपलब्ध्यक्षरं अभेदम्, सामान्ये भेदाभावात् । इहोपलब्धिरनुपलब्ध्यपेक्षा, ततस्तस्या अपि प्ररूपणा कर्तव्येत्यत आह-'त्रिविधा' त्रिप्रकाराऽनुपलब्धि । या पुनः 'द्वितीया' विशेषोपलब्धिविशेषोपलब्ध्यक्षरं सा पञ्चप्रकारा ॥ तानेव त्रीन् पञ्च च भेदानाह-

[भा.४६] अच्चंता सामन्ना, य विस्सुती होइ अनुवलद्धीओ ।
सारिक्ख विवक्खोभय, उवमाऽऽगमतो य उवलद्धी ॥

वृ- अनुपलब्धिरेवं त्रिधा भवति । तद्यथा-'अत्यन्ताद्' एकान्तेनानुपलब्धि सामान्याद् विस्मृतेश्च । उपलब्धिरपि पञ्चप्रकारैवम्-साद्दक्षतो विपक्षतः 'उभयतः' उभयधर्मदर्शनत औपम्यत आगमतश्च ॥ तत्र प्रथमतोऽत्यन्तानुपलब्धिमाह-

[भा.४७] अत्थस्स दरिसणम्मि वि,लद्धी एगंततो न संभवइ ।
दट्ठुं पि न याणंते, बोहिय पंडा फणस सत्तू ॥

वृ-अर्थस्य दर्शनेऽपि कस्यचित्तदर्थविषया 'लब्धि' अक्षराणां लब्धिरेकान्ततो न सम्भवति । तथा च 'बोधिकाः' पश्चिमदिग्वर्तितनो म्लेच्छाः पनसं दृष्टाऽपि 'पनसः' इत्येवं न जानते तेषां पनसस्याऽत्यन्तपरोक्षत्वात्, न हि तद्देशे पनसः सम्भवति । तथा 'पाण्डाः' पाण्डुमथुरावासिनः सक्तून् दृष्टाऽपि 'सक्तवोऽमी' इति न जानते, तेषां हि सक्तवोऽत्यन्तपरोक्षाः, ततो न तद्दर्शनेऽपि तदक्षरलाभः ॥ सम्प्रति सामान्यादनुपलब्धिमाह-

[भा.४८] अत्थस्स उग्गहम्मि वि, लद्धी एगंततो न संभवति ।
सामन्ना बहुमज्झे, मासं पडियं जहा दट्ठुं ॥

वृ- अर्थस्यावग्रहेऽपि तदन्येनार्थेन 'सामान्यात्' साद्दश्यादेकान्ततः 'लब्धि' अक्षरलब्धिर्न सम्भवति । यथा बहुमध्ये पतितं माषं द्दष्टाऽपि तदन्येन सामान्यान्न तदक्षरे लभते ॥

विस्मृतेरनुपलब्धिमाह-

[भा.४९] अत्थस्स वि उवलंभे, अक्खरलद्धी न होइ सव्वस्स ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

पुव्वोवलद्धमत्थे, जस्स उ नामं न संभरति ॥

वृ-अर्थस्य पूर्वं पश्चाच्चोपलम्भेऽपि सर्वस्य 'अक्षरलब्धि' तद्विषयाऽक्षरलब्धिर्न सम्भवति। कस्य न भवति ? इत्यत आह-यस्याऽर्थे विवक्षितार्थविषयं पूर्वोपलब्धं नाम न संस्मरति ॥

तदेवमुक्ता त्रिविधाऽप्यनुपलब्धि । अधुना साध्क्षतो विपक्षतश्चोपलब्धिमाह-

[भा.५०] सारिक्ख-विवक्खेहि य, लभति परोक्खे वि अक्खरं कोइ ।

सबलेर-बाहुलेरा, जह अहि-नउला य अनुमाणे ॥

वृ- कश्चित् परोक्षेऽप्यर्थे दृश्यमानार्थसादृश्यादक्षरं लभते, यथा 'शाबलेय-बाहुलेयाः' शाबलेयबाहुलेयाक्षराणि । तथाहि-कश्चित् शाबलेयं दृष्ट्वा तत्सादृश्यात् परोक्षेऽपि बाहुलेये तदक्षराणि लभते 'ईदृशो बाहुलेयः' इति । तथा कश्चिद् वैपक्ष्येण परोक्षेऽर्थे तदक्षरं लभते, यथा-अहिदर्शनान्नकुलानुमाने नुकलदर्शनाद्वा सर्पानुमाने ॥

सम्प्रत्युबयधर्मदर्शनत उभयाक्षरलब्धिमाह-

[भा.५१] एगत्थे उवलद्धे, कम्मि उभयत्थ पच्चओ होइ ।

अस्सतरि खर-ऽस्साणं, गुल-दहियाणं सिहरिणीए ॥

वृ- 'कस्मिंश्चिद्' उभयधर्मयोगिनि उभयावयवयोगिनि वा एकस्मिन्नर्थे उपलब्धे उभयत्र परोक्षे 'प्रत्ययः' तदक्षरलाभो भवति । यथा 'अश्वतरे' वेगसरे दृष्टे खरस्याऽश्वस्य च प्रत्ययः-तदक्षरलाभः । यथा वा शिखरिण्यामुपलब्धायां गुड-दध्नोः प्रत्ययः-गुड-दध्यक्षरलाभः ॥

औपम्यत उपलब्धिमाह-

[भा.५२] पुव्वं पि अनुवलद्धो, घिप्पइ अत्थो उ कोइ ओवम्मा ।

जह गोरेवं गवयो, किंचिविसेसेण परिहीनो ॥

वृ-पूर्वमनुपलब्धोऽपि कोऽप्यर्थ औपम्याद् गृह्यते, यथा गौरेवं गवयः, नवरं किञ्चिद्विशेषेण परिहीनः, कम्बलकविरहत इत्यर्थः । अत्रेयं भावना-'यथा गौस्तथा गवयः' इति श्रुत्वा कालान्तरेणाटव्यां पर्यटन् गवयं दृष्ट्वा 'गवयोऽयम्' इति यदक्षरजातं लभते एषा औपम्योपलब्धिः ॥

इदानीमागमत उपलब्धिमाह-

[भा.५३] अत्तगमाप्पमानेन अक्खरं किंचि अविसयत्थे वि ।

भविया‍ऽभविया कुरवो, नारग दियलोय मोक्खो य ॥

वृ- आप्ताः-सर्वज्ञाः तत्प्रणीत आगम आप्तागमः, स एव प्रमाणमाप्तागमप्रमाणम्, तेन अविषयेऽप्यर्थे किञ्चिदक्षरं लभते । यथा-भव्योऽभव्यो देवकुरव उत्तरकुरवो नारका देवलोको मोक्षः, चशब्दादन्ये च भावाः । इयमत्र भावना-आप्तागमप्रामाण्यवशात् तस्मिंस्तस्मिन् वस्तुनि योऽक्षरलाभः, यथा-भव्य इति अभव्य इति देवकुरव इत्यादि, सा आगमोपलब्धिः ॥ एषा सर्वाऽप्युपलब्धि संज्ञिनां भवति, असंज्ञिनां तु का वार्त्ता ? इत्यत आह-

[भा.५४] ओसन्नेण असन्नीण अत्थलंभे वि अक्खरं नत्थि ।

अत्थो च्चिय सन्नीणं, तु अक्खरं निच्छए भयणा ॥

वृ- असंज्ञिनाम् 'अर्थलाभेऽपि' अर्थदर्शनेऽपि 'उत्सन्नेन' एकान्तेन 'नास्त्यक्षरं' नैवाक्षरलाभः । तथाहि-शङ्खशब्दं श्रुत्वाऽपि न तेषामेषा लब्धिरुपजायते, यथा 'अयं शङ्खशब्दः'

Jain Education International For Private & Personal Use Only www.jainelibrary.org

इति। एवं शेषेन्द्रियेष्वपि भावनीयम्। संज्ञिनां पुनः 'अर्थ एवाक्षरं' अर्थोपलम्भकाल एवाक्षरलाभः, यथा शङ्खशब्दश्रवणकाल एव 'शङ्खशब्दः' इति। 'निश्चये पुनः भजना' 'शङ्खशब्द एवायम्, शार्ङ्गशब्द एवायम्' इति वा निश्चयगमनं स्याद्वा न वा। एवं शेषेन्द्रिययेष्वपि भावनीयम्॥

गतं लब्ध्यक्षरम्, अधुना व्यञ्जनाक्षरमाह-

[भा.५५] अत्थाभिवंजगं वंजणक्खरं इच्छितेतरं वदतो।
रूवं च पगासेणं, वंजति अत्थो जओ तेणं॥

वृ-इह यद् विवक्षितं तदेव यदि वदति, यथा 'अश्वं भणिष्यामि' इति तदेव ब्रूते, तदा तद् ईप्सितम्। अन्यद् विवक्षित्वाऽन्यच्चेदुच्चरति तदा तद् 'इतरद्' अनीप्सितम्। ईप्सितमितरद्वा वदतो यद् अर्थाभिव्यञ्जकमभिधानं तद् व्यञ्जनाक्षरम्। अथ कस्मादम व्यञ्जनाक्षरमुच्यते? नाऽभिधानाक्षरम्? अत आह-'रूपमिव' घटादिकमिव 'प्रकाशेन' दीपादिना तमसि वर्त्तमानम् 'अर्थ' घटादि 'यतः' यस्माद् 'व्यज्यते' प्रकटीक्रियते 'तेन' कारणेन व्यञ्जनाक्षरमिव्युच्यते॥

[भा.५६] तं पुन जहत्थनियतं, अजहत्थं वा वि वंजणं दुविहं।
एगमनेगपरियायं, एमेव य अक्खरेसुं पि॥

वृ-'तत् पुनः' व्यञ्जनं द्विविधम्-यथार्थनियमयथार्थं वा। यथार्थनियतं नाम अन्वर्थयुक्तम्, यथा-क्षपयतीति क्षपणः, तपतीति तपन इत्यादि। अयथार्थं यथा-नेन्द्रं गोपयति तथापीन्द्रगोपकः, न पलमश्नाति तथापि पलाश इत्यादि। अथवा तद् व्यञ्जनं द्विधा-एकपर्यायमनेकपर्यायं च। एकः पर्यायः-अभिधेयो यस्य तदेकपर्यायम्, यथा-अलोकः स्थण्डिलमित्यादि, अलोकशब्देन ह्यलोकत्वलक्ष एक एव पर्यायोऽभिधीयते, कण्डिलशब्देन स्थण्डिलत्वेमेकमित। अनेके पर्यायाः-अभिधेया यस्य तदनेकपर्यायम्, यथा-जीव इति, जीवशब्देन हि जीवोऽप्युच्यते सत्त्वोऽपि प्राण्यपि भूतोऽपि च, जीवादयश्च प्रतिनियतविशेषाः। तथा चोक्तम्-

प्राणा द्वि-त्रि-चतुः प्रोक्ताः, भूताश्च तरवः स्मृताः।
जीवाः पञ्चेन्द्रिया ज्ञेयाः, शेषाः सत्त्वा उदीरिताः॥

ततो भति सामान्येन जीवशब्दस्यानेकपर्यायाभिधायकत्वमिति। 'एवमेव' एका-ऽनेकभेदेनाक्षरेष्वपि द्रष्टव्यम्। तद्यथा-द्विविधं व्यञ्जनम्, एकाक्षरमनेकाक्षरं च। एकाक्षरं धीः श्रीरित्यादि, अनेकाक्षरं वीणा लता माला इत्यादि॥

[भा.५७] सक्कय-पाययभासाविनियुत्तं देसतो अनेगविहं।
अभिहाणं अभिधेयातो होइ भिन्नं अभिन्नं च॥

वृ. अथवा द्विप्रकराम्-संस्कृतभाषाविनिर्युक्तम्, यथा-वक्ष इति, प्राकृतभाषाविनिर्युक्तं च यथा-रोक्खो इति। 'देशतः' नानादेशानाश्रित्यानेकविधम्, यथा-मगधानाम् ओदनः, लाटानां कूरः, द्रमिलानां चौरः, अन्ध्राणाम् दडाकुरिति। तथा तद् 'अभिधानं' व्यञ्जनाक्षरम् अभिधेयाद् भिन्नमभिन्नं च। तत्र भिन्नं प्रतीतम्, तादात्म्याभावात्॥ तमेव तादात्म्याभावमाह-

भा ९५८] खुर-अग्गि-मोयगोच्चारणम्मि जम्हा उ वयण-सवणाणं।
न वि छेदो न वि दाहो, न वि पूरण तेन भिन्नं तु॥

वृ-यस्मात् क्षुरशब्दोच्चारणेऽग्निशब्दोचारणे मोदकशब्दोच्चारणे च यथाक्रमं वदतो वदनस्य

Jain Education International For Private & Personal Use Only www.jainelibrary.org

शृण्वतः श्रवणस्य न च्छदो नाऽपि दाहो नाऽपि पूनम्, अतो ज्ञायतेऽभिधेयादभिधानं भिन्नम्, अन्यथा तादात्म्यसम्बन्धात् क्षुरादयोऽपि तत्र सन्तीति वदनस्य श्रवणस्य च च्छेदादिप्रसङ्गः ।। अभिन्नत्वं नाम सम्बद्धत्वम्, तथा च लोकेऽप्यभिन्नशब्दः सम्बद्धवाची व्यवह्रियते, यथा-अयमस्माकं खादन-पानेनाऽभिन्नः, सम्बद्ध इत्यर्थः । ततस्तदेव सम्बद्धत्वं भावयति-

[भा.५९] जम्हा उ मोयगे अभिहियम्मि तत्थेव पच्चओ होइ ।
न य होइ सो अणत्ते, तेन अभिन्नं तदत्थातो ।।

वृ- यस्मान्मोदकेऽभिहिते 'तत्रैव' मोदके प्रत्ययो भवति नाऽन्यत्र । न च 'सः' नियमेन तत्र प्रत्ययः 'अन्यत्वे' असम्बद्धत्वे सति भवति, सम्बन्धाभावतो नियामकाभावेनाऽन्यत्रापि तत्प्रत्यय प्रसक्तेः । 'तेन' कारणेन ज्ञायते 'तद्' अभिधानम् 'अर्थादभिन्नम्' अर्थेन सह वाच्य-वाचकभावसम्बद्धम् ।।

[भा.६०] एक्केक्कमक्खरस्स उ, सप्पज्जाया हवंती इयरे य ।
संबद्धमसंबद्धा, एक्केक्का ते भवे दुविहा ।।

वृ- व्यञ्जनस्य यान्यक्षरामि तस्याक्षरस्यैकैकस्य द्विविधाः पर्यायाः, तद्यथा-स्वपर्यायाः 'इतरे च' परपर्यायाः । तत्र अवर्णस्त्रिधा-ह्रस्वो दीर्घ प्लतश्च, पुनरेकैकस्त्रधा-उदातोऽनुदात्तः स्वरितश्च, पुनरेकैको द्विधा-सानुनासिको निरनुनासिकश्च, एवमष्टादशप्रकारो अवर्ण । उक्तञ्च-

ह्रस्व-दीर्घ-प्लुतत्वाच्च, त्रैस्वर्योपनयेन च ।
अनुनासिकभेदाच्च, सङ्ख्यातोऽष्टादशात्मकः ।।

एते अवर्णस्य स्वपर्यायाः । तथा ये एकैकाक्षरसंयोगतो द्विघक्षरसंयोगत एवं यावन्तो घटन्ते संयोगास्तावत्संयोगवशतो येऽवस्थाविशेषा ये च तत्तदर्थाभिधायकत्वस्वभावस्तेऽपि तस्य स्वपर्यायाः । इतरे च तत्रासन्तः परपर्यायाः । एवमिवर्णादीनामपि स्वपर्यायाः परपर्यायाश्च वक्तव्याः । येऽपि परपर्यायास्तेऽपि तस्येति व्यपदिश्यन्ते, व्यवच्छेद्यतया तेषां तद्विशेषकत्वात्, यथा-अयं मे पर इति । 'ते च' स्वपर्यायाः परपर्यायायाश्च एकैके द्विविधा भवन्ति तद्यथा-सम्बद्धा असम्बद्धाश्च ।। एतदेव भावयति-

[भा.६१] अत्थित्ते संबद्धा, होंति अकारस्स पज्जया जे उ ।
ते चेव असंबद्धा, नत्थित्तेणं तु सव्वे वि ।।

वृ- ये अकारस्य 'पर्यायाः' स्वपर्यायास्ते तत्रास्तित्वेन सम्बद्धा भवन्ति । नास्तित्वेन पुनस्त एव सर्वेऽप्यसम्बद्धाः, तत्र तेषां नास्तित्वाभावात् ।।

[भा.६२] एमेव असंता वि उ, नत्थित्तेणं तु होंति संबद्धा ।
ते चेव असंबद्धा, अत्थित्तेणं अभावत्ता ।।

वृ- 'एवमेव' अनेनैव प्रकारेण असन्तः परपर्याया अपि नास्तित्वेन भवन्ति सम्बद्धाः, ते चैव परपर्याया अस्तित्वेनासम्बद्धाः, तेषामस्तित्वस्य तत्राभावत्वात् ।। अत्रैव निदर्शनमाह-

[भा.६३] घडसद्दे घ-ड-ऽकारा, हवंति संबद्धपज्जया एते ।
ते चेव असंबद्धा, हवंति रहसद्दमादीसु ।।

वृ- घटशब्दे ये घकार-टकारा-ऽकारास्तेषां ये पर्यायास्त एते भवन्ति तत्रास्तित्वेन सम्बद्धाः,

Jain Education International For Private & Personal Use Only www.jainelibrary.org

तेषां तत्र विद्यमानत्वात् । त एव घकार-टकारा-ऽकारपर्याया रथशब्दादिषु भवन्त्यस्तित्वेनाऽसम्बद्धाः, तेषां तत्राऽभावात् । तदेवमस्तित्वेन स्वपर्यायास्तत्र सम्बद्धाः अन्यत्र चाऽसम्बद्धा उपदर्शिताः । एतदुपदर्शने चैतदर्थादापन्नम्-ते स्वपर्यायास्तत्र नास्तित्वेनाऽसम्बद्धाः, अन्यत्र तु सम्बद्धा । तथा ते रथशब्दस्य स्वपर्यायास्ते तत्रास्तित्वेन सम्बद्धाः, तेषां तत्र विद्यमानत्वात्, घटशब्देनाऽसम्बद्धाः, तेषां तत्रासत्त्वात् । त एव च रथशब्दे नास्तित्वेनाऽसम्बद्धाः, घटशब्दे तु सम्बद्धा इति ॥ तदेवं स्वपर्यायाः परपर्यायाश्च प्रत्येकं सम्बद्धा असम्ब असम्बद्धाश्च निदर्शिताः।

अधुना स्वपर्यायान् दर्शयति-

[भा.६४] संजुत्ता-ऽसंजुत्तं, इयं लभते जेसु जेसु अत्थेसु ।
विनिओगमक्खरं ते, सि होंति सम्भावपज्ञाया ॥

वृ- 'इति' एवं घटशब्द-रथशब्दादिगतेन प्रकारेण संयुक्तमसंयुक्तं वा 'अक्षरम्' अकारादिकं यषु येष्वर्थेषु विनियोगं लभते ते तेषां 'सद्भावपर्यायाः' स्वपर्याया भवन्ति । अर्थादिदमायातम्-अपरे परपर्याया इति ॥ तदेवमभिहितं व्यञ्जनाक्षरम्, तदभिधानाच्चाभिहितं त्रिविधमप्यक्षरम् । तत्र न केवलमप्यक्षरं संज्ञाक्षराद्युच्यते किन्तु ज्ञानमपि । तत्र शिष्यः प्रश्नयति-कियत्प्रमाणं तदक्षरम् ? उच्यते, सर्वाकाशप्रदेशेभ्योऽनन्तगुणम् । कथमेतावत्प्रमाणम् ? उच्यते-इहैकैक आकाशप्रदेशः स्वल्वनन्तैरगुरुलघुपर्यायैः संयुक्तः, ते च सर्वेऽप्यगुरुलघुपर्याया ज्ञानेन ज्ञायन्ते; न च येन स्वभावेनैको ज्ञायते तेनापरोऽपि, तयोरेकत्वप्रसङ्गात्, किन्त्वन्येन स्वभावेन, ततो यावन्तोऽगुरुलघुपर्यायास्तावन्तो ज्ञानस्वभावाः; उक्तञ्च- जावइय पज्ञवा ते, तावइया तेसु नाणभेया वि । इति भवति सर्वाकाशप्रदेशेभ्योऽनन्तगुणम् । आह च बृहद्भाष्यम्-

अक्खरमुच्चइ नाणं, तं पुन होज्ञाहि किंपमाणं तु ? ।
भण्णइ अनंतगुणियं, सव्वागासप्पएसेहिं ॥
किह होइ अनंतगुणं, सव्वागासप्पदेसरासीतो ? ।
भन्नइ जं एक्केक्को, आगासस्सा पदेसो उ ॥
संजुत्तोऽनंतेहिं, अगुरुलघुपज्ञवेहिं नियमेण ।
तेन उ अनंतगुणियं, सव्वागासप्पएसेहिं ॥

पुनरपि शिष्यः प्राह-कथमेतदवसीयते 'एकैक आकशप्रदेशोऽनन्तैरगुरुलघुपर्यायैरुपेतः'? उच्यते-इह द्विविधं वस्तु, रूपिद्रव्यमरूपिद्रव्यं च । तत्र रूपिद्रव्यं चतुर्द्धा, तद्यथा-गुरु लघु गुरुलघु अगुरुलघु च । एतदप्युच्यते व्यवहारतः, निश्चयतः पुनर्द्विविधमेव गुरुलघु अगुरुलघु च । तथा चाह-

[भा.६५] निच्छयतो सव्वगुरुं, सव्वलहुं वा न विज्ञते दव्वं ।
ववहारतो तु जुज्ञति, बादरखंधेसु नऽन्नेसु ॥

वृ- 'निश्चयतः' निश्चयनयमतेन नि किञ्चिद् द्रव्यं 'सर्वगुरु' एकान्तगुरु, यदि स्यादेकान्तगुरु तत एकान्तेनैव पतनधर्मि स्यात्, न च पतति, तस्मान् नविद्यते सर्वगुरु; नाऽपि 'सर्वलघु' एकान्तलघु, यदि स्यादेकान्तलघु ततो न कदाचित् पतति, अथ कदाचित् पतति तस्मान्न सर्वलघ्वपि। 'व्यवहारतः' व्यवहारनयमतेन पुनर्युज्यते सर्वगुरु सर्वलघु च । केषु ? इत्याह- 'बादरस्कन्धेषु'

Jain Education International For Private & Personal Use Only www.jainelibrary.org

बादरत्वपरिणामपरिणतेष्वनन्तप्रादेशिकेषु स्कन्धेषु, 'नान्येषु' सूक्ष्मपरिणामपरिणतेषु । तत्र गुरु द्रव्यं यथा-अयस्पिण्डः, लघु यथा-अर्कतूलम्, गुरुलघु यथा-वायुः, अगुरुलघु परमाण्वादि । निश्चयतः पुनरेवं द्विविधद्रव्यभावना-परमाण्वादेरारभ्य सङ्ख्यातप्रदेशात्मकोऽसङ्ख्यातप्रदेशात्मको यश्चानन्तप्रदेशात्मकः सूक्ष्मस्कन्धः कार्मणप्रभृतिक एते अगिरुलघवः, बादराः स्कन्धा औदारिक-वैक्रिया-ऽऽहारक-तैजसरूपा गुरुलघवः । सम्प्रति गुरुलघुद्रव्याणामगुरुलघुद्रव्याणां चाऽल्पबहुत्वेन वर्गणाश्चिन्त्यन्ते-तत्र बादरस्कन्धेषु जघन्य-मध्यमोत्कृष्टभेदभिन्नेष्वेकोत्तरवृध्धा प्रवर्धमाना वर्गणा अनन्ता भवन्ति, ताश्च तावद् द्रष्टव्या यावत् सर्वोत्कृष्टो बादरस्कन्धः ॥

[भा.६६] तत्तो य वग्गणाओ, सुहुमाण भवंतऽनंतगुणियातो ।
परमाणूण य एक्का, संखे संखेयरेऽसंखा ॥

वृ- 'ताभ्यः' समस्तबादरस्कन्धगताभ्यो वर्गणाभ्यः 'सूक्ष्माणाम्' सूक्ष्मानन्तप्रदेशकस्कन्धानामनन्तगुणिता वर्गणाः । तथा परमाणूनां समस्तानामेका वर्गणा । 'संखे संखे' त्ति सङ्ख्येयप्रदेशेषु द्व्यादिप्रभृति उत्कृष्टं सङ्ख्यातं यावत्सङ्ख्याताः, सङ्ख्यातस्य सङ्ख्यातभेदभावात् । 'इतरस्मिन्' असङ्ख्येयप्रदेशेऽसङ्ख्येया वर्गणाः, असङ्ख्यातस्याऽसङ्ख्यातभेदभिन्नत्वात् ॥

[भा.६७] इय पोग्गलकायम्मी, सव्वत्थोवा उ गुरुलहू दव्वा ।
उभयपडेसेहिया पुण, अनंतकप्पा बहुवियप्पा ॥

वृ- 'इति' एवमुपदर्शितन प्रकारेण 'पुद्गलकाये' पुद्गलास्तिकाये गुरुलघुद्रव्याणि सर्वस्तोकानि । 'उभयप्रतिषेधितानि' सञ्जातगुरुलघुप्रतिषेधितानि अगुरुलघूनीत्यर्थः पुनर्द्रव्याणि 'अनन्तकल्पानि' अनन्तभेदानि । तत्रानन्तभेदत्वं गुरुलघुद्रव्येष्वप्यस्ति, तत आह-'बहुविकल्पानि' विकल्पातिशयेन बहुभेदानि ॥ सम्प्रति पर्यायपरिमाणमल्पबहुत्वेन चिन्त्यते-इह पञ्च राशयः क्रमेण स्थाप्यन्ते, तद्यथा-परमाणुराशिः सङ्ख्यातप्रदेशकस्कन्धराशिः असङ्ख्यातप्रदेशकस्कन्धराशिः सूक्ष्मानन्तप्रदेशकस्कन्धराशिः बादरानन्तप्रदेशकस्कन्धराशिश्च । तत्र बादरानन्तप्रदेशस्कन्धराशौ योऽन्तिमः स र्वोत्कृष्टो बादरस्कन्धस्तत्र बहवो गुरुलघुपर्यायाः सर्वस्तोका अगुरुलघुपर्यायाः । इह बादरस्कन्धेष्वप्यगुरुलघवः पर्यायाः सन्ति, परमुत्कलिता गुरुलघुपर्याया इति त एव तत्र शेषकालं गण्यन्ते । सम्प्रति तु वस्तुस्थितिश्चिन्त्यते इत्यल्पबहुत्व चिन्तायां ते चिन्तिताः । तस्मात्सर्वोत्कृष्टाद्बादरस्कन्धाद् येऽधस्तना बादरस्कन्धास्तेषु गुरुलघुपर्यायाः क्रमेणानन्तगुणहान्या द्रष्टव्याः, अगुरुलघुपर्यायाः पुनरनन्तगुणवृध्धा । एवं च तावज्ज्ञातव्यं यावत्सर्वजघन्यो बादरस्कन्धः । उक्तञ्च-

परमाणु संखऽसंखा, सुहुमानंताण बायराणं च ।
एएसिं रासीतो, कमेण सव्वे ठवेऊणं ॥
तेसिं जो अंतिमओ, सव्वुक्कोसो य बायरो खंधो ।
तस्स बहू गुरुलहुया, अगुरुलहू पज्जवा थोवा ॥
तत्तो हिट्ठाहुत्ता, अनंतहानीए गुरुलहू नेया ।
अगुरुलहू वुड्ढीए, एवं ता जाव उ जहन्नो ॥

[भा.६८] ते गुरुलहुपज्जाया, पन्नाछेदेण वोकसित्ताणं ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

जा बायरो जहन्नो, अनंतहानीए हायंता ॥

वृ- ते गुरुलघुपर्यायाः प्रज्ञाच्छेदनकेनाऽगुरुलघुपर्यायेभ्यः 'व्युत्कृष्य' पृथक् कृत्वा सर्वोत्कृष्टाद् बादरस्कन्धादधस्तनेषु बादरस्कन्धेष्वनन्तगुणहान्या हीयमानास्तावद्रष्टव्या यावज्जघन्यो बादरस्कन्धः, अगुरुलघुपर्यायास्तु क्रमेणानन्तगुणवृध्धा प्रवर्धमानाः । ततः परं सूक्ष्मानन्तप्रदेशादिषु स्कन्धेषु केवला अगुरुलघुपर्याया एव क्रमेणानन्तगुणवृध्धा प्रवर्धमाना द्रष्टव्याः, ते च तावद् यावत् परमाणवः । उक्तञ्च-

तेन परं सुहुमाओ, अनंतवुड्ढीए नवर वड्ढंता ।
अगुरुलहो च्चिय केवल, जा परमाणू य ता नेया ॥

वृ- तदेवं पर्यायपरिमाणमप्यल्पबहुत्वेन चिन्तितम् । साम्प्रतमरूपिद्रव्यं चिन्त्यते । तच्चतुर्धा, तद्यथा-धर्मास्तिकायः अधर्मास्तिकायः आकाशास्तिकायः जीवास्तिकायश्च । एतेषां किमगुरुलघुपर्यायपरिमाणम् ? अत आह-

[भा.६९] केन हवेज्ज विरोहो, अगुरुलहूपज्जवाण उ अमुत्ते ।
अच्चंतमसंजोगो, जहियं पुन तव्विवक्खस्स ।

वृ- 'अमूर्त्ते' धर्मासित्कायादौ 'तद्विपक्षस्य' गुरुलघुपर्यायजातस्य 'अत्यन्तम्' एकान्तेन 'असंयोगः' अघटना तत्रागुरुलघुपर्यायाणां केन 'विरोधः' विनाशनं भवेत् ? नैव केनचित् । ततः केनापि विनाशाभावात् सदैव प्रतिप्रदेशमनन्तां अगुरुलघुपर्यायाः ॥ तथा चाऽऽह-

[भा.७०] एवं तु अनंतेहिं, अगुरुलहूपज्जवेहिं संजुत्तं ।
होइ अमुत्तं दव्वं, अरूविकायाण उ चउण्हं ॥

वृ- एवं तु सति चतुर्णामपि 'अरूपिकायानाम्' अरूपिणामस्तिकायानां धर्मास्तिकाय-प्रभृतीनामेकैकाख्यं यदमूर्त्तद्रव्यं तद् भवति प्रत्येकमनन्तैरगुरुलघुपर्यायैः संयुक्तम् ॥

तदेवं भावित एकैक आकाशप्रदेशोऽनन्तैरगुरुलघुपर्यवैरुपेतः । सम्प्रति यथा ज्ञानं सर्वाकाशप्रदेशेभ्योऽनन्तगुणं भवति तथा दर्शयति-

[भा.७१] उवलद्धी अगुरुलहू, संजोग-सरादिणो य पज्जाया ।
एतेण हुंतऽनंता, सव्वागसप्पएसेहिं ॥

वृ- चतुर्णामप्यस्तिकायानां पुद्गलास्तिकायस्य च ये अगुरुलघवः पर्यायाः, उपलक्षणमेतत्, बादरस्कन्धानां गुरुलघुपर्यायाश्च, यावन्तश्चाक्षरेषु स्वरूपतोऽभिलाप्यभेदतो वा संयोगाः, यैश्चोदात्तादिभि स्वैररभिलाप्यन्ते भावाः, आदिशब्दाद् ये चान्ये शकुनरुतादिगताः स्वरविशेषाः, ये च जीव-पुद्गलगताश्चेष्टाविशेषास्ते सर्वेऽपि गृह्यन्ते, एतेषां सर्वेषामप्युपलब्धिर्भवति । न च येन स्वभावेनैकस्य तेनैवान्यस्य किन्तु भिन्नेन । तत एतेन प्रकारेण ज्ञानस्य स्वभावाः सर्वाकाशप्रदेशेभ्योऽनन्तगुणाः ॥ तदेवमुक्तं सर्वाकाशप्रदेशेभ्योऽनन्तगुणं ज्ञानम् ।

इदानीं यथा तदक्षरमुच्यते तथा भावयति-

[भा.७२] नाणं तु अक्खरं जेन खरति न कयाइ तं तु जीवातो ।
तस्स उ अनंतभागो, न वरिज्जति सव्वजीवाणं ॥

वृ- 'येन' कारणेन न कदाचिदपि 'तद्' ज्ञानं जीवात् 'क्षरति' भ्रंशमुपयाति तेन कारणेन

Jain Education International For Private & Personal Use Only www.jainelibrary.org

ज्ञानक्षरमुच्यते। कथमेतदवसीयते 'न कदाचिदपि ज्ञानं जीवात् क्षरति' ? इति, अत आह- 'तस्य' अक्षरस्यानन्तभागोऽतिप्रबलेनापि ज्ञानावरणोदयेन संसारस्थानां सर्वजीवानां नाऽऽव्रियते। उक्तञ्च- सव्वजीवाणं पि य णं अक्खरस्स अनंतो भागो निच्चुग्घाडिओ इति। नित्योद्धाटो नाम नित्यापावृतः॥ केन पुनराच्छाद्यते येन ज्ञानस्यानन्तभागो नित्यापावृतः ? इत्याह-

[भा.७३] एक्केक्को जियदेसो, नाणावरणस्स हुंतऽनंतेहिं।
अविभागेहाऽऽवरितो, सव्वजियाणं जिने मोत्तुं॥

वृ- 'जिनान्' केवलज्ञानिनो मुक्त्वा शेषाणां सर्वजीवानाम् एकैको जीवप्रदेशो ज्ञानावरणीयस्य कर्मणोऽनन्तैः 'अविभागैः' अविभागपरिच्छेदैः, येषां ततोऽप्यधो विभागः कर्तुं न शक्यते तेऽविभागपरिच्छेदाः, नैरावृतः॥ यद्येवं कथमनन्तभागो ज्ञानस्य नित्यापावृतः ? इत्याह-

[भा.७४] जति पुन सो वि वरिज्जेज्ज तेन जीवो अजीवयं गच्छे।
सुट्ठु वि मेहसमुदए, होति पभा चंद-सूराणं॥

वृ-यथा 'सुष्ठ्वपि' अतिशयेनापि मेघसमुदये जाते तथास्वभावत्वात् चन्द्र-सूर्याणां प्रभा भवति, तथा प्रत्यक्षत उपलब्धेः; एवमेकैकस्य जीवप्रदेशस्यानन्तैर्ज्ञानावरणाविभागपरिच्छेदैरावणेऽपि तथास्वभावत्वाद् ज्ञानस्यानन्तभागो नित्योद्धाटित एव। यदि पुनः सोऽप्याव्रियेत तत एकान्ततो निश्चेतनत्वाज्जीवः 'अजीवतां गच्छेत्' अजीवो भूयात्, घटवत्॥ ननु कथमुच्यते 'अनन्तभागो नित्योद्धाटः' ? याता समस्ति पृथिव्यादीनां सर्वथा ज्ञानमावृतम्, अत आह-

[भा.७५] अव्वत्तमक्खरं पुन, पंचण्ह वि थीणगिद्धिसहिएणं।
नाणावरणुदएणं, बिंदियमाई कमविसोही॥

वृ- 'पञ्चानामपि' पृथिवीकायिकादीनां वनस्पतिकायपर्यन्तानां स्त्यानगृद्धिनिद्राहितेन ज्ञानावरणोदयेन 'अक्षरं' ज्ञानम् 'अव्यक्तं' सुप्त-मत्त-मूर्च्छितादेरिवास्फुटम्, अतो न तत्रापि सर्वथा ज्ञानमावृतम्, तथापि पृथिवीकायिकानामत्यस्फुटम्, ततोऽप्कायिक-तेजस्कायिक-वायुकायिकवनस्पतिकायिकानां क्रमेण विशुद्धतरम्। इदं चूर्णिकारवचनाल्लिखितम्। ततः क्रमेण द्वीन्द्रियादावक्षरस्य विशुद्धिस्तावद्द्रष्टव्या यावदनुत्तरोपपातिनाम्, ततोऽपि चतुर्दशपूर्विणाम्। उक्तञ्च-

तं चिय विसुज्झमाणं, बिंदियमादी कमेण विन्नेयं।
जा होंतऽनुत्तरसुरा, सव्वविसुद्धं तु पुव्वधरे॥

वृ- इह यद्यपि प्रागक्षरं सर्वाकाशप्रदेशेभ्योऽनन्तगुणं केवलभिप्रेतम्, नित्यापावृतोऽप्यनन्तभागस्तस्यैव, तथापि केवलज्ञानस्येव श्रुतज्ञानस्याप्यनन्तभागो नित्यापावृत इति तेनान्ते योजना कृता॥ उक्तमक्षरश्रुतम्। इदानीमनक्षरश्रुतमाह-

[भा.७६] ऊससियं नीससियं, निच्छूढं खासियं च छीयं च।
निस्सिंघियमनुसारं, अनक्खरं छेलिआदीयं॥

वृ-ऊर्ध्वं श्वसनमुच्छ्वसितम्, अधः श्वसनं निश्वसितम्, निष्ठ्यूतं कासितं क्षुतं निस्सिङ्घितं च प्रतीतम्, 'अनुस्वारम्' अनुस्वारवत्, 'अनक्षरम्' 'शेण्टितम्' गोपजनस्य प्रतीतम्। आदिशब्दाद् जृम्भितमणितादिपरिग्रहः। एतद् 'अनक्षरम्' अनक्षरश्रुतम्। उच्छ्वसितादिभ्योऽपि हि

Jain Education International For Private & Personal Use Only www.jainelibrary.org

विवक्षितार्थप्रतिपत्तिर्भवात, न च तदक्षरात्मकम्, अताऽनक्षरश्रुतम् ।। तत्र यथाऽनक्षरादप्यर्थप्रतिपत्तिरुपजायते तथा निदर्शनेन प्रतिपादयति-

[भा.७७] टिट्टि त्ति नंदगोवस्सबालिया वच्छए निवारेइ ।
टिट्टि त्ति य मुद्धडए, सेसे लट्ठीनिवाएणं ।।

वृ- नन्दगोपस्य बालिका क्षेत्रादिकं रक्षन्ती 'वत्सकान्' बालगोरूपान् 'टिट्टि' इति अनुकरणानुरूपमनुकार्यमुच्चरन्ती निवारयति । तथा ये मुग्धाः-हरिणादयः तानपि 'टिट्टे' इत्येवं निवारयति । 'शेषांस्तु' षण्डप्रभृतीन् यष्टिनिपातेन निवारयति । अत्र 'टिट्टि' इत्येतदनक्षरमपि वत्सादीनां प्रतिषेधलक्षणार्थप्रतिपत्तिहेतुरुपजायत इत्यनक्षरश्रुतं निदर्शितम् । एवं शेषमपि भावनीयम् ।। उक्तमनक्षरश्रुतम् ।। अधुना संज्ञिश्रुतमाह-

[भा.७८] सन्नाणेणं सण्णी, कालिय हेऊ य दिट्ठिवाए य ।
आदेसा तिन्नि भवे, तेसिं च परूवणा इणमो ।।

वृ- संज्ञानेन संज्ञी, 'संज्ञानं संज्ञा, सा यस्यास्ति स संज्ञी' इति व्युत्पत्तेः । तत्र तत्र आदेशा भवन्ति, तद्यथा-''कालिय''त्ति पदैकदेशेपदसमुदायोपचारात कालिक्युपदेशेन हेतूपदेशेन दृष्टिवादोपदेशेन च ।। तत्र कालिक्युपदेशेन संज्ञा यस्य ईहा-ऽपोह-मार्गण-गवेषणादयो मनोव्यापारास्ते कथं भवन्ति ? इत्यत आह-

[भा.७९] खंधेऽनंतपसे, मणजोगे गिज्झ गणणतोऽनंते ।
तल्लद्धि मणेति तहा, भासादव्वे व भासंते ।।

वृ- यथा भाषालब्धिसमेतो भाषाद्रव्याण्युपादाय भाषते, तथा तस्मिन्-मनसि लब्धिर्यस्य सः 'तल्लब्धि' मनोलब्ध्युपेतो मनोयोग्यान् स्कन्धाननन्तप्रदेशान् 'गणनया' सङ्ख्यानेनानन्तान् गृहीत्वा मनुते । किमुक्तं भवति ? -तैर्मनोद्रव्यैरीहा-ऽपोह-मार्गणातस्तांस्तान् भावान् जानाति।। कथम् ? इत्याह-

[भा.८०] रूवे जहोवलद्धी, चक्खुमतो दंसिए पगासेण ।
इय छव्विहमुवओगो, मनदव्वपगासिए अत्थे ।।

वृ- यथा चक्षुष्मतः 'रूपे' घटादौ 'प्रकाशेन' प्रदीपादिना 'दर्शिते' प्रकाशिते चक्षुषा उपलब्धिः 'इति' एवम्-उक्तेन प्रकारेण मनोद्रव्यैः प्रकाशिते-मनितेऽर्थे 'षड्विधः' शब्द-रूप-रस-गन्धस्पर्शाऽतीता ऽनागतभावविषयः स्पष्टतर उपयोगो भवति । यश्चईहा-ऽपोहादिकरणतः स्पष्टतर उपयोगः स दीर्घकालिक्युपदेशेन संज्ञिश्रुतम् । यस्य तु मनोद्रव्याभावतो नेहादि सोऽसंज्ञी।। अथ मनोद्रव्याभावे कथमसंज्ञिनामर्थावगमः ? तत आह-

[भा.८१] एसेव य दिट्ठंतो, नातिफुडे खलु जहा पगासेणं ।
होउवलद्धी रूवे, असण्णीणं तहा विसए ।।

वृ- 'एष एव' चक्षुर्लक्षणो दृष्टान्तोऽसंज्ञिनोऽर्थावगमे द्रष्टव्यः । यथा खलु चक्षुष्मतो रूपे 'प्रकाशेन' प्रदीपादिना मन्दतया नातिस्फुटे प्रकाशिते उपलब्धिर्मन्दा भवति तथा 'विषये' शब्दादौ असंज्ञिनां विशिष्टमनोद्रव्यलब्ध्यभवे उपयोगो मन्दो भवति ।। अथवाऽन्यो दृष्टान्तः-

[भा.८२] अहवा मुच्छित मत्ते, पासुत्ता वा वि होइ उवलंभो ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

इय होति असन्नीणं, उवलंभो इंदिया जेसिं ॥

वृ- 'अथवा' इति दृष्टान्तस्य प्रकारान्तरोपदर्शने । मूर्च्छिते मत्ते प्रसुप्ते वा यथा अव्यक्त उपलम्भो भवति 'इति' एवं यति येषामिन्द्रियाणि तेषामसंज्ञिनां ततिविध उपयोगः स्फुटो भवति॥ अथ तुल्ये चेतनत्वे किमिति संज्ञिनां प्रागल्भ्येन प्रागलभ्येन चैतन्यम् ? अव्यक्तमसंज्ञिनाम् ? इति, अत आह-

[भा.८३] तुल्ले छेयणभावे, जं सामत्थं तु चक्करयणस्स ।
तं तु जहक्कमहीणं, न होइ सरपत्तमादीणं ॥

वृ- यथा तुल्ये 'छेदनभावे' छेदनत्वे यत् सामर्थ्यं चक्ररत्नस्य तद् यथाक्रमहीनं, हेतौ प्रथमा, यथाक्रमहीनत्वात् शरपत्रादीनाम्, आदिशब्दाद्दर्भादिपरिग्रहः, न भवति ॥

[भा.८४] एवं मनविसईणं, जा पडुया होइ उग्गहाईसु ।
तुल्ले चेयणभावे, न होइ अस्सण्णिणं सा तु ॥

वृ. एवम् 'मनोविषयिणां' मनोग्राह्यो विषयो येषामस्ति ते मनोविषयिणस्तेषाम् अवग्रहादिषु या पटुता भवति सा तुल्येऽपि चेतनभावे न भवत्यसंज्ञिनाम्, मनोद्रव्यलब्ध्यभावात् ॥ उक्तः कालिक्युपदेशेन संज्ञी असंज्ञी च । अधुना हेतूपदेशतस्तमाह-

[भा.८५] जेसि पवित्ति-निवित्ती, इट्ठा-ऽनिट्ठेसु होइ विसएसु ।
ते हेउवाउ सन्नी, वेहम्मेणं घडो नायं ॥

वृ- 'येषां' द्वीन्द्रियादीनां इष्टेषु विषयेषु प्रवृत्ति अनिष्टेषु निवृत्ति ते हेतुवादतः संज्ञिनः । अत्र वैधर्म्येर्ण 'ज्ञातं' दृष्टान्तो घटः, अनेन प्रयोगः सूचितः । स चायम्-द्वीन्द्रियादयः संज्ञिनः, इष्टा-ऽनिष्टविषयेषु यथाक्रमं प्रवृत्ति-निवृत्तिदर्शनात्, पुरुषवत्; ये तु न संज्ञिनस्तेषामिष्टा-ऽनिष्टविषयेषु प्रवृत्ति-निवृत्ती, तस्मादसंज्ञिनस्त इति ॥ उक्तो हेतुवादतोऽपि संज्ञी असंज्ञी च । सम्प्रति दृष्टिवादोपदेशेनोच्यते-ये सम्यग्दृष्टयस्ते दृष्टिवादोपदेशेन संज्ञिनः, शेषाः सर्वेऽपि मिथ्यादृष्ट्योऽसंज्ञिनः । उक्तञ्च-

सम्मद्दिट्ठी सन्नी, दिट्ठीवायस्स होंति उवएसा ।
सेसा होंति असन्नी, कालिय तह हेउसन्नी य ॥

ननु सम्यग्ज्ञानं मिथ्याज्ञानं च द्वे अपि क्षायोशमिके, ततः कस्मादेकः संज्ञी अपरोऽसंज्ञी इति, अत आह-

[भा.८६]होइ असीला नारी, जा खलु पतिणो न रक्खए सेज्जं ।
तं पि य हु होंति सीलं, असोहणं तेन उ असीला ॥

वृ- या खलु लोके नारी पत्युः शय्यां न रक्षति सा भवत्यशीला, यतो यद्यपि 'तदपि' पत्युः शय्याया अरक्षणं शीलं तथापि तदशोभनमिति कृत्वा सा अशीला ॥

[भा.८७] एवं खओवसमिएष जे वट्टंते उ नाणविसयम्मि ।
ते खलु हवंति सण्णी, अण्णाणी होंति अस्सण्णी ॥

वृ- एवं तुल्येऽपि क्षायोपशमिके भावे ये 'ज्ञानविषये' सम्यग्ज्ञाने वर्तन्ते ते संज्ञिनः, 'सम्यग्ज्ञानं संज्ञा, सा येषामस्ति ते संज्ञिनः' इति व्युत्पत्तेः । ये त्वज्ञानिनस्तेऽसंज्ञिनः,

Jain Education International For Private & Personal Use Only www.jainelibrary.org

कुत्सितसंज्ञकत्वात् ।। तदेवमुक्तं संज्ञिश्रुतमसंज्ञिश्रुतं च । सम्प्रति सम्यकश्रुत-मिथ्याश्रुते द्वे अपि युगपदाह-

[भा.८८] अंगा-ऽनंगपविट्ठं, सम्मसुयं लोइयं तु मिच्छसुयं ।
आसज्ज उ सामित्तं, लोइय लोउत्तरे भयणा ।।

वृ- स्वरूपेण लोकोत्तरिकम् अङ्गा-ऽनङ्गप्रविष्टं सम्यकश्रुतम्, लौकिकं मिथ्याश्रुतम् । स्वात्वमासाद्य पुनर्लौकिके लोकोत्तरे च 'भजना' लौकिकमपि कदाचित् सम्यकश्रुतं लोकोत्तरमपि मिथ्याश्रुतमित्यार्थः । तथाहि-लौकिकमपि सम्यग्दृष्टिपरिगृहीतं सम्यकश्रुतम्, मिथ्यादृष्टिपरिगृहीतं लोकोत्तरमपि मिथ्याश्रुतमिति ।। अथ येन सम्यक्त्वेन परिगृहीतं सम्यकश्रुतं भवति तत् किंप्रत्ययम्? अत आह-

[भा.८९] आभिनिबोहमवायं, वयंति तप्पच्चयाउ सम्मत्तं ।
जा मनपज्जवनाणी, सम्मद्दिट्ठी उ केवलिणो ।।

वृ- 'आभिनिबोधिकः' आभिनिबोधिकभेदो योऽपायो यद्वशाद् यथावस्तितार्थविनिश्चयस्तं सम्यक्त्वस्य प्रत्ययं वदन्ति पूर्वूरयः, सम्यग्ज्ञाने सम्यकश्रद्धानभावात् । 'तत्प्रत्ययाच्च' अपायप्रत्ययाच्च सम्यकत्वं तावदवसेयं यावन्मनः पर्यायज्ञानिनः, ततः परमपायस्याभावात् । केवलिनः केवलज्ञानप्रत्ययादेव सम्यग्दृष्टयः ।। अथ तत् सम्यग्दर्शनं कतिविधम् ? अत आह-

[भा.९०] उवसमियं सासायणं, खओवसमियं च वेदगं खइयं ।
सम्मत्तं पंचविहं, जह लब्भइ तं तहा वोच्छं ।।

वृ- सम्यक्त्वं पञ्चविधम् । तद्यथा-औपशामिकं सासादनं क्षायोपशमिकं वेदकं क्षायिकं च । एतत् पञ्चप्रकारमपि यथा लभ्यते तथा वक्ष्यामि ।। तदेवाह-

[भा.९१] बंधट्ठितीपमाणं, सामित्तं चेव सव्वपगडीणं ।
को केवइयं बंधइ, खवेइ वा कित्तियं कोइ ।।

वृ- सम्यकत्वं कर्मणां क्षयत उपशमतः क्षयोपशमतश्चोपजायते । क्षयादयश्च त्रयः प्रकारा बद्धानां कर्मणां नाबद्धानामिति प्रथमतो बन्धतः स्थितिप्रमाणं जघन्यत उत्कर्षतश्च वक्तव्यम्, तच्चैवम्-ज्ञानावरण-दर्शनावरण-वेदनीया-ऽन्तरायाणां त्रिंशत्सागरोपमकोटीकोट्य उत्कृष्टं स्थितिपरिमाणम्, मोहनीयस्य सप्ततिसागरोपमकोटीकोटयः, नाम-गोत्रयोर्विंशतिसागरोपम-कोटीकोटयः, आयुषस्त्रयस्त्रिंशत्सागरोपमाणि; तथा जघन्यं वेदनीयस्य द्वादश मुहूर्ताः, नाम-गोत्रयोरष्टौ, शेषाणामन्तर्मुहूर्त्तम् । तथा सर्वप्रकृतीनां सत्तामधिकृत्य स्वामित्वं वक्तव्यम्, तच्चैवम्-मिथ्यादृष्टि-सास्वादन-मिश्रा-ऽविरतसम्यग्दृष्टि-देशविरत-प्रमत्ता-ऽप्रमत्ता-ऽपूर्वकरणा-ऽनिवृत्तिबादर-सूक्ष्मसम्परायो-पशान्तमोहा अष्टानामपि प्रकृतीनां स्वामिनः, मोहनीयवर्जानां सप्तानां क्षीणमोहाः, वेद्या-ऽऽयु-र्नाम-गोत्राणां सयोग्य-ऽयोगिकेवलिनः । तथा कः कियद् बध्नाति? इति वक्तव्यम्, तत्र-मिथ्यादृष्टयोऽप्रमत्तान्ताः सप्तविधबन्धका वाऽष्टविधबन्धका वा, अपूर्वकरणाऽनिवृत्तिबादराः सप्तविधबन्धकाः, सूक्ष्मसम्परायाः षड्विहधबन्धकाः, उपशान्तमोह-क्षीणमोहसयोगिकेवलिनः सातवेदनीयैकबन्धकाः, अबन्धका अयोगिकेवलिनः । तथा को वा कियत् क्षपयति ? इति वक्तव्यम्, तत्र-मिथ्यादृष्टय उपशान्तमोहपर्यन्ता अक्षीणाष्टप्रकृतिकाः,

Jain Education International For Private & Personal Use Only www.jainelibrary.org

क्षीणमोहाः क्षीणं मोहनीयमित्यक्षीणसप्तप्रकृतिकाः, सयोग्य-ऽयोगिकेवलिनः क्षीणघातिकर्माणः।। अथ कस्य कर्मण उत्कृष्टायां स्थितौ कस्य नियमत उत्कृष्टा स्थिति ? कस्य वा भजनया ? इति, अत आह-

[भा.९२] आउयवज्जा उ ठिई, मोहोक्कोसम्मि होइ उक्कोसा।
मोहविवज्जुकोसे, मोहो सेसा य भइयाउ ॥

वृ- 'मोहोत्कर्षे' मोहनीयस्योत्कृष्टायां स्थितौ सत्यां नियमत आयुर्वर्जयित्वा शेषाणां कर्मणामुत्कृष्टा स्थितिर्भवति। मोहविवर्जस्य-ज्ञानावरणीयादेरुत्कर्षे-उत्कृष्टायां स्थितौ 'मोहः' मोहनीयं शेषाश्च प्रकृतयः 'भक्ताः' विकल्पिताः कदाचिदुत्कृष्टस्थितिका भवन्ति कदाचिन्नेति भावः ।। तत्र सर्वेषां कर्मणामुत्कृष्टस्थितौ वर्त्तमानः प्रबलमोहाच्छादितत्वान्न किमपि सम्यग्दर्शनं लभते, उक्तञ्च-

अट्ठण्ह वि पगडीणं, उक्कोसठिईए वट्टमाणो उ।
न लभति सम्मदंसण, मिच्छत्तेणं विमोहाओ ।।

किन्तु सप्तानामायुर्वर्जानामभ्यन्तरकोटीकोटयां वर्त्तमानाः । तथा चाह-

[भा.९३०] अंतिमकोडाकोडीए होइ सव्वासि कम्मपगडीणं।
पलियाअसंखभागे, खीणे सेसे हवइ गंठी ।।

वृ- आयुर्वर्जानां सर्वासां कर्मप्रकृतीनामन्तिमायां कोटीकोट्यां स्थितायां तत्रापि पल्योपमस्यासङ्ख्येयतमे भागे क्षीणे शेषे स्थितिदलिके सति सम्यग्दर्शनलाभो भवति। केवलं तदानीं सम्यग्दर्शनलाभान्तरायभूतः कर्कश-घन-रूढ-गुपिलवल्कग्रन्थिरिव दुर्भेदो घनराग-द्वेषपरिणामरूपो ग्रन्थिर्भवति, ततस्तस्मिन् भिन्ने प्रतिपत्तव्यः ।। तस्य च भेदः करणवशात्, अतः करणवक्तव्यतामाह-

[भा.९४] तिविहं च होइ करणं, अहापवत्तं तु भव्व-ऽभव्वाणं।
भवियाण इमे अन्ने, अपुव्वकरणाऽनियट्टी य ।।

वृ- 'करणं' नाम परिणामविशेषः। तत् 'त्रिविधम्' त्रिप्रकारं भवति। तद्यथा-प्रथमं यथाप्रवृत्ताख्यं भव्यानामभव्यानां च साधारणम्। भव्यानां पुनः इमे द्वे अन्ये करणे, अपूर्वकरणम् 'अनिवृत्तिश्च' अनिवृत्तिकरणं च ।। साम्प्रतमेतेषामेव त्रयाणां करणानां कालविभागमाह-

[भा.९५] जा गंठी ता पढमं, गठिं समतिच्छतो अपुव्वं तु।
अनियट्टीकरणं पुण, सम्मत्तपुरक्खडे जीवे ।।

वृ- यावद् ग्रन्थिस्तावत् 'प्रथमम्' यथाप्रवृत्ताख्यं करणम्। ग्रन्थिं 'समतिक्रामतः' भिन्दानस्येत्यर्थः पुनः 'अपूर्वम्' अपूर्वकरणम्। अनिवृत्तिकरणं तु सम्यक्त्वं पुरुस्कृतं येन स सम्यक्त्वपुरस्कृतः तस्मिन् जीवे, सम्यक्त्वाभिमुखे इत्यर्थः ।। अथ यावद्ग्रन्थिस्तावन्निर्गुणस्य सतः कथं कर्मराशेः क्षपणम् ? उच्यते-गिरिसरिदश्स्तरदृष्टान्तात्। ततस्तमेव दृष्टान्तं तत्प्रसङ्गतः शेषकरणयोरपि दृष्टान्तानभिधित्सुर्द्वारगाथामाह-

[भा.९६] नदि पह जर वत्थ जले, विवीलिया पुरिस कोद्दवा चेव।
सम्मद्दंसणलंभे, एते अट्ठ उ उदाहरणा ।।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

वृ-करणवशात् सम्यग्दर्शनलाभे एतान्यष्टावुदाहरणानि। तद्यथा-"नदि" त्ति गिरिनदीप्रस्तरोदाहरणम् १ पथदृष्टान्तः २ ज्वरोदाहरमम् ३ वस्त्रोदाहरणम् ४ जलोदाहरणम् ५ पिपीलिकोदाहरणम् ६ पुरुषोदाहरणम् ७ कोद्रवोदाहरणम् ८।। तत्र प्रथमतो गिरिसरित्प्रस्तरोदाहरं भावयति-

[भा.९७] गिरिसरिसपत्थरेहिं, आहरणं होइ पढमए करणे।
एवमनाभोगियकरणसिद्धितो खवण जा गंठी ।।

वृ-गिरिसरित्प्रस्तरैः 'आहरणं' दृष्टान्तः 'प्रथमे' यथाप्रवृत्ताख्ये करणे भवति। तच्चैवम्-यथा गिरिसरित्प्रस्तरा गिरिसरिज्जलावेगतो घर्षण-घोलनादिना केचिद्वर्तुला भवन्ति केचित्त्र्यस्राःकेचिच्चतुरस्राः, एवम् 'अनाभोगकरणसिद्धितः' यथाप्रवृत्तकरणप्रभावतः सुदीर्घाया अपि कर्मस्थितेस्तावत् क्षपणं यावद्ग्रन्थिरिति ।। अथ 'अनिवृत्तिकरणं सम्यक्त्पुरस्कृते जीवे भवति' इत्युक्तं तत् सम्यक्त्वं कथं लभते ? उच्यते-उपदेशतः स्वयं वा। तथा चात्र पथदृष्टान्तः-

[भा.९८/१] उवएसेण सयं वा, नट्ठपहो कोइ मग्गमोतरति।

वृ-नष्टपथः कोऽपि पुरुषः 'उपदेशेन' अन्यं पृष्ट्वा तस्योपदेशेन मार्गमवतरति, कश्चिन्मार्गानुसारिप्रज्ञतया स्वयमेवेहा-ऽपोहं कृत्वा। एवमिहापि कोऽपि सम्यग्दर्शनमाचार्यादीनामुपदेशतो लभते, कश्चित्स्वयमेव जातिस्मरणादिना ।। अत्रैव ज्वरदृष्टान्तमाह-

[भा.९८/२] जरितो य ओसहेहिं, पउणइ कोई विना तेहिं ।।

वृ-ज्वरितोऽपि कश्चिदौषधैः 'प्रगुणति' प्रगुणीभवति, कश्चित्पुनः 'तैः' औषधैः 'विना' एवमेव। एवमत्तापि कस्यचिद्दर्शनमोह आचार्याद्युपदेशतोऽपगच्छति, कस्यचित्पुनरेवमेव मार्गानुसारितया तत्त्वपर्यालोचनतः। इह ज्वरस्थानीयो दर्शनमोहः, औषधस्थानीय आचार्याद्युपदेशः ।। इह यत्सत्प्रथमतया क्षायोपशमिकसम्यग्दृष्टिरुपजायते सोऽपूर्वकरणवशान्मिथ्यात्वदलिकं त्रिधा करोति। तद्यथा-मिथ्यात्वं सम्यग्मिथ्यात्वं सम्यक्त्वं च। अत्र वस्त्रदृष्टान्तं जलदृष्टान्तं चाऽऽह-

[भा.९९] मइल दरसुद्ध सुद्धं, जह वत्थं होइ किंचि सलिलं वा।
एसेव य दिट्ठंतो, दंसणमोहम्मि तिविहम्मि ।।

वृ-यथा किञ्चिद् वस्त्र सलिलं वा मलिनं भवति, किञ्चिद् 'दरशुद्धम्' ईषद्विशुद्धम्, किञ्चित् शुद्धम्। एष एव दृष्टान्तो दर्शनमोहे त्रिविधे भावनीयः-तदप्यपूर्वकरणवशात् किञ्चित् शुद्धं सम्यकत्वरूपम्, किञ्चिदीषद्विशुद्धं सम्यग्मिथ्यात्वरूपम्, किञ्चित्तथैव मलिनं मिथ्यात्वरूपं स्थितमिति भावः।। अत्राह-कथमभव्यास्तस्मिन् ग्रन्थिदेशेऽवतिष्ठन्ते? कथं वा ततः प्रतिपतन्ति? भव्या वा कथं ग्रन्थिं विभिद्य ततः परतो गच्छन्ति ? उच्यते-पिपीलिकादृष्टान्तात्। तमेवाह-

[भा.१००] अहभावेण पसरिया, अपुव्वकरणेण खाणुमारूढा।
चिट्ठंति तत्थ काई, पिपीलिया काइ उड्डंति ।।

वृ-काश्चित्पिपीलिकाः 'यथाभावेन' अनाभोगतः 'प्रसरिताः' बिलान्निर्गत्य इतस्ततो गन्तुं प्रवृत्ताः। काश्चित्पुनरपूर्वकरणेन स्थाणुमारूढाः। तासामपि मध्ये काश्चित् 'तत्र' स्थाणावेव तिष्ठन्ति याः पक्षविहीनाः। काश्चित्सञ्जातपक्षास्ततः 'उड्डयन्ते' ऊर्ध्वमाकाशेन गच्छन्ति ।।

[भा.१०१] पच्चोरुहणट्ठा खाणुआतो चिट्ठंति तत्थ एवावि।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

पक्खविहूणातो पिवीलियातो उड्डंति उ सपक्खा ॥

वृ-उत्तरार्द्धस्यैव व्याख्यानार्थमनन्तरगाथा "पच्चोरुहणट्ठा" इत्यादि । काश्चित् पक्षविहीनाः पिपीलिकाः स्थाणोःप्रत्यवरोहणार्थं 'तत्रैव' स्थाणावेव तिष्ठन्ति, अपिशब्दात् प्रत्यवरोहन्ति च । यास्तु सपक्षास्ता उड्डीयन्ते । इह पिपीलिकानामितस्ततः प्रसरणं यथाप्रवृत्तकरणतः, स्थाण्वारोहणमपूर्वकरणतः, उड्डयनमनिवृत्तिकरमेन; एवमत्तापि ग्रन्थिदेशगमनं यथा-प्रवृत्तिकरणेन, ग्रन्थिभेदनमपूर्वकरणतः, स्थित्वा च ततः प्रत्यवतीर्णा, तथा कोऽपि मन्दाध्यवसायतया तीव्रविशोधिरहितोऽपूर्वकरणेन ग्रन्थिभिदामाधातुमुद्यतः समुच्छलितघनराग-द्वेषपरिणामस्तत्रैव तिष्ठति, स्थित्वा च पुनः पश्चात्ततः प्रतिनिर्वर्त्तते ॥ अत्रैवार्थे पुरुषदृष्टान्तमाह-

[भा.१०२] जह वा तिन्न मनूसा, सभयं पंथं भएण वच्चंता ।
वेलाइक्कमतुरिया, वयंति पत्ता य दो चोरा ॥

वृ- वाशब्दो दृष्टान्तान्तरसमुच्चये । यथा त्रयो मनुष्याः सभयं पन्थानं भयेन पाठान्तरं क्रमेणं व्रजन्तः 'वेलातिक्रमत्वरिताः' सन्ध्यासमापतनेन गमनवेलातिक्रमतस्त्वरमाणा व्रजन्ति । अत्रान्तरे चोभयपार्श्वतः प्राप्तौ पाणिकृपाणकरालौ द्वौ चौरौ । तौ च हक्कयन्तावेवमाक्षिपतः-क यास्यथ यूयम् ? मरणमेव युष्माकमिदानीं समापतितमिति ॥

[भा.१०३] तत्थेगो उ नियत्तो, एगो थद्धो अतिच्छितो एक्को ।
कमगति अहापवत्तं, भिन्नेयर धावणं तइए ॥

वृ- तत्र 'एकः' पुरुषस्तौ समापतन्तौ दृष्ट्वा प्रथमएव निवृत्तः । 'एकः' पुनर्द्वितीयो हक्काश्रवणत उद्गीर्णकृपाणदर्शनतश्च भयेन 'स्तब्धः' तत्रैव स्थितः । 'एकः' तृतीयः पुनः परमसाहसिकः प्रत्युद्गीर्णखङ्गस्तौ द्वावपि चौरौ पश्चात्कृत्य तत्स्थानमतिक्रान्तः । इह या त्रयाणामपि पुरुषाणां प्रथमतः क्रमेण गति सा यथाप्रवृत्तिकरणम्, यत् पुनस्तद्भयं भिन्नं तद् 'इतरद्' अपूर्वकरणम्, यत्तु ततः परतो धावनं तत् 'तृतीये' अनिवृत्ताख्ये करणे द्रष्टव्यम् ॥ तदेवं दृष्टान्तद्वयमभिधाय साम्प्रतमुपनयन्नाह-

[भा.१०४] एवं संसारीणं, जोए सव्वाइं तिन्नि करणाइं ।
भवसिद्धिसलद्धीण य, पंखालपिवीलिया उवमा ॥

वृ- 'एवम्' अमुना दृष्टान्तगतेन प्रकारेण यानि त्रीणि करणानि प्रागभिहितानि तानि सर्वाणि संसारिणां योजयेत् । तत्र पिपीलिका दृष्टान्तमधिकृत्य प्रागेव योजिताः । नवरं याः पक्षवत्यः पिपीलिका उक्तास्ताभिरुपमा भवसिद्धिसलब्धिकानां द्रष्टव्या । भवैः सिद्धिर्येषां ते भवसिद्धिकाः कतिपयभवमोक्षगामिन इत्यर्थः, तेऽपि कदाचित् प्रतिपतन्ति तत आह-सलब्धि-उत्तरोत्तरविशुद्धाध्यवसायप्राप्तिर्येषां ते सलब्धिकाः, ततो विशेषणसमासस्तेषाम् । किमुक्तं भवति ? -सपक्षपिपीलिका इव केचित् संसारिणो भवसिद्धिकाः सलब्धिकाः स्थाणोरिव ग्रन्थिदेशादपि परतो गच्छन्ति, केचित् पुनरभव्या भव्या वा केचन पक्षविहीनपिपीलिका इव स्थाणोरिव ग्रन्थिदेशात् प्रतिपतन्ति । पुरुषदृष्टान्तमधिकृत्यैवं योजना-पुरुषस्थानीयाः संसारिजीवाः, कर्मक्षपणस्थानीयः पन्थाः, भयस्थानीयो ग्रन्थि, द्वौ चौरौ राग द्वेषौ; यस्तु मन्दपराक्रमो न पुरतो न मार्गतः किन्तु भयेन तत्रैव स्थितस्तत्सदृशो ग्रन्थिदेशे वर्त्तमानो भव्योऽभव्यो वा, स च तत्र सङ्ख्येयमसङ्ख्येयं

Jain Education International	For Private & Personal Use Only	www.jainelibrary.org

वा कालं तिष्ठति ॥ तत्र स्थितस्य को लाभः ? इति चेत्, उच्यते-श्रुतलाभः । तथा चाह-

[भा.१०५] दट्ठूण जिनवराणं, पूयं अन्ने वा वि कज्जेण ।
सुयलंभो उ अभव्वे, हविज्ज थंभेण उवनीए ॥

वृ- यः स्तम्भेन 'उपनीतः' उपनयं प्रापितस्तस्मिन् अभव्ये तुशब्दाद् भव्ये च भवति 'श्रुतलाभः' द्रव्यश्रुतलाभः । कथम् ? इति चेत्, अत आह-''दट्ठूणेत्यादि । स हि ग्रन्थिकसत्त्वो भव्योऽभव्यो वा भगवतां जिनवराणां पूजां दृष्ट्वा 'अहो ! कीदृशं तपसः फलम् ?' इति परिभाव्य तदर्थिकतया अन्येन वा कार्येण स्वर्गसुखार्थित्वादिना प्रव्रज्यामभ्युपगच्छति, ततः सामायिकादिद्रव्यश्रुतलाभः । ग्रन्थौ चैवं कियन्तं कालं स्थित्वा पुनः पश्चात् प्रतिनिवर्तते ॥ येनाप्यनिवृत्तिकरणतः सम्यक्त्वमासादितं तस्यापि द्वौ प्रकारौ-केचित् परिणामतो वर्धन्ते, केचिद् हानिमुपगच्छन्ति । तत्र ये हानिं गच्छन्ति ते प्रतिपतन्ति, इतरे श्रावकत्वादीनि पदानि लभन्ते । तत्र जघन्यतः समकमेव, यत उक्तम्- सम्मत्त-चरिताइं, जुगवं पुव्वं व सम्मत्तं । उत्कर्षतः पुनरेवम्-

[भा.१०६] सम्मत्तम्मि उ लद्धे, पलियपुहुत्तेण सावगो होज्जा ।
चरणोवसमःकयाणं, सागरसंखंतरा होंति ॥

वृ- सम्यक्त्वे लब्धे 'पल्यपृथक्त्वेन' पल्योपमपृथक्त्वे गते 'श्रावकः' देशविरतो भवति । ततश्चरणोपशम-क्षयाणामन्तराणि सङ्ख्यातानि सागरोपमानि भवन्ति । इयमत्र भावना- देशविरतिप्राप्त्यनन्तरं सङ्ख्यातेषु सागरोपमेषु गतेषु चरणलाभः, तदनन्तरं भूयः सङ्ख्यातेषु सागरोपमेषु गतेषूपशमश्रेणिलाभः, ततोऽपि परतः सङ्ख्येयेषु सागरोपमेष्वतिक्रान्तेषु क्षपकश्रेणि, ततस्तद्भवे मोक्षः ॥

[भा.१०७] एवं अप्परिवडिएष सम्मत्ते देव-मनुयजम्मेसु ।
अन्नयरसेढिवज्जं, एगभवेणं च सव्वाइं ॥

वृ- 'एवं' अमुना प्रकारेणाप्रतिपतितसम्यक्त्वे देव-मनुजजन्मसु वर्त्तमानस्य प्रतिपत्तव्यम् । यदि वा 'अन्यतरश्रेणिवर्जं' उपशमश्रेणिवर्जं क्षपकश्रेणिवर्जं वा एकभवेन सर्वाणि देशविरत्यादीनि प्रतिपद्यते, श्रेणिद्वयप्रतिपत्तिस्त्वेकस्मिन् भवे न भवति । यत् उक्तम्-

मोहोपशम एकस्मिन्, भवे द्वि स्यादसन्ततः ।
यस्मिन् भवे तूपशमः, क्षयो मोहस्य तत्र न ॥

सम्प्रति यदुक्तं प्राग् ''मिथ्यात्वमपूर्वकरणेन त्रिधा करोति'' तत्र कोद्रवदृष्टान्तमाह-

[भा.१०८] अप्पुव्वेण तिपुंजं, मिच्छं काऊण कोद्दवोवमया ।
तिन्नि वि अवेययंतो, उवसामगसम्मदिट्ठीओ ॥

वृ- 'कोद्रोपमया' कोद्रवदृष्टान्तेन अपूर्वकरणेन मिथ्यात्वं त्रिपुञ्जं कृत्वाऽनिवृत्तिकरणेन तत्प्रथमतया क्षायोपशमिकं सम्यकत्वंमासादयति । ततः परिणामवशतः कालान्तरेण मिश्रं मिथ्यात्वं वा गच्छति । यत्स्वपूर्वकरणमारूढोऽपि । ततः परिणामवशतः कालान्तरेण मिश्रं मिथ्यात्वं वा गच्छति । यस्त्वपूर्वकरणमारूढोऽपि मन्दाध्यवसायतया मिथ्यात्वं त्रिपुञ्जीकर्तुमसमर्थः सोऽनिवृत्तिकरणमुपगतोऽन्तरकरणं कृत्वा तत्र प्रविष्टो न किञ्चिदपि वेदयते, स च 'त्रिण्यपि' त्रयाणामन्यतमदप्यवेदयमान उपशमकः सम्यग्दृष्टिरुच्यते ॥ ''कोद्रवोपमया'' इत्युक्तम्,

Jain Education International For Private & Personal Use Only www.jainelibrary.org

अतस्तामेव कोद्रवोपमां भावयति-

[भा.१०९] जह मयणकोद्दवा ऊ, दरनिव्वलिया य निव्वलीया य।
एमेव मिच्छ मीसं, सम्मं वा होति जीवाणं ॥

वृ-यथा कोद्रवास्त्रिविधा भवन्ति, तद्यथा-मदनकोद्रवाः 'दरनिर्म्मलिताः' ईषदपगतमदनभावाः 'निर्वलिताः' सर्वथाऽपगतमदनभावाः। एवं जीवानां मिथ्यात्वं त्रिधा भवति-मिथ्यात्वं 'मिश्रं' सम्यग्मिथ्यात्वं सम्यक्त्वं वा ॥

[भा.११०] कालेनुवक्कमेण व, जह नासति कोद्दवाण मदभावो।
अहिगमसम्मं नेसग्गियं च तह होइ जीवाणं ॥

वृ- यथा कोद्रवाणां मदनभावः केषाञ्चित् 'कालेन' एवमेवापगच्छति, केषाञ्चिद् गोयमादिभिरुपक्रमतः; एवं केषाञ्चिद् जीवानामुपक्रमसद्दशमधिगसम्यकत्वं भवति, केषाञ्चित् कालेन स्वत एवापगतमदनभावकोद्रवाणां सदृशं नैसर्गिकसम्यक्त्वम्। किमुक्तं भवति ?-केषाञ्चिदधिगमतो मिथ्यात्वपुद्गलाः सम्यक्त्वीभवन्ति, केषाञ्चित् स्वत एव तथापरिणामविशेषभावतः ॥ एतदेव स्पष्टयति-

[भा.१११] सोऊण अहिसमेच्च व, करेइ सो वड्ढमाणपरिणामो।
मिच्छे सम्मामिच्छे, सम्मे वि य पोग्गले समयं ॥

वृ- श्रुत्वा केवलिप्रभृतीनां वचः 'अभिसमेत्य वा' जातिस्मरणादिना सम्यक्त्वमवगम्य 'सः' अपूर्वकरणे वर्त्तमानो वर्धमानपरिणामः 'समकं' एककालं मिथ्यात्वपुद्गलान् त्रिधाकरोति। तद्यथा-'मिच्छे' इति मिथ्यात्वपुद्गलान् सम्यग्मिथ्यात्वपुद्गलान् सम्यक्त्वपुद्गलानिति ॥ अथैषां पुद्गलानां परस्परं सङ्क्रमो भवति ? किं वा न ? इति, उच्यते-भवतीति ब्रूमः। तथा चाह-

[भा.११२] मिच्छत्ताओ मीसे, मीसस्स उ होज्ज संकमो दोसुं।
सम्मे वा मिच्छे वा, सम्मा मिच्छं न पुन मीसं ॥

वृ- 'मिथ्यात्वात्' मिथ्यात्वदलिकात् सम्यग्दृष्टि प्रवर्धमानपरिणामः पुद्गलानाकृष्य मिश्रे उपलक्षणमेतत् मिथ्यात्वदलिकात् सम्यकत्वे च सङ्क्रमयति। मिश्रस्य पुद्गलानां सङ्क्रमो द्वयोर्भवति। तद्यथा-सम्यक्त्वे मिथ्यात्वे च। तत्र सम्यग्दृष्टि सम्यक्त्वे सङ्क्रमयति मिथ्यादृष्टिर्मिथ्यात्वे। 'सम्यक्त्वात्' सम्यक्त्वदलिकात् पुनः पुद्गलान्मिथ्यात्वं
सङ्क्रमयति न पुनर्मिश्रमिति ॥ साम्प्रतममुमेवार्थं प्रकारान्तरेणाह-

[भा.११३] मिच्छत्ताओ अहवा, मीसं सम्मं च कोइ संकमइ।
मीसाओ वा सम्मं, गुणवुड्ढी हायतो मिच्छं ॥

वृ- 'अथवा' इत्युक्तस्यैवार्थस्य भणनप्रकारान्तरद्योतने। 'मिथ्यात्वात्' मिथ्यात्वदलिकात् पुद्गलानाकृष्य कश्चिन्मिश्रं सम्यक्तवं च सङ्क्रमयति। यदि वा कश्चिद्गुणैर्वृद्धिर्यस्य स गुणवृद्धिप्रवर्धमानपरिणामः सम्यग्दृष्टिरित्यर्थः 'मिश्रात् मिश्रदलिकात् पुद्गलानादाय सम्यकत्वं सङ्क्रमप्रवर्धमानपरिणामः सम्यग्दृष्टिरित्यर्थः 'मिश्रात्' मिश्रदलिकात् पुद्गलानादाय सम्यक्त्वं सङ्क्रमयति। 'हायकः' हीनपरिणामो मिथ्यादृष्टिरित्यर्थः मिश्रात् पुद्गलानाकृष्य मिथ्यात्वं सङ्क्रमयति ॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

[भा.११४] मिच्छत्ता संकंती, अविरुद्धा होति सम्म-मीसेसु ।
मीसातो वा दुन्नि वि, न उ सम्मा परिणमे मीसं ।।

वृ- मिथ्यात्वात् पुद्गलसङ्क्रान्ति सम्यक्त्व-मिश्रोयोरविरुद्धा । 'मिश्रतो वा' सम्यग्मिथ्यात्वतो वा पुद्गलानादाय द्वावपि सङ्क्रमयति । तद्यथा-मिथ्यात्वं सम्यक्त्वं च । य[illegible]क्तमनन्तरम् । 'सम्यक्त्वात्' सम्यक्त्वदलिकात् पुनः पुद्गलानादाय न 'मिश्रं' मिश्रभावं परिमयति ।।

[भा.११५] हायंते परिणामे, न कुणति मीसे उ पोग्गले सम्मे ।
न य सोहिया सि विज्जंति केइ जे दानि वेएज्जा ।।

वृ-यस्य तु सम्यग्दर्शनलाभे हीयमानः परिणामः स तस्मिन् हीयमाने परिणामे न मिश्रान् पुद्गलान् तुशब्दात् मिथ्यात्वपुद्गलांश्च सम्यक्त्वपुद्गलान् करोति । न च 'से' तस्य 'शोधिताः' पूर्वशोधिताः केचिदन्ये पुद्गला विद्यन्ते यान् 'इदानीम्' अधिकृतसम्यक्त्वपुञ्जनिष्ठाकाले वेदयेत्।।

[भा.११६] सम्मत्तपोग्गलाणं, वेदेउं सो य अंतिमं गासं ।
पच्छाकडसम्मत्तो, मिच्छत्तं चेव संकमति ।।

वृ-ततः सम्यक्त्वपुद्गलानामन्तिमग्रासं वेदयित्वा पश्चात्कृतसम्यक्त्वोऽपि मिथ्यात्वमेव सङ्क्रामति ।।

[भा.११७] मिच्छत्तम्मि अखीणे, तेपुंजी सम्मदिट्ठिणो नियमा ।
खीणम्मि उ मिच्छत्ते,दु-एकपुंजी व खवगो वा ।।

वृ-अक्षीणे मिथ्यात्वे ये सम्यग्दृष्टयस्ते नियमात् त्रिपुञ्जिनः । क्षीणे तु मिथ्यात्वे द्विपुञ्जी मिथ्यात्वपुञ्जस्य क्षीणत्वाद्, एकपुञ्जी वा मिश्रपुञ्जक्षये । यदिवा क्षपकः सम्यक्त्वपुञ्जस्यापि क्षये । तदेवं त्रयाणामपि पुञ्जानां दृष्टान्तेन निर्णयः कृतः स्वरूपं च व्यावर्णितम्, साम्प्रतं पुञ्जत्रयस्याप्यवेदनत औपशमिकसम्यग्दृष्टिमाह-

[भा.११८] उवसामगसेढिगयस्स होति उवसामियं तु सम्मत्तं ।
जो वा अकयतिपुंजो, अखवियमिच्छओ लहइ सम्मं ।।

वृ-उपशमकश्रेणिगतस्य भवति सम्यक्त्वमौपशमिकम्, यो वा 'अकृतत्रिपुञ्जः' अपूर्वकरणे पुञ्जत्रयाकरणतः । तत्र क्षपकोऽपि दर्शनसप्तकस्यापूर्वकरणमारूढः पुञ्जत्रयं न करोति ततस्तद्यवच्छेदार्थमाह-अक्षपितमिथ्यात्वो यल्लभते सम्यक्त्वं तदौपशमिकं सम्यक्त्वमिति ।। एतौ द्वावप्यौपशमिकसम्यग्दृष्टी सम्यक्त्वमौपशमिकमन्तर्मुहूर्तमनुभूय तदनन्तरमवश्यं प्रतिपततः, तत्र दृष्टान्तद्वयमाह-

[भा.११९] वाही असव्वछिन्नो, कालाविक्खंकुरु व्व दड्ढदुमो ।
उवसामगाण दोण्हवि, एते खलु होंति दिट्ठंता ।।

वृ-यथा व्याधिरसर्वच्छिन्नः 'कालापेक्षं' क्रियाविशेषणमेतत् कालमपेक्ष्येत्यर्थः पुनरुद्भवति, दग्धो वा द्रुमः कालापेक्षं यथाङ्कुरं मुञ्चति; एवमुपशमितमपि मिथ्यात्वं कालमपेक्ष्य पुनरुद्रिक्तीभवतीति द्वयोरपि प्रतिपातः । तथा चाह-द्वयोरप्युपशमकयोरेतौ भवतो दृष्टान्तौ ।।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

तत्रोपशमश्रेणिगत औपशमिकसम्यग्दर्शनी देशप्रतिपातेन वा प्रतिपतति सर्वप्रतिपातेन वा। इतरोऽवश्यमेव सर्वप्रतिपातेन प्रतिपतति, मिथ्यात्वं गच्छतीत्यर्थः। तत्र दृष्टान्तमाह-

[भा.१२०] आलंबणमलहंती, जह सट्ठाणं न मुंचए इलिया।
एवं अकयतिपुंजो, मिच्छं चिय उवसमी एति ॥

वृ- इह या तृणादिषु मुखप्रदेशेन सर्वतोऽग्रेतनं स्थानं परिभाव्य ततोऽग्रेतनं स्थानं सङ्क्रामति अन्यथा पश्चाद्वलते सा इलिका यथा पुरत आलम्बनमलभमाना स्वस्थानं न मुञ्चति; एवमकृततिपुञ्जो गत्यन्तराभावाद् मिथ्यात्वमेवोपशमी याति। इयमत्र भावना-द्विविधस्तत्प्रथमतया सम्यग्दर्शन-प्रतिपत्ता, अतिविशुद्धो मन्दविशुद्धश्च। तत्र योऽतिविशुद्धः क्षायोपशमिकं सम्यग्दर्शनमासादयति सम्यक्त्वपुञ्जोदयात्। यस्तु मन्दविशुद्धः सोऽपूर्वकरणमप्रूढस्तीव्राध्यवसायाभावात् न मिथ्यात्वं त्रिपुञ्जीकर्त्तुमलम्, ततोऽनिवृत्तिकरणमुपगतोऽन्तरकरणं कृत्वा तत्र प्रविष्टस्तत्प्रथमतया औपशमिकसम्यग्दर्शनमनुभवति, अन्तकरणं चान्तर्मुहूर्त्तप्रमाणम्, अतस्तदर्द्धाक्षयेऽन्येषां पुद्गलानामभावतो मिथ्यात्वमेति ॥ एतदेवाह-

[भा.१२१] खीणम्मि उदिन्नम्मी, अनुइज्जंते च सेसमिच्छत्ते।
अंतोमुहुत्तकालं, उवसमसम्मं लहइ जीवो ॥

वृ- अनिवृत्तिकरणे प्रविष्टस्य यद् मिथ्यात्वं उदीर्णम्-उदयावलिकाप्रविष्टं तस्मिन् क्षीणे शेषे च मिथ्यात्वेऽपान्तरालेऽन्तरकरणतोऽनुदीयमानेऽन्तर्मुहूर्त्तं कालमौपशमिकं सम्यक्त्वं जीवो लभते, मिथ्यात्वदर्शनवेदनाऽभावात् ॥ सोऽपि कथम् इत्यत आह-

[भा.१२२] ऊसरदेसं दड्ढेल्लयं च विज्झाइ वणदवो पप्प।
इय मिच्छस्स अनुदए, उवसमसम्मं मुणेयव्वं ॥

वृ- यथा वनदवः 'ऊसरदेशं' तृणादिरहितं प्रदेशं दग्धं वा प्राप्य विध्यायति, 'इति' एवमन्तरकरणे प्रविष्टस्य मिथ्यात्वपुद्गलाभावात् 'मिथ्यात्वस्य' मिथ्यादर्शनस्य अनुदयः-अवेदनम् ततस्तस्मिन् सत्यौपशमिकं सम्यक्तं ज्ञातव्यम् ॥ किञ्च–

[भा.१२३] जिम्हीभवंति उदया, कम्माणं अत्थि सुत्त उवदेसो।
उववायादी सायं, जह नेरइया अनुभवंति ॥

वृ- द्विविधेऽप्यौपशमिकसम्यग्दृष्टौ शेषाणामपि कर्मणामुदया जिह्मीभवन्ति। न चैतद्वचनमात्रम्, यतोऽस्त्येव 'सूत्रे' ग्रन्थान्तररूपे साक्षादुपदेशः, यथा-नैरयिका उपपातादौ सातमनुभवन्तीति ॥ एनमेव दर्शयति-

[भा.१२४] उववाएण व सायं, नेरइओ देवकम्मुणा वा वि।
अज्झवसाणनिमित्तं अहवा कम्मानुभावेणं ॥

वृ- नैयिक उपपातेन सातमनुभवति। किमुक्तं भवति ?-उपपातकाले सातं वेदयते, तदानीं हि न तस्य क्षेत्रजा वेदना न परस्परोदीरिता नापि परमाधार्मिकोदीरितेति। अथवा 'देवकर्मणा' देवक्रियया सातमनुभवति, देवो हि कश्चिन्महर्द्धिकः पूर्वभवस्नेहतस्तत्र गत्वा कस्यापि कञ्चिकालं वेदनामुपशमयति, ततः सातं वेदयते। अथवा 'अध्यवसाननिमित्तं' तथाविधशुभाध्यवसायप्रवृत्ति-निमित्तं सातमासादयति, यथा सम्यग्दर्शनं लभमानः, सम्यग्दर्शनलाभे हि जात्यन्धस्य चक्षुर्लाभ

Jain Education International For Private & Personal Use Only www.jainelibrary.org

इव जायते महान् प्रमोद इति । "अहवा कम्मानुभावेणं"ति अथवा तीर्थकरजन्माद्यधिकृत्य यः कर्मणां-सातवेदनीयप्रभृतीनां शुभानाम् अनुभावः-अनुभवनम् उदयेन वेदनं तेन सातमनुभवति। तथाहि-भगवतां तीर्थकृतां जन्मनि दीक्षायां ज्ञाने च तत्प्रभावतो नरकेऽप्यालोको जायते, नैरयिकाणामपि च शुभकर्मोदयप्रसरतः सातमिति ॥ अथ मिथ्यादृष्टिर्यदा सम्यक्त्वं सङ्क्रामति तदा स तत्समयं कति ज्ञानानि लभते ? उच्यते- द्वे त्रीणि वा । तथा चाह-

[भा.१२५] विब्भंगी उ परिणमं, सम्मत्तं लहति मति-सुतोहीणि ।
तइभावम्मि मति-सुते, सुतंभं केइ उ भयंति ॥

वृ- 'विभङ्गी' विभङ्गज्ञानी सम्यक्त्वं परिणमयन् तत्समयं मति-श्रुता ऽवधीन् लभते । 'तदभावे' तस्य-विभङ्गस्याभावे मिथ्यादर्शनी सम्यक्त्वं परिणमयन् तत्कालं 'मति-श्रुते' मतिज्ञानश्रुतज्ञाने लभते । केचित् पुनः श्रुतलाभं 'भजन्ति' विकल्पयन्ति, 'यस्याधीतं श्रुतं स लभते श्रुतज्ञानम्, इतरो न लभते' इत्याचक्षत इति भावः । तथाहि-ये स्वयम्भूरमणसमुद्रे मत्स्यास्ते प्रतिमासंस्थितान् मत्स्यान् उत्पलानि वा दृष्ट्वेहा-ऽपोहादि कुर्वन्तो जातिस्मरणः सम्यक्त्वमासादयन्ति आभिनिबोधिकज्ञानं च, यत्तु श्रुतज्ञानं तन्नासादयन्ति, अनधीतश्रुतत्वात् । ते त्वधीतश्रुतास्ते त्रीण्यपि युगपदासादयन्ति ॥ एतद् दूषयितुमाह-

[भा.१२६] अन्नाण मती मिच्छे, जढम्मि मतिनाणतं जहा एइ ।
एमेव य सुयलंभो, सुयअन्नाणे परिणयम्मि ॥

वृ-यथा मिथात्वे त्यक्ते मति 'अज्ञानम्' अज्ञानस्वरूपा मतिज्ञानतामेति एवमेव श्रुताज्ञाने 'परिणते' अपगते श्रुतलाभो भवति । किञ्च ते प्रष्टव्याः-सम्यक्त्वलाभसमये श्रुताज्ञानमस्ति ? किं वा न ?, तत्र यद्याद्यः पक्षस्तर्हि तस्याज्ञानित्वान्मिथ्यादृष्टित्वप्रसङ्गः; अथ नास्ति तर्हि श्रुताज्ञानमपि केवलमाभिनिबोधिकज्ञानी स्यात; न चैतदुपपन्नम्, श्रुतज्ञानमन्तरेण केवलस्याऽऽभिनि-बोधिकज्ञानस्याभावात् "जत्थ मतिनाणं इत्थ सुयनाणं, जत्थ सुयनाणं तत्थ मतिनाणं, दो वि एयाइं अन्नोन्नमनुयगाइं" इति वचनादिति ॥

तदेवमुक्तमौपशमिकं सम्यक्त्वम्, अधुना सासादनसम्यक्त्वमाह-

[भा.१२७] उवसमसम्मा पडमाणतो उ मिच्छत्तसंकमणकाले ।
सासायणो छावलितो, भूमिमपत्तो व पवडंतो ॥

वृ- 'मिथ्यात्वसङ्क्रमणकाले' मिथ्यात्वसङ्क्रमणाभिमुख उपशमसम्यक्त्वात् प्रतिपतन् जघन्यत एकसामयिक उत्कर्षतः षडावलिकः सासादनो भवति । किंरूपः सः ? इत्याह-भूमिमप्राप्त इव प्रपतन् । यथा मालात् प्रपतन् भूमिमप्राप्तोऽपान्तराले वर्त्तते तथोपशमसम्यक्त्वात् प्रपतन् मिथ्यात्वमद्याप्यप्राप्तोऽपान्तराले वर्त्तमानः सासादन इति ॥ अथ कथं स सम्यग्दृष्टि उपशमसम्यक्त्वतः प्रच्यवमानत्वात् ? उच्यते-च्यवनेऽप्यव्यक्तमुपशमगुणवेदनात् । अत्रैव दृष्टान्तमाह-

[भा.१२८/१] आसादेउं व गुलं, ओहीरंतो न सुट्ठु जा सुयति ।

वृ-यथा कश्चित् पुरुषो गुडमास्वाद्यतदनन्तरं 'ओहीरति' निद्रायते, न पुनः सुष्ठु अद्यापि स्वपिति, स च निद्रायमाणोऽव्यक्तमाखादितगुडमाधुर्यमनुभवति; एवमुपशमसम्यक्त्वात्

Jain Education International　For Private & Personal Use Only　www.jainelibrary.org

प्रच्यवमानो मिथ्यात्वमद्याप्यप्राप्तोऽव्यक्तमुपशमगुणं वेदयत इति सम्यग्दृष्टि ॥

सम्प्रति सासादनशब्दव्युत्पत्तिमाह-

[भा.१२८/२] सं सायं सायंतो, सस्सादो वा वि सासाणो ॥

वृ- 'स्वं' आत्मीयम् आयं सातयन् "सासादो वा वि सासाणो" 'सास्वादः' अव्यक्तोपशमगुणास्वादसहित इति कृत्वा 'सास्वादनः' सह आस्वादनं यस्य स तथेति व्युत्पत्तेः ॥

अधुना क्षायोपशमिकं सम्यक्त्वमाह-

[भा.१२९] जो उ उदिन्ने कीणे, मिच्छे अनुदिन्नगम्मि उवसंते ।
सम्मीभावपरिणतो, वेयंतो पोग्गले मीसो ॥

वृ-यस्तु 'उदीर्णे' उदयावलिकाप्रविष्टे मिथ्यात्वे क्षीणे 'अनुदीर्णे' अनुदयप्राप्ते च 'उपशान्ते' उपशान्तं नाम किञ्चिन्मिथ्यात्वरूपतामपनीय सम्यक्त्वरूपतया परिणतं किञ्चिन्मिथ्यात्वरूपमेव सद् भस्मच्छन्नाग्निरिवानुद्रेकावस्थाप्राप्तम्, तस्मिन् तथारूपे सति 'पुद्गलान्' सम्यक्त्वरूपान् 'वेदयमानः' सम्यग्भावपरिणतः सः 'मिश(श्रः)' क्षायोपशमिकसम्यग्दृष्टिः । सम्यक्त्वरूपधर्मनिर्देशप्रक्रमेऽपि धर्मिणा निर्देशो धर्म-धर्मिणोः कथञ्चिदभेदख्यापनार्थः ॥ एवं पूर्वत्र परत्र च भावनीयम् ॥ इदानीं वेदनं सम्यक्त्वमाह-

[भा.१३०] जो चरमपोग्गले पुन, वेदेती वेयगं तयं बिंति ।
केसिंचि अणादेसो, वेयगदिट्ठी खओयसमो ॥

वृ- 'यः' दर्शनसप्तकक्षपको यतोऽनन्तरसमये क्षीणसम्यक्त्वो भविष्यति तस्मिन् समये वर्त्तमानः सम्यग्दर्शनस्य चरमान् पुद्गलान् वेदयते, तस्य 'तत्' चरणपुद्गलवेदनं वेदकसम्यक्त्वं पूर्वसूरयो ब्रुवते । 'केषाञ्चित् पुनः' बोटिकानामयमादेशः-'वेदकदृष्टिः' वेदकसम्यग्दर्शनं क्षायोपशमिकं सम्यग्दर्शनम्, सोऽनादेशः, सम्यक्त्वापरिज्ञानादिति ॥ सम्प्रति क्षायिकदर्शनमाह-

[भा.१३१] दंसणमोहे खीणे, खयदिट्ठी होइ निरवसेसम्मि ।
केण उ सम्मो मोहो, पडुच्च पुव्वं तु पन्नवणं ॥

वृ- दर्शनमोहे 'निरवशेषे' त्रिप्रकारेऽपि क्षीणे 'क्षयदृष्टिः' क्षायिकं सम्यग्दर्शनं भवति । आह यद् मिथ्यात्वदर्शनं तद् मोहः स्यात्, तस्य सम्यग्दर्शनमोहकत्वात्, यत् 'सम्यक्' सम्यग्दर्शनं तत् केन कारणेन मोहः ? सूरिराहपूर्वां प्रज्ञापनं प्रतीत्य । किमुक्तं भवति ? -यथा मदनकोद्रवाणां निर्मदनीकृतानामप्योदनः स एष मदनकोद्रवौदन इति व्यपदिश्यते, तेषां पूर्वं समदनत्वात्; एवं तेऽपि सम्यक्त्वपुद्गलाः पूर्वं मिथ्यात्वपुद्गला आसीरन्, ते च दर्शनमोहकाः, अतः पूर्वभावप्रज्ञापनामधिकृत्य तेऽपि दर्शनमोह इति व्यपदिश्यन्ते ॥ आह पूर्वमिदमुक्तम्-"आसज्ज उ सामित्तं, लोइय लोउत्तरे भयणा" तत्र किं सर्वमेव द्वादशाङ्गं गणिपिटकं मिथ्यादृष्टिपरिगृहीतं भवति ? किं वा किञ्चिद् ? इत्यत आह-

[भा.१३२] चोद्दस दस य अभिन्ने, नियमा सम्मं तु सेसए भयणा ॥
मति-ओहिविवच्चासो, वि होति मिच्छे न उण सेसे ॥

वृ- यस्य चतुर्दश पूर्वाणि यावद् दश च पूर्वाणि 'अभिन्नानि' परिपूर्णानि सन्ति तस्मिन् नियमात् सम्यक्त्वम् । 'शेषे' किञ्चिदूनदशपूर्वधरादौ 'भजना' सम्यक्त्वं वा स्यान्मिथ्यात्वं वेत्यर्थः ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

किञ्च मतेरवधेश्च मिथ्यात्वे विपर्यासो भवति । तद्यथा-मतेर्मत्यज्ञानम्, अवधेश्च विभङ्गज्ञान-मिति। श्रुतज्ञानस्य तु विपर्यासो दर्शित एव, "सेसए भयणा" इति वचनात्। 'शेषके' मनःपर्यवज्ञाने केवलज्ञाने च नास्ति विपर्यासः ।। अथ 'यदेवेदं भगवद्भिरुपदिष्टं तदेव तत्त्वम् युक्तियुक्तत्वाद् नेतरम्' इति सम्यग्दर्शनम् ज्ञानमप्येवंरूपमेवेति कः सम्यग्दर्शन-ज्ञानयोः प्रतिविशेषः ? उच्यते-

[भा.१३३] दंसणमोग्गह ईहा, नाणमवातो उ धारणा जह उ।
तह तत्तरुई सम्मं, रोइज्जइ जेण तं नाणं ।।

वृ-यथा तुल्येऽवबोधे दर्शन-ज्ञानयोर्भेदः-अवग्रह ईहा दर्शनम्, सामान्यावबोधात्मकत्वात्; अपायो धारणा च ज्ञानम्, विशेषावबोधरूपत्वात्; तथा यस्तत्त्वानामवगमः स ज्ञानम्, या त्ववगतेषु तत्त्वेषु रुचि-परमा श्रद्धा आत्मनः परिमामविशेषरूपा सा सम्यग्दर्शनम्, येन तद् ज्ञानं 'रोच्यते' रुच्यात्मकं क्रियते ।। एतदेव स्पष्टयति-

[भा.१३४] सोच्चा व अभिसमेच्च व, तत्तरुई चेव होइ सम्मत्तं।
तत्थेव य जा विरुई, इतरत्थ रुई य मिच्छत्तं ।। सम्मत्तं गतं ।।

वृ-श्रुत्वा केवलिप्रभृतीनामुपदेशम् अभिसमेत्यवा जातिस्मरणादिना या तत्त्वेषु रुचिर्भवति सा सम्यक्त्वम्। या तु 'तत्रैव' तत्त्वेषु विरुचि 'इतरेषु' अतत्त्वेषु रुचि सा मिथ्यात्वमिति ।।

वृ-उक्तं सम्यकश्रुतं मिथ्यात्वश्रुतं च । सम्प्रति साद्यनादिश्रुते आह-

[भा.१३५] अव्वोच्छित्तिनयट्ठा, एयं तु अणाइयं जहा लोए।
वोच्छेयनया सादी, पप्प गईतो जहा जीवो ।।

वृ- अव्यवच्छित्तिनयो नाम द्रव्यास्तिकनयः तस्य अर्थाद्-आदेशात् 'एतत्' श्रुतज्ञानमनादिकम् उपलक्षणमेतत् अनिधनं च, यथा लोकस्त्रष्वपि कालेषु भावादनादिरनिधनश्च; तन्मतेन हि न सतः सर्वथा नाशः, नाऽप्येकान्तेनासत उत्पाद इत्यनाद्यनिधनता। 'व्यवच्छेदनयात्' पर्यायास्तिकमतेन पुनः सादि उपलक्षणमेतत् सपर्यवसितं च, यथा गतीः 'प्राप्य' अधिकृत्य जीवः; तथाहि-नैरयिको नैरयिकत्वेनोत्पद्यमानः सादि, तद्गतेस्तदानीमेव भावात; नैरयिकत्वेन तु विनश्यन् सपर्यवसितः, तस्य हि पर्यायाः प्रधानम्, ते चोत्पद्यन्ते विनश्यन्ति चेति सादि-सपर्यवसितता ।। अथवा अन्यथा साद्यनादित्वम्, तदेवाह-

[भा.१३६] दव्वाचउक्कं वा, पडुच्च सादी व होज्जऽनादी वा।
दव्वम्मि एगपुरिसं, पडुच्च सादी सनिहणं च ।।

वृ-वाशब्दः प्रकारान्तरद्योतने। 'द्रव्यादिचतुष्कं' द्रव्य-क्षेत्र-काल-भावान् प्रतीत्य श्रुतज्ञानं सादि वा स्यादनादि वा, उपलक्षणमेतत्, सपर्यवसितमपर्यवसितं च । तत्र द्रव्ये एकं पुरुषं प्रतीत्य सादि-निधनम्। कथम् ? इति चेत्, उच्यते-यदा तत्प्रथमतया तदधीते तदा पूर्वमभावात् सादि। सपर्यवसानं पुनरेभिर्वक्ष्यमाणैः पञ्चभि स्थानैः ।। तान्येवाह-

[भा.१३७] पणगं खलु पडिवाए, तत्थेगो देवभावमासज्ज।
मनुये रोग-पमाया, केवल-मिच्छत्तगमने वा ।।

वृ- 'प्रतिपाते' प्रतिपातविषयं खलु पञ्चकम्, पञ्चभिः स्थानैः प्रतिपात इत्यर्थः । तत्रैकः प्रतिपातो देवभावमासाद्य वेदितव्यः । द्वितीयो मनुष्ये रोगात् । तृतीयो मनुष्यभवे एव प्रमा-

Jain Education International For Private & Personal Use Only www.jainelibrary.org

दात्। चतुर्थ केवलभावे ।। पञ्चमो मिथ्यात्वगमने ।। तत्र प्रथमं प्रतिपातं देवभावमासाद्य भावयति-

[भा.१३८] चउदसपुव्वी मनुओ, देवत्ते तं न संमरइ सव्वं।
देसम्मि होइ भयणा, सट्ठाणभवे वि भयणा उ ।।

वृ- चतुर्दशपूर्वी मनुजो देवत्वे प्राप्ते सति 'तत्' श्रुतं सर्वं न संस्मरति, विषय-प्रमादतस्तथाविधोपयोगाभावात्; देशे भवति 'भजना' विकल्पना, सा त्वेवम्-कश्चिद्देशं स्मरति, कश्चिद्देशस्यापि देशम्, कश्चित्पुनरेकादशस्वप्यङ्गेषु सर्वं स्मरति, कश्चित्तेषामपि देशमिति। तदेवं भावितो देवभावमासाद्य प्रथमः प्रतिपातः। सम्प्रति शेषान् भावयति-"सट्ठाणभवे वि भयणा उ" स्वस्थानं-मनुष्यत्वं तस्मिन्नपि भवे रोगादिभि 'भजना' विकल्पना। तथाहि-रोगे समुत्पन्ने तथाविधपीडावशतः स्मृतेरुपहननान्न स्मरति, प्रमादतो वा गुणनाभावातोऽपगच्छति श्रुतमधीतम्, केवलज्ञानभावे वा श्रुतज्ञानस्य क्षयः, "नट्ठम्मि उ छाउमत्थिए नाणे" इति वचनात्, मिथ्यादर्शनगमने वा सर्वश्रुताभावः, अज्ञानीभवनादिति ।। आह श्रुतज्ञानं जीवादन्यत्? अन्यत्? उच्यते-अनन्यत्। यत आह-

[भा.१३९] नियमा सुयं तु जीवो, जीवे भयणा उ तीसु ठाणेसु।
सुयनाणि सुयअनाणी, केवलनाणी व सो होज्ञा ।।

वृ- श्रुतं नियमाज्जीवः, तत्परिणामत्वात्। जीवे पुनः 'त्रिषु स्थानेषु' त्रीणि स्थानान्यधिकृत्य 'भजना' विकल्पना। तथाहि-स जीवः कदाचित् श्रुतज्ञानी कदाचित्केवलज्ञानीति ।। सम्प्रति क्षेत्रतः कालतो भावतश्च सादि-सपर्यवसिततामाह-

[भा.१४०] खित्ते भरहेवए, काले उ समातो दोन्नि तत्थेव।
भावे पुण पन्नवगं, पन्नवणिज्जे य आसज्ञा ।।

वृ- क्षेत्रतः पञ्च भरतानि पञ्चैरावतान्यधिकृत्य, काले 'तत्रैव' पञ्चसु भरतेषु पञ्चस्वैरावतेषु 'द्वे समे' अवसर्पिणीमुत्सर्पिणीं चाधिकृत्य सादि-सपर्यवसितम्, यावत् तीर्थकृतां तीर्थानुवृत्तिस्तावद् भवति शेषकालं नेति कृत्वा। भावे पुनः प्रज्ञापकं प्रज्ञापनीयांश्च भावानासाद्य सादि पर्यवसितम्।। कथम्? इत्याह-

[भा.१४१] उवयोग-सर-पयत्ता, ठाणविसेसा य हुंति पन्नवगे।
गति-ठाण-भेय-संघाय-वन्नमादी य भावम्मि ।।

वृ- प्रज्ञापकस्यकदाचिदुपयोगः शुभो भवति कदाचिदुदात्तः कदाचिदनुदात्त कदाचिदनुदात्तः कदाचित्स्वरितः प्रयत्नो नाम-आदरः स क्षणे क्षणेऽन्यादृशः। 'स्थानविशेषाः' स्थानप्रकाराः वीरासनाद्याः। एषामुत्पादे प्रज्ञापकस्याप तेन तेन भावेनोत्पादो विनाशे च विनाशः। प्रज्ञापकस्योत्पादे विनाशे च श्रुतज्ञानस्यापि तदात्मकत्वादुत्पादो विनाशश्च। तत एवं प्रज्ञापकमधिकृत्य सादि-सपर्यवसितम्, अधुना प्रज्ञापनीयान् भावानधिकृत्य तद् भावयति-'गति' इत्यादि। पदैकदेशे पदसमुदायोपचाराद् 'गति' इति गतिलक्षणो धर्मास्तिकायः परिगृह्यते। स जीवस्य पुद्गलस्य वा गतिपरिणामपरिणतस्योपग्रहे वर्त्तित्वात् तस्यैव स्थानपरिणामपरिणतस्योपग्रहेन वर्त्तते इत्यसौ सादि-पर्यवसितः। एवमधर्मास्तिकायोऽपि स्थानलक्षणो जीवस्य पुद्गलस्य वा स्थानपरिण-तस्योपग्रहे वर्त्तित्वात् तस्यैव गतिपरिणामपरिणतस्योपग्रहे न वर्त्तते इति सादि-सपर्यवसितः।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

अथवा गतिपरिणतं द्रव्यं भूत्वा स्थानपरिणतं भवति, स्थानपरिणतं भूतवा गतिपरिणतम्। यदि वा "ठाण" त्ति एकप्रदेशावगाढं भूत्वा द्विप्रदेशावगाढं भवति, द्विप्रदेशावगाढं भूत्वा एकप्रदेशावगाढम्, एवं विस्तरेण सर्वाऽवगाहना द्रष्टव्या। तथा पुद्गलस्कन्धानां तेन तेन प्रकारेण भेदो भवति। तेषामेव च द्विपर्देशादीनां सङ्घातः। तथा "वण्ण" त्ति परमाणुः कालवर्णपरिणतो भूत्वा नीलवर्णपरिणतो भवति, नीलवर्णपरिणतो भूत्वा कालवर्णपरिणतः, एवं विस्तरेण वर्णपरिणामो वक्तव्यः। आदिशब्दाद् गन्ध-रस-स्पर्श-संस्थानानां परिग्रहः, तेऽप्येवं वक्तव्याः- सुरभिगन्धपरिणतो भूत्वा दुरभिगन्धपरिणतो भवति इत्यादि विस्तरेणोपयुज्य वक्तव्यम्। इत्थं च प्रज्ञापनीयभावानां प्रज्ञापने श्रुतज्ञानमपि तथा तथा परिणमत इति सादि-सपर्यवसितं द्रष्टव्यम्॥ चतुष्कमधिकृत्यानाद्यपर्यवसितत्वमाह-

[भा.१४२] दव्वे नानापुरिसे, खेत्ते विदेहाइँ कालो जो तेसु।
खयउवसम भावम्मि य, सुयनाणं वट्टए सययं॥

वृ- 'द्रव्ये' द्रव्यतो नानापुरुषान् प्रतीत्य, क्षेत्रतः पञ्च विदेहान्, 'तेष्वेव च' पञ्चसु विदेहेषु यः कालस्तं कालमधिकृत्य, भावे क्षयोपशमरूपे श्रुतज्ञानं 'सततं' सर्वकालं वर्त्तत इत्यनाद्यपर्यवसितता॥ सम्प्रति गमिकमगमिकं चाह-

[भा.१४३] भंग-गणियादि गमियं, जं सरिसगमं च कारणवसेणं।
गाहादि अगमियं खलु, कालिय तह दिट्ठिवाए य॥

वृ- 'दृष्टिवादो गमिकम्, कालिकश्रुतमगमिकम्' एतद् बाहुल्येनोच्यते अतोऽपवदति "भंगगणिये" त्यादि पूर्वार्धम्। कालिकश्रुते दृष्टिवादे वा यत्र भङ्गाः-चतुर्भङ्गादयः गणितं सङ्कलनादि, आदिग्रहणेन क्रियाविशाले पूर्वे यत् छन्दः प्रकृतं तत् सदृशगममिति तस्य परिग्रहः; यच्च 'कारणवशेन' अर्थवशेन सदृशगमम्, यथा निशीथस्य विंसतितम उद्देशकः, एतद् गमिकम्। शेषं गाथादि आदिशब्दात् श्लोकादिपरिग्रहः अगमिकम्॥ सम्प्रत्यङ्गगतमनङ्गगतं च प्रतिपादयति-

[भा.१४४] गणहर-थेरकयं वा, आदेसा मुक्कवागरणतो वा।
धुव-चलविसेसतो वा, अंगा-ऽनंगेसु नाणत्तं॥

वृ- यद् गणधरैः कृतं तदङ्गप्रविष्टम्। यत्पुनर्गणधरकृतादेव स्थविरैर्निर्यूढम्; ये चादेशाः, यथा-आर्यमङ्गुराचार्यस्त्रिविधं शङ्खमिच्छति-एकमविकं बद्धायुष्कमभिमुखनामगोत्रं च, आर्यसमुद्रो द्विविधम्-बद्धायुष्कमभिमुनामगोत्रं च, आर्यसुहस्ती एकम्-अभिमुखनामगोत्र मिति; यानि च मुक्तकानि व्याकरणानि, यथा-"वर्ष देव! कुलाणायाम्०" इत्यादि, तथा "मरुदेवा भगवती अनादिवनस्पतिकायिका तद्भवेन सिद्धा" इत्यादि; एतत्स्थविरकृतम् आदेशा मुक्तकव्याकरणतश्च अनङ्गप्रविष्टम्। अथवा ध्रुव-चलविशेषतोऽङ्गा-ऽनङ्गेषु नानात्वम्। तद्यथा-ध्रुवं अङ्गप्रविष्टम्, तच्च द्वादशाङ्गम्, तस्य नियमतो निर्यूहणात् चलानि प्रकीर्णकानि, तानि हि कदाचिन्निर्यूह्यन्ते कदाचिन्न, तान्यनङ्गप्रविष्टमिति॥ आह दृष्टिवादे सर्वमेव वचगतमवतरति, ततः किमर्थमङ्गगतानां निर्यूहणम्? इति, तत आह-

[भा.१४५] जइ वि य भूयावादे, सव्वस्स वयोगयस्स ओयारो।
निज्जूहणा तहा वि य, दुम्मेहे पप्प इत्थी य॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

वृ-यद्यपि च 'भूतवादे' दृष्टिवादे सर्वस्य वचोगतस्यावतारः तथापि शेषाणामङ्गानामनङ्गानां च निर्यूहणा दुर्मेधसः पुरुषान् प्रतीत्य स्त्रियश्च । नहि प्रज्ञावत्योऽपि स्त्रियो दृष्टिवादं पठन्ति ॥ किं कारणम् ? अत आह-

[भा.१४६] तुच्छा गारवबहुला, चलिंदिया दुब्बला य धीईए ।
इति अतिसेसज्झयणा, भूयावादो उ नो थीणं ॥

वृ- दृष्टिवादे हि बहवो विद्यातिशयाः सर्वकामप्रदा उपवर्ण्यन्ते, सा च स्त्र स्वभावात् 'तुच्छा' अल्पसत्त्वा, तथा 'गौरवबहुला' स्तोकायामप्यर्थवृद्धऔ मानातिरेकतो व्यर्थसम्भवात्, 'चलेन्द्रिया' स्वभावत एव तदिन्द्रियाणामतिलम्पटत्वात्, तथा 'धृत्या' मानसेनाऽवष्टम्भेन दुर्बला, 'इति' अस्मात् कारणात् अतिशेषाणि-अतिशायीनि अध्ययनानि-महापरिज्ञा-ऽरुणोपपातादीनि 'भूतवादश्च' दृष्टिवादो न स्त्रीणामनुज्ञातः ॥ तदेवमुक्तं चतुर्दशभेदं श्रुतज्ञानम् अङ्गगता-ऽनङ्गगत-विशेषश्च । आह परः-केन पुनः कारणेनाक्षरा-ऽनक्षरश्रुते प्रथममुपात्ते ? तत आह-

[भा.१४७] सुणतीति सुयं तेणं, सवणं पुण अक्खरेयरं चेव ।
तेनऽक्खरेयरं वा, सुयनाणे होति पुव्वं तु ॥

वृ-इह यस्मात् प्रतिपत्ता तद् उच्यमानं शृ णोति तेन कारणेन तत् श्रुतमित्युच्यते, 'श्रूयत इति श्रुतम्' इति व्युत्पत्तेः । श्रवणं पुनः 'अक्षरेतरं चैव' अक्षरस्य इतरस्य च-अनक्षरस्य, 'तेन' कारणेन श्रुतज्ञान प्ररूप्यमाणे पूर्वमक्षरमनक्षरं चोपात्तमिति ॥

सम्प्रति युदक्तं मूलद्वारगाथायां "प्रकृतम्" इति तत्प्ररूपणार्थमाह-

[भा.१४८] इत्थं पुन अहिगारो, सुयनाणेणं जतो हवति तेणं ।
सेसाणमप्पणो वि य, अनुयोग पईव दिट्ठंतो ॥

वृ-तदेवं मङ्गलनिमित्तं पञ्च ज्ञानानि प्ररूपितानि । एतेषु च पञ्चसु ज्ञानेषु मध्येऽत्राधिकारः श्रुतज्ञानेन । किं कारणम् ? अत आह-'यतः' यस्मात् कारणात् 'तेन' श्रुतज्ञानेन 'शेषाणाम्' आभिनिबोधिका-ऽवधि-मनःपर्याय-केवलानामात्मनश्च 'अनुयोगः' भाषणं भवति । अत्र दृष्टान्तः प्रदीपः-यथा प्रदीपो घटादीनामात्मनश्च प्रकाशकः एवं श्रुतज्ञानं शेषाणामात्मनश्चानुयोग कारकम् । उक्तं च-

सुयनाणं महिड्डीयं, केवलं तदनंतरं ।
अप्पणो सेसगाणं च, जम्हा तं पविभावगं ॥

तेन कारणेन अत्र श्रुतज्ञानेनाऽधिकारः ॥ तस्य च श्रुतज्ञानस्योद्देशक-समुद्देशादि चतुष्टयं भवति, तत्राऽनुयोगेऽधिकारः, स चैतैर्द्वारैरनुगन्तव्यः-

[भा.१४९] निक्खेवेगट्ठ निरुत्त विहि पवित्ती य केण वा कस्स ।
तद्दार भेय लक्खण, तदरिह परिसा य सुत्तत्थो ॥

वृ- अनुयोगस्य 'निक्षेपः' नामादिन्यासो वक्तव्यः । तदनन्तरं तस्यैकार्थिकानि । तदनु निरुक्तं वक्तव्यम् । ततः को विधिरनुयोगे कर्त्तव्ये इति विधिर्वक्तव्यः । तथा 'प्रवृत्तिः' प्रसवोऽनुयोगस्यवक्तव्यः । तदनन्तरं केनाऽनुयोगः कर्त्तव्य इति वक्तव्यम् । ततः परं कस्य शास्त्रस्य कर्त्तव्य इति । तदनन्तरं तस्य-अनुयोगस्य द्वाराणि-उपक्रमादीनि वक्तव्यानि, तत्र

Jain Education International For Private & Personal Use Only www.jainelibrary.org

तेषामेव भेदः । ततः परं सूत्रस्य लक्षणम् । तदनन्तरं तस्य-सूत्रस्य अर्हा-योग्याः । ततः परं परिषत् । ततः सूत्रार्थ । एष द्वारगाथासङ्क्षेपार्थः, व्यासार्थस्तु प्रतिद्वारं वक्ष्यते ।। तत्र प्रथमतो निक्षेपद्वारमाह-

[भा.१५०] निक्खेवो नासो त्ति य, एगट्ठं सो उ कस्स निक्खेवो ।
अनुओगस्स भगवओ, तस्स इमे वन्निया भेया ।।

वृ- निक्षेपः न्यास इत्येकार्थम् । पर आह-स निक्षेपः कस्य कर्त्तव्यः ? सूरिराह-अनुयोगस्य भगवतः । 'तस्य च' निक्षेपस्य 'इमे' वक्ष्यमाणा वर्णिता भेदाः ।। तानेवाह-

[भा.१५१] नामं ठवणा दविए, खेत्ते काले य वयण भावे य ।
एसो अनुओगस्स उ, निक्खेवो होइ सत्तविहो ।।

वृ- नामानुयोगः स्थापनानुयोगो द्रव्यानुयोगः क्षेत्रानुयोगः कालानुयोगो वचनानुयोगो भावानुयोगश्च । एषोऽनुयोगस्य सप्तविधो निक्षेपः ।। तत्र नाम-स्थापने प्रतीते इति ते अनादृत्य शेषाणां द्रव्याद्यनुयोगानां भेदानाह-

[भा.१५२] सामित्त-करण-अहिगरणतो य एगत्त तह पुहत्ते य ।
नामं ठवणा मोत्तुं, इति दव्वादीण छब्भेया ।।

वृ- 'स्वामित्वं' सम्बन्धः 'करणं' साधकतमम् 'अधिकरणं' आधारः, एतैः प्रत्येकमेकत्वेन 'पृथक्त्वेन च' बहुत्वेन पञ्चानां द्रव्यादीनामनुयोगो वक्तव्यः । 'इति' एवं नाम स्थापनां च मुक्त्वा द्रव्यादीनामनुयोगस्य प्रत्येकं षड् भेदा भवन्ति । तद्यथा-द्रव्यस्य वा १ द्रव्याणां वा २ द्रव्येण वा ३ द्रव्यैर्वा ४ द्रव्ये वा ५ द्रव्येषु वा ६ अनुयोगो द्रव्यानुयोगः । एवं क्षेत्र-काल-वचनभावानुयोगानामपि प्रत्येकं षड्भेदताऽवसेया ।। तत्र प्रथमतो द्रव्यस्यानुयोगमाह-

[भा.१५३] दव्वस्स उ अनुओगो, जीवद्दव्वस्स वा अजीवस्स ।
एक्केक्कम्मि य भेया, हवंति दव्वाइया चउरो ।।

वृ- द्रव्यस्यानुयोगो द्विधा-जीवद्रव्यस्य वा अजीवद्रव्यस्य वा । एकैकस्मिन्ननुयोगे द्रव्यादिकाश्चत्वारो भेदाः । किमुक्तं भवति ?-जीवद्रव्यानुयोगोऽजीवद्रव्यानुयोगो वा प्रत्येकं द्रव्यतः क्षेत्रतः कालतो भावतश्च भवति ।। तत्र जीवद्रव्यानुयोगं द्रव्यादित आह-

भआ। (१५४) दव्वेनिक्कं दव्वं, संखातीतप्पदेसमोगाढं ।
काले अनादिनिहणं, भावे नाणाइयाऽनंता ।।

वृ- द्रव्यतो जीवद्रव्यमेकम्, क्षेत्रतोऽसङ्ख्येयप्रदेशावगाढम्, कालतोऽनाद्यनिधनम्, भावतो ज्ञानादिकाः पर्याया अनन्ताः, तद्यथा-अनन्ता ज्ञानपर्यायाः, अनन्ता दर्शनपर्यायाः, अनन्ताश्चारित्रपर्यवाः, अनन्ता अगुरुलघुपर्यवाः ।। अधुना द्रव्यादिभिरजीवद्रव्यस्यानुयोगमाह-

[भा.१५५] एमेव अजीवस्सवि, परमाणू दव्वमेगदव्वं तु ।
खेत्ते एगपएसे, ओगाढो सो भवे नियमा ।।

[भा.१५६] समयाइ ठिति असंखा, ओसप्पिणीओ हवंति कालम्मि ।
वण्णादि भावऽनंता, एवं दुपदेसमादी वि ।।

वृ- 'एवमेव' अनेनैव प्रकारेण 'अजीवस्यापि' अजीवद्रव्यस्याप्यनुयोगो वक्तव्यः ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

तद्यथापरमाणुर्द्रव्यत एकं द्रव्यम्, क्षेत्रत एकप्रदेशावगाढः, कालतो जघन्यतः स्थिति 'समयादि' एको द्वौ त्रयो वा समयाः, उत्कर्षतः 'असङ्ख्याः' असङ्ख्येया अवसर्पिण्य उत्सर्पिण्यश्च भवन्ति, भावतोऽनन्ता वर्णादिपर्यायाः, तद्यथा-अनन्ता वर्णपर्यवाः, अनन्ता गन्धपर्यवाः, यावदनन्ताः स्पर्शपर्यवा इति। एवं 'द्विप्रदेशादेरपि' द्विप्रदेशिकस्य त्रिप्रदेशिकस्य यावदनन्तप्रदेशिकस्योपयुज्य वक्तव्यम्, तद्यथा-द्विप्रदेशिकः स्कन्धो द्रव्यत एकं द्रव्यम्, क्षेत्रत एकप्रदेशावगाढो द्विप्रदेशावगाढो वा, कालतो जघन्यतः स्थिति समयादि, उत्कर्षतोऽसङ्ख्येया उत्सर्पिण्यव सर्पिण्य इत्यादि ॥ सम्प्रति द्रव्याणामनुयोगमाह-

[भा.१५७] दव्वाणं अनुयोगो, जीवमजीवाण पज्जवा नेया।
तत्थवि य मग्गणाओ, णेगा सट्ठाण परठाणे ॥

वृ- द्रव्याणामनुयोगो द्विधा-जीवद्रव्याणामजीवद्रव्याणां च। किंरूपोऽसौ ? इत्याह- 'पर्यायाः' प्ररूप्यमाणा ज्ञेयाः, तथाहि-कतिविधा भदन्त! पर्यायाः प्रज्ञप्ताः ? गौतम! द्विविधाः, तद्यथा-जीवद्रव्याणामजीवद्रव्याणां च। तत्राप्यनेकाः स्वस्थाने परस्थाने च मार्गणाः, ताश्चैवम्- नैरयिकाणामसुरकुमाराणां च। कति पर्यायाः प्रज्ञप्ताः ? गौतम! अनन्ताः। अथ केनार्थेनेदमुच्यते? गौतम! नैरयिकोऽसुरकुमारस्य द्रव्यार्थतया तुल्यः प्रत्येकमेकद्रव्यत्वात्, प्रदेशार्थतयाऽपि तुल्यः प्रत्येकं लोकाकाशप्रदेशतुल्यप्रदेशत्वात्, स्थित्या चतुःस्थानपतितः, भावतः षट्स्थानपतितः, ततो भवन्ति नैरयिकाणामसुरकुमाराणां च प्रत्येकं पर्याया अनन्ताः।

अजीवद्रव्याणांपर्यायेष्वेवं स्वस्थाने परस्थाने च मार्गणा-परमाणुपोग्गलाणं भंते ! दुपएसियाण य खंधाणं केवइया पज्जवा पन्नत्ता ? गोयमा ! अनंता। से केणट्ठेणं भंते ! एवं वुच्चइ ? गोयमा! परमाणुपोग्गले दुपएसियस्स खंधस्स दव्वट्ठयाए तुल्ले पएसट्ठयाए हीने, नो तुल्ले नो अहिए, जइ हीने पएसहीने ठिईए चउट्ठाणवडिए वण्णादिपज्जवेहिं छट्ठाणवडिए। ततो भवन्ति द्वयानामपि प्रत्येकमनन्ताः पर्यायाः। एवमनेकधा जीवद्रव्याणामजीवद्रव्याणां चाऽनुयोगः सूत्रे तत्र तत्र प्रदेशेऽभिहितो भावनीयः ॥ तदेवं द्रव्यस्य द्रव्याणां चेति स्वामित्वं गतम्, इदानीं करणे एकत्व-बहुत्वाभ्यामनुयोगमाह-

[भा.१५८] वत्तीए अक्खेण व, करंगुलादीण वा वि दव्वेण।
अक्खेहि उ दव्वेहिं, अहिगरणे कप्प कप्पेसु ॥

वृ- वर्तिः-नाम खटिका तया कृता शलाका तया, अक्षेण वा कराङ्गुल्यावास आदिशब्दात् प्रलेपकादिना वा यः क्रियतेऽनुयोगः स द्रव्येणाऽनुयोगः। द्रव्यैरनुयोगो यद्बहुभिरक्षैः क्रियतेऽनुयोगः। 'अधिकरणे' एकस्मिन् द्रव्येऽनुयोगः, यदा एकस्मिन् कलपे स्थितोऽनुयोगं करोति। यदा तु बहुषु कल्पेषु स्थितस्तदा द्रव्येष्वनुयोगः ॥ उक्तोद्रव्यानुयोगः षड्भेदः, सम्प्रति क्षेत्रस्य क्षेत्राणां चानुयोगमाह-

[भा.१५९] पन्नत्ति जंबुदीवे, खित्तस्सेमादि होइ अनुयोगो।
खित्ताणं अनुयोगो, दीवसमुद्दाण पन्नत्ती ॥

वृ- क्षेत्रस्यानुयोगो भवति जम्बूद्वीपस्य प्रज्ञप्ति, आदिशब्दादन्यस्यापि द्विपस्य योऽनुयोगः स क्षेत्रस्यानुयोगः। क्षेत्राणामनुयोगो द्वीपसमुद्राणां प्रज्ञप्ति, द्वीपसागरप्रज्ञप्तिरित्यर्थः ॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

क्षेत्रेणानुयोगमाह-

[भा.१६०]　जंबुद्दीवपमाणं, पुढविजियाणं तु पत्थयं काउं ।
एवं मविज्जमाणा, हवंति लोगा असंखिज्जा ॥

वृ- जम्बूद्वीपप्रमाणं प्रस्थकं पृथिवीकायिकानां मापनाय कृत्वा जम्बूद्वीपप्रमाणेन प्रस्थकेन ते पृथिवीकायिका माप्यन्ते, मापयित्वा मापयित्वा चालोके प्रक्षिप्यन्ते, एवं माप्यमाना असङ्ख्येया लोका भवन्ति, असङ्ख्येयलोकाकाशप्रमाणलोकखण्डमापूरयन्तीत्यर्थः ॥ क्षेत्रैरनुयोगमाह-

[भा.१६१]　खित्तेहि बहू दीवे, पुढविजियाणं तु पत्थयं काउं ।
एवं मविज्जमाणा, हवंति लो असंखिज्जा ॥

वृ- क्षेत्रैरनुयोगो यथा-'बहून्' त्रिप्रभृतीन् द्वीपान् पृथिवीकायिकानां मापकरणाय प्रस्थकं कृत्वा तेन पृथिवीकायिकान् मापयेत्, मापयित्वा मापयित्वा चालोके प्रक्षिपेत्, ते चैवं माप्यमाना असङ्ख्येया लोका भवन्ति ॥ सम्प्रति क्षेत्रे क्षेत्रेषु चानुयोगमाह-

[भा.१६२] खित्तम्मि उ अनुयोगो, तिरियंलोगम्मि जम्मि वा खेत्ते ।
अड्डाइयदीवेसुं, अद्धछवीसाए खित्तेसु ॥

वृ- क्षेत्रेऽनुयोगो यथा-तिर्यग्लोकेऽनुयोगो यस्मिन् वा ग्रामे नगरे उपाश्रये वा । क्षेत्रेष्वनुयोगो यथा-अर्द्धतृतीयेषु द्वीपेषु यदि वाऽर्द्धषड्विंशतिषु जनपदेषु ॥ अधुना कालस्य कालानां कालेन कालैः चानुयोगमाह—

[भा.१६३] कालस्स समयरूवण, कालाण तदादि जाव सव्वद्धा ।
कालेनऽनिलवहारो, कालेहि उ सेसकायाणं ॥

वृ- कालस्यानुयोगो यत् समयस्य प्ररूपणा । कालानामनुयोगो यत् समयादीनां-समयाऽऽवलिकाप्रभृतीनां यावत् सर्वाद्धा तावत् प्ररूपणम् । कालेनानुयोगः अनिलानां-वायुकायिकानामपहारः, यथा-वायुकायिकवैक्रियशरीराणि बद्धानि पल्योपमस्यासङ्ख्येयभागमात्रेण कालेनापह्रियन्ते । कालैरनुयोगः 'शेषकायानां' पृथिवीकायिकादीनाम्, यथा-औदारिकशरीराणि बद्धानि असङ्ख्येयाभिरुत्सर्पिण्यवसर्पिणीभिरपह्रियन्त इति ॥ अधुना काले कालेषु चानुयोगमाह-

[भा.१६४/१] कालम्मि बिइयपोरिसि, समासु तिसु दोसु वा वि कालेसु ।

वृ- कालेऽनुयोगः द्वितीयस्यां पौरुष्याम् । कालेष्वनुयोगः अवसर्पिण्यां तिसृषु समासु, तद्यथा-सुषमदुःषमायाः पश्चिमे भागे दुःषमसुषमायां दुःषमायामिति; उत्सर्पिण्यां द्वयोः समयोः-दुःषमासुषमायां सुषमादुःषमायां च ॥ उक्तः षट्प्रकारोऽपि कालानुयोगः, सम्प्रति वचनस्य वचनानां चानुयोगमाह-

[भा.१६४/२]　वयणस्सेगवयाई, वयणाणं सोलसण्हं तु ॥

वृ- ''वयणस्से''त्यादि । वचनास्यानुयोगः 'एकवचनादेः' एकवचन-द्विवचन-बहुवचनानामन्यतमस्य, यथा-ईदृशमेकवचनमित्यादि । वचनानामनुयोगः त्रयाणामप्येकवचनादीनां स्वरूपकथनं षोडशानां वा वचनानाम् । तानि च षोडश वचनान्यमूनि-

लिंगतियं वयणतियं, कालतियं तह परुक्ख पच्चक्खं ।
उवनय-ऽवणयचउक्कं, अज्झत्थियं तु सोलसमं ॥

Jain Education International　For Private & Personal Use Only　www.jainelibrary.org

अस्या (अ) क्षरगमनिका-'लिङ्गत्रयम्' इयं स्त्र अयं पुमान् इदं कुलम् । 'वचनत्रिकम्' एकवचनं द्विवचनं बहुवचनमिति । 'कालत्रिकम्' अकरोत् करोति करिष्यति च। परोक्षवचनं यथा स इति । प्रत्यक्षवचनम् एष इति । उपनयः-स्तुति अपनयः-निन्दा तयोश्चतुष्कमुपनया-ऽपनयचतुष्कम्, यथा-रूपवती स्त्रीत्युपनयवचनम्, कुरूपा स्त्रीत्यपनयवचनम्, रूपवती स्त्री किन्तु दुःशीलेत्युपनया-ऽपनयवचनम्, कुरूपा स्त्री किन्तु सुशीलेत्यपनयोपनयवचनम् । तथा अन्यच्चेतसि निधाय विप्रतारकबुध्या अन्यद् बिभणिषुरपि सहसा यच्चेतसि तदेव यद् वक्ति तत् षोडशमध्यात्मवचनम् ॥

[भा.१६५] वयणेणाऽऽयरियाई, इक्केणुत्तो बहूहि वयणेहिं ।
वयण खओवसमिएष वयणेसु उ नत्थि अनुओगो ॥

वृ- वचनेनानुयोगो यथा-कोऽप्याचार्य केनाऽप्याचार्येण भिक्षुणा श्रावकेण वा भणितः 'अनुयोगमिच्छाकारेण कुरु' ततःसोऽनुयोगं करोति । वचनैरनुयोगः बहुभिराचार्यादि-भिर्भणितोऽनुयोगं करोति। अथवा वचनेनानुयोगो नाम आचार्यादीनामन्यतम एकेन वचनेनानुयोगं करोति, यथा-समभावः सामायिकमिति। कश्चिद् बहुभिर्वचनैः सविस्तरमिति । वचने क्षायोपशमिके स्थितस्यानुपयोगो वचनेऽनुयोगः । वचनेष्वनुयोगो नास्ति, क्षयोपशमभावस्य सर्वत्राप्येकत्वेन बहुत्वासम्भवात् । यदि वा व्यक्तिविवक्षया बहुष्वाचारदिषु वचनेषु स्थितस्यानुयोगो बहुवचनेष्वनुयोगः ॥ सम्प्रति भावानुयोगं षट्प्रकारमाह-

[भा.१६६] भावस्सेगतरस्स उ, अनुयोगो जो जहट्ठिओ भावो ।
दोमाइसन्निकासे, अनुयोगो होति भावाणं ॥

वृ- भावस्यानुयोगः औदयिकादीनां भावानामन्यतमो यो यथास्थितो भावस्तस्य कथनम्। भावानामनुयोगो द्विकादीनां भावानां सन्निकारो-संयोगे यावन्तो भङ्गा भवन्ति तेषां कथनम् ॥

[भा.१६७] भावेन संगहाईअन्नयरेणं दुगाइभावेहिं ।
भावम्मि खओवसमे, भावेसु य नत्थि अनुयोगो ॥

वृ- भावेनानुयोगः सङ्ग्रहादीनां पञ्चानां भावानामन्यतमेन । ते च सङ्ग्रहादयः पञ्च भावा इमे- पंचहिं ठाणेहिं सुयं वाइज्ञा, तं जहा-संगहट्ठयाए, उवग्गहट्ठयाए, निज्जरट्ठयाए, सुयपज्जवजाएणं, अव्वुच्छित्तीए य । तत्र-कथं ममैते शिष्याः सूत्रार्थसङ्ग्राहकाः सम्पत्स्यन्ते ? इति सङ्ग्रहार्थता, कथं नु नाम गीतार्था बूत्वा वस्त्राद्युत्पादनेन गच्छस्योपग्रहकरा भविष्यन्ति ? इत्युपग्रहार्थता, ममाप्येतान् वाचयतः कर्मनिर्जरा विपुला भविष्यतीति निर्जरार्थता, तथा श्रुतपर्यवजातं-श्रुतपर्यायराशिर्ममापि वृद्धिं यास्यतीति चतुर्थं श्रुतपर्यवजातं कारणम्, श्रुतस्य शिष्यपरम्पराङ्गतया अव्यवच्छित्तिर्भूयादिति पञ्चममव्यवच्छित्तिकारणम् ॥ भावैरनुयोगः एतेषां पञ्चानां भावानां द्वित्रादिभिर्भावैः । भावेऽनुयोगः क्षायोपशमिके । भावेषु त्वनुयोगो नास्ति, क्षायोपशमिकभावस्यैकत्वात् ॥

[भा.१६८] अहवा आयाराइसु, भावेसु उ एस होइ अनुओगो ।
सामित्तं आसज्ज व, परिणामेसुं बहुविहेसुं ॥

वृ- अथवा भावेष्वप्येषोऽनुयोगो भवति । केषु ? इत्याह-आचारादिषु द्वादशस्वङ्गेषु ये भावास्तेषु, अथवा स्वामित्वमासाद्य ये औदयिकादयो बहवः परिणामास्तेषु, यदि वा

Jain Education International For Private & Personal Use Only www.jainelibrary.org

क्षायोपशमिकोऽपि भावः प्रतिक्षणमन्यथाऽन्यथा परिणमते ततस्तेषु व्यवस्थितस्य व्याख्यां कुर्वतो भावेष्वनुयोगः ॥ अथ द्रव्य-क्षेत्र-काल-भावानां परस्परं समवतारोऽस्ति ? न वा ? अस्तीति ब्रूमः। कथम् ? इत्याह-

[भा.१६९] दव्वे नियमा भावो, न विना ते यावि खित्त-कालेहिं।
खित्ते तिण्ह वि भयणा, कालो भयणाय तीसुं पि ॥

वृ- द्रव्ये नियमाद्भावः, भावं विना द्रव्यस्याऽसम्भवात्, नहि तदस्ति द्रव्यं यद्भावशून्यमिति। "न विना ते यावि खित्त-कालेहिं" इति न च 'तावपि' द्रव्य-भावौ क्षेत्र-कालाभ्यां - विना। तथाहि-क्षेत्रं विना न द्रव्यम्, आधारमन्तरेमाऽऽधेयस्याऽसम्भवात्; ततस्तद्गतो भावोऽपि न क्षेत्रं विना; कालं विना द्रव्य-भावाभावः समयक्षेत्रापेक्षया, नहि समयक्षेत्रे तदस्ति द्रव्यं भावो वा यः कालं विना। अनयत्र तु नैष नियमः, तथा चाह-क्षेत्रे 'त्रयाणामपि' द्रव्य-कालभावानां भजना। तत्र कालः समयक्षेत्रे भवति अन्यत्र नेति कालभजना। द्रव्य-भावावपि लोकाकाशे स्तो नाऽलोके। यद्यप्यलोकेऽप्यगुरुलघवः पर्यायाः सन्ति तथापि द्रव्यस्य भावो नाद्रव्यस्य, अलोकाकाशं च क्षेत्रत्वे न विवक्षितमिति भावस्याप्यभाव इति। कालः पुनर्भजनया 'त्रिष्वपि' द्रव्य-क्षेत्र-भावेषु, समयक्षेत्रान्यत्र कालस्यासम्भवात् ॥ साम्प्रतमाधारा-ऽऽधेयभावयोजनामाह-

[भा.१७०] आधारो आधेयं, च होई दव्वं तहेव भावो य।
खित्तं पुन आधारो, कालो नियमा उ आधेयो ॥

वृ- द्रव्यं भावश्चाधार आधेयश्च भवति। तत्र द्रव्यमाधारो भावस्य, आधेयं क्षेत्रस्य। भाव आधारः कालस्य, आधेयो द्रव्यस्य। क्षेत्रं पुनर्नियमादाधारः, तस्याऽन्यस्याऽऽधारस्याऽभावात्, "स्वप्रतिष्ठितमाकाशम्" इति वचनात्। कालो नियमादाधेयः, तस्य द्रव्ये क्षेत्रे भावे चावस्थानात् ॥ उक्तोऽनुयोगः, तद्विपरीतोऽननुयोगः। तत्र दृष्टान्तानभिधित्सुराह-

[भा.१७१] वत्सग गोणी खुज्जा, सज्झाए चेव बहिरउल्लावे।
गामिल्लए य वयणे, सत्तेव य हुंति भावम्मि ॥

वृ- द्रव्यानुयोगे द्रव्याननुयोगे च वत्स-गावावुदाहरणम्-जइ गोदोहगो जो पाडलाए वत्सगो तं बाहुलाए मुयइ, बाहुलेयं वा वत्सगं पाडलाए मुयइ तो अननुयोगो भवइ, दुद्धकज्जस्स य अप्पसिद्धी। एवमिहावि जइ जीवलक्खणेणं दोहयत्थाणीओ साहू अजीवं परूवेइ, अजीवलक्खणेण वा जीवं तो अननुयोगो। तं भावं अन्नहा गिण्हइ, तेन अत्थो विसंवयइ, अत्थे विसंवइए चरणं विसंवयइ, चरणेणं विसंवइएणं मुक्खाभावो, मोक्खाभावे दिक्खा निरत्थिया। जइ पुन जो जाए वत्सगो तं ताए मुयइ तो अनुयोगो भवइ, तस्स य दुद्धकज्जस्स पसिद्धी। एवमिहावि जइ जीवलक्खणेणं जीवं परूवेइ, अजीवरक्खणेणमजीवं तो अनुयोगो भवइ। तस्स य मुक्खलक्खणस्स कज्जस्स पसिद्धी ॥

क्षेत्रस्याप्यननुयोगोऽनुयोगश्च भवति। तत्राननुयोगे कुज्जोदाहरणम्-पइट्ठाणं नयरं। सालवाहणो राया। सो वरिसे वरिसे भरुयच्छे नहवाहणं रोहेइ। जाहे य वरिसारत्तो भवति ताहे सयं नयरं पडियाइ, एवं कालो वच्चइ। अन्नया तेणं रन्ना रोहगेणं गइल्लएणं अत्थाणियमंडवियाए निच्छूढं। तस्स पडिग्गहधारी खुज्जा। सा चिंतेइ-अपरिभोगा एसाऽऽदिट्ठा, नूनमेस राया जाइउकामो।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

तीसे राउलगो जाणसालिओ परिजियओ । तीए तस्स कहियं । सो पए जाणाइ पमक्खिओ पयट्टियाणि । तं दट्ठुं सेसगो वि खंधावारो पयट्टिओ । राया रहसि एकल्लो धूलिभएण पयट्टो, जाव सव्वो खंधावारो पयट्टिओ दिट्ठो । राया चिंतेइ-न मए कस्सइ कहियं, कहमेएहिं नायं ? । गविट्ठं परंपरगेणं जाव खुज्ज त्ति । सा पुच्छिया । तीए तहेव अक्खायं । अत्र यन्मण्डपिकायां निष्ठयूत-मेषोऽननुयोगः । एवं यदि क्षेत्रं जीवा-धनुःपृष्ठादिभिर्गणित विसंवादेन प्ररूपयति तदाऽननुयोगः, यदा त्वविसंवादि कथयति तदाऽनुयोगः, यथा कुब्जायाः 'अपरिभोगं क्षेत्रं जातम्' इति प्ररूपयन्त्याः ।। कालस्यानुयोगेऽननुयोगे च स्वाध्याय उदाहरणम्-एगो साहू पाओसियं परियट्टंतो रहसेण कालं न याणाति । सम्मदिट्ठिया य देवया तं हियट्ठयाए संबोहेइ मिच्छादिट्ठियाए भएणं । सा तक्कस्स घडं भरेउं महया सद्देणं उग्घोसेइ-मिहंय महियं ति । सो तीसे कन्नारोडयं असहमाणो भणइ-अहो ! तक्कस्स वेल त्ति । सा भणइ-जहा तुज्झं सज्झायस्स वेला । उवउत्तो 'मिच्छा दुक्कडं' भणइ । देवताए अनुसासिओ-मा एवं काहिसि, मा मिच्छादिट्ठिगाए छलिज्जि-हिसि । तस्स अकाले सज्झायंतस्स अननुयोगो । तम्हा काले पढियव्वं, तो अनुयोगो भवति ।।

वचनस्यानुयोगेऽननुयोगे च द्वे उदाहरणे-बधिरोल्लापो ग्रामेयकश्च ।

एगम्मि य गामे बहिरकुडुंबं परिवसइ, थेरो थेरी य । ताणं पुत्तो हलं वाहेइ । अन्नया सो हलं वाहेउं गओ खित्ते हलं वाहेइ । अण्णो य मणूसो तेन पासेणं जाइ । तेन सो पंथं पुच्छिओ । सो बहिरो चिंतेइ-एस बलद्दे सिंगेइ । तओ भणइ-अरे ! मम घरे जाइल्लगा बलद्दा, कहमेए सिंगेसि ? न हवसि-त्ति हलं उवत्तेउं तस्स पहाविओ । इयरो चिंतेइगहिल्लओ एस । संपट्ठिओ । तस्स य भज्जा भत्तं घित्तुमागया । सो भज्जाए कहेइ-बइल्ला सिंगिय त्ति । सा चिंतेइ-एस भणइ'अलोणयं भत्तं'ति। तओ भणइ-लोणियं भवउ मा वा, ते माऊए सिद्धं । सा घरं गया सासूए कहेइ-'अलोणयं' तव पुत्तो भणइ । सा य कत्तंतिया चिट्ठइ । तओ चिंतेइ-एसा भणइ 'अइथूलं कत्तेसि' । ताए पडिभणियं-थूलं वा भवउ वरडं वा, थेरस्स पुत्तं होहिइ । सा थेरं सद्दावेत्ता भणइ-सव्वं एयं अतिथूलं तो तव पुत्तं होहिइ । तत्थ तिला विसारिया । सो रक्खगो आसि । सो चिंतेइ-एसा भणइ 'तुमे तिला खाइया' । ततो सवहं करेइ-पीएमि ते जीवियं जइ एगं पि तिलं खाएमि । एवं जइ एगवयणेणं परूवेयव्वं दुवयणेण परूवेइ, दुवयणेनवा एगवयणेणं तो अननुयोगो । अह तह चेव परूवेइ तो अनुयोगो ।।

ग्रामेयकोदाहरणमेवम्-एक्का नागरमहिला भत्तारे मए 'कट्ठाईणि वि ता अकीयाणि घेच्छामु' त्ति अजीवमाणी खुड्डलयं पुत्तं घेत्तुं गामे पवुत्था । सो दारतो वड्ढंतो मायरं पुच्छइ-कहिं मम पिया ? । तीए भणियं-मओ सो । केण इ जीवियाइओ ? । भणइ-ओलग्गाए । तो खायं अहमवि ओलग्गामि । सा भणइ-न याणसि । तओ पुच्छइ-कहमोलग्गिज्जइ ? । भणिओ-विनयं करेज्जासि । केरिसो विनओ ? । जुक्कारो कायव्वो, नीयं चंकमियव्वं, छंदानुवत्तिणा भवियव्वं । सो भणइ-एवं काहामो । सो नगरं पहाविओ । अंतरा य तेन वाहा निलुक्का दिट्ठा, वड्डेणं सद्देणं जुक्कारो कओ । तेन सद्देणं मिगा पलाया । तेहिं घेत्तुं पहओ । तेन सब्भाओ कहिओ । मुक्को भणिओ य-जया एरिसं पिच्छिज्जासि तया निलुक्कंतेण सणियमागंतव्वं, न उल्लाविज्जइ, सणियं वा । तओ इंतेम रयगा दिट्ठा । ताहे निलुक्कंतो सणियं एइ । तेसिं च रयगाणं दिने दिने पुत्ताइं

Jain Education International For Private & Personal Use Only www.jainelibrary.org

हीरंति। तओ ठाणयं बद्धं रक्खंति इंते चोरे। 'एस चोरो निलुक्कंतो एति'' तओ बंधिउं पिट्टिओ। सब्भावे कहिए मुक्को भणिओ य-भणिज्जासि 'सुद्धं भवउ, खारो पडउ'। सो नगरसम्मुहं एइ। एगत्थ बीयाणि वाविज्जंति। तेन भणियं-सुद्धाणि हवंतु, खारो पडउ। तओ तेहिं 'किमकारणं वेरिओ एवं भासइ ?'त्ति पिट्टिओ। सब्भावे कहिए मुक्को भणिओ य-एरिसे कज्जे एवं भन्नइ 'एरिसं बहुं हवतु, गड्डाओ भरह एयस्स'। तओ वच्चंतो एगत्थ मयगं निज्जंतं दट्ठूण भणइ-बहुं भवउ एरिसं। तत्थ वि विट्टिओ। सब्भावे कहिए मुक्को भणिओ य-एरिसे कज्जे एवं भन्नइ 'अच्चंतवियोगो भवउ एरिसेणं कज्जेणं'। तओ गच्छंतो एगत्थविवाहे भणइ-एरिसेणं कज्जेणं अच्चंतवियोगो भवउ। एत्थ वि पिट्टिओ। सब्भावे कहिए मुक्को भणिओ य-एरिसे कज्जे एवं भणियव्वं 'निच्चं एरिसगाणि पिच्छंतया होह, सासयं भवउ'। तओ वच्चंतो एगत्थ नियलबद्धं दंडियं दट्ठूण भणइ-निच्चं एरिसयाणि पिच्छता हह, सासयं च एवं हवउ। तत्थ वि हओ। सब्भावे कहिए मुक्को भणिओ य-एरिसे कज्जे एवं भणिज्जासि 'एयाओ मे लहुं मुक्खो भवउ'। तओ गच्छंतो एगत्थ केइ मित्तसंघाडयं करिंते पिच्छइ। तत्थ भणइएवाओ मे लहुं मोक्खो भवउ। तत्थ वि पिट्टिओ। सब्भावे कहिए मुक्को गओ नगरे। तत्थ एगस्स दंडिकुलपुत्तगस्स अल्लीणो सेवंतो अच्छइ। अन्नया दुब्भिक्खे अंबिलजाऊ सिद्धिल्लिया। भज्जाए सो भणिओ-जाहि महायणमज्झाओ सद्दावेहि जेण भुंजइ, सीयला अजोग्गा अविस्सइ। तेन गंतूण महायणमज्झे वड्डेणं सद्देणं भणिओ-एहि एहि सीयली किल होइ अंबिलजाऊ। सो लज्जिओ घरं गओ। तेणं अंबाडिओ भणिओ य-एरिसे कज्जे सणियं कन्ने कहिज्जइ। अन्नया गेहं पलित्तं। तस्स भज्जाए भणियं-लहुं सद्दावेह ठक्कुरं। सो गंतुं सणियं कहेइ। जाव सो तस्स अक्खाइ ताव सव्वं घरं ज्झामियं। तत्थ वि अंबाडिओ भणिओ य-एरिसे कज्जे न वि आगम्मइ, अक्खायगेण अप्पणा चेव पाणिएण वा विज्झइ। अन्नया तस्स दंडिकुलपुत्तगस्स ण्हाऊण धूविंतस्स धूमो निगच्छइ। तओ सो गोमत्तं योमुत्ताइयं च छुभेइ। एवं जो अन्नम्मि कहेयव्वे अन्नं कहेइ तस्स अननुओगो। सम्मं कहिज्जगाणे अनुयोगो॥ भावे भावस्य विषयेऽनुयोगेऽननुयोगे च सप्तोदाहरणानि भवन्ति॥ तान्येवाह-

[भा.१७२] सावगभज्जा सत्तवइए य कुंकणगदारए नउले।
कमलामेला संवस्स साहसं सेणिए कोवे॥

वृ- प्रथममुदाहरणं श्रावकभार्या। द्वितीयं साप्तपदिकः पुरुषः। तृतीयं कौङ्कणकदारकः। चतुर्थं नकुलः। पञ्चमं कमलामेला। षष्ठं सम्बस्य साहसम् सप्तम 'श्रेणिके' श्रेणिकस्य कोपः॥ तत्र श्रावकभार्योदाहरणमिदम्-एगो सावगो अन्नं महिलं दट्ठुं अज्झोववन्नो दुब्बलीभवइ। भज्जाए पुच्छिओ। निब्बंधे कहियं। ताए भणियं-आनेमि। ताहे सा संज्झासमए तीसे अविरयाए तणएहिं वत्थेहिं अप्पाणं नेवत्थित्ता अंधयारे अल्लीणा। सो तीए समं अच्छिओ। तओ बीयदिवसे अद्धिइं पकओ 'वयं खंडियं'। ताए भणियं-मा अद्धिइं पकरेहि। न खंडियं, अहं चेव आगया। साभिन्नाणं पत्तियावियो। एवं जो ससमयवक्तव्वयं परसमयवत्तव्वयं भणइ, ओदइयभावलक्खणेणं उवसमियमालवक्खणं परूवेइ ताहे अननुयोगो भवति। सम्मं परूविज्जमाणे अनुयोगो॥

साप्तपदिकोदाहरणमेवम्-एगम्मि पच्चंतगामे एगो। ओलग्गयमणूसो साहु-माहणाईणं न सुणेइ नेव अल्लियइ न वा वसहिं देइ 'मा मम धम्मं कहेहिइ, तो हं मा सदयो होहामि'त्ति। अन्नया

Jain Education International For Private & Personal Use Only www.jainelibrary.org

तं गामं साहुणो आगया पडिस्सयं मग्गंति । ताहे सो गोट्ठिल्लिएहिं 'एएसिं वसहिं न देसि त्ति एएहि य पवंचिओ होउ' त्ति तस्स घरं कहियं । 'इत्थ एरिसो तारिसो सावगो' त्ति ते पुच्छंता गया । दिट्ठा, जाव न चेव आढाइ । तत्थ एगेण साहुणा भणियं- जइ न चेव सो एसो, अहवा पवंचिया मो त्ति। तं सोऊण ते पुच्छिया । जहावत्तं कहियं । सो चिंतेइ-अहो ! अकज्जं, मं ताव पवंचंतु, साहुणो कहं पवंचिंति ? । ताहे 'मा तेसिं । समो होउ' त्ति तेन भणियं-देमि वसहिं जइ मम धम्मं न कहेह । साहूहिं भणियं-एवं होउ त्ति । दिन्नं घरं । वासारत्ते वंते आपुच्छंति-विहरामो । ताहे पयट्टा साहुणोऽन्नत्थ विहरिउं । तेन अनुव्वइया । सीमापज्जंते धम्मो कहिओ । तत्थन किंचि तरइ घेत्तुं मूलगुणं उत्तरगुणं वा मंसविरई वा । पच्छा सत्तवइयं वयं दिन्नं-मारेउकामेणं जावइएणं कालेणं सत्तपयाइं ओसक्किज्जंति एवइयं कालं पडिक्खित्ता मारेयव्वं 'संबुज्झिस्सइ' त्ति काउं । गया साहुणो । अन्नया चोरियाए गओ । अवसउणेण नियत्तो रत्तिं सणियं घरं एइ । तद्दिवसं तस्स भगिणी आगएल्लया पुरिसनेवत्थं काउं भाउज्जाइयाए समं नडपिच्छगा गया । चिरेण आगया निद्दक्कंता तह चेव एगंतस्सयणे सइया। इयरो य आगओ पिच्छइ 'परपुरिसो' त्ति असिं उक्करिसित्ता 'आहणामि' त्ति ववसिओ । वयं संभरियं। ठिओ 'सत्तपयंतरं अच्छामि' त्ति । एयम्मि अंतरे भगिणीए बाहा भाउज्जाइयाए अक्कंतिया । ताए दुक्खाविज्जंतीए भणियंअवणेहि मे बाहातो सीसं । तेन सरो सन्नाओ-भगिणी मे एसा पुरिसनेवत्थिय त्ति । दिट्ठा । लज्जिओ जाओ 'अहो ! मणेणं अकज्जं जयं' ति । उवणओ जहा सावगभज्जाए । सो संबुद्धो पव्वइओ ॥

कोङ्कणकदारकोदाहरणमिदम्-कोंकणगविसए एगो दारगो । तस्स माया मया । पिया से अन्नमहिलं न लहइ 'सवत्तिपुत्तो अच्छइ' त्ति काउं । अन्नया सपुत्तो कट्ठाणं गओ, ताहे नेन चिंतियं-एयस्स भएणं महिलियं न लभामि-त्ति मारेमि । तओ पुत्तो भणिओ- वच्छ ! कंडं आनेहि । सो पहाविओ । अन्नेन कंडेण विद्धो । दारएण लवियं-किं कंडं खित्तं ? विद्धो मि । पुणो वि खित्तं। रडंतो मारिओ । पुव्वं 'अयाणंतेण विद्धो मि' त्ति अननुयोगो, 'मारिज्जामि' त्ति एवं नाए अनुयोगो । अहवा 'सारक्खणिज्जं मारेमि' त्ति अननुयोगो, सारक्खंतस्स अनुयोगो । एवं अन्नम्मि परूवियव्वे अन्नं परूवेमाणस्स विपरीतत्वादननुयोगः, यथाभूतं प्ररूपयतोऽनुयोगः ॥

नकुलोदाहरणमिदम्-एगा चारभडिया गब्भिणी । अन्ना वि नउलिणी गब्भिणी तत्थ य लिहए एइ य जाइ य । ताओ समगं पसूयाओ । चारभडाए चिंतियं-मम पुत्तस्स रमणओ नउलो भस्सइ-त्ति तस्स पीहयं देइ खरं च । अन्नया दुवारे तीसे अविरइयाए कंडंतीए तत्थ मंचुल्लियाए सो दारगो ओयारिओ । तत्थ सप्पेण चडित्ता खाइओ मओ । इओ य इयरेण नउलेण मंचुल्लियाए उयरंतो दिट्ठो खंडीकओ । ताहे सो रुहिरलित्तेणं तुंडेण तीसे अविरइयाए मूलं गंतुं चाडूणि करेइ। ताए नायं-एएन मम पुत्तो खतिओ । मुसलेण आहनित्ता मारिओ । ताहे धावंती गया पुत्तमूलं, जाव सप्पं खंडाखंडीकयल्लयं पासेइ, ताहे दुगुणतरमद्धिई पगया । तीसे अविरयाए पुव्वमननुयोगो, पच्छा अनुयोगो । एवं जो अन्नं परूवेयव्वं अन्नं परूवेइ तस्स अननुयोगो, जो तं चेव परूवेइ तस्स अनुयोगो ॥

कमलामेलोदाहरणम्-बारवईए बलदेवपुत्तस्स पुत्तो सागरचंदो नाम कुमारो, रूवेण य उक्किट्ठो सव्वेसिं संबाईणं इट्ठो । तत्थ य बारवईए वत्थव्वस्स चेव अन्नस्स रन्नो कमलामेलानाम

Jain Education International For Private & Personal Use Only www.jainelibrary.org

धूया उक्किट्ठसरीरा। सा य उग्गसेननत्तुस्स धनदेवस्स वरिल्लिया। इओ य नारओ सगरचंदस्स कुमारस्स सगासं आगओ। अब्भुट्ठिओ। उवविट्ठं समाणं पुच्छइ किंचि भयवं! अच्छेरयं दिट्ठं?। आमं दिट्ठं। कहिं?। इहेव बारवईए नयरीए कमलामेला नामां दारिया। खशअशइ दिन्निया?। आमं। कस्स?। उग्गसेन नत्तुस्स धणदेवस्स। तओ सो भणइ-कहं मम ताए समं संजोगो होज्जा?। 'न याणामु' त्ति भणित्ता गओ। सो य सागरचंदो तं सोउं न वि आसणे न वि सयणे धिइं लहइ। तं दारियं फलए पासंतो नामं च गिण्हंतो अच्छइ। नारओ वि कमलामेलाए अंतियं गओ। ताए पुच्छिओ किंचि अच्छेरयं दिट्ठं?। नारओ भणइ-दुवे दिट्ठाणि, रूवेन सागरचंदो, विरूवत्तणेन घनदेवो। तओ सागरचंदे मुच्छिया धनदेवे विरत्ता। नारएण आसासिया। तेन गंतुं सागरचंदस्स आइक्खियं, जहा 'इच्छइ' त्ति। ततो य सागरचंदस्स माया अन्ने य कुमारा अद्दन्ना-म्मरति नूनं सागरचंदो। संबो आगओ जाव पिच्छइ सागरचंदं विलवमाणं। ताहे अनेन पच्छओ धाइऊण अच्छीणि दोहि वि हत्थेहिं च्छाइयाणिं। सागरचंदेण भणियं-कमलामेले!। संबेण भणियं-नाहं कमालमेला, कमलामेलो हं। सागरचंदेण भणियं-आमं, तुमं चेव कमलामेलं दारियं मेलेहिसि। ताहे तेहिं कुमारेहिं संबो भणिओ-कमलामेलं मेलेहि सागरचंदस्स। न मन्नइ। तओ मज्जं पाएऊण अब्भुवगच्छाविओ। तओ विगयमओ चिंतेइ-अहो! मए आलो अब्भुवगओ, किं सक्का इदानिं निव्वहिउं?-ति पज्जुन्नं पन्नत्तिं विज्जं मग्गइ। तेन दिन्ना। तओ जम्मि दिवसे धनदेवस्स विवाहो तम्मि दिवसे विज्जाए पडिरूवं विउव्विऊणं कमलामेला अवहरिया रेवए उज्जाणे नीया। संबप्पमुहा कुमारा उज्जाणं गंतुं नारयस्स रहस्सं भिंदित्ता कमलामेलं सागरचंदं परिणावित्ता तत्थ किड्डंता अच्छंति। विज्जापडिरूवगं पि विवाहे वट्टमाणे अट्टट्टहासं काऊणं उप्पइयं। तओ जाओ खोभो। न नज्जइ 'केन इ हारिय?' त्ति।

नारओ पुच्छिओ भणइ-दिट्ठा रेवइए उज्जाणे केन वि विज्जाहरेण अवहरिया। तओ सबल-वाहणो नारायणो निग्गओ। संबो विज्जाहररूवं काऊण जुज्झिउं संपलग्गो। सव्वे दसाराइणो पराइया। तओ नारायणेण सद्धिं लग्गो। तओ जाहे नेनं नायं 'रुट्ठो ताउ' त्ति तओ से चलनेसु पडिओ। कण्हेण अंबाडिओ। तओ संबेण भणियं-एसा अम्हेहिं गवक्खेण अप्पाणं मुयंती दिट्ठा। तओ कण्हेण उग्गसेनो अनुगमिओ। पच्छा इमाणि भोगे भुंजमाणाणि विहरंति। अन्नया भयवं अरिट्ठनेमिसामी समोसरिओ। तओ सागरचंदो कमलामेला य सामिसगासे धम्मं सोऊण गहियानुव्वयाणि संवुत्ताणि। तओ सागरचंदो अट्ठमि-चउद्दसीसु सुन्नघरे वा सुसाणे वा एगराइयं पडिमं ठाइ। धनदेवेणं एयं नाऊणं तंबियाओ सुईओ घडावियाओ। तओ सुन्नघरे पडिमं ठियस्स वीससु वि अंगुलीनहेसु अक्कोडियाओ। तओ सम्ममहियासमाणो। वेयणाभिभूओ कालगतो देवो जाओ। ततो बिइयदिवसे गवेसिंतेहिं दिट्ठो। अक्कंदो जाओ। दिट्ठाओ सूईओ। गवसिंतेहिं तंबकुट्टगसगासे उवलद्धं-धनदेवेन काराविया ओ। रूसिया कुमारा धनदेवं मग्गंति। दुण्ह वि बलाणं जुद्धं संपलग्गं। तओ सागरचंदो देवो अंतरे ठाऊण उवसामेइ। पच्छा कमलामेला भयवओ सगासे पव्वइया। इत्तियं पसंगेण भणियं। इत्थ सागरचंदस्स कमलामेलं संबं मन्नमाणस्स अननुयोगो, 'नाहं कमलामेल' त्ति भणिए अनुयोगो। एवं जो विवरीयं परूवेइ तस्स अननुयोगो, जहाभावं

Jain Education International For Private & Personal Use Only www.jainelibrary.org

परूवेमाणस्स अनुयोगो ॥

सम्बस्य साहसमुदाहरणम्-जंबवती नारायणं भणइ-एक्का वि मए पुत्तस्स अनाडिया न दिट्ठा। नारायणेण भणियं-अज्ज दाएमि। ताहे नारायणेणं जंबवईए आभीरीरूवं कयं, अप्पणो भणिया-महियं किणामि त्ति एहि। सा अनुगच्छइ। आभीरो से मग्गेण एइ। सो संबो एगं देउलियं पवेसइ। आभीरी भणइ-नाहं पविसामि, मोल्लं देहि। सो भणइ-दिज्जइ, पविसाहि। सा भणइ-एत्थ चेव ठिओ तक्कं गिण्हाहि। सो भणइ-अवस्स पविसियव्वं। नेच्छइ ताहे हत्थे लग्गो। आभीरो उद्धाइऊण समं लग्गो। संबो जुद्धमहिड्डिओ। आभीरो वासुदेवो जाओ, इयरी वि जंबवई। तओ लज्जिओ अंगुट्ठिं काऊण पलाइओ। बिइयदिवसे मड्डाए आनिज्जंतो खीलगं घडेइ। वासुदेवेन पुच्छिओ-किं एयं घडिज्जइ? संबो भणइ-जो परिवासियं बोल्लं काहिइ तस्स मुहे कुट्टिज्जिहि त्ति। इत्थं पढमं अननुयोगो, नाए अनुयोगो। एवं जो विरूवं परूवेइ तस्स अननुयोगो, तहभावं परूवेमाणस्सअनुयोगो ॥

श्रेणिककोपोदाहरणम्-रायगिहे नयरे सेणिओ राया। चिल्लणा तस्स भारिया। सा वद्धमाणसामिं तित्थयरं वंदित्ता वेयालियवेलाए माहमासे नगरं पविसइ। अंतरा पहे साहू पडिमापडिवन्नतो दिट्ठो। तीए रत्तिं सुत्तियाए कह वि हत्थो विलंबिओ। जया सीएणं गहिओ तया चेइयं। पवेसिओ सउडिमज्झे हत्थो। तस्स हत्थस्स तणएणं सीएणं सव्वं सरीरं सीएण गहियं। पच्छा ताए भणियं-स तपस्वी किं करिष्यति साम्प्रतम्? । पच्छा रत्ता सेणिएण चिंतियं-संगारदिन्नओ को वि। रुट्ठेण पभाए अभओ भणिओ सिग्घं अंतेउरं पलीवेहिं। सेणिओ गओ सामिणो मूलं। अभएण हत्थिसाला पलीविया। सामिं पुच्छइ-चिल्लणा एगपत्ती अनेगपत्ती वा?। सामिणा भणियं-एगपत्ती। तओ 'मा डज्झिहि' त्ति तुरियं नियत्तो। अभओ य निग्गच्छइ। तेन भणियं-पलीवियं ?। अभओ भणिइ-आमं। सेणिओ भणइ-तुमं किं तत्थेव न पडिओ ?। पडिभणइ-अहं पव्वइस्सामि, किं मे अग्गिपवेसेन ?। ताहे 'मा ज्झिज्झिहि' त्ति पच्छा अभएण भणियं-न डज्झइ। सेणियस्स चेल्लणाए पुव्वं अननुयोगो, पुच्छिए अनुयोगो। एवं विवरीए परूवेइ अननुयोगो, जहाभावं परूविए अनयोगो॥ तदेवमुक्तं निक्षेपद्वारम्। इदानीमेकार्थिकद्वारं वक्तव्यम्, तत्र तिष्ठतु तावदेतत्, एकार्थिकामिधाने को गुणः ? इत्यत आह- एकार्थिकद्वारम्

[भा.१७३] बंधानुलोमया खलु, सुत्तम्मि य लाघवं असम्मोहो।
सत्थगुणदीवणा वि य, एगट्ठगुणा हवंतेए ॥

वृ-एकार्थिकाभिधाने यान्यर्थपदानि गाथादिभिर्बद्धु (र्बन्द्धु] मिष्यन्ते तेषां बन्धेऽनुलोमता भवति, अननुकूलाभिधानपरिहारेणानुकूलाभिधाने बन्धो भवतीत्यर्थः॥ अनुकूलेन चाभिधानेन बद्धे सूत्रे सूत्रस्य लाघवं भवति। तथा विवक्षितार्थस्य 'असम्मोहः' निस्सन्दिग्धा प्रतीति, यथा शक्र इति वा पुरन्दर इतिवा इन्द्र इति वा इत्याद्युक्ते शक्रशब्दार्थस्य। तथा शास्ता-तीर्थकरस्तस्य गुणास्तषां दीपना-प्रकाशना भवति, यथा-अहो! भगवान् एकैकस्यार्थस्य बहूनि पर्यायनामानि जानाति स्म। एते एकार्थिनामभिधाने गुणा भवन्ति ॥ साम्प्रत्यैकार्थिकानि वक्तव्यानि, तानि द्विधा-सूत्रस्याऽर्थस्य च। तत्र प्रथमतः सूत्रस्याऽऽह-

[भा.१७४] सुय सुत्त गंथ सिद्धंत सासणे आण वयण उवएसो ॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

पन्नवणमागमे इय, एगट्ठा पज्जवा सुत्ते ॥

वृ- श्रुतं सूत्रे ग्रन्थः सिद्धान्तः शासनम् आज्ञा वचनम् उपदेशः प्रज्ञापना आगमः 'इति' एते दश 'पर्यायाः' एकार्था सूत्रस्य ॥ एतेषां च सर्वेषामपि पदानां नामादिकश्चतुष्को निक्षेपः । तत्र सर्वत्रापि नाम-स्थापने द्रव्यत आगमतो नोआगमतो ज्ञशरीर-भव्यशरीरे प्रतीते । शेषं वक्तव्यम् । तत्र श्रुतमधिकृत्याह-

[भा.१७५] दव्वसुयं पत्तग-पुत्थएसु जं पढइ वा अनुवउत्तो ।
आगम-नोआगमओ, भावसुयं होइ दुविहं तु ॥

वृ- नोगआगमतो द्रव्यश्रुतं ज्ञशरीर-भव्यशरीरव्यतिरिक्तं पत्रक-पुस्तकेषु न्यस्तम्, यच्च वाऽनुपयुक्तः पठति तद् नोआगमतो द्रव्यश्रुतम् । भावश्रुतं द्विविधम्-आगमतो नोआगमतश्च ॥

[भा.१७६] आगमओ सुयनाणी, सुओवउत्तो य होइ भावसुयं ।
सो सुयभावाऽणन्नो, सुयमवि उवओगओऽणन्नं ॥

वृ- तत्राऽऽगमतो भावश्रुतं श्रुतज्ञानी 'श्रुतोपयुक्तः' श्रुतज्ञानोपयोगवान्, "उपयोगो भावनिक्षेपः" इति वचनात् । अथ कथं श्रुतज्ञानी श्रुतोपयुक्तो भावश्रुतम् ? अत आह-यस्मात् 'सः' श्रुतज्ञानी श्रुतभावानन्यः, श्रुतमपि जीवस्वभावादुपयोगादनन्यत्, ततः स एव श्रुतज्ञानी भावश्रुतम् ॥ नोआगमतो भावश्रुतमाह-

[भा.१७७] जं तं दुसत्तगविहं, तमेव नोआगमो सुयं होइ ।
सामित्तासंबद्धं, समिईसहियस्स वा जं तु ॥

वृ- यत् 'तत्' प्रागभिहितं 'द्विसप्तविधं' चतुर्दशविधमक्षरश्रुतादि, यदि वा द्वादशप्रकारमङ्गप्रविष्टमाचारादि द्विविधमङ्गबाह्यं कालिकमुत्कालिकं चेति चतुर्दशविधं श्रुतज्ञानं तदेव 'स्वामित्वासम्बद्धं' पुरुषेषु स्वामित्वेनासम्बद्धम्, पुरुषेभ्यः पृथग्विवक्षितमित्यर्थः, नोआगमतो भावश्रुतम् । यदि वा समितिसहितस्य पुरुषस्योपयुक्तस्य 'यत्' श्रुतं तद् नोआगमतो भावश्रुतम् । अत्र नोशब्दो मिश्रवाची ॥ अधुना सूत्रद्वारमाह-

[भा.१७८/१] पंचविहं पुन दव्वे, भावम्मि तमेव होइ सुत्तं तु ।

वृ. द्रव्यतो नोगआगमतो व्यतिरिक्तं सूत्रं पञ्चविधम्, तद्यथा-अण्डजं हंसगर्भादि, बोण्डजं कार्पासिकम्, कीटजं कृमिरागम्, वालजमूर्णामयम्, वल्कजं सनसूत्रादि । नोआगमतो भावसूत्रं 'तदेव' यदनन्तरं नोआगमतो भावश्रुतमुक्तम् ॥ ग्रन्थद्वारमाह-

[भा.१७८/२] सच्चित्ताई गंथो, दव्वे भावे इमं चेव ॥

वृ- द्रव्यतो नोआगमतो व्यतिरिक्तो ग्रन्थस्त्रिविधः 'सचित्तादि' सचित्तः अचित्तो मिश्रश्च । एष त्रिविधोऽप्युपरि प्रथमसूत्रे वक्ष्यते । भावे ग्रन्थः 'इदमेव' कल्पाध्ययनम् ॥

अधुना सिद्धान्तद्वारमाह-

[भा.१७९] जेन उ सिद्धं अत्थं, अंतं नयतीति तेन सिद्धंतो ।
सो सव्व-पडीतंतो, अहिगरणे अब्भुवगमे य ॥

वृ- येन कारणेन प्रमाणतः सिद्धमर्थम् 'अन्तं नयति' प्रमाणकोटिमारोहयतीति तेन कारणेन

Jain Education International For Private & Personal Use Only www.jainelibrary.org

सिद्धान्त उच्यते । स एष द्रव्यतो नोआगमतो व्यतिरिक्तः पुस्तक-पत्रन्यस्तः । भावतश्चतुर्विधः, तद्यथा-सर्वतन्त्रसिद्धान्तः प्रतितत्रसिद्धान्तः अधिकरणसिद्धान्तः अभ्युपगमसिद्धान्तश्च ॥

तत्र सर्वतन्त्रसिद्धान्तमाह-

[भा.१८०] संति पमाणाति पमेयसाहगाइं तु सव्वतंतो उ ।
थेज्ञवई य वसुमई, आपो य दवा चलो वाऊ ॥

वृ- सन्ति 'प्रमाणानि' प्रत्यक्षादीनि प्रमेयसाधकानि, तथा स्थैर्यवती पृथिवी, आपो द्रवाः, चलो वायुः, एष सर्वतन्त्रसिद्धान्तः, सर्वेषु तन्त्रेष्वस्यार्थस्य सिद्धत्वात् । प्रतितन्त्र सिद्धान्त माह-

[भा.१८१] जो खलु सतंतसिद्धो, न य परतंतेसु सो उ पडितंतो ।
निच्चमनिच्चं सव्वं, निच्चानिच्चं च इच्चाई ॥

वृ- यः खल्वर्थ स्वतन्त्रसिद्धो न परतन्त्रेषु स प्रतितन्त्रसिद्धान्तः । यथा-सर्वं नित्यं साङ्ख्यानाम्, सर्वमनित्यं क्षणिकवादिनाम्, सर्वं नित्याऽनित्यमार्हतानामित्यादि ॥ अधिकरणसिद्धान्तमाह-

[भा.१८२] सो अहिगरणो जहियं, सिद्धे सेसं अनुत्तमवि सिज्झे ।
जह निच्चत्ते सिद्धे, अन्नत्ता-ऽमुत्तसंसिद्धी ॥

वृ- यस्मिन् सिद्धे शेषमनुक्तमपि सिध्यति, यथा आत्मनो नित्यत्वे सिद्धे शरीरादन्यत्व-संसिद्धिरमूर्त्तत्वसंसिद्धिश्च । एषोऽधिकरणसिद्धान्तः । अभ्युपगमसिद्धान्तमाह-

[भा.१८३] जं अब्भुविच्च कीरइ, सिच्छाए कहा स अब्भुवगमो उ ।
सीतो वन्ही गयजूह तणग्गे मग्गु-खरसिंगा ॥

वृ- यत् 'अब्भुपेत्य' स्वेच्छया अभ्युपगम्य वादकथा क्रियते, यथा-शीतो वह्नि, गजयूथं तृणाग्रे, मद्गोः-जलकाकस्य खरस्य च शृङ्गमिति । स एषोऽभ्युपगमसिद्धान्तः ॥

सम्प्रति शासनमाज्ञां चाह-

[भा.१८४] कडकरणं दव्वे सासनं तु दव्वे व दव्वओ आणा ॥
दव्वनिमित्तं वुभयं, दुन्नि वि भावे इमं चेव ॥

वृ- नोआगमतो द्रव्यशासनं व्यतिरिक्तं 'कृतकरणं' मुद्रा इत्यर्थः । आज्ञाऽपि द्रव्यतो नोआगमतो व्यतिरिक्ता सैव मुद्रा । अथवा 'द्रव्यनिमित्तं' द्रव्योत्पादननिमित्तं यत् 'उभयं' शासनमाज्ञा तद् द्रव्यशासनं सा द्रव्याज्ञा । 'द्वे अपि च' शासना-ऽऽज्ञे भावत इदमेवाध्ययनम् । किमुक्तं भवति ? -नोआगमतो भावशासनं भावाज्ञा च इदमेव कल्पाख्यमध्ययनम् । तथाहि-य एतस्याज्ञां न करोति सोऽनेकानि मरणादीनि प्राप्नोति ॥

इदानीं वचनद्वारम्, वचनं वागित्येकार्थम्, ततो वाचमधिकृत्याह-

[भा.१८५] दव्ववती दव्वाइं, जाइं गहियाइँ मुंचइ न ताव ।
आराधनि दव्वस्स वि, दोहि वि भावस्स पडिवक्खो ॥

वृ- यानि भाषायोग्यानि द्रव्याणि भाषात्वेन गृहीतानि, न तावदद्यापि मुञ्चति सा नोआगमतो व्यतिरिक्ता द्रव्यवाक् । अथवा द्रव्यस्य 'आराधनी' यथास्वरूपप्रतिपादिका सा द्रव्यवाक् । द्वाभ्यामपि प्रकाराभ्यां भावस्य प्रतिपक्षो वक्तव्यः । किमुक्तं भवति ? - यानि भाषायोग्यानि द्रव्याणि भाषात्वेन परिणमय्य मुञ्चति सा नोआगमतो भाववाक्, अथवा या जीवस्य भावं

Jain Education International For Private & Personal Use Only www.jainelibrary.org

ज्ञानादिकमाराधयति अजीवस्य घटादेर्वर्णादिकं सा नोआगमतो भाववाक् ॥

साम्प्रतमुपदेश-प्रज्ञापना-ऽऽगमानाह-

[भा.१८६] दव्वाण दव्वभूओ, दव्वट्ठाए व विज्जमाईया ।
अह दव्वे उवएसो, पन्नवणा आगमे चेव ॥

वृ- द्रव्याणां द्रव्यभूतो द्रव्यार्थं वा वैद्यादय उपदेशादि कुर्वन्ति एष द्रव्यतो नोआगमतो व्यतिरिक्त उपदेशः प्रज्ञापना आगमश्च । इयमत्र भावना-यद्वैद्य आतुरस्यौषधद्रव्याणामुपदेशं करोति, यंवा साधुरनुपयुक्त उपदेशं कथयति, अथवा यद्वैद्य 'एष मम द्रव्यं दास्यति' इति द्रव्यनिमित्तमौषधद्रव्याणामुपदेशं करोति एष नोआगमतो व्यतिरिक्तो द्रव्योपदेशः । तथा यः कश्चिद्रव्याणि प्रज्ञापयति, भावं वा प्रज्ञापयन् अनुपयुक्तः, यदि वा 'एष मम किञ्चिद्दास्यति' इति द्रव्यनिमित्तं प्रज्ञापनां द्रव्यादीनां करोत एषा नोआगमतो व्यतिरिक्ता द्रव्यप्रज्ञापना । तथा यद्धिरण्यादीनामागमं सङ्गहं करोति, यो वा साधुरनुपयुक्त आगमं पठति, यं वाऽऽगमं वैद्यो वृत्तिनिमित्तं पठति स नोआगमतो व्यतिरिक्तो द्रव्यागमः । तथा य उपयुक्त उपदिशति प्रज्ञापयति पठति वाऽऽगमम् एते नोआगमतो भावत पदेश-प्रज्ञापनाऽऽगमाः ॥ साम्प्रतमर्थैकार्थिकान्याह-

[भा.१८७] अनुयोगो य नियोगो, भास विभासा य वत्तियं चेव ।
एए अनुओगस्स उ, नामा एगट्ठिया पंच ॥

वृ- अनुयोगो नियोगो भाषा विभाषा वार्त्तिकं च, एतानि पञ्चानुयोगस्यैकार्थिकानि । तत्रानुकूलः सूत्रस्यार्थेन योगोऽनुयोगः । निश्चितो योगो नियोगः । अर्थस्य भाषणं भाषा । विविध-प्रकारैर्भाषणं विभाषा । वृत्तौ भवं वार्त्तिकम्, यदेकस्मिन् पदे यदर्थापन्नं तस्य सर्वस्यापि भाषणम् ॥

उक्तान्यैकार्थिकानि, सम्प्रति निरुक्तद्वारमाह-

[भा.१८८] निच्छियमुत्त निरुत्तं, तं पुन सुत्ते य होइ अत्थे य ।
सुत्ते उवरिं वुच्छं, अत्थनिरुत्तं इमं तत्थ ॥

वृ- निश्चितमुक्तं निरुक्तम् । तच्च द्विधा-सूत्रस्यार्थस्य च । तत्र सूत्रस्योपरि "नेरुत्तियाणि तस्स इत्यादिना ग्रन्थेन वक्ष्ये अर्थनिरुक्तं पुनः 'इदं' वक्ष्यमाणम् ॥ तदेव विवक्षु प्रतमतस्तद्विषयान् दृष्टान्तान् वक्तव्यान् सूचयति-

[भा.१८९] अनु बायरे य उंडिय, पडिंसुया चेव अब्भपडले य ।
वत्तिय चउक्कभंगो, निरुत्तादी वत्तणी व जहा ॥

वृ- अनुयोगे अनुत्वे बादरत्वे च दृष्टान्तो वक्तव्यः । नियोगे 'उण्डिका' उण्डिकापत्रकदृष्टान्तः, उण्डिका-मुद्रा । भाषायां प्रतिश्रुतदृष्टान्तः । विभाषायामभ्रपटलः । वार्त्तिके चत्वारो भङ्गाः, तत्र मल्लदृष्टान्तः । तथा निरुक्तादीनि यथा वर्द्धमानस्वाम्याख्यातवान् तथा किमृषभादयोऽपि ? उतान्यथा ? उच्यते-तथेति, केवलज्ञानस्य तुल्यत्वात्; यथा 'वर्त्तनी' मार्ग सा सर्वजनपदेषु प्रमाणत एकैव भवति ॥ तत्र प्रथममनुयोगद्वारमाह-

[भा.१९०] अनुना जोगो अनुजोगो, अनु पच्छाभावओ य थेवे य ।
जम्हा पच्छाऽभिहियं, सुत्तं थोवं च तेनानू ॥

वृ- इह अनुयोग इति वा शब्दसंस्कारः । तत्र 'अनुना' पश्चाद्भूतेन योगोऽनुयोगः, अथवा

Jain Education International For Private & Personal Use Only www.jainelibrary.org

'अनुना' स्तोकेन योगः अनुयोगः । तथा चाह-अनु इति पश्चाद्भावे स्तोके च । यस्मात् पश्चात् 'अभिहितं' कृतं सूत्रं स्तोकं च तेन अउ इति भण्यते । अर्थ पुनरननुः, पूर्वमुक्तत्वात्, बादरश्च, बहुत्वात् ।। एवमाचार्येणोक्ते शिष्यः प्राह-

[भा.१९१] पुव्वं सुत्तं पच्छा, य पगासो लोइया वि इच्छंति ।
पेलासरिसे सुत्ते, अत्थपया हुंति बहुया वि ।।

वृ- ननु पूर्वं सूत्रं पश्चात् 'प्रकाशः' अर्थ, 'तान् तान् भावान् प्रकाशयतीति प्रकाशः' इति त्युत्पत्तेः, सूत्राभावे तु स कस्य स्यात् ? ; अपि च लौकिका अप्येवमेवेच्छन्ति, तथा चोक्तं तैरेव-

पूर्वं सूत्रं ततो वृत्तिर्वृत्तेरपि च वार्त्तिकम् ।
सूत्र-वार्त्तिकयोर्मध्ये, ततो भाष्यं प्रवर्त्तते ।।

ततो यद्वदथ यूयं 'पूर्वमर्थ पश्चात्सूत्रम्' इति तन्न घटां प्राञ्चति । यदपि च ब्रूथ 'सूत्रमनुः, अर्थो बादरः' इति तदपि न सम्यक्, यत एकस्यां पेडायां बहूनि वस्त्राणि मान्ति तत्र पेडाया एव बादरत्वं युज्यते, तद्वशाद् बहूनि वस्ताणि मान्ति स्म; एवमत्रापि 'पडासदृशे' पेडास्थानीये सूत्रे बहून्यर्थपदानि वर्त्तन्ते, ततः सूत्रमेव बादरीभवितुमर्हति नार्थ इति ।।

न च महत्त्वमेकान्तेनार्थस्य, कस्मात् ? इत्याह-

[भा.१९२] इक्कं वा अत्थपयं, सुत्ता बहुगा वि संपयंसंति ।
उक्खित्त नायमाइसु, अयमवि तम्ह अनेगंतो ।।

वृ- एकमर्थपदं बहूनि सूत्राणि सम्प्रदर्शयन्ति, यथा उत्क्षिप्तज्ञाते 'अनुकम्पा कर्त्तव्या' इत्यर्थो बहुभिः सूत्रैर्वर्णितः । आदिशब्दात् सङ्घाटादिषु ज्ञातेषु 'न वर्णहेतोराहारयितव्यम्' इत्यादिपरिग्रहः । तस्मादयमनेकान्तो यत् 'अर्थो महान्' इति ।। आचार्यप्राह-यत्त्वयोक्तं 'पूर्वं सूत्रं पश्चादर्थः' इति तन्न भवति, कथम् ? इत्याह-

[भा.१९३] अत्थं भासइ अरिहा, तमेव सुत्तीकरेंति गणधारी ।
अत्थं च विना सुत्तं, अनिस्सियं केरिसं होज्जा ।।

वृ-अर्थं भाषतेऽर्हन् । 'तमेव' अर्हद्भाषितमर्थं सूत्रीकुर्वन्ति गणधारिणः । अर्थं च विना सूत्रम् 'अनिश्रितम्' अर्थनिश्रारहितं कीदृशं स्यात् ? असम्बद्धं स्यात्, ''दशदाडिमे'' त्यादिवाक्यवदिति भावः । अपि च लौकिका अपि शास्तारः प्रथमतोऽर्थं दृष्ट्वा सूत्रं कुर्वन्ति, अर्थमन्तरेण सूत्रस्यानिष्पत्तेः । यदप्युक्तं 'पेडावद्बादरं सूत्रम्, अर्थोऽणुः' इति तदप्यश्लीलम्, यतस्तस्या एव पेडाया एकं वस्त्रमादाय तेनानेकाः पेडा बध्यन्ते, तथैकस्मादर्थाद्बहूनि सूत्राण्यर्वाक् तेनैव बध्यन्ते । एवं च वस्त्रस्थानीयस्यार्थस्य महत्त्वम्, पेडास्थानीयस्य तु सूत्रस्यानुत्वमेव । यदप्युक्तं 'न च महत्त्वमेकान्तेनार्थस्य' इत्यादि तदप्यपरिभावितपरिभाषितम्, यत उत्क्षिप्तज्ञातादिषु सत्त्वानुकम्पादिकोऽर्थस्तावन्मात्रस्य सूत्रस्य, अशेष्य तु शेषोऽर्थः ।।

उक्तोऽनुयोगः, अधुना नियोगमाह-

[भा.१९४] अहिगो जोगो निजोगो, जहाऽइदाहो भवे निदाहो त्ति ।
अत्थनिउत्तं सुत्तं, पसवइ चरणं जओ मुक्खो ।।

वृ- 'नि' आधिक्ये, अधिको योगो नियोगः, यथाऽतिदाहो निदाहः । कस्य केन सहाधिक्यम्?

Jain Education International For Private & Personal Use Only www.jainelibrary.org

इति चेद् उच्यते-सूत्रस्यार्थेन । आधिक्येन योगस्य किं फलम् ? इति चेद् अत आह-अर्थेन सममाधिक्येन नियुक्तं सूत्रं 'चरणं' चारित्रं प्रसूते, यतः संसाराद् मोक्षः ।। अत्रैव प्रसवने दृष्टान्तमाह-

[भा.१९५] चच्छनियोगे खीरं, अत्थनियोगेण चरणमेवं तु ।
पत्तग दंडियमुभयं, दंडियसरिसो तहिं अत्थो ।।

वृ- यथा गौर्वत्सेन नियुक्ता सती क्षीरं प्रसूते, एवमर्थेन समं नियुक्तं सूत्रं चरणं प्रसूते । यदि पुनरेकं केवलं सूत्रं स्यात् नार्थस्तेन सङ्गृहीतो भवेत् ततश्चरणप्रसवस्याभावः, यथा वत्सनियोगाभावे गोः क्षीरप्रसवस्याभावः । अर्थोऽपि केवलः सूत्रविहीनो न कार्यसाधकः, यथा केवलो वत्सः । अत्रैव दृष्टान्तान्तरमाह-"पत्तग दंडिय उभयं"ति 'पत्रकं' लेखः 'दण्डिका' लेखस्योपरि मुद्रानियोगः 'उभयं' पत्रकं दण्डिका च । इयमत्र भावना-

तिन्नि पुरिसा रायाणमोलग्गंति । राया तुट्ठो । कम्मिइ नगरे पसाओ कओ । तत्थ एगेण पुरिसेन जे तम्मि नयरे रायपुरिसा तेसिं जोग्गं पत्तयमाणीयं परं मुद्दारहियं । बिइएण दंडिया चेव केवला । तइएणोभयं । तत्थ जेण मुद्दारहियं पत्तयमाणीयं सो रायपुरिसेहिं भणिओ-नत्थि पत्तगस्सोपरि मुद्दाविणिओग त्ति न मन्नेमो । बिइओ भणिओ-अत्थि इयं मुद्दा, परं को रन्ना पसाओ कओ ? को वा न कउ ? त्ति न जाणामो त्ति, तम्हा न देमो त्ति । तइएणोभयं दरिसियं । सव्वं जहत्थियं लद्धं । एव दृष्टान्तः ।। अयमर्थोपनयः-पत्रसदृशं सूत्रम्, दण्डिकासदृशोऽर्थः । यथा पत्रकं केवलं दण्डिका वा न कार्यस्य प्रसाधिका, उभयं तु प्रसाधकम्, एवं सूत्रमर्थश्च पृथग् न चरणप्रसाधकः, उभयं तु प्रसाधकम् ।। सम्प्रति प्रतिश्रुतदृष्टान्तोपेतं भाषाद्वारमाह-

[भा.१९६] पडिसद्दगस्स सरिसं, जो भासइ अत्थमेगु सुत्तस्स ।
सामइय बाल पंडिय, साहु जईमाइया भासा ।।

वृ- यथा गिरिकुहर-कन्दरादिषु यादृशः शब्दः क्रियते तादृशः प्रतिशब्द उत्तिष्ठति, एवं यो यादृशं सूत्रं तस्य तादृशमर्थमेकं भाषते तस्य तद् भाषणं भाषा । यथा समभावः सामायिकम्, द्वाभ्यां-बुभुक्षया तृषा वाऽऽगलितो बालः, साधयति मोक्षमार्गमिति साधुः, यतते सर्वात्मना संयमानुष्ठानेष्विति यति, आदिशब्दात् तपतीति तपन इत्यादिपरिग्रहः ।।

साम्प्रतमभ्रपटलदृष्टान्तसमन्वितं विभाषाद्वारमाह-

[भा.१९७] एक्केणं एक्कदलं, तहिं कयं बिईएण बहुतरगा ।
तइएण छाइयं तं, तिल्लं-ऽबिलमादुवाएहिं ।।

वृ- एकेन च्छत्रकारेण त्रयाणामात्मीयशिष्याणां चत्राच्छादनार्थमभ्रपटलानि दत्तानि 'छत्राण्याच्छादयत' । तत्रैकेन शिष्येण एकमभ्रपटलदलं तत्र च्छत्रे कृतम्, द्वितीयेनाऽऽत्मीयच्छत्रे बहुतराणि द्वि-त्रि-चतुःप्रभृतीनि अभ्रपटलानि लापितानि, तृतीयेन च बहून्यभ्रपटलानि दत्त्वा तैला-ऽम्लादिभिरुपायैस्तच्छत्रं सर्वात्मनाऽऽच्छादितम् । किमुक्तं भवति ?-तान्यभ्रपटलदलानि लापितानि तैला-ऽम्लादिभिस्तीमित्वा सर्वथा निर्भेदं कृतम् । एष दृष्टान्तः, अयमर्थोपनयः-प्रथमशिष्यसदृशो भाषकः, द्वितीयशिष्यसदृशो विभाषकः ।।

[भा.१९८] एगपए उ दुगाई, जो अत्थे भणइ सा विभासा उ ।
असइ य आसु य धावइ, न य सम्मइ तेन आसो उ ।।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

वृ- तथा चाह-य एकस्मिन् द्वि-त्रादीनर्थान् वक्ति, यथाऽश्नातीत्यश्वः, यदि वाऽऽशु धावति न च श्राम्यतीत्यश्वः, एष विभाषकः, तस्य भाषणं विभाषा। तृतीयशिष्यसदृशो व्यक्ति-करः। उक्तञ्च- पढमसरिच्छो भासगो, बिइय विभासो य तइय वित्तिकरो। इति।

सम्प्रति मङ्खदृष्टान्तोपेतं वार्त्तिकद्वारमाह- ॥

[भा.१९९] सामाइयस्स अत्थं, पुव्वधर समत्तमो विभासेइ।
चउरो खलु मंखसुया, वत्तीकरणम्मि आरणा ॥

वृ- यः सामायिकस्यार्थं 'पूर्वधरः' चतुर्दशपूर्वधारी सन् समस्तम् 'ओ' इति पादपूरणे विभाषते, यतः परं किमपि न वक्तव्यमस्ति स व्यक्तिकरो वार्त्तिककर इत्येकार्थौ। तस्मिंश्च व्यक्तिकरणे चत्वारः खलु मङ्खसुता आहरणानि॥ तान्येवाह-

[भा.२००] फलगिक्को गाहाहिं, बिइओ तइओ य वाइयत्थेणं।
तिन्नि वि अकुडुंबभरा, तिगजोग चउत्थओ मरइ ॥

वृ- चत्वारो मङ्खाः। तेषामेकः फलकं गृहीत्वा हिण्डते, न गाथा उच्चरति, नापि वाचा कमप्यर्थं भाषते स न किञ्चिल्लभते। द्वितीयो न फलकं गृह्णाति, केवलं गाथाः पठन् हिण्डते सोऽपि न किञ्चिल्लमते। तृतीयो न फलकं गृह्णाति, नापि गाथा उच्चरति, परं वाचा कमप्यर्थं भाषते सोऽपि न किञ्चिल्लभते। चतुर्थस्तु फलकं गृहीत्वा गाथाः पठन् तासामर्थं च भाषमाणो हिण्डते, सर्वत्र लभते। आद्यास्त्रयोऽकुटुम्बभराः, चतुर्थ 'त्रिकयोगे' त्रिकयोगसम्प्रयुक्तः कुटुम्बभरः। एष दृष्टान्तः, अयमर्थोपनयः-व्यक्तावपि चत्वारो भङ्गाः-एकस्य सूत्रमायाति नार्थ, द्वितीयस्यार्थो न सूत्रम्, तृतीयस्य सूत्रमप्यायाति अर्थोऽपि, चतुर्थस्य न सूत्रं नाऽप्यर्थः। अत्र द्वावाद्यौ चतुर्थश्च आद्यत्रिमङ्खपुरुषवन्न मोक्ष लक्षणस्वकार्यप्रसाधकाः, तृतीयस्तु चतुर्थमङ्खवदात्मनो मोक्षप्रसाधकः॥ आह सम्प्रति कीदृशो व्यक्तिकरः ? इत्यत आह-

[भा.२०१] जे जम्मि जुगे पवरा, तेसि सगासम्मि जेन उग्गहियं।
परिवाडीण पमाणं, वुच्छं वत्तीकरो स खलु ॥

वृ- ये यस्मिन् युगे 'प्रवराः' प्रधानाः तेषां 'सकाशे' समीपे 'येन' ग्रहण-धारणासमर्थेन अवगृहीतम्, कतिभि परिपाटीभिः ? इत्यत आह-परिपाटीनां परिमाणमग्रे वक्ष्ये, स खलु तदा व्यक्तिकरः॥ अत्र शिष्यः प्राह-

[भा.२०२] निक्खेवा य निरुत्ताणि जा य कहणा भवे पगासस्स।
जह रिसभाईयाऽऽहंसु किमेवं वद्धमाणो वि ॥

वृ- ये निक्षेपाः चतुष्क-सप्तकादयः, यानि च निरुक्तानि सूत्रा-ऽर्थयोरनन्तरमुक्तानि, यो च चतुर्भिरनुयोगद्वारैः 'प्रकाशस्य' अर्थस्य कथना, चशब्दादेकार्थिकानामपि या च कथना, एतानि यथा 'ऋषभादयः' त्रयोविंशतिस्थीर्थकरा आख्यातबन्तः तथा किमेवं भगवान् वर्धमानस्वाम्यप्याख्याति ? किं वाऽन्यथा ? इति, उच्यते-तथैव॥ ननु ते उच्चतराः, भगवान् वर्धमानस्वामी पुनः सप्तरत्निप्रमाणः, ततः कथं तस्य तथैवाख्यानम् ? अत आह-

[भा.२०३] धिय-संघयणे तुल्ला, केवलभावे य विसभदेहा वि।
केवलनाणं तं चिय, पन्नवणिज्जा य चरमे वि ॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

वृ- यथा विषमदेहा अपि तीर्थकृतो धृति-संहनने केवलभावे च तुल्याः तथा प्ररूपमायामपि तुल्याः । यतः 'चरमेऽपि' भगवति वर्धमानस्वामिनि तदेव केवलज्ञानं त एव च प्रज्ञापनीया भावा ये ऋषभादीनाम्, ततः कथं न तुल्या प्ररूपणा? ॥ यस्तु विशेषस्तमुपदर्शयति-

[भा.२०४] नायज्झयणाहरणा, इसिभासियमो पइन्नगसुया य ।
एए हुंति अनियया, निययं पुण सेसमुस्सन्नं ॥

वृ- ज्ञाताध्ययनेषु यानि आहरणानि-दृष्टान्ताः ते हि कदाचित्त एव भवेयुर्ये ऋषभादिभिरुपन्यस्ताः, केचिदन्यथा वा ये प्रत्युत्पन्ना इति । तथा यानि ऋषिभाषितानि प्रकीर्णकश्रुतानि च एतानि 'अनियतानि' कदाचिद् भवन्ति कदाचिन्न भवन्ति; यानि च भवन्ति तान्यपि कदाचित् तथार्थयुक्तानि कदाचिद् अन्यथार्थोपेतानि । शेषं पुन 'उत्सन्नं' प्रायेण नियतम् ॥ आह कः पुनरत्र दृष्टान्तो यथा वर्धमानस्वाम्यपि तथैवाख्याति ? इति दृष्टान्तमाह-

[भा.२०५] जह सव्वजनवएसुं, एक्कं चिय सगडवत्तिणिपमाणं ।
विसमाणि य वत्थूणी, सगडाईणं तह निरुत्ता ॥

वृ- यथा शकटादीनाम्, आदिशब्दाद्, गन्त्र्यादिपरिग्रहः, यद्यपि 'विषमाणि वस्तूनि' केषाञ्चिन्महान्ति केषाञ्चित् क्षुल्लकानि तथापि सर्वेष्वपि जनपदेषु एकमेव तदा तदा शकटवर्त्तिन्याः प्रमाणम्, सर्वत्राक्षाणां चतुर्हस्तप्रमाणत्वात्; तथा निरुक्तानि, उपलक्षणमेतत्, निक्षेपादीनि च प्ररूपणामधिकृत्य तुल्यानि ॥ आह नन्ववश्यं पूर्वरथानां सम्प्रतिरथनां च विस्तरस्यास्ति विशेषः, एवं महाप्रमाणानां पूर्वमनुष्याणामल्पप्रमाणानामधुनातनमनुष्याणां च विशेषो भवति, तत आह-

[भा.२०६] जइ वि य वत्थू हीना, पुव्विल्लरहेहिं संपयरहाणं ।
तह वि जुगम्मि जुगम्मी, सहत्थचउहत्थगा अक्खा ॥

वृ- यद्यपि पूर्वतनरथेभ्यः साम्प्रतरथानां वस्तूनि हीनानि तथापि युगे युगे सर्वत्राऽऽत्महस्तेन चतुर्हस्तका अक्षाः, ततः सर्वेष्वपि जनपदेष्वेकं शकटवर्त्तिन्याः प्रमाणम् । तथा यद्यपि पूर्वकाले महाप्रमाणा मनुष्याः सम्प्रतिकाले त्वल्पप्रमाणाः, तथापि सर्वेषां तदेव केवलज्ञानं तदेव संहननं त एव च प्रज्ञापनीया भावा इति तुल्या प्ररूपणा ॥ ननु पञ्चधनुःशतिकप्रभृतीनां महान्ति इन्द्रियाणि, तेन तेषां प्रभूततरक्षेत्रे विषयोपलम्भविशेषः तथा केवलोपलम्भविशेषोऽपि स्याद् ? अत आह-

[भा.२०७] पुरिमेहि जइ वि हीना, इंदियमाना उ संपयनराणं ।
तह वि य सिं उवलद्धी, खित्तविभागेण तुल्ला उ ॥

वृ- 'पूर्वेभ्यः' पूर्वकालभाविभ्यः पुरुषेभ्यो यद्यपि 'साम्प्रतनराणां' सम्प्रतिमनुष्याणामिन्द्रियमानानि हीनानि तथाप्यात्माङ्गुलमधिकृत्य क्षेत्रविभागेनैषां तुल्या उपलब्धि । तथाहि-श्रोत्रादीन्द्रियप्रमाणं श्रोत्रादीन्द्रियविषयप्रमाणं चाऽऽत्माङ्गुलतः, तच्च यथा पूर्वमनुष्याणां द्वादशयोजनादिकं क्षेत्रप्रमाणं तथाऽधुनातनमनुष्याणामपि । तथा चोक्तम्- सोइंदियस्स णं भंते! केवइए विसए पन्नत्ते ? गोयमा! जहन्नेणं अंगुलस्स असंखिज्जइभागाओ उक्कोसेणं बारसहिंतो जोयणेहिंतो अच्छिन्ने पोग्गले पुट्ठे पविट्ठातिं सद्दातिं सुणेति इत्यादि एवं हीना-ऽधिकशरीरप्रमाणत्वेऽपि केवलेनोपलम्भस्तुल्य एवेति न कश्चिद्दोषः । अन्यच्च शरीराश्रितानीन्द्रियाणि, ततः शरीरप्रमाणविषये तदाश्रितानामिन्द्रियाणामपि प्रमाणविशेषभावात् तद्विषयक्षेत्रोपलम्भविशेषः ॥

Jain Education International　For Private & Personal Use Only　www.jainelibrary.org

गतं निरुक्तद्वारम्। अधुना विधिद्वारावसरः, तत्र प्रथमतो विधेरेकार्थिकान्याह-

[भा.२०८] अनुपुव्वी परिवाडी, कमो य नायो ठिई य मज्जाया।
होइ विहाणं च तहा, विहीए एगट्ठिया हुंति ॥

वृ- आनुपूर्वी परिपाटी क्रमो न्यायः स्थिति मर्यादा विधानमित्येतानि विधेरेकार्थिकानि भवन्ति ॥ तत्र येन विधिनाऽनुयोगः कर्त्तव्यस्तमाह-

[भा.२०९]सुत्तत्थो खलु पढमो, बिइओ निज्जुत्तिमीसिओ भणिओ।
तइओ य निरवसेसो, एस विही भणिय अनुयोगे ॥

वृ- प्रथमस्य श्रोतुः प्रथमं तावत् सूत्रार्थ कथनीयः । यथा-"नो कप्पइ निग्गंथाण वा निग्गंथीण वा आमे तालपलंबे अभिन्ने पडिगाहित्तए" इति सूत्रम्। अस्यार्थ-न इति प्रतिषेधे, 'न कल्पते' न वर्त्तते इत्यर्थः, नैषां ग्रन्थो विद्यत इति निर्ग्रन्थाः तेषाम्, वा विभाषायाम्, निर्ग्रन्थीनां वा, 'आमम्' अपक्वम्, तलो वृक्षः, तले भवं तालं फलमित्यर्थः, प्रलम्बं-मूलम्, तदपि तस्यैव तलवृक्षस्य प्रतिपत्तव्यम्, ततः समाहारः, 'अभिन्नम्' अव्यपगतजीवं प्रतिग्रहीतुमिति । एवं तावत् कथयितव्यं यावदध्ययनपरिसम्पाति । ततो द्वितीयस्या परिपाट्यां 'निर्युक्तिमिश्रितः' पीठिकया सूत्रस्पर्शिकनिर्युक्त्या च समन्वितः, सोऽपि यावदध्ययनपरिसमाप्तिस्तावत् कथनीयः। 'तृतीयः' तृतीयस्यां परिपाट्यामनुयोगो निरवशेषो वक्तव्यः, पद-पदार्थ-चालना-प्रत्यवस्थानादिभि सप्रपञ्चं समस्तं कथयितव्यमिति भावः । एष विधिरनुयोगे ग्रहण-धारणादिसमर्थान् शिष्यान् प्रति वेदितव्यः ॥ मन्दमतीन् प्रति प्रकारान्तरेणाऽनुयोगविधिमाह-

[भा.२१०] मूयं हुंकारं वा, बाढक्कार पडिपुच्छ वीमंसा।
तत्तो पसंगपारायणं च परिनिट्ठ सत्तमए ॥

वृ- प्रथमतो मूकं शृणुयात्, किमुक्तं भवति ? प्रथमश्रवणे संयतगात्रस्तूष्णीमासीत। ततो द्वितीये श्रवणे हुङ्कारं दद्यात्, वन्दनं कुर्यादित्यर्थः। तृतीये 'बाढकारं कुर्यात्' 'बाढमेवमेतत्, नान्यथा' इति प्रशंसेदित्यर्थः । चतुर्थे गृहीतपूर्वा-ऽपरसूत्राभिप्रायो मनाक् प्रतिपृच्छां कुर्यात्, यथा 'कथमेतद् ?' इति । पञ्चमे गृहीतपूर्वा-ऽपरसत्राभिप्रायो मनाक् तदुत्तरोत्तरगुणप्रसङ्गः पारगमनं चाऽस्य भवति। ततः सप्तमे परिनिष्ठा, गुरुवदनुभाषत इत्यर्थः। यत एवं मन्दमेघसां श्रवणपरिपाट्या विवक्षिताध्ययनार्थावगमः ततस्तान् प्रति सप्तवारान् अनुयोगो यथाप्रतिपत्ति कर्त्तव्यः ॥ अत्र परावकाशमाह-

[भा.२११] चोएइ राग-दोसा, समत्थ परिणामगे परूवणया।
एएसिं नाणत्तं, वुच्छामि अहानुपुव्वीए ॥

वृ- शिष्यः 'नो (चो] दयति' प्रश्नयति-'समर्थे'-ग्रहण-धारणासमर्थे तथा परिणामके, उपलक्षणमेतत्, ग्रहण-धारणाऽसमर्थेऽतिपरिणामकेऽपरिणामके च या प्ररूपणा तया युष्माकं रागद्वेषौ प्रसजतः । तथाहि-तिसृभिः परिपाटीभिरेकान् ग्राहयतो रागः, अपरान् सप्तभिः परिपाटीभिर्ग्राहयतो द्वेषः; तथा परिणामकान् ग्राहयतो रागः, इतरानतिपरिणामका-ऽपरिणामकान् परिहरतश्च द्वेषः। 'एतेषां' ग्रहण-धारणासमर्था-ऽसमर्थानां परिणामकादीनां च 'यथाऽऽनुपूर्व्या' क्रमेण नानात्वं वक्ष्ये ॥ तत्र प्रतिज्ञातमेव निर्वाहयन् प्रथमतो ग्रहण-धारणासमर्था-ऽसमर्थान्

Jain Education International For Private & Personal Use Only www.jainelibrary.org

प्रति राग-द्वेषावाह-

[भा.२१२] मच्छरया अविमुत्ती, पूयासक्कार गच्छइ य खिन्नो।
दोसो गहणसमत्थे, इयरे रागो उ वुच्छेयो ॥

वृ- ग्रहण-धारणासमर्थं शिष्यं तिसृभिः परिपाटीभिर्ग्राहयत एतावन्ति कारणानि स्युः- एष बहुशिक्षितो मम सपत्नो भविष्यति, ततो मत्सरतया तिसृभिः परिपाटीभिस्तस्य ग्रहणम्, अन्यथा एकया परिपाट्या तं ग्राहयेत्। 'अविमुक्ति' इति एष सूत्रा-ऽर्थेषु समाप्तेषु मां मोक्ष्यते, इतरथा तु शिष्यपरिवारत्वेन वर्त्तत इत्यविमुक्तिकारणम्। अथवा गृहीतसूत्राऽर्थस्यास्य पूजासत्कारो भविष्यति। 'खिन्नो वा' परिश्रान्तोऽन्यं गणं गमिष्यति। "वोच्छेय(यो)"त्ति मद्वसतौ चानुयोगस्य व्यवच्छेदो भविष्यति, अन्यस्य तथाविधशिष्यस्याभावात्। एवं कारणानि चानुयोगस्य व्यवच्छेदो भविष्यति, अन्यस्य तथाविधशिष्यस्याभावात्। एवं कारणानि सम्भाव्य ग्रहण-धारणासमर्थे तिसृभिः परिपाटीभिरनुयोगं वदतो द्वेषः। 'इतरस्मिन्' जडे रागः, यथातदवबोधमनुयोगस्य प्रवर्त्तनात् ॥ अत्राऽऽचार्य प्राह-

[भा.२१३] निरवयवो न हु सक्को, सयं पगासो उ संपयंसेउं।
कुंभजले वि हु तुरिउज्झियम्मि न हु तिम्मए लिट्ठू ॥

वृ- 'न हु' नैव सूत्रस्य 'प्रकाशः' अर्थ 'सकृद्' एकया परिपाट्या 'निरवयवः' समस्तः सम्प्रदर्शयितुं शक्यः, तस्य ग्रहण-धारणासमर्थस्यापि तथाऽवधारयितुमशक्यत्वात्। एतदेव प्रतिवस्तूपमया द्रढयति-न हि कुम्भजलेऽपि त्वरितमुज्झिते लेष्टु सर्वात्मना तिम्यते, एवमेषोऽपि, ग्रहण-धारणासमर्थोऽपि नैकया परिपाट्याऽवधारयितुमीश इति तिसृभि परिपाटीभिरनुयोग-कथनमित्यदोषः ॥ साम्प्रतमतिपरिणामका-ऽपरिणामकान् परिहरतो द्वेषाभावमाह-

[भा.२१४] सुत्त-ऽत्थे कहयंतो, पारोक्खी सिस्सभावमुवलब्भ।
अनुकंपाए अपत्ते, निज्जूहइ मा विणस्सिज्जा ॥

वृ- 'परोक्षी' परोक्षजानोपेतः शिष्येभ्यः सूत्रा-ऽर्थौ कथयन् विनया-ऽविनयकरणादिना तेषां शिष्याणां भावम्-अभिप्रायमुपलभ्य 'अपात्राणि' अपात्रभूतान् शिष्यान् अनुकम्पया 'निर्यूह-यति' अपवदति-न तेभ्यः सूत्राऽर्थौ कथयति, श्रुताशातनादिना मा विनश्येयुरिति कृत्वा ॥ अत्रैवार्थे दृष्टान्तमा(न्ताना)ह-

[भा.२१५] दारुं धाउं वाही, बीए कंकडुय लक्खणे सुमिणे।
एगंतेण अजोग्ग, एवमाई उदाहरणा ॥

वृ- 'एकान्तेनायोग्ये' अपरिणामकेऽतिपरणामके च दारु धातुः व्याधि बीजानि काङ्कटको लक्षणं स्वप्न इत्येवमादीनि 'उदाहरणानि' दृष्टान्ताः ॥ तत्र दारुदृष्टान्तमाह-

[भा.२१६] को दोसो एरंडे, जं रहदारुं न कीरए तत्तो।
को वा तिनिसे रागो, उवजुज्जइ जं रहंगेसु ॥

वृ- 'एरण्डे' एरण्डद्रुमे को द्वेषो यत् तस्मात् 'रथदारु' रथयोग्यं दारु न क्रियते ?, को वा तिनिशे रागो यदुपयुज्यते स रथाङ्गेषु ? ॥

[भा.२१७] जं पि य दारुं जोग्गं, जस्स उ वत्थुस्स तं पि हु न सक्का।

जोएउमणिम्मविउं, तच्छण-दल-वेह-कुसेहिं ॥

वृ- 'यदपि' वस्तु 'यस्य वस्तुनः' अक्षादेर्योग्यं दारु तदपि तक्षण-दल-वेध-कुशैरनिर्माप्य योजयितुमशक्यं किन्तु निर्माप्य, एवमिहापी योग्योऽपि यावदर्वाक्तनैः सूत्रैर्न परिकर्म्मितस्तावन्न कल्पं व्यवहारं वाऽध्यापयितुं योग्यः । तत्र तक्षणं प्रतीतम्, दलानि द्विधा त्रिधा वा काष्ठस्य पाटनम्, वेधः प्रतीतः, कुशो यो वेधे प्रान्तः प्रवेश्यते ॥ सम्प्रति धातुदृष्टान्तमाह-

[भा.२१८]　एमेव अधाउं उज्झिऊण धाऊण कुणइ आयाणं ।
न य अक्कमेण सक्का, धाउम्म वि इच्छियं काउं ॥

वृ- 'एवमेव' राग-द्वेषौ विना अधातुं त्यक्त्वा धातूनामादानं करोति, न च धातावप्यक्रमेणेप्सितं कर्त्तु शक्यं किन्तु क्रमेण; एवमिहाप्योग्यान् परिहरतो योग्यानपि क्रमेण ग्राहयतो न द्वेषः ॥ अधुना व्याधिदृष्टान्तामाह-

[भा.२१९]　सुहसज्झो जत्तेणं, जत्तासज्झो असज्झवाही उ ।
जह रोगे पारिच्छा, सिस्ससभावाण वि तहेव ॥

वृ- यथा रोगे वैद्येन परीक्षा क्रियते, यथा-एष सुखसाध्यः, एष यत्नेन साध्यः, एष चासाध्यव्याधिः यत्नेनाप्यसाध्यः । परीक्षाऽनन्तरं च राग-द्वेषौ विना तदनुरूपा प्रवृत्ति, एवं शिष्यस्वभावानामपि 'तथैव' राग-द्वेषाभावेन परीक्षा क्रियते, तदनुरूपा च प्रवृत्ति ॥

अधुना बीजदृष्टान्तमाह-

[भा.२२०]　बीयमबीयं नाउं, मोत्तुमबीए उ करिसतो सालिं ।
ववइ विरोहण जोग्गे, न यावि से पक्खवाओ उ ॥

वृ- यथा कर्षको बीजमबीजं च ज्ञात्वा अबीजानि मुक्त्वा 'शालिं' शालिबीजानि वपति, न च तस्मिन् विरोहणयोग्ये बीजे "से" तस्य कर्षकस्य 'पक्षपातः' रागः, एवमत्रापि भावनीयम्॥

सम्प्रति काङ्कटुकदृष्टान्तमाह-

[भा.२२१]　कंकडुए को दोसो, जं अग्गी तं तु न पयई दित्तो ।
को वा इयरे रागो, एमेव य सूवकारस्स ॥

वृ- को द्वेषोऽग्नेः काङ्कटुके यदग्निर्दीप्तोऽपि तं न पचति ?, को वा इतरस्मिन् रागो यत् पाचयति ?, नैव कश्चित् । एवमत्रापि भावनीयम् ॥ अधुना लक्षणदृष्टान्तमाह-

[भा.२२२]　जे उ अलक्खणजुत्ता, कुमारगा ते निसेहिउं इयरे ।
रज्ञरिहे अनुमन्नइ, सामुद्दो नेय विसमो उ ॥

वृ- यथा 'सामुद्रः' सामुद्रलक्षणपरिज्ञाता राज्ञि व्यपगते तस्य ये कुमारा अलक्षणयुक्तास्तान् निषिध्य 'इतरान्' लक्षणोपेतान् राज्यार्हाननुमन्यते, न च स तथाऽनुमन्यमानः 'विषमः' राग-द्वेषवान्, एवमत्रापि द्रष्टव्यम् ॥ स्वप्नदृष्टान्तमा (न्ताना) ह-

[भा.२२३]　जो जह कहेइ सुमिणं, तस्स तह फलं कहेइ तन्नाणी ।
रत्तो वा दुट्ठो वा, न यावि वत्तव्वयमुवेइ ॥

वृ- यो यथा स्वप्नं कथयति तस्य तथा 'तज्ज्ञानी' स्वप्नज्ञानी स्वप्नफलं कथयति, न च स तथा कथयन् रक्त इति वा द्विष्ट इति वा वक्तव्यतामुपैति, एवमत्रापि ॥ एवमेकान्तेनायोग्या ये

Jain Education International　　For Private & Personal Use Only　　www.jainelibrary.org

शिष्यास्तेषां परिहारे राग-द्वेषाभावे दृष्टान्ता अभिहिताः । सम्प्रति कालान्तरयोग्यानपरिणतान् क्रमेण परिणामयतो राग-द्वेषाभावे दृष्टान्तमाह-

[भा.२२४] अग्गी बाल गिलाणे, सीहे रुक्खे करीलमाईया ।
अपरिणयजने एए, सप्पडिवक्खा उदाहरणा ॥

वृ- 'अपरिणते जने' कालान्तरयोग्ये एतानि 'सप्रतिपक्षाणि' पूर्वमयोग्यतायां पश्चाद् योग्यतायामित्यर्थः उदाहरणानि । तद्यथा-अग्निर्बालो ग्लानः सिंहो वृक्षः 'करीलं' वंशकरीलम्, आदिसब्दाद्वक्ष्यमाणहस्त्यादिदृष्टान्तपरिग्रहः ॥ तत्र प्रथममग्निदृष्टान्तमाह-

[भा.२२५] जह अरणीनिम्मविओ, थोवो विउलिंधणं न चाएइ ।
दहिउं सो पज्जलिओ, सव्वस्स वि पच्चलो पच्छा ॥

वृ- यथा अरणिनिर्मापितः स्तोको वह्निर्विपुलमिन्धनं न दग्धुं शक्नोति, स एव पश्चात् प्रज्वलितः सर्वस्यापीन्धनजातस्य दहने 'प्रत्यलः' समर्थः ॥

[भा.२२६] एवं खु थूलबुद्धी, निउणं अत्थं अपच्चलो घेत्तुं ।
सो चेव जणियबुद्धी, सव्वस्स वि पच्चलो पच्छा ॥

वृ- एवमग्निदृष्टान्तेन प्रथमतः शिष्यः स्थूलबुद्धि सन् निपुणमर्थं ग्रहीतुमप्रत्यलः । पश्चात् स एव शास्त्रन्तरैः 'जनितबुद्धिः' उत्पादितबुद्धि सर्वस्यापि शास्त्रस्य ग्रहणप्रत्यलो भवति ॥ बालदृष्टान्तमाह-

[भा.२२७] देहे अभिवड्ढंते, बालस्स उ पीहगस्स अभिवुड्ढी ।
अइबहुएण विणस्सइ, एमेवऽहुणुट्ठिय गिलाणे ॥

वृ- 'बालस्य देहे' अभिवर्द्धमाने तदनुसारेम दातव्यस्य 'पीहकस्य' आहारस्यापि (स्याभिः) वृद्धिर्भवति, देहवृधनुसारतः पीथकमपि क्रमशो वर्द्धमानं दीयते इति भावः । यदि पुनरतिबहु दीयते तदा स विनश्यति । ग्लानदृष्टान्तमाह-'एवमेव' बालगतेन प्रकारेणाधुनोत्थितेऽपि ग्लाने वक्तव्यम्-यथा ग्लानोऽप्यधुनोत्थितः क्रमेणाभिवर्द्धमानमाहारं गृह्णाति, एकवारमतिप्रभूत-ग्रहणे विनाशप्रसङ्गात् । एवं शिष्योऽपि क्रमेण योग्यतानुरूपं शास्त्रमादत्ते, प्रथमत एवाति-निपुणार्थशास्त्रग्रहणे बुद्धिभङ्गप्रसक्तेः ॥ सिंहादिदृष्टान्तानाह-

[भा.२२८] खीर-मिउपोग्गलेहिं, सीहो पुट्ठो उ खाइ अट्ठी वि ।
रुक्खो बिवन्नओ खु, वंसकरिल्लो य नहछिज्जो ॥

[भा.२२९] ते चेव विवड्ढंता, हुंति अछेज्जा कुहाडमाईहिं ।
तह कोमला वि बुद्धी, भज्जइ गहणेसु अत्थेसु ॥

वृ- सिंहः प्रथमतः क्षीर-मृदुपुद्गलैः स्वमात्रा पोष्यते । तत पुष्टः सन् अस्थीन्यपि स खादति । तथा वृक्षो द्विपर्णो वंशकरीलम् एतौ द्वावपि प्रथमतो नखच्छेद्यौ, ततः पश्चादभिवर्द्धमानौ यतस्ततः कुठारादिभिरप्यच्छेद्यौ भवतः । एवं शिष्यस्यापि प्रथमतः कोमला बुद्धिर्भवति, ततः सा गहनेष्वर्थेषु 'भज्यते' भङ्गमुपयाति । क्रमेण तु शास्त्रन्तरदर्शनतोऽभिवर्द्धमाना कठोरा कठोरतरोपजायते इति न कचिदपि भङ्गमुपयाति ॥ एतदेवोपदिशन्नाह-

[भा.२३०] निउणे निउणं अत्थं, थूलत्थं थूलबुद्धिणो कहए ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

बुद्धीविवद्धणकरं, होहिइ कालेन सो निउणो ।।

वृ- निपुणे निपुणर्थं कथयेत्, स्थूले स्थूलमर्थं कथयेत् । कथम्भूतम् ? इत्याह-बुद्धिविवर्द्धनकरम् । एवं सति स कालेन निपुणओ भवति, अन्यथा बुद्धिभङ्गप्रसङ्गतो न स्यात् ।। साम्प्रतमादिशब्दसूचितान् हस्त्यादीन् दृष्टान्तानाह-

[भा.२३१] सिद्धत्थए वि गिण्हइ, हत्थी थूलगहणे सुनिम्माओ ।
सरवेह-छिज्ज-पवए, घड-पड-चित्ते तहा धमए ।।

वृ- हस्ती स्थूलग्रहणे सुनिर्मातः सन् पश्चात् सिद्धार्थकानपि गृह्णाति । तथाहि-नवको हस्ती शिष्यमाणः प्रथमं काष्ठानि ग्राह्यते, तदनन्तरं क्षुल्लकान् पाषाणान्, ततो गोलिकाः, ततो बदराणि, तदनन्तरं सिद्धार्थकानपि । यदि पुनः प्रथमत एव सिद्धार्थकान् ग्राह्यते ततो न शक्नोति ग्रहीतुमिति । एवं स्वरवेध-पत्रच्छेद्य-प्लवक-घटकारक-पटकारक-चित्रकारक-धमकाश्च दृष्टान्ता भावनीयाः । ते चैवम्-प्रथमं धानुष्कः स्थूलद्रव्यं व्यर्द्धुं शिक्षति, पश्चात्स वालम्, पश्चादतिसुनिर्मातः स्वरेणापि विध्यति । तथा पत्रच्छेद्यकार्यपि प्रथममकिञ्चित्करैः पत्रैः शिक्ष्यते, ततो यदा निर्मातो भवति तदा ईप्सितं पत्रच्छेद्यं कार्यते । तथा प्लवकोऽपि प्रथमं वंशे लगयित्वा प्लाव्यते, ततः पश्चादभ्यस्यन् आकाशेऽपि तानि तानि करणानि करोति । घटकारोऽपि प्रथमतः शरावादीनि कार्यते, पश्चात् शिक्षितो घटानपि रोति । पटकारोऽपि प्रथमतः स्थूलानि चीवराणि शिक्ष्यते, ततः सुशिक्षितः शोभनानपि पटान् वयति । चित्रकारोऽपि प्रथममण्डकं चित्रयितुं शिक्ष्यते, ततः शेषानवयवान्, पश्चात् सुशिक्षितः सर्वं चित्रकर्म्म सम्यक् करोति । धमकोऽपि पूर्वं श्र ङ्गादीनि धमति, पश्चाच्छङ्खम् ।। अत्रैवोपनयन्नाह-

[भा.२३२] जत्थ मई ओगाहइ, जोग्गं जं जस्स तस्स तं कहए ।
परिणामा-ऽऽगमसरिसं, संवेगकरं सनिव्वेयं ।।

वृ- यथैते हस्त्यादयः क्रमेण निर्माप्यन्ते एवं शिष्यस्यापि यत्र मतिरवगाहते यस्य च यद् योग्यं शास्त्र तस्य तत् कथयति । कथम्भूतम् ? इत्याह-'परिणामा-ऽऽगमसदृशं' यस्य यादृशः परिणामो यस्य च यावानागमस्तत्सदृशम्, यथा-ईदृशपरिणामस्येदम् एतावदागमस्य पुनरिदमिति। पुनः किंविशिष्टं कथयितव्यम् ?, अत आह-'संवेगकरं' सिद्धिर्देवलोकः सुकुलोत्पत्तिरित्यादेरभिलाषः संवेगस्तत्करणशीलं संवेगकरम्, तथा नारकः तिर्यग्योनि कुमानुषत्वमित्यादेर्विरक्तता निर्वेदस्तत्करणशीलं निर्वेदकरम् ।। तदेवं योग्येऽपि क्रमेण दाने राग-द्वेषाभाव उक्तः । 'सम्प्रति शिष्येष्वाचार्येण परिणाम कत्वं परीक्ष्यानुयोगः कर्त्तव्यः, शिष्यैरप्याचार्यं परीक्ष्य तस्य सकाशे श्रोतव्यम्' इति शिष्याचार्यपरसपरविधिमतिदेशत आह-

[भा.२३३] गिण्हंत-गाहगाणं, आइसुएसु उ विही समक्खाओ ।
सो चेव य होइ इहं, उज्जोगो वन्निओ नवरं ।।

वृ- गृह्णतां-शिष्याणां ग्राहकस्य-आचार्यस्य 'आदिसूत्रेषु' सामायिकादिषु यो विधिः समाख्यातः "गोणी चंदण" इत्यादिलक्षणः स एवेह निरवशेषो वक्तव्यः । यस्तु शिष्याणामनुयोग-कथने 'उद्योगः' उद्यमो यथा तिसृभि परिपाटीभिरथवा सप्तभि कर्त्तव्यः, स नवरं सप्रपञ्चमुपवर्णितः।। गतं विधिद्वारम् । अधुना प्रवृत्तिद्वारं वक्तव्यम् । प्रवृत्ति प्रवाहः प्रसूतिरित्येकार्था । कथमनुयोगः

Jain Education International For Private & Personal Use Only www.jainelibrary.org

प्रवर्त्तते ? इति । सा च प्रवृत्तिर्द्विधा-द्रव्यतो भावतश्च । तत्र द्रव्यतः प्रवृत्तिमाह-

[भा.२३४] अनिउत्तो अनिउत्ता, अनिउत्तो चेव होइ उ निउत्ता ।
नि(ने)उत्तो अनिउत्ता, उ निउत्तो चेव उ निउत्ता ॥

[भा.२३५] निउत्ता अनिउत्ताणं, पवत्तई अहव ते वि उ निउत्ता ।
दव्वम्मि होइ गोणी, भावम्मि जिनादयो हुंति ॥

वृ- द्रव्यतः प्रसवे गौर्दृष्टान्तो भवति, भावे जिनादयः । तत्र गवि दोहकेन सह चत्वारो भङ्गाः, तद्यथा-दोहकोऽनियुक्तो गौरपयनियुक्ता १ दोहकोऽनियुक्तो गौर्नियुक्ता २ दोहको नियुक्तो गौरनियुक्ता ३ दोहको गौरपि नियुक्ता ४। एवमाचार्य-शिष्येष्वपि भङ्गचतुष्टयं योजनीयम्, तच्चाग्रे योक्ष्यते । तत्र तृतीये भङ्गे नियुक्त आचार्यो बलादप्यनियुक्तानां शिष्याणामनुयोगं प्रवर्त्तयति । यदि वा द्वितीये भङ्गे तेऽपि शिष्या नियुक्ता अनियुक्तमाचार्यमनुयोगे प्रवर्त्तयन्ति । एवं तृतीये द्वितीये च भङ्गेऽनुयोगस्य प्रवृत्ति । प्रथमे तु सर्वथा न भवति । चतुर्थे प्रवृत्तिर्निः प्रतिपक्षा ॥ तत्र गोदृष्टान्तविषयं भङ्गचतुष्टयं व्याख्यानयति-

[भा.२३६] अप्पण्हुया य गोणी, नेव य दुद्धा समुज्ञओ दुद्धुं ।
खीरस्स कओ पसवो, जइ वि य सा खीरदा धेनू ॥

वृ-गौरप्रस्नुता, नैव च दोग्घा तां दोग्धुं समुद्यतः, ततो यद्यपि सा क्षीरदा धेनुस्तथाप्यस्मिन् प्रथमभङ्गे कुतः क्षीरस्य प्रसवः ? नैव कुतश्चित् ॥

[भा.२३७] बीए वि नत्थि खीरं, थेवं व हविज्ज एव तइए वि ।
अत्थि चउत्थे खीरं, एसुवमा आयरिय-सीसे ॥

वृ- द्वितीयेऽपि भङ्गे 'दोहकोऽनियुक्तो गौर्नियुक्ता' इत्येवंरूपे नासित क्षीरम्, दोहकस्यानियुक्तत्वात् । अथवा गौः प्रस्नुतेति स्तनेपु गलत्सु स्तोकं क्षीरं भवेत् । एवं तृतीयेऽपि भङ्गे 'दोहको नियुक्तो गौरनियुक्ता' इत्येवंलक्षणे नास्ति क्षीरप्रसवः, स्तोकं वा स्याद् दोहकगुणेन। चतुर्थे पुनर्भङ्गे गौरपि प्रस्नुता दोहकोऽपि नियुक्त इत्यस्ति क्षीरप्रसवः । 'एषा उपमा' भङ्गचतुष्टयात्मिका आचार्य-शिष्ययोरप्यनुयोगस्य प्रसवे वेदितव्या । तथाहि-आचार्योऽप्यनियुक्तः शिष्या अपि अनियुक्ता इति प्रथमभङ्गे नास्त्यनुयोगस्य प्रवृत्ति । अनियुक्त आचार्य शिष्या नियुक्ता इति द्वितीयेऽपि भङ्गे नानुयोगः, आचार्य्यानिर्युक्तत्वात् ॥

[भा.२३८] अहवा अनिच्छमाणमवि किंचि उज्जोगिणो पवत्तंति ।
तइए सारिंते वा, होज्ज पवित्ती गुणिंते वा ॥

वृ-अथवा अनियुक्तमाचार्यमनिच्छन्तमपि उद्योगिनः शिष्याः किञ्चित्प्रतिपृच्छादिभिरनुयोगं कर्त्तुं प्रवर्त्तयन्ति, ततो भवति द्वितीयेऽपि भङ्गेऽनुयोगस्य प्रवृत्ति । 'तृतीये' 'आचार्यो नियुक्तः शिष्या अनियुक्ताः' इत्येवंरूपे नास्त्यनुयोगस्य सम्भवः, अथवा पुनः पुनः सारयत्याचार्ये अथवा श्रोतुमनिच्छन्तमपि शैलसमानं कञ्चिच्छ्रोतारं पुरो विन्यस्य 'मा नश्यत्वनुयोगः' इति 'गुणयति' गुणननिमित्तमनुयोगं कुर्वति भवेदनुयोगः ॥ अत्र दृष्टान्तः कालकाचार्य । तमेवाह-

[भा.२३९] सागारियमप्पाहण, सुवन्न सुयसिस्स खंतलक्खेण ।
कहणा सिस्सागमणं, धूलीपुंजोवमाणं च ॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

वृ- उज्जेनीए नयरीए अज्जकालगा नामं आयरिया सुत्त-ऽत्थोववेया बहुपरिवारा विहरंति । तेसिं अज्जकालगाणं सीसस्स सीसो सुत्त-ऽत्थोववेओ सागरो नामं सुवन्नभूमीए विहरइ । ताहे अज्जकालया चिंतेंति-'एए मम सीसा अनुओगं न सुणंति तओ किमेएसिं मज्झे चिट्ठामि ?, तत्थ जामि जत्थ अनुयोगं पवत्तेमि, अवि य एए वि सिस्सा पच्छा लज्जिया सोच्छि-हिंति । एवं चिंतिऊण सेज्जायरमापुच्छंति-कहं अन्नत्थ जामि ? तओ मे सिस्सा सुणेहिंति, तुमं पुन मा तेसिं कहेज्जा, जइ पुन गाढतरं निब्बंधं करिज्जा तो खरंटेउं साहेज्जा, जहा-सुवन्नभूमीए सागराणं सगासं गया । एवं अप्पाहित्ता रत्तिं चेव पसुत्ताणं गया सुवण्णभूमिं । तत्थ गंतुं खंतलक्खेण पविट्ठा सागराणं गच्छं । तओ सागरायरिया 'खंत' त्ति काउं तं नाढाइया अब्भुट्ठाणाईणि (ईहिं)। तओ अत्थपोरिसीवेलाए सागारयरिएणं भणिया-खंता ! तुब्भं एयं गमइ ? । आयरिया भणंति-आमं । 'तो खाइं सुणेह' त्ति पकहिया, गव्वायंता य कहिंति । इयरे वि सीसा पभाए संते संभंता आयरियं अपासंता सव्वत्थ मग्गिउं सिज्जायरं पुच्छंति । न कहेइ, भणइ य-तुब्भं अप्पणो आयरिओ न कहेइ मम कहं कहेइ ? । ततो आउरीभूएहिं गाढनिब्बंधे ए कहियं, जहा-तुब्भच्चएण निव्वेएण सुवन्नभूमीए सागराणं सगासं गया । एवं कहित्ता ते खरंटिया ।

तओ ते तह चेव उच्चलिया सुवन्नभूमिं गंतुं । पंथे लोगो पुच्छइ-एस कयरो आयरिओ जाइ ? । ते किहिंति अज्जकालगा । तओ सुवन्नभूमीए सागराणं लोगेण कहियं, जहा-अज्जकालगा नाम आयरिया बहुस्सुया बहुपरिवारा इहागंतुकामा पंथे वट्टंति । ताहे सागरा सिस्साणं पुरओ भणंति-मम अज्जया इंति, तेसिं सगासे पयत्थे पुच्छीहामि त्ति । अचिरेणं ते सीसा आगया । तत्थ अग्गिल्लेहिं च्छिज्जंतिकिं इत्थ आयरिया आगया चिट्ठंति ? । नत्थि, नवरं अन्ने खंता आगया । केरिसा ? । वंदिए नायं 'एए आयरिया'। ताहे सो सागरो लज्जिओ 'बहुं मए इत्थ पलवियं, खमासमणा य वंदाविया' । ताहे अवरण्हवेलाए 'मिच्छा दुक्कडं' करेइ 'आसाइय' त्ति । भणियं च नेन-केरिसं खमासमणो ! अहं वागरेमि ? । आयरिया भणंति-सुंदरं, मा पुण गव्वं करिज्जासि । ताहे धूलीपुंजदिट्ठंतं करे(रे)ति-धूली हत्थेण घेत्तुं तिसु ट्ठाणेसु ओयारेंति-जहा एस धूली ठविज्जमाणी उखिप्पमाणी य सव्वत्थ परिसडइ, एवं अत्थो वि तित्थगरेहिंतो गणहराणं गणहरेहिंतो जाव अम्हं आयरि-उवज्झायाणं परंपरएणं आगयं, को जाणइ कस्स केइ पज्जाया गलिया ?, ता मा गव्वं काहिसि । ताहे 'मिच्छा दुक्कडं' करित्ता आढत्ता अज्जकालिया सीस-पसीसाण अनुओगं कहेउं ॥

सम्प्रत्यक्षरगमनिका-सागारिकः-शय्यातरस्तस्य अप्पाहणं-सन्देशकथनम् । स्वयमाचार्याणां सुवर्णभूमौ सुतशिष्यस्य-शिष्यस्यापि शिष्यस्य सागराभिधानस्य "खंतलक्खेम" वृद्धव्याजेन गमनम् । पश्चाच्छिष्याणां सागारिकेण कथना, यथा-आचार्या सुवर्णभूमौ सागरस्यान्तिकं गताः । ततः शिष्याणां तत्रागमनम् । सागरं गर्वमुद्वहन्तं प्रति धूलीपुञ्जोपमानमिति ॥ चतुर्थभङ्गमधिकृत्याह-

[भा.२४०] निउत्तो उभउकालं, भयवं कहणाए वद्धमाणो उ ।
गोयमभाई वि सया, सोयव्वे हुंति उ निउत्ता ॥

वृ- 'नियुक्तः' उभयकालमनुयोगं करोति । 'नियुक्ताः' उभयकालं शृण्वन्ति । अत्र कथनायां दृष्टान्तो भगवान् वर्द्धमानस्वामी । श्रोतव्ये सदा नियुक्ता दृष्टान्ता भवन्ति गौतमादयः ॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

गतं प्रवृत्तिद्वारम् । इदानीं केन चेति द्वारमाह-

[भा.२४१] देस-कुल-जाइ-रूवी, संघइणी धिइजुओ अनासंसी ।
अविकंथणो अमाई, थिरपरिवाडी गहियवक्को ॥

वृ- युतशब्दः प्रत्येकमभिसम्बध्यते-देशयुतः कुलयुत इत्यादि । तत्र यो मध्यदेशे जातो यो वाऽर्द्धषड्विंशतिषु जनपदेषु स देशयुतः, स ह्यार्यदेशभणितिं जानाति, ततः सुखेन तस्य समीपे शिष्या अधीयत इति तदुपादानम् । कुलं पैतृकम्, तथा च लोके व्यवहारः-इक्ष्वाकुकुलजोऽयम् नागकुलजोऽयमित्यादि, तेन युतः प्रतिपन्नार्थनिर्वाहको भवति । जातिर्मातृकी, तया युतो विनयादिगुणवान् भवति । रूपयुतो लोकानां गुणविषयबहुमानभाग् जायते, "यत्राकृतिस्तत्र गुणा वसन्ति" इति प्रवादात् । संहननयुतो व्याख्यायां न श्राम्यति । धृतियुतो नातिगहनेष्वर्थेषु भ्रममुपयाति । 'नाशंशी' श्रोतृभ्यो वस्त्राद्यनाकाङ्क्षी । 'अविकत्थनः' नातिबहुभाषी । 'अमायी' न शाठ्येन शिष्यान् वाहयति । स्थिरा-अतिशयेन निरन्तराभ्यासतः स्थैर्यमापन्ना अनुयोगपरिपाट्यो यस्य स स्थिरपरिपाटिः, तस्य हि सूत्रमर्थो वा न मनागपि गलति । 'गृहीतवाक्यः' उपादेयवचनः, तस्य ह्यल्पमपि वचनं महार्थमिव प्रतिभाति ॥

[भा.२४२] जियपरिसो जियनिद्दो, मज्झत्थो देस-काल-भावन्नू ।
आसन्नलद्धपइभो, नाणाविहदेसभासन्नू ॥

वृ. 'जितपरिषत्' न महत्यामपि पर्षदि क्षोभमुपयाति । 'जितनिद्रः' रात्रौ सूत्रगर्थं वा परिभावयन् न निद्रया बाध्यते । 'मध्यस्थः' सर्वेषु शिष्येषु समचित्तः । देशं कालं भावं जानातीति देश-काल-भावज्ञः, स हि देशं कालं भावं च लोकानां ज्ञात्वा सुखेन विहरति, शिष्याणां चाभिप्रायान् ज्ञात्वा तान् सुखेनानुवर्त्तयति । 'आसन्नलब्धप्रतिभः' परवादिना समाक्षिप्तः शीघ्रमुत्तरदायी । नानाविधानां देशानां भाषा जानातीति नानाविधदेशभाषाज्ञः, स हि नाना देशीयान् शिष्यान् सुखेन शास्त्राणि ग्राहयति ॥

[भा.२४३] पंचविहे आयारे, जुत्तो सुत्तऽत्थतदुभयविहन्नू ।
आहरण-हेउ-उवनय-नयनिउणो गाहणाकुसलो ॥

वृ- पञ्चविध आचारः-ज्ञानाचारदिरूपस्तस्मिन् 'युक्तः' उद्युक्तः, स्वयमाचारेष्वस्थितस्यान्यानाचारेषु प्रवर्त्तयितुमशक्यत्वात् । सूत्रा-ऽर्थग्रहणेन चतुर्भङ्गी सूचिता-एकस्य सूत्रं नार्थ, द्वितीयस्यार्थो न सूत्रम्, तृतीयस्य सूत्रमप्यर्थोऽपि, चतुर्थस्य न सूत्रं नाप्यर्थः तत्र तृतीयभङ्गग्रहणार्थं तदुभयग्रहणम्, सूत्राऽर्थतदुभयविधीन् जानातीति सूत्रार्थतदुभयविधिज्ञः । आहरणं-दृष्टान्तः, हेतुश्चतुर्विधो यापकादि यथा दशवैकालिकनिर्युक्तौ, यदि वा द्विविधो हेतुः कारको ज्ञापकश्च, तत्र कारको घटस्य कर्त्ता कुम्भकारः, ज्ञापको यथा-तमसि घटादीनामभिव्यञ्जकः प्रदीपः, उपनय-उपसंहारः, नयाः-नैगमादयः, एतेषु निपुण आहरण-हेतूपन्यासं करोति, उपसंहारनिपुणतया सम्यगधिकृतमर्थमुपसंहरति, नयनिपुणतया नयवक्तव्यतावसरे सम्यक्प्रपञ्चं वैविक्तयेन नयानभिधत्ते । 'ग्राहणाकुशलः' प्रतिपादनशक्त्युपेतः ॥

[भा.२४४] ससमय-परसमयविऊ, गंभीरो दित्तिमं सिवो सोमो ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

गुणसयकलिओ जुत्तो, पवयणसारं परिकहेउं ॥

वृ- स्वसमय परसमयं वेत्तीति स्वसमय-परसमयवित्, स च परेणाक्षिप्तः सुखेनस्वपक्षं परपक्षं च निर्वहति। 'गम्भीरः' अतुच्छस्वभावः। 'दीप्तिमान्' परवादिनामनुद्धर्षणीयः। 'शिवः' अकोपनः, यदि वा यत्र तत्र वा विहरन् कल्याणकरः। 'सोमः' शान्तदृष्टिः। गुणाः-मूलगुणा उत्तरगुणाश्च तेषां शतानि तैः कलितो गुणशतकलितः। 'युक्तः' समीचीनः प्रवचनस्य-द्वादशाङ्गस्य सारम्-अर्थं कथयितुम् ॥ कस्माद्गुणशतकलित इष्यते ? इति चेद् अत आह-

[भा.२४५] गुणसुट्ठियस्स वयणं, घयपरिसित्तु व्व पावओ भाइ।
गुणहीणस्स न सोहइ, नेहविहूणो जह पईवो ॥

वृ- यो मूलगुणादिषु गुणेषु सुस्थितस्तस्य वचनं धृतपरिसिक्तपावक इव 'भाति' दीप्यते। गुणहीनस्य तु न शोभते वचनम्, यथा स्नेहविहीनः प्रदीपः। उक्तञ्च-

आयारे वट्टंतो, आयारपरूवणाअसंकंतो।
आयारपरिब्भट्ठो, सुद्धचरणदेसणे भइओ ॥

गतं केन वेति द्वारम्। अधुना कस्येति द्वारमाह-

[भा.२४६] जइ पवयणस्स सारो, अत्थो सो तेन कस्स कायव्वो।
एवंगुणन्निएणं, सव्वसुयस्साऽऽउ देसस्स ॥

वृ-यदि प्रवचनस्य सारो अर्थस्तर्हि स तेन एवंगुणान्वितेन कस्य कर्त्तव्यः ? किं सर्वश्रुतस्य? उत 'देशस्य' श्रुतस्कन्धादेः ? इति ॥ अत्र सूरिराह-

[भा.२४७] को कल्लाणं निच्छइ, सव्वस्स वि एरिसेण वत्तव्वो।
कप्प-व्ववहाराण उ, पगयं सिस्साण थिज्जत्थं ॥

वृ- को नाम जगति कल्याणं नेच्छति ? ततः सर्वस्यापि श्रुतस्यानुयोग ईदृशेन वक्तव्यः। केवलं कल्पो व्यवहारश्चापवादबहुलस्तेनैतयोरनुयोगे विशेषत एतादृशेन 'प्रकृतम्' अधिकृत-मधिकारः, एवंगुणयुक्तेनैव कल्प-व्यवहारयोरनुयोगः कर्त्तव्य इत्यर्थः। कस्मादेवमुच्यते ? इति चेत्, उच्यते-शिष्याणां स्थिरीकरणार्थम् ॥ तदेव स्थिरीकरणं भावयति-

[भा.२४८] एसुस्सग्गठियप्पा, जयणाणुन्नातो दरिसयंतो वि।
तासु न वट्टइ नूनं, निच्छयओ ता अकरणिज्जा ॥

वृ- यदा नाम यथोक्तगुणशतकलितः कल्प-व्यवहारयोरनुयोगं करोति तदा शिष्या एवमवबुध्यन्ते-एष स्वयमुत्सर्गस्थितात्मा, अथ च कल्पे व्यवहारे च यतनया पञ्चकादि-परिहाणिरूपया प्रतिसेवना अनुज्ञाताः प्रदर्शयति, ततः प्रतिसेवना यतनयाऽनुज्ञाता अपि प्रदर्शयन् स्वयं तासु न वर्त्तते, किन्तु केवलमुत्सर्गमाचरति, तदेवं ज्ञायते नूनम्-निश्चयेनैता यतनानुज्ञाता अपि प्रतिसेवनाः 'अकरणीयाः' न समाचरितव्याः ॥ किञ्च-

[भा.२४९] जो उत्तमेहि पहओ, मग्गो सो दुग्गमो न सेसाणं।
आयरियम्मि जयंते, तदणुचरा केण सीइज्जा ॥

वृ-यः 'उत्तमैः' गुरुभिः 'प्रहतः' क्षुण्णः 'मार्ग' पन्थाः स शेषाणां दुर्गमो न भवति, किन्तु सुगमः। तत्र आचार्ये 'यतमाने' यथोक्तसूत्रनीत्या प्रयत्नवति 'तदनुचराः' तदाश्रिताः शिष्याः

Jain Education International For Private & Personal Use Only www.jainelibrary.org

केन हेतुना सीदेयुः ? नैव सीदेयुरिति भावः । तत एतेन कारणेन कल्प-व्यवहारयोरनुयोगे विशेषत एतादृशेन प्रकृतम् ॥

[भा.२५०] अनुओगम्मि य पुच्छा, अंगाई कप्प छक्कनिक्खेवो।
सुय खंधे निक्खेवो, इक्केक्को चउव्विहो होइ ॥

वृ- अनुयोगेऽङ्गादेः पृच्छा वक्तव्या, तदनन्तरं कल्पस्य षट्को निक्षेपः, ततः श्रुते स्कन्धे च एकैकस्मिन् निक्षेपश्चतुर्विधो भवति वक्तव्यः । एष द्वारगाथासमासार्थः ॥

साम्प्रतमेनामेव विवरीषुः प्रथमतोऽनुयोगेऽङ्गादेः पृच्छामाह-

[भा.२५१] जइ कप्पादनुयोगो, किं सो अंगं उयाहु सुयखंधो।
अज्झयणं उद्देसो, पडिवक्खंगादिणो बहवो ॥

वृ- यदि कल्पादेः आदिशब्दाद् व्यवहारस्य ग्रहणम् अनुयोगः ततः किं सोऽङ्गम् ? उताहो श्रुतस्कन्धः ? अध्ययनम् ? उद्देशो वा ? स। अमीषां चाङ्गानां प्रतिपक्षा बहवोऽङ्गादयो द्रष्टव्याः। इयमत्र भावना-यदि नामैतादृशेनाचार्येणानुयोगः कल्पस्य व्यवहारस्य च कर्त्तव्यः ततः स कल्पो व्यवहारो वा किमङ्गम् अङ्गानि ? श्रुतस्कन्धः श्रुतस्कन्धाः ? अध्ययनम् अध्ययनानि ? उद्देश उद्देशाः ? ॥ अत्र सूरिराह-

[भा.२५२] सुयखंधो अज्झयणा, उद्देसा चेव हुंति निक्खिप्पा।
सेसाणं पडिसेहो, पंचण्ह वि अंगमाईणं ॥

वृ- श्रुतस्कन्धोऽध्ययनानि उद्देशा एते त्रयः पक्षा भवन्ति 'निक्षेप्याः' स्थाप्या आदरणीया इत्यर्थः । शेषाणां पञ्चानामप्यङ्गादीनां प्रतिषेधः । तद्यथा-कल्पो व्यवहारो वा नाङ्गं नाङ्गानि श्रुतस्कन्धो नो श्रुतस्कन्धाः अध्ययनं नाध्ययनानि नो उद्देशः उद्देशाः ॥

[भा.२५३] तम्हा उ निक्खिविस्सं, कप्प-व्यवहारमो सुयक्खंधं।
अज्झयणं उद्देसं, निक्खिवियव्वं तु जं जत्थ ॥

वृ- यस्मादेवं तस्मात् कल्पं निक्षेप्स्यामि व्यवहारं निक्षेप्स्यामि श्रुतं निक्षेप्स्यामि स्कन्धं निक्षेप्स्यामि अध्ययनं निक्षेप्स्यामि उद्देशं निक्षेप्स्यामि । यच्च यत्र निक्षेप्तव्यं नामादि चतुष्प्रकारं षट्प्रकारं वा तत् वक्ष्यामि । तत्र कल्पस्य षड्विधो नामादिको निक्षेपः । यत उक्तं प्राग् द्वारगाथायाम्- "कप्प छक्कनिक्खेवो" व्यवहारस्य चतुर्विधो नामादिनिक्षेपः ॥ एतयोः स्वस्थानमाह-

[भा.२५४] आइल्लाणं दुण्ह वि, सट्ठाणं होइ नामनिप्फन्ने।
अज्झयणस्स उ ओहे, उद्देसस्सऽनुगमे भणिओ ॥

वृ- 'आद्ययोर्द्वयोः' कल्प-व्यवहारयोर्यथाक्रमं षट्कस्य चतुष्कस्य च निक्षेपस्य स्वस्थानं भवति नामनिष्पन्ने निक्षेपे, ततः स तत्र वक्तव्यः; तत्र कल्पस्य पञ्चकल्पे व्यवहारस्य पीठिकायाम् । अध्ययनस्य चतुष्प्रकारो निक्षेपः ओघनिष्पन्ने निक्षेपेऽभिधास्यते । उद्देशस्य च 'अनुगमे' उपोद्धातनिर्युक्त्यनुगमे भणितः करिष्यते ॥ सम्प्रति "सुय खंधे निक्खेवो" इत्यादिव्याख्यानार्थमाह-

[भा.२५५] नामसुयं ठवणसुयं, दव्वसुयं चेव होइ भावसुयं।
एमेव होइ खंधे, पन्नवणा तेसि पुव्वुत्ता ॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

वृ-श्रुतस्य चतुष्प्रकारो नामादिको निक्षेपः, तद्यथा-नामश्रुतं स्थापनाश्रुतं द्रव्यश्रुतं भावश्रुतं च। 'एवमेव' अनेनैव प्रकारेण स्कन्धेऽपि चतुःप्रकारो निक्षेपः, तद्यथा-नामस्कन्धः स्थापनास्कन्धो द्रव्यस्कन्धो भावस्कन्धश्च। एतेषां प्रज्ञापना पूर्वमावश्यके उक्ताऽवधारणीया ।। गतं कस्येति द्वारम्। अधुना तद्वारद्वारं वक्तव्यम्-

[भा.२५६] चत्तारि दुवाराइं उवक्कम निक्खेव अनुगम नया य।
काऊण परूवणयं, अनुगम-निज्जुत्ति सुत्तस्स ।।

वृ- कल्पस्य चत्वार्यनुयोगद्वाराणि भवन्ति, तद्यथा-उपक्रमो निक्षेपोऽनुगमो नयाश्च। एतेषां च प्ररूपणा यथाऽनुयोगद्वारे तथा कर्त्तव्या। सा च तावद् यावत् सूत्रानुगमः सूत्रस्पर्शिक-निर्युक्त्यनुगमश्च। अनुयोगद्वाराणि नाम अनुयोगस्य-अर्थस्य मुखानि उपाया इत्यर्थः ।। आह किमर्थमनुयोगद्वाराणि कृतानि ? किमर्थं वा चत्वारि ? एकमेव द्वारमस्तु, अत आह-

[भा.२५७] अद्दारगं अनगरं, एगद्दारे य होइ पलिमंथो।
चउदारे तेन भवे, देस पएसे य छिंडीओ ।।

वृ- यथा 'अद्वारकम्' अकृतद्वारमनगरम्, एकस्मिंश्च द्वारे कृते भवति 'परिमन्थः' निर्गच्छद्भिः प्रविशद्भिश्चाश्व-हस्त्यादिभि सङ्घट्टः, तेन कारणेन तन्नगरं चतुर्द्वारं भवति। तत्रापि 'देशे' द्वारकुड्यादिलक्षणे प्रदेशे च तत्र तत्रानेकाश्छिण्डिका भवन्ति। एवमकृतानुयोगद्वार-मेकान्तेनागम्यम्, अकृतद्वारनगरवत्; कृतैकानुयोगद्वारमपि दुरधिगमम्, कृतैकद्वारकनगरवत्; तेन चत्वार्यनुयोगद्वाराणि कृतानि। गतं तद्वारद्वारम् ।। इदानीं भेदद्वारम्-यथा नगरस्य देशेषु प्रदेशेषुच छिण्डिका भवन्ति तथाऽनुयोगस्यापि चतुर्णां द्वाराणामवान्तरभेदाः। तत्रोपक्रमो द्विभेदः, तद्यथा-लौकिकः शास्त्रयश्च। लौकिकः षडविधः-नामोपक्रमः स्थापनोपक्रमो द्रव्योपक्रमः क्षेत्रोपक्रमः क्षेत्रोपक्रमः कालोप्रमो भावोपक्रमश्च ।। तत्र नाम-स्थापने प्रतीते। द्रव्योपक्रममाह-

[भा.२५८] सच्चित्ताई तिविहो, उवक्कमो दव्वि सो भवे दुविहो।
परिकम्मणम्मि एक्को, बिइओ संवट्टणाए उ ।।

वृ-नोआगमतो व्यतिरिक्तो द्रव्योपक्रमस्त्रिविधः-'सचित्तादि' सचित्तोऽचित्तो मिश्रश्च। एकैको द्विविधः-परिकर्मणि संवर्त्तनायां च ।। एतदेव व्याख्यानयति-

[भा.२५९] जेन विसिज्जइ रूवं, भासा व कलासु वा वि कोसल्लं।
परिकम्मणा उ एसा, संवट्टण वत्थुनासो उ ।।

वृ-येन रूपं 'विशिष्यते' विशिष्टतरं क्रियते, यथा सुवर्णे कटकरूपतापादनं कृष्णवर्णे वा गौरवर्णताजननम्; तथा येन भाषा विशेष्यते-स्पष्टवर्णोच्चारणादिरूपा क्रियते, यथा शुकसारिकादीनाम्; यच्च वा 'कलासु' द्वासप्ततिसङ्ख्यासु कौशलमुपजन्यते एषा परिकर्मणा। संवर्त्तना वस्तुनाशः, यथा-सुवर्णे कटकत्वं भज्यते पुरुषो वा मार्यते। तत्र सचित्ते परिकर्मणा यथा-नटस्य नेपथ्यं क्रियते, शुको वा पाठ्यते, पुरुषो वा द्वासप्ततिकला अवगाह्यते, संवर्त्तना यथा-पुरुषो मार्यते। अचित्ते परिकर्मणा यथा-सुवर्णे कटकं क्रियते, संवर्त्तना-कटकं भज्यते। मिश्रे परिकर्मणा यथा-साभरणो नटो चारुवेषं कार्यते, पुरुषो वा साभरणो द्वासप्ततिकला ग्राह्यते, संवर्त्तना यथा-सायुधः पुरुषो मार्यते ।। गतो द्रव्योपक्रमः। सम्प्रति क्षेत्रोपक्रममाह-

Jain Education International For Private & Personal Use Only www.jainelibrary.org

[भा.२६०] नावाए उवक्कमणं, हल-कुलियाईहि वा वि खित्तस्स।
सम्मज्ज-भूमिकम्मे, पंथ-तलागाइएसुं तु॥

वृ-यन्नावा आदिशब्दादुडुपादिभिश्च नदीं तरति, अथवा हल-कुलिकादिभिर्यत् 'क्षेत्रस्य' इक्षुक्षेत्रादेरुपक्रमणम्, यदि वा यत् क्रियते गृहादीनां सम्मार्जनं भूमिकर्म वा देवकुलादीनाम्, यच्च वा पथः-मार्गस्य शोधनम् तडागं वा खन्यते, आदिग्रहणेनावटादिषु यत् परिकर्म्म खननादिलक्षणम्। एष समस्तोऽपि क्षेत्रोपक्रमः॥ कालोपक्रममाह-

[भा.२६१]छआयआए नालियाइ व, कालस्स उवक्कमो विउपसत्थो।
रिक्खाईचारेसु व, साव-विबोहेसु व दुमाणं॥

वृ- 'छायया' शङ्कुच्छायया 'नालिकया' घटिकया यः कालो ज्ञायते, यथा एतावान् कालो गत इति। किंविशिष्टः? इत्याह-"विउपसत्थो" विदः-विद्वासस्तैः प्रशस्तः-प्रशंसितः, यथा सुष्ठु ज्ञात इति, एष कालोपक्रमः। यदि वा रि(ऋ)क्षं-नक्षत्रम् आदिशब्दाद्ग्रहपरिग्रहः तेषां चारेषु यत्परिज्ञानम्, यथा-नक्षत्रमिदमेतावन्तं कालमशुभम्, ग्रहो वाऽमुकराशावेतावन्तं कालं स्थायी इत्यादि। यच्च वा 'द्रुमाणां' शमी-चिञ्चिनिकाप्रभृतीनां स्वापे विबोधे च दृष्टे ज्ञायते, यथा-गतोऽस्तमादित्य उदितो वेति। एष कालोपक्रमः॥

भावोपक्रमो द्विधा-प्रशस्तोऽप्रशस्तश्च। उभयमप्याह-

[भा.२६२] गणिगा मरुगीऽमच्चे, अपसत्थो भावुवक्कमो होइ।
आयरियस्स उ भावं, उवक्कमिज्जा अह पसत्थो॥

वृ- अप्रशस्तं संसारनिबन्धनत्वादशोभनं यद् भावस्योपक्रमणमेष भावोपक्रमोऽ-प्रशस्तः॥ अत्रदृष्टान्तो गणिका चउसट्ठिकलापंडिया। तीए चित्तसभाए सव्वमनूसजाईणं जाइकम्मं सिप्पाणि कुवियपसायणं च लिहावियं। ताहे जो कोइ मेहुणट्ठी एइ तं भणइ-चित्तसभं पिच्छ जेन नज्जइ किंजाईओ? केरिसो वा एस?। ताहे सो तत्थ जाइकम्मं सिप्पाणि कुवियपसायणं च दट्ठुमवस्समेव भणइ जं जत्थ सुकयं दुक्कयं वा। ताहे सा जाणइ-अमुगजाईओ, अमुगं सिप्पं जाणइ, कुवियपसायणे दारुणसभावो इत्थिनिज्झिओ वा। एवं नाउं तहा उवचरइ।

मरुगीदिट्ठंतो इमो-एगा मरुगी। सा चिंतेइ-कहं मज्झ धीयाओ सुहियाओ हवेज्जा?। तओ जा जाहे परिणिज्जइ ताहे तं सिक्खवेइ-भत्तारस्स दुक्कमित्ता चडंतं पण्हीए आहनिज्जासु। तत्थ पढमाए आहओ पायं मद्दिउमारद्धो, परिचुंबिया 'हा! दुक्खाविय'त्ति। ताए माऊए सिट्ठं। मायाए भन्नइ-दासो भे जातो (दासभोज्ञतो) एस तव। बिइयाए आहओ। सो रुंटित्ता उवसंतो। माऊए सिट्ठं। सा भणति-तुमं पि दासभोगेणं एयं भुंजाहि, परं मा अतिआयतं। तइयाए आहतो। रुट्ठो। पिट्टिया। उट्ठित्ता गतो। माऊए कहियं। तीए भणियं-एस उत्तमो, चक्कि चिट्ठिज्जा, देवयमिव उवचरेज्जा, भर्तृदिवताका हि नारी। पच्छा कहं कह वि गमित्ता पसाइओ। जहा-एस अम्हं कुलधम्मो, उवायकं वा इच्छियं, कोउगा वा कयं॥

अमात्यदृष्टान्तो यथा-एगस्स रन्नो आहेडएणं निग्गयस्स आसेण मुत्तियं। पडिनियत्तो राया तेनेव मग्गेणाऽऽगओ पासइ मुत्तं तह चेव ट्ठियं। तओ सुचिरं निरिक्खित्ता चिंतियमनेन-जइ इत्थ तडागं होइ तो सुंदरं। अमच्चेण तस्स भावं नाऊण तडागं खणावियं। तडे पायववण

Jain Education International For Private & Personal Use Only www.jainelibrary.org

संडाणि आरोवियाणि। अन्नया रन्ना निग्गएणं दिट्ठं, पुच्छियं-कस्सेयं तडागं ? । अमच्चेण भणियं-तुब्भं। कहं ? । तओ अमच्चेण सव्वं सिट्ठं। राया तुट्ठो अमच्चस्स ॥ उक्तोऽप्रशस्तो भावोपक्रमः। प्रशस्तमाह-आचार्यस्य यद् भावमुपक्रामति एष प्रशस्तो भावोपक्रमः ॥ आचार्यस्य भावमुपक्रम्य किं कर्त्तव्यम् ? अत आह-

[भा.२६३] जो जेन पगारेणं, तूसइ कार-विनयानुवत्तीहिं।
आराहणाइ मग्गो, सु च्चिय अव्वाहओ तस्स ॥

वृ- 'यः' आचार्यो येन प्रकारेण 'कार-विनयानुवृत्तिभिः' कारेणवैयावृत्त्यादिकरणेन यथा-पादौ प्रक्षालनीयौ, विश्रामणा कर्त्तव्या, ग्लानादीनां नित्यं वैयावृत्त्यं कर्त्तव्यमित्यादि; तथा विनयस्य यावन्तो भेदास्तेषां मध्ये या येन विनयेनानुवृत्ति-सर्वेष्वर्थेष्वप्रतिकूलता तथा तुष्यति तस्य तमवश्यं कुर्यात्। किं कारणं येन येन कृतेन तुष्यति तत् कर्त्तव्यम् ? अत आह-'तस्य' आचार्यस्याराधनाया एषोऽव्याहतः 'मार्ग' पन्थाः ॥ किञ्च-

[भा.२६४] आगारिंगियकुसलं,जइ सेयंवायसं वए पुज्जा।
तह वि य सिं न विकूड, विरहम्मि य कारणं पुच्छे ॥

वृ- आकारः-दिगवलोकनादिस्तेन इङ्गितं-परिज्ञानं यदन्तर्गतस्य भावस्य तत्र कुशल आकारेङ्गितकुशलः, अथवाऽऽकारः-दिगवलोकनादिरिङ्गितं-सूक्ष्मचेष्टाविशेषस्ताभ्यामन्तर्गताभिप्रायलक्षणे कुशल आकारेङ्गितकुशलस्तं शिष्यं 'पूज्याः' आचार्या वदेयुः। किं वदेयुः ? इत्याह-'श्वेतं वायसं' यथा परतः श्वेतो वायसस्तिष्ठतीति, तथापि "सिं" तेषां पूज्यानां तद् वचनं स शिष्यः 'न विकुट्टयेत्' न प्रतिषेधयेत्, यथा-न भवत्ययं श्वेतः, वायसः कृष्ण इति; केवलं 'विरहे' जनापगमे एकान्ते कारणं पृच्छेत्-कथं तदा गुरुपादैरुपदिष्टं 'श्वेतो वायसः' ? इति। तत्राऽऽचार्येण वक्तव्यम्-सत्यम्, न भवति श्वेतो वायसः किन्तु मया त्वत्परिज्ञानार्थमुक्तम्, यथा-किमेष मद्वचनं कोपयति न वा ? इति ॥ उक्तो भावोपक्रमःष थधभिधानाच्च लौकिकः। सम्प्रति शास्त्रयो वक्तव्यः, स च भावेऽन्तर्भवतीति भावोपक्रमतया तमेवाह-

[भा.२६५] भावे उवक्कमं वा, छव्विहमनुपुव्विमाइ वन्नेउं।
जत्थ समोयरइ इमं, अज्झयणं तत्थ ओयारे ॥

वृ- वाशब्दः प्रकारान्तरसूचने। अथवा भावोपक्रमं 'षड्विधं' आनुपूर्वी-नाम-प्रमाण-वक्तव्यता-ऽर्थाधिकार-समवतारलक्षणं वर्णयित्वा यत्रेदमध्ययनं समवतरति तत्रावतारयितव्यम्। तद्यथा-आनुपूर्वी त्रिधा, पूर्वानुपूर्वी पश्चादानुपूर्वी अनानुपूर्वी च ॥ तत्र-

[भा.२६६] दुण्हं अनानुपुव्वी, न हवइ पुव्वानुपुव्विओ पढमं।
पच्छानुपुव्वि बिइयं, जइ उ दसा तेन बारसमं ॥

वृ- द्वे एवाध्ययने कल्पो व्यवहारश्च, न च द्वयोरनानुपूर्वी भवति, ततोऽत्र पूर्वानुपूर्वी वा प्रतिपत्तव्या पश्चानुपूर्वी वा । तत्र पूर्वानुपूर्व्या प्रथमं पश्चादानुपूर्व्या द्वितीयम्। केचिदाचार्या प्राहुः-कल्प-व्यवहार-दशा एकश्रुतस्कन्धः, तन्मतेन यदि दशा अपि गण्यन्ते तदा पूर्वानुपूर्व्या प्रथमं पश्चानुपूर्व्या द्वादशमम् अनानुपूर्व्या एकादिकाया एकोत्तरिकाया द्वादशगच्छगतायाः श्रेणेरन्योऽन्याभ्यासे यावन्तो भङ्गकाः प्रथमान्तिमवर्जास्तावन्तो भदा द्रष्टव्याः ॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

[भा.२६७] सव्वज्झयणा नामे, ओसन्नं मीसए अवतरंति ।
जीवगुण नाण आगम, उत्तरऽनंगे य काले य ।।

वृ- 'नाम्नि' षड्विधनाम्नि समवतरति । षड्विधे च नाम्नि भावाः प्ररूप्यन्ते । तत्र 'मिश्रके' क्षायोपशमिके भावे समवतरन्ति यतः सर्वाण्यप्यध्ययनानि उत्सन्नम् अत इदमपि क्षायोपशमिकनाम्न्यवतरति । प्रमाणद्वारमङ्गीकृत्य गुणप्रमाणे । तदपि द्विधाजीवगुणप्रमाणमजीवगुणप्रमाणं च, तत्र जीवगुणप्रमाणे समवतरति । तदपि ज्ञान-दर्शन-चारित्रभेदात् त्रिधा, तत्र ज्ञानगुणप्रमाणे समवतरति । तदपि चतुर्धा-प्रत्यक्षमनुमानमागम उपमानं च, तत्राऽऽगमे । सोऽपि द्विधा-लौकिको लोकोत्तरिकश्च, तत्र लोकोत्तरिके । सोऽपि द्विधा-अङ्गप्रविष्टोऽनङ्गप्रविष्टश्च, तत्रानङ्गप्रविष्टे । सोऽपि द्विधा-कालिक उत्कालिकश्च, तत्र कालिके । नयप्रमाणे तु न समवतरति, कालिकश्रुते नयानां समवताराभावात् । सङ्ख्याप्रमाणे तु कालिकश्रुतपरिमाणसङ्ख्यायां समवतरति ।।

[भा.२६८] पज्जव पुव्वुद्दिट्ठा, संघाया पज्जव-ऽक्खराणं च ।
मुत्तूण पज्जवा खलु, संघायाई उ संखिज्जा ।।

वृ- कल्पस्य व्याख्यानेऽनन्ताः पर्यवाः, ते च पूर्वं-नन्द्याम्- "सव्वागासपएसग्गं सव्वागासपएसेहिं अनंतगुणियं पज्जवक्खरं निप्फज्जइ" इत्यनेनोद्दिष्टाः-कथिताः । सङ्घाता द्विधा-पर्यवाणामक्षराणां च । तत्र पर्यवसङ्घाता अनन्तास्तान् 'पर्यवान्' पर्यवसङ्घातान् मुक्त्वा शेषाः खलु 'संङ्घातादयः' अक्षरसङ्घातादयः सङ्ख्येयाः, श्लोकाः, सङ्घयाता वेष्टका इत्यादि ।।

[भा.२६९] उस्सन्नं सव्वसुयं, ससमयवत्तव्वया समोयरइ ।
अहिगारो कप्पणाए, समोयारो जो जहिं एस ।।

वृ- 'उत्सन्नं' सर्वकालं सर्वश्रुतं स्वसमयवक्तव्यतायां समवतरति । अर्थाधिकारे मूलगुणेषूत्तरगुणेषु चापराधमापन्नानां प्रायश्चित्तकल्पनायाम् ।। सम्प्रति यदुक्तं 'स्वसमयवक्तव्यतायां समवतरति' तदिदानीं सिंहावलोकितेनापवदति-

[भा.२७०] परपक्खं दूसित्ता, जम्हा उ सपक्खसाहणं कुणइ ।
नो खलु अदूसियम्मी, परे सपक्खंजसा सिद्धी ।।

वृ- परसमयवक्तव्यतायामप्यवतरति, यस्मात् परपक्षं दूषयित्वा स्वपक्षसाधनं करोति, न खल्वदूषिते परपक्षे स्वपक्षस्याञ्जसा व्यक्ता प्रधाना वा सिद्धिर्भवति, ततः परसमयवक्तव्यतायामवतारः । तदेवमिदं कल्पाध्ययनमुपक्रमे आनुपूर्व्यादौ यत्र यत्र समवरतरति तत्र तत्रमवतारितारः । तदेवमिदं कल्पाध्ययनमुपक्रमे आनुपूव्यादौं यत्र तत्र समवरतरति तत्र तत्र समवतारितम् ।। गत उपक्रमः । सम्प्रति निक्षेपमाह-

[भा.२७१] निक्खेवो होइ तिहा, ओहे नामे य सुत्तनिप्फन्ने ।
अज्झयणं अज्झीणं, आओ झवणा य तत्थोहे ।।

वृ- निक्षेपस्त्रिविधः-ओघनिष्पन्नो नामनिष्पन्नः सूत्रालापकनिष्पन्नश्च । तत्रौघनिष्पश्चतुर्विधः, तद्यथा-अध्ययनमक्षीणमायः क्षपणा च ।।

[भा.२७२] इक्किक्कं तं चउहा, नामाईयं विभासिउं ताहे ।
भावे तत्थ उ चउसु वि, कप्पज्झयणं समोयरइ ।।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

वृ- 'एकैकम्' अध्ययनादिकं यथा अनुयोगद्वारे तथा नामादीनां भेदतश्चतुर्धा विभाष्य चतुर्ष्वपि 'तत्र' तेष्वध्ययनादिषु 'भावे' भावविषये तु कल्पाध्ययनमिदं समवतरति ।। गत ओघनिष्पन्नो निक्षेपः । सम्प्रति नामनिष्पन्नमाह-

[भा.२७३] नामे छव्विह कप्पो, दव्वे वासि-परसादिएहिं तु ।
खेत्ते काले जहुवक्कमम्मि भावे उ पंचविहो ।।

वृ- नामनिष्पन्ने निक्षेपे कल्प इति नाम । स च षोढा, तद्यथा-नामकल्पः स्थापनाकल्पो द्रव्यकल्पः क्षेत्रकल्पः कालकल्पो भावकल्पश्च । तत्र नाम-स्थापने प्रतीते । द्रव्यकल्पो येन वासी-परश्वादिना द्रव्येण कल्प्यते तद् द्रष्टव्यम् । क्षेत्रकल्पोयथाक्षेत्रोपक्रमः । कालकल्पो यथाकालोपक्रमः। भावकल्पः 'पञ्चविधः' पञ्चप्रकारः ।। तमेवाह-

[भा.२७४] छव्विह सत्तविहे वा, दसविह वीसइविहे य बायाला ।
जस्स उ नत्थि विभागो, सुव्वत्त जलंधकारो से ।।

वृ- भावतः कल्पः षड्विधः सप्तविधो दशविधो विंशतिविधो द्वाचत्वारिंशद्विधश्च । एते पञ्चापि प्रकाराः पञ्चकल्पे व्याख्यातास्तथा ज्ञातव्याः । यस्य त्वेषः 'विभागः' पञ्चप्रकारभावकल्प-परिज्ञानं नास्ति 'से' तस्य सुव्यक्तं जडान्धकारः ।। गतो नामनिष्पन्नो निक्षेपः ।

सम्प्रति सूत्रालापकनिष्पन्नं प्रत्याह-

[भा.२७५] पत्तो वि न निक्खिप्पइ, सुत्तालावस्स इत्थ निक्खेवो ।
सुत्तानुगमे वुच्छं, इति अत्थे लाघवं होइ ।।

वृ- यद्यपि सूत्रालापकस्य निक्षेपः 'प्राप्तः' प्राप्तावसरस्तथापि स प्राप्तोऽपि 'अत्र' निक्षेपप्रक्रमे न निक्षिप्यते, किन्त्वितोऽस्ति तृतीयमनुयोगद्वारमनुगम इति तत्र सूत्रानुगमे वक्ष्ये । यतः 'इति' एवं सति अर्थे लाघवं भवति । तथाहि-सूत्रालापकनिक्षेपः सूत्रगतानामालापकानां निक्षेपः, ते च सूत्रगता आलापाः सूत्रे सति सम्भवन्ति, ततः सूत्रानुगम एव तन्निक्षेपो ज्यायान्, इह तु तन्निक्षेपकरणे महत् प्रतिपत्तिकष्टम् ।। अनुगमे च त्रीणि द्वाराणि, तद्यथा-लक्षणं तदर्हा पर्षत् सूत्रार्थश्च । प्रथमं लक्षणद्वारमाह-

[भा.२७६] लक्खणओ खलु सिद्धी, तदभावे तं न साहए अत्थं ।
सिद्धमिदं सव्वत्थ वि, लक्खणजुत्तं सुयं तेन ।।

वृ- इह लक्षणहीनं सूत्रं न भवति, यतो लक्षणयुक्तस्य सूत्रस्यार्थ लक्षणहीनस्य त्वर्थाभावः, ततो यन्निमित्तमुपनिबद्धं सूत्रं तस्याप्रसिद्धिरेव । तथा चाह-लक्षणतः खलु विवक्षितस्यार्थस्य सिद्धि, 'तदभावे' लक्षणाभावे 'तत्' सूत्रं न साधयति विवक्षितमर्थम् । इदं च 'सर्वत्रापि' लोके सिद्धम्-यत् किञ्चिन्मण्यादि द्रव्यं लाभार्थं क्रीतं तल्लक्षणहीनं लाभं न साधयति । तेन कारणेन लक्षणयुक्तं सूत्रमिष्यते ।। अथ कीदृशं लक्षणयुक्तं सूत्रम् ? अत आह-

[भा.२७७] अप्पगंथ महत्थं, बत्तीसादोसविरहियं जं च ।
लक्खणजुत्तं सुत्तं, अट्ठहि य गुणेहि उववेयं ।।

वृ- 'अल्पग्रन्थम्' अल्पाक्षरम् महार्थम्, अत्र चत्वारो भङ्गाः-अल्पाक्षरमल्पार्थम् यथा-कार्पासादिकम्, अल्पाक्षरं महार्थम् यथा-सामायिक-कल्प-व्यवहारादि, महाक्षरमल्पार्थम् यथा-

Jain Education International For Private & Personal Use Only www.jainelibrary.org

"जीभूते इति वा अञ्रणे इति वा" इत्यादिभिर्बहुभिरक्षरैर्वर्णव्यावर्णनम्, महाक्षरं महार्थम् यथा-दृष्टिवादः । तत्र यद् अल्पाक्षरं महार्थं तादृशं सूत्रमिष्यते । तथा यद् द्वात्रिंशद्दोषविरहितं तदिष्यते । ते च द्वात्रिंशद्दोषा वक्ष्यमाणाः । तथाऽष्टभिर्गुणैर्वक्ष्यमाणैर्यद् उपेतं तदिष्यते । एवम्भूतं सूत्रं लक्षणयुक्तम् ॥ अधुना द्वात्रिंशद्दोषानाह-

[भा.२७८] अलियमुवघायजणयं, अवत्थग निरत्थयं छलं दुहिलं ।
निस्सारमहियमूणं, पुनरुत्तं वाहयमजुत्तं ॥

वृ- अलीकं द्विविधम्-अभूतोद्भावनं भूतनिह्नवश्च । तत्राभूतोद्भावनं यथा-श्यामाकतन्दुलमात्रो जीव इत्यादि । भूतनिह्नवो यथा-नास्ति जीव इत्यादि १ । 'उपघातजनकं' यत् परस्योपघाते वर्त्तते, यथा-"न मांसभक्षणे दोषः" इत्यादि २ । 'अपार्थकं' यस्यावयवेष्वर्थो विद्यते न समुदाये, असम्बद्धमित्यर्थः, यथा-"शङ्खः कदल्यां कदली च भेर्याम्" अथवा-

॥ ३ ॥ वंजुलपुप्फुम्मीसा, उंबर-वडकुसुममालिया सुरभी ।
वरतुरगस्स विरायइ, ओलइया अग्गसिंगेसु ॥

'निरर्थकं' यस्यावयवेष्वर्थो न विद्यते, यथा-डित्थः डवित्थः वाजनः ४ । छलं यथा-अस्त्यात्मा यद्यस्ति आत्मा तर्हि यद् यदस्ति स स आत्मा प्राप्नोति, नवकम्बलो देवदत्त इत्यादि वा ५ । द्रोहणशीलं द्रुहिलं यत् पुण्य-पापापलपनादि, यथा- एतावानेव लोकोऽयं, यावानिन्द्रियगोचरः। इत्यादि ६ । 'निस्सारं' यत्र सारः-अर्थो न विद्यते, यथा-अस्थि-चर्मशिलापृष्ठं वृद्धाः ७ । 'अधिकं' यत् पञ्चानामवयवानामन्यतरेण समधिकम् ८ । 'ऊनम्' एषामन्यतमेन हीनम् ९ । पुनरुक्तं त्रिविधम्-अर्थपुनरुक्तं यथा-सैन्धवमानय लवणं सैन्धवमानयेत्यादि, उभयपुनरुक्तं यथा-क्षीरं क्षीरम् १० । 'व्याहतं' यत्र पूर्वमपरेण बाध्यते, यथा- कर्म चास्ति फलं चास्ति, भोक्ता नास्ति च निश्चयः । ११ । 'अयुक्तं' यद् बुध्या विचिन्त्यमानं न युक्तिं सहते, यथा-

तेषां कटतटभ्रष्टैर्गजानां मदबिन्दुभिः ।
प्रावर्त्तत नदी घोरा, हस्त्यश्वरथवाहिनी ॥ १२ ॥

[भा.२७९] कमभिन्न वयणभिन्नं, विभत्तिभिन्नं च लिंगभिन्नं च ।
अनभिहियमपयमेव य, सभावहीणं ववहियं च ॥

वृ-क्रमभिन्नं यथा-धरणीधरेन्द्र-चन्द्र-पद्म-सागरान् गम्भीर-नयन-मुख-बल-स्थैर्यगुणैर्जयति १३ । 'वचनभिन्नं' यत्रैकवचनप्रसङ्गे द्विवचनं बहुवचनं वा क्रियते, द्विवचन-बहुवचनव्यत्यासो वा १४ । 'विभक्तिभिन्नं' यत्र विभक्तेरन्यथा प्रयोगः १५ । 'लिङ्गभिन्नं' यत्र स्त्रलिङ्गे पुल्लिङ्गं नपुंसकलिङ्गं वा क्रियते, एवं शेषयोरपि द्रष्टव्यम् १६ । 'अनभिहितं' नाम यत् स्वसमयेऽनुक्तमात्मन इच्छया भण्यते १७ । 'अपदं' नाम यत्र गाथापदे गीतिकापदं वानवासिकापदं वा क्रियते १८ । 'स्वाभावहीनं' यस्य यो यत्रात्मीयः सवभावस्तेन तत् शून्यमभिधीयते, यथा-स्थिरो वायुः १९ । 'व्यवहितं' नाम यत्र किञ्चिद् निर्द्दिश्याऽन्यद् विस्तरेण वर्णयित्वा पुनस्तत् प्रकृतमभिधीयते २०॥

[भा.२८०] काल-जइ-च्छविदोसो, समयविरुद्धं च वयणमित्तं च ।
अत्थावत्तीदोसो, हवइ य असमासदोसो उ ॥

वृ- कालदोषो यत्रातीता-ऽनागत-वर्त्तमानकालव्यत्यासकरणम् २१ । यति नाम

Jain Education International For Private & Personal Use Only www.jainelibrary.org

विश्रामस्तस्य दोषो यतिदोषः, यत्र श्लोके गाथायां वृत्ते वा स्वलक्षणप्राप्तः पच्छेदो न क्रियतेऽस्थाने वा क्रियते,

जयति जईणं पवरो, गुणनिगरो नाणकिरणउज्जोओ।
लोईसरो मुनिवरो, सिरिवच्छधरो महावीरो॥ २२।

छविदोषो नाम यत्र परुषा छवि क्रियते २३। समयविरुद्धं यथा-वैशेषिको ब्रूते प्रधानं कारणम् जैनो वदति 'नास्ति जीवः' इत्यादि २४। वचन मात्रं यथा-कश्चित्कीलकं निहत्य ब्रूयात्-इदं लोकमध्यमित्यादि २५। अर्थापति दोषो यथा ब्राह्मणो न हन्तव्यः अर्थादापन्नं शेषजनो हन्तव्या इति २६। असमास दोषः यत्र समासे प्राप्ते समासरहितानि पदानि भण्यन्ते २७।

[भा.२८१] उवमा-रूवगदोसो, परप्पवत्ती य संधिदोसो य।
एए उ सुत्तदोसा, बत्तीसं हुंति नायव्वा॥

वृ. उपमा दोषो यथा काञ्जिकमिव ब्राह्मणस्य सुरा पेया २८। रुपकदोषो यथा - पर्वतो रूप्यमान आत्मीयैरङ्गैः शून्यो वर्ण्यते २९। 'परप्रवृत्तिदोषः' यत्र सुबहुमप्यर्थं वर्णयित्वा निर्देशं न करोति ३०। 'पददोषः' स्याद्यन्ते तिवाद्यन्ते वा स्याद्यन्तं करोति ३१। 'सन्धिदोषः' यत्र भवन्नपि सन्धिर्न क्रियते विसर्गलोपं वा कृत्वा पुनः सन्धिं करोति ३२। एते द्वात्रिंशत्सुत्रदोषा भवन्ति ज्ञातव्याः॥

अष्टभिर्गुणैरुपेतमित्युक्तम् अतस्तानेवाष्टौ गुणानाह-

[भा.२८२] निद्दोसं सारवंतं च, हेउजुत्तमलंकियं।
उवणीयं सोवयारं च, मियं महुरमेव य॥

वृ- निर्दोषं १ सारवत् २ हेतुयुक्तम् ३ अलङ्कृतम् ४ उपनीतं ५ सोपचारं ६ मितं ७ मधुरम् ८ इति॥ तत्र निर्दोषादिपदव्याख्यानार्थमाह-

[भा.२८३] दोसा खलु अलियाई, बहुपज्जायं च सारवं सुत्तं।
साहम्मेयरहेऊ, सकारणं वा वि हेउजुयं॥

वृ-दोषाः खल्वलीकादयः प्रागभिहितास्तैर्वर्जितं निर्दोषम् १। सारवद् नाम 'बहुपर्यायम्' एकैकस्मिन्नभिधेये यत्रानेकान्यभिधानानीत्यर्थः २। हेतुयुक्तं साधर्म्येण वैधर्म्येण वा हेतुना युक्तम्, अथवा हेतुः कारणं निमित्तमप्यनर्थान्तरम्, ततो यत् सकारणं तद् हेतुयुक्तमिति, यथा-"सुत्तत्तं सेयं जागरियत्तं वा सेयं" इत्यादि ३॥

[भा.२८४] उवमाइ अलंकारो, सोवणयं खलु वयंति उवनीयं।
काहलमनोवयारं, दंडगममियं तिहा महुरं॥

वृ-अलङ्कृतं यत्रोपमादिरलङ्कारः। तत्रोपमायुक्तम्, यथा-"सूरेव सेणाइ समत्तमाउहे"। आदिग्रहणेन-

नियमा अक्खरलंभो, माउक्कमनिट्ठुरं छवीजमगं।
महुरत्तणमत्थघणत्तणं च सुत्ते अलंकारा॥

इति परिग्रहः ४। उपनीतं खलु वदन्ति 'सोपनयं' सोपसंहारम् ५। अनुपचारं नाम यत् 'काहलं' फल्गुप्रायम्, तद् विपरीतं सोपचारम् ६। मितं पदैः श्लोकादिभिर्वा, अमितं दण्डकैः ७।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

मधुरं त्रिधा-सूत्रमधुरमर्थमधुरमुभयमधुरम् ८ । एतैरष्टभिर्गुणैरुपेतम् ।। चशब्दात्-

[भा.२८५] अप्पक्खरमसंदिद्धं, सारवं विस्सओमुहं ।
अत्थोभमणवज्जं च, सुत्तं सव्वन्नुभासियं ।।

वृ-अल्पाक्षरमसन्दिग्धं सारवद् विश्वतोमुखं 'अस्तोभं' स्तोभकरितं अनवद्यम् इत्थम्भूतं सूत्रं सर्वज्ञभाषितम् ।। तत्राल्पाक्षरं प्रतीतम् । असन्दिग्धादिपदव्याख्यानार्थमाह-

[भा.२८६] अत्थेसु दोसु तीसु व, सामन्नभिहाणओ उ संदिद्धं ।
जह सिंधवं तु आणय, अत्थबहुत्तम्मि संदेहो ।।

वृ- यस्मिन्नर्थेऽभिधीयमाने द्वयोस्त्रषु चार्थेषु सामान्याभिधानतः सन्हेद उपयते तत् सन्दिग्धम्, यथा-सैन्धवमानयेत्युक्ते किं वस्त्रस्य ग्रहणम्? आहोश्चित्पुरुषस्य? उताहो लवणस्य? इत्यर्थःबहुत्वे सन्देहः । सारवत् नवनीतभूतम् । विश्वतोमुखं यत् सर्वतोऽधिकृतमर्थं प्रयच्छति।।

[भा.२८७] उय-वइकारो ह त्ति य, हीकाराई य थोभगा हुंति ।
वज्जं होइ गरहियं, अगरहियं होइ अनवज्जं ।।

वृ. अस्तोभा-ऽनवद्ययोव्यार्ख्यानमाह-"उय इत्यादि" उत-वै-हा-हिप्रभृतीनामकारण-प्रक्षेपाः स्तोभकाः तद्रहितमस्तोभकम् । अवद्यं भवति गर्हितं तत्प्रतिषेधादगर्हितमनवद्यम् ।। एवंगुणजातीयं सूत्रं कथमुच्चरितव्यं पठनीयं वा ? तत आह-

[भा.२८८] अहीनऽक्खरं अनहियमविच्चामेलियं अवाइद्धं ।
अक्खलियं च अमिलियं, पडिपुन्नं चेव घोसजुयं ।।

वृ-अहीनाक्षरम् । 'अनधिकम्' अधिकाक्षररहितम् । 'अव्यत्याम्रेडितं' नाम यदस्थानेन पदघटनम्, यथा- प्राप्तराज्यस्य रामस्य, राक्षसाः प्रलयं गताः । इत्यत्र "प्राप्तराज्यस्य रामस्य राक्षसाः" इत्यादि तद्रहितम् । यदि वाऽन्यान्यदर्शनानुगतशास्त्रन्तरपल्लवप्रक्षेपरहितमव्यत्याम्रेडितम् । 'अव्याविद्धं' यत् तस्य सूत्स्याधस्तनपदमुपरि उपरितनमधो न क्रियते । 'अस्खलितं' यद् उपलाकुलभूमौ हलमिव पदादिभिर्न स्खलितम् । 'अमिलितं' यद् ग्रन्थान्तरवर्त्तिभि पदैरमिश्रितम्, यथा-सामायिकसूत्रे दशवैकालिकोत्तराध्ययनादिपदानि न क्षिपतीति । प्रतिपूर्णं पदादिभि । 'घोषयुतं' यथावस्थितैरुदात्तादिभिर्घोषैर्युक्तम् ।। तत्र यदुक्तमहीनाक्षरमिति तत्र हीनं द्विधा-द्रव्यहीनं भावहीनं च । द्रव्यहीने उदाहरणमाह-

[भा.२८९] तित्त-कडुओसहाइं, मा णं पीलिज्जऊ न ते देइ ।
पउणइ न तेहि अहिएहि मरइ बालो तहाहारे ।।

वृ- एगाए अविरइयाए पुत्तो गिलाणो । तीए विज्जो पुच्छिओ । तेन ओसहाणि दिन्नाणि । सा चिंतेइ-इमाणि कडुय-तित्ताणी मा निपीडिज्जा । तओ नाए अद्धाणि अवनीयाणि । सो तेहिं न पगुणीकओ, मओ ।। तओ एगा ऊणगं पीहगं देइ, तीसे वि मओ ।।

अक्षरगमनिका-तिक्त-कटुकौषधानि माऽमुं बालं पीडयेयुरिति न तानि परिपूर्णानि ददाति किन्त्वर्द्धानि । न च तैरर्द्धितैर्बालः प्रगुणति किन्तु म्रियते । तथा आहारे ऊने म्रियते । एष दृष्टान्तः, अयमर्थोपनयः-यथा तौ बालावेकभविकं दुःखं प्राप्तौ एवं यो भावहीनं सूत्रमुच्चरि पठति वाऽक्षरैर्हीनमित्यर्थः तस्य प्रायश्चित्तं मासलघु । आज्ञां तीर्थङ्कराणामतिचरतश्चतुर्गुरु । अनवस्थायां

Jain Education International For Private & Personal Use Only www.jainelibrary.org

चतुर्गुरु । मिथ्यात्वे चतुर्लघु । विराधना द्विविधा-आत्मविराधना संयमविराधना च । तत्रात्मविराधना प्रमत्तं देवता छलयेत्, अन्यो वा साधुर्ब्रूयात्-किं विद्रवि सूत्रम् ?, तत्र कलहप्रसङ्गेऽस्थिभङ्ग-मरणादिदोषप्रसङ्गः । सूत्रं हीनं कुर्वता संयमो विराधित एव ।। कथम् ? इत्याह-

[भा.२९०] अक्खर-पयाइएहिं, हीनऽइरेगं च तेसु चेव भवे ।
दोसु वि अत्थविवत्ती, चरणे य अयो य न य मुक्खो ।।

वृ- हीनं नाम अक्षर-पदादिभिरूनम् । 'तैरेव' अक्षर-पदादिभि 'अतिरेकं' साधिकम् । 'द्वयोरपि' हीनाक्षरेऽधिकाक्षरे चेत्यर्थः 'अर्थव्यापत्ति' अर्थस्य विसंवादः । 'अतश्च' अर्थस्य विसंवादे चरणस्य विसंवादः । चरणविसंवादात् 'न मोक्षः' मोक्षाभावः । नोक्षाभावे सर्वा दीक्षा निरर्थिका । एष भावहीने दोषः ।। तस्मिन्नेव भावहीने दृष्टान्तमाह-

[भा.२९१] विज्ञाहर रायगिहे, उप्पय पडणं च हीनदोसेणं ।
सुणणा सरणा गमणं, पयानुसारिस्स दानं च ।।

वृ- रायगिहे सामी समोसढो । तत्थ एगो विज्ञाहरो वंदिउं पडिनियत्तो विज्ञं आवाहेइ । तस्स तए विज्ञाए कइ वि अक्खराणि विस्सरियाणि । सो उप्पयणं पडणं च करेइ । अभओ तं दट्ठूण तस्स सगासं गओ पुच्छइ । तेन सिट्ठं । अभएण भणियं-जइ ममं पि देसि तो उज्जुयारेमि । इयरेण पडिवन्नं । तओ अभओ भणइ-तो खायं भण एगं पयं । तेन भणियं । अभएन सुयं । ताहे अभयेन पयानुसारिणा तानि अक्खराणि सरियाणि । विज्ञाहरो उप्पइत्ता गओ अभयस्स विज्ञं दाउं ।। अक्षरगमनिका-राजगृहे विद्याधरः कतिपयविद्याक्षरगलनाद् हीनदोषेणोत्पतनं पतनं च करोति । ततो विद्यापदानामभयस्य श्रवणाद्(णा) । तच्छ्रवणतोऽभयस्य पदानुसारिप्रज्ञया विस्मृतपदानां स्मरणात् । तदनन्तरं पदानुसारिणोऽभयस्य विद्यादानं कृत्वा विद्याधरस्य स्वस्थाने गमनम् ।। अधिकमपि द्विधा-द्रव्ये भावे च । तत्र द्रव्याधिके तथैव द्वे अविरतिके दृष्टान्त औषधैः पीहकेन च । एवं तावदक्षर-पदादिभिरधिके सूत्रे दोषा मासलघुप्रायश्चित्तादयः प्रागुक्ताः ।

सम्प्रतिभावाधिके एवोदाहरणमाह-

[भा.२९२] पाडलऽसोग कुणाले, उज्जेनी लेहलिहण सयमेव ।
अहिय सवत्ती मताहिएण सयमेव चयणया ।।

[भा.२९३] मुरियाण अप्पडिहया, आणा सयमंजणं निवे णाणं ।
गामग सुयस्स जम्मं, गंधव्वाऽऽउट्टणा कोइ ।।

[भा.२९४] चंदगुत्तपपुत्तो य, बिंदुसारस्स नत्तुओ ।
असोगसिरिणो पुत्तो, अंधो जायइ कागिणिं ।।

वृ- पाडलिपुत्ते नयरे चंदगुत्तपुत्तस्स बिंदुसारस्स पुत्तो असोगो नाम राया । तस्स असोगस्स पुत्तो कुणालो उज्जेनीए । सा से कुमारभुत्तीए दिन्ना । सो खुड्डुलओ । अन्नया तस्स रन्नो निवेइयं, जहा-कुमारो सायरेगट्ठवासो जाओ । तओ रन्ना सयमेव लेहो लिहिओ, जहा-अधीयतां कुमारः । कुमारस्स मायसवत्तीए रन्नो पासे ठियाए भणियं-आनेह, पासामि लेहं । रन्ना पणामिओ । ताहे तीए रन्नो अन्नचित्तत्तणओ सलागाप्रान्तेन निष्ठ्यूतेन तीमित्वा अकारस्योपरि अनुस्वारः कृतः । 'अन्धीयताम्' इति जायं । पडिअप्पिओ रन्नो लेहो । रन्ना वि पमत्तेण न चेव पुनो अनुवाइओ ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

मुद्दित्ता उज्जेनिं पेसिओ। वाइओ। वाइगा पुच्छिया-किं लिहियं ? ति। पुच्छिया न कहिंति। ताहे कुमारेण सयमेव वाइओ। चिंतियं च णेणं-अम्हं मोरिवंसाणं अप्पडिहया आणा, तो कहं अप्पणो पिउणो आणं अइक्कमेमि। तत्तसिलागाए अच्छीणि अंजियाणि। ताहे रन्ना नायं। परितप्पिता उज्जेनी अन्नकुमारस्स दिन्ना। तस्स वि कुमारस्स अन्नो गामो दिन्नो। अन्नया तस्स कुणालस्स अंधयस्स पुत्तो जाओ। सो य अंधकुणालो गंधव्वे अईव कुसलो। अन्नया अन्नायचज्जाए गायंतो हिंडइ। तत्थ रन्नो निवेइयं, जहा-एरिसो तारिसो गंधव्विओ अंधलओ। रन्ना भणियं-आनेह। आनीओ। जवणीअंतरिओ गायइ। ताहे अईव राया असोगो अक्खित्तो। ताहे भणइ-किं देमि ?। इत्थ कुणालेण गीयं-"चंदगुत्तपपुत्तो य" इत्यादि गाथा। ताहे रन्ना पुच्छियं-को एस तुमं ?। तेन कहियं-तुब्भं पुत्तो। जवणियं अवसारेउं कंठे घेत्तुं अंसूपाओ कओ। भणियं च णेण-किं कागिणीए वि नारिहसि जं कागिणिं जायसि ?। अमच्चेहिं भणियं-रायपुत्ताणं रज्जं कागिणी। रन्ना भणियं-किं काहिसि अंधगो रज्जेणं ?। कुणालो भणइ-मम पुत्तो अत्थि। कया जाओ ?। संपइ भूओ। आनीओ। संपइ त्ति से नामं कयं। रज्जं दिन्नं॥

अक्षरगमनिका-'पाटले' पाटलिपुत्रके नगरे अशोको राजा। कुणालस्तस्य पुत्रः। उज्जयिन्यां राज्ञः स्वयमेव तद्योग्यलेखलिखनम्-अधीयतामिति। मात्राधिके सति न वाचकैर्वाच्यते। ततः स्वयमेव वाचना। ततो 'मौर्याणामप्रतिहता आज्ञा' इति विचिन्त्य स्वयं तप्तशिलाकया नेत्रयोरञ्जनम्। ततो नृपे ज्ञानं। ततः परितप्य स राज्ञा ग्रामगतः कृतः। ततः सुतस्य जन्म। गन्धर्वेण समस्तस्यापि लोकस्य 'आवर्त्तना' आवर्जनं निवेदनम्-कोऽप्यन्धोऽतीव गन्धर्वे कुशल इति। ततस्तस्याऽऽनयनम्। परितोषे याच्ञा गाथा-"चन्द्रगुप्तप्रपौत्र" इत्यादि। अथाप्युपनयः स एव॥

अथवा भावाधिके इदं लौकिकमाख्यानम्- कामियसरस्स तडे वंजुलरुक्खो महइमहालओ। तत्थ किर रुक्खे विलग्गिउं जो सरे पडइ सो जइ तिरिक्खजोणिओ तो मनूसो भवइ, अह मनूसो पडति तो देवो भवइ, अह बिइयं वारं पडइ तो प्रकृतिमेव गच्छइ। तत्थ वानरो सपत्तिओ पाणियं पाउं ओयरइ। अन्नया पाणीयपायणट्ठाए आगओ। सो संलावं प्रकृतिगमनविरहितं श्रुत्वा सपत्नीकश्चिन्तयति-रुक्खं विलग्गिउं सरे पडामो जा माणुसजुयलं होमो। इत्थी वारेइ-को जाणइ जइ न हुज्जा ?। पुरिसो भणइ-जइ न हुज्जामो किं माणुसत्तणं पि अम्हं नासिहिइ ?। वारिज्जमाणो वि पडिओ वानरो जाओ। पच्छा रायपुरिसेहिं गहिया सा इत्थी रन्नो भज्जा जाया। इयरो वि मायारएहिं गहिओ खेडाओ सिक्खाविओ। अन्नया ते मायारगा रन्नो पुरओ पेच्छं दिंति। राया देवीए समं पिच्छइ। ताहे सो वानरो देविं निज्झायंतो अभिलसइ। ताहे ताए अनुकंपाए वानरो भणिओ-

[भा.२९५] जो जहा वट्टए कालो, तं तहा सेव वानरा।
मा वंजुलपरिब्भट्ठो, वानरा पडणं सर॥

वृ- यो यथा वर्त्तते कालः 'तं' कालं तथा सेवस्व वानर!। वञ्जुलवृक्षादेकवारं परिभ्रष्टः पतितः सन् मया तदा भणितः-'मा भूयो वञ्जुलवृक्षात् सरसि पतनं कुरु, प्रकृतिं यास्यसि' इति एतत् स्मर। एवं भावतोऽधिकेऽर्थे विसंवाद इत्यादिका विभाषा तथैव॥

सम्प्रति 'अविच्चामेलियं अव्वाइद्धं' इत्येते द्वे पदे व्याख्यानयति-

Jain Education International For Private & Personal Use Only www.jainelibrary.org

[भा.२९६] विच्चामेलण अन्नुन्नसत्थपल्लवविमिस्स पयसो वा।
तं चेव य हिट्ठुवरिं, वायद्धे आवली नायं॥

वृ- व्यत्याम्रेडितं नाम अन्यान्यशास्त्रपल्लवविमिश्रणम्। तत्र द्रव्यतो व्यत्याम्रेडिते पायसमुदाहरणम्- जहा कोलिया वइयं गया। तत्थ तेहिं 'परमन्नं रंधेमो' त्ति दुद्धं आद्रहितं। इत्थ जं जं छुब्भइ तं तं पायसो भवइ त्ति तंदुला चवला मुग्गा तिला कुक्कुसा छूढा। तं सव्वं विनट्ठं अकिंचिकरं जायं॥ एवमेव भावे सूत्रं व्यत्याम्रेडयति-"सव्वभूयप्पभूयस्स, सम्मं भूयाई पासउ।" अत्रेदमपि घटत इति कृत्वा चैवावधार्यताम्।

श्रूयतां धर्मसर्वस्वं, श्रुत्वा चौवावधार्यताम्।
आत्मनः प्रतिकूलानि, परेषां न समाचरेत्॥

भावतो व्यत्याम्रेडितं सूत्रं कुर्वतोऽर्थस्य विसंवाद इत्यादि विभाषा प्रागिव यावद् दीक्षा निरर्थिका। तदेव च सूत्रमध उपरि व्यत्सासेन क्रियमाणं व्याविद्धम्। तच्च द्विधा-द्रव्यतो भावतश्च। तत्र द्रव्यव्याविद्धे आवली 'ज्ञातम्' उदाहरणम्- एगा आभीरी नगरं गया। तीसे वयंसिया वाणिगिणी। सा हारं पोएइ इयरी भणइ-आनेहिं, अहं हारं पोएमि। ताए पणामिओ। इयरीए उप्परिवाडीए पोइओ। वाणिगिणी वक्खित्ता आसि। पच्छा ताए दट्ठुं भणिया-हा पावे! विनासिओ हारो, महदुष्कर्म कृतम्॥ भावव्याविद्धमेवम्, यथा-

अहिंसा संजमो तवो, धम्मो मंगलमुक्कट्ठं।
जस्स धम्मे सया मणो, देवा वि तं नमंसंति॥

वृ-एवं व्याविद्धे भावतोऽर्थस्य विसंवाद इत्यादि विभाषा पूर्ववद् यावद् दीक्षा निरर्थिका। तस्मादव्याविद्धमुच्चरितव्यम्॥ अधुना स्खलित-मिलिता-ऽप्रतिपूर्णा-ऽघोषयुतानां व्याख्यानमाह-

[भा.२९७] खलिए पत्थरसीया, मिलिए मिस्साणि धन्नवावणया।
मत्ताइ-बिंदु-वन्ने, घोसा इ उदत्तमाईया॥

वृ-स्खलितं द्विधा-द्रव्यतो भावतश्च। तत्र द्रव्ये 'प्रस्तरसीता' प्रस्तराकुलं क्षेत्रम्, तस्मिन् हि वाह्यमानानि हल-कुलिकादीनि उत्स्फिटय अन्यत्र निपतन्ति। एवं भावस्खलितं यदन्तराऽन्तरा आलापकान् मुञ्चति, यथा-धम्मो, अहिंसा, देवा वि तं नमंसंति, पुप्फेसु भमरा जहा। पच्छित्तं तं चेव, दोसा य। मिलितमपि द्विधा-द्रव्यतो भावतश्च। तत्र द्रव्यतो मिलितं, बहूनां व्रीहि-यवादीनां धान्यानामेकत्र मिश्रीकृतानां वापनता-वापनम्। भावतो मिलितं यद् अन्यस्यान्यस्योद्देशकस्याध्ययनस्य वा आलापकानेकत्र मीलयति सर्वं जिनवचनमिति कृत्वा। यथा-"सव्वे पाणा पियाउगा" "सव्वजीवा वि इच्छंति, जीविउं न मरिज्जिउं" इत्थ न नज्जइ किं कालियं उक्कालियं छेयसुयं वा?। अत्र प्रायश्चित्तं दोषाश्च प्राग्वत्। परिपूर्णं द्विधा-द्रव्यतो भावतश्च। तत्र द्रव्यतः परिपूर्णो घटः। भावे परिपूर्णं मात्रादिभि-मात्राभि आदिग्रहणात् पदैः बिन्दुभि वर्णे-अक्षरैश्चापरिपूर्णे तदेव प्रायश्चित्तं दोषाश्च। मात्राभिरपरिपूर्णं यथा-"धम्म मंगलमक्कट्ठं"। पदैरपरिपूर्णं यथा-"धम्मं उक्किट्ठं" इत्यादि। घोषा उदात्तादयः, तत्र उच्चैरुदात्तः, नीचैरनुदात्तः, समाहारः स्वरितः। उच्चैःशब्देन यथा-"उप्पन्ने इ वा" इत्यादि। नीचैःशब्देन यथा-"जे भिक्खू हत्थकम्मं करेइ" इत्यादि। घोषैरयुक्तं कुर्वतस्तदेव प्रायश्चित्तं त एव च दोषाः॥ सम्प्रति व्यत्याम्रेडितादीनां पञ्चानां प्रकारान्तरेणार्थम-

Jain Education International For Private & Personal Use Only www.jainelibrary.org

भिधातुकाम आह-

[भा.२९८] मुत्तूण पढम-बीए, अक्खर-पय-पाय-बिंदु-मत्ताणं ।
सव्वेसि समोयारो, सट्ठाणे चेव चरिमस्स ॥

वृ- प्रथमं-हीनाक्षरं द्वितीयम्-अधिकाक्षरम् एते द्वे पदे मुक्त्वा शेषाणां पञ्चानां घोषयुतवर्जानाम् अक्षर-पद-पाद-बिन्दु-मात्राणां समवतारः कर्त्तव्यः । यथा-व्यत्याम्रेडितं अधस्तनान्युपरि उपरितनन्यधोऽक्षर-पदादीनि यत् करोति । स्खलितं पञ्चभिरेव पदादिभिः । मिलितं यथासामायिकपदे दशवैकालिकोत्तराध्ययनप्रभृतीनामनेकानि पदानि मीलयति । अपरिपूर्णं पञ्चभिरेवाक्षरादिभि स्वगतैः । "सट्ठाणे चेव चरिमस्स" अघोषयुतं घोषैरेवापरिपूर्णं नाक्षरादिभिः ॥ साम्प्रतमेतेषु हीनाक्षरादिषु प्रायश्चित्तमाह-

[भा.२९९] खलिय मिलिय वाइद्धं, हीनं अच्चक्खरं वयंतस्स ।
विच्चामेलिय अप्पडिपुन्ने घोसे य मासलहुं ॥

वृ- स्खलितं मिलितं व्याविद्धं हीनाक्षरमत्यक्षरं व्यत्याम्रेडितमपरिपूर्णघोषं च वदतः प्रत्येकं प्रायश्चित्तं मासलघु । स्वामिन आज्ञाभङ्गे चतुर्गुरु, यथा स तथाऽन्येऽपि करिष्यन्तीति चतुर्गुरु । यथोक्तकारी न भवतीति मिथ्यातवे चतुर्लघु । विराधना द्विविधा-आत्मविराधना संयमविराधना च । आत्मविराधना-देवतया छलनम् । संयमविराधना-कोऽपि साधुर्वारयेत् 'मा स्खलितादीनि कुरु' ततः कलहतोऽस्थिभङ्गाद्यात्मविराधनायां परिताप-महाग्लानाद्यारोपणा संयमविराधना । सूत्रस्यान्यथोच्चारणेऽर्थविसंवादः, अर्थविसंवादे चरणाभावः, चरणाभावे मोक्षाभाव इति दीक्षा निरर्थिका । लघुग्रहणाद् गुरुकमपि सूचितम्, ह्रस्वोक्त्या यथा दीर्घस्य सूचनम् । तत्र गुरुकमिति वा अनुद्धातीति वा कालकमिति वा गुरुकस्य नामानि । लघुकमिति वा उद्धातितमिति वा शुक्लमिति वा लघुकस्य नामानि ॥

अत्र गुरु-लघुविशेषविस्तरपरिज्ञानार्थमाचार्यस्त्रिविधं प्रायश्चित्तं दर्शयति, तद्यथा-दानप्रायश्चित्तं तपःप्रायश्चित्तं कालप्रायश्चित्तं च । तत्र दानप्रायश्चित्तं गुरुकं लघुकं च । एवं तपः-कालप्रायश्चित्ते अपि गुरु-लघुके प्रत्येकं वक्तव्ये । तत्र दानप्रायश्चित्तं गुरुकमाह-

[भा.३००] जं तु निरंतरदानं, जस्स व तस्स तवस्स तं गुरुगं ।
जं पुन संतरदानं, गुरू वि सो खलु भवे लहुओ ॥

वृ- यस्य वा तस्य वा तपसो गुरुकस्याष्टमादेरगुरुकसय निर्वृतिकादे(निर्विकृतिकादे] यन्निरन्तरदानं तद् भवति दानप्रायश्चित्तं गुरु । यत् पुनः सान्तरमष्टमादेर्गुरुकस्य तपसो दानं तद् गुर्वपि खलु भवति लघु, यथा-आपत्तिश्चतुर्लघुकस्य षडलघुकस्य वा तत्राष्टम्-दशमानि सान्तराणि दीयन्ते । एष दानप्रायश्चित्ते गुरु-लघुकयोर्विशेषः ॥ सम्प्रति तपः-कालयोराह-

[भा.३०१] काल-तवे आसज्ज व, गुरू वि होइ लहुओ लहू गुरुगो ।
कालो गिम्हो उ गुरू, अट्ठाइ तवो लहू सेसो ॥

वृ- कालं तपश्चासाद्य गुर्वपि लघु भवति, लघ्वपि च गुरु । तत्र कालो ग्रीष्मो गुरु, तपोऽष्टमादि, शेषः कालस्तपश्च लघु । इयमत्र भावना-लघ्वपि य् अष्टमादिना तपसा उह्यते तत् तपोगुरु, यन्निर्विकृतिकादिना षष्ठपर्यन्तेनोह्यते तत् तपोलघुः तथा यद् ग्रीष्मे काले उह्यते तत् कालगुरु,

Jain Education International For Private & Personal Use Only www.jainelibrary.org

वर्षारात्रे हेमन्ते वोह्यमानं काललघु ॥ तदेवं यतः स्खलिताद्युच्चारणे प्रायश्चित्तमाज्ञा-ऽनवस्था-मिथ्यात्व-विराधनाश्च दोषाः तस्मात् सूत्रं स्खलितादिदोषररहितमुच्चारणीयं पठनीयं च । एवं च पठितस्य सूत्रस्य व्याख्या कर्त्तव्या । तत्र व्याख्यालक्षणमाह-

[भा.३०२] संहिया य पयं चेव, पयत्थो पयविग्गहो ।
चालणा य पसिद्धी य, छव्विहं विद्धि लक्खणं ॥

वृ- संहिता १ पदं २ पदार्थं ३ पदविग्रहः ४ चालना ५ प्रसिद्धिश्च ६ । एवं 'षड्विधं' षटप्रकारं व्याख्यालक्षणं 'विद्धि' जानीहि ॥ तत्र संहितेति कोऽर्थः ? इत्याह –

[भा.३०३] सन्निकरिसो परो होइ संहिया संहिया व जं अत्था ।
लोगुत्तर लोगम्मि य, हवइ जहा धूमकेउ त्ति ॥

वृ- यो द्वयोर्बहूनां वा पदानां 'परः' अस्खलितादिगुणोपेतो विविक्ताक्षरो झटिति मेघाविनामर्थप्रदायी 'सन्निकर्ष' सम्पर्कः स संहिता । अथवा यद् अर्था संहिता एषा संहिता । सा द्विधा-लौकिकी लोकोत्तरा च । तत्र लौकिकी 'यथा धूमकेतुः' इति, यथा इति पदं धूम इति पदं केतुरिति पदम् ॥

[भा.३०४] तिपयं जह ओवम्मे, धूम अभिभवे केउउस्सए अत्थो ।
को सु त्ति अग्गि उत्ते, किंलक्खणो दहण-पयणाई ॥

वृ- 'यथा धूमकेतुः' इति संहितासूत्रं त्रिपदम् । सम्प्रति पदार्थ उच्यते-यथेत्यौपम्ये, धूम इत्यभिभवे, ''धूवि घूनने'' इति वचनातु, केतुरित्युच्छ्रये । एष पदार्थः घूमः केतुरस्येति धूमकेतुरिति पदविग्रहः । कोऽसौ ? इति चेत् अग्नि । एवमुक्ते पुनराह- किंलक्षणः ? । सूरिराह-'दहन-पचनादि' दहन-पचन-प्रकाशनसमर्थोऽर्चिष्मान् ॥ अत्र चालनां प्रत्यवस्थानं चाह-

[भा.३०५] जइ एव सुत्त-सोवीरगाई वि होंति अग्गिमक्खेवो ।
न वि ते अग्गि पइन्ना, कसिणग्गिगुणन्निओ हेऊ ॥

[भा.३०६] दिट्ठंतो घडगारो, न वि जे उक्खेवणाइ तक्कारी ।
जम्हा जहुत्तहेऊसमन्निओ निगमणं अग्गी ॥

वृ- यदि नाम दहन-पचनादिस्तर्हि शुक्ल-सौवीरकादयोऽपि दहन्ति, करीषादयोऽपि पचन्ति, खद्योत मणिप्रभृतयोऽपि प्रकाशयन्ति ततस्तेऽप्यग्निर्भवितुमर्हन्ति, एषः 'आक्षेपः' चालना । अत्र प्रत्यवस्थानमाह-''नैव शुक्लादयोऽग्निर्भवन्ति' इति प्रतिज्ञा, 'कृत्स्नगुणसमन्वि-तत्वात्' इति हेतुः, द्दष्टान्तो घटकारः, यथा हि घटकर्ता मृत्पिण्ड-दण्ड-चक्र-सूत्रोदक-प्रयत्नहेतुकस्य घटस्य कार्त्स्न्येभिनिर्वर्त्तकः, अभिनिर्वृर्त्तकः, अभिनिर्वर्त्तकः । एवमत्रापि यो दहति पचति प्रकाशयति च यथास्वगतेन लक्षणेनासाधारणः स एव यथोक्तहेतुसमन्वितः परिपूर्णोऽग्निर्न शुक्लादय इति निगमनम् ॥ सम्प्रति लोकोत्तरे संहितादीनि दर्शयति-

[भा.३०७] उत्तरिए जह दुमाई, तदत्थहेऊ अविग्गहो चेव ।
को पुन दुमु त्ति वुत्तो, भण्णइ पत्ताइउववेओ ॥

वृ- लोकोत्तरे ''जहा दुमस्स पुप्फेसु, भमरो आवियइ रसं'' इति संहिता । अत्र पदानि-यथा इति द्रुम इति पुष्पेष्विति भ्रमर इति आपिबतीति रसमिति । अधुना पदार्थ उच्यते-'यथा'

Jain Education International For Private & Personal Use Only www.jainelibrary.org

इत्यौपम्ये। द्रु गतौ, द्रवति-गच्छति अध उपरि चेति द्रुमः, औणादिको मक्प्रत्ययः, तस्य द्रुमस्य। पुष्प विकसने, पुष्पन्ति-विकसन्तीति पुष्पाणि, अच्, तेषु। भ्रम अनवस्थाने, भ्राम्यति निरन्तरमिति भ्रमरः, औणादिको अरः प्रत्ययः। पा पाने, आङ मर्यादायामभिविधौ वा, तस्य तिपि आपिबतीति रूपम्। रस आस्वादने, रस्यते-आस्वादयत इति रसः, कर्मण्यौणादिकः अकारप्रत्ययः, तम्। अत्र व्यस्तपदत्वाद्विग्रहाभावः, तथा चाह-"तदत्थहेऊ अविग्गहो चेव" तेषां-पदानामर्थस्य हेतुः 'अविग्रह एव' न विग्रहद्वारेणात्र पदार्थ इत्यर्थः। अत्र चालना-नोदक आह-'कः' कीदृग्लक्षणो द्रुम उक्तः ? । सूरिराह-भण्यते, 'पत्राद्युपेतः' पत्र-पुष्प-फलादिसमन्वितः। उक्तञ्च –

पत्र पुष्प-फलोपेतो, मूल-स्कन्धसमन्वितः।
एष वृक्ष इति ज्ञेयो, विपरीतमतोऽन्यथा ॥

[भा.३०८] तदभावे न दुमु त्ति य, तदभावे वि स दुमु त्ति य पइन्ना।
तग्गुणलद्धी हेऊ, दिट्ठंतो होइ रहकारो ॥

वृ- यदि पत्राद्युपेतो द्रुमस्तर्हि यदा परिशटितपाण्डुपत्रादिर्द्रुमो भवति तदा तस्याद्रुमत्वं प्राप्नोति, एषा चालना। अत्र प्रत्यस्थानम्-'तदभावेऽपि स द्रुमः' इति प्रतिज्ञा, 'तद्गुणलब्धित्वात्' इति हेतुः, दृष्टान्तो रथकारः; यथा हि रथकारस्य रथकरणे प्रयत्नमकुर्वाणस्यापि रथकर्तृत्वं तद्गुणलब्धित्वात्, एवं परिशटितपाण्डुपत्रस्यापि द्रुमस्य तद्गुणलब्धेरनिवृत्तत्वादव्याहतं द्रुमत्वमिति ॥ सम्प्रति मतान्तरेणान्यथा व्याख्यालक्षणमाह-

[भा.३०९] सुत्तं पयं पयत्थो, पयनिक्खेवो य निन्नयपसिद्धी।
पंच विगप्पा एए, दो सुत्ते तिन्नि अत्थम्मि ॥

वृ- प्रथमतोऽस्खलितादिगुणोपेतं सूत्रमुच्चारणीयम्। ततः 'पदं' पदच्छेदो विधेयः। तदनन्तरं पदार्थ कथनीयः। ततः 'पदनिक्षेपः' पदार्थनोदना। तदनन्तरं 'निर्णयप्रसिद्धिः' निर्णयविधानम्। पदविग्रहः पदार्थेऽन्तर्भूतः। एवमेते पञ्च 'विकल्पाः' प्रकारा व्याख्यायां भवन्ति। अत्र सूत्रं पदमिति द्वौ विकल्प सूत्रे प्रविष्टौ। 'त्रयः' पदार्थ-तदाक्षेप-निर्णयप्रसिध्यात्मका अर्थ इति ॥ यदुक्तमधस्तात् "सूत्रनिरुक्तमुपरि वक्ष्यामि" इति तद् वक्तुकाम आह-

[भा.३१०] सुत्तं तु सुत्तमेव उ, अहवा सुत्तं तु तं भवे लेसो।
अत्थस्स सूयणा वा, सुवुत्तमिइ वा भवे सुत्तं ॥

वृ- अर्थेन अबोधितं सुप्तमिव सुप्तं प्राकृतशैल्या सुत्तं। अथवा सूत्रं नाम तद् भवति 'श्लेषः' तन्तुरूपमित्यर्थः, तथा (यथा) तन्तुना द्वे त्रीणि बहूनि वा वस्तूनि एकत्र संहन्यन्ते एवमेकेनापि सूत्रेण बहवोऽर्था सङ्घात्यन्त इति सूत्रमिव सूत्रम्। अर्थस्य सूचनाद्वा सूत्रम्। सुष्ठु उक्तमिति वा सूक्तम्, प्राकृतशैल्या तु सुत्तमिति ॥ सम्प्रति सूत्रशब्दस्यैव निरुक्तान्याह-

[भा.३११] नेरुत्तियाइँ तस्स उ, सूयइ सिव्वइ तहेव सुवइ त्ति।
अनुसरति त्ति य भेया, तस्स उ नामा इमा हुंति ॥

वृ- 'तस्य' सूत्रस्य निरुक्तान्यमूनि-सूचयतीति सूत्रम्, अथवा सीव्यतीति सूत्रम, यदि वा सुवतीति सूत्रम्, अथवाऽनुसरतीति सूत्रम् इति निरुक्तस्य भेदाः। नामानि पुनस्तस्य 'इमानि'

Jain Education International For Private & Personal Use Only www.jainelibrary.org

सुप्तादीनि वक्ष्यमाणार्थानि भवन्ति ।। तान्येवार्थतो व्याख्यानयति-

[भा.३१२] पासुत्तसमं सुत्तं, अत्थेनाबोहियं न तं जाणे ।
लेससरिसेण तेनं, अत्था संघाइया बहवे ।।

वृ- यथा द्वासप्ततिकलापण्डितो मनुष्यः प्रसुप्तः सन् न किञ्चित्तासां कलानां जानाति, एवमर्थेनाबोधितं न किञ्चिदर्थविशेषं जानाति । यदा त्वर्थेन प्रबोधितं भवति तदा सर्वेषां तदन्तर्गतानां भावानां ज्ञायकमुपजायते, यथा स एव पुरुषः प्रबोधितस्तासां कलानाम्, अतः प्रसुप्तसमं सूत्रम्। अथवा श्लेषसदृशं तत् सूत्रं, तथाहि-तेन 'श्लेषसदृशेन' तन्तुसदृक्षेण बहवोऽर्था सङ्घातितास्ततः श्लेषसदृशम् ।। सम्प्रति 'अर्थस्य सूचनात्' इति व्याख्यानयति-

[भा.३१३] सूइज्जइ सुत्तेणं, सूई नट्ठा वि तह सुएणऽत्थो ।
सिव्वइ अत्थपयाणि व, जह सुत्तं कंचुगाईणि ।।

वृ- यथा सूची नष्टा 'सूत्रेण सूच्यते' सूत्रेणैवोपलक्ष्यते तथा श्रुतेनार्थः सूच्यत इति अर्थस्य सूचनात् सूत्रम् । एतेन 'सूचयति' इति निरुक्तं व्याख्यातम् । अधुना 'सीव्यति' इति व्याख्यानयति-यथा सूत्रं कञ्चुकादीनि सीव्यति एवमर्थपदान्यनेकानि सीव्यतीत्यर्थःस्य सीवनात् सूत्रम् ।। ''सुवति त्ति'' अस्य व्याख्यानमाह-

[भा.३१४] सूरमणी जलकंतो, व अत्थमेवं तु पसवई सुत्तं ।
वणियसुयंध कयवरे, तदनुसरंतो रयं एवं ।।

वृ- यथा सूर्यकान्तोऽग्नौ जलकान्तो जले दीप्तिं श्रवति एवं सूत्रमर्थं प्रसवतीति सूत्रम् । अनुसरणं द्विधा-द्रव्यतो भावतश्च । तत्र द्रव्यतो वणिक्सुतोऽन्धः कचवरे दृष्टान्तः-

एकस्य वणिजः पुत्रोऽन्धः । वणिजा चिन्तितम्-मा एष वराकोऽनिर्विष्टं भक्तं भुङ्क्ताम्, 'परिभवस्थानमन्यथा गाढतरं भविष्यति' इति द्वौ स्तम्भौ निहत्य तत्ररज्जुर्बद्धा । ततः सोऽन्धपुत्रो रज्ज्वनुसारेण कचवरं बहिस्त्याज्यते ।। एष दृष्टान्तोऽयमर्थोपनयः-वणिक्स्थानीय आचार्यः, अन्धस्थानीयाः साधवः, रज्जुस्थानीयं सूत्रम्, कचवरस्थानीयमष्टप्रकारं कर्म । तथा चाह-'एवं' वणिक्सुतान्धदृष्टान्तप्रकारेण 'तत्' सूत्रमनुसरन् 'रजः' अष्टप्रकारं कर्मकचवरस्थानीयमपनयति, ततः सरणात् सूत्रम् । सुष्ठूक्तं सूक्तमिति नाम तु सुप्रतीतमिति न व्याख्यातम् ।।

अथ तत् सूत्रं कतिविधम् ? इत्यत आह-

[भा.३१५] सन्ना य कारगे पकरणे यसुत्तं तु तं भवे तिविहं ।
उस्सग्गे अववाए, अप्पे सेए य बलवंते ।।

वृ- सूत्रं त्रिविधम्, तद्यथा-सञ्ज्ञासूत्रं कारकसूत्रं प्रकरणसूत्रं च । अथवा द्विविधं सूत्रम्-''उस्सग्गे''त्ति औत्सर्गिकं ''अववादि''त्ति आपवादिकम् । तत्र किं उत्सर्गा अल्पे ? उत अपवादाः? तथा उत्सर्गोऽपवादो वा स्वस्थाने श्रेयान् बलवाँश्च, अपरस्थानेऽबलवाँश्चाश्रेयाँश्च । एष द्वारगाथासमासार्थः ।। साम्प्रतमेनामेव विवरीषुः प्रथमतः संज्ञासूत्रमाह-

[भा.३१६] उवयार अनिट्ठुरया, कज्जित्थीदाणमाहु नित्थक्का ।
जे छेए आमगंधादि, आरं सन्ना सुयं तेनं ।।

वृ- यत् सामयिक्या संज्ञया सूत्रं भण्यते तत् संज्ञासूत्रम् । यथा-''जे छेए से सागारियं

Jain Education International For Private & Personal Use Only www.jainelibrary.org

परियाहरे।'' तथा-'आमगंधा' इति ''सव्वामगंधं परिन्नाय निरामगंधो परिव्वए'' तथा-'आरं'ति ''आरं दुगुणेणं पारं एगगुणेणं'' इति। यच्छेकः सः 'सागारिकं' मैथुनं 'परियाहरे' परिवर्जयति। तथा आमम्-अविशोधिकोटिः, गन्धं-विशोधिकोटिः, परिज्ञा द्विविधा-ज्ञपरिज्ञा प्रत्याख्यानपरिज्ञा च, तत्र ज्ञपरिज्ञया सर्वमामगन्धं परिज्ञाय प्रत्याख्यानपरिज्ञया घ प्रत्याख्याय निरामगन्धः सन् परि-समन्तात् व्रजेत्-अप्रतिबद्धो विहरेदित्यर्थः। आरः-संसारस्तं 'द्विगुणेन' रागेण द्वेषेण च परिवर्जयति, 'पारं' मोक्षस्तमेकेन गुणेन-राग-द्वेषपरिहारलक्षणेन साधयति। अथ कः संज्ञासूत्रेण गुणः? इत्यत आह-''उवयारे''त्यादि पूर्वार्द्धम्। संज्ञावचनं हि कचिज्जुगुप्सितेऽर्थे प्रयुज्यमानं तद्विषयमुपचारवचनं भवति। उपचारवचनेन च भण्यमाने तस्मिन् जुगुप्सितेऽर्थ न निष्ठुरतेति अनिष्ठुरता। तथाकार्ये समापतिते स्त्रयाः-साध्व्याः सूत्रदानमाहुः, ततस्तस्याः साधुसमीपे पठन्त्याः सुखेनालापको दीयते, अन्यथा व्यक्तमभिधीयमाने कथा भिन्ना भवति, ततः सा 'नित्थक्का' निर्लज्जा जायते। यादृशे च कार्ये साध्वी साधुसमीपे पठति तदुपरिष्टाद्वक्ष्यते। तेन संज्ञासूत्रमिष्यते॥

कारगसूत्रं नाम यथा-आहाकम्मन्नं भुंजमाणे समणे निग्गंथे कइ कम्मपगडीओ बंधंति? गोयमा! आउवज्जाओ सत्त कम्मपगडीओ। से केणट्ठेणं भंते! एवं वुच्चइ? इत्यादि प्रज्ञप्तेरालापकः। ननु सर्वज्ञप्रामाण्यादेवैतच्छ्रद्धीयते-यथाऽऽधाकर्म भुञ्जान आयुर्वर्जानां कर्मप्रकृतीनां बन्धकः, ततः कस्मादुच्यते ''केनार्थेन भदन्त! एवमुच्यते'' इत्यादि? तत आह-

[भा.३१७] सव्वन्नुपमाणाओ, जइ वि य उस्सग्गओ सुयपसिद्धी।
विस्थरओऽपायाण य, दरिसणमिइ कारगं तम्हा॥

वृ- यद्यपि सर्वज्ञप्रामाण्यात् 'उत्सर्गतः' एकान्तेन श्रुतस्य सर्वस्यापि प्रसिद्धि तथापि विस्तरतोऽपायानां दर्शनं स्यात् 'इति' तस्मादधिकृतार्थप्रसिद्धिकारकं ''से केणट्ठेण'' मित्यादि सूत्रमुपन्यस्यते॥ इदानीं प्रकरणसूत्रमाह-

[भा.३१८] पगरणओ पुण सुत्तं, जत्थ उ अक्खेव-निन्नयपसिद्धी।
नमि-गोयकेसिज्ञा, अद्दग-नालंदइज्ञा य॥

वृ- प्रकरणतः सूत्रं नाम यत्र स्वसमय एवाक्षेप-निर्न्न(र्ण)यप्रसिद्धिरुपवर्ण्यते, यथा-नमिप्रव्रज्या गौतमकेशीयं आर्द्रकीयं नालन्दीयमिति॥ तदेवमुक्तं संज्ञादिभेदतस्त्रिप्रकारं सूत्रम्। अधुनोत्सर्गाऽपवादभेदतो द्विविधमुच्यते। तत्रोत्सर्गसूत्रम्-नो कप्पइ निग्गंथाण वा निग्गंथीणं पक्के तालपलंबे भिन्नेऽभिन्ने वा पडिगाहित्तए। अथवा त्रिविधं सूत्रम्-उत्सर्गसूत्रमपवादसूत्रमुत्सर्गापवादसूत्रं च। तत्रौत्सर्गिकमापवादिकं चोक्तम्। उत्सर्गापवादसूत्रं पुनरिदम्-नो कप्पइ निग्गंथाण वा निग्गंथीण वा अन्नमन्नस्स मोयं आदित्तए वा आयमित्तए वा अन्नत्थागाढेहिं रोगायंकेहिं। अथवा चतुर्विधं सूत्रम्-औत्सर्गिकमापवादिकमुत्सर्गापवादमपवादौत्सर्गिकम्। तत्राऽऽद्यानि त्रीण्युक्तानि चतुर्थमपवादौत्सर्गिकमिदम्, यथाचम्मं मंसं च दलाहि मा अट्ठियाणि॥ आह उत्सर्ग इत्यपवाद इति वा कोऽर्थः? उच्यते-

[भा.३१९] उज्ञयसग्गुस्सग्गो, अववाओ तस्स चेव पडिवक्खो।
उस्सग्गा विनिवतियं, धरेइ सालंबमववाओ॥

वृ- उद्यतः सर्ग-विहार उत्सर्गः। 'तस्य च' उत्सर्गस्य प्रतिपक्षोऽपवादः। कथम्? इति

Jain Education International For Private & Personal Use Only www.jainelibrary.org

चेद् अत आह-उत्सर्गाद् अध्वा-ऽवमौदर्यादिषु 'विनिपतितं' प्रच्युतं ज्ञानादिसालम्बमपवादो धारयति ॥

ननु स उत्सर्गादपवादं गतः सन् कथं न भग्नव्रतो भवति ? उच्यते-

[भा.३२०] धावंतो उव्वाओ, मग्गन्नू किं न गच्छइ कमेणं ।
किं वा मउई किरिया, न कीरये असहुओ तिक्खं ॥

वृ- सर्वोऽप्यस्माकं प्रयासो मोक्षसाधननिमित्तम्, स च मोक्षं तथा साधयति नेतरथा । दृष्टान्तोऽयम्-यथा कोऽपि पाटलिपुत्रं गच्छन् धावन् 'उद्वातः' श्रान्तो भवति तदा किं न 'क्रमेण' स्वभावगत्य मार्गज्ञः सन् गच्छति ? गच्छत्येवेति भावः, केवलं चिरेण तत् पाटलिपुत्रमवाप्नोति, यदि पुनः श्रान्तोऽपि धावति तदा अपान्तराल एव म्रियते; एवमत्राप्यध्वादौ तादृशे कार्येऽपवादमप्रतिपद्यमानो विनश्यति । किं वा रोगिणस्तीक्ष्णां क्रियामसहमानस्य मृद्वी क्रिया न क्रियते ? क्रियत एवेत्यर्थः । यथैतद् एवमत्राप्युत्सर्गात् परिभ्रष्टस्यापवादगमनम् ॥

ननु किमुत्सर्गादपवादप्रसिद्धि ? उतापवादादुत्सर्गस्य ? तत आह-

[भा.३२१] उन्नयमविक्ख निन्नस्स पसिद्धी उन्नयस्स निन्नाओ ।
इय अन्नुन्नपसिद्धा, उस्सग्गऽववायमो तुल्ला ॥

वृ- यथोन्नतमपेक्ष्य निम्नस्य प्रसिद्धि निम्नाच्चोन्नतस्य प्रसिद्धि 'इति' एवम् 'अन्योऽन्यप्रसिद्धौ' उत्सर्गादपवादोऽपवादादुत्सर्ग प्रसिद्ध इति द्वावप्युत्सर्गा-ऽपवादौ तुल्यौ ॥

तदेवमुत्सर्गापवादद्वारमुक्तम् ॥ इदानीमल्पद्वारमुच्यते । शिष्यः पृच्छति-भगवन् ! किमुत्सर्गा अल्पे ? उतापवादाः ? उच्यते-तुल्याः । यत आह-

[भा.३२२] जावइया उस्सग्गा, तावइया चेव हुंति अववाया ।
जावइया अववाया, उस्सग्गा तत्तिया चेव ॥

वृ- यावन्त उत्सर्गास्तावन्तोऽपवादाः, यावन्तोऽपवादास्तावन्त उत्सर्गा । कथम् ? इति चेद् उच्यते-सर्वस्यापि प्रतिषेधस्यानुज्ञाभवाद् द्वयेऽपि तुल्याः ॥

सम्प्रति "सेय-बलवंते" इति द्वारद्वयं व्याचिख्यासुराह-

[भा.३२३] सट्ठाणे सट्ठाणे, सेया बलिणो य हुंति खलु एए ।
सट्ठाण-परट्ठाणा, य हुंति वत्थूतो निप्फन्ना ॥

वृ- शिष्यः पृच्छति-किमुत्सर्ग श्रेयान् बलवाँश्च ? उतापवादः ? । सूरिराह-'एते खलु' उत्सर्गा अपवादाश्च स्वस्थाने स्वस्थाने श्रेयांसो बलिनश्च भवन्ति, परस्थाने परस्थानेऽश्रेयांसो दुर्बलाश्च । अथ किं स्वस्थानम् ? किं वा परस्थानम् ? अत आह-स्वस्थान-परस्थाने वस्तुतो निष्पन्ने ॥ अथ वस्त्वेव न जानामि, किं तद् वस्तु ? इति उच्यते-पुरुषो वस्तु। तथा चाह-

[भा.३२४] संथरओ सट्ठाणं, उस्सग्गो असहुणो परट्ठाणं ।
इय सट्ठाण परं वा, न होइ वत्थू विना किंचि ॥

वृ- 'संस्तरतः' निस्तरत उत्सर्ग स्वस्थानम् अपवादः परस्थानम्, 'असहस्य' असमर्थस्य-यः संस्तरीतुं न शक्नोति तस्यापवादः स्वस्थानमुत्सर्ग परस्थानमिति। एवममुना प्रकारेण पुरुषलक्षणं वस्तु विना न किञ्चत् स्वस्थानं परस्थानं वा, किन्तु पुरुषो वस्तु संस्तरति न वेति अतः पुरुषात्

Jain Education International For Private & Personal Use Only www.jainelibrary.org

स्वस्थानं परस्थानं वा निष्पद्यते। तत उक्तं प्राक् "स्वस्थान-परस्थाने वस्तुतो भवतो निष्पन्ने"

गतं सूत्रद्वारम्। अधुना पदद्वारमाह-

[भा.३२५] नाम निवाउवसग्गं, अक्खाइय मिस्सयं च नायव्वं।
पंचविहं होइ पयं, लक्खणकारेहिं निद्दिट्ठं ॥

वृ- 'पञ्चविधं' पञ्चप्रकारं पदं 'लक्षणकारैः' पदलक्षणविद्भिः 'निर्दिष्टम्' आख्यातम्। तद्यथा-अश्व इति नामिकम्, खलु इति नैपातिकम्, परि इत्यौपसर्गिकम्, पचति इत्याख्यातिकम्, संयत इति मिश्रम् ॥ उक्तं पदम्। अधुना पदार्थद्वारमाह-

[भा.३२६] होइ पयत्थो चउहा, सामासिय तद्धिओ य धाउकओ।
नेरुत्तिओ चउत्थो, तिण्ह पयाणं पुरिल्लाणं ॥

वृ- 'त्रयाणां पूर्वाणां पदानां' नाम-निपातौपसर्गिकाणां चतुर्विधः पदार्थो भवति। तद्यथा-सामासिकः तद्धितो धातुकृतो नैरुक्तश्च चतुर्थः। तत्र सामासिकः सप्तधा-

दंदे य बहुव्वीही, कम्मधारय दिगूयए चेव।
तप्पुरिस अव्वईभावे, एगसेसे य सत्तमे ॥

तत्र द्वन्द्वो यथा-दन्ताश्च औष्ठौ च दन्तोष्ठौ। बहुव्रीहिर्यथा-फुल्ला इमम्मि गिरिम्मि कुडय-कयम्बा सो इमो गिरी फुल्लकुडय-कयंबो। कर्म्मधारयः-श्वेतः पटः श्वेतपटः। द्विगुः-त्रीणि मधुराणि त्रिमधुरम्। तत्पुरुषो-वने हस्ती वनहस्ती। अव्ययीभावः-गङ्गाया समीपं उपगङ्गम्। एकशेषो यथा-पुरुषश्च पुरुषश्च पुरुषश्च पुरुषाः, एवं वृक्षा इत्यादि ॥

उक्तः सामासिकः। सम्प्रति तद्धित उच्यते-सोऽष्टप्रकारः। उक्तञ्च—

कम्मे सिप्पे सिलोगे य, संजोग-समीवओ य संजूहे।
ईसरियाऽवच्चेण य, तद्धियअत्थो उ अट्ठविहो ॥

तत्र कर्मतो यथा-तृणहारकः। शिल्पतो यथा-तन्तुवायः। 'श्लोकतः' श्लाघातो यथा-श्रमणः संयत इत्यादि। संयोगतो यथा-राज्ञः श्वसुरः। समीपे यथा-गिरिसमीपे नगरम्। संव्यूहतो यथा-मलयवतीकार इत्यादि। ऐश्वर्यतो यथा-राजा युवराज इत्यादि। अपत्यतः-तीर्थकरमाता चक्रवर्त्तिमाता इत्यादि ॥ उक्तस्तद्धितः। सम्प्रति धातुकृत उच्यते-भू सत्तायाम् परस्मैभाषा इत्यादि। नैरुक्तः-मह्यां शेते महिष इत्यादि ॥ आद्यानां त्रयाणां पदानामेष पदार्थः।

सम्प्रत्याख्यातिकपदस्य मिश्रपदस्य च पदार्थमाह-

[भा.३२७] कारगकओ चउत्थे, मिस्सपदे मिस्सओ चउत्थो उ।
सामासिओ सत्तविहो, हवइ पयत्थो उ नायव्वो ॥

वृ- 'चतुर्थे' आख्यातिके पदे पदार्थ 'कारककृतः' क्रियाकृतः। मिश्रपदे मिश्रपदार्थः। तत्र यः सामासिकः पदार्थ स सप्तविधो ज्ञातव्यः, स च प्रागेवोपदर्शितः ॥ उक्तः पदार्थः।

इदानीमाक्षेपं प्रसिद्धिं चाह-

[भा.३२८] अक्खेवो सुत्तदोसा, पुच्छा वा तत्तो निन्नयपसिद्धी।
आयपया दो सुत्ते, उवरिल्ला तिन्नि अत्थम्मि ॥

वृ-आक्षेपो नाम यत् सूत्रदोषा उच्यन्ते पृच्छा वा क्रियते। 'ततः' तदनन्तरं 'निर्णयप्रसिद्धिः

Jain Education International For Private & Personal Use Only www.jainelibrary.org

प्रत्यवस्थानम् । एतेषु च सूत्र-पदादिषु पञ्चसु मध्ये आद्ये द्वे पदे सूत्रेऽन्तर्भवतः, 'उपरितनानि त्रीणि' पदार्थप्रभृतीनि पदानि अर्थे भवन्ति ॥ अथ पदस्य किं परिमाणम् ? अत आह-

[भा.३२९] अत्थवसा हवइ पयं, अत्थो इच्छियवसेण विन्नेओ ।
इच्छा य पकरणवसा, पगरणओ निच्छओ सत्थे ॥

वृ- यत्रार्थोपलब्धिस्तत् पदम्, अतोऽर्थवशाद्भवति पदम् । अर्थस्य किं परिमाणम् ? अत आह-अर्थ ईप्सितवशेन विज्ञेयः, इच्छावशेनेत्यर्थः । इच्छायाः किं प्रमाणम् ? अत आह-इच्छा च 'प्रकरणवशात्' प्रकरणानुरोधत इच्छायाः परिमाणम् । प्रकरणस्य च निश्चयः 'शास्त्रे शास्त्रानुसारतः ॥ गतं लक्षणद्वारम् । एवंगुणयुक्तस्य सूत्रस्य कोऽर्ह ? इत्यनेन सम्बन्धेन तदर्हद्वारमापतितम् । तत्र सोऽर्ह उण्डिकादिदृष्टान्तस्योपनयभूतस्तत आह-

[भा.३३०] उंडिय भूमी पेढिय, पुरिसग्गहणं तु पढमओ काउं ।
एवं परिक्खियम्मी, दायव्वं वा न वा पुरिसे ॥

वृ- नवे नगरे निवेश्यमाने प्रथमतः 'उण्डिका' या यस्य योग्या भूमिस्तस्य तत्प्रदानार्थं मुद्रा पात्यते, ततो भूमिशोधनम्, तदनन्तरं पीठिका । एवमत्रापि प्रथमतः पुरुषग्रहणं कृत्वा तदनन्तरं परीक्षा कर्त्तव्या-किमयमपरिणामकः ? अतिपरिणामकः ? परिणामको वा ? इति । एवं पुरुषे परीक्षिते दातव्यं न वा? अपरिणामिकेऽतिपरिणामिके वा न दातव्यं परिणामिके दातव्यमिति गाथासङ्क्षेपार्थः ॥ साम्प्रतमेनामेव विवरीषुराह-

[भा.३३१] अभिनवनगरनिवेसे, समभूमिविरेयणऽक्खरविहन्नू ।
पाडेइ उंडियाओ, जा जस्स सठाणसोहणया ॥

वृ-अभिनवे नगरे निवेश्यमाने प्रथमतो भूमि परीक्ष्यते । परीक्ष्य च तस्याः समभूमिविरेचनं विधीयते । तदनन्तरमक्षरविधिज्ञो या यस्य योग्या भूमिस्तस्य तस्याः प्रदानार्थं 'उण्डिकाः' अक्षरसहिता मुद्रिकाः पातयति । ततः स्वस्थानस्य शोधनता-शोधनम् ॥

[भा.३३२] खणणं कोट्टण ठवणं, पेढं पासाय रयण सुहवासो ।
इय संजम नगरुंडिय, लिंगं मिच्छत्तसोहणयं ॥

वृ- ततः स्वस्याः स्वस्या भूमेः खननम् । तदनन्तरं द्रुघणैरिष्टकाशकलानि प्रक्षिप्य तेषां कुट्टनम् । ततस्तस्योपरि इष्टकानां स्थापनम्, तच्च यावत् पीठम् । ततस्तस्य पीठकस्योपरि प्रासादकरणम् । तदनन्तरं तेषां प्रासादानां रत्नैरापूरणम् । ततः सुखेन वासः-परिवसनम् । एष दृष्टान्तः, अयमर्थोपनयः-भूमिग्रहणस्थानीयं पुरुषग्रहणम्, शुद्धं पुरुषं परीक्ष्य तस्य प्रव्रज्या-दानमित्यर्थः । ततः 'इति' एवमुक्तप्रकारेण नगरस्थानीये संयमे स्थाप्यते । तत उण्डिकास्थानीयं रजोहरणादि लिङ्गं दीयते । तदनन्तरं मिथ्यात्वस्याज्ञानस्य च कचवरस्थानीयस्य शोधनम् ॥

[भा.३३३] वय इट्टगठवणनिभा, पेढं पुन होइ जाव सूयगडं ।
पासाओ जहि पगयं, रयणनिभा हुंति अत्थपया ॥

वृ- ततः शोधयित्वा मिथ्यात्वं समूलमुत्खत्य स्थिरीकरणनिमित्तं सम्यक्त्वद्रुघणैर्यच्छेष-मवतिष्ठते मिथ्यात्वपुद्गलात्मकं तत् कुट्टयित्वा भस्मच्छन्नाग्निमिव कृत्वा तत उपरि इष्टकास्थापननिभानि व्रतानि दीयन्ते । तत आवश्यकमादिं कृत्वा यावत् सूत्रकृतं तावत् पीठं

Jain Education International For Private & Personal Use Only www.jainelibrary.org

भवति । ततो यकाभ्यां प्रकृतं तौ कल्प-व्यवहारौ प्रासादस्थानीयौ दीयेते । तत्रार्थपदानि यानि तानि रत्ननिभानि ।। गतं तदर्हद्वारम् । अधुना पर्षद्वारम्, यस्याः कल्प-व्यवहारौ दीयेते सा शैलघनादिभिर्दृष्टान्तैः परीक्षितव्येति तानेव दृष्टान्तानाह-

[भा.३३४] सेलघण कुडग चालिणि, परिपूमग हंस महिस मेसे य ।
मसग जलूग बिराली, जाहग गो मेरि आभीरी ।।

वृ- प्रथमः शैलघनेन दृष्टान्तः । तत्रशैल इति मुद्गप्रमाणः पाषाणो मुद्गशैलः, घनः पुष्करसंवर्त्तको महामेघः । तद्द ष्टान्तभावना एवम्- मुग्गसेलस्स पुक्खलसंवट्टगस्स य महामेहस्स विसंवाओ । मुद्गसेलगो भणइ-जइ तुमं मम तिलतुसमित्तमवि सक्के सि खंडिउं तो सच्चं तुमं पोक्खलसंवट्टउ त्ति । सो पडिभणइ-जइ तुमं एगधारानिवायमवि सक्के सि सहिउं तो सच्चं तुमं मुग्गसेलो त्ति । एवं पडिभणित्ता मुट्ठिपमाणमित्ताहिं धाराहिं वरिसिउं पयट्टो । ततो सत्तरत्तं वरिसित्ता चिंतेइ-सो विराओ होज्जा । तओ ट्ठिओ । तओ मुग्गसेलो चिगचिगंतो अच्छइ । ताहे सो मुग्गसेलओ तं गज्जइ आगारेइ य, जहा-जं तं भणियं तं कहिं गयं ? ति । मेहो लज्जिओ विलक्खीभूओ। एवं सेलसमं सिस्समेगो आयरिओ गाहेउं न सक्को । तओ अन्नो भणइ-अहं गाहेमि । सो वि किलिस्सित्ता निव्विज्जइ, न सक्कइ गाहेउं ।। एतदेवाह-

[भा.३३५] उल्लेऊण न सक्का, गज्जइ इय मुग्गसेलओ रन्ने ।
तं संवट्टगमेहो, सोउं तस्सोवरिं पडइ ।।

वृ- आर्द्रीकर्तुं न शक्यः 'इति' एवं मुद्गशैलकोऽरण्ये गर्जयति । 'तच्च' मुद्गशैलवचनं श्रुत्वा संवर्त्तकमेघस्तस्योपरि 'पतति' सप्तरात्रं वर्षतीत्यर्थः ।।

[भा.३३६] रविउ त्ति ठिओ मेहो, उल्लो य न व त्ति गज्जइ य सेलो ।
सेलसमं गाहिस्सं, निव्विज्जइ गाहगो एवं ।।

वृ-तदनन्तरं प्रावित इति विचिन्त्य स्थितो मेघः । आर्द्रो नवा ? 'इति' एवं 'शैलः' मुद्गशैलो गर्जयति । एष दृष्टान्तः, उपनयमाह-शैलसमं ग्राहयिष्यामि इति कृतप्रतिज्ञः 'एवं' पुष्करावर्त्तकदृष्टान्तप्रकारेण ग्राहको निर्विद्यते ।।

न केवलं निर्विद्यते किञ्चायमपरो दोषः-

[भा.३३७] आयरिए सुत्तम्मि य, परिवाओ सुत्त-अत्थपलिमंथो ।
अन्नेसिं पि य हाणी, पुट्ठा वि न दुद्धदा वंझा ।।

वृ-आचार्ये परिवादो यथा-अयमयोग्यः शिक्षापयितुम्, कथमन्यथा ईदृशं शिक्षयति ? । सूत्रपरिवादो यथा-नूनमेताद्दशमेवेदं सूत्रं यदेताद्दशः पठति । सूत्रा-ऽर्थपलिमन्त एवम्-यावत् स ग्राह्यते तावदात्मना न गुणयति न चार्थं परिभावयति ततः स्वतः सूत्रा-ऽर्थव्याघातः । तथा 'अन्येषामपि' श्रोतॄणां सूत्रा-ऽर्थहानि, निरन्तरं तच्छिक्षणे व्यापृतत्वात् । न च तस्यतथाशिक्षणे कश्चिदुपकारः, केवलं सुबहुरपि तत्र क्लेशः क्रियमाणो निरर्थकः । एतदेव प्रतिवस्तूपमया दर्शयति-स्पृष्टाऽपि बन्ध्या गौर्न दुग्धदा भवति, एवं सोऽपि शिष्यमाणो न किञ्चिदवगाहते ।।

शैलघनप्रतिपक्षे च शिष्ये कृष्णाभूमकल्पे दातव्यम् । तथा चाह-

[भा.३३८] वुट्ठे वि दोणमेहे, न कण्हभोमाउ लोट्टए उदयं ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

गहण-धरणासमत्थे, इय देयमछित्तिकारिम्मि ॥

वृ- कृष्णभूमे प्रदेशे द्रोणमेघेऽपि वृष्टे यद् यत्र पतत्युदकं तत्तथैव प्रविशति, न पुनस्तस्मात् कृष्णभूमादन्यत्र लोटते। 'इति' एवं ग्रहण-धारणासमर्थे अयवच्छित्तिकारिणि देयं सूत्रम् ॥

अधुना कुटद्वारमाह-

[भा.३३९] भाविय इयरे य कुडा, पसत्थ-अपसत्थभाविया दुविहा।
पुप्फाईहि पसत्था, सुर-तिल्लाईहि अपसत्था ॥

वृ- 'कुटाः' घटाः। ते द्विधा-भाविता इतरे च। तत्र ये भावितास्ते द्विधा-प्रशस्तभाविता अप्रशस्तभाविताश्च। तत्र ये पुष्पादिभिर्भावितास्ते प्रशस्तभाविताः। सुरा-तैलादिभिर्भाविताः 'अप्रशस्ताः' अप्रशस्तभाविताः। पुष्पादिभिरित्यत्राऽऽदिग्रहणात् कर्पूरादिपरिग्रहः। सुरातैलादिभिरित्यत्र वशादिग्रहणम् ॥

[भा.३४०] वम्मा य अवम्मा वि य, पसत्थवम्मा य हुंति अग्गिज्झा।
अपसत्थअवम्मा वि य, तप्पडिवक्खा भवे गिज्झा ॥

वृ- तत्र ये प्रशस्तभावितास्ते द्विविधाः-वाम्या अवाम्याश्च। वाम्या नाम ये तं भावं च्यावयितुं शक्याः, इतरे अवाम्याः। येऽप्यप्रशस्तभावितास्तेऽपि द्विधा-वाम्या अवाम्याश्च। तत्र ये प्रशस्त-भाविता वाम्या ये चाप्रशस्तभाविता अवाम्यास्तेऽग्राह्याः। ये तु 'तत्प्रतिपक्षाः' प्रशस्तभाविता अवाम्या ये चाप्रशस्तभाविता वाम्यास्ते ग्राह्याः। एते द्रव्यकुटाः। एवं भावकुटाः शिष्या अपि परिभावनीयाः ॥ तथा चाह-

[भा.३४१] कुप्पवयण-ओसन्नेहि भाविया एवमेव भावकुडा।
संविग्गेह पसत्था, वम्माऽवम्मा य तह चेव ॥

वृ- 'एवमेव' अनेनैव द्रव्यकुटदृष्टान्तप्रकारेण भावकुटा अपि द्रष्टव्याः। तद्यथा-भाविता अभाविताश्च। तत्र भाविता द्विविधाः-प्रशस्तभविता अप्रशस्तभाविताश्च। तत्र ये कुप्रवचनैरवसन्नैश्च भावितास्तेऽप्रशस्तभाविताः, ये संविग्नैर्भावितास्ते 'प्रशस्ताः' प्रशस्तभाविताः। एकैके द्विविधाः-वाम्या अवाम्याश्च। तत्र ये प्रशस्तभाविता वाम्या ये चाप्रशस्तभाविता अवाम्या एते अग्राह्याः। ये च प्रशस्तभाविता अवाम्या ये चाप्रशस्तभाविता वाम्या एते द्वयेऽपि ग्राह्याः। ये अवाम्यास्ते सुचिरेणापि कालेन तं भावं न परित्यज्ति, ततः पश्चात्ते निश्रापदं लब्ध्वा पापपरा जायन्ते। ग्राह्या नाम कथनयोग्याः, अग्राह्या अकथनीयशास्त्राः

[भा.३४२] जे पुन अभाविया ते, चउव्विहा अहविमो गमो अन्नो।
छिड्डकुड खड बोडे, सगले य परूवणा तेसिं ॥

वृ- ये पुनस्तैलादिभिरमावितास्ते निर्विवादं परिग्राह्याः। एतदेकेषामाचार्याणां ततेन भणितम्। अथवाऽयमन्यो गमः, किमुक्तं भवति ? अन्ये आचार्या यदा कुटद्वारं प्राप्तं भवति तदा ते एवं प्ररूपयन्ति-द्विविधाः कुटाः-द्रव्यकुटा भावकुटाश्च। द्रव्यकटाश्चतुर्विधाः, तद्यथा-छिद्रकुटः खण्डकुटो बोडकुटः सकलकुटः। 'तेषां' चतुर्णामपि प्ररूपणा कर्त्तव्या, सा चैवम्-छिद्रकुटो नाम यस्याधश्छिद्रम्, तत्र यत् प्रक्षिप्यते तत् सर्वं गलति। खण्डकुटो नाम यस्य कर्णौ बोटौ, स पानीयमूनं गृह्णाति। बोटकुटो यस्यैकपार्श्वे कपालभेदः, तत्र स्तोकं तिष्ठति। सकलो नाम सम्पूर्णस्तत्तर

Jain Education International For Private & Personal Use Only www.jainelibrary.org

यत् क्षिप्यते तत् सर्वं तिष्ठति । एवं शिष्या अपि चत्वार भवन्ति, तद्यथा-छिद्रकुटसमानः खण्डकुटसमानो भिन्नकुटसमानः सकलकुटसमानश्च । एते भावकुटाः । छिद्रकुटसमानो यावत् कथयते तावत् स्मरति, उत्थितः किमपि न स्मरति । खण्डकुटसमान ऊनं गृह्णाति । भिन्नकुटसमानः स्तोकम् । सकलकुटसमानः समस्तम् । तथा चास्या एव गाथाया इयं व्याख्यानभूता गाथा-

जे पुन अभाविया ते, वि गज्झ चउहा कुडा व होंतऽन्ने ।
छिड्डकुड बोड खंडे, सगले य परूवणा तेसिं ।।

ततो नाधिकृतव्याख्यानविरोधः । एतेषां सकलकुटसदृशं वर्जयित्वा शेषाणां ये मुदगशैलसमानस्य दोषास्ते द्रष्टव्याः । सकलकुटसमानस्य त्वव्यवच्छित्तिकारित्वात् कथनीयम्।। सम्प्रति चालनीदृष्टान्तो यथा-चालिन्यामुदकं प्रक्षिप्यमाणमेवाधस्तादपगच्छति । एवं यस्यैकेन कर्णेन प्रविशति द्वितीयेन निर्गच्छति स चालनीसमानस्तस्यापि न कथनीयम्, मुदगशैलस्येवा-नेकदोषप्रसङ्गात् ।।

[भा.३४३] सेले य छिद्द चालिणि, मिहो कहा सोउ उट्ठियाणं तु ।
छिड्डाऽऽह तत्थ विट्ठो, सरिंसु सुमरामि नेयाणिं ।।

वृ-तेषां मुद्गशैल-च्छिद्रकुटःचालनीसमानानां शिष्याणां व्याख्यां श्रुत्वोत्थितानामेवंरूपा मिथः कथा प्रावर्त्तत-कथयत आर्या ! केन किमवधारितम् ? । तत्र च्छिद्रकुटसमानो ब्रूते-यावत् तत्र मण्डल्यामुपविष्ट आसीत् (आसं) तावत् स्मृतवान्, उत्थितस्य सर्वं विस्मृतम् ।।

[भा.३४४] एगेण विसइ बीएण नीइ कन्नेण चालिणी आह ।
धन्न त्थ आह सेलो, जं पविसइ नीइ वा तुज्झं ।।

वृ-चालनीसमान आह-ममैकेन कर्णेन 'विशति' प्रविशति द्वितीयेन निर्गच्छति । शैलसमानः प्राह-धन्याः स्थ यूयम् यद् युष्माकं कर्णेषु प्रविशति निर्गच्छति च, मम तु मन्दभागस्य मूलत एव न प्रविशति ।। चालनीप्रतिपक्षस्य कथयितव्यम्, यत आह-

[भा.३४५/१]तावसखउरकढिणयं, चालणिपडिवक्खु न सवइ दवं पि ।

वृ-चालिन्याः प्रतिपक्षस्तापसस्य भाजनं खउरम्, बिल्वरस-भल्लातकरसाभ्यां लिप्तत्वात् 'कठिनम्' अतिशयेन घनं तद् 'द्रवमपि' पानीयमपि, आस्तामन्यदित्यपिशब्दार्थ, न श्रवति, तादृशस्याव्यवच्छित्तिकारित्वाद् दातव्यम् ।। अधुना परिपूणकदृष्टान्तः-

[भा.३४५/२] परिपूणगं पिव गुणा, गलंति दोसा य चिट्ठंति ।।

वृ- परिपूणको नाम येन घृतपूर्णयोग्यं पानं गाल्यते, तत्र सारो गलति कल्पषं तिष्ठति, एवं यस्य गुणा गलन्ति दोषास्तिष्ठन्ति स परिपूणकसमानः, तस्मिन्न कथनीयम्, शैलसमानोक्त-दोषप्रसङ्गात् ।। आह किं भट्टारकवचनेऽपि दोषाः सन्ति येनोच्यते 'दोषस्तिष्ठन्ति' इति ? तत्राह-

[भा.३४६] सव्वन्नुप्पामन्ना, दोसा उ न हुंति जिनमये के वि ।
जं अनुवउत्तकहणं, अपत्तमासज्ज व हवंति ।।

वृ- सर्वज्ञप्रामाण्यान्न केचिद् जिनमते दोषा विद्यन्ते । उक्तञ्च-

वीतरागा हि सर्वज्ञाः, न मिथ्या ब्रुवते वचः ।
यस्मात् तस्माद् वचस्तेषां, तथ्यं भूतार्थदर्शनम् ।।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

केवलं यद् अनुपयुक्तस्याचार्यस्य कथनम् अथवा परः श्रोता अपात्रं तद् आसाद्य गुणा अपि सर्पमुखे प्रविष्टं दुग्धमिव दोषीभवन्ति ॥ सम्प्रति हंसदृष्टान्तभावनामाह-

[भा.३४७]　　अंबत्तणेन जीहाइ कूइया होइ खीरमुदगम्मि ।
हंसो मोत्तूण जलं, आपियइ पयं तह सुसीसो ॥

वृ- परिपूणकप्रतिपक्षो हंसः । तथाहि-हंसस्य जिह्वा अम्ला, ततो जिह्वाया अम्लत्वेन तत्सम्पर्कतः क्षीरमुदते कूचिका भवन्ति, ततो जलं मुक्त्वा यत् 'पयः' क्षीरं कूचिकाभूतं तद् आपिबति । एवं यो गुणान् गृह्णाति दोषान् त्यजति तस्य हंससमानस्य दातव्यम् ॥

महिषदृष्टान्तमाह-

[भा.३४८]सयमवि न पियइ महिसो, न य जूहं पिबइ लोलियं उदयं ।
विग्गह-विकहाहि तहा, अथक्क पुच्छाहि य कुसीसो ॥

वृ-यथा महिषस्तृषापीडितः पानीयं पास्यामीति बुध्या कश्चिद् ह्रदमवतीर्णः । स प्रथममेव प्रविष्टः सन् सर्वमुदकं लोलयति-कलुषयति तावद् यावत् कर्दमीभवति । तच्च तथाकर्दमीभूतं नात्मना पिबति नापि यूथं पिबति । एवं यः शिष्यः प्रारब्धे व्याख्याने विग्रहेण-यथा अमुको भिक्षायां न गच्छति अमुक एतादृशस्तादृश इति विकथाभिर्नानाप्रकाराभि यदि वा 'अथक्क पृच्छाभि' अप्रस्तावपृच्छाभिराचार्यं तथा परिश्रमयति यथा न तस्य कथयति नाप्यन्यस्य गणस्य स एष कुशिष्यस्तस्मै न कथनीयम् ॥ यस्तु महिषसदृशप्रतिपक्षो मेषसदृशस्तस्मै कथनीयम् । तथा चाह-

[भा.३४९] अवि गोपयम्मि वि पिबे, सुढिओ तनुयत्तणेण तुंडस्स ।
न करेइ कलुस तोयं, मेसो एवं सुसीसो वि ॥

वृ- 'मेषः' एडकः सः 'अपि' सम्भावनायां गोष्पदेऽपि 'तोयं' पानीयं जानुभ्यामधो निपत्य "सुढिओ"त्ति सुष्ठादृतो भूत्वा 'तुण्डस्य' वदनस्य तनुत्वेन पिबति, न च तथा पिबन् तत् तोयं कलुषं करोति । एवं यः सुशिष्य आचार्यमनुत्तेजयन् गृह्णाति स मेषसदृश इति तस्मै दातव्यम् ॥

सम्प्रति मसकदृष्टान्तमाह-

[भा.३५०/१]मसगो व्व तुदं जच्चाइएहि निच्छुब्भई कुसीसो वि ।

वृ-यथा मसगो लगन्नेव दुःखापयति, ततः पश्चादुड्डाप्यते । एवं यः शिष्यो जात्यादिभिस्तुदति-हीलयति स तुदन् निष्काश्यते, तादृशस्य दानेऽसङ्खडादिदोषप्रसङ्गात् ।

[भा.३५०/२]जलुगा व अदूमिंतो, पियइ सुसीसो वि सुयनाणं ॥

वृ-मसकप्रतिपक्षो जलौका, यथा सा शरीरे लग्ना अदुःखापयन्ती रुधिरमापिबति, उकतश्च-
दंसो तिक्खनिवाएण, अफअफणो वहमिच्छई ।
जलुगा वि तदेवत्थं, मद्दवेणोपसप्पई ॥

एवं यः शिष्य आचार्यम् 'अदूनयन्' अदुःखापयन् श्रुतज्ञानमापिबति तस्मिन् सुशिष्ये दातव्यम् ॥ अधुना बिडालीदृष्टान्तमाह-

[भा.३५१]　　छड्डेउं भूमीए, खीरं किल पिवइ मुद्ध मज्जारी ।
परिसुड्डियाण पासे, सिक्खइ एवं विनयभंसी ॥

वृ- 'मुग्घा' अपण्डिता मार्जारी किल क्षीरं भूमौ छर्दयित्वा पिबति । एवं यो गौरवमात्मनो

Jain Education International　　For Private & Personal Use Only　　www.jainelibrary.org

धारयन् मण्डल्यां न शृणोति, किन्तु यदा पर्षदः श्रोतार उत्थिता भवन्ति तदा तेषामनुभाषमाणानां पार्श्वे उपविश्य शृणोति तस्मै न तादव्यम् ।। अधुना जाहकदृष्टान्तमाह-

[भा.३५२] पाउं थोवं थोवं, खीरं पासाणि जाहगो लिहइ ।
एमेव जियं काउं, पुच्छइ मइमं न खेएइ ।।

वृ- जाहकः स्तोकं स्तोकं क्षीरं पीत्वा पार्श्वाणि लेढि । एवमेव यो मतिमान् पूर्वगृहीतं जितं कृत्वा पृच्छति न पुनः खेदयति गुरुम्, तस्मिन् जाहकसदृशे दातव्यम् ।। गोदृष्टान्तमाह-

[भा.३५३] अन्नो दुज्झिहि कल्लं, निरत्थयं किं वहामि से चारिं ।
चउचरणगवी य मया, अवण्ण हानी य मरुयाणं ।।

[भा.३५४] मा ने हुज्ज अवन्नो, गोवज्झा मा पुणो य न दलिज्जा ।
वयमवि दोज्झामो पुन, अनुग्गहो अन्नदूढे वि ।।

[भा.३५५] सीसा पडिच्छगाणं, भरो त्ति ते वि य हु सीसगभरो त्ति ।
न करिंति सुत्तहाणी, अन्नत्थ वि दुल्लहं तेंसिं ।।

वृ- एकेनाविरतेन चतुर्णां चरणानां-चतुर्वेदब्राह्मणानां गौर्दत्ता । ते तां दिने दिने वारकेण दुहन्ति । तत्र यदा यस्य वारको भवति स तदा चिन्तयति-सुपोषितामप्येनां कल्येऽन्यो धोक्ष्यति, ततः पोषणफलं नैवाहमुपजीविष्यामीति किमिति निरर्थिकामस्य (मस्याः) चारिं वहामि ? । एवं चिन्तयित्वा दुग्ध्वा तां मुञ्चति । तत एवं सा चारिरहिता मृता । तेषां च मरुकाणामवर्णो जातः, यथा-मी गोहन्तार इति । पुनर्दानहानिश्च जाता, मारयन्तीति कृत्वा न कोऽपि तेभ्यः पुनर्गोदानं ददातीत्यर्थः । एवं गोस्थानीया आचार्या, धिग्जातिस्थानीयाः शिष्याः, ते चिन्तयन्ति-वयं ध्रुवाः, प्रतीच्छकाः सूत्रार्थं गृहीत्वा गन्तुकामाः, ततस्ते करिष्यन्ति प्रत्युपेक्षण-भिक्षा-पादधावनानि । प्रतीच्छका अपि चिन्तयन्ति-एष शिष्याणां भारः, वयं सत्रा-ऽर्थौ गृह्णीमः । एवं शिष्यैः प्रतीच्छकैश्चाचार्यस्याक्रियमाणे स सर्वमात्मनाकरोति । ततो वातिक-पैत्तिक-श्लेष्मिकै रोगातङ्कैर्गृहीतः किं ददातु ?, एवं सूत्रा-ऽर्थहानिर्जाता । अन्यत्रापि च गच्छान्तरे तेषां श्रुतज्ञानं दुर्लभम् ।। तथैकेनाविरतेन चतुर्णां चतुर्वेदानामेका गौर्दत्ता । तत्र यदा यस्य वारको भवति स तदा धार्य भूयो गां न दद्यात्, अन्यच्च वयं पुनरपि स्ववारके धोक्ष्यामः, अन्यदुग्धेऽपि च मम महाननुग्रहः । एवं चिन्तयित्वा प्रभूतं तृणपानीयं ददाति । ईदृशेष्वाचार्यभक्तिमत्सुदातव्यम् ।। सम्प्रति भेरीदृष्टान्तमाह-

[भा.३५६] कोमुइया संगाम्रियृया य दुब्भूइया य भेरीओ ।
कण्हस्स आसि तइया, असिवोवसमी चउत्थी उ ।।

वृ- बारवती नगरी । कण्हो वासुदेवो । तस्स तिण्णि भेरीतो-कोमुइया संगामया दुब्भूतिया य गोसीसचंदनमईयातो देवयापरिग्गहियातो । चउत्थी असिवोवसमणी, सा जत्थ तालिज्जइ तत्थ छम्मासे सव्वरोगा पसमंति जो तं सद्दं सुणति ।। अक्षरगमनिका-कृष्णस्य तदा तिस्रो भेर्य आसन्, तद्यथा-कौमुदिकी सङ्गामिकी दुर्भूतिका च । चतुर्थी अशिवोपशमनी ।। तस्या उत्पत्तिमाह-

[भा.३५७] सक्क पसंसा गुणगाहि केसवा नेमिवंद सुनदंता ।
आसरयणस्स हरणं, कुमारभंगे य पुययुद्धं ।।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

[भा.३५८] नेहि जितो मि त्ति अहं, असिवोवसमीए संपयाणं च ।
छम्मासिय घोसणया, पसमेति न जायए अन्नो ॥
[भा.३५९] आगंतु वाहिखोभो, महिड्ढि मोल्लेण कंथ डंडणया ।
अट्ठम आराहण अन्न भेरि अन्नस्स ठवणं च ॥

वृ- सक्को सभाए भणति-केसवा सव्वे गुणगाहिणो नीययुद्धं च न करेंति । तत्थ एगो देवो असद्दहंतो भणइ-अहं अगुणे गिण्हावेमि नीययुद्धं च कारेमि त्ति । कण्हस्स नेमिवंदगस्स सखंधवारस्स पट्ठिल्लियस्स अंतरा सुणहरूवं कसिणं दुब्भिगंधं मयल्लयं विउव्वियं । दंता से पंडरया अतीव सोभमाना विउव्विया । ताहे सो खंधावारो जाहे तं पएसं पत्तो ताहे उत्तरिज्जएहिं मुहं ठइत्ता अन्येन प्रदेशेन गया (गयो) । कण्हेणं पच्छा एंतेन पुच्छियं । सुणहो कुहिओ त्ति । ताहे सो तेन चेव पएसेण आगतो, मुह न चेव ठइयं, न वि य विरूवं कयं, एयं च पुणो भणियं-अहो ! सुणयस्स पंडुरा दंता सोहंति । जाहे न खुभितो ताहे पडिइंतस्स आसरयणमणेण अवहरियं । कहियं वासुदेवस्स। संबाइया कुमारा निग्गया । ते युद्धे भग्गा । ततो सयं वासुदेवो निग्गतो । दिट्ठो अनेन आसो निज्जंतो । भणितो अनेनं-किं आसं हरसि ? । देवो भणइ-अमुगो विज्जाहरो, जुद्धं मग्गामि । वासुदेवो भणइ-बाढं जुज्झामो । 'केरिसेणं ?'ति पुच्छितो भणति-पुएहिं । वासुदेवो भणति-नाहमेरिसेणं जुद्धेण जुज्झामि, पराजितो हं, नेहि आसं । ताहे देवो सरूवं काउं भणइ-सच्चं सक्को भासइ । कहियमणेण सव्वं । भणइ-वरं मग्गसु । वासुदेवो भणइ-मम असिवोवसमणिं भेरिं देह, जीए ताडियाए जत्थ सद्दो सुव्वइ तत्थ छम्मासे रोगायंको न भवइ, पुव्वुप्पण्णा खिप्पामेव उवसमंति। दिन्ना भेरी । गतो देवो ॥

अक्षरगमनिका-शक्रस्य स्वसभायां केशवानां प्रशंसा, यथा-गुणग्राहिणः केशवा इति, उपलक्षणमेतत्, नीचयुद्धाकारिणश्च । ततो नेमिवन्दनार्थं कृष्णे प्रचलितेऽन्तरा शुनो विकुर्वणम्, दन्ताश्च शोभनाः कृताः । कृष्णेन तथैव दन्ताः प्रशंसिताः । ततः प्रत्यागच्छतोऽश्वरत्नहरणम् । तत्र च शम्बप्रभृतीनां कुमाराणां भङ्गे स्वयं वासुदेवे युद्धार्थमुपस्थिते देवः पुतयुद्धमुक्तवान् । ततो वासुदेवो ब्रूते-नय अश्वम्, जितोऽहमस्मीति । ततः 'षण्मासिकी' षष्ठे षष्ठे मासे तस्या घोषणा । ततः पूर्वोत्पन्नो रोगः प्रशाम्यति, अन्यश्च षण्मासान् यावन्न जायते ॥

तत्थ अन्नदेसीओ महड्ढितो वाणिओ सीसवेयणाते गहिओ आगओ । तस्स वेज्जेणं गोसीसचंदनमुवइट्ठं । अन्नत्थ अलब्भमाणे रहस्सियं बहुमुल्लं दाउं ततो भेरीए खंडमेगं गहियं। तेन भेरीताडएणं तत्थऽण्णं खंडं लाइयं । एवमन्नन्नखंडप्पयाणेण तेन सा भेरी कंथा कया । पच्छा से तारिसो सद्दो न होइ, न य रोगा उवसमंति । ततो लोगस्स बहू रोगे जाणित्ता सद्दं च तारिसं असुणमाणेण कण्हेण भेरी जोयाविया जाव कंथा कया । तत्तो सो भेरिपालो सकुलो उच्छादितो। ततो पुनो वि अट्ठमेणं भत्तेणं तं देवं आराहित्ता अन्ना भेरी मग्गिया । लद्धा । अन्नो भेरीपालो ठवितो । सो आयरेण रक्खइ । एवं जो सीसो आलावए लद्धे समाणे अन्नं लोइयं लोउत्तरियं वा आलावगं लाएइ सो वि कंथं करेइ । तस्मात् तस्यापि न दातव्यम् ॥

अक्षरगमनिका-व्याधिना क्षोभो यस्यासौ व्याधिक्षोभः आगन्तुको महर्द्धिकः, तस्य मूल्येन भेरीखण्डप्रदानम् । एवमन्यान्यदाने सा कन्थाऽभवत् । ततो भेरीपालस्य दण्डनम् । अष्टमेन

Jain Education International For Private & Personal Use Only www.jainelibrary.org

देवस्याराधनम्। अन्यभेरीप्रदानम्। अन्यस्य भेरीपालस्य स्थापनम्। एवं सूत्रा-ऽर्थौ कन्थीकुर्वतो न दातव्यम् ॥ इदानीमाभीरीदृष्टान्तमाह-

[भा.३६०] मुक्कं तया अगहिए, दुपरिग्गहियं कयं तया कलहो।
पिट्टणय इयर विक्किय, गएसु चोरेहि ऊणऽग्घो ॥

[भा.३६१] ना निण्हव इय दाउं, उवजुंजिय देहि किं विचिंतेसि।
विच्चामेलणदाने, किलिस्ससी तं च हं चेव ॥

वृ- एगा आभीरी सगडाणि घयस्स भरित्ता भत्तारेण समं नगरं विक्क या गया अन्नेहिं आभीरेहिं घयविक्क एहिं समं। तत्थ सो आभीरो उवरिं विलग्गओ सगडस्स हेट्ठा आभीरी तीसे आभीरीए घयघडए पणामेति। तत्थ तेन नायं-गहितो । तीए नायं-न ताव मुंचति। ततो घडो पडित्ता भिन्नो। ताहे सा आभीरी भणति-तुमे अगहितो चेव मुक्को। आभीरो भणइ-तुमाए दुग्गहियं कयं। एवं तेसिं 'तुमं तुमं'ति भणंताणं कलहो जातो। पच्छा सो आभीरो सगडातो उयरित्ता निसट्ठं पिट्टित्ता। जं पि चिट्ठइ घयं तं पि छड्डियल्लयंतं तेसिं भंडंताणं सुणएहिं चट्टियं भूमीए वा पविट्ठं। ताव अन्नेहिं घयविक्क एहिं घयं विक्कीयं। ताहे ताइं पविक्कीयाइं। जाओ ऊणो अग्घो। तेसु य घयविक्कगेसु सगामं गएसु सायं एकल्लयाइं जायाइं चोरेहिं उच्छूढाइं ॥

अक्षरगमनिका-आभीरी ब्रूते-त्वयाऽगृहीते मुक्तम्। आभीरः प्राह-दुःपरिगृहीतं त्वया कृ तम्। एवं तयोर्विवदतोः कलहो जातः। आभीर्या पिट्टनम्। इतरेषु च विक्रायकेषु गतेषु चौरग्रहणं घृतस्य च ऊनोऽर्धः। एष दृष्टान्तः, अयमर्थोपनयः-एवं यः शिष्य आलापकं व्यत्याम्रेडयन् आचार्ये 'मा एवं भण' इत्युक्तो ब्रूते-त्वयैवैवमालापको दत्तः। आचार्य प्राह-नाहमेवं दत्तवान् किन्तु त्वया विनाशितः। स प्राह-मा निह्नुष्व, न वर्त्तते स्वयमेव दत्त्वाऽन्यथा वक्तुम्, अद्यापि न किमपि विनष्टम्, उपयुज्य देहि, माऽन्यद् विचिन्तय, व्यत्याम्रेडनेन हि दाने त्वं चाहं च क्लिश्यावहे इति। एवं यो निष्ठुरं वदति कलहं वा कुरुते तस्मै न दातव्यम् ॥

बिइया आभीरी तहेव नगरं गया। तहेव घयघडो भिन्नो। ताहे आभीरी भणइ-न तुमं दोसो, मम एस दोसो। आभीरो भणइ-न तुमं, ममं ति। ताहे सा वालुया गहिया। उण्होदएण तावित्ता सीयलं काउं सव्वं घयं निरवसेसं गहियं। सत्थिल्लएहिं समं गया। न य चोरेहिं गहिया। न य घयस्स ऊणो अग्घो जातो ॥ एवं यः शिष्यो 'मा व्यत्याम्रेडय' इत्युक्तः सन् मिथ्यादुष्कृ तं ददाति 'मया विनाशितम्' इति। यदि वाऽऽचार्यैरेवानुपयुक्तैस्तदा दत्तं ततस्ते ब्रुवते-मिथ्यादुष्कृ तम्, मयैवानुपयुक्तेनान्यथा प्रदत्तमिति। तत एतावता उपशाम्यति। तस्मादेतादृशस्य दातव्यम् ॥

साम्प्रतमेतेषां मुद्गशैलसदृक्षादीनामाभीरीसदृशपर्यवसानानां दाना-ऽदाने प्रायश्चित्तमाह-

[भा.३६२] सेल-कुडछिद्द-चालिणि, सुद्धो चउगुरुग घडदुवे होंति।
परिपूण महिस मसए, विरालि आभीरि एमेव ॥

वृ-मुद्गशैल-च्छिद्रकुट-चालनीसमानानां गुणनालक्षणे कार्ये समायतिते सूत्रमर्थं वा प्रयच्छन् शुद्धः, न खलु तत्र स्वस्यान्येषां चा शिष्याणां सूत्रा-ऽर्थहानि। अकार्ये पुनरेतेषु सूत्रा-ऽर्थौ प्रयच्छतश्चतुर्गुरु। तथा 'घटद्विके' प्रशस्तवाम्येऽप्रशस्तावाम्ये अथवा बोडकुटे भिन्नकुटे व्याख्यानद्वयेन

Jain Education International For Private & Personal Use Only www.jainelibrary.org

सङ्गहतश्चतुर्ष्वेतेषु प्रायश्चित्तं प्रत्येकं चतुर्गुरु ।

परिपूणकसदृशे मशकतुल्ये बिडालीसमाने आभीरीसदृशऽप्रशस्तगौसमुपलक्षितधिग्जातीयतुल्ये कन्थाकारिमेरीपालकसदृशे एतेषु सप्तसु सूत्राऽर्थौ प्रयच्छतः प्रत्येकंप्रायश्चित्तम् 'एवमेव' चतुर्गुरुकमित्यर्थः ॥

[भा.३६३] एमेव गोणि भेरी, हंसे मेसे य जाहग जलूगा ।
चउलहुगमदाणम्मी, पावति एएसु आयरितो ॥

वृ-एतेषां ये प्रतिपक्षा हंसादयो ये च प्रशस्तगो-मेरीदृष्टान्तसूचितास्तेषां सूत्रा-ऽर्थौ प्रयच्छन् शुद्धः । यदि पुनर्न ददाति तदा प्रायश्चित्तं प्राप्नोति चतुर्लघु ॥

प्रकारान्तरेण पर्षन्निरूपणार्थमाह-

[भा.३६४] जाणंतिया अजाणंतिया य तह दुव्वियड्डिया चेव ।
तिविहा य होइ परिसा, तीसे नाणत्तगं वोच्छं ॥

वृ- अथवा त्रिविध पर्षत्, तद्यथा-जानती अजानती दुर्विदग्धा च । 'तस्याः' त्रिविधाया अपि नानात्वं वक्ष्ये ॥ प्रतिज्ञातमेव करोति-

[भा.३६५] गुण-दोसविसेसन्नू, अनभिग्गहिया य कुस्सुइमतेसु ।
सा खलु जाणगपरिसा, गुणतत्तिल्ला अगुणवज्जा ॥

वृ-या गुण-दोषविशेषज्ञा 'कुश्रुतिमतैः' अपरकुतीर्थिकसिद्धान्तमतैरनभिगृहीता, गाथायां सप्तमी तृतीयार्थे, सा खलु "गुणतत्तिल्ला" गुणयत्नवती अगुणवर्जा जानती पर्षत् ॥

सम्प्रति येऽस्याध्ययनस्य योग्यास्तानाह-

[भा.३६६] खीरमिव रायहंसा, जे घोट्टंति उ गुणे गुणसमिद्धा ।
दोसे वि य छड्डुंता, ते वसभा धीरपुरिस त्ति ॥

वृ- ये 'गुणसमृद्धाः' विनयादिगुणसमन्विताः क्षीरमिव राजहंसा गुणान् 'घोटयन्ति' आस्वादयन्ति, येऽपि केचनानुपयोगप्रभवा दोषास्तानपि च 'छर्दयन्ति' परित्यजन्ति ते 'वृषभाः' निशीथेन गीतार्था धीरपुरुषा अधिकृतस्याध्ययनस्य योग्याः ॥ अजानतीं पर्षदमाह-

[भा.३६७] जे होंति पगयमुद्धा, मिगछावग-सीह-कुक्कुरगभूया ।
रयणमिव असंठविया, सुहसण्णप्पा गुणसमिद्धा ॥

वृ-ये प्रकृत्या-स्वभावेन मुग्धा मृग-सिंह-कुक्कुरशावभूता, गाथायां शावशब्दस्यान्यत्रोपनिपातः प्राकृतत्वात्, भूतशब्द औपम्ये, ततोऽयमर्थ-यथा मृगादिशावा अरण्यादानीय यदि रोचते तर्हि भद्रकाः क्रियन्ते अथवा क्रूराः, एवं ये प्रकृत्या मुग्धाः परतीर्थिकैश्चाभावितास्ते यथा भण्यन्ते तथा कुर्वन्ति । तथा रत्नमिव असंस्थापिताः, यथा रत्नमसंस्थापितं यादृशोऽभिप्रायस्तादृशं घटित्वा क्रियते एवमेतेऽपि यथा रोचते तथा क्रियन्ते । तथा चाह-सुखप्रज्ञापनीयाः 'गुणसमृद्धाः' विनयादिगुणनिधयः ॥

[भा.३६८]जे खलु अभाविया कुस्सुतीहि न य ससमए गहियसारा ।
अकिलेसकरा सा खलु, वयरं छक्कोडिसुद्धं वा ॥

वृ- ये खलु 'कुश्रुतिभिः' कुसिद्धान्तैः अभाविता न च स्वसमये गृहीतसारा सा

Jain Education International For Private & Personal Use Only www.jainelibrary.org

खल्वक्लेशषटस्वपि दिक्षु शुद्धम् ।। सम्प्रति दुर्विदग्धां पर्षदमाह-

[भा.३६९] किंचिम्मत्तग्गाही, पल्लवगाही य तुरियगाही य।
दुवियड्डगा उ एसा, भणिया परिसा भवे तिविहा ।।

वृ- किञ्चिन्मात्रग्राहिणः पल्लवग्राहिणः त्वरितग्राहिणः। एवमेषा दुर्विदग्धा पर्षत् 'त्रिविधा त्रिप्रकारा भणिता ।। तत्र किञ्चिन्मात्रग्राहिणीमाह-

[भा.३७०] नाऊण किंचि अन्नस्स जाणियव्वे न देति ओगासं।
न य निज्झितो वि लज्जइ, इच्छइ य जयं गलरवेण ।।

वृ- ज्ञात्वा किञ्चिद् अन्यस्य ज्ञातव्ये नावकाशं ददाति, न च निर्जितोऽपि लज्जते, केवलं 'गलरवेण' महागलप्रमाणेनारटन् जयमिच्छति ।। पल्लवग्राहिणीमाह-

[भा.३७१] न य कत्थइ निम्मातो, न य पुच्छइ परिभवसस दोसेण।
वत्थी व वायपुण्णो, फुट्टइ गामिल्लगवियड्डो ।।

वृ- ग्रामेयकेषु विदग्धो ग्रामेयकविदग्धो न च कुत्रचिन्निर्मातः, सर्वत्र पल्लवमात्रग्राहित्वात्। न च परं पृच्छति, 'परिभवो मे भविष्यति' इति परिभवस्य दोषेण। केवलं बस्तिरिव वातपूर्ण 'पण्डितोऽयम्' इति लोकप्रवादगर्वितः 'स्फुटति' स्फुटन्निव तिष्ठति ।। त्वरितग्राहिणीमाह-

[भा.३७२] दुरहियविज्जो पच्चंतनिवासो वावदूक कीकाको।
खलिकरण भोइपुरतो, लोगुत्तर पेढियागीते ।।

वृ- एकः पुरुषो व्याकरणसूत्राणि किञ्चित् पठितानि कृत्वा प्रत्यन्तं ग्रामं गत्वा ब्रूते-अहं वैयाकरणः। तत्र स ग्रामेयकैराभीरैः परिगृहीतः। वृत्ति पुष्ठ कृता। ततः सुखेन तत्र निवसति। अन्यदा तत्र वावदूकश्छात्रैः परिवृतः पुस्तभारेण समागतः। ततस्तैः प्रत्यन्तग्रामवासिभिस्तस्य शिष्याः पृष्टाः-क एष समागतः ? । तैरवादि-वैयाकरणः। ततस्ते प्रयन्तग्रामवासिनो ब्रुवते-अस्माकमप्यस्ति वैयाकरणः, तेन सह शब्दगोष्ठी भवतु। तैः प्रतिश्रुतम्। जात एकत्र मेलापकः। ततो दुरधीतविद्येनोक्तम्-काग इथइ खथं भण्यते ? । वैयाकरणेनोक्तम्-काक इति। (एवमुक्ते स मौनमध्यतिष्ठत् ।) दुरधीतविद्येनोक्तम्-अन्योऽपि लोकः काकमेव भणति, को विशेषो व्याकरणस्य ? अहं भणामि 'क्रीकाकः'। ततो ग्रामेयकैर्हसितम् उत्कृष्टिश्च कृता 'अस्माकं पण्डितेनैष पराजितः' इति। पश्चात् स वैयाकरणः प्रद्वेषमापन्नो नगरं गत्वा यस्य भोजिकस्य स ग्रामस्तेन कर्षयित्वा तस्य पुरतः लीकृत्य ग्रामान्निष्काशितः। एष दृष्टान्तः।

एवं लोकोत्तरेऽपि कोऽपि कस्याप्याचार्यस्य शिष्यः किञ्चित् पीठिकामात्रं शिक्षयित्वा एकाकी प्रत्यन्तनगरं गत्वा तद्गतानन्यानगीतार्थान् द्रावयति, अकरणीयान्यपि च करोति, अप्रायश्चित्तेऽपि च प्रायश्चित्तं ददाति, अन्यं पूजा-सत्कार-गौरवहानिभयतो न च पृच्छति। पश्चादन्ये गीतार्थास्तत्रागतास्तैर्द्रावितः प्रायश्चित्तं च तस्य दत्तं दिक् च तस्यापहृता ।।

गाथाक्षरयोजना त्वियम्-दुरधीतविद्यः कोऽपि प्रत्यन्तनिवासः। तत्रैको 'वावदूकः' महाविद्वान् वैयाकरणः समागतः। तस्य तेन विवादे 'क्रीकारः कृतः' उपहासपूर्वकमुत्त ष्टि कृता। ततः स वैयाकरणो वावदूको नगरं गत्वा भोजिकपुरतस्तस्य खलीकरणमकार्षीत्। एवं लोकोत्तरेऽपि 'पीठिकागीते' पीठिकामात्रेण गीतार्थकर्त्तव्यं या करोति सैषा दुर्विदग्धा पर्षत् ।।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

[भा.३७३] आयरियत्तणतुरितो, पुव्वं सीसत्तणं अकाऊणं ।
हिंडति चोप्पायरितो, निरंकुसो मत्तहत्थि व्व ॥

वृ- कोऽपि शिष्यो दशवैकालिकमात्रं पठित्वा आचार्यत्वत्वरितः प्रत्यन्तं ग्रामं नगरं वा गत्वा पीठिकायां निविष्ट आत्मानमाचार्यमभिमन्यते। स एवं शिष्यत्वमकृत्वा निरङ्कुशो मत्तहस्तीव 'चोप्पो' चोक्षो मूर्ख सन् आचार्यो 'हिण्डते' परिभ्रमति ॥ कीदृशं तस्य मूर्खत्वम् ? अत आह-

[भा.३७४] छन्नालयम्मि काऊण कुंडियं अभिमुहंली सुढितो ।
गेरू पुच्छति पसिणं, किन्नु हु सा वागरे किंचि ॥

वृ- 'गेरुकः' परिव्राजकः 'षट्नाले' त्रिदण्डे कुण्डिकां कृत्वा कृताञ्जलिरभिमुखः 'स्वादृतः' पादपतितः 'पृच्छति' प्रश्नयति, किन्नु सा कुण्डिका तथाऽऽपृच्छयमाना किञ्चित् परिव्राजकस्य व्यागृणा ति ? नैव किञ्चन। यादृशं तस्याः कुण्डिकाया आचार्यत्वं तादृशमेतस्यापि ॥

[भा.३७५] सीसा वि य तूरंती, आयरिया वि हु लहुं पसीयंति ।
तेन दरसिक्खियाणं, भरितो लोगो पिसायाणं ॥

वृ- शिष्या अप्याचार्यपदपरिपालनाय त्वरन्ते, आचार्या अपि 'लघु' शीघ्रं प्रसीदन्ति, न पुनः परिभावयन्ति, यथा-नाद्यापि परिपूर्णमधीतमिति। तत ईषच्छिक्षितानामत एव 'पिशाचानां' ग्रथिलानां लोको भृतः ॥

[भा.३७६] तेगिच्छ मते पुच्छा, अन्नहि वालुंक देवि कहि चिन्ना ।
तोसत्थेण कहंति य, विज्ञनिसिद्धे ततो दंडो ॥

वृ- एगो विज्ञो राउले ओलग्गइ। सो मतो। रन्ना पुच्छियं-अत्थि से पुत्तो ? । कहियं अत्थि, नवरं विज्ञयमसिक्खितो। रन्ना भणियं-वच्च,पढाहि, तदवत्था चेव ते भोगा। ततो अन्नत्थ गंतुं पढितुमारद्धं। तत्थ अइयाए पुरोहडे चरंतीए गलए वालुंकं लग्गं, चिर्भिटमित्यर्थः। सा विज्ञसमीवमाणिया। विज्ञेण पुच्छियं-कहिं चिन्ना एसा ? . कहियं-पुरोहडे। तेन नायं-चिब्भिडं लग्गं ति। पोत्तं गलए बंधिउं तहा वलियं जहा तस त्ति भग्गं, निग्गयं गलयातो। तेन वेज्ञपुत्तेण चिंतियं-एस उवातो विज्ञियाए किरियाए। पडिनियत्तो रन्नो अल्लीणो। पुच्छितो रन्ना-सिक्खियं विज्ञयं ? ति। तेन भणियं-सिक्खियं। ततो रन्ना 'सिग्घं सिक्खियं, अहो ! मेहावी'ति सक्कारो कतो। अन्नया रन्नो महादेवीए गलगंडं उट्ठितं। सो वाहितो भणइ-कहिं चिण्णेल्लिया ? । तेहिं भणियं-पुच्छामो। इयरेण भणियं-भण 'पुरोहडे'। तेहिं चिंतियं-नूनं वेज्ञरहस्समेयं। ततो भणियं-पुरोहडे चिन्ना पच्छा तेन गलए साडगेण आवेढेत्ता मारिया। पच्छा रन्ना अन्ने विज्ञा पुच्छिया-किं सत्थनिद्देसेण कया किरिया ? उयाहु ओसत्थेण ? । तत्थ विवादे विज्ञेहिं निसेहिओ। पच्छा सारीरेण दंडेन दंडितो ॥

अक्षरगमनिका-'चिकित्सके' वैद्ये मृते राज्ञः पृच्छा-अस्ति तस्य पुत्रः ? । कथितम्-अस्ति, परमशिक्षितो वैद्यकस्य। राज्ञा भणितम्-अन्यत्र गत्वा पठ। स गतः। तत्र वालुङ्कमजागले वस्त्रवेष्टनेन भिद्यमानं दृष्ट्वा 'लब्धं वैद्यरहस्यम्' इति विचिन्त्य प्रतिनिवृत्तः। तत्र देव्या गलगण्डमभवत्। स आकारितः पृष्टवान्-क चीर्णा ? । 'तोषार्थेन' तोषनिमित्तं कथयन्तिपुरोहेडे। ततः सा पोतावेष्टनेन मारिता। स विवादे वैद्येन निषिद्धः। ततः शारीरो दण्डस्तस्य राज्ञा कृतः।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

एष दृष्टान्तः ।। उपनयमाह-

[भा.३७७] कारणनिसेवि लहुसग, अगीयपच्चय विसोहि दट्ठूण ।
सव्वत्थ एव पच्चंतगमण गीयागते दंडो ।।

वृ-आचार्येणान्यस्य कस्यापि साधोः कारणनिषेविणोऽगीतप्रत्ययनिमित्तं किञ्चिद् यथालघु प्रायश्चित्तं दत्तम्, विशोधि प्रायश्चित्तमित्यनर्थान्तरम्, तद् दृष्ट्वा चिन्तयति-सर्वत्रैवं प्रायश्चित्तं दातव्यम् । ततः प्रत्यन्ते ग्रामे नगरे वा तस्य गमनम् । तत्र गतः स ब्रूते-अहमपि जानामि प्रायश्चित्तम्। तत्र निष्कारणं प्रतिसेविते भणति-भण 'मया कारणे प्रतिसेवितम्' तत एवमुक्ते स ब्रूते-त्वं शुद्धस्तथापि किञ्चिदगीतार्थत्वप्रत्ययं प्रायश्चित्तं ददामि । एवंकुर्वन् पश्चादन्येषां गीतार्थानामागमनम् एतैरन्यैर्गीतार्थैर्दृष्टः । तैर्द्राविता दिक् च तस्यापहृता । ईदृशा ये पुरुषाः सा दुर्विदग्ध पर्षत् । एतस्या यो ददाति सूत्रमर्थं वा तस्मै प्रायश्चित्तं चतुर्गुरु । जानत्या अजानत्याश्च सूत्रा-ऽर्थाप्रदाने चतुर्लघु ।। अथवा द्विविधा पर्षत् लौकिकी लोकोत्तरा च । तत्र लौकिकी पञ्चविधा, तामेवाह-

[भा.३७८] पूरंती छत्तंतिय, बुद्धी मंती रहस्सिया चेव ।
पंचविहा खलु परिसा, लोइय लोउत्तरा चेव ।।

वृ-पूरयन्ती छत्रवती बुद्धिर्मन्त्री राहस्यिकी च एवं लौकिकी लोकोत्तरा च खलु पञ्चविधा पर्षत् ।। तत्र लौकिकीं पञ्चप्रकारामपि दर्शयति-

[भा.३७९] पूरंतिया महाणो, छत्तविदिन्ना उ ईसरा बितिया ।
समयकुसला उ मंती, लोइय तह रोहिणिज्ञा या ।।

वृ-महाजनः पूरयन्तिका पर्षत् । वितीर्णच्छत्रा ईश्वरा द्वितीया छत्रान्तिका । स्वसमयकुशला तृतीया बुद्धिपर्षत् । चतुर्थी मन्त्री । पञ्चमी राहस्यिकी 'रोहिणीया नाम' वर्धिका-अन्तःपुरमहत्तरिका। एषा लौकिकी पञ्चप्रकारा पर्षत् ।। तत्र पूरयन्तिकामाह-

[भा.३८०] नीहम्मियम्मि पूरति, रन्नो परिसा न जा घरमतीति ।
जे पुन छत्तविदिन्ना, अयंति ते बाहिरं सालं ।।

वृ-यदा राजा निर्गच्छति तस्मिन् निर्गते यः कोऽपि महान् जनः स सर्वोऽपि राज्ञो ढौकते यावद्गृहं नायाति सा पर्षत् पूरयन्तिका । ये पुनः 'छत्रवितीर्णा' प्रदत्तच्छत्रा राजानो भटभोजिकाश्च ते बाह्यां शालां यावदागच्छन्ति शेषा वार्यन्ते एषा छत्रान्तिका छत्रवती पर्षत् ।। बुद्धिपर्षदमाह-

[भा.३८१] जे लोग-वेय-समएहि कोविया तेहि पत्थिवो सहिओ ।
समयमतीतो परिच्छइ, परप्पवायागमे चेव ।।

वृ-ये 'लोक-वेद-समयेषु' लोके वेदे समये चेत्यर्थः 'कोविदाः' कुशलास्तैः सहितः पार्थिवः 'समयम्' अवसरम् 'अतीतः' प्राप्तः सन् परप्रवादानामागमाः परप्रवादागमास्तान् परीक्षते एषा वुद्धिपर्षत् ।। मन्त्रिपर्षदमाह-

[भा.३८२] जे रायसत्थकुसला, अतक्कुलीया हिता परिणया य ।
मइकुलीया वसिया, मंतेति निवो रहे तेहिं ।।

वृ-ये 'राजशास्त्रेषु' कौटिल्यप्रभृतिषु कुशला राजशास्त्रकुशलाः 'अतत्कुलीयाः' न राजकुले

Jain Education International For Private & Personal Use Only www.jainelibrary.org

भवाः न पैतृकेण सम्बन्धेन सम्बद्धा इत्यर्थः 'हिताः' हितान्वेषिणः 'परिणताः' वयसा 'मातृकुलीयाः' मातृकेण सम्बन्धेन सम्बद्धाः 'वशिकाः' आयत्ताः तैः सह रहसि नृपो मन्त्रयति एषा मन्त्रिपर्षद्॥

रोहिणीयां पर्षदमाह-

[भा.३८३] कुविया तोसेयव्वा, रयस्सला वारअऽन्नमासत्ता।
छन्न पगासे य रहे, मंतयते रोहिणिज्जेहिं॥

वृ- या देवी राज्ञः कुपिता तां रोहिणीया निवेदयन्ति। ते वा दूतत्वेन प्रसादननिमित्तं प्रेष्यन्ते, यथा-युष्माभि सा देवी तोषयितव्या। तथा या 'रजस्वला' ऋतुस्नाता तां रोहिणीयाः कथयन्ति। यस्या वा यस्मिन् दिवसे वारकस्तं राज्ञस्तस्याः कथयन्ति। याऽपि कन्या यौनप्राप्ता तामपि परिणयनाय राज्ञे निवेदयन्ति। 'अन्नमासत्त'त्ति अन्यासक्ता-व्यभिचारिणीत्यर्थः तामपि राज्ञः कथयन्ति, यथा-एषा देवी दुश्चारिणीति। अन्यान्यपि यानि च्छन्नानि प्रकाशानि च 'रहांसि' रतिकार्याणि तानि रोहिणीयैः सह राजा मन्त्रयते। एषा पञ्चमी राहस्यिका पर्षत्॥

तदेवमुक्ता पञ्चप्रकाराऽपि लौकिकी पर्षत्। सम्प्रति लोकोत्तरे पञ्चविधां पर्षदमाह-

[भा.३८४] आवासगमादी या, सुत्तकड पुरंतिया भवे परिसा।
दसमादि उविमसुया, हवंति उ छत्तंतिया परिसा॥

वृ- आवश्यकमादिं कृत्वा यावत् सूत्रकृतमङ्गं तावदधीतश्रुता पूरयन्ती पर्षत्, न खल्वत्र कश्चनापि साधुः पठन् निरुध्यते। दशाश्रुतस्कन्धमादि कृत्वा येषामुपरितनानि श्रुतानि सा छत्रान्तिका पर्षत्, तत्र हि ये परिणामिकास्ते न निवार्यन्ते, शेषास्त्वपरिणामिका अतिपरिणामिकाश्च निवार्यन्ते॥

[भा.३८५] लोइय-वेइय-सामाइएसु सत्थेसु जे समोगाढा।
ससमय-परसमयविसारया य कुसला य बुद्धिमती॥

वृ- ये च लौकिकेषु वैदिकेषु सामायिकेषु च शास्त्रेषु समवगाढाः स्वसमय-परसमयविशारदाः कुशलाः सा बुद्धिमती पर्षत्॥ आह किं प्रयोजनं बुद्धपर्षदा? तत आह-

[भा.३८६] आन्नपतीभत्तं, खेयपरिस्समजत्तो तहा सत्थे।
कहमुत्तरं च दाहिसि, अमुगो किर आगतो वादी॥

वृ- बुद्धिपर्षदा सह श्रमं कुर्वत आसन्नप्रतिभत्पुपजायते। तथा यः शास्त्रे निरन्तरव्याख्याकरणतः खेदपरिश्रमस्तस्य जयो भवति। कदाचित् परिश्रमे जातेऽपि व्याख्याकरणतस्तं परिश्रममपनयति। तथा सा बद्धिपर्षद् एवं शिक्षयते-अमुकः किल आगतो वादी ततः कथं त्वमुत्तरं दास्यसि?। एवं बुद्धिपर्षदा सह कृताभ्यासः सुखं परप्रवादिनं निगृह्णाति॥

उक्ता बुद्धिपर्षद्। मन्त्रिपर्षदमाह-

[भा.३८७] पुव्वं पच्छा जेहिं, सिंगणादितविही समनुभूतो।
लोए वेदे समए, कयागमा मंतिपरिसा उ॥

वृ- यैः पूर्वं गृहवासे पश्चात् श्रमणभावे 'शृङ्गनादितविधि' सर्वेषु कार्येषु मध्ये शृङ्गभूतं यत् कार्यं तत् शृङ्गनादितमुच्यते तद्विधि समनुभूतः सा लोके वेदे समये च कृतागमा मन्त्रिपर्षद्॥ एतदेव व्याचिख्यासुराह-

[भा.३८८] गिहवासे अत्थसत्थेहि कोविया केइ समणभावम्मि।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

कज्जेसु सिंगभूयं, तु सिंगनादिं भवे कज्जं ॥

वृ-पूर्वं गृहवासे अर्थशास्त्रषु पश्चात् श्रमणभावे स्वसमय-परसमयेषु ये केचित् कोविदाः सा मन्त्रिपर्षद् । कार्येषु श्रृ ङ्गभूतं यत् कार्यं तत् श्रृ ङ्गनादितं भवति ॥ किं तद् ? इत्याह-

[भा.३८९] तं पुन चेइयनासे, तद्दव्वविनासणे दुविहभेदे ।
भत्तोवहिवोच्छेदे, अभिवायण-बंध-घायादी ॥

वृ- 'तत्' पुनः श्रृ ङ्गनादितं कार्यं 'चैत्यविनाशः' लोकोत्तमभवन-प्रतिमाविनाशः, 'तद्द्रव्यविनाशनं' चैत्यद्रव्यविनाशनं चैत्यद्रव्यविद्रावणम्, तथा द्विविधो भेदः-मरणमुप्रव्राजनं वा, यो वा 'भक्तं' भिक्षां वारयति उपधिं वा, यथा-मा कोऽप्यमीषां भक्तमुपधिं वा दद्यादिति भक्त व्यवच्छेद उपधिव्यवच्छेदो वा, तथा कोऽपि धिग्जातीयो ब्रूते-ब्राह्मणान् भिवादय-तवन्दध्वमिति, यो वा बन्धापयति पिट्टयति, आदिग्रहणाद् यो निर्विषयानाज्ञापयति आक्रोशयति वा प्रद्विष्टो राजादि, तद् अभिवादन-बन्ध-घातादि च श्र ङ्गनादितं कार्यम्, तद्विधिर्ये समनुभूतः सा मन्त्रिपर्षद् ॥

[भा.३९०] वितहं ववहरमाणं, सत्थेण वियाणतो निहोडेइ ।
अम्हं सपक्खदंडो, न चेरिसो दिक्खिए दंडो ॥

वृ-राजादिं वितथं व्यवहरन्तं मन्त्रिपर्षदन्तर्गतो 'विज्ञायकः' स्वसमय-परसमयशास्त्रकुशलः शास्त्रेण 'निहेठयति' सुखं वारयति, यथा-अस्माकं सपक्षे दण्डो भवति सङ्घो दण्डं करोतीत्यर्थः, न च राजा प्रभवति, वापि प्रपन्नदीक्षाकस्यैतादृशो दण्डः । एषा मन्त्रिपर्षत् ॥

सम्प्रति राहस्मिकीं पर्षदमाह-

[भा.३९१] सल्लुद्धरणे समणस्स चाउकन्ना रहस्सिया परिसा ।
अज्जाणं चउकण्णा, छक्कन्ना अट्ठकन्ना वा ॥

वृ-द्विवधं शल्यम्-द्रव्यशल्यं भावशल्यं च । द्रव्यशल्यं कण्टकादि । भावशल्यं मायानिदान-मिथ्यात्वानि, अथवा भावशल्यं मूलोत्तरगुणातिचारः । ततः श्रमणस्य भावशल्योद्धरणे आचार्यसमीपे आलोचयत इत्यर्थः राहस्यिकी पर्षद् भवति । कथम्भूता ? इत्यत आह-'चतुष्कर्णा' द्वावाचार्यस्य द्वौ साधोरिति चत्वारः कर्णा यत्र सा । तथा आर्याणां चतुष्कर्णा षट्कर्णा वा । तत्र यदा निर्ग्रन्थी निर्ग्रन्थ्याः पुरत आलोचयति तदा चतुष्कर्णा, यथा निर्ग्रन्थस्य निर्ग्रन्थपार्श्वे आलोच-यतः । यदा त्वद्वतीयस्थविरगुरुसमीपे आलोचयति सद्वितीया भिक्षुकी तदा षट्कर्णा । सद्वितीयतरुणगुरुसमीपे सद्वितीयाभिक्षुक्या आलोचयन्त्या अष्टकर्णा ॥

तत्र प्रथमतः संयतस्य चतुष्कर्णां भावयति-

[भा.३९२] आलोयणं पउंजइ, गारवपरिवज्जितो गुरुसगासे ।
एगंतमणावाए, एगो एगस्स निस्साए ॥

वृ-एकान्ते अनापाते 'एकः' अद्वितीयः 'एकस्य' अद्वितीयस्याचार्यस्य 'निश्रया' तत्पुरत इत्यर्थः 'गौरवपरिवर्जितः' ऋद्धि-रस-सातगौरवपरित्यक्तः, गौरवाद्धि सम्यगालोचयितव्यं न भवतीति तत्प्रतिषेधः, 'गुरुसमीपे' आलोचनार्हासमीपे आलोचनां प्रयुङ्क्ते ॥ कथम् ? इत्याह-

[भा.३९३] विरहम्मि दिसाभिग्गह, उकुडुतो पंजली निसेज्जा वा ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

एस सपक्खे परपक्खे मोत्तु छन्नं निसिज्जं च ॥

वृ- एकान्तेऽपि यत्र कोऽपि न तिष्ठति तत्र 'विरहे' छन्ने प्रदेशे पूर्वं गुरोर्निषद्यां कृत्वा पूर्वामुत्तरां चरन्तिकां वा दिशमभिगृह्य वन्दनकं दत्त्वा उत्कुटुकः प्रबद्धाञ्जलि अथाऽसौ व्याधिमान् प्रभूतं चाऽऽलोचनीयं ततो निषद्यामनुज्ञाप्यालोचयति । एष सपक्षे आलोचनाविधिः । 'परपक्षे' नाम संयती तत्र च्छन्नं मुक्त्वा आलोचना दातव्या, निषद्या च न कार्यते । इयमत्र भावना-यदा संयती संयतस्य पुरत आलोचयति तदा छन्नं वर्जयति, किन्तु यत्र लोकस्य संलोकस्तत्राऽऽलोचयति, निषद्यां चाऽऽचार्यस्य न करोति, आत्मनाऽप्युत्थिता आलोचयति ॥

श्रमणीमधिकृत्यालोचनाविधेश्चतुष्कर्णत्वमाह-

[भा.३९४]　आलोयणं पउंजइ, गारवपरिवज्जिया उ गणिणीए ।
एगंतमणावाए, एगा एगाए निस्साए ॥

वृ-श्रमणी गौरवपरिवर्जिता गणिन्याः पुरत आलोचनां प्रयुङ्क्ते । क्व ? इत्याह-एकान्तेऽनापाते 'एका' अद्वितया 'एकस्याः' अद्वितीयाया गणिन्या निश्रया । ततो गुरुसमीपे श्रमणस्येव श्रमण्या अपि गणिन्याः पुरत आलोचयन्त्याश्चतुष्कर्णा पर्षद् भवति ॥ षट्कर्णामाह-

[भा.३९५]　आलोयणं पउंजइ, एगंते बहुजनस्स संलोए ।
सब्बितियथेरगुरुणो, सबिईया भिक्खुणी निहुया ॥

वृ- अद्वितीयस्थविरगुरुसमीपे सद्वितीया भिक्षुकी 'निभृता' निव्यार्पारा न दिशो नापि विदिश आलोकयति, नापि यत्किञ्चिदुल्लापयतीत्यर्थः । एवम्भूता सती एकान्ते बहुजनस्य संलोके आलोचनां प्रयुङ्क्ते ॥ अथ कीदृशी तस्या द्वितीया भवति ? इत्यत आह-

[भा.३९६]　नाण-दंसणसंपन्ना, पोढा वयस परिणया ।
इंगियागारसंपन्ना, भणिया तीसे बिइज्जिया ॥

वृ- ज्ञान दर्शनसम्पन्ना 'प्रौढा' समर्था या संयतस्य तस्या वा भावं विज्ञाय न मन्त्रणं कर्तु ददाति, किन्तु वदति यद्यालोचितं तर्हि व्रजामो नो चेदालोचनयाऽपि न प्रयोजनमिति । तथा 'वयसा परिणता' परिणतवयाः । तथा 'इङ्गिताकारसम्पन्ना' इङ्गितेनाऽऽकारेण च यस्य यादृशो भावस्तस्य तं जानातीत्यर्थः । एवम्भूता सा तस्य द्वितीया भणिता । सा पुनः कियद्दूरे तिष्ठति ? उच्यते-एके सूरयो वदन्ति-यत्रोभयोराकारा दृश्यन्ते तावन्मात्रे । अपरे ब्रुवते-यत्र श्रवणं शब्दस्येति॥

अष्टकर्णामाह-

[भा.३९७]　आलोयणं पउंजइ, एगंते बहुजणस्स संलोए ।
सब्बितियतरुणगुरुणो, सब्बिइया भिक्खुणी निहुया ॥

वृ-एकान्ते बहुजनस्य संलोके सद्वितीयस्य तरुणगुरोः समीपे सद्वितीया भिक्षुकी निभृता आलोचनां प्रयुङ्क्ते । तत्र भिक्षुक्या यादृशी द्वितीया तादृशी प्रागुक्ता ॥

सम्प्रति यादृश आचार्यस्य द्वितीयस्तादृशमाह-

[भा.३९८] नाणेण दंसणेण य, चरित्त-तव-विनय-आलयगुणेहिं ।
वयपरिणामेण य अभिगमेण इयरो हवइ जुत्तो ॥

वृ- ज्ञानेन दर्शनेन चारित्रेण तपसा विनयेन 'आलयगुणैः' बहिश्चेष्टाभिः प्रतिलेखनादि-

Jain Education International　For Private & Personal Use Only　www.jainelibrary.org

भिरुपशमगुणेन च तथा वयः परिणामेन 'अभिगमेन' सम्यकशास्त्रार्थकौशलेन युक्तो भवति आचार्यस्य 'इतरः' द्वितीयः ॥ उक्ता पञ्चप्रकाराऽपि पर्षद् । सम्प्रति 'कयाऽधिकारः ?' इति प्रतिपादयति-

[भा.३९९] छत्तंतियाए पगयं, जइ पुण सा होज्जिमेहि उववेया ।
तो देंति जेहि पगयं, तदभावे ठाणमादीणि ॥

वृ- अत्र च्छत्रान्तिकया पर्षदा 'प्रकृतम्' अधिकारः । शेषाः पर्षद उच्चरितसदृशा इति प्ररूपिताः । तत्र यदि सा छत्रान्तिका पर्षद् 'एभिः' वक्ष्यमाणैर्गुणैरुपेता भवति तदा यकाभ्यामत्र प्रकृतं तौ कल्प-व्यवहारौ सूरयो ददति । 'तदभावे' वक्ष्यमाणगुणाभावे स्थानादीनि आदिग्रहणेन प्रकीर्णकानां परिग्रहः ददति ॥ अथ के ते गुणाः ? इत्यत आह-

[भा.४००] बहुस्सुए चिरपव्वइए, कप्पिए य अचंचले ।
अवट्ठिए य मेहावी, अपरिस्सावी य जे विऊ ॥

[भा.४०१] पत्ते य अणुन्नाते, भावतो परिणामगे ।
एयारिसे महाभागे, अनुओगं सोउमरिहइ ॥

वृ- बहुश्रुतश्चिरप्रव्रजितः कल्पिकोऽचञ्चलः अवस्थितो मेघावी अपरिश्रावी यश्च 'विद्' विद्वान् प्रभूताशेषशास्त्रपरिमलितबुद्धि ॥ 'पत्ति'त्ति पात्रं प्राप्तो वा, तथा अनुज्ञातः सन् भावतः परिणामकः, एतादृशो महाभागोऽनुयोगं श्रोतुमर्हति, सामर्थ्यात् कल्प-व्यवहारयोः । एष द्वारगाथाद्वयसङ्क्षेपार्थः । विस्तरार्थः प्रतिद्वारं वक्ष्यते ॥ तत्र प्रथमं बहुश्रुतद्वारमाह-

[भा.४०२] तिविहो बहुस्सुओ खलु, जहण्णओ मज्झिमो उ उक्कोसो ।
आयारपकप्पे कप्प वम-दसमे य उक्कोसो ॥

वृ- त्रिविधः खलु बहुश्रुतः, तद्यथा-जघन्यो मध्यम उत्कृष्टश्च । तत्र 'आचारप्रकल्पः' निशीथं तद्धारी जघन्यो बहुश्रुतः । मध्यमः 'कप्प'त्ति कल्प-व्यवहारधरः । उत्कृष्टो नवमदशमपूर्वधरः ॥

सम्प्रति चिरप्रव्रजितद्वारमाह-

[भा.४०३] चिरपव्वइओ तिविहो, जहन्नओ मज्झिमो य उक्कोसो ।
तिवरिस पंचग मज्झो, वीसतिवरिसो य उक्कोसो ॥

वृ- चिरप्रव्रजितस्त्रिविधः, तद्यथा-जघन्यो मध्यम उत्कृष्टश्च । तत्र त्रिवर्षप्रव्रजितो जघन्यश्चिरप्रव्रजितः । पञ्चवर्षप्रव्रजितो मध्यमः । विंशतिवर्षप्रव्रजित उत्कृष्टः ॥

अथ केन बहुश्रुतेन चिरप्रव्रजितेन चाधिकारः ? इत्यत आह-

[भा.४०४] बहुसुय चिरपव्वइओ, उ एत्थ मज्झेसु होति अहिगारो ।
एत्थ उ कमे विभासा, कम्हा उ बहुस्सुओ पढमं ॥

वृ- अत्र बहुश्रुतश्चिरप्रव्रजितश्च यो मध्यस्ताभ्यामधिकारः । गाथायां सप्तमी तृतीयार्थे । अत्र 'क्रमे' क्रमविषये विभाषा कर्त्तव्या, सा चैवम्-कस्मात् प्रथमं बहुश्रुत उक्तः ? यतः प्रथमं प्रव्रज्या बवति, ततः श्रुतम्, ततः प्रथमं चिरप्रव्रजितस्योपादानं युज्यते; नैष दोषः, नियमविशेषप्रदर्शनार्थं ह्येवमुपादानम्-यो बहुश्रुतः स नियमाच्चिरप्रव्रजितः, येन त्रिवर्षप्रव्रजितस्य निशीथमुद्दिश्यते, पञ्चवर्षप्रव्रजितस्य कल्प-व्यवहारौ, विंशतिवर्षप्रव्रजितस्य दृष्टिवादः, तेन न

Jain Education International　For Private & Personal Use Only　www.jainelibrary.org

दोष इति ॥ सम्प्रति कल्पिकद्वारमाह-

[भा.४०५] सुत्ते अत्थे तदुभय, उव्वट्ठ विचार लेव पिंडे य ।
सिज्जा वत्थे पाए, उग्गहण विहारकप्पे य ॥

वृ- कल्पिको द्वादशविधः, तद्यथा-सूत्रे १ अर्थे २ 'तदुभयस्मिन्' सूत्रार्थोभयलक्षणे ३ उपस्थापनायां ४ विचारे ५ पात्रलेपे ६ पिण्डे ७ तथा शय्यायां ८ वस्त्र ९ पात्रे १० अवग्रहणे ११ विहारकल्पे च १२ । एष प्रतिद्वारगाथासमासार्थः ॥

साम्प्रतमेनामेव विवरीषुः प्रथमतः सूत्रकल्पिकमाह-

[भा.४०६] सुत्तस्स कप्पितो खलु, आवस्सगमादि जाव आयारो ।
तेन पर तिवरिसादी, पकप्पमादी य भावेणं ॥

वृ-आवश्यकमादिं कृत्वा यावदाचारस्तावत् सर्वोऽपि सूत्रस्य कल्पिको भवति, न खल्वे तावत् सूत्रं यावत् कोऽपि पठन् विनियार्थते । ततः परं त्रिवरषप्रव्रजितमादिं कृत्वा यद् यद् व्यवहारे दशमोद्देशकपर्यन्ते यथा भणितं तत् तथोपदिश्यते यावर्द्धिशतिवर्षपर्यायः सर्वश्रुततानुपाती भवति । नवरमाचारप्रकल्पमादिं कृत्वा यान्यपवादबहुलान्यध्ययनानि यानि चातिशायीन्यरुणोपपातप्रभृतीनि तानि यदा भावे परिणतो भवति तदोद्दिश्यन्ते ॥

आह त्रिषु वर्षेष्वपरिपूर्णष्वाचारे पठिते किं कुर्यात् ? अत आह-

[भा.४०७] सुत्तं कुणति परिजितं, तदत्थगहणं पइन्नगाइं वा ।
इति अंग-ऽज्झयणेसुं, होति कमो जाहगो नायं ॥

वृ- यत् पठितं सूत्रं तत् परिजितं कुर्यात् । यदि वा तस्य सूत्रस्यार्थग्रहणं विदध्यात्, प्रकीर्णकादि वा सूत्रतोऽर्थतश्चाधीते । एवमङ्गानामध्ययनानां चातिशायिनां यावत् कल्पिकोभवति तावदेष क्रमो ज्ञातव्यः । जाहकज्ञातं चात्र पूर्वोपन्यस्तमुपन्यसनीयम्, जाहक इव परिजितौ सूत्रा-ऽर्थौ कुर्यादिति भावार्थः ॥ अर्थकल्पिकमाह-

[भा.४०८] अत्थस्स कप्पितो खलु, आवासगमादि जाव सूयगडं ।
मोत्तूणं छेयसुयं, जं जेनऽहियं तदट्ठस्स ॥

वृ-आवश्यकमादिं कृत्वा यावत् सूत्रकृतमङ्गं तावद् यद् येनाधीतं स तस्यार्थस्य कल्पिको भवति । सूत्रकृताङ्गस्योपर्यपि च्छेदश्रुतं मुक्त्वा यद् येनाधीतं सूत्रं स तस्य-सूत्रस्य समस्तस्याप्यर्थस्य कल्पिको भवति । छेदसूत्राणि पुनः पठितान्यपि यावदपरिणतस्तावन्न श्राव्यते, यदा तु परिश्रतो भवति तदा कल्पिकः ॥ अधुना तदुभयकल्पिकमाह-

[भा.४०९] तदुभयकप्पिय जुत्तो, तिगम्मि एगाहिएसु ठाणेसु ।
पियधम्मऽवज्जभीरू, ओवम्मं अज्जवइरेहिं ॥

वृ- तदुभयं-सूत्रमर्थश्च तस्मिन् कल्पिको युक्तः । किमुक्तं भवति ?-यो द्वावपि सूत्रा-ऽर्थौ युगपद् ग्रहीतुं समर्थ स तदुभयकल्पिकः । अथवा तदुभयकल्पिकः 'त्रिक एकाधिकयोः स्थानयोर्युक्तः' त्रिकं नाम सूत्रमर्थस्तदुभयं च, तत्र सूत्रादर्थोऽधिकः, अर्थादधिकमुभयम्, एवमेकस्मादर्थादधिके ये उभे स्थाने सूत्रा-ऽर्थरूपे तत्र युक्तः-योग्यः स तदुभयकल्पिकः । अथवा प्रियधर्मा इति चत्वारो भङ्गाः सूचित्ताः-प्रियधर्मा नामैको न दृढधर्मा १ दृढधर्मा नामैको न

Jain Education International For Private & Personal Use Only www.jainelibrary.org

प्रियधर्मा २ एकः प्रियधर्माऽपि दृढधर्माऽपि ३ एको न प्रियधर्मा नापि दृढधर्मा ४। अत्र चतुर्थभङ्गोऽवस्तु। शेषभङ्गत्रिके यत एकस्मादेकैकगुणयुक्तात् स्थानात् प्रथमभङ्गरूपाद् द्वितीयभङ्गरूपाद् वा येऽधिके स्थाने प्रियधर्मत्व-दृढधर्मत्वलक्षणे तयोर्युक्तः। स च नियमादवद्यभीरुर्भवति, अवद्यं-कर्म तस्माद्भीरु, तत आह-"अवज्रभीरू" स तदुभयकल्पिकः। अत्रौपम्यमार्यवज्रैः, सः बालभावे कर्णाभ्याहृतं सूत्रं कृतवान्, पश्चात् तस्योद्दिष्टं समुद्दिष्टमनुज्ञातम् अर्थश्च तदैव द्वितीयपौरुष्यां कथितः। एवमन्यस्यापि द्रष्टव्यम्॥ तथा चाह-

[भा.४१०] पुव्वभवे वि अहीयं, कण्णाहडगं व बालभावम्मि।
उत्तममेहाविस्स व, दिज्जति सुत्तं पि अत्थो वि॥

वृ- यस्य पूर्वभवेऽधीतमागच्छति बालभावे वा कर्णाहृतं कृतं तस्य, उत्तममेधाविनो वा युगपत्सूत्रमप्यर्थोऽपि च दीयते। एष उभयकल्पिकः॥ साम्प्रतमुपस्थापनाकल्पिकमाह-

[भा.४११]अप्पत्ते अकहित्ता, अनहिगयऽपरिचछणे य चउगुरुगा।
दोहि गुरू तवगुरुगा, कालगुरू दोहि वी लहुगा॥

वृ- सूत्रेऽसमाप्ते उपस्थाप्यमाने उपस्थापयितुः प्रायश्चित्तं चत्वारो गुरुकाः। कथम्भूताः? इत्याह-द्वाभ्यां गुरवः, तद्यथा-तपसाऽपि गुरुकाः कालेनापि गुरुकाः। अथ सूत्रं प्राप्तस्तथापि तस्यार्थमकथयित्वा यदि तमुपस्थापयति तदा तस्य चत्वारो लघुकाः, नवरं कालेनैकेन लघवः। अथ कथितोऽर्थः परं नाद्याप्यधिगतः अथवाऽधिगतः परमद्यापि न सम्यक् तं श्रद्दधाति तमनधिगतार्थमश्रद्दधानं वा उपस्थापयतश्चत्वारो लघुकाः, नवरमेकेन तपसा लघवः। अथाधिगतार्थमप्यपरीक्ष्योपस्थापयति तदा चत्वारो लघुकाः, तपसाऽपि कालेनापि च लघवः। न केवलमेतत् प्रायश्चित्तं किन्त्वाज्ञादयश्च दोषाः। तथा सर्वत्र षण्णां जीवनिकायानां यद् विधास्यति तत् सर्वमुपस्थापयन् प्राप्नोति। तस्माद् यत एवं प्रायश्चित्तमाज्ञादयश्च दोषास्तस्मान्नापठिते षड्जीवनिकासूत्रे नाप्यनधिगतेऽर्थे नापि तस्मिन्नपरीक्षिते उपस्थापना कर्त्तव्या॥

अथ कियन्तः षड्जीवनिकायामर्थाधिकाराः? तत आह-

[भा.४१२] जीवा-ऽजीवाभिगमो, चरित्तधम्मो तहेव जयणा य।
उवएसो धम्मफलं, छज्जीवणियाए अहिगारा॥

वृ- षडजीवनिकायामिमे पञ्चाधिकाराः, तद्यथा-प्रथमो जीवा-ऽजीवाभिगमः। द्वितीयो महाव्रतसूत्रादारभ्य चारित्रधर्मः। तृतीयो "जयं चरे जयं चिट्ठे" इत्यादिना यतना। तदनन्तरमुपदेशः। ततो धर्मफलम्। एते च विस्तरतो दशवैकालिकटीकातः परिभावनीयाः॥ तत्राऽऽस्तामुपस्थापना, कथं स प्रव्राजयितव्यः? इति तदेवोच्यते। तत्र षड्विधो द्रव्यकल्पो वक्तव्य इति तमभिधित्सुराह-

[भा.४१३]पव्वावण मुंडावण, सिक्खावण उवट्ठ संभुंजणा य संवसणा।
एसो उ दवियकप्प, छव्विहतो होति नायव्वो॥

वृ- प्रव्राजना नाम यो धर्मे कथितेऽकथिते वा प्रव्रजामीत्यभ्युत्थितः सः प्रथमतः पृच्छयते कस्त्वम्? कुतो वा समागतः? किंनिमित्तं वा प्रव्रजिष्यति?। तत्र यदा पृच्छापरिशुद्धो भवति तदा प्रवराजयितुमभ्युपगम्यते, अभ्युपगम्य च प्रशस्तेषु द्रव्यादिष्वाचार्य स्वयमेवाष्टाग्रहणं करोति। एतावता प्रव्राजनाद्वारम्। तदनन्तरं स्थिरहस्तेन लोचे कृते रजोहरणमर्पयित्वा तस्य

Jain Education International For Private & Personal Use Only www.jainelibrary.org

सामायिकसूत्रं दीयते, ततः-"सामायिकं मे दत्तम् इच्छामोऽनुशिष्टिम्" इति; सूरयो ब्रुवते-निस्तारकपारगो भव, क्षमाश्रमणानां गुणैर्वर्धस्व। एषा मुण्डापना। "सिक्खावण"त्ति तदनन्तरं द्विविधामपि शिक्षां ग्राह्यते, तद्यथा-ग्रहणशिक्षामासेवनाशिक्षां च। ग्रहणशिक्षा नाम पाठः, आसेवनाशिक्षा समाचारीशिक्षणम्। यदा द्विविधामपि शिक्षां ग्राहितो भवति तदा स उपस्थाप्यते प्रशस्तेषु द्रव्य-क्षेत्रादिषु। द्रव्यतः शालिकरणे इक्षुकरणे चैत्यवृक्षे वा। क्षेत्रतः पद्मसरसि सानुनादे चैत्यगृहे वा। कालतश्चतुर्थ्यष्टम्यादिवर्जितासु तिथिषु। भावतोऽनुकूले नत्रे, यदि तस्य जन्मनक्षत्रं न ज्ञायते तदाऽऽचार्यस्यानुकूले नक्षत्रे सुन्दरे मुहूर्ते यथाजातेन लिङ्गेन; तद्यथा-रजोहरणेन निषद्याद्वयोपेतेन मुखपोतिकया चोलपट्टेन च वामपार्श्वे स्थापयित्वा एकैकं महाव्रतं त्रीन् वारान् उच्चार्यते यावद् रात्रिभोजनम्।

अथ ते द्वौ त्रयो बहवो वा भवेयुस्ततो यथावयोवृद्धम्; अथ ते क्षत्रिया राजपुत्राः तत्र यः स्वत एवासन्नतर आचार्यस्य स रत्नाधिकः क्रियते, इतरो लघुः; अथ द्वावप्युभयतः पार्श्वयोः समौ व्यवस्थितौ तदा तौ द्वावपि समरत्नाधिकौ व्रतेषूच्चारितेषु प्रदक्षिणां कारयित्वा पादयोः पात्यते (पात्येते) भाण्यते (भाण्येते) च-महाव्रतानि ममारोपितानि, इच्छामोऽनुशिष्टिम्, शेषाणामपि साधूनां निवेदयामि। गुरुर्भणति-निवेदय। इदं च भणति-निस्तारकपारगो भव, क्षमाश्रणानां च गुणैर्वर्धस्व। एवमुपस्थिते द्विविधः सङ्ग्रहः साधोः, यथा-अहं तव आचार्य, अमुकस्ते उपाध्यायः। साध्व्यास्त्रीविधः सङ्ग्रहः, त्र तृतीया अमुका ते प्रवर्त्तिनी।

एवमुपस्थाप्य केषाञ्चित् पञ्चकल्याणकं केषाञ्चिदभक्तार्थं केषाञ्चिदाचाम्लं केषाञ्चिन्निर्विकृतिकमपरेषां न किञ्चित्, किं बहुना ? यद् यस्य तपः कर्म आवलिकागतं स तद् दत्त्वा तेन सहैकत्र मण्डल्यां सम्भुङ्क्ते, संवसनं च करोति। शैक्षकपरिपालना चेयम्-यावन्नोपस्थाप्यते तावन्न भिक्षां हिण्डापयितव्यः॥ कथं पुनरुपस्थापनीयः ? इत्यत आह-

[भा.४१४]पढिए य कहिय अहिगय, परिहर उवठावणाए सो कप्पो।
छक्कं तीहि विसुद्धं, परिहर नवगेण भेदेन॥

वृ- सूत्रं प्रथमतः पाठयित्वा तदनन्तरमर्थं कथयित्वा ततः 'अधिगतोऽनेनार्थ, सम्यक् श्रद्धानविषयीकृतश्च' इति परीक्ष्य यदा 'षट्कं' षड्जीवनिकायान् 'त्रिभि' मनो-वाक्-कायैर्विशुद्धं भावतो न परानुवृत्या परिहरति। कथं परिहरति ? इत्यत आह-नवकभेदेन षटकम्, मनसा स्वयं परिहरति अन्यैः परिहारयति परिहरन्तमन्यं समनुजानाति, एवं वाचा कायेन च प्रत्येकं त्रयस्त्रयो भेदा द्रष्टव्याः॥ एष उपस्थापनायाः कल्पः। सम्प्रति विचारकल्पमाह-

[भा.४१५]अप्पत्ते अकहित्ता, अनहिगयऽपरिच्छनम्मि चउगुरुगा।
दोहि गुरू तवगुरुगा, कालगुरू दोहि वी लहुगा॥

वृ- सूत्रे सप्तसप्तकलक्षणे ओधनिर्युक्तिलक्षणे वा अप्राप्ते यदि विचारभूमावेकाकिनं प्रस्थापयति तदा तस्य प्रायश्चित्तं चत्वारो गुरुकाः। ते च द्वाभ्यां गुरुकाः, तद्यथा-तपोगुरुकाः कालगुरुकाश्च। अथ प्राप्तेऽपि श्रुते तदर्थमकथयित्वा कथनेऽपि 'अधिगतस्तदर्थो न वा ?' इत्यपरिज्ञाय अधिगतमपि 'सम्यक् श्रद्दधाति न वा ?' इत्यपरीक्ष्य यदि प्रेषयति तदा प्रत्येकमकथनेऽनधिगमेऽपरीक्षणे च तस्य प्रायश्चित्तं चत्वारो लघुकाः। ते च विचाराधिकारात्

Jain Education International For Private & Personal Use Only www.jainelibrary.org

सर्वत्रापि च द्वाभ्यां लघवः, तद्यथा-तपोलघुकाः काललघुकाश्च । न केवलमेतत् प्रायश्चित्तं किन्त्वाज्ञादयश्च दोषाः । संयमविराधना त्वेवम्-सोऽप्राप्तश्रुतादित्वादेकाकी प्रस्थापितः षट्सु जीवनिकायेषु संज्ञां व्युत्सृजेत्, उड्डाहं चाऽस्थण्डिले व्युत्सृजन् कुर्यात् । विरुद्धदिगादिषु व्युत्सर्जनेनाऽऽयुषोऽपगमत आत्मविराधना ॥ तस्माद्-

[भा.४१६] पढिते य कहिय अहिगय, परिहरति वियारकप्पितो सो उ ।
तिविहं तीहि विसुद्धं, परिहर नवगेन भेदेनं ॥

वृ. यदा सूत्रं सप्तसप्तकादिरूपं पठितं भवति तस्य चार्थ कथितोऽधिगतोऽदिगम्य च सम्यक् श्रद्धानविषयीकृतस्ततो निशीथोक्तेन प्रकारेण परीक्ष्यमाणः 'त्रिविधं' सचित्तमचित्तं मिश्रं च स्थण्डिलं परिहारविषयेण नवकभेदेन 'त्रिभि' मनो-वाक्-कायैर्विशुद्धं परिहरति, तद्यथा-सचित्तं स्थण्डिलं तद् मनसा स्वयं न गच्छति नाप्यन्यान् गमयति न चाप्यन्यं गच्छन्तमनुजानाति। एवंवाचा ३ कायेनापि ३ । एवं मिश्रमचित्तं चापातसंलोकादिदोषदुष्टम् । स भवति विचारकल्पिकः॥ विचारभूमौ गतेन स्थण्डिले उपवेष्टव्यम्, अतः स्थण्डिले वक्तव्ये येऽर्थाधिकारास्तानभिधित-सुर्द्वारगाथामाह-

[भा.४१७] भेया सोहि अवाया, वज्जणया खलु तहा अणुन्ना य ।
कारणविही य जयणा, थंडिल्ले होंति अहिगारा ॥

वृ- प्रथमतो भेदाः स्थण्डिलस्य वक्तव्याः । तदनन्तरं स्थण्डिले व्युत्सृजतः 'शोधि' प्रायश्चित्तम् । ततोऽपायाः । तदनन्तरं वर्जनद्वारम् । ततः परमनुज्ञा । ततः कारणविधि । तदनन्तरं यतना । एते वक्ष्यमाणाः स्थण्डिले अधिकाराः ॥ तत्र प्रथमतो भेदद्वारप्रतिपादनार्थमाह-

[भा.४१८] अच्चित्तेण अचित्तं, मीसेण अचित्त छक्कमीसेणं ।
सच्चित्त छक्कएणं, अचित्त चउभंग एक्केक्के ॥

वृ-अचित्ते स्थण्डिले पन्थानमधिकृत्य त्रयो भेदाः-अचित्तं स्थण्डिलमचित्तेन पथा गम्यते १; अचित्तं मिश्रेण पथा २, केन मिश्रेण ? इत्यत आह-षटकायमिश्रेण; तथा अचित्तं 'सचित्तेन पथा' स पन्थाः सचित्तः, कथम् ? इत्याह-'षट्केन' षडभिर्जीवनिकायैः ३; एवमचित्ते स्थण्डिले त्रयो भेदाः । एवं मिश्रे ३ सचित्ते ३ च । एतेषां अचित्त-मिश्र-सचित्तानामेकैकस्मिन् भङ्गे चतुर्भङ्गी॥ तामेवोपदर्शयति-

[भा.४१९] अनवायमसंलोए, अनवाए चेव होति संलोए ।
आवायमसंलोए, आवाए चेवसंलोए ॥

वृ- अनापातमसंलोकमिति प्रथमो भङ्गः, अनापातं संलोकवदिति द्वितीयः, आपातवदसंलोकमिति तृतीयः, आपातवत् संलोकवदिति चतुर्थः । गाथायां मत्वर्थीयप्रत्ययस्य लोपः प्राकृतत्वात्, अभ्रादित्वाद्वा अकारप्रत्ययः । अमीषां चतुर्णां भङ्गानां प्रथमो भङ्गोऽनुज्ञातः, शेषाः प्रतिक्रुष्टाः । निर्ग्रन्थीनां तृतीयोऽनुज्ञातः ॥ चतुर्थं स्थण्डिलं व्याख्यानयति-

[भा.४२०] तत्थाऽऽवायं दुविहं, सपक्ख-परपक्खतो उ नायव्वं ।
दुविहं होइ सपक्खे, संजय तह संजतीणं च ॥

वृ- 'तत्र' आपातवत्-संलोकवतोर्मध्ये 'आपातम्' आपातवद् द्विविधं ज्ञातव्यम्, तद्यथा-

Jain Education International For Private & Personal Use Only www.jainelibrary.org

'स्वपक्षतः परपक्षतश्च' स्वपक्षापातवत् परपक्षापातवच्चेत्यर्थः । तत्र 'स्वपक्षे' स्वपक्षविषये द्विविधमापातवत्, तद्यथा-'संयतानां संयतीनां च' संयतापातवत् संयत्यापातवच्चेति भावः ॥

[भा.४२१] संविग्गमसंविग्गा, संविग्ग मणुन्न एतरा चेव ।
असंविग्गा वि य दुविहा, तप्पक्खिय एयरा चेव ॥

वृ- संयता अपि द्विविधाः-संविग्ना असंविग्नाश्च । संविग्ना उद्यतविहारिणः, असंविग्नाः शिथिलाः पार्श्वस्थादयः । संविग्ना अपि द्विविधाः-'तत्पाक्षिकाः' संविग्नपाक्षिकाः 'इतरे' असंविग्नपाक्षिकाः ॥ उक्तं स्वपक्षापातवत् । सम्प्रति परपक्षापातवत् प्राह-

[भा.४२२] परपक्खे वि य दुविहं, माणुस तेरिच्छगं च नायव्वं ।
एक्केक्कं पि य तिविहं, पुरिसित्थि नपुंसगं चेव ।

वृ- 'परपक्षेऽपि' परपक्षविषयेऽप्यापातवद् द्विविधं ज्ञातव्यम्-'मानुषं तैरश्चं च' मनुष्यापातवत् तिर्यगापातवच्चेत्यर्थः । 'एकैकमपि' मानुषं तैरश्चं च त्रिविधम्, तद्यथा-पुरुषवत् स्त्रीवद् नपुंसकच्च, पुरुषापातवत् स्त्र्यापातवद् नपुंसकापातवच्चेति भावः ॥

[भा.४२३] पुरिसावायं तिविहं, दंडिय कोडुंबिए य पागइए ।
ते सोयऽ-सोयवादी, एमेव नपुंस-इत्थीसु ॥

वृ- 'पुरुषापातं' पुरुषापातवत् त्रिविधम्, तद्यथा-'दण्डिके कौटुम्बिके प्राकृते च' दण्डिकपुरुषापातवत् कौटुम्बिकपुरुषापातवत् प्राकृतपुरुषापातवच्चेत्यर्थः । दण्डिका राजकुलानुगताः, कौटुम्बिकाः शेषा महर्द्धिकाः, इतरे प्राकृताः । 'ते च' त्रयोऽपि प्रत्येकं द्विविधाः-शौचवादिनोऽशौचवादिनश्च । 'एवमेव' अनेनैव प्रकारेण नपुंसक-स्त्रयोरपि वक्तव्यम् । किमुक्तं भवति ?-नपुंसकापातवत् स्त्र्यापातवच्च प्रत्येकं प्रथमतो दण्डिकादिभेदतस्त्रिविधम् । ततः शौचवाद्यशौचवादिभेदतः पुनरेकैकं द्विविधम् ॥

उक्तं मनुष्यापातवद् । अधुना तिर्यगापातवदाह-

[भा.४२४] दित्तमदित्ता तिरिया, जहन्नमुक्कोस मज्झिमा तिविहा ।
एमेवेत्थि-नपुंसा, दुगुंछिय-ऽदुगुंछिया नवरं ॥

वृ- तिर्यञ्चो द्विविधाः-दृप्ता अदृप्ताश्च । दृप्ता दर्पवन्तः, अदृप्ताः शान्ताः । ते प्रत्येकं त्रिविधाः-जघन्या उत्कृष्ट मध्यमाश्च । जघन्या एडकादयः, मध्यमा महिषादयः, उत्कृष्टा ,हस्त्यादयः । एते किल पुरुषा उक्ताः । एवमेव स्त्री-नपुंसका अपि वक्तव्याः । नवरं ते दृप्ता अदृप्ताश्च प्रत्येकं द्विविधा विज्ञेयाः, तद्यथा-जुगुप्सिता अजुगुप्सिताश्च । जुगुप्सिता गर्दभ्यादयः, इतरे अजुगुप्सिताः। उक्तमापातवत् । संलोकवद् मनुष्येष्वेव द्रष्टव्यम् । ते च मनुष्यास्त्रीविधाः, तद्यथा-पुरुषाः स्त्रयो नपुंसकाश्च । एकैके प्रत्येकं त्रिविधाः-प्राकृताः कौटुम्बिका दण्डिकाश्च । पुनरेकैके द्विविधाः-शौचवादिनोऽशौचवादिनश्च । उक्तञ्च-

आलोगो मनुएसुं, पुरिसित्थि-नपुंसगाण बोधव्वो ।
पायय कुडुंबि दंडिय, असोय तह सोयवादीणं ॥

तदेवमापात-संलोकौ चरमभङ्गे, द्वितीयेऽऽपातः, तृतीये संलोकः । उक्ता भेदप्रभेदयुक्ता एते स्थण्डिलभेदाः ॥ गतं भेदद्वारम् । अधुना शोधिद्वारमाह-

Jain Education International For Private & Personal Use Only www.jainelibrary.org

[भा.४२५] मनुय-तिरिएसु लहुगा, चउरो गुरुगा य दित्ततिरिएसु।
तिरियनपुंसित्थीसु य, मनुयत्थि-नपुंसगे गुरुगा ।।

वृ-मनुष्याणां शौचवादिनां पुरुषाणां तिरश्चां च पुरुषाणामदृप्तानामापाते गाथायां सप्तमी षष्ठ्यर्थे संज्ञां व्युत्सृजतः प्रायश्चित्तं चत्वारो लघुकाः । "गुरुगा य दित्ततिरिएसु" इति दृप्तानां तिरश्चामापाते चत्वारो गुरुकाः । तथा 'तिर्यङ्नपुंसक-स्त्रीषु' तिर्यग्योनीनां नपुंसक-स्त्रीणां दृप्तानामापाते "मणुस्सत्थी (मनुयत्थि) नपुंसगे" इति मनुष्याणां स्त्री-नपुंसकानां शौचवादिनामापाते प्रत्येकं प्रायश्चित्तं चत्वारो गुरुकाः । तथा 'तिर्यङ्नपुंसक-स्त्रषु' तिर्यग्योनीनां नपुंसक-स्त्रीणां दृप्तानामापाते "मनुस्सत्थी (मनुयत्थि) नपुंसगे" इति मनुष्याणां स्त्री-नपुंसकानां शौचवादिनामापाते प्रत्येकं प्रायश्चित्तं चत्वारो गुरुकाः ।।

[भा.४२६] मनुय-तिरियपुंसेसुं, दोसु वि लहुगा तवेण कालेण ।
कालगुरू तवगुरुगा, दोहि गुरू अद्धोकंती वा ।।

वृ-मनुष्याणामशौचवादिनां पुरुषाणां तिरश्चामदृप्तानां पुरुषाणामापाते द्वयानामपि पृथक् पृथक् प्रायश्चित्तं चत्वारो लघुकास्तपसा कालेन च लघवः । मनुष्यस्त्री-नपुंसकानामशौचवादिनामापाते चत्वारो गुरुकाः द्वाभ्यां गुरुकाः, तद्यथा-कालगुरुकास्तपोगुरुकाः । अर्द्धापक्रान्तिर्वा द्रष्टव्या । सा चैवम्-तिरश्चां दृप्तानां पुरुषाणामापाते मनुष्याणां गृहिणां पाषण्डिनां वा पुरुषाणामशौवादिनामापाते चत्वारो लघुकाः कालगुरुकाः, तिर्यकस्त्र-नपुंसकानमदृप्ताना-मजुगुप्सितानामापाते कालगुरुकाः चत्वारो लघुकाः, तेषामेव तिर्यकस्त्री-नपुंसकानां दृप्तानां जुगुप्सितानां चापाते चत्वारो लघुकास्तपोगुरवः, मनुष्यस्त्री-नपुंसकानामशौचवादिनामपि त एव तपोगुरवश्चत्वारो लघुकाः ।। इयमेकेषामाचार्याणां मतेनार्द्धावक्रान्तिरुपदर्शिता । सम्प्रति भाष्यकारोऽन्यथाऽर्द्धावक्रान्तिमाह-

[भा.४२७] पागय कोडुंबिय दंडिए य अस्सोय-सोयवादीसु ।
चउगुरुगा जमलपया, अहवा चउ छ च्च गुरु-लहुगा ।।

वृ-प्राकृते कौटुम्बिके दण्डिनि च प्रत्येकमशौचवादिनि शौचवादिनि चार्द्धावक्रान्तिरवसेया। सा चैवम्-प्राकृतानामशौचवादिनां पुरुषाणामापाते चत्वारो लघुकास्तपसा कालेन च लघवः, तेषामेव शौचवादिनां प्राकृतपुरुषाणामापाते त एव चत्वारो लघवः कालगुरुकाः; कौटुम्बिकानामशौचवादिनां पुरुषाणामापाते कालगुरुकाश्चत्वारो लघवः, तेषामेव कौटुम्बिकपुरुषाणां शौचवादिनामापाते चत्वारो लघवस्तपोगुरुकाः; दण्डिकपुरुषाणामशौचवादिनामापाते तपोगुरुकाश्चतुर्लघवः, तेषामेव शौचवादिनामापाते चतुर्लघवो द्वाभ्यां गुरुकास्तपसा कालेन च । उक्तञ्च-

पागइयऽसोयवादी, पुरिसाणं लहुग दोहि वी लहुगा ।
ते चेव य कालगुरू, तेसिं चिय सोयवादीणं ।।
ते च्चिय लहु कालगुरू, कोडुंबीणं असोयवादीणं ।
तेसिं चिय ते चेव उ, तवगुरुगा सोयवादीणं ।।
दंडिय असोय ति च्चिय, सोयम्मि य दोहि गुरुग चउलहुगा ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

एस पुरिसाण भणिओ, इत्थि-नपुंसाण वी एवं ॥

"चउगुरुगा जमलपदा" इति 'यमलपदानि' स्त्री-नपुंसकलक्षणानि चतुर्गुरुकानि वक्तव्यानि। तानि चैवम्-प्राकृतस्त्रीणामशौचवादिनीनामापाते चत्वारो गुरुकाः द्वाभ्यां लघवः, तद्यथा-तपसा कालेन च, तासामेव शौचवादिनीनां चत्वारो गुरुकाः कालगुरवः; कौटुम्बिकस्त्रणामशौचवादिनीनामापाते कालगुरवश्चत्वारो गुरुकाः, तासामेव शौचवादिनीनामापाते तपोगुरुकाश्चत्वारो गुरवः; एवमेव दण्डिकस्त्रीणामशौचवादिनीनामपि, शौचवादिनीनां च चत्वारो गुरुका द्वाभ्यां गुरुवस्तपसा कालेन च; एवमेव नपुंसकानामप्यापाते वक्तव्यम्। अत्रैव मतान्तरमाह-अथवा स्त्रीणामापाते चतुर्गुरुका उक्तप्रकारेण तपसा कालेन च विशेषिताः। नपुंसकानामापाते षडलघवो यथोक्तक्रमेण तपः-कालविशेषिताः॥ सम्प्रति तिर्यगापातमधिकृत्यार्द्धापक्रान्तिमाह-

[भा.४२८] तिरिएसु वि एवं चिय, अदुगुंछ-दुगुंछ-दित्त-ऽदित्तेसु।

अमणुन्नेयर लहुगो, संजतिवग्गम्मि चउगुरुगा॥

वृ- 'एवमेव' अनेनैव प्रकारेण तिर्यक्ष्वजुगुप्सित-जुगुप्सित-दृप्ता-ऽदृप्तेष्वर्द्धापक्रान्तिरवसेया, तद्यथा-प्राकृतपुरुषगृहीतानामदृप्तानां तिर्यक्पुरुषाणामापाते चत्वारो लघवो द्वाभ्यां लघुकास्तपसा कालेन च, तेषामेव च दृप्तानां त एव चत्वारो लघवः कालगुरुकाः; कौटुम्बिकपरिगृहीतानामपि तिर्यक्पुरुषाणामदृप्तानामापाते च त एव कालगुरुकाश्चत्वारो लघवः, तेषामेव दृप्तानां तपोगुरुवश्चत्वारो लघुकाः; दण्डिकपरिगृहीतानां तिर्यक्पुरुषाणामदृप्तानामापाते त एव चत्वारो लघवस्तपोगुरुकाः, तेषामेव दृप्तानामापाते चतुर्लघुका द्वाभ्यां गुरवस्तपसा कालेन च; तथा प्राकृतपरिगृहीतानां स्त्रीणां नपुंसकानां च तिरश्चामजुगुप्सितानामापाते चत्वारो गुरुका द्वाभ्यां लघवस्तपसा कालेन च, तेषामेव जुगुप्सितानामापाते चत्वारो गुरुकाः कालगुरवः; कोटुम्बिकपरिगृहीतानां तिर्यकस्त्री-नपुंसकानामापाते त एव कालगुरुकाश्चत्वारो गुरवः, तेषामेव जुगुप्सितानामापाते चत्वारो गुरुकास्तपोगुरवः; एत एव दण्डिकपरिगृहीतानामपि तिर्यकस्त्री-नपुंसकानामदृप्तानामापाते द्रष्टव्याः, दृप्तानामापाते चत्वारो गुरुका द्वाभ्यां गुरवः कालेन तपसा च। उक्ता तिर्यक्ष्वप्यर्द्धापक्रान्ति, सम्प्रति स्वपक्षापाते शोधिमाहअमनोज्ञानाम्-असाम्भोगिकानां संविग्नानाम् इतरेषां च-असंविग्नानामापाते प्रायश्चित्तं लघुको मासः। 'संयतीवर्गे समापतति' संयतीनामापाते चत्वारो गुरुकाः॥ सम्प्रति प्रागुक्तमेवार्थमुपदिदर्शयिषुराह-

[भा.४२९] भद्दतिरी पासंडे, मनुयाऽसोएहि दोहि लहु लहुगा।

कालगुरू तवगुरुगा, दोहि गरू अट्ठोकंति दुगे॥

वृ- भद्रेषु-अदृप्तेषु तिर्यक्षु पुरुषेषु मनुष्येषु गृहस्थेषु पाषण्डिषु चाऽशौचवादिष्वापतत्सु चत्वारो लघुकाः द्वाभ्यां लघवः। मनुष्यस्त्र-नपुंसकानां शौचवादिनामापाते चत्वारो गुरुका द्वाभ्यां गुरवः, तद्यथा-तपोगुरुकाः कालगुरुकाश्च। शेषेषु तु तिर्यग्-मनुष्यभेदेषु 'द्विके' तपः-काललक्षणे 'अर्द्धापक्रान्ति' कचित् तपोगुरुका कचित् कालगुरुकेत्येवंरूपाऽवसातव्या। सा चप्राक् प्रदर्शिता॥

गतं शोधिद्वारम्। इदानीमपायद्वारमाह-

[भा.४३०] अमणुन्नेयरगमणे, वितहायरणम्मि होइ अहिगरणं।

पउरदवकरण दट्ठुं, कुसील सेहादिगमनं च॥

वृ-अमनोज्ञानाम्-असाम्भोगिकानां संविग्नानाम इतरेषां च-असंविग्नानां गमने-आपाते सति वितथाचरणे दृश्यमाने भवति परस्परमधिकरणम्। इयमत्र भावना-आचार्याणां परस्परमन्यथा सामाचार्य, ततोऽसाम्भोगिकानां सामाचारीवितथाचरणदर्शने 'नैषा सामाचारी' इति परस्परमधिकरणं प्रवर्त्तते। इतरे कुशीलाः पार्श्वस्थादयस्ते प्रचुरेण वारिणा पुतप्रक्षालनं कुर्वन्ति, ततस्तेषां कुशीलानां प्रचुरद्रवेण पुनर्निर्लेपकरणं दृष्ट्वा शैक्षकाणाम् आदिशब्दात् शौचवादिनां मन्दधर्मिणां च गमनं तेषां समीपे भवति ॥

[भा.४३१] निग्गंथाणं पढमं, सेसा खलु होंति तेसि पडिकुट्ठा।
दव अप्प कलुस असती, अवण्ण पुरिसेसु पडिसेहो ॥

वृ-यत एवमापाते दोषास्तस्मान्निर्ग्रन्थानां प्रथमं स्थण्डिलम्-अनापातमसलोकमित्येवंरूपम्, शेषाणि त्रीणि खलु 'तेषां' निर्ग्रन्थानां 'प्रतिक्रुष्टानि' प्रतिषिद्धानि। अथ परपक्षापातं तत्रापि पुरुषापातं व्रजति तदा नियमतो द्रवमकलुषं परिपूर्णं च नेतव्यम्, अन्यथा 'द्रवे' पानीये अल्पे कलुषे वा यदि वा 'असति' विना पानीयेन गतो भवेत् ततस्ते दृष्ट्वा 'अवर्णम्' अश्लाघां कुर्युः, यथा-अशुचयोऽमी, न केवलमवर्णं कुर्युः किन्तु प्रतिषेधोऽपि तैः क्रियते, यथा-मा कोऽप्यमीषामशुचीनां भक्तं पानं वा दद्यात्। एष पुरुषेषु-पुरुषापाते दोषः ॥

सम्प्रति स्त्री-नपुंसकापाते दोषानाह-

[भा.४३२] आय पर तदुभए वा, संकाईया हवंति दोसाओ।
पंडित्थिसंगगहिते, उड्डाहो पडिगमनमादी ॥

वृ- स्त्रीणां नपुंसकानां चापाते आत्मनि परे तदुभयस्मिन् वा शङ्कादयो दोषा भवन्ति। तत्रात्मनि साधुः शङ्काविषयीक्रियते, यथा-एष किमप्युद्भामयति ? ; परैः स्त्र नपुंसको वा शङ्कयते, यथा-एते पापकर्माण एनं साधुं कामयन्ते इति; तदुभयस्मिन् यथा-द्वावप्येतौ परस्परमत्र मैथुनार्थमागतौ। तदेवमुक्ता शङ्का। आदिशब्दादवर्णादिदोषपरिग्रहः। तथा स्त्र्यापाते नपुंसकापाते वा स साधुरात्म-परोभयसमुत्थेन दोषेण स्त्र्या पण्डकेन वा सार्द्धसङ्गं-मैथुनं कुर्यात्, तत्र केनचिदगारेण दृष्ट्वा गृहीतः स्यात् ततः प्रवचनस्योड्डाहः। तथा स उड्डाहित इति कृत्वा प्रतिगमनादीनि कुर्यात् ॥
अस्मिन्नेव चतुर्थे स्थण्डिले तिर्यगापाते दोषानाह-

[भा.४३३] आहननादी दित्ते, गरहियतिरिएसु संकमादीया।
एमेव य संलोए, तिरिए वज्जित्तु मनुएसु ॥

वृ-'दृप्ते' दृप्ततिर्यगापाते आहननादयो दोषाः। आहननं श्र ङ्गादिभिस्ताडनम्, आदिशब्दाद् मूर्च्छागमन-मारणादिपरिग्रहः । 'गर्हितेषु तिर्यक्षु' गर्हिततिर्यकस्त्र-नपुंसकापाते शङ्का मैथुने, आदिशब्दात् प्रतिसेवेतापीत्यादयो दोषाः। यथा आपाते दोषा उक्ता एवमेव संलोकेऽपि तिर्यग्योनिकान् वर्जयित्वा मनुष्येषु द्रष्टव्याः। किमुक्तं भवति ?-एषां संलोके नास्ति कश्चिदनन्तरोदितो दोषः, मनुष्याणां तु स्त्री-पुरुष-नपुंसकानां संलोके ये आपाते दोषास्ते देवितव्याः ॥
यद्यपि कदाचिदात्म-परोभयसमुत्था मैथुने दोषा न भवेयुस्तथाप्यमी सम्भाव्यन्ते-

[भा.४३४] जत्थऽम्हे पासामो, जत्थ य आयरइ नातिवग्गो णे।
परिभव कामेमाणो, संकेयगदिन्नको वा वि ॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

वृ- यत्र वयममुमागच्छन्तं पश्यामो यत्र चाऽस्माकं ज्ञातिवर्गो निरन्तरम् 'आचरति' विचारार्थमागच्छति तत्रास्माकं परिभवं कामयमानो दत्तसङ्केतो वा समागच्छति ॥ किञ्च-

[भा.४३५] कलुस दवे असतीय व, पुरिसालोए हवंति दोसाओ।
पंडित्थीसु वि य तहा, खद्धे वेउव्विए मुच्छा ॥

वृ- 'द्रवे' पानीये कलुषे 'असति' अविद्यमाने वा पुरुषालोके 'दोषाः' प्रागुक्ता अवर्णादयो भवन्ति। तथा पण्डः-नपुंसकः, पण्डेषु स्त्रीषु च संलोकमानेषु खद्धे वैकुर्विके वा सागारिके दृष्टे मूर्च्छा भवेत्। इयमत्र भावना-नपुंसकः स्त्री वा सागारिकं स्वभावत एवातिस्थूलं लम्बं च यदि वा कषायितम् अथवा वातदोषेण वैकुर्विकं दृष्ट्वा तद्विषयाभिलाषमूर्च्छामापन्ना तं साधुमुपसर्गयेत् तस्मात् त्रयाणामपि संलोको वर्जनीयः ॥

गतं चतुर्थं स्थण्डिलम्, इदानीं तृतीयमापातवदसंलोकमधिकृत्य दोषानाह-

[भा.४३६] आयसमुत्था तिरिए, पुरिसे दव कलुस असति उड्डाहो।
आयोभय इत्थीसुं, अतिंति निंते य आसंका ॥

वृ- तिर्यगापाते आत्मसमुत्था दोषाः, तद्यथा-स्त्रीणां नपुंसकानां चापाते मैथुनाशङ्कादयो दोषाः। दृप्तानां तिर्यक्पुरुषाणामापाते आत्मन उपघातः। तथा 'पुरुषे' मनुष्यपुरुषापाते द्रवे कलुषे असति वा प्रवचनस्योड्डाहः। तथा स्त्रीषु चशब्दान्नपुंसकेष्वागच्छत्सु गच्छत्सु च 'आत्मोभयविषया' आत्मोभयग्रहणं परस्योपलक्षणं आत्म-परोभयविषया आशङ्का। सा च प्रागेव भाविता ॥

[भा.४३७] आवायदोस तइए, बिइए संलोयतो भवे दोसा।
ते दो वि नत्थि पढमे, तहि गमणं तत्थिमा मेरा ॥

वृ- तृतीये स्थण्डिले आपातदोषः, द्वितीये च संलोकतो दोषा भवन्ति ते वेदितव्याः। ते च 'द्वयेऽपि' आपातदोषाः संलोकदोषाश्च प्रथमे स्थण्डिले न सन्ति ततस्तत्र गमनं विधेयम्। तत्रेयं मर्यादा ॥ तामेवाह-

[भा.४३८] कालमकाले सन्ना, कालो तइयाए सेसगमकालो।
पढमा पोरिसि आपुच्छ पानगमपुप्फिअन्नदिसिं ॥

वृ- द्विविधा संज्ञा, तद्यथा-कालेऽकाले च। तत्र काले तृतीयस्यां पौरुष्याम्, 'शेषकं' सर्वमपि प्रातः प्रभृतिकमकालः। तत्र तावदकालसंज्ञायां विधिरुच्यते 'कथं गन्तव्यम्?'-तत्र यदि प्रथमायां पौरुष्यां भवेत् तदा पात्रमुद्राह्य पानकनिमित्तं व्रजति; अथ नोद्राहयति पात्रं ततो लोको जानीयात्, यथा-एष बहिर्गमनिमित्तं पानीयं गृह्णाति, ततश्चतुर्थरसिकं न दद्यात्। अपि चोद्राहिते पात्रेऽयमधिको गुणः-कोऽपि श्राद्धो ग्रामान्तरं नगरान्तरं वा गन्तुकामः प्रधावितः श्रद्धायामुत्पन्नायां तं प्रतिलाभयेत्, सोऽपि लाभो भवति शङ्काऽपि च नोपजायते, यथा-एष बहिर्गमनाय पानकनिमित्तं हिण्डते। स पुनः कीदृशं पानीयं गृह्णीयाद्? अत आह- 'अपुष्पितं' अच्छं सुगन्धं चतुर्थरसिकम्, न भवति तादृशं त उष्णोदकादि गृह्णीयात्। "अन्नदिसिमिति यस्यां दिशि संज्ञाभूमि तस्यां पानकस्य न गन्तव्यम्, यदि पुनस्तस्यां गच्छति ततोऽतिरिक्तं ग्रहीतव्यम्। यदि द्वौ जनौ तदा तथा गृह्णाति यथा तृतीयस्याप्युद्धरति, किं बहुना ? यावन्तो

Jain Education International For Private & Personal Use Only www.jainelibrary.org

व्रजन्ति तावतां योग्यमरिक्तं तथा गृह्णाति यथैकस्योद्धरति । एवं पानीयं गृहीत्वा समागतो बहि प्रतिश्रयस्य पादौ प्रमार्ज्य दण्डकं स्थापयित्वा ऐर्यापथिकी प्रतिक्रम्य आलोच्य गुरोः पानकं दर्शयित्वाऽऽपृच्छति । गुरुमापृच्छय संज्ञाभूमिं व्रजामि' इति गच्छति । तत्र यद्यन्योऽपि कश्चिद्व्रजति तर्हि यथैकस्योद्धरति तावत्प्रमाणं मात्रके पानकं गृह्णाति । तच्चोद्ग्राहितं पात्रमन्यस्य समर्प्य दण्डकं प्रमार्ज्य आवश्यिकीं कृत्वा व्रजति । यथोक्तविधेरकरणे सर्वत्र प्रायश्चित्तं मासलघु ॥

उक्तमेवार्थं स्पष्टतरमुपदर्शयति-

[भा.४३९] अतिरेगगहणमुग्गाहियम्मि आलोय पुच्छियं गच्छे ।
एसा उ अकालम्मी, अणहिंडिय हिंडिए काले ॥

वृ- पात्रे उद्ग्राहिते एकजनातिरेकेण पानीयस्य ग्रहणं कर्त्तव्यम् । कृत्वा च गुरोः पुरत आलोच्य गुरुमापृच्छय संज्ञाभूमिं गच्छेत् । एषाऽकाले संज्ञा उक्ता । सम्प्रति कालसंज्ञा वक्तव्या- 'काले' कालसंज्ञा अहिण्डिते हिण्डिते वा । इयमत्र भावना-तृतीयस्यां पौरुष्यां कालस्य प्रतिक्रमणे कृते यावन्नाद्यापि भिक्षावेला भवति तावत् संज्ञाभूमिं व्रजति; अथवा हिण्डिते समुद्दिष्टे भाजनेषु च प्रदत्तकल्पेषु यावन्नावगाहते चतुर्थपौरुषीकालस्तावद्गच्छति; अथोरसूरे भिक्षावेला चिरं वा हिण्डितस्ततोऽवगाढायामपि चरमपौरुष्यां गच्छति ॥ तत्र को विधिः ? इत्याह-

[भा.४४०] कप्पेऊणं पाए, एक्केक्कस्स उ दुवे पडिग्गहगे ।
दाउं दो दो गच्छे, तिण्हट्ठ दवं च घेत्तूणं ॥

वृ- 'पात्राणि कल्पयित्वा' त्रीन् कल्पान् पात्राणां निर्लेपनाय दत्त्वा 'एकैकस्य' आत्मीयात्मीयसङ्घाटकस्य द्वौ द्वौ पतद्ग्रहकौ दत्त्वा द्वौ द्वौ । संज्ञाभूमिं गच्छेयाताम् । कथम् ? इत्याह-त्रयाणामर्थाय द्रवं गृहीत्वा । पानकं हि तावत्प्रमाणं ग्रहीतव्यं यावत् पश्चादेकस्योद्धरति । इयमत्र भावना-ये ये सङ्घाटवन्तस्तेषां तेषामेको द्वौ पतद्ग्रहौ धारयति, द्वितीयश्चान्येन समं याति, तेषु चागतेषु ये प्रागितरे स्थितास्ते व्रजन्ति, इतरे चागताः पात्राणि धारयन्ति, यावन्तश्च गच्छन्ति तावतां योग्यमेकातिरिक्तं पानकं मात्रके गृह्णन्ति ॥ कथं पुनस्ते गच्छन्ति ? इत्यत आह-

[भा.४४१] अजुयलिया अतुरिया, विगहारहिया वयंति पढमं तु ।
निसिइत्तु डगलगहणं, आवडणं वच्चमासज्ञा ॥

वृ- 'अयुगलिताः' न समश्रेणीकयुगलरूपतया स्थिताः 'अत्वरिताः' त्वरिरहिताः 'विकथारहिताः' स्त्री-भक्तादिकथा अकुर्वाणाः 'प्रथमम्' अनापातासंलोकलक्षणं स्थण्डिलं व्रजन्ति। तत्र 'निषद्य' उपविश्य नोर्द्धस्थिता इत्यर्थः, ऊर्द्धवस्थितानां सम्यक्प्रत्युपेक्षणाऽसम्भवात् 'डगलग्रहणं कुर्वन्ति' ये भूमावसम्बद्धाः पुतनिर्लेपनाय लेष्टुकास्ते डगलकास्तानाददते, आदाय चैतेषां भूमावापतनं कुर्वन्ति येन वृश्चिकादिस्ततोऽपसरति । उक्तञ्च- "ते डगले टिट्टिवेइ ततो जो तत्थ विच्छुगादी सोऽवसरति" त्ति । तेषां च डगलकानां प्रमाणं 'वर्च' पुरीषमासाद्य प्रतिपत्तव्यम् । यो भिन्नवर्चा स त्रीन् डगलकान् गृह्णाति, अन्यो द्वावेकं वा ॥

[भा.४४२] आलोइऊण य दिसा, संडासगमेव संपमज्जित्ता ।
पेहिय पमज्जिएसु य, जयणाए थंडिले निसिरे ॥

वृ- स्थण्डिलं गत्वा तत्र दिशामापात-संलोकवर्जनार्थमालोकं कुर्यात् । दिश आलोक्य

Jain Education International For Private & Personal Use Only www.jainelibrary.org

तदनन्तरं सण्डासकं सम्प्रमार्ज्य प्रेक्षितेषु प्रमार्जितेषु च भूप्रदेशेषु स्थण्डिले पुरीषं 'निसृजेत्' व्युत्सृजेत् । कथम् ? इत्याह-'यतनया' "दिसि पवन गाम सूरिए" त्यादिवक्ष्यमाणलक्षणया । तत् पुनरनापातासंलोकं स्थण्डिलमेभिर्वक्ष्यमाणैर्दशभि स्थानैर्विशुद्धं ज्ञातव्यम् ।। तान्येवाह-

[भा.४४३] अनावायमसंलोए, परस्स अनुवघातिए ।
समे अज्झुसिरे यावि, अचिरकालकयम्मि य ।।

[भा.४४४] विच्छिन्ने दूरमोगाढेऽनासन्ने बिलवज्जिए ।
तसपाण-बीयरहिए, उच्चारादीणि वोसिरे ।।

वृ- अनापातमसंलोकं १ परस्यानौपघातिकं २ समं ३ अशुषिरं ४ अचिरकालकृतं ५ विस्तीर्णं ६ दूरमवगाढं ६ अनासन्नं ८ बिलवर्जितं ९ त्रसप्राण-बीजरहितं १० यत् स्थण्डिलं तत्र 'उच्चारादीनि' उच्चार-प्रश्रवणप्रभृतीनि व्युत्सृजेत् ।।

एष एककः संयोगो दर्शितः । सम्प्रति द्विकादिसंयोगानुपदर्शयति-

[भा.४४५] एग-दु-ती-चउ-पंचग-छग-सत्तग-अट्ठ-नवग-दसगेहिं ।
संजोगा कायव्वा, भंगसहस्सं चउव्वीसं ।।

वृ- अमीषामनन्तरोदितानां दशानां पदानामेक-द्वि-त्रि-चतुः-पञ्च-षट्-सप्ता-ऽष्ट-नव-दशकैः संयोगाः कर्त्तव्याः । तेषु च भङ्गाः स्वसङ्ख्यया 'चतुर्विंशं' चतुर्विंशत्यधिकं सहस्रम् ।

अथ कस्मिन् संयोगे कियन्तो भङ्गकाः ? उच्यते-इह भङ्गानामानयनाय करणमिदम्- दशादयोऽङ्का एकैकेन हीनास्तावत् स्थाप्यन्ते यावत् पर्यन्त एकः । ततस्ते यथाक्रममेभी राशिभिर्गुणयितव्याः, तद्यथा-दशक एककेन, नवकः पञ्चभि, अष्टकः पञ्चदशभिः, सप्तकस्त्रींशता, षट्को द्वाचत्वारिंशता, पञ्चकोऽपि द्वाचत्वारिंशता चतुष्कस्त्रशता, त्रिकः पञ्चदशभि, द्विकः पञ्चकेन, एकक एककेन । अमीषां चामीभिर्गुणाकारैर्गुणने जाता एककादिसंयोगेष्वियं भङ्गसङ्ख्या, तद्यथा-एककसंयोगे दश, द्विकसंयोगे पञ्चचत्वारिंशत्, त्रिकसंयोगे विंशं शतम्, चतुष्कसंयोगे द्वे शते दशोत्तरे, पञ्चकसंयोगे द्वे शते द्विपञ्चाशदधिके, षट्कसंयोगे द्वे शते दशोत्तरे, सप्तकसंयोगे विंशं शतं, अष्टकसंयोगे पञ्चचत्वारिंशत्, नवकसंयोगे दश, दशकसंयोगे एकः; एकं च वसत्यादषु विविक्ते प्रदेशे स्थण्डिलमिति । सर्वभङ्गसङ्ख्या एकत्र मीलयित्वा रूपाधिका क्रियते ततश्चतुर्विंशं भङ्गसहस्रं भवति ।

भंगानयने करणं, दसगातो ओसरंतो जावेक्को ।
एए उ गुणेयव्वा, इमेहिं रासीहिं जहकमसो ।।
एक्कग पंचग पन्नर, तीसा बायाल पंच जा ठाणा ।
परतो बायालीसा, पडिलोममवेहि जावेक्को ।।
एक्कगसंजोगादी, गुणिया लद्धा हवंति एमेते ।
मिलिया रूवाहिकया, भंगसहस्सं चउव्वीसं ।।

सम्प्रत्येतानि दश शुद्धानि पदानि व्याख्यातव्यानि । ये च यत्र दोषास्ते तत्र कथनीयाः । तत्राऽऽपातवत् संलोकवच्च पूर्वं व्याख्यातम् । इदानीं परस्योपघातिकमाह-

[भा.४४६] आया पवयण संजम, तिविहं उवघातियं मुणेयव्वं ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

आराम वच्च अगनी, घायादऽसुती य अन्नत्थ ॥

वृ- इह पूर्वार्द्धपदानां पश्चार्द्धपदानां च यथाक्रमं योजना । सा चैवम्-'औपघातिकम्' उपघातप्रयोजनकं स्थण्डिलं त्रिविधं ज्ञातव्यम्, तद्यथा-आत्मोपघाति प्रवचनोपघाति संयमोपघाति च । तत्राऽऽत्मोपघाति आरामः, तत्र हि संज्ञां व्युत्सृजतो 'घातादि' पिट्टनादि । प्रवचनोपघाति 'वर्च' वर्चोगृहम्, तद्धि जुगुप्सितसमशुच्यात्मकत्वात्, ततस्तत्र संज्ञाव्युत्सर्गे ईद्दशा एते इति प्रवचनोपघातः । संयमोपघाति 'अग्नि' अग्निस्थानम्, तत्र हि संज्ञाव्युत्सर्गे तेऽग्न्यारम्भिणः 'अन्यत्र' अस्थण्डिलेऽग्निस्थानं कुर्वन्ति त्यजन्ति वा तां संज्ञामस्थण्डिले ॥

सम्प्रति विषमे स्थण्डिले दोषानाह-

[भा.४४७] विसम पलोट्टणि आया, इयरस्स पलोट्टणम्मि छक्काया ।
झुसिरम्मि विच्छुगादी, उभयक्कमणे तसादीया ॥

वृ- विषमे स्थण्डिले साधुः प्रलोटेत-पतेदिति भावः, तत्र चाऽऽत्मा विराध्येत । 'इतरस्य' पुरीषस्य प्रश्रवणस्य च प्रलोटने षट् काया विराध्यन्ते, तथाहि प्रतीतमेतत्-पुरीषं प्रश्रवणं वा प्रलोटत् षट् कायान् विराधयति, एषा संयमविराधना । झुषिरे दोषानाह-झुषिरे संज्ञादि व्युत्सृजतो वृश्चिकादिभिरात्मनो विराधना, आदिशब्दात् सर्पादिपरिग्रहः । उभयं-संज्ञा प्रश्रवण तेनाऽऽक्रमणे 'त्रसादयः' त्रस-स्थावरप्राणा विराध्यन्ते, एषा संयमविराधना ॥ अथ कीदृशं चिरकालकृतं स्थण्डिलम् ? अत आह-

[भा.४४८] जे जम्मि उउम्मि कया, पयावणादीहि थंडिला ते उ ।
होंति इयरे चिरकया, वासावुत्थे य बारसगं ॥

वृ- यानि स्थण्डिलानि यस्मिन् ऋतौ प्रतापनादिभि कृतानि तानि तस्मिन्नचिरकालकृतानि भवन्ति । यथा-हेमन्ते कृतानि हेमन्त एवाचिरकालकृतानि । 'इतराणि तु' ऋत्वन्तरव्यवहितानि चिरकालकृतानि, अस्थण्डिलानि तानीति भावः । यत्र पुनरेकं वर्षारात्रं सगोधनो ग्राम उषितस्तत्र 'द्वादशकं' द्वादश संवत्सराणि स्थण्डिलम्, ततः परमस्थण्डिलं भवति ॥ सम्प्रति विस्तीर्णमाह-

[भा.४४९] हत्थायामं चउरस, जहन्न उक्कोस जोयणबिछक्कं ।
चउरंगुलप्पमाणं, जहण्णयं दूरमोगाढं ॥

वृ- जघन्यं विस्तीर्णं 'चतुरस्रं' चतसृष्वपि दिक्षु हस्तायामम्, उत्कृष्टं 'योजनद्विषटकं' द्वादश योजनानि, तच्च चक्रवर्तिस्कन्धावारनिवेशे प्रतिपत्तव्यम् । दूरावगाढमाह-यत्राधस्तात् 'चतुरङ्गुलप्रमाणमचित्तं' चत्वार्यङ्गुलान्यचित्ता भूमि तद् जघन्यं दूरमवगाढम्, अर्थात् पञ्चाङ्गुल-प्रभृतिकमचित्तं यस्याधस्तात् तद् उत्कृष्टं दूरमवगाढम् ॥ साम्प्रतमासन्नमाह-

[भा.४५०] दव्वासन्नं भवणाइयाण तहियं तु संजमा-ऽऽयाए ।
आया-पवयण-संजमदोसा पुण भावमासन्ने ॥

वृ- आसन्नं द्विविधम्-द्रव्यतो भावतश्च । तत्र द्रव्यासन्नं भवनादीनां निकटम्, हस्तिपदप्रमाणः स्कन्धस्तस्य समन्ततो हस्तो वर्जयितव्यः । तत्र यदि द्रव्यासन्ने व्युत्सृजति ततः संयमे आत्मनि च विराधना । तत्र यद् गृहादीनामासन्नं तत् स्थण्डिलं परित्यज्यान्यत्र स्थण्डिलं कुर्युः, अथवा पानीयेन

Jain Education International For Private & Personal Use Only www.jainelibrary.org

तत् प्रक्षालयेयुः ततः संयमविराधना। आत्मविराधना पिट्टनादिभावात्। भावासन्नं नाम तावत् तिष्ठति यावत् संज्ञा मनाग् नागच्छति, ततोऽनधिसहः स्थण्डिलं गन्तुमशक्नुवन् अस्थण्डिले भवनादीनां वा प्रत्यासन्ने व्युत्सृजेत्, तत्र चाऽऽत्मविराधना संयमविराधना च प्राग्वत्। अथास्थण्डिलमिति कृत्वा सागारिको वा तिष्ठतीति संज्ञां धारयत्यात्मविराधना, मरणस्य ग्लानत्वस्य वाऽवश्यम्भावात्; अनधिसहेन च सता तेन लोकपुरतोऽस्थाने संज्ञाव्युत्सर्गे पुनर्जह्वादिलेपने वा प्रवचनोपघातः ॥ सबिले त्रसप्राण-बीजोपेते दोषानाह-

[भा.४५१] होंति बिले दो दोसा, तसेसु बीएसु वा वि ते चेव।
संजोगतो य दोसा, मूलगमा होंति सविसेसा॥

वृ- बिले संज्ञां व्युत्सृजतो द्वौ दोषौ, तद्यथा-आत्मविराधना संयमविराधना च। तत्र यदा बिले प्रविशन्त्या संज्ञया प्रश्रवणेन तद्गता जीवा बाध्यन्ते तदा संयमविराधना, सर्पादिभक्षणे आत्मविराधना। त्रसेषु बीजेषु च 'तावेव' द्वौ दोषौ संयमा-ऽऽत्मविरादनालक्षणौ। तत्र त्रसेषु बीजेषु च प्राणव्यरोपणात् संयमविराधना सुप्रतीता। त्रसेष्वात्मविराधना तेभ्य उपद्रवसम्भवात्, बीजेष्वात्मविराधना बीजकोशावयवानामतितीक्ष्णानां पदेषु लग्नतः (लगनतः) पादप्रलोटनतः पतनतो वा। तदेवमेकैकस्मिन् वर्जनीये स्थण्डिले दोषा उक्ताः। अस्माच्च 'मूलगमाद्' एकक-संयोगरूपाद् द्विक-त्रिकादिपदानां संयोगतः 'सविशेषाः' बहुबहुतरका दोषाः भवन्ति ज्ञातव्याः- द्विकसंयोगे द्विगुणाः त्रिकसंयोगे त्रिगुणा यावद् दशसंयोगे दशगुणा इति॥ सम्प्रति प्रागुक्तमपि प्रायश्चित्तमन्याचार्यपरिपाट्या मनाग् विशेषप्रदर्शनार्थतया च पुनराह-

[भा.४५२] पंथम्मि य आलोए, झुसिरम्मि तसेसु चेव चउलहुगा।
पुरिसावाए य तहा, तिरियावाए य ते चेव॥

वृ- पथ आसन्ने पुरुषाणामालोके झुषिरे त्रससङ्कुले च संज्ञां व्युत्सृजतः प्रायश्चित्तं चत्वारो लघुकाः। तथा सर्वमनुष्यपुरुषापाते सर्वतिर्यक्पुरुषापाते च प्रत्येकं 'त एव' चत्वारो लघवः। सर्वग्रहणं मनुष्येषु कौटुम्बिकादिभेदपरिग्रहार्थम्॥ तिर्यक्षूत्कृष्टादिभेदसङ्ग्रहार्थमाह-

[भा.४५३] इत्थि-नपुंसावाए, भावासन्ने बिले य चउगुरुगा।
पनगं लहुयं गुरुगं, बीए सेसेसु मासलहुं॥

वृ- सर्वासां प्राकृतादिभेदभिन्नानां स्त्रीणामापाते सर्वनपुंसकापाते च तथा भावासन्ने बिलसहिते च स्थण्डिले व्युत्सृजतः प्रत्येकं चत्वारो गुरुकाः। प्रत्येकबीजसङ्कुले स्थण्डिले लघूनि पञ्चरात्रिन्दिवानि, अनन्तबीजसङ्कुले गुरुकाणि। 'शेषेषु' अशुद्धेषु स्थण्डिलेषु मासलघु। यच्चान्य-दापद्यते तदपि सर्वमाप्नोति। यत्रासामाचारीकरणं तत्रापि मासलघु॥

[भा.४५४] अपमज्जणा अपडिलेहणा य दुपमज्जणा दुपडिलेहा।
तिय मासिय तिय पनगं, लहु काल तवे चरिम सुद्धो॥

वृ- संज्ञां व्युत्स्रष्टुकामो न प्रत्युपेक्षते न प्रमार्जयति प्रत्युपेक्षते तपोगुरु काललघु, न प्रत्युपेक्षते प्रमार्जयति मासलघु कालगुरु तपोलघु, न प्रमार्जयति प्रत्युपेक्षते मासलघु द्वाभ्यां लघु। एवं 'त्रिके' त्रिषु स्थानेषु मासिकं लघु कालेन तपसा चोक्तप्रकारेण विशेषितम्। अथ प्रत्युपेक्षते प्रमार्जयति तत्र दुष्प्रत्युपेक्षिते दुष्प्रमार्जिते रात्रिन्दिवपञ्चकं लघु तपोगुरु काललघु, दुष्प्रत्युपेक्षिते

Jain Education International For Private & Personal Use Only www.jainelibrary.org

सुप्रमार्जिते रात्रिन्दिवपञ्चकं लघु तपोलघु कालगुरु, सुप्रत्युपेक्षिते दुष्प्रमार्जिते रात्रिन्दिवपञ्चकं लघु द्वाभ्यां लघुकम्। एवं 'त्रिके' त्रिषु स्थानेषु पञ्चकं कालेन तपसा चोक्तप्रकारेण विशेषितम्। 'चरमे' सुप्रत्युपेक्षितं सुप्रमार्जितमित्येवं रूपे भङ्गे 'शुद्धः' न प्रायश्चित्तभाक् ॥

[भा.४५५] खुड्डो धावण झुसिरे, तिक्खुत्तो अपडिलेहणा लहुगो।
घर-वावि-वच्च-गोवय-ठिय-मल्लगछड्डणे लहुगा ॥

वृ- इयमपि गाथाऽन्याचार्यपरिपाटिसूचिका ततो न पुनरुक्तता नाऽपि विरोधः, मतान्तरत्वात्। 'क्षुल्लकं' स्तोकं यदि 'धावनं' प्रलोठनमित्यर्थः तत्र, तथा झुषिरे स्थण्डिले, तथा त्रिकृत्वोऽप्रत्युपेक्षणायां प्रत्येकं प्रायश्चित्तं लघुको मासः। तथा यदि गृहे संज्ञां व्युत्सृजति, वाप्याम्, वर्चोगृहे वर्चस उपरि वा, गोष्पदे वा, ऊर्द्धस्थितो वा, तथा मल्लके व्युत्सृज्य यदि परिष्ठापयति तदा सर्वेष्वेतेषु स्थानेषु प्रायश्चित्तं प्रत्येकं चत्वारो लघवः ॥

गतमपायद्वारम्। इदानीं वर्जनाद्वारमाह-

[भा.४५६] दिसि-पवन-गाम-सूरिय-छायाए पमज्जिऊण तिक्खुत्तो।
जस्सुग्गहो त्ति काऊण वोसिरे आयमे वा वि ॥

वृ-उत्तरदिक् पूर्वदिक् च लोके पूज्या, ततस्तस्याः पृष्ठप्रदाने लोकमध्येऽवर्णवादो भवति, वानमन्तरं वा किञ्चिन्मिथ्यादृष्टि कुप्येत्, तथा च सति जीवितव्यस्य विनाशः; तस्माद् दिवा रात्रौ च पृष्ठं पूर्वस्याम्, उत्तरस्यां तु दिवा, दक्षिणस्यां दिशि रात्रौ निशाचराः सञ्चरन्ति ततस्तस्यां पृष्ठं रात्रौ वर्जयेत्। उक्तञ्च-

उभे मूत्र-पुरीषे तु, दिवा कुर्यादुदङ्मुखः।
रात्रौ दक्षिणतश्चैव, तथा चाऽऽयुर्न हीयते ॥

तथा यतः पवनस्ततः पृष्ठं न कुर्यात्, मा लोको ब्रूयात्-अर्धन्त्येतदेत इति नाशिकायां चार्शांसि मा भूवन्। तथा ग्रामस्य सूर्यस्य च पृष्ठं न दातव्यम्, लोकेऽवर्णवादसम्भवात्। तथाहि-सूर्यस्य ग्रामस्य वा पृष्ठदाने लोको ब्रूते-न किञ्चिज्ज्ञानन्त्येते यल्लोकोद्द्योतकरस्यापि सूर्यस्य यस्मिन् ग्रामे स्थीयते तस्यापि च पृष्ठं ददतीति। तथा संसक्तग्रहणिश्छायायां व्युत्सृजेद् येन द्वीन्द्रियविनाशो न भवति। तथा 'त्रिकृत्वः' त्रीन् वारान् प्रमार्ज्य उपलक्षणमेतत् प्रत्युपेक्ष्य च व्युत्सृजेत्। तत्राप्रत्युपेक्षणेऽप्रमार्जने दुष्प्रत्युपेक्षणे दुष्प्रमार्जने च प्रायश्चित्तं प्रागुक्तम्। तथा "यस्यावग्रहः सोऽनुजानीयात्" इति अनुज्ञाय व्युत्सृजेद् आचमेद्वा। एष गाथार्थः।

साम्प्रतमेनामेव विवरीषुराह-

[भा.४५७] उत्तर पुव्वा पुज्जा, जम्माए निसीयरा अभिवडंति।
घाणारसा य पवने, सूरिय गामे अवन्नो उ ॥

वृ- उत्तरा पूर्वा च लोके पूज्या, ततो दिवा रात्रौ च पूर्वस्यामुत्तरस्यां वा पृष्ठं न दद्यात्। तथा याम्या-दक्षिणा तस्यां रात्रौ 'निशाचराः' देवाः 'अभिपतन्ति' समागच्छन्ति, ततस्तस्यां रात्रौ पृष्ठं न दद्यात्। तथा यतः पवनस्ततः पृष्ठकरणेऽशुभगन्धघ्राणि नाशिकायां चार्शास्युपजायन्ते, तस्मात् पवनस्यापि पृष्ठं न कर्त्तव्यम्। सूर्यस्य ग्रामस्य च पृष्ठकरणे अवर्णो लोकमध्ये यथाऽभिहितः प्राक्, ततस्तयोरपि न दातव्यं पृष्ठमिति ॥ "छायाए" इतिव्याखयानार्थमाह-

Jain Education International For Private & Personal Use Only www.jainelibrary.org

[भा.४५८] संसत्तग्गहणी पुण, छायाए निग्गयाए वोसिरइ।
छायाऽसति उण्हम्मि वि, वोसिरिय मुहुत्तगं चिट्ठे ॥

वृ- संसक्ता द्वीन्द्रियैर्ग्रहणि-कुक्षिर्यस्यासौ संसक्तग्रहणि, स द्वीन्द्रियरक्षणार्थं छायायां वृक्षादेर्निर्गतायांव्युत्सृजति। अथ च्छायाऽद्यापि न निर्गच्छति मध्याह्ने एव संज्ञाप्रवृत्तेः, ततश्छायायाः असति-अभावे उष्णेऽपि स्वशरीरच्छायां पुरीषस्य कृत्वा व्युत्सृजति, व्युत्सृज्य च 'मुहूर्तकम्' अल्पं मुहूर्त तथैव तिष्ठति, येनैतावता कालेन स्वयोगतः परिणमन्ति । अन्यथोष्णेन महती परितापना स्यात् ॥ अथ व्युत्सृजन् स्वोपकरणं कथं धरति ? इत्यत आह-

[भा.४५९] उवगरणं वामगऊरुगम्मि मत्तो य दाहिणे हत्थे।
तत्थऽण्णत्थ व पुंसे, तिहि आयमणं अदूरम्मि ॥

वृ- 'उपकरणं' दण्डकं रजोहरणं च वामे ऊरौ स्थापयति, मात्रकं दक्षिणहस्ते क्रियते, डगलकानि च वामहस्तेन धरणीयानि । ततः संज्ञां व्युत्सृज्य तत्रान्यत्र वा प्रदेशे डगलकैः पुतं 'पुंसयति' रूक्षयति। पुंसयित्वा त्रिभि नावापूरकैः चुलुकैरित्यर्थः 'आचमनं' निर्लेपनं करोति। उक्तञ्च- तिहिं नावाए पूरएहिं आयमइ निल्लेवेति वा। नावापूरओ नाम पसती इति।

तदपि चाचमनमदूरे करोति। यदि पुनर्दूरे आचमति तत उड्डाहः । कश्चिद् दृष्ट्वा चिन्तयेत्- अनिर्लेप्य पुते गत एष इति ॥ सम्प्रत्यालोके प्रायश्चित्तविधिमाह-

[भा.४६०] आलोगं पि य तिविहं, पुरिसि-त्थि-नपुंसकं च बोधव्वं।
लहुगा पुरिसालोए, गुरुगा य नपुंस-इत्थीसु ॥

वृ- आलोकमपि च 'त्रिविधं' त्रिप्रकारम्, तद्यथा-पुरुषालोकं स्त्र्यालोकं नपुंसकालोकम्। गाथायां पदैकदेशे पदसमुदायोपलक्षणानि। तत्र पुरुषालोके प्रायश्चित्तं चत्वारो लघुकाः, स्त्र्यालोके नपुंसकालोके च चत्वारो गुरुकाः ॥ तदेवमचित्तं स्थण्डिलमचित्तेन पथा भणितम्। अथ सचित्तेन मिश्रेण वा यदा तद् गच्छति तदेदं प्रायश्चित्तम्-

[भा.४६१] छक्का चउसु लहुगा, परित्त लहुगा य गुरुग साहारे।
संघट्टण परियावण, लहु गुरुगऽतिवायणे मूलं ॥

वृ- 'षट्कायाः' पृथिव्यप्तेजोवायुवनस्पतित्रसरूपाः । तेषां मध्ये 'चतुर्षु' पृथिव्यप्तेजो-वायुरूपेषु सङ्घट्टनादिषु लघुकाः प्रायश्चित्तम्, 'परित्ते' प्रत्येकवनस्पतिकायेऽपि च लघुकाः, "साहारे" अनन्तवनस्पतिकायिके सङ्घट्टनादिषु गुरुकाः, तथा द्वीन्द्रियादीनां सङ्घट्टने परितापने च यथायोगं लघुका गुरुकाश्च प्रायश्चित्तम् 'अतिपातने' विनाशे मूलम्। इयमत्र भावना-पृथिवीकायं सङ्घट्टयति मासलघु, परितापयति मासगुरु, अपद्रावयति जीविताद् व्यपरोपयतीत्यर्थः चतुर्लघु। एवमप्काये तेजस्काये वायुकाये प्रत्येकवनस्पतिकाये च द्रष्टव्यम्। उक्तञ्च-

छक्कायादिमचउसू, तह य परित्तम्मि होति वणकाए।
लहु-गुरुमासो चउलहु, घट्टण परिताव उद्दवणे ॥

एतत् प्रायश्चित्तमेकैकस्मिन् दिवसे सङ्घट्टनादिकरणे। यदि पुनर्द्वौ दिवसौ पृथिव्यादि सङ्घट्टयति तदा मासगुरु, परितापयति चतुर्लघु, जीविताद् व्यपरोपयति चतुर्गुरु। त्रीन् दिवसान् निरन्तरं चतुरो दिवसान् सङ्घट्टने चतुर्गुरु, परितापने षड्लघु, अपद्रावणे षड्गुरु। पञ्च दिवसान्

Jain Education International For Private & Personal Use Only www.jainelibrary.org

निरन्तरं पृथिव्यादीनां सङ्घट्टने षड्लघु, परितापने षड्गुरु, अपद्रावणे मासिकच्छेदः । षड् दिवसान् निरन्तरं सङ्घट्टने षड्गुर, परितापने मासिकच्छेदः, अपद्रावणे चतुर्मासच्छेदः । सप्त दिवसान् निरन्तरं पृथिव्यादीनां सङ्घट्टने मासिकच्छेदः, परितापने चतुर्मासिकः, अपद्रावणे षाण्मासिकः । अष्टौ दिवसान् निरन्तरं पृथिव्यादीनां सङ्घट्टने चातुर्मासिकच्छेदः, परितापने षाण्मासिकः, अपद्रावणे मूलम् । उक्तञ्च- दोहिं दिवसेहिं मासगुरुए आढवेत्ता चउगुरुए ठाति जाव अट्ठहिं सपयं ति ।

अनन्तवनस्पतिकं यदि सङ्घट्टयति तदा मासगुरु, परितापयति चतुर्लघु, अपद्रावयति चतुर्गुरु । द्विदिवसादिनिरन्तरसङ्घट्टनादिषूत्तरैकैकस्थानवृद्धितः सप्तभिर्दिनैर्मूलम् । द्वीन्द्रियं सङ्घट्टयति चतुर्लघु, परितापयति चतुर्गुरु, जीविताद् व्यपरोपयति षड्लघु । अत्र द्वयादिदिवस-निरन्तरसङ्घट्ट- नादिषु षडिर्दिवसैर्मूलम् । त्रीन्द्रियं सङ्घट्टयतश्चतुर्गुरु परितापयतः षड्लघु, जीविताद्यपरोपयतः षड्गुरु, अत्र पञ्चभिर्दिवसैर्मूलम्, चतुरिन्द्रियं सङ्घट्टयतः षड्लघु, परितापयतः षड्गुरु, जीविताद्यपरोपयतो मासिकच्छेदः, अत्र चतुर्भिर्दिवसैर्मूलम्, । पञ्चेन्द्रियं सङ्घट्टयतः षड्गुरु, परितापयतः छेदः, अपद्रावयतो मूलम्, अत्र द्वयोर्द्विवसयोरनवस्थाप्यम्, त्रिषु दिवसेषु पाराञ्चितम् ॥ गतं वर्जनाद्वारम्, अधुनाऽनुज्ञाद्वारमाह-

[भा.४६२] पढमिल्लुगस्स असती, वाघातो वा इमेहि ठाणेहिं ।
पडिणीय तेन वाले, खेत्तुदग निविट्ठ थी अपुमं ॥

वृ-प्रथममेव प्रथमिल्लुकम्, प्राकृतत्वात् स्वार्थे इल्लुकप्रत्ययः । प्रथमम्-अनापातासंलोकलक्षणं स्थण्डिलं तत् नास्ति ततस्तस्य प्रथमस्याभावे । अथवा सतोऽप्येभि स्थानैरव्याघातो भवेत् । तान्येव स्थानान्याह-''पडिनीय'' इत्यादि । प्रत्यनीकस्तत्र तिष्ठति । स्तेना वा पथि द्विविधाः, तद्यथा-उपकरणस्तेनाः शरीरस्तेना वा । 'व्याला वा' तत्र सर्पादयो विघन्ते । क्षेत्रं वा तत्र जातम् । उदकेन वा तत् स्थण्डिलमास्तृतम् । ग्रामो व्रजिका स्कन्धावारो वा तत्र निविष्टः । स्त्री नपुंसको वा तत्र मैथुनार्थी संयतानागच्छतः प्रतीक्षते ॥

[भा.४६३] पढमासति वाघाए, पुरिसालोगम्मि होति जयणाए ।
मत्तग अपमज्जण डगल कुरुअ तिविहे दुविहभेदो ॥

वृ- एवं प्रथमस्य स्थण्डिलस्याभावे व्याघाते वा द्वितीयं स्थण्डिलमनापातसंलोकवद् -गन्तव्यम् । तत्र संयतानां साम्भोगिकानां संविग्नामालोके गन्तव्यम्, तदभावे असाम्भोगिकानामपि । तत्रापरिणताः पूर्वमेव ग्राहयितव्याः, यथा-केषाञ्चिदाचार्याणां विसदृश्यः सामाचार्य ततो यूयं मा तान् वितथसामाचारीकान् दृष्ट्वा प्रतिनोदयेत, तेऽपि यदि नोदयन्ति तद्युदासीनाः तिष्ठथ । एवमसङ्खडादयो दोषाः परिहृता भवन्ति । असाम्भोगिकानामप्यापातस्यासम्भवे यत्र पार्श्वस्थादीनामालोकस्तत्र गच्छन्ति । तस्याप्यभावे यत्र पार्श्वस्थादीनामापातस्तत्र व्रजन्ति । तत्र क्षुल्लकादयोऽपरिणताः पूर्वं ग्राहयितव्याः, यथा-एते निर्धर्माणो जिनाज्ञाप्रकोपिनो वितथमाचरन्ति, तद् मा यूयमेतेषां चेष्टितं चित्ते कुरुत यथा 'एतत् सुन्दरम्' इति । संयत्यापातवच्च सर्वप्रयत्नेन परिहरेत्, अन्यथा कृतसङ्केतका अत्र समागच्छन्तीति शङ्कादयः आत्म-परोभयसमुत्थाश्च दोषाः सम्भवन्ति । एषा स्वपक्षे यतना ।

सम्प्रति परपक्षेऽभिधीयते । तत्र-पार्श्वस्थाद्यापातवतोऽसम्भवे ''पुरिसालोगम्मि होति

Jain Education International For Private & Personal Use Only www.jainelibrary.org

जयणाए'' इति 'पुरुषालोके' पुरुषालोकवति गन्तव्यम्, तत्र यतनया भवति कर्त्तव्यमाचमनादि। तामेव यतनामाह-''मत्तग अपमज्जण डगल कुरुग'' त्ति प्रत्येकं मात्रकं ग्रहीतव्यम्, प्रत्येकं च प्रचुरं द्रवम्, डगलकानां चाप्रमार्जनम्-न तानि डगलकानि प्रमार्ज्यन्ते हीलादोषसम्भवात्, कुरुकुचाश्चाचमनान्तरं कर्त्तव्या। ''तिविहे दुविहभेओ'' इति, त्रिविधे प्रत्येकं द्विविधो भेदो द्रष्टव्यः। इयमत्र भावना-त्रिविधः परपक्षः, तद्यथा-पुरुषः स्त्री नपुंसकः। एकैकः पुनर्द्विधा-शौचवादीअशौचवादी च, अथवाऽन्यथा प्रत्येकं द्विभेदत्ता-श्रावकोऽश्रावकश्च। अथवा त्रिविधो भेदो नाम स्थविरो मध्यमस्तरुणश्च, यदि वा प्राकृतः कौटुम्बिको दण्डिकश्च। एते च त्रयो भेदा यथा पुरुषस्य तथा स्त्री-नपुंसकयोरपि द्रष्टव्याः। तेषु यतनया गन्तव्यम्॥ कथम्? इत्यत आह-

[भा.४६४] तेन परं पुरिसाणं, असोयवादीण वच्च आवायं।
इत्थि-नपुंसालोए, परम्मुहो कुरुकुया सा य॥

वृ- 'ततः' पुरुषालोकवतः स्थण्डिलात् 'परतः' पुरुषालोकवतः स्थण्डिलस्यासति पुरुषाणामशौचवादिनाम् 'आपातम्' आपातवत् स्थण्डिलं व्रजेत्। तत्र च यतना प्रागुक्ता द्रष्टव्या। तस्याप्यसम्भवे शौचवादिनामप्यापातवद् गन्तव्यम्। तस्यासम्भवे स्त्र्यालोके नपुंसकालोके वा गन्तव्यम्। इयमत्र भावना-प्रथमतोऽशौचवादिनीनां स्त्रीणामालोके गन्तव्यम्, तत्र गतः सन् तासां पराङ्मुख उपविशेत्, यतना च सा कुरुकुचादिका कर्त्तव्या। तस्याप्यसम्भवे शौचवादिनीनामप्यालोके गन्तव्यम्। तदभावे नपुंसकानामशौचवादिनामालोके। तस्यासम्भवे शौचवादिनामप्यालोके। यतना सर्वत्र सैव॥

[भा.४६५] तेन परं आवायं, पुरिसेयर-इत्थियाण तिरियाणं।
तत्थ वि य परिहरेज्जा, दुगुंछिए दित्तऽदित्ते य॥

वृ- 'ततः परं' शौचवादिनामपि नपुंसकानामालोकस्यासम्भवे 'पुरुषेतरस्त्रीणां' पुरुष-नपुंसस्त्रीणां तिरश्चामापाते व्रजेत्, तत्रापि दृप्तानदृप्तांश्च जुगुप्सितान् परिहरेत्, अपरिहारे यतनां कुर्यात्। अयमत्र भावार्थ-शौचवादिनां नपुंसकानामालोकासम्भवे तिर्यक्पुरुषाणामदुष्टानामापाते व्रजेत्, तस्यासम्भवे दुष्टानामापाते व्रजेत्, तत्रेयं यतना-दण्ड-हस्ता वारंवारेण व्युत्सृजन्ति। उक्तञ्च-

तेन परं पुरिसाणं, असोयवादीण वच्च आवायं।
पच्छित्थि-नपुंसाणं, आलोय परम्मुहा कुरुया॥
पच्छा तिरिपुरिसाणमदुट्ठ-दुट्ठाण वच्च आवायं।
दुट्ठेसु दंड-हत्था, वारंवारेण वोसिरणं॥

तस्याप्यभावे तिर्यकस्त्रीणामजुगुप्सितानामापातं व्रजेत्। तदसम्भवे जुगुप्सितानामप्यापातम्। तदभावे तिर्यग्नपुंसकानामजुगुप्सितानामापातम्। तदभावे जुगुप्सितानामप्यापातम्, केवलंतत्र तथोपविशन्ति यथा परस्परं सर्वे सर्वं प्रेक्षन्ते॥

[भा.४६६] तत्तो इत्थि-नपुंसा, तिविहा तत्थ वि असोयवाईणं।
तहियं च सद्दकरणं, आउलगमणं कुरुकुया य॥

वृ- ततः स्त्री-नपुंसकानामापाते गन्तव्यम्। ते च स्त्री-नपुंसकास्त्रीविधाः, तद्यथा-प्राकृताः

Jain Education International For Private & Personal Use Only www.jainelibrary.org

कौटुम्बिका दाण्डिकाश्च । ते च प्रत्येकं द्विधा-शौचवादिनोऽशौचवादिनश्च । तत्र प्रथमतोऽशौचवादिनामापाते व्रजनीयम् । तत्र च शब्दकरणमाकुलगमनं कुरुकुचा च कार्या । इयमत्र भावना-जुगुप्सितानामपि नपुंसकानामापातवतोऽसम्भवे मनुष्यस्त्रीणामशौचवादिनीनामापाते गन्तव्यम्, केवलं स्थविरसहितैः प्रविशद्भिश्च परस्परं महान्तः शब्दा उच्चारणीया येन तास्तान् शब्दान् श्रुत्वा निर्गच्छन्ति, आकुलीभूताश्च तत्र प्रविशन्ति येन 'व्याकुला अमी' इति ता धर्षविक्षेपादिकं न कुर्वन्ति, अगर्त्तादिषु च स्थानेषु संज्ञां व्युत्सृजन्ति यथा शेषोऽपि लोको दूरस्थः प्रेक्षते, तेऽपि च साधवस्तथा उपविशन्ति यथा परस्परं प्रेक्षन्ते । तत एवमात्मपरोभयदोषा न सम्भवन्ति । उक्तं च-

तत्थ पुन थेरसहिया, आउलसद्दं करिंति पविसंता ।
जह सद्देणं ताओ, निंति ततो अगत्तमादीसु ॥
ठाणेसु वोसिरंती, पेच्छंति य जह परोप्परं सव्वे ।
आय-परोभयदोसा, ते वं वज्जिया होंति ॥

वृ-आचमनानन्तरं च कुरुकुचा कर्त्तव्या, चशब्दान्मृत्तिकया हस्त-पुतप्रक्षालनं बहिर्मात्रिकस्य कल्प इति परिग्रहः । तदसम्भवे शौचवादिनीनामपि मनुष्यस्त्रीणामापाते, तस्याभावे नपुंसकानामशौचवादिनामप्यापाते, तदसम्भवे शौचवादिनामप्यापाते गन्तव्यम् । सर्वत्रापि यतनाऽनन्तरोक्तैव ॥

[भा.४६७] इत्थि-नपुंसावाते, जा उण जयणा उ मत्तगादीया ।
पुरिसावाए जयणा, स च्चैव उ मत्तगादीया ॥

वृ-स्त्र्यापाते नपुंसकापाते च या पुनर्यतना मात्रकादिका अनन्तरमुक्ता सैव पुरुषापातेऽपि प्राग् मात्रकादिका यतना द्रष्टव्या । एवं तावदचित्तं स्थण्डिलं चतुःप्रकारमचित्तेन पथा गम्यमुक्तम् । तदभावे मिश्रेणापि पथा तदपवादेन गच्छेत्, तदभावे सचित्तेनापि, तत्रापि यतना सैव प्रागुक्ता । उक्तं च-

एवं अच्चित्तेणं, पहेण जयणाओ भणिय चउभंगो ।
मीस-सचित्तपहेसु य, एस च्चिय भंग-जयणाओ ॥

सम्प्रति मिश्रं वक्तव्यम्, यतोऽचित्तस्थण्डिलसम्भवेऽपवादतो मिश्रमपि गम्यते । तदपि चानापातसंलोकादिभेदतश्चतुष्प्रकारम्, तस्यापि च त्रयः पन्थानः, तद्यथा-अचित्तो मिश्रः सचित्तश्च ॥ तानेवाह-

[भा.४६८] अच्चित्तेणं मीसं, मीसं मीसेण छक्कमीसेणं ।
सच्चित्तछक्कएणं, मीसे चउभंगिग पदेसे ॥

वृ- मिश्रं स्थण्डिलमचित्तेन पथा गम्यम् । तदभावे मिश्रेण, केन मिश्रेण ? इत्यत आह- 'षट्कमिश्रेण' षड्जीवनिकायमिश्रेण । तदभावे मिश्रे स्थण्डिले षटकायसचित्तेन पथा गन्तव्यम् । उक्तश्च-

पढममचित्तपहेणं, मीसं मीसेण छक्कमीसेणं ।
सचित्तछक्कएणं, मीसं तू थंडिलं गच्छे ॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

तच्च मिश्रं स्थण्डिलमध्वनि ग्रामानुग्रामं पथि व्रजतो द्रष्टव्यम्। तत्र मात्रकैर्यतना कर्त्तव्या। अथ मात्रकाणि न विद्यन्ते व्युत्सृजतां परिष्ठापयतां च सागारिकसम्पातस्तदा धर्मास्तिकायादिप्रदेशान् निश्रीकृत्य व्युत्स्रष्टव्यम्। उक्तञ्च-

जहियं पुन सागारिय, धम्मादिपएस तहिय निस्साए।

वोसिरइ एय मीसं, भणिय समासेण थंडिल्लं ॥

उक्तं मिश्रं स्थण्डिलम्। तदभावेऽपवादतः सचित्तमपि गन्तव्यम्। तदप्यनापाता-संलोकादिभेदतश्चतुःप्रकारम्। तस्यापि च त्रयः पन्थानः, तद्यथा-अचित्तो मिश्रः सचित्तश्च ॥ तत्र येन क्रमेण गन्तव्यं तं क्रममाह-

[भा.४६९] अच्चित्तेण सचित्तं, मीसेण सचित्त छक्कमीसेण।

सच्चित्त छक्कएणं, सचित्त चउभंगिय पदेसे ॥

वृ- सचित्तमपि स्थण्डिलं चतुर्भङ्गिकम्। तत्र प्रथमतोऽनापातासंलोकं गन्तव्यम्, तदभावे द्वितीयम्, तदभावे तृतीयम्, तदभावे चतुर्थमपि। तत्र यतना प्रागेवोक्ता। तत्र च प्रथमतोऽचित्तेन पथा गन्तव्यम्। तदभावे तत् सचित्तं मिश्रेण पथा गम्यम्, केन मिश्रेण? इत्यत आह-'षट्कमिश्रेण' षडजीवनिकायमिश्रेण। तस्यासम्भवे सचित्तेन पथा सचिततं गन्तव्यम्, केन सचित्तेन? 'षट्केन' षडजीवनिकायैः। अत्रापि मात्रकैर्यतना कर्त्तव्या। मात्रकाणामभावे व्युत्सर्गे परिष्ठापने वा सागारिकसम्भवे धर्मास्तिकायादिप्रदेशानां निश्रा कर्त्तव्या। उक्तञ्च-

ज च्चिय मीसे जयणा, सेव सचित्ते वि होइ कायव्वा।

मत्तादि अपरिसेसा, जा धम्मादीपएसा उ ॥

तदेवमुक्तं स्थण्डिलम्। इदानीमेतस्य यः कल्पिकस्तमभिधित्सुराह-

[भा.४७०] पढिय सुय गुणियमगुणिय, धारमधार उवउत्तो परिहरति।

आलोयाऽऽयरियादी, आयरिओ विसोहिकारो से ॥

वृ- यस्मादजानतः प्रायश्चित्तं तस्माद् येन सप्तसप्तकादिसूत्रं पठितं पाठतः श्रुतमर्थतः तच्च 'गुणितम्' अभ्यस्तं वा स्यादगुणितं वा धारितं वा स्यादनवधारितं वा तथापि यः उपयुक्तः सन् स्थण्डिलं 'परिहरति' उक्तप्रकारेणोपयुक्तः परिभोगयति स विचारे कल्पिकः। तथा तेन स्थण्डिलसूत्रेण पठितेन वा श्रुतेन वा गुणितेन वा अगुणितेन वा धारितेन वा अधारितेन वा उपयुक्तो वाऽनुपयुक्तो वा यां विराधनां करोति तामाचार्यादिरालोचयति। प्रथमत आचार्यस्य पुरत आलोचयति, तदभावेऽन्यस्याप्युपाध्यायादेरालोचिते च 'से' तस्य 'विशोधिकारः' प्रायश्चित्तप्रदानेन शुद्धिकर्त्ता आचार्याः। किमुक्तं भवति? -यद् आचार्या प्रायश्चित्तं ददति तेन स शुद्धिमापद्यते ॥ गतं विचारद्वारम्। अधुना लेपद्वारमाह-

[भा.४७१] अप्पत्ते अकहित्ता, अणहिगयऽपरिच्छणे य चउगुरुका।

दोहि गुरू तवगुरुगा, कालगुरू दोहि वी लहुगा ॥

वृ- 'सूत्रे' पात्रैषणालक्षणे अप्राप्ते यदि लेपस्याऽऽनयनाय प्रेषयति तदा तस्य प्रायश्चित्तं चत्वारो गुरुकाः द्वाभ्यां गुरुकाः, तद्यथा-तपोगुरुकाः कालगुरुकाश्च। अथ प्राप्तेऽपि श्रुते तदर्थमकथयित्वा कथनेऽपि 'अधिगतस्तदर्थो न वा' इत्यपरिज्ञाय अधिगतमपि 'सम्यक् श्रद्दधाति

Jain Education International For Private & Personal Use Only www.jainelibrary.org

न वा' इत्यपरीक्ष्य यदि प्रेषयति तदा प्रत्येकमकथनेऽनधिगतेऽपरीक्षणे च तस्य प्रायश्चित्तं च्वारो लघुका द्वाभ्यां लघवः, तद्यथा-तपोलघुकाः काललघुकाश्च । यत एवं प्रायश्चित्तमाज्ञादयश्च दोषास्तस्मात् सूत्रे प्राप्ते तत्रापि कथिते तत्राप्यधिगते स परीक्ष्य लेपस्यानयनाय प्रेषणीयः । एष लेपस्य कल्पिकः ॥

[भा.४७२] अज्झक्कालिय लेवं, वयंति अवियाणिऊण सब्भावं ।
ते वत्तव्वा लेवो, दिट्ठो तेलोक्कदंसीहिं ॥

वृ- केचित् प्रवचनस्य 'सद्भावं' रहस्यम् 'अविज्ञाय' अविदित्वा अद्यकालिकं लेपं पात्रस्य वदन्ति-न एष पात्रस्य लेपः सर्वज्ञैरुक्तः किन्त्वद्य कल्येऽधुनातनसूरिभि प्रवर्तितः; ते वक्तव्याः-दृष्टः खलु पात्रस्य लेपस्त्रैलोक्यदर्शिभि ॥ एनामेव गाथां व्याचिख्यासुः प्रथमतः पूर्वार्द्धंव्याख्यानयन् लेपस्य जिनानुपदिष्टत्वं भावयति-

[भा.४७३] आया पवयण संजम, उवघाओ दिस्सए जओ तिविहो ।
तम्हा वयंति केई, न लेवगहणं जिना बेंति ॥

वृ- यस्माल्लेपे गृह्यमाणे त्रिविध उपघातो दृश्यते, तद्यथा-आत्मनः प्रवचनस्य संयमस्य च; तस्मात् केचिद् वदन्ति-न लेपग्रहणं जिना ब्रुवते; न खलु भगवन्तः सावद्यं वचनमुच्चरन्ति ॥ कथं पुनरात्म-प्रवचन-संयमोपघातः ? इत्यत आह-

[भा.४७४] रहपडण उत्तमंगादिभंजणा घट्टणे य करघातो ।
अह आयविराधन, जक्खुल्लिहणे पवयणम्मि ॥

वृ- रथस्य-शकटस्य पतने उत्तमाङ्गादेः शरीरावयवस्य भङ्गः, तथा भाजनस्य लेपे दत्ते घट्टकेन तद् दत्तलेपं पात्रं घट्टयतः 'करघातः' करस्य पीडा, एषा आत्मविराधना । यक्षाः-श्वानस्तैः शकटस्याक्षोऽनेकधा जिह्वयोल्लिखितः, साधुरपि च तत्र लेपं गृह्णाति, तमपि च भोजनयोग्ये पात्रे दास्यति ततो 'यक्षोल्लिखने' यक्षोल्लिखितलेपग्रहणे 'परवचने' प्रवचनस्योपघातः ॥

[भा.४७५] गमनाऽऽगमने गहणे, तिट्ठाणे संजमे विराहणया ।
महि सरि उम्मुग हरिया, कुंथू वासं रयो व सिया ॥

वृ- तथा 'त्रिस्थाने' त्रिषु स्थानेषु च 'संयमे' संयमस्य विराधना, तद्यथा-लेपग्रहणाय गमने लेपं गृहीत्वा पुनर्वसतावागमने लेपग्रहणे च । तथाहि-गच्छतामागच्छतां तत्र वा मह्याः-सचित्तपृथिवीकायस्य विराधना, सरित्-नदी तत्र गमने आगमने चाऽप्कायविराधना, तथा कदाचित् तैः शाकटिकैरग्निकाय उद्दीपितो भवेत् तत्र कथमप्यनुपयोगत उल्मुकचालनेऽग्नि कायविराधना, यत्राग्निस्तत्र वायुरिति वायुविराधना, हरितकायाक्रमणे वनस्पतिकायविराधना, तथा लेपे कुन्थ्वादयः प्राणा लग्ना भवेयुस्ततस्तद्ग्रहणे त्रसकायविराधना, तथा गमने आगमने तत्र वा वर्षं पतेत् रजो वा सचित्तवातोद्धूतमापतितं स्यात् ततस्तद्विराधनाऽपि तत्रावसेया । तदेवं यत आत्म-प्रवचन-संयमानामुपघातो न च यथा पिण्डैषणा पात्रैषणा वा जिनैर्भणिता तथा लेपैषणाऽपि तस्मान्न जिनोपदिष्टः पात्रस्य लेपः । तदेतदसमीचीनम्, पात्रलेपस्य जिनैरर्थत उक्तत्वात् । पात्रैषणायां हि त्रिविधं पात्रमुक्तम्, तद्यथा-यथाकृतमल्पपरिकर्म सपरिकर्म च । तत्राल्पपरिकर्मणः सपरिकर्मणश्चावश्यं लेपेन कार्यमिति सामर्थ्यादुक्तो जिनैः पात्रस्य लेपः ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

अन्यच्चौघनिर्युक्तौ प्रपञ्चेन लेपैषणाऽप्यभिहिता । तस्माद् दृष्टस्त्रैलोक्यदर्शिभिर्लेपः ॥

यच्च वदसि आत्मोपघातादयो दोषा इति तत्र प्रत्युत्तरमाह-

[भा.४७६] दोसाणं परिहारो, चोयग जयणाए कीरए तेसिं ।
पाते उ अलिप्पंते, ते दोसा होंतऽनेगगुणा ॥

वृ- हे नोदक ! ये दोषास्त्वया प्रागात्मोपघातादय उक्तास्तेषां परिहारो यतनया क्रियते, यतनया गच्छत आगच्छतो लेपग्रहणं च कुर्वतो न कश्चिदात्मोपघातादिको दोष इति भावः । पात्रे तु अलिप्यमाने ते आत्मोपघातादयो दोषाः 'अनेकगुणाः' अनेकप्रकारा भवन्ति ॥

कथम् ? इति चेद् अत आह-

[भा.४७७] उड्डादीणि उ विरसम्मि भुंजमाणस्स होंति आयाए ।
दुग्गंधि भायणं ति य, गरहति लोगो पवयणम्मि ॥

वृ- अलेपितं किल पात्रमतीव विरसं भवति, तस्मिन् भुञ्जानस्य विरसगन्धाघ्राणत ऊर्द्धवादीनि भवन्ति । ऊर्ध्वं-वमनम्, आदिशब्दादरुचि-मान्द्यादिपरिग्रहः । एते आत्मनि दोषाः। तथा लोको भिक्षां ददानो दुर्गन्धि भाजनं दृष्ट्वा 'गर्हयति' ईदृशा एवामी पापोपचिता इति । एष प्रवचने उपघातः ॥ यदप्युक्तम् "यक्षोल्लिखितलेपग्रहणे प्रवचनोपघातः" तदेतत् तावदतिसूक्ष्मम्, अन्येऽपि खलु महान्तः प्रवचनोपघाता अवश्यकर्त्तव्यतया यतनया परिह्रियन्ते किं पुनर्नैषः ? इति प्रतिपादयन्नाह-

[भा.४७८] पवयणघाया अन्ने, वि अत्थि ते उ जयणाए कीरंति ।
आयमभोयणाई, लेवे तव मच्छरो को नु ॥

वृ-अन्येऽपि खलु 'आचमन-भोजनादयः' काञ्जिकेनाचमनं कायिक्या आचमनमनाचमनं वा पात्रे भोजनं मण्डल्यां भोजनमित्येवमादयः 'प्रवचनघाताः' प्रवचनोपघाताः सन्ति परं तेऽप्यवश्यकर्त्तव्यतया 'यतनया' सागारिकरक्षणादिरूपया क्रियन्ते । एवमवश्यग्रहीतव्ये लेपे यतनया तत्कालदृष्टदोषपरिहारादिलक्षणया गृह्यमाणे को नु तव मत्सरः ? नैवासौ युक्त इति ॥ सम्प्रत्यन्यानपि पात्रालेपे दोषानाह-

[भा.४७९] खंडम्मि मग्गियम्मी, लोणे दिन्नम्मि अवयवविनासो ।
अणुकंपादी पाणम्मि होति उदगस्स उ विनासो ॥

वृ- अलेपिते पात्रे कस्मिंश्चित् प्रयोजने समापतिते खण्डं याचितम्, तया चाऽविरत्या खण्डमिति भ्रान्त्याऽनाभोगेन सैन्धवादि लवणं दत्तम्, तस्मिंश्चालेपिते भाजने केचिदवयवा अद्याप्यम्लाः सन्ति, ततस्तैरवयवैस्तस्य लवणस्य पृथिवीकायस्य विनाशः । तथा पानके याचिते कयाचिदविरत्या एते उदकस्य स्वादं न जानन्तीत्यनुकम्पया आदिशब्दादनाभोगेन वा उदकं दीयते तत एवमुदकस्याम्लावयवसंस्पर्शतो विनाशः ॥

[भा.४८०] पूयलियलग्ग अगणी, पलीवणं गाममादिणं होज्जा ।
रोट्टपणगा तरुम्मिं, भिगु-कुंथादी य छट्ठम्मि ॥

वृ-कयाचिदविरत्याऽनाभोगतः साङ्गारा पूपलिका दत्ता भवेत् तत्राम्लावयवसंस्पर्शतस्तस्य विध्वंसः ; यद्वा स पूपलिकालग्नोऽग्निर्दहेत्, स च साधुर्न चेतयते ततः प्रदीप्ते पात्रे परितापलगनतः

Jain Education International For Private & Personal Use Only www.jainelibrary.org

सहसा तत् पात्रं त्यजेत्, तच्च कण्टकवृत्यादिमध्ये पतितमिति कृत्वा तद्दाहप्रसङ्गतो 'ग्रामादीनां' ग्रामस्य नगरस्य पाटकस्य वा प्रदीपनं भवेत्, ततो महती अग्निकायस्य विराधना। यत्राग्निस्तत्र वायुरिति वायुविराधना। वनस्पतिविराधनामाह-"रुट्टे"त्यादि। कयाचिदविरत्या 'रोट्टः' लोट्टो दत्तः, सोऽम्लावयवसंस्पर्शतः प्राणविपत्तिमाप्नोति। तथा भृगुर्नाम श्लक्ष्णा राजिस्तासु पनकः सम्मूर्च्छति, सोऽन्न-पानग्रहणतो विध्वंसमापद्यते। एषा 'तरौ' वनस्पतिकाये विराधना। भृगुषु पनके सम्मूर्च्छिते कुन्थ्वादयोऽपि सम्मूर्च्छन्ति, तेऽवयवानामल्पभावेनान्न-पानग्रहणतो वा विराध्यन्ते। एषा 'षष्ठे' त्रसकाये विराधना। एवं षण्णामपि कायानां पात्रस्यालेपने विराधना॥ यदप्युक्तम् "लेपैषणा भगवद्भिर्नोक्ता" इति तत्र प्रतिविधानमाह-

[भा.४८१] पायग्गहणम्मि उ देसियम्मि लेवेसणा वि खलु वुत्ता।
तम्हा उ आणणा लिंपणा य लेवस्स जयणाए॥

वृ-पात्रग्रहणे देशिते खलु लेपैषणाऽप्युक्ता द्रष्टव्या, लेपमन्तरेणावश्यं षडजीवनिकाय-विराधनात्, यथोक्तमनन्तरम्। तस्माज्जिनोपदिष्टत्वाल्लेपस्य यतनया आनयनम्, तेन च पात्रस्य लेपनं कर्त्तव्यम्॥ पर आह-यतनया लेपस्यानयनादि कर्त्तव्यं तत एवं क्रियताम्-

[भा.४८२] हत्थोवघाय गंतूण लिंपणा सोसणा य हत्थम्मि।
सागारिए पभू जिंघणा य छक्कायजयणाए॥

वृ- 'यस्माल्लेपस्यानयने भारेण हस्तोपघातः तस्मात् तत्र गत्वा पात्रस्य लेपनं कर्त्तव्यम्' इति नोदकवचनम्। इदमपि नोदकवचः-लिप्तस्य पात्रस्य हस्ते धरणतः शोषणा कर्त्तव्या। अत्रोभयत्रापि प्रत्युत्तरमग्रे दास्यते। तथा व्रजता प्रत्यासन्नं शय्यातरशकटमवलोक्य 'सागारिकपिण्डएषः' इति कृत्वा न वर्जनीयम् किन्तु तत्रैव लेपग्रहणं कार्यम्, तथा तस्य शकटस्य यः प्रभुः प्रभउशनअधइष्टो वा तमनुज्ञापयेत्, अनुज्ञाप्य च कटुगन्धपरिज्ञानाय नाशामसंस्पर्शयन् तं लेपं जिघ्रेत्, तदनन्तरं लेपस्य ग्रहणं षट्काययतनया कर्त्तव्यमित्येष द्वारगाथासङ्क्षेपार्थं॥

साम्प्रतमेनामेव विवरीषुः प्रथमतः "गंतूण लिंपणे"ति द्वारं व्याख्यानयति-

[भा.४८३] चोयगवयणं गंतूण लिंपणा आनने बहू दोसा।
संपातिमादिघातो, अहिउस्सग्गो य गहियम्मि॥

वृ- नोदकवचनम्-तत्र शकटसमीपे गत्वा पात्रस्य लेपनं कर्त्तव्यम्, यतो लेपस्यानयेन बहवो दोषाः; तथाहि-भारेण हस्तोपघातः पूर्ववत्, तथा सम्पातिमानाम् आदिशब्दादसम्पातिमानां च जीवानां तत्र पतितानामुपघातः, स च कदाचिदधिको लेपो गृहीतो भवेत् ततस्तस्मिन्नधिके गृहीते 'उत्सर्गः' परिषठापनिकादोषः सम्पद्यते। उक्तञ्च-

भारे हत्थुवघातो, तत्थ य संपादिणो पडंते य।
पारिट्ठावणिदोसो, अहिगम्मि य हो आणीए॥

एवमुक्ते आचार्य प्राह-नोदक! तत्र पात्रे लिप्यमाने सविशेषतरा आत्मोपघातादयो दोषाः॥ तथा चाह-

[भा.४८४] एवं पि भाणभेदो, वियावडे अत्तणो उ उवघाओ।
निस्संकियं च पायम्मि गिण्हणे इयरहा संका॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

वृ- 'एवमपि' तत्र गत्वा पात्रलेपनेऽपि ऊर्द्धस्थितो लेपं गृहीत्वा भाजने प्रक्षिपति, तत्र व्यापृतस्य सतः कदाचिद् हस्ताद् भाजनं पतेत्, तत एवं व्यापृते भाजनभेदः । तथा कथमपि शकटस्य पतनत आत्मनश्चोपघातः । किञ्च पात्रे लेपस्य ग्रहणे गृहीत्वा च तत्रैव पात्रस्य लेपने क्रियमाणे तेषां साक्षात् पश्यतामेवं निशङ्कितं भवति, यथा-एतेनाशुचिना लेपेन भोजनपात्रममी लिम्पन्ति; ततो महान् प्रवचनोपघातः । 'इतरथा' तत्र पात्रालेपने रावे च लेपस्य ग्रहणे शङ्कोपजायते-किं पात्रस्य लेपनाय उत दुःखयतः पादस्य पिण्डीबन्धनाय लेपमाददते ? ततो न प्रवचनोपघातः ॥

यदप्युक्तं "भारेण हस्तोपघातः" इति तत्रापि प्रत्युत्तरमाह-

[भा.४८५] जइ वा हत्थुवघाओ, आणिज्जंतम्मि होइ लेवम्मि ।
पडिलेहणादि चेट्ठा, तम्हा उ न काइ कायव्वा ॥

वृ- यदि लेपे आनीयमाने भारेण हस्तोपघात इति नानयनं क्रियते तर्हि न कदाचिदपि प्रतिलेखनादिका क्रिया कर्त्तव्या, तत्रापि यथायोगं हस्त-पादादेरुपघातसम्भवात् । तस्माद्यथा प्रतिलेखनादिका क्रियाऽवश्यं कर्त्तव्या तत्करणे गुणसम्भवाद् एवं लेपानयनमपि ॥ तदेवं 'हत्थोवघाय गंतूण लिंपणा" इति व्याख्यातम् । अधुना "सोसणा य हत्थम्मि" इति व्याख्यानयति-

[भा.४८६] जति नेवं तो पुनरवि, आनेउं लिंपिऊण हत्थम्मि ।
अच्छति धारेमाणो, सद्दवनिक्खेवपरिहारी ॥

वृ- यदि नाम तत्र गत्वा पात्रं लेपनीयमिति नैवमिष्यते अनन्तरोदितानेकदोषप्रसङ्गात् ततः पुनरपि किञ्चिद् वक्तव्यम्-लेपमानीय पात्रं लिप्तवा 'सद्रवनिक्षेपपरिहारी' सद्रवनिक्षेप-परिहारमिच्छन् हस्ते पात्रं धारयन् तावत् तिष्ठति यावल्लेपस्य शोषो भवति एवं क्रियताम् ॥

अत्राऽऽचार्य प्राह-

[भा.४८७] एवं पि हु उवघातो, आयाए संजमे पवयणे य ।
मुच्छादी पवडंते, तम्हा उ न सोसए हत्थे ॥

वृ- 'एवमपि' हस्ते धृत्वा पात्रलेपस्य शोषणेऽपि 'हुः' निश्चितमुपघातः आत्मनः संयमस्य प्रवचनस्य च । तत्राऽऽत्मोपघातो मूर्च्छया आदिशब्दात् पात्रभारेण च प्रतिपतति वेदितव्यः । संयमोपघातः षट्कायानामुपरि पतनात् । प्रवचनोपघातः पतन्तं दृष्ट्वा लोको ब्रूयात् 'दुर्दृष्टधर्माणोऽमी' इति । उक्तञ्च-

कायाणमुवरि पडणे, आयाए संजमे पवयणे य ।
उण्हेण व भारेण व, मुच्छा पचडंति आयाए ॥
कायोवरि पवडंते, अह होही संजमे विराधनया ।
पवयणे अदिट्ठधम्मा, पडंत दट्ठुं वए लोगो ॥

यस्मादेते दोषास्तस्मान्न हस्ते पात्रं शोषयितव्यम् । अत्र सर्वत्र नोदकस्यैवं ब्रुवतो यथाच्छन्द इति कृत्वा चतुर्गुरुकं प्रायश्चित्तम् ॥ एवमाचार्यो नोदकं प्रतिहत्य साम्प्रतमात्मना यतनासामाचारीमाह-

[भा.४८८] दुविहा य होंति पाता, जुण्णा य नवा यजे उ लिप्पंति ।
जुण्णे दाएऊणं, लिंपति पुच्छा य इयरेसिं ॥

वृ- यानि पात्राणि लिप्यन्ते तानि द्विविधानि भवन्ति । तद्यथा-जीर्णानि नवानि च । तत्र

Jain Education International For Private & Personal Use Only www.jainelibrary.org

यानि जीर्णानि तानि नियमत आचार्याणां दर्शनीयानि, यथा-ईदृशो लेपः क्षमाश्रमणाः ! पात्राणामग्रेतनो वर्त्तते ततः सम्प्रति लिम्पामि न वा ? । तत्रैवं दर्शयित्वा यद्यनुज्ञा जाता तत स्तानि जीर्णानि लिम्पति नेतरथा । अदर्शयित्वा लेपने प्रायश्चित्तं मासलघु । यानि पुनर्नवानि तान्यवश्यं लेपनीयानीति कृत्वा आचार्यस्यापृच्छयाऽपि तेषाम् 'इतरेषां' नवानां लेपनं कर्त्तव्यम्॥ अथ जीर्णानामदर्शने को दोषः ? इत्यत आह-

[भा.४८९] पाडिच्छग-सेहाणं, नाऊणं कोइ आगमन मायी ।
दढलेवे वि उ पाए, लिंपति मा तेसि दिज्जिज्जा ॥

वृ- कश्चिन्मायी शिष्याणां प्रातीच्छिकानां चाऽऽगमनं ज्ञात्वा 'मा तेषां दद्याद्' इति कृत्वा दृढलेपान्यपि पात्राणि भूयो लिम्पति ॥

[भा.४९०] अहवा वि विभूसाए, लिंपति जा सेसगाण परिहाणी ।
अपडिच्छणे य दोसा, सेहे काए यतोऽदाए ॥

वृ- अथवा 'न शोभनोऽग्रेतनो लेपः' इति विभूषानिमित्तमजीर्णलेपमपि पात्रं भूयः कोऽपि लिम्पति । एवं मायया विभूषानिमित्तं वा भाजनेषु तेषु लिप्तेषु या 'शेषकाणां' साधूनां प्रातीच्छिकानां शिष्याणां च परिहाणिस्तां स मायी विभूषार्थी वा प्राप्नोति । तमेव दर्शयति- "अपडिच्छणे य" इत्यादि । केचित् प्रातीच्छिकाः समागतास्तद्योग्यानि च पात्राणि न सन्ति लिप्तानि तिष्ठन्तीति कृत्वा, तत एवं पात्रैर्विना तेषां प्रातीच्छिकानामप्रतीच्छने ज्ञान-दर्शनचारित्रपरिहाणि । "सेहे काए"त्ति तथा शैक्षः कश्चिदुपस्थितोऽथ च भाजनं न विद्यते लिप्तमस्तीति कृत्वा, ततो भाजनं विना कथं स प्रव्राज्यते इति सोऽप्रव्राजितः कायविराधनां कुर्यात्, सा च तन्निमित्तेति ज्ञान-दर्शन-चारित्रपरिहाणिप्रत्ययं कायविराधनाप्रत्ययं च प्रायश्चित्तं प्राप्नोति । यत एवमदर्शिते दोषास्तस्माद् जीर्णानि दर्शयेत् ॥ अथ केन विधिना लेपस्य ग्रहणादि कर्त्तव्यम् ? अत आह-

[भा.४९१] पुव्वण्हे लेवगमं, लेवग्गहणं सुसंवरं काउं ।
लेवस्स आनना लिंपणा य जयणाए कायव्वा ॥

वृ- पूर्वाह्णे लेपनिमित्तं गमं-गमनं कृत्वा तत्र च यतनया लेपग्रहणं च कृत्वा ततः सुसंवरं यथा भवत्येवं लेपस्य यतनयाऽऽनयनं कर्त्तव्यम् । आनीते च यतनया पात्रस्य लेपना ॥

एनामेव गाथां व्याचिख्यासुराह-

[भा.४९२] पुव्वण्हे लेपगहणं, काहं ति चउत्थगं करेज्जाहि ।
असहू वासियभत्तं, अकारऽलंभे व दिंतियरे ॥

वृ- साधुना प्रतिक्रमचरमकायोत्सर्गस्थितेन चिन्तनीयम्-किमद्य भाजनानि लेपनीयानि न वा ?, तत्र यदि लेपनीयानि ततः पूर्वाह्णे लेपग्रहणमहं करिष्यामीति विचिन्त्य 'चतुर्थकम्' अभक्तकं कुर्याद् । अथ 'असहः' असमर्थश्चतुर्थभक्तं कर्त्तुं तर्हि पर्युषितं गृह्णाति भक्तम् । अथ पर्युषितम् 'अकारकम्' अपथ्यं यदि वा न लभ्यते ततः पौरुषीं न करोति किन्त्वितरे साधवो मध्याह्ने हिण्डित्वा तस्मै भक्तं ददति ॥

[भा.४९३] कयकिइकम्मो छंदेण छंदितो भणति लेव धिच्छामि ।
तुब्भं वियाणिमट्ठो, आमं तं कित्तियं किं वा ॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

[भा.४९४] सेसे वि पुच्छिऊणं, कयउस्सग्गो गुरूण नमिऊण ।
मल्लग-रूए गेण्हइ, जति तेसिं कप्पितो होति ॥

वृ- कृतं कृतिकर्म-वन्दनं येन स कृतकृतिकर्मा । किमुक्तं भवति ? -स लेपानयनाय गन्ता प्रथममाचार्याणां वन्दनकं ददाति, दत्त्वा ब्रूते-इच्छाकारेण सन्दिशत । एवमुक्ते सूरयोऽभिदधति- "छन्देण" छन्दसाविज्ञपयेति भावः । एवं छन्दसा 'छन्दितः' निमन्त्रितः सन् भणति-गत्वा लेपं ग्रहीष्यामि । एवमुक्त्वाऽऽचार्यान् शेषसाधूँश्च वक्ति-युष्माकमप्यस्ति लेपेन प्रयोजनमानीयताम्। तत्र यो वक्ति आमं तं प्रति ब्रूते-कियन्तमानयामि ? किं वा लेपम् ? । तत्र यद् भणति तद् इच्छामीति प्रतिपद्य 'कृतोत्सर्ग' उपयोगकायोत्सर्गं कृत्वा गुरून् नमस्कृत्य आवश्यिकीं कृत्वा यदि तेषां पात्र-वस्त्राणां कल्पिकस्ततो गृहेषु गत्वा मल्लकं रूतं च गृह्णाति ॥

अथाकल्पिकस्तत आह-

[भा.४९५] गीयत्थपरिग्गहिते, अयाणओ रूय-मल्लए घेत्तुं ।
छारं च तत्थ वच्चति, गहिए तसपणरक्खट्ठा ॥

वृ- यः 'ज्ञायकः' अगीतार्थः स गीतार्थेन परिगृहीतानि रूत-मल्लकानि 'गृहीत्वा' गृहीते सति लेपे सम्पातिमत्रसप्राणरक्षार्थं तत्र मल्लकेषु क्षारं च गृहीत्वा व्रजति ॥

सम्प्रति यदधस्ताद् भणितं "सागारिय" त्ति तद्याख्यानार्तमाह-

[भा.४९६] वच्चंतेन य दिट्ठं, सागारिदुचक्कगं तु अब्भासे ।
तत्थेव होइ गहणं, न होति सो सागरियपिंडो ॥

वृ- तेन गृहीतरूत-मल्लक-क्षारेण व्रजता यदि सागारिकस्य-शय्यातरस्य द्विचक्रकं-शकटम् 'अभ्यासे' निकटे प्रदेशे दृष्टम् ततस्तत्रैव तस्य लेपग्रहणं भवति । यतः स न भवति सागारिकपिण्ड इति ॥ सम्प्रति प्रभुद्वारमाह-

[भा.४९७] गंतुं दुचक्कमूलं, अणुन्नविज्ञा पभुं तु साहीणं ।
एत्थ य पभु त्ति भणिए, कोई गच्छे निवसमीवं ॥

वृ- गत्वा द्विचक्रमूलं शकटस्य 'स्वाधीनं' प्रत्यासन्नं प्रभुमनुज्ञापयेत्, अननुज्ञापने प्रायश्चित्तं मासलघु, तस्मात् प्रायश्चित्तभीरुणा नियमतः प्रभोरनुज्ञापना कर्त्तव्या । अत्र प्रभुरित्युक्ते कश्चिच्चिन्तयति-राजानं मुक्त्वा कोऽन्यः प्रभुः ? इति राजाऽनुज्ञापनीय उक्तः, एवं चिन्तयित्वा नृपसमीपं गच्छेत्, गत्वा च तं राजानं धर्मलाभयेत् ॥

[भा.४९८] किं देमि त्ति नरवई, तुब्भं खरमक्खिया दुचक्कि त्ति ।
सो य पसत्थो लेवो, एत्थ य भद्देयरे दोसा ॥

वृ- तत्र स नरपतिर्ब्रूयात्-किं ददामि ? । साधुर्वदति-युष्माकं 'द्विचक्राणि' शकटानि खरेणतैलेन प्रक्षितानि सन्ति, तत्र च यो लेपः स प्रशस्त इति तमनुजानीत । अत्र 'भद्रेतरदोषाः' भद्रकदोषाः प्रान्तदोषाश्च । तत्र भद्रकदोषा इमे-स राजाऽनुज्ञापितः सन् ब्रूयाद्-अहो ! निर्ममत्वा भगवन्त एतदप्ययाचितं न गृह्णन्ति, ततः स आज्ञापयेत्-यानि कानिचन्मम विषये शकटानि तानि सर्वाण्यपि तैलेन म्रक्षणीयानि । प्रान्तः पुनरवं चिन्तयेत्-अहो ! अमी अशुचयो यदेतन्मां याचन्ते, नूनं सर्वमिदं नगरममीभिर्धर्षयितव्यमिति प्रद्वेषं यायात्, प्रद्विष्टश्च घोषापयेत्, यथा-

Jain Education International For Private & Personal Use Only www.jainelibrary.org

मम राज्ये न कोऽपि शकटं तैलेन म्रक्षयेत् किन्तु घृतेनान्येन वा ॥

[भा.४९९] तम्हा दुचक्कपतिणा, तस्संदिट्ठेण वा अणुन्नाते ।
कटुगंधजाणणट्ठा, जिंघे नासं अघट्टंतो ॥

वृ-यस्मादेवं भद्रक-प्रान्तदोषास्तस्माद्राजा नानुज्ञापयितव्यः ? इति चेद् उच्यते-यस्तस्य द्विचक्रस्य-शकटस्य पति-स्वामी यो वा तेन-शकटपतिना सन्दिष्टः, तेन द्विचक्रपतिना तत्सन्दिष्टेन वाऽनुज्ञाते तैलस्य किल कटुको गन्ध इति 'कटुगन्धज्ञानार्थं' कटुगन्धोऽस्ति न वेति परिज्ञानार्थं नासाम् 'अघट्टयन् असंस्पृशन् तं लेपं दूरस्थो जिघ्रति । घ्राते च यदि कटुको गन्धः समायाति ततस्तैललेप इति कृत्वा तं समादत्ते ॥ सम्प्रति "छक्कायजयणाए" इति व्याख्यानयति-

[भा.५००] हरिए बीए चले जुत्ते, वच्छे साणे जलट्ठिए ।
पुढवी संपातिमा सामा, महावाते महियाऽमिते ॥

वृ- हरिते बीजे वा साधौ शकटे वा प्रतिष्ठिते, तथा चले बलीवर्दाभ्यां युक्ते वा शकटे, तथा शकटेन सह बद्धे वत्से, शकटस्याधः स्थिते शुनि वा, तथा जलस्योपरि स्थिते, पृथिव्यां वा-सचित्तपृथिवीकायस्योपरि प्रतिष्ठिते शकटे, तथा सम्पातिमेषु-त्रसगणेषु सत्सु, तथा 'श्यामा' रात्रिस्तस्याम्, महावाते वा वाति, महिकायां निपतन्त्यां लेपग्रहणं नानुज्ञातम् । नाप्यमितस्य लेपस्य ग्रहणम् । एष द्वारगाथासङ्क्षेपार्थः । व्यासार्थस्तु प्रतिद्वारं वक्ष्यते ॥ तत्र यद्यप्यनन्तरं प्रायश्चित्तगाथाद्वयं तथापि नाव्याख्यातेषु द्वारेषु तद् व्याख्यातुं शक्यमिति प्रथमतो द्वाराणि व्याख्यायन्ते । तत्र हरितद्वारं बीजद्वारं चाधिकृत्याह-

[भा.५०१] हरिए बीए पतिट्ठिय, अनंतर परंपरे य बोधव्वे ।
परितानंते य तहा, चउभंगो होति नायव्वो ॥

वृ-हरिते बीजे च साधौ शकटे वा अनन्तरं परम्परके वा प्रतिष्ठिते प्रत्येकं चतुर्भङ्गी भवति ज्ञातव्या । गाथायां पुंस्त्वं प्राकृतत्वात् । तथा हरिते बीजे च प्रत्येकं परीत्तेऽनन्ते च साधौ शकटे वाऽनन्तर-परम्परप्रतिष्ठिते प्रत्येकं चतुर्भङ्गी । इयमत्र भावना-हरितेषु साधुरनन्तरप्रतिष्ठितो नो परम्परप्रतिष्ठितः १ परम्परप्रतिष्ठितो नानन्तरप्रतिष्ठितः २ अनन्तरप्रतिष्ठितोऽपि परम्परप्रतिष्ठितोऽपि ३ नानन्तरप्रतिष्ठितो नापि परम्परप्रतिष्ठितः ४ । एवं बीजेष्वपि साधुमधिकृत्य चतुर्भङ्गः । एवं गन्त्रीमप्यधिकृत्य हरितेषु बीजेषु च प्रत्येकं चतुर्भङ्गी द्रष्टव्या-हरितेष्वनन्तरं प्रतिष्ठिता गन्त्री नो परम्पप्रतिष्ठिता इत्यादि । एवं सर्वसङ्कलनया चतुर्भङ्गी चतुष्टयं जातम् । चतुर्भङ्गीद्विकं तु साधु-गन्त्रीसंयोगतो द्रष्टव्यम् । तद्यथा-हरितेषु साधुर्गन्त्री वाऽनन्तरप्रतिष्ठिता नो परम्परप्रतिष्ठिता इत्यादि भङ्गचतुष्टयं प्राग्वत् । एवं बीजेष्वपि । सर्वसङ्ख्यया षट् चतुर्भङ्ग्यः । एतच्च चतुर्भङ्गीषट्कं किल प्रत्येकेषु हरित-बीजेषूक्तम् । एवमनन्तेष्वपि द्रष्टव्यम् । एवं मिश्रेष्वपि ॥ साम्प्रतमत्रैव प्रायश्चित्तमुच्यते-

[भा.५०२] चउरो लहुगा गुरुगा, मासो लहु गुरु य पनग लहु गुरुयं ।
छसु परितऽनंत मीसे, बीजे य अणंतर परे य ॥

वृ- हरिते चशब्दसंसूचिते प्रत्येकेऽनन्तर-परम्परभेदतस्त्रिष्वाद्येषु भङ्गेषु चत्वारो लघुका वक्तव्याः । इयमत्र भावना-प्रत्येकेषु हरितेषु साधावनन्तरप्रतिष्ठिते प्रथमे भङ्गे प्रायश्चित्तं चतुर्लघु, द्वितीये परम्परप्रतिष्ठिते चतुर्लघु, तृतीये भङ्गेऽनन्तरपरम्परप्रतिष्ठिते द्वे चतुर्लघुके, चरे भङ्गे शुद्धः ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

तथा प्रत्येकहरितेषु साधौ गन्त्रयां चानन्तरप्रतिष्ठितायां द्वे चतुर्लघुनी, द्वितीयभङ्गेऽपि परम्परप्रतिष्ठितायां द्वे चतुर्लघुके, तृतीये भङ्गे उभयोरुभयत्र प्रतिष्ठितयोश्चत्वारि चतुर्लघुकानि, चरमे भङ्गे शुद्धः। तथा हरितेष्वनन्तेषु साधावनन्तरप्रतिष्ठिते प्रायश्चित्तं चतुर्गुरुकम्, द्वितीयेऽपि परम्परप्रतिष्ठिते चतुर्गुरु, तृतीयेऽनन्तरपरम्परप्रतिष्ठिते द्वे चतुर्गुरुके, चरमे शुद्धः। गन्त्र्यामप्यनन्तहरितेऽनन्तरप्रतिष्ठितायां चतुर्गुरु, परम्परप्रतिष्ठितायामपि चतुर्गुरु, उभयप्रतिष्ठितायां द्वे चतुर्गुरुके, चरमे शुद्धः। अनन्तहरितेषु साधौ गध्यां चानन्तरप्रतिष्ठिताया द्वे चतुर्गुरुके, परम्परप्रतिष्ठितायामपि द्वे चतुर्गुरुके, उभयप्रतिष्ठितायां चत्वारि चतुर्गुरुकाणि, चरमे शुद्धः। तथा मिश्रेषु प्रत्येकहरितेषु साधावनन्तरप्रतिष्ठिते मासलघु, परम्परप्रतिष्ठितेऽपि मासलघु, उभयप्रतिष्ठिते द्वे मासलघुके, चरमे भङ्गे शुद्धः। गन्त्र्यामप्यनन्तरप्रतिष्ठितायां मासलघु, परम्परप्रतिष्ठितायामपि मासलघु, उभयप्रतिष्ठितायां द्वे मासलघुके, चरमे भङ्गे शुद्धः। साधौ गन्त्रयां चाऽनन्तरप्रतिष्ठितायां द्वे मासलघुके, परम्परप्रतिष्ठितायामपि द्वे मासलघुके, उभयप्रतिष्ठितायां चत्वारि मासलघुनि, चरमे भङ्गे शुद्धः। तथा मिश्रेष्वनन्तहरितेषु साधावनन्तरप्रतिष्ठिते मासगुरु, परम्परप्रतिष्ठितेऽपि मासगुरु, उभयप्रतिष्ठिते द्वे मासगुरुके, चतुर्थे शुद्धः।

गन्त्र्यामपि अनन्तप्रतिष्ठितायां मासगुरु, परम्पर प्रतिष्ठितायामपि मासगुरु, उभयप्रतिष्ठितायां द्वे मासगुरुके, चरमे शुद्धः। साधौ गन्त्र्यां चानन्तरप्रतिष्ठितायां द्वे मासगुरुके, परम्पर-प्रतिष्ठितायामपि द्वे मासगुरुके, उभयप्रतिष्ठितायां चत्वारि मासगुरुकाणि, चरमभङ्गे शुद्धः। "पणग लहु गुरुग" मिति बीजेषु प्रत्येकेषु सचित्तेषु मिश्रेषु वा प्रत्येकं साधावनन्तरप्रतिष्ठिते द्वे लघुपञ्चके, चमभङ्गे शुद्धः। तथा गन्त्र्यामनन्तरप्रतिष्ठितायां लघुपञ्चकम्, परम्परप्रतिष्ठितायामपि लघुपञ्चकम्, उभयप्रतिष्ठितायां द्वे लघुपञ्चके, चरमभङ्गे शुद्धः। साधौ गन्त्रयां चानन्तरप्रतिष्ठितायां द्वे लघुपञ्चके, परम्परप्रतिष्ठितायामपि द्वे लघुपञ्चके, उभयप्रतिष्ठितायां चत्वारि लघुपञ्चकानि, चरमभङ्गे शुद्धः। एवमनन्तेषु रात्रिन्दिवपञ्चकं गुरुकं द्रष्टव्यम्। एवं बीजे चशब्दाद्धरिते च प्रत्येके सचित्तेऽनन्ते सचित्ते मिश्रे चानन्तरे परम्परे च 'षट्सु' षट्सु भङ्गेषु यथायोगं प्रायश्चित्तमवगन्तव्यम्॥

इदानीं चलादिद्वारप्रतिपादनार्थमाह-

[भा.५०३] दव्वे भावे य चलं, दव्वम्मी दुट्ठियं तु जं दुपयं।
आयाए संजमम्मि य, दुविहा उ विराहणा तत्थ॥

वृ- चलं नाम द्विविधम्, तद्यथा-द्रव्यतो भावतश्च। तत्र द्रव्यतश्चलं यद् 'द्विपदं' शकटं दुस्थितम्, तत्र लेपं गृह्णतश्चतुर्गुरुकम्। यतस्ततो द्विविधा विराधना-आत्मनि संयमे च। तत्रात्मविराधना शकटेन पतताऽभिघातसम्भवात्। संयमविराधना शकटे सञ्चाल्यमाने प्राणजात्युपमर्दनात्॥

[भा.५०४] भावचल गंतुकामं, गोणाईअंतराइयं तत्थ।
जुत्ते वि अंतरायं, वित्तसचलणे य आयाए॥

वृ- भावचलं नाम 'गन्तुकामं' योज्यमानमित्यर्थः, तत्र यावद् लेपो गृह्यते तावद् बलीवर्दानां चारि-पानीयनिरोधनम्, आदिशब्दान्मनुष्याणामप्यन्तरायम्। ततो भावचलेऽपि लेपं गृह्णतश्चत्वारो

Jain Education International For Private & Personal Use Only www.jainelibrary.org

लघुकाः। गतं चलद्वारम्। अधुना युक्तद्वारमाह-"जुत्ते वी"त्यादि, युक्तं नाम-योक्रितबलीबर्दं तत् स्थापयित्वा यदि लेपं गृह्णाति ततः प्रायश्चित्तं चत्वारो गुरुकाः, यतस्तत्रापि स एवान्तरायदोषः। अन्यश्चायम्-ते बलीवर्दा वित्रस्येयुः, तत्र गन्त्रया चलन्त्या चरणाक्रमणे आत्मविराधना, संयमविराधना त्रसादिनिपातः॥ सम्प्रति वत्सद्वारं श्वद्वारं चाह-

[भा.५०५] वच्छो भएण नासति, भंडिक्खोभे य आयवावत्ती।
आया वयण साणे, काया य भएण नासंते॥

वृ- यत्र शकटे वत्सो बद्धः श्वा वा यस्याधस्तात् तिष्ठति बद्धो वा वर्त्तते, तत्र वत्से लेपं गृह्णतश्चत्वारो लघुकाः शुनि चत्वारो गुरुकाः; यतो वत्सो भयेन नश्यति, तस्मिंश्च नश्यति गन्त्र्याः 'क्षोभे' चलने आत्मव्यापत्ति; तथा श्वा समागच्छन्तमपूर्वं दृष्ट्वा दशति तत्रात्मोपघातः, शुना लीढं लेपममी गृह्णन्तीति प्रवचनोपघातः, भयेन नश्यति शुनि 'कायाः' पृथिवीकायादयो विनाशमापद्यन्ते ततः संयमोपघातश्च॥ सम्प्रति जलस्थितद्वारं पृथिवीस्थितद्वारं चाह-

[भा.५०६/१] जे चेव य हरिएसुं, सो चेव गमो उ उदग पुढवीए।

वृ- य एव गमः प्राग् हरितेषूक्तः स एवोदके पृथिव्यां च वेदितव्यः। इयमत्र भावना-सचित्ते उदके साधुरनन्तरप्रतिष्ठितो न परम्परप्रतिष्ठित इत्यादि चतुर्भङ्गी, गन्त्र्यामप्येवं चतुर्भङ्गी, उभयोरपि चतुर्भङ्गी, तदेवं चतुर्भङ्गीत्रयं सचित्ताप्काये। एवं मिश्राप्कायेऽपि चतुर्भङ्गीत्रयमवसातव्यम्। उभयमीलने चतुर्भङ्गीषट्कम्। एवं चतुर्भङ्गीषट्कं पृथिवीकायेऽपि भावनीयम्। तत्र सचित्तेऽप्काये साधावनन्तरप्रतिष्ठिते प्रायश्चित्तं चतुर्लघु, परम्परप्रतिष्ठितेऽपि चतुर्लघु, उभयप्रतिष्ठिते द्वे चतुर्लघुके, चरमभङ्गे शुद्धः। गन्त्र्यामप्यनन्तरप्रतिष्ठितायां चतुर्लघु, परम्परप्रतिष्ठितामपि चतुर्लघु, उभयप्रतिष्ठितायां द्वे चतुर्लघुके, चरमे शुद्धः। साधु-गन्त्र्योरनन्तरप्रतिष्ठितयोर्द्वे चतुर्लघुके, परम्परप्रतिष्ठितयोरपि द्वे चतुर्लघुके, उभयोरुभयत्र प्रतिष्ठितयोश्चत्वारि चतुर्लघुकानि, चरमभङ्गे शुद्धः। मिश्रेऽप्काये साधावनन्तरप्रतिष्ठिते मासलघु, परम्परप्रतिष्ठितेऽपि मासलघु, उभयप्रतिष्ठिते द्वे मासलघुके, चरमे शुद्धः। एवं गन्त्र्यामपि भङ्गचतुष्टये वक्तव्यम्। साधु-गन्त्र्योरनन्तरप्रतिष्ठितयोर्द्वे मासलघुके, उभयोरुभयत्र प्रतिष्ठितयोरपि वे मासलघुके, उभयोरुभयत्र प्रतिष्ठितयोश्चत्वारि मासलघुकानि, चरमभङ्गे शुद्धः। एवं पृथिवीकायेऽपि चतुर्भङ्गीषट्के प्रायश्चित्तमवगन्तव्यम्॥ सम्प्रति सम्पातिमद्वारं श्यामाद्वारं चाह-

[भा.५०६/२] संपाइमा तसगणा, सामाए होइ चउभंगो॥

वृ- "संपातिमा" इत्यादि। अथ के नाम सम्पातिम येषु पतत्सु लेपो न गृह्यते?, किं त्रसाः स्थावरा वा? तत्राह-सम्पातिमास्त्रसगणा न स्थावराः। तेषु सम्पातिमेषु पतत्सु यदि लेपं गृह्णाति तदा तस्य प्रायश्चित्तं चत्वारो लघुकाः। श्यामा-रात्रिस्तत्र चतुर्भङ्गी, तद्यथा-रात्रौ लेपं गृह्णाति रात्रावेव च भाजनस्य लेपं ददाति, अत्र प्रायश्चित्तं चत्वारो लघुकास्तपसा कालेन च गुरवः, रात्रौ लेपं गृहीत्वा दिवसे भाजनस्य ददाति चत्वारो लघुकास्तपोगुरुकाः काललघवः, दिवसे लेपं गृहीत्वा रात्रौ भाजनस्य ददाति चत्वारो लघुकास्तपोलघवः कालगुरुकाः, दिवसे गृहीत्वा दिवस एव ददाति शुद्धः॥ महावातादिद्वारत्रयमाह-

Jain Education International For Private & Personal Use Only www.jainelibrary.org

[भा.५०७] वायम्मि वायमाणे, महियाए चेव पवडमानीए।
नाणुन्नायं गहणं, अमियस्स य मा विगिंचणया ॥

वृ- 'वाते' महावाते वाति तथा महिकायां प्रपतन्त्यां लेपस्य ग्रहणं नानुज्ञातं तीर्थकर-गणधरैः, महावाते वाति तदुद्ध तानां त्रस-स्थावराणां लेपसम्पर्कतो विनाशसम्भवात् महिकायां निपतन्त्यामप्कायविराधनात्। तत्र महावाते वाति लेपं गृह्णतः प्रायश्चित्तं चतुर्लघु। महिकायामपि निपतन्त्यां चतुर्लघु। अमितग्रहणे मासलघु ॥ एतदेव प्रायश्चित्तं प्रतिपादयन्नाह-

[भा.५०८] चल-जुत्त-वच्छ-महिया-तसेसु सामाए चेव चतुलहुगा।
दव्वचल साण गुरुगा, मासो लहुओ उ अमियम्मि ॥

वृ- भावतश्चले बलीवर्दयुक्ते वत्से निबद्धे तथा महिकायां निपतन्त्यां त्रसेषु सम्पातिमेषु निपतत्सु श्यामायां च लेपं गृह्णतः प्रत्येकं प्रायश्चित्तं चत्वारो लघुकाः। द्रव्यचले शुनि वा स्थिते चत्वारो गुरुकाः। अमिते गृहीते लघुको मासः। विशेषभावना तु प्रतिद्वारं प्रागेव कृता ॥

[भा.५०९] एतद्दोसविमुक्कं, घेत्तुं छारेण अक्कमित्ताणं।
चीरेण बंधिऊणं, गुरुमूल पडिक्कमाऽऽलोए ॥

वृ- ये एते हरितादयोऽनन्तरं दोषा उक्तास्तैर्मुक्तं लेपं गृहीत्वा 'मा सम्पातिमानां वधो भूयात्' इति तं 'क्षारेण' भस्मना आक्रम्य चीवरेण बद्ध्वा गुरुपादमूलमागच्छति, आगम्य चैर्यापथिकीं प्रतिक्रम्यालोचयति ॥

[भा.५१०] दंसिय छंदिय गुरु सेसए य ओमत्थियस्स भाणस्स।
काउं चीरं उवरिं, रूयं च छुभेज्ज तो लेवं ॥

वृ- आलोच्य लेपं गुरोर्दर्शयति। दर्शयित्वा गुरुं लेपेन 'छन्दयति' निमन्त्रयति। गुरुनिमन्त्रणानन्तरं शेषकानपि साधून् निमन्त्रयति। ततो यावता यस्यार्थस्तस्य तावन्तं दत्वा एकस्य भाजनस्य 'अवमन्थितस्य' अवाङ्मुखीकृतस्योपरि चीवरं कृत्वा तत्र लेपं रूतं च प्रक्षिपेत्॥ सम्प्रति लेपदानविधिमाह-

[भा.५११] अंगुट्ठ-पएसिणि-मज्झिमाहि घेत्तुं घनं ततो चीरं।
आलिंपिऊण भाणं, एक्कं दो तिन्नि वा घट्टे ॥

वृ- अङ्गुष्ठेन प्रदेशिन्या मध्यमया चाङ्गुल्या लेपं गृहीत्वा घनं च चीवरमादाय तत्र लेपं प्रक्षिप्य निष्पीडयेत्, निष्पीडय च एकैकभाजनमेकं द्वौ त्रीन् वा वारान् लेपयेत्। अधिकं तु लेपमङ्कनिमित्तं सरूतकं पेषयेत्। अथ न दातव्योऽङ्को यदि वा तत्राप्युद्धरितः ततः सरूतकं तं क्षारे परिष्ठापयेत्। अन्यच्चान्यच्च भाजनं लिप्तवाऽन्यदन्यद् वारंवारेण घट्टणपाषाणेन घट्टयति॥ तथा चाह-

[भा.५१२] अन्नोन्ने अंकम्मी, अन्नं घट्टेति वारवारेण।
आनेइ तमेव दिने, दवं रएउं अभत्तट्ठी ॥

वृ- अन्यस्मिन् भाजने घट्टिते अन्यद् अन्यद् भाजनमङ्के स्थापयित्वा वारंवारेण घट्टयति। तत्र यदि उद्धानो लेपो यदि च तस्य द्रवेण कार्यं समुत्पन्नं स चाऽऽत्मनाऽभक्तार्थी ततः सोऽभक्तार्थी तस्मिन्नेव दिने पात्रं लेपेनोपरज्य उद्धाने लेपे तेन 'द्रवं' पानीयमानयति। अथ

Jain Education International For Private & Personal Use Only www.jainelibrary.org

नोद्वानस्ततोऽन्येषामभक्तार्थिनामहिण्डमानानां वा तत् पात्रं समर्प्यानयेन पानीयमानयेत् ॥

[भा.५१३] अभतट्ठीणं दाउं, अन्नेसिं वा अहिंडमाणाणं ।
हिंडेज्ज असंथरणे, असती घेत्तुं अरइयं तु ॥

वृ- यदि स भक्तार्थी न च पात्रस्य लेपोऽद्यापि शुष्कस्ततः 'असंस्तरणे' भोजनमन्तरेण संस्तरीतुमशक्तौ अभक्तार्थिनामन्येषां वा साधूनामहिण्डमानानां तत् पात्रं समर्प्य हिण्डेत असति अन्येषामभक्तार्थिनामहिण्डमानानां वा अभावे तद् 'अरञ्जितम्' अद्याप्यपरिणतलेपं गृहीत्वा हिण्डेत ॥

[भा.५१४] न तरिज्ञा जति तिन्नि उ, हिंडावेउं ततो नु छारेण ।
ओयत्तेउं हिंडइ, अन्ने व दवं से गिण्हंति ॥

वृ- यदि त्रीणि पात्राणि हिण्डापयितुं न शक्नोति ततः 'नु' निश्चितं तत् पात्रमुपाश्रये क्षारेण 'अवनम्य' स्थगयित्वा हिण्डते। यदि वा 'से' तस्य योग्यं द्रवमन्ये गृह्णन्ति ततो रिक्तपात्रवहने न कश्चिद्भार इत्यदोषः ॥

[भा.५१५] लित्थारियाणि जाणि उ, घट्टगमादीणि तत्थ लेवेण ।
संजमभूतिनिमित्तं, ताइं भूईए लिंपिज्ञा ॥

वृ- 'तत्र' पात्रलेपने तानि लेपेन घट्टकादीनि 'लेत्थारियाणि' देशीपदमेतत् खरण्टितानि 'संजमभूतिनिमित्तं' संयमविभूतिहेतोः 'भूत्या' क्षारेण तानि लिम्पेद् येन तत्संस्पर्शतस्त्रसानां स्थावराणां वा विनाशो न भवति ॥

[भा.५१६] एवं लेवग्गहणं, आनयणं लिंपणाय जयणा य ।
भणियाणि अतो वोच्छं, परिकम्मविहिं तु लित्तस्स ॥

वृ- 'एवम्' उक्तेन प्रकारेण लेपस्य ग्रहणम् आनयनं पात्रस्य लेपनाय सर्वत्र यतना एतानि भणितानि। अत ऊर्ध्वं पुनर्लिप्तस्य परिकर्मविधिं वक्ष्यामि ॥ तमेवाभिधातुकाम आह-

[भा.५१७] लित्ते छाणिय छारो, घनेन चीरेण बंधिउं उण्हे ।
उव्वत्तण परियत्तण, अंछिय धोए पुणो लेवो ॥

वृ- पात्रे लिप्ते सति यः 'क्षाणितः' गालितः 'क्षारः' भस्म स तत्र प्रक्षिप्यते, ततो घनेन चीरेण बद्धवा उष्णे ध्रियते, तत्र च पात्रस्योद्वर्तनं परिवर्तनं च तावत् कर्तव्यं यावद् लेपः शुष्को भवति, ततः पात्रम् 'अञ्छ्यते' आकृष्यते, आकृष्य पानीयेन प्रक्षाल्यते, ततः प्रक्षालिते सति पुनरपि लेपो दीयते ॥

[भा.५१८] काउं सरयत्ताणं, पत्ताबंधं अबंधगं कुज्ञा ।
साणाइरक्खणट्ठा, पमज्ज छाउण्हसंकमणा ॥

वृ- पात्रे भूयो लिप्ते सति तस्योपरि 'सरजस्त्राणं' रजस्त्राणसहितं पात्राबन्धम् 'अबन्धकम्' अग्रन्थिकं कुर्यात्। कस्मादबन्धकं कुर्याद्? अत आह- 'श्वादिरक्षणार्थं' शुन आदिशब्दान्मर्कट-मार्जारादिभ्योऽपि रक्षणार्थम्, अन्यथा हि ग्रन्थौ दत्ते सपात्रबन्धं पात्रं श्वादिभिर्नीयते। तथा छायायामुष्णे च पात्रस्य 'सङ्क्रमणे(णा)' प्रमृज्य तत् पात्रं स्थापयितव्यम् ॥

[भा.५१९] तद्दिवसं पडिलेहा, कुंभमुहादीण होइ कायव्वा ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

छन्ने य निसिं कुज्जा, कयकज्जाणं विवेगो उ ॥

वृ-यस्मिन् दिने पात्रलेपनं तस्मिन्नेव दिवसे 'कुम्भमुखादीनां' घटकण्ठादीनाम् आदिशब्दात् स्थालीकण्ठादिपरिग्रहः 'प्रत्युपेक्षा भवति कर्त्तव्या' कुटकण्ठादीनि तस्मिन् दिने आनेतव्यानीत्यर्थः। किमर्थम् ? इत्यत आह-'निशि' रात्रौ तेषामुपरि छन्ने प्रदेशे लिप्तानि पात्राणि कुर्यादित्येवमर्थम्। तदनन्तरं तेषां घटमुखादीनां कृतकार्याणां 'विवेकः' परिष्ठापनिका ॥

[भा.५२०] अट्टगहेउं लेवाहिगं तु सेसं सरूयगं पीसे ।
अहवा वि न दायव्वो, सरूयगं छारे तो उज्झे ॥

वृ- 'शेषम्' अधिकंपम् 'अट्टकहेतोः' अट्टकनिमित्तं सरूतकं पेषयेत् । अथवाऽपि न दातव्योऽट्टकस्ततस्मधिकं सरूतकं लेपं 'क्षारे' भस्मनि 'उज्झेत्' परिष्ठापयेत् । अयं चार्थो यत्र भणितुमुचितस्तत्र प्रागेवोपदर्शितः । सम्प्रति तु गाथाक्रमानुलोमत उक्तः ॥

[भा.५२१] पढम-चरिमाउ सिसिरे, गिम्हे अद्धं तु तासि वज्जित्ता ।
पायं ठवे सिणेहादिरक्खणट्ठा पवेसे वा ॥

वृ- 'शिशिरे' शीतकाले प्रथमचरमे पौरुष्यौ वर्जयित्वा 'ग्रीष्मे' उष्णकाले 'तयोः' प्रथमचरमपौरुष्योरर्द्धमर्द्ध वर्जयित्वा पात्रमुष्णे स्थापयेत् । प्रथमचरमपौरुष्यादिकाले तु मध्ये प्रवेशयेत् । किमर्थम् ? इत्याह-'स्नेहादिरक्षार्थं' स्नेहः-अवश्यायः आदिशब्दाद् महिका-हिमवर्षादिपरिग्रहः तद्रक्षणार्थम् । इयमत्र भावना-शिशिरकाले प्रथमायां पौरुष्यामतिक्रान्तायामुष्णे ददाति, चरमायां तु पौरुष्यामनवगाढायां मध्ये प्रवेशयति, अन्यथा शिशिरकाले कालस्य स्निग्धतया प्रथमायां चरमायां च पौरुष्यामवश्यायादिपतनभावतो लेपविनाशप्रसङ्गात् । उष्णकाले तु प्रथमायाः पौरुष्या अर्धेऽपक्रान्ते पात्रमुष्णे दद्यात्, चरमायास्तु पौरुष्याः पश्चिमेऽर्द्धेऽनवगाढे मध्ये प्रवेशयेत्, कालस्य रूक्षतया तत ऊर्द्धवं पश्चाच्चावश्यायादिसम्भवात् ॥

[भा.५२२] उवयोगं च अभिक्खं, करेति वासादि-साणरक्खट्ठा ।
वावारेति व अन्ने, गिलाणमादीसु कज्जेसु ॥

वृ- उष्णे च पात्रेदत्ते सति स वर्षादिभ्यो रक्षणार्थम्, वर्ष-वृष्टिः आदिशब्दाद् हिमप्रपातादिपरिग्रहः, श्वा-कुक्कुरस्तद्रक्षणार्थम् 'अभीक्ष्णम्' अनवरतमुपयोगं करोति । यदि वा ग्लानादिप्रयोजनेषु समापतितेष्वन्यान् साधून् व्यापारयति, स तु तत्रैव रक्षयन् तिष्ठति ॥

अथ कियन्तः पात्रस्य लेपा दीयन्ते ? इत्याह-

[भा.५२३] एक्को य जहन्नेणं, बिय तिय चत्तारि पंच उक्कोसा ।
संजमहेउं लेवो, वज्जित्ता गारव विभूसं ॥

वृ-पात्रस्य संयमहेतोर्जघन्येनैको लेपो दातव्यः, मध्यमतो द्वौ त्रयो वा, उत्कर्षतश्चत्वारः पञ्च वा वर्जयित्वा गौरवंविभूषां च । गौरवेणात्मनो महर्द्धिकत्वमननलक्षणेन विभूषया वा न लेपो दातव्यः, किन्तु संयमस्फातिनिमित्तमिति ॥

[भा.५२४] अणवट्टंते तह वि उ, सव्वं अवनेत्तु तो पुणो लिंपे ।
तज्जाय सचोप्पडयं, घट्ट रएउं ततो धोवे ॥

वृ-उत्कर्षतः पञ्चस्वपि लेपेषु यदि स लेपः नावतिष्ठते-न पात्रेण सह लोलीभवति 'ततः'

Jain Education International For Private & Personal Use Only www.jainelibrary.org

तस्मिन्ननवतिष्ठमाने सर्वं लेपमपनीय ततः पुनर्मूलतः पात्रं लिम्पेत् यथा स लेपोऽवतिष्ठे । "तज्ञाए"त्यादि । इह यद् अलाब्वादिपात्रं तैलादिना 'सचोप्पडं' सस्नेहं तत्र च धूलि प्रभूता लग्ना तं लेपं घट्टकपाषाणेन घट्टयित्वा तद्गतेनैव च लेपेन भूयस्तत् पात्रं रञ्जयित्वा ततः प्रक्षालयति एष तज्ञातो नाम लेपः ।। सम्प्रति लेपस्यैव भेदानाह-

[भा.५२५] तज्ञायजुत्तिलेवो, दुचक्कलेवो य होइ नायव्वो ।
मुद्दियनावाबंधो, तेनगबंधो य पडिकुट्ठो ।।

वृ- त्रिविधो लेपो भवति ज्ञातव्यः, तद्यथा-तज्ञातलेपो युक्तिलेपो द्विचक्रलेपश्च । द्विचक्रलेपो नाम शकटलेपः । तत्र लिप्यमानं लिप्तं वा यदि पात्रं कथमपि भङ्गमाप्नुयात् ततोऽन्यस्याभावे मुद्रितनौबन्धेन बध्नीयात् न स्तेनकबन्धेन, यतो मुद्रितनौबन्ध एव तीर्थकरैरनुज्ञातः स्तेनकबन्धस्तु प्रतिक्रुष्टः ।। साम्प्रतमेनामेव गाथां विवरीषुस्तज्ञातलेपस्य प्राग्व्याख्याततत्वात् शेषपदव्याख्यानार्थमाह-

[भा.५२६] जुत्ती उ पत्थरायी, पडिकुट्ठा सा उ सन्निही काउं ।
दय सुकुमाल असन्निहि, दुचक्कलेवो अतो इट्ठो ।।

वृ- 'युक्ति' पदैकदेशे पदसमुदायोपचाराद् युक्तिलेपः 'प्रस्तरादि' प्रस्तरादिकृतः, आदिशब्दाच्छर्करा-लोहकिट्ट-केदारमृत्तिकादिपरिग्रहः, सा च युक्ति सन्निधिरिति कृत्वा तीर्थकरगणधरैः 'प्रतिक्रुष्टा' निराकृता । तज्ञातलेपश्च कदाचिदवाप्यते । तत एतेषु लेपेषु मध्ये शकटलेपः सुन्दरः, यतस्तस्मिन् सुकुमारतया पानजातयो जन्तवः स्पष्टा दृश्यन्ते, दृश्यमानेषु च तेषु दयां कर्त्तु शक्यते, न च तत्र सन्निधिदोषः, अतः सुन्दरत्वात् स एव द्विचक्रलेप इष्टः ।।

[भा.५२७] संजमहेउं लेवो, न विभूसाए वयंति तित्थयरा ।
सति-असतीदिट्ठंतो, विभूसाए सहोंति चउगुरुगा ।।

वृ- लेपः पात्रस्य दातव्यः संयमहेतो र्न विभूषया, उपलक्षणमेतत्, नापि गौरवेणइति भगवन्तस्तीर्थकरा वदन्ती । संयमहेतोः पुनर्दीयमाने लेपे यदि विभूषा भवति तथापि सा संयमहेतुरेव। अत्र सत्या असत्याश्च दृष्टान्तः । तथाहि-सत्यप्यात्मानं विभूषयति असत्यपि, केवलं सती कुलाचारनिमित्तमात्मानं विभूषयतीति तुल्यमपि तद्विभूषणमदुष्टम्, इतरा जारतोषणनिमित्तमिति दोषवत् । एवं यथा सत्यसत्यौ तथा साधू, यथा विभूषणं तथा लेपः, यथा कुलाचारस्तथा संयमः, यथा जारतोषणं तथा असंयमः । विभूषया लेपं ददतः प्रायश्चित्तं चत्वारो गुरुकाः, उपलक्षणमेतत्, तेन गौरवेणापि ददत एतत् प्रायश्चित्तमवसातव्यम् । उक्तञ्च-

[भा.५२७] संजमहेऊ लेवो, न विभूसा गारवेण वा देयो ।
चउगुरुग विभूसाए, लिंपिंते गारवेणं वा ।।

[भा.५२८] भिज्जिज्ज लिप्पमाणं, लित्तं वा असइए पुणो बंधे ।
मुद्दियनावाबंधे, न तेनबंधेण बंधेज्जा ।।

वृ- तत् पात्रं लिप्यमानं लिप्तं वा कथमपि हस्तपतनादिना भिद्येत न चान्यत् पात्रं विद्यते ततस्तत् पात्रं भूयो मुद्रितनौबन्धेन बध्नीयात् न स्तेनकबन्धेन ।।

सम्प्रति लेपस्य जघन्यादिभेदानाह-

[भा.५२९] खर अयसि-कुसुंभ सरिसव, कमेण उक्कोस मज्झिम जहन्नो ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

नवनीए सप्पि वसा, गुले य लोणे अलेवो उ ।।

वृ- खरसंज्ञकेन तिलतैलेन यो लेपः स उत्कृष्टः, अतसीतैलेन कुसुम्भतैलेन च मध्यमः, सर्षपतैलेन जघन्यः। उक्तञ्च-

सो पुन लेवो खरसन्हएण उक्कोसओ मुनेयव्वो ।
अयसि-कुसुंभिय मज्झो, सरिसवतिल्लेण य जहन्नो ।।

'नवनीतेन' म्रक्षणेन 'सर्पिषा' घृतेन वसया च निर्वृत्तो लेपोऽलेपो ज्ञातव्यः, तस्यपात्रे सम्यग् लगनाभावाद् जुगुप्सितत्वाच्च। तता गुडभृतेषु लवणभृतेषु वा शकटेषु तिलतैलम्रक्षितेष्वपि यो लेपः सोऽप्यलेपः, तस्यापि लवणाद्यवयवयोगतोऽप्रशस्तत्वात् ।।

तदेवमुक्तो लेपस्य विधि । साम्प्रतं लेपकल्पिकमाह-

[**भा.५३०**]पढिय सुय गुणियमगुणिय, धारमधार उवउत्तो परिहरति ।
आलोयायरियादी, आयरओ विसोहिकारो से ।।

वृ- यस्मादजानतः प्रायश्चित्तं तस्माद् येन ओघनिर्युक्तिसूत्रम् इयं वा कल्पपीठिका पठिता स्यात् श्रुता वा 'गुणिता' अत्यन्तस्वभ्यस्तीकृता स्याद् अगुणिता वा सा धारिता वा स्याद् अधारिता वा तथापि चेदुपयुक्तः सन् सूत्रोक्तप्रकारेण लेपं 'परिहरति' परिभोगयति स लेपकल्पिकः । तेन च लेपसूत्रेण पठितेनापठितेन वा गुणितेनागुणितेन वा धारितेनाधारितेन वा उपयुक्ते वाऽनुपयुक्ते वा यां विराधनामापद्यते तामाचार्यादिः पुरत आलोचयति, प्रथमत आचार्यस्य, तदभावे उपाध्यायादेरपि । आलोचिते च "से" तस्य प्रायश्चित्तप्रदानेन विशोधिकारक आचार्यः ।।

उक्तो लेपकल्पिकः । सम्प्रति पिण्डकल्पिकमाह-

[**भा.५३१**]अप्पत्ते अकहित्ता, अणहिगयऽपरिच्छणे य चउगुरुगा ।
दोहि गुरू तवगुरुगा, कालगुरू दोहि लहुगा ।।

वृ- सूत्रं नाम प्रागासीदाचारगतं पिण्डैषणाध्ययनम्, इदानीं तु दशवैकालिकगतं पिण्डैषणाध्ययनम्, तस्मिन् 'अप्राप्ते' अपठिते यदि पिण्डस्यानयनाय तं प्रेषयति तदा तस्य प्रायश्चित्तं चत्वारो गुरुकाः । अथ सूत्रं प्राप्तस्तथापि यदि तस्यार्थमकथयित्वा प्रेषयति तदा चत्वारो लघुकाः, नवरमेकेन कालेन लघवः । अथ कथितोऽर्थ परं नाद्याप्यधिगतः अथवाऽधिगतः परमद्यापि न तं सम्यक् श्रद्दधाति तमनधिगतार्थमश्रद्दधानं वा प्रेषयतश्चत्वारो लघुकास्तपसैकेन लघवः । अथाधिगतार्थमप्यपरीक्ष्य प्रेषयति तदा चत्वारो लघुका द्वाभ्यां लघवः, तद्यथा-तपसा कालेन च ।। यत एवं प्रायश्चित्तमतः-

[**भा.५३२**]पढिए य कहिय अहिगय, परिहरती पिंडकप्पितो एसो ।
तिविहं तीहि विसुद्धं, परिहरनवगेण भेदेनं ।।

वृ- पिण्डैषणाध्ययने पठिते तस्यार्थे कथिते तेन चाधिगते उपलक्षणमेतत् सम्यक् श्रद्धिते च यः 'त्रिविधम्' उद्गशुद्धमुत्पादनाशुद्धमेषणाशुद्धं 'त्रिभि' मनोवाक्कायैर्विशुद्धं परिहारविषयेण नवेन भेदेन परिहरति, तद्यथा-मनसा न गृह्णाति नाप्यन्यैर्ग्राहयति न च गृह्णन्तमनुजानीते, एवं वाचा कायेनापि प्रत्येकं त्रिकं त्रिकमवसातव्यम्, एष पिण्डकल्पिकः । अत्र पिण्डनिर्युक्तिः सर्वा वक्तव्या, सा च ग्रन्थान्तरत्वात् स्वस्थाने एव स्थिता प्रतिपत्तव्या ।।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

इह तु षोडशानामुद्गमदोषाणां प्रायश्चित्तमभिधित्सुराह-

[भा.५३३] गुरुगा अहे य चरमतिग मीस बायर सपच्चवायहडे ।
कड पूइए य गुरुगो, अज्झोयरए य चरमदुगे ।।

वृ- "अहे य" त्ति आधाकर्म गृह्णतः प्रायश्चित्तं चत्वारो गुरुकाः । "चरमतिय" त्ति औद्देशिकं द्विविधम्-ओघेन विभागेन च; तत्र विभागतो द्वादशविधम्, तद्यथा-उद्दिष्टं कृतं कर्म च; उद्दिष्टं चतुर्विधम्-औद्देशिकं समुद्देशिकमादेशिकं समादेशिकं च; कृतमपि चतुर्विधम्, तद्यथा-उद्देशकृतं समुद्देशकृतमादेशकृतं समादेशकृतं च; कर्मापि चतुःप्रकारम्, तद्यथा-उद्देशकर्म समुद्देशकर्म आदेशकर्म समादेशकर्म च; त्रयश्चतुष्कका द्वादश । इह यावन्तः केचन भिक्षाचराः समागच्छन्ति तावतः सर्वान् उद्दिश्य यत् क्रियते तद् उद्देशिकमुच्यते, पाषण्डिन उद्दिश्य क्रियमाणं समुद्देशम्, श्रमणानुद्दिश्याऽऽदेशम्, निर्ग्रन्थानधिकृत्य समादेशम् । उक्तञ्च-

जावंतिय उद्देसो, पासंडीणं भवे समुद्देसो ।
समणाणं आदेसो, निग्गंथाणं समादेसो ।।

एतस्मिन् द्वादशविधे विभागोद्देशिके यत् चरमं त्रिकं-समुद्देशकर्म आदेशकर्म समादेशकर्म च तत्र गृह्यमाणे प्रत्येकं चत्वारो गुरुकाः तपः-कालविशेषिताः । "मीस" त्ति मिश्रजातं त्रिविधम्-यावन्तिकमिश्रं पाषण्डिकमिश्रं स्वगृहमिश्रं च; तत्र पाषण्डिमिश्रे स्वगृहमिश्रे च प्रत्येकं चत्वारो गुरुकाः तपः-कालगुरवः । "सपच्चवायहडे" त्ति यत्र यत्र ग्रामादौ सप्रत्यपायमभ्याहृतं तत्र तत्र चत्वारो गुरुकाः । तदेवं येषूद्गमभेदेषु गुरुकास्ते उक्ताः, सम्प्रति येषु मासगुरु तान् प्रतिपादयति- "कड पूइए य" इत्यादि । कृते उद्देशिके चतुःप्रकारेऽपि प्रत्येकं मासगुरुकं तपः-कालविशेषितम्, तद्यथा-यावन्तिके मासगुरु, समुद्देशकृते तपोगुरुकं मासगुरु, आदेशकृते कालगुरुकं मासगुरु, समादेशकृते मासगुरु द्वाभ्यां गुरुकं तपोगुरुकं कालगुरुकं च । "पूतिए" त्ति भावपूतिकं द्विविधम्-सूक्ष्मं बादरं च; तत्र सूक्ष्मे नास्ति प्रायश्चित्तम्; बादरं द्विविधम्-उपकरणे भक्तपाने च; अत्र भक्तपानपूतिके मासगुरु । "अज्झोयरए य चरमदुगे" त्ति अध्यवपूरकं त्रिविधम्, तद्यथा-यावन्तिकमध्यवपूरकं पाषण्डाध्यवपूरकं स्वगृहाध्यवपूरकं च; तत्र पाषण्डाध्यवपूरके स्वगृहाध्यवपूरके च प्रत्येकं मासगुरु ।। उक्तानि गुरुकप्रायश्चित्तानि । अधुना लघुकप्रायश्चित्तान्यभिधित्सुराह-

[भा.५३४] ओह-विभागुद्देसे, चिरठविए पागडे य उवगरणे ।
लोगुत्तर पामिच्चे, परियट्टिय कीय परभावे ।।

[भा.५३५] सग्गामभिहडि गंठी, जहन्न जावंति ओयरे लहुओ ।
इत्तरठविए सुहुमा, पनगं लहुगा य सेसेसु ।।

वृ- ओधौद्देशिके मासलघु । विभागौद्देशिके-उद्देशे मासलघु, समुद्देशे मासलघु तपोगुरु, आदेशे मासलघु कालगुरु, समादेशे मासलघु द्वाभ्यां गुरु । स्थापितं द्विविधम्-चिरस्थापितमित्वरस्थापितं च; तत्र चिरस्थापिते मासलघु । प्रादुष्करणं द्विविधम्-प्रकटकरणं प्रकाशकरणं च; तत्र प्रकटकरणे मासलघु । उपकरणपूतिके मासलघु । प्रामित्यं द्विविधम्-लौकिकं लोकोत्तरिकं च; लोकोत्तरिके मासलघु । परिवर्त्तितमपि द्विधा-लौकिकं लोकोत्तरिकं च; तत्र लोकोत्तरिके परिवर्त्तिते मासलघु । क्रीतं द्विविधम्-द्रव्यक्रीतं भावक्रीतं च; तत्र द्रव्यक्रीतं द्विविधम्-आत्मद्रव्यक्रीतं

Jain Education International For Private & Personal Use Only www.jainelibrary.org

परद्रव्यक्रीतं च; भावक्रीतमपि द्विधा-आत्मभावक्रीतं परभावक्रीतं च; परभावक्रीते मासलघु ।स्वग्रामाभ्याहृते मासलघु । "गंठि"त्ति ग्रन्थिपिहितमुच्यते, यत्र गुड-घृतादिभाजनमुखे पोतेन चर्मणा वा स्थगयित्वा दवरकेणोपरि ग्रन्थिर्दीयते, ग्रन्थिसहिता मुद्रा वा तदुपचाराद् ग्रन्थिरित्यर्थः, तस्मिन्नुद्भिद्यमाने मासलघु । मालापहृतं द्विविधम्-जघन्यमुत्कृष्टं च; तत्र जघन्ये मालापहृते मासलघु ।तथा यावन्तिकेऽध्यवपूरके मासलघु । तदेवं यत्र ग्र मासलघु तत् तत् स्थानमुक्तम्, इदानीं ययोः पञ्च रात्रिन्दिवानिते वदति-"इत्तरठविए" इत्यादि ।

इत्वरस्थापिते पञ्च रात्रिन्दिवानि । सूक्ष्मप्राभृतिकायामपि पञ्च रात्रिन्दिवानि । "लघुका य सेसेसु"त्ति येऽन्ये उद्गमदोषास्तेषु सर्वेष्वपि प्रत्येकं चत्वारो लधुकाः, तद्यथा-औद्देशिके करमणि **१** यावन्तिके मिश्रजाते **२** प्रकाशकरणे **३** आत्मद्रव्यक्रीते **४** परद्रव्य क्रीते **५** आत्मभावक्रीते **६** लौकिकेऽपमित्ये **७** लौकिके परिवर्त्तिते **८** परग्रामाभ्याहृते निष्प्रत्यपाये **९** पिहितोद्भिन्ने **१०** कपाटोद्भिन्ने **११** उत्कृष्टे मालापहृते **१२** आच्छेद्ये **१३** अनिसृष्टे **१४** एतेषु चतुर्दशसु स्थानेषु चत्वारोलधुकाः ।। तदेवमुक्तमुद्गमदोषेषु प्रायश्चित्तम् । इदानीमुत्पादनादोषेषु तदभिधित्सुराह-

[भा.५३६] दुविह निमित्ते लोभे, गुरुगा मायाए मासियं गुरुयं ।
सुहुमे वयणे लहुओ, सेसे लहुगा य मूलं च ।।

वृ- निमित्तं त्रिविधम्-अतीतविषयं प्रत्युत्पन्नविषयमनागतविष्य च; तत्र 'द्विविधे निमित्ते' प्रत्युत्पन्नविषयेऽनागतविषये च तथा लोभे च प्रत्येकं चत्वारो गुरुकाः । मायायां मासगुरु । 'सूक्ष्मे' सूक्ष्मचैकित्स्ये वचनसंस्तवे च प्रत्येकं लधुको मासः । शेषेषु तु समस्तेषूत्पादनादो षेषु प्रत्येकं चत्वारो लघवः, नवरं मूलकर्मणि मूलम् ।। सम्प्रति दशस्वेषणादोषेषु प्राश्चित्तमाह-

[भा.५३७] ससरक्खे ससिणिद्धे, पनगं लहुगा दुगुंछ संसत्ते ।
उक्कुट्ठऽनंते गुरुगो, सेसे सव्वेसु मासलहू ।।

वृ- शङ्किते-पञ्चविंशतेर्दोषाणां मध्ये यत् शङ्कितं तन्निष्पन्नमापद्यते प्रायश्चित्तम् । म्रक्षिते- 'सरजस्केन' सचित्त-मिश्रपृथिवीकायरजोम्रक्षितेन हस्तेन मात्रकेण वा भिक्षां गृह्णतः पञ्च रात्रिन्दिवानि; अचित्तेन जुगुप्सितेन-विष्ठा-मूत्र-मांस-लशुन-पलाण्डुप्रभृतिना म्रक्षिते गृह्यमाणे चत्वारो लघुकाः; गुड-घृत-तैलादिभिरपि कीटिकासंसक्तैर्म्रक्षितमाददानस्य चत्वारो लघवः; पुरःकर्मणि पश्चात्कर्मणि च चतुर्लघुकाः, अन्ये मासलघु प्रतिपन्नवन्तः; उत्कुट्टितेऽनन्ते सचित्ते वनस्पतिकायिके मासगुरु; चूर्णेऽप्यनन्ते सचित्ते मासगुरु; "सेसे सव्वेसु मासलहू" परीत्ते प्रत्येकं कुट्टिते चूर्णे वा प्रत्येकं मासलघु; मिश्रे परीत्ते सर्वत्र मासलघु; अनन्ते मासगुरु; तथा मृत्तिकालिप्तहस्ते यावन्तः सेटिकादयो मृत्तिकाया भेदास्तेषु सर्वेषु मासलघु ।। निक्षिप्ते प्रायश्चित्तमाह-

[भा.५३८] चउलहुगा चउगुरुगा, मासो लहु गुरु य पनग लहु गुरुगं ।
छसु परितऽनंत मीसे, बीए य अणंतर परे य ।।

वृ- प्रत्येकसचित्तानन्तरप्रतिष्ठितमाददानस्य चत्वारो लघुकाः, प्रत्येकसचित्तपरस्परप्रतिष्ठितमपि चत्वारो लघवः । अनन्तसचित्तानन्तप्रतिष्ठितमाददानस्य चत्वारो गुरुकाः, अनन्तसचित्तपरम्पप्रतिष्ठितमपि गृह्णतश्चत्वारो गुरुकाः । प्रत्येकमिश्रेऽनन्तरप्रतिष्ठितं परम्परप्रतिष्ठितं वा गृह्णतो मासलघु । अनन्तमिश्रेऽन्तरं परम्परया वा प्रतिष्ठितमाददानस्य मासगुरु ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

बीजेषु परीत्तेष्वनन्तरं परम्परं वा प्रतिष्ठितं गृह्णतः पञ्च रात्रिन्दिवानि लघुकानि, अनन्तेषु गुरुकाणि। अन्ये तु ब्रुवते-प्रत्येकमिश्रेऽनन्तरं परम्परं वा प्रतिष्ठितमाददानस्य लघु रात्रिन्दिवपञ्चकम्, अनन्तमिश्रेऽनन्तरं परम्परं वा प्रतिष्ठितं गृह्णतो गुरुकमिति । तथाऽपरे-प्रत्येके सचित्तमनन्तरप्रतिष्ठितं गृह्णतश्चतुर्लघवः, परम्परप्रतिष्ठितं मासलघु; तथा प्रत्येके मिश्रेऽनन्तरप्रतिष्ठितमाददानस्य लघुको मासः, परम्परप्रतिष्ठितं गृह्णतो लघु रात्रिन्दिवपञ्चकम्; अनन्ते मिश्रेऽनन्तरप्रतिष्ठिते मासगुरु, परम्परप्रतिष्ठिते गुरु रात्रिन्दिवपञ्चकमिति । उक्तञ्च-

पुढवी आऊ तेऊ, परित्ते चेव तह य वणकाये ।
चउलहु अनंतरम्मी, सच्चित्ते परंपरे मासो ॥
मीसानंतर लहुगो, लहुपनग परंपरे परित्तेसु ।
एए चेव य गुरुगा, होंति अनंते पइट्ठाणे ॥ इति ।

वृ- त्रसकायेऽनन्तरप्रतिष्ठितं गृह्णतश्चतुर्लघुकम्, परम्परप्रतिष्ठितं गृह्णतो मासलघु; "तसकाये चतुलहुगा, अनंतरपरंपरट्ठिए लहुओ" इति वचनात् ॥ एवं षड्जीवनिकायेषु प्रत्येकेऽनन्ते मिश्रे च पृथिव्यादौ बीजे च प्रत्येकेऽनन्ते मिश्रे चानन्तरं परम्परं च प्रतिष्ठितमाददानस्य प्रायश्चित्तमिति । अधुना पिहितं संहरणं चाधिकृत्य प्रायश्चित्तमाह-

[भा.५३९/१]एमेव य पिहियम्मी, लहुगा दव्वम्मि चेव अपरिणए ।

'एवमेव' अनेनैव प्रकारेण पिहितेऽपि प्रायश्चित्तं वक्तव्यम् । किमुक्तं भवति ? -यथा निक्षिप्ते प्रायश्चित्तुक्तमेवं येन द्रव्येण सचित्तेनाचित्तेन मिश्रेण वाऽनन्तरं परम्परकं वा पिधीयते तत्रापि द्रष्टव्यम्, नवरमचित्तेन गुरुकेण पिहिते गृह्णतश्चतुर्गुरुकम् । संहरणे-येनमात्रकेण भिक्षां दातुकामस्तत्र यदि किञ्चित् प्रक्षिप्तं वर्त्तते तदन्यत्र संहृत्य ददाति तच्च संह्रियमाणमद्याप्यपरिणतं तस्मिन्नपरिणते द्रव्ये संहृते गृह्णतश्चत्वारो लघुकाः । दायके-प्रगलिते नपुंसके चत्वारो गुरुकाः, पिञ्जन-कर्त्तन-श्लक्ष्णखण्डकरण-प्रमर्दनप्रवृत्तेषु प्रत्येकं मासलघु, शेषेषु दायकदोषेषु चत्वारो लघुकाः । उन्मिश्रे-सचित्तानन्तमिश्रे चतुर्त्तेषु प्रत्येकं मासलघु, शेषेषु दायकदोषेषु चत्वारो लघुकाः। उन्मिश्रे-सचित्तानन्तमिश्रे चतुर्गुरु, मिश्रानन्तमिश्रे मासगुरु, सचित्तप्रत्येकमिश्रे चतुर्लघु, प्रत्येकमिश्रमिश्रे मासलघु ॥

[भा.५३९/२] विसुम्मीसे पनगं, अनंतबीए य पनग गुरू ॥

वृ- 'विष्वगुन्मिश्रे' प्रत्येकबीजोन्मिश्रे लघु रात्रिन्दिवपञ्चकम्, अनन्तबीजोन्मिश्रे गुरु रात्रिन्दिवपञ्चकम् । अपरिणते-द्रव्यापरिणते कायनिष्पन्नम्, ये कायाः प्रत्येकरूपा अनन्तरूपा वा अपरिणतास्तन्निष्पन्नमित्यर्थः; तत्र पृथिव्यादिष्वपरिणतेषु चतुर्लघुकम्, अनन्तेष्वपरिणतेषु चतुर्गुरु । उक्तञ्च- दव्वापरिणते चउलहु, पुढवादी चउगुरू अनंतेसु । "भावापरिणते दोण्हं तु भुंजमाणाणमेगो तत्थ निमंतए" इत्येवंरूपे लघुको मासः, "भावापरिणते लघुगो" इति वचनात्। लिप्ते-आद्येषु त्रिषु भङ्गेषु चत्वारो लघुकाः, चरमभङ्गेऽनेषणायां चतुर्गुरवः । छर्दिते-आद्येषु त्रिषु भङ्गेषु प्रत्येकं चतुर्लघुकम्, चरमभङ्गेऽनाचीर्णम् ॥

[भा.५४०] संजोग सइंगाले, अनंतमीसे वि चउगुरू होंति ।
वीसुम्मीसे मासो, सेसे लघुका उ सव्वेसु ॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

वृ-संयोजना द्विविधा-अन्तर्बहिश्च; तत्रान्तःसंयोजनायां चत्वारो लघवः, बहिसंयोजनायां चत्वारो गुरुकाः । अन्ये त्वन्तर्बहिर्वा संयोजनायां चत्वारो गुरुका इति प्रतिपन्नाः । प्रमाणातिरिक्तमाहारयति चत्वारो लघवः । "सइंगाले"त्ति साङ्गारे आहार्यमाणे चत्वारो गुरुकाः। सधूमे चतुर्लघु। निष्कारणे चतुर्लघु। सचित्तानन्तमिश्रे चतुर्गुरुकम्; एतच्च प्रागेव स्वस्थानेऽभिहितम्। तथा 'विष्वगुन्मिश्रे' पृथिवीकायादिभि प्रत्येकैर्मिश्रैरुन्मिश्रे लघुको मासः, अनन्तैरुन्मिश्रे गुरुकः। "सेसे लहुगा उ सव्वेसु" 'शेषेषु सर्वेष्वपि' ग्रहणैषणाभेदेषु ग्रासैषणाभेदेषु च चत्वारो लघुकाः, ते च तथैव योजिताः ॥ गतः पिण्डकल्पिकः । सम्प्रति शय्याकल्पिकमाह-

[भा.५४१] दुविहा हवंति सेज्ञा, दव्वे भावे य दव्व खायाती ।
साहूहि परिग्गहिया, ते च्चेव उ भावओ सेज्ञा ॥

वृ- द्विविधा भवन्ति शय्याः-द्रव्यतो भावतश्च । तत्र द्रव्यतः 'खातादयः' खातमुच्छ्रितं खातोच्छ्रितं च । एता द्रव्यशय्याः साधुभिः परिगृहीता भावतः शय्या भवन्ति ॥

[भा.५४२] रक्खण गहणे तु तहा, सेज्ञाकप्पो उ होइ दुविहो उ ।
सुन्ने बाल गिलाणे, अव्वत्ताऽऽरोवणा भणिया ॥

वृ-शय्यायां कल्पते इति शय्याकल्पः शय्याकल्पिक इत्यर्थः । स द्विविधः-तस्या भावशय्याया रक्षणे ग्रहणे च । तत्र रक्षणे प्रोच्यते-वसतिनिर्यमतस्तावद् रक्षयितव्या, यदि पुनर्भिक्षादिप्रयोजनतो गच्छन्तः शून्यां वसतिं कुर्वन्ति बालं ग्लानमव्यंक्तं वा वसतिपालं स्थापयन्ति तदा 'आरोपणा' प्रायश्चत्तं भणिता ॥ तामेवोपदर्शयति-

[भा.५४३] पढमम्मि य चउलहुया, सेसेसुं मासियं मुनेयव्वं ।
दोहि गुरू इक्केणं, चउथपए दोहि वी लहुयं ॥

वृ- प्रथममिह गाथाक्रमप्रामाण्यात् शून्यमुच्यते । यदि शून्यां वसतिं वसतिं कुर्वन्ति तदाऽऽरोपणा चत्वारो लघुका द्वाभ्यां गुरवः, तद्यथा-तपोगुरुकाः कालगुरुकाश्च । अथ बालं स्थापयन्ति तदा मासलघु तपोगुरु काललघु । ग्लानं स्थापयन्ति मासलघु तपोलघु कालगुरु । 'चतुर्थपदे' अव्यक्तस्थापनलक्षणे मासलघु द्वाभ्यामपि लघुकम्, तद्यथा-तपसा कालेन च ॥ उक्ताऽऽरोपणा । साम्प्रतमेतेष्वेव दोषा वक्तव्याः, तत्र प्रथमं तावच्छून्ये दोषानाह-

[भा.५४४] मिच्छत्त बडुग चारण, भडाण मरणं तिरिक्ख-मनुयाणं ।
आदेस वाल निक्केयणे य सुन्ने भवे दोसा ॥

वृ- शून्यायां वसतौ कृतायां कदाचित् शय्यातरस्य मिथ्यात्वगमनम्, बटुकप्रवेशः, चारणप्रवेशः, भटप्रवेशः, तिरश्चां मनुष्याणां वा तत्र मरणम्, 'आदेशाः' प्राधूर्णकास्तत्प्रवेशः, व्यालप्रवेशः । एते शून्ये उपाश्रये कृते दोषा भवन्ति । तथा 'निकेतने' प्रसूतायाः स्त्रियास्तिरश्च्या वा निष्कासने दोषाः ॥ तत्र प्रथमं मिथ्यात्वद्वारमाह-

[भा.५४५] सोच्चा पत्तिमपत्तिय, अकयन्नु अदक्खिणा दुविह छेदो ।
भरियभागमनिच्छुभ, गरिहा न लभंति वऽन्नत्थ ॥

[भा.५४६] भेदो य मासकप्पे, जदलंभे विहारादि पावते अन्नं ।
बहिभुत्त निसागमने, गरिहविनासा य सविसेसा ॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

वृ- ते साधवो भिक्षादिनिमित्तं सर्वमात्मीयं भाण्डमादाय शून्यां वसतिं कृत्वा गताः, शय्यातरश्चागतः, दृष्टातेन शून्या वसति, पृष्टं कस्यापि पार्श्वे-क्व गताः साधवः ?, गृहमानुषैरुक्तम्- दृश्यते शून्या वसतिस्तस्मादवश्यमन्यत्र गताः । इदं तेषां वचः श्रुत्वा यदि प्रीतिकमुपजायते यथा-यदि 'गता गता नाम' इति तदाऽऽरोपणा चत्वारो लघुकाः । अथ तस्याप्रीतिकमुत्पद्यते यथा-'अकृतज्ञाः' एते एनमप्युपचारं न जानन्ति यथा 'आपृच्छ्य गन्तव्यम्' अथवा 'अदाक्षिण्याः' निस्नेहास्ततोऽनापृच्छया गता इति तदा चतुर्गुरुकम् । तथा द्विविधश्छेदः, तथाहि स प्रद्विष्टस्तेषामन्येषां वा साधूनां तद्रव्यस्य वसतिलक्षणस्यान्यद्रव्याणां वा भक्तपानादीनां व्यवच्छेदं कुर्यात् । "भरियभरागमनिच्छुभ"त्ति ततः स कषायितः शय्यातरो यदा ते साधवो भरितभाजनभरेणावनमन्त आगच्छन्ति तदा स्थानं न दद्यात् । तत्र यदि दिवा निष्कासयति तदा चत्वारो लघवः । तथा तैर्भरितैर्भाजनैः सहान्यां वसतिं याचमाना आगाढादिपरितापनामाप्नुवन्ति तन्निष्पन्नमपि तेषां प्रायश्चित्तं चतुर्लघु ।

तथा जनमध्ये गर्हामाप्नुवन्ति-किं यूयमकाण्डे एवं निष्कासिताः ? । ततः 'न भव्या एते' इत्यन्यत्रापि ते वसतिं न लभन्ते । अन्यत्र च वसतिमलभमाना ग्रामादौ व्रजन्ति ततो मासकल्पभेदः । तत्र च विहारक्रमे या विराधना तन्निष्पन्नाऽपि तेषामारोपणा । तथाऽन्ये साधवो विहारादिनिर्गतास्तत्र समागताः, ततर चान्या वसतिर्न विद्यते, स च शय्यातरस्तेषां दोषेणान्येषामपि न ददाति, ततो विहाराद्यागता वसतेरलाभे यत्ते श्वापद-स्तेनादिभ्योऽनर्थमाप्नुवन्ति तन्निष्पन्नमपि तेषां प्रायश्चित्तम् । एवं तावत् कृतभिक्षाटनमात्राणामुक्ता दोषाः । अथ बहिरेव भुक्त्वा रात्रावागता वसतिं न लभन्ते तदाऽऽरोपणा चतुर्गुरु, सविशेषतराश्च गर्हादयो दोषाः, विनाशश्च श्वापदादिभ्यः । अथवा स शय्यातरः प्रथमं सम्यग्दृष्टिर्भूतः पश्चाद् 'अनापृच्छया गताः' इति भावविपरिणामतो मिथ्यात्वं यायात् ।। गतं मिथ्यात्वद्वारम् । अधुना बटुकद्वारमाह-

[भा.५४७] सुन्नं दट्टुं बडुगा, उभासिते ठाह जइ गया समणा ।
आगम पवेसऽसंखड, सागरि दिन्नं ति य दियाणं ।।

[भा.५४८] संभिच्चेण व अच्छह, अलियं न करेमऽहं तु अप्पाणं ।
उड्डंचग अहिगरणं, उभयपयोसं च निच्छूढा ।।

[भा.५४९] सागरिय-संजयाणं, निच्छूढा तेन-अगनिमाईहिं ।
जं काहिंति पदुट्ठा, उभयस्स वि ते तमावज्जे ।।

वृ- शून्यां वसतिं दृष्ट्वा 'बटुकाः' चाटाः सागारिकम् 'अवभाषन्ते' याचन्ते-अस्माकमुपाश्रयं प्रयच्छत । शय्यातरो ब्रूते-तत्र श्रमणास्तिष्ठन्ति । बटुकैरुक्तम्-गतास्ते । शय्यातरः प्राहतर्हि तिष्ठत यूयं यदि गताः श्रमणाः । ते स्थिताः । आगताः साधवः प्रवेष्टुं प्रवृत्ता वसत बटुकैर्निवारिताः- माऽत्र प्रविशथ, वयमग्रे तिष्ठामः । ततः 'असङ्खडं' कलहः परस्परमुपजायते । बटुका ब्रुवते- वसतिरस्माकं स्वामिना दत्ता, किमत्र युष्माकम् ? । इतरेऽपि वदन्तिस्वामिनैवास्माकमपि वसतिरदायि ततः साधवः शय्यातरसकाशं गच्छन्ति । स ब्रूते-यूयमनापृच्छया शून्यं कृत्वा गताः, मया ज्ञातम्-गता यूयं येन शून्यीकृता दृश्यते वसति, अतो मया 'द्विजानां' बटुकानां दत्ता वसति 'इति' तस्मात् 'संवृत्येन' परस्परसच्चिन्त्या यूयं बटुकाश्चैकत्र स्थाने तिष्ठत, नाहमात्मानमलीकं

Jain Education International For Private & Personal Use Only www.jainelibrary.org

करोमि। तत्र यदि संवृत्येन तिष्ठन्ति तत्रपठतां प्रतिलेखनां च कुर्वतां संयतभाषाभिश्च 'उड्डश्चकान्' देशीपदमेतद् उपहासान् कुर्यु, ततः 'अधिकरणं' संयतप्रयोगेण वयं निष्काशिताः तस्मान् बटुकान् निष्काशयेत्, तथा च सति 'अधिकरणं' संयतप्रयोगेण वयं निष्काशिताः तस्माद् ज्ञातव्यं संयतानाम्। अथवा 'निच्छूढाः' निष्काशिताः सन्त उभयेषामपि सागारिकस्य संयतानां चोपरि प्रद्वेष गच्छेयुः। ततस्ते एवं 'निक्षिप्ताः' निष्काशिताः सन्तः प्रद्विष्टाः स्तेनप्रयोगतोऽग्न्यादिप्रक्षेपतश्च 'उभयस्यापि' सागारिकस्य संयतानां च यद् अनर्थजातं च यद् अनर्थजातं करिष्यन्ति 'तदपि' तन्निष्पन्नमपि प्रायश्चित्तं 'ते' संयताः शून्यवसतिकारिण आपद्यन्ते ।। गतं बटुकद्वारम्।

इदानीं चारणद्वारं भटद्वारं चाह-

[भा.५५०] एमेव चारण भडे, चारण उड्डंचगा उ अहिगतरा।
निच्छूढा व पदोसं, तेना-ऽगणिमाइ जह बडुया ।।

वृ- 'एवमेव' बटुकगतेनैव प्रकारेण चारणे भटे च दोषा वक्तव्याः। किमुक्तं भवति ?- ये बटुकेषु दोषा उक्तास्ते चारणे भटे च प्रत्येकमवसातव्याः। नवरं चारणा (णे] बटुकेभ्योऽधिकतराः, यतस्ते 'उदश्चकाः' याचकाः। इयमत्र भावना-ते चारणाः प्रपञ्चबहुलाः, ततः संयतान् प्रपञ्चय तेभ्यो याचन्ते, ततस्तैः सहैकनिवासेऽधिकतरा दोषाः। तथा चारणा भटाश्च निष्काशिताः प्रद्वेषमापन्नाः स्तेनाग्न्यादिभिरुभयेषामप्यनर्थं कुर्युर्यथा बटुका इति ।।

इदानीं तिर्यङ्मरणद्वारं मनुष्यमरणद्वारमादेशद्वारं चाह-

[भा.५५१] छड्डणिका उड्डाहो, घाणारिस सुत्तऽवन्न अच्छंते।
इति उभयमरणदोसा, आएस जहा बडुगमाई ।।

वृ- शून्यां वसतिं दृष्ट्वा गवादिस्तिर्यङ अनाथमनुष्यो वा प्रविश्य म्रियते त यदि गृहस्थैरसंयतैः परिष्ठापयन्ति तदा 'छर्दने' परिष्ठापने षण्णां कायानां पृथिव्यादीनां विराधना। अथाऽऽत्मना परिष्ठापयन्ति तदा प्रवचनस्योड्डाहः 'उचिता एतेऽस्य कर्मणः' इति। अथवा कोऽप्येवं शङ्केत, यथा-एतैरेवायं मारितः। अथवा जुगुप्सा भवेत्-अशुचयोऽमी यद् मृतकमाकर्षन्ति। अथैतद्दोषभयान्न ते स्वयं परिष्ठापयन्ति नाप्यन्यैस्त्याजयन्ति तर्हि मृतकगन्धेन संयतानां नासाशासि जायेरन्। तथाऽस्वाध्यायिकमिति कृत्वा सूत्रपौरुषीं न कुर्वन्ति मासलघु, अर्थपौरुषीं न कुर्वन्ति मासगुरु। सूत्रपौरुषीमर्थपौरुषीं चाकुर्वतां यदि सूत्रं नश्यति चतुर्लघु, अर्थो नश्यति चतुर्गुरु। अवर्णश्च लोकेषूपजायते-ग्राममध्येऽपि वसन्तः स्मशाने तिष्ठन्ति। 'इति' उपप्रदर्शने, एवम् 'उभयस्य' तिरश्चो मनुष्यस्य वा मरणे दोषाः। गतं तिर्यग्-मनुष्यमरणद्वारम्। अधुनाऽऽदेशद्वारमाह- "आदेस जहा बडुगमादी"। 'आदेशाः' प्राधूर्णकास्ते केचन शय्यातरस्य समागताः, शून्यां च वसतिं दृष्ट्वा शय्यातरेण तत्र मुक्ताः, ततो बटुक-चारण-भटेषु ये दोषास्तेऽत्रापि योजनीयाः ।।

गतमादेशद्वारम्। अधुना व्यालद्वारं निष्केतनद्वारं चाह-

[भा.५५२] अहिगरण मारणाऽणीणियम्मि अच्छंते वालि आयवहो।
तिरितीय जहा वाले, सूतिमणुस्सीए उड्डाहो ।।

वृ- 'व्यालः' नाम सर्प शून्यं दृष्ट्वा वसतौ प्रविशेत्, तत आगताः सन्तः श्रमणा यदि तं निष्काशयन्ति तदऽधिकरणम्, हरितकायादीनां मध्येन तस्य गमनात्। अथवा स निष्काश्यमानः

Jain Education International For Private & Personal Use Only www.jainelibrary.org

प्रद्वेषगमनतो दशेत् ततो मरणम् । अथवा निष्काशने जनसम्मिलनतः स सर्पो लोकेन मार्येत । अथैतद्दोषभीता न सं सर्पं निष्काशयन्ति ततस्तस्मिन् व्याले तिष्ठति आत्मविराधना, तेन भक्षणात्। एते च व्याले दोषाः । अथ निष्केतने तानाह-"तिरितीए" इत्यादि । यदि तिर्यकस्त्री प्रसूता निष्काश्यते ततः सा यथा व्यालस्तथैव नियमत इतस्ततो गच्छन्ती हरितकायादीन् व्यापादयेत्, बालकानां च तत्सम्बन्धिनां तां विना तया चानीयमानानां मरणसम्भवः । अथैवं दोषभयात् सा न निष्काश्यते तदा सा तिष्ठन्ती यदा तदा वा साधूनामनर्थं कुर्यात्, तत आत्मविराधना । अथ प्रसूता मानुषी निष्काश्यते तथा (तदा) 'एतेषामियम्' इति प्रवचनोड्डाहः । साऽपि च निष्काश्यमाना कायान् विराधयेत् । लोको वा ब्रूयात्-निरनुकम्पा एते यद् बालसहितामिमां निष्काशयन्ति । सा वा निष्काश्यमाना प्रद्वेषतः साधूनामालं दद्यात् चेटरूपं वा मारयेत् ॥

[भा.५५३]　छड्डेउं व जइ गया, उज्झमनुज्झंति होंति दोसा उ ।
एवं ता सुन्नाए, बाले ठविते इमे दोसा ॥

वृ- अथवा सा तत्र प्रसूता सती तं चेटरूपं त्यक्त्वा गच्छेत् ततस्तं यदि 'उज्झन्ति' परित्यजन्ति तदा निरनुकम्पतादोषः । अथ नोज्झन्ति तदा उड्डाहः । एवमेते तावत् शून्यायां वसतौ दोषाः । बाले स्थाप्यमाने पुनरिमे ॥

[भा.५५४] बलि धम्मकहा किड्डा, पमज्जणाऽऽवरिसणा य पाहुडिया ।
खंधार अगनि भंगे, मालव-तेना य नाती य ॥

वृ- बलिद्वारं धर्मकथाद्वार क्रीडाद्वारं प्रमार्जनद्वारम् आवर्षणद्वारं प्राभृतिकाद्वारं स्कन्धावारद्वारम् अग्निद्वारं भङ्गद्वारं मालवद्वारं स्तेनद्वारं ज्ञातिद्वारं च । एतैर्द्वारैर्बाले रक्षके स्थाप्यमाने दोषा वक्तव्याः ॥ तत्र प्रथमं बलिद्नवारमधिकृत्य दोषानाह-

[भा.५५५]　साभाविय तन्नीसाए आगया भंडगं अवहरंति ।
नीनेमि त्ति व बाहिं, जा पविसइ ता हरंतऽन्ने ॥

वृ- साधवः कदाचनापि कारणवशतः सप्राभृतिकायां शय्यायां स्थिताः, सप्राभृतिका नाम सार्वजनिका यत्राऽऽगत्य बलि प्रक्षिप्यते, तत्र ये बलिकारकास्ते द्विधा तत्र समागच्छेयुः, तद्यथा-स्वभावेन वा 'उपकरणं वा हरिष्यामि' इति कैतवेन वा । तत्र ये बलिकरकाः स्वाभाविका नोपकरणहरणप्रवृत्तास्ते 'तन्निश्रया' बलिनिश्रयाऽऽगताः सन्तो बलिं कुर्वन्तो बालमेकाकिनं दृष्ट्वा सञ्जातहरणबुद्धयो भाण्डकमपहरन्ति । अथवा बलिना प्रक्षिप्यमाणेनोपकरणं लेपयुक्तं क्रियते ततः स बालो वक्ति-बहिर्नयाम्युपकरणं येन न लेपयुक्तं क्रियते, ततः स बालो यावद् बहिर्निर्गतः प्रविशति तावदत्रान्तरेऽपहरन्त्युपकरणमन्ये ॥

स्वभावत इति गतम् । कैतवमधिकृत्याह-

[भा.५५६]　एमेव कइयवा ते, निच्छूढं तं हरंति से उवहिं ।
बाहिं च तुमं अच्छसु, अवणेहुवहिं व जा कुणिमो ॥

वृ- 'एवमेव' अनेनैव प्रकारेण कैतवात् 'ते' समागता उपधिमहपहरेयुः, तथाहि-केचन धूर्त्ता उपधिं हर्तुकामाः कैतवात् समागत्य क्षुल्लकं ब्रुवते-क्षुल्लक ! एष बलिः समागच्छति ततस्त्वं बहिर्निर्गच्छ, एवं तं बहिर्निष्काश्य 'से' तस्योपधिमपहरन्ति । अथवेदं वदन्ति-वयं बलिं करिष्यामः,

Jain Education International　For Private & Personal Use Only　www.jainelibrary.org

ततो यावद् वयं बलिं कुर्मस्तावत् त्वं बहिस्तिष्ठ, मा कूरेण खरण्टयिष्यते (ध्यसे), एवं तं निष्काश्य तस्योपधिमपहरन्ति। यदि वा ते एवं ब्रूयुः-यावद् वयं बलिं कुर्मस्तावदभ्यन्तरादात्मीयमुपधिमुपनय, स च बालस्तत्कार्यमजानन् एकवारं च सर्वमुपकरणं नेतुमशक्नुवन् स्तोकं गृहीत्वा निर्गत्य बहिः स्थापयित्वा यावदन्यस्य प्रविशति तावत् तदुपकरणमभ्यन्तरस्थितं धूर्तैरपह्रियते ।।

तदेवं बलिद्वारं गतम्। अधुना धर्मकथाद्वारमाह-

[भा.५५७] कतिएण सभावेण व, कहापमत्ते हरंति से अन्ने।
किड्डा सयं व रिंखा, पासति च तहेव किड्डुगं ।।

वृ- केचन पुरुषाः 'धर्मं श्र णुमः' इति कैतवेन वा स्वभावेन वा समागच्छेयुः। तत्र स्वभावत आगतानां बालमेकाकिनं दृष्ट्वा हरणबुद्धिरुपजायते। इतरे तु प्रथमत एव हरणबुद्धैव समागतास्ते क्षुल्लकं ब्रुवते-कथय धर्मकथामस्माकमिति; ततः स कथां कथयितुं प्रवृत्तः प्रबन्धेन च कथयति, कथाप्रमत्ते केचिदग्रत उपविष्टाः श्र ण्वन्ति, अन्ये तस्योपकरणमपहरन्ति। गतं धर्मकथाद्वारम्। क्रीडाद्वारमाह-"किड्डा" इत्यादि। क्रीडायामपि द्विकं वक्तव्यम्। किमुक्तं भवति ?- क्रीडानिमित्तमपि केचन स्वभावत आगच्छेयुः कैतवेन वा। स्वभावतोऽप्यागतानां बालमेकाकिनं दृष्ट्वा हरणबुद्धिरुल्लसति, तत्र स स्वयं बालः क्रीडति गोलादिना। अथ कदाचित् स क्षुल्लको ब्रूयात्-न वर्त्ततेऽस्माकं क्रीडा; ततस्ते वदन्ति-यद्येवं तर्हि रिङ्खाः कुरु, कः कियन्तो वारान् रिङ्खति? एवं स बालो रिङ्खाः करोति; अथ ब्रूते-न कल्पन्ते संयतानां रिङ्खा अपि कर्त्तुमिति; ततस्ते वदन्ति-यद्येवमस्मान् क्रीडतः पश्य, ततः स कौतुकेन क्रीडतः पश्यति; एवं स्वयं क्रीडया रिङ्खाभिर्वा पश्यन् वा क्रीडाप्रमत्त उपजायते; ततस्तथैवान्ये तेन सह क्रीडन्ति, अन्ये हरन्त्युपकरणमिति ।। सम्प्रति प्रमार्जनद्वारमावर्षणद्वारं च युगपदाह-

[भा.५५८/१]जो चेव बलीए गमो, पमज्जणाऽऽवरिसणे वि सो चेव।

वृ- य एव बलिद्वारे गम उक्तः स एव प्रमार्जने आवर्षणे च द्रष्टव्यः। किमुक्तं भवति ?- प्रमार्जननिमित्तमावर्षणनिमित्तं वा केचित् स्वभावेन अपरे कैतवेन समागच्छन्ति, समागत्य च बलिद्वारोक्तेन प्रकारेणोपकरणमपहरन्तीति ।। इदानीं प्राभृतिकाद्वारमाह-

[भा.५५८/२]पाहुडियं वा गेण्हसु, परिसाडणियं व जा कुणिमो ।।

वृ- 'प्राभृतिका' भिक्षाऽपि भण्यते अर्चनिकाऽपि। तत्रोभयमप्यधिकृत्य दोषानाह-कैतवेन स्वभावेन वा केचन ब्रूयुः-क्षुल्लक! भिक्षां गृहाण, अथवा द्वारे निर्गच्छ यावद् वयं 'परिशाटनिकाम्' अर्चनिकां कुर्मः। एवमुक्तः स यावद् भिक्षामाददाति बहिर्वा निर्गच्छति तावत् तस्योपकरणं हरन्तीति ।। गतं प्राभृतिकाद्वारम्। अधुना स्कन्धावारद्वारमग्निद्वारं चाह-

[भा.५५९] खंधारभया नासति, एस व एइ त्ति कइयवे नस्स।
अगनिभया व पलायति, नस्ससु अगन व एति त्ति ।।

वृ- कोऽपि स्वभावतः स्कन्धवाराभयान्नश्यति ब्रूते च-एष सराजकः स्कन्धावारः समागच्छति, स च तथा स्वभावतो नश्यन् बालमेकाकिनं दृष्ट्वाऽपहरेत्। अपरः कैतवेन ब्रूते-एव क्षुल्लक! स्कन्धावारः समायाति तस्माल्लघु पलायस्व पलायस्व, ततः स बालो नश्यति; इतरे उपधिमपहरन्ति। अग्निभयादपि कोऽपि स्वभावतः पलायते, स च पलायमानो वक्ति-

Jain Education International For Private & Personal Use Only www.jainelibrary.org

वहिरागच्छति नश्यतामिति । केचित् पुनः कैतवेन ब्रूयुः-मन्दभाग्याः ! नश्यत नश्यत, अग्नि समागच्छति ।। ततः किम् ? इत्याह-

[भा.५६०] उवहीलोभ भया वा, न नीति न य तत्थ किंचि नीनेइ ।
गुत्तो व सयं डज्झइ, उवहिं च विणा उ जा हानी ।।

वृ- 'उपधिलोभात्' 'उपधिर्मध्ये तिष्ठति तं मुक्त्वा कथमहं यामि ? मा कश्चिदपहरेत्' इत्युपधेर्लोभतोऽग्निभयाद् वा स बालो बहिर्न निर्गच्छति, न च तत्र बहि किञ्चिद् निष्काशयति, ततः कथमप्यग्निसमागमने स मध्ये गुप्तः सन् स्वयं दह्यते । कैतवेनाग्न्यागमं कथयित्वा बालं विप्रलभ्योपधिमपहरन्ति । उपधिं च विना या हानिस्तां साधवः प्राप्नुवन्ति ।।

गतं स्कन्धावारद्वारमग्निद्वारं च । सम्प्रति मालवद्वारं स्तेनद्वारं चाह-

[भा.५६१] मालवतेना पडिया, इयरे वा नासती जनेन समं ।
न य गेण्हइ सारुवहिं, तप्पडिबद्धो व हीरेज्जा ।।

वृ- मालवा एव स्तेना मालवस्तेनाः, ते मालवग्रहणेन द्वारगाथायां सूचिताः 'इतरे' अन्ये स्तेनाः, स्तेनग्रहणेन । केचित्तु कैतवेन स्वभावेन वा ब्रूयुः-मालवस्तेना इतरस्तेना वा पतिताः, तत्र ये कैतवेन ब्रुवते ते पत्तनस्य ग्रामस्य वा भङ्गे जाते उपधिमपहरन्ति । स्वभावेन कथने स बालो भयात्र सारमुपधिं गृह्णाति, अग्रहणे च तदभावे महती हानि । अथवा स तस्मिन्नुपधौ प्रतिबद्धः सन् मालवस्तेनैरितरैर्वा सोपधिरपह्रियेत ।।

गतं मालवद्वारं स्तेनद्वारं च । सम्प्रति ज्ञातिद्वारमाह-

[भा.५६२] सन्नायगेहि नीते, एंति व नीय त्ति नट्ठे जं उवहिं ।
कहिं नीय त्ति कइयवे, कहिए अन्नस्स सो कहए ।।

वृ-स्वज्ञातिकाः स्वभावत आगताः, तैरेकाकी दृष्टः क्षुल्लकः, तैर्नीतेऽन्येपश्चादुपधिमपहरेयुः, ततस्तन्निष्पन्नं तेषां साधूनां प्रायश्चित्तम् । अथवाऽन्येन केनापि ते स्वज्ञातय आगच्छन्तो दृष्टाः, तेनाऽऽगत्य क्षुल्लकस्य कथितम्-निजकास्तव समागच्छन्तीति, ततः स पलायितः, तस्मिन्नष्टे युमपर्धिं जघन्यं मध्यमुत्कृष्टं वाऽपहरन्ति तन्निष्पन्नं तेषां प्रायश्चित्तम् । एवं तावत् स्वभावतः स्वातीनामागमने दोषा उक्ताः, अधुना कैतवेन तदागमनकथनतो दोषानाह-कोऽपि कैतवेनागत्य धूर्तो ब्रूते-क्षुल्क ! क्व ते निजकाः सन्ति ? । तेन कथितम् अमुके ग्रामे नगरे वा । तेनान्यस्य धूर्त्तस्य कथितं 'मा स्वयमहं ब्रुवाणो लक्ष्ये' इति ।।

[भा.५६३] चिंधेहिं आगमेउं, सो वि य साहेइ तुह निया पत्ता ।
मैमो उवहिग्गहणं, तेहिं व हं पेसितो हरइ ।।

वृ- सोऽपि अन्यो धूर्त्तस्तेषां स्वज्ञातीनां चिह्नानि नामानि चागम्य तस्य क्षुल्लकस्य समीपमागच्छति, आगत्य ब्रूते-स त्वममुकानां निजकः; क्षुल्लको वक्ति-कुतस्त्वं जानासि ?; इतरो ब्रूते-किं न जानामि ते मातरममुकनामिकां पितरं चामुकमीदृशेन वर्णेन रूपेण वा ? । एवं संवादे कृते स क्षुल्लकोवदति-सत्यमहं तेषां निजकः; ततः स धूर्तो भाषते-ते निजकास्तव कृते समागता मयाऽमुकप्रदेशे दृष्टाः, सम्प्रति अन्ये प्रविशन्ति वदन्ति च ते-तमात्मीयं नेष्याम इति; ततः स पलायते, इतरे उपधिमपहरन्ति । अथवा वक्ति-तैरहं तवोदन्तवाहकः प्रेषितः; ततः स,

Jain Education International For Private & Personal Use Only www.jainelibrary.org

विश्वासं गच्छति, विश्वस्तस्य चोपधिमपहरेत्। अथवा वदेत्-तवाऽऽनयननिमित्तमहं तैः प्रेषितः; एवमुक्ते स बालः पलायते, इतरे तूपधिमपहरन्ति ॥

[भा.५६४] एते पदे न रक्खति, बाल गिलाणे तहेव अव्वत्ते।
निद्दा-कहापमत्ते, वत्ते वि य जे भवे भिक्खू ॥

वृ- 'एतानि' बलिप्रभृतीनि 'पदानि' स्थानानि बालो न रक्षति, स्वाभाविकेषु कैतवेषु वैतेषु स्थानेषु बालो विपरतार्यते इति भावः। तथा ग्लानः 'अव्यक्तो वा' अगीतार्थो यद्वा 'व्यक्तः' गीतार्थोऽपि च यो भवेद् भिक्षुर्निद्रा-कथाप्रमत्तः सोऽप्येतानि पदानि न रक्षति। कथास्तरङ्गवत्यादयो द्रष्टव्याः ॥ ग्लानद्वारमव्यक्तद्वारं चाधिकृत्यैतदेव विशेषत आह-

[भा.५६५] एमेव गिलाणे वी, सयकिड्ड-कहा-पलायणे मोत्तुं।
अव्वत्तो उ अगीतो, रक्खणकप्पे परोक्खो उ ॥

वृ- 'एवमेव' अनेनैव प्रकारेण ग्लानेऽपि दोषा वक्तव्याः, नवरंस्वयंक्रीडा-कथा-पलायनानि मुक्त्वा। इयमत्र भावना-ये बाले दोषास्ते ग्लानेऽपि, नवरं यस्तस्यात्मसमुत्थो दोषः स्वयंक्रीडात्मकः कथादोषो भयेन पलायनदोषश्च स न भवति, किन्तु स वारयितुमसमर्थ, न वा तं कोऽपि गणयति, ग्लानत्वात्। अन्यच्च स क्षुधा पिपासयाऽन्यया वा वेदनया परिताप्यमानः सन् कूजेत्, ततो लोको ब्रूयात्-अहो! निरनुकम्पाः साधवो यदमुं त्यक्त्वा हिण्डन्ते; अपथ्यंवा लोकानीतमकल्पिकं स प्रतिसेवेतेति। तथा अव्यक्तो नाम 'अगीतः' अगीतार्थ स रक्षणकल्पे परोक्षः। किमुक्तं भवति ? -सः 'स्वाभाविके कैतवे वा कथमुपकरणं रक्षणीयम्?' इति न जानाति, न वा 'स्वाभाविकेषु ग्लानत्वादिषु केन प्रकारेणात्मा निस्तारयितव्यः ?, कथं वा उपकरणम् ?' अतः प्रागुक्तं "ग्लानोऽव्यक्तश्चैतानि पदानि न रक्षति"। योऽपि च व्यक्तः सोऽपि यदि निद्रालुर्भवति तरङ्गवत्यादिकथाकथनव्यसनी वा तदा न रक्षति, प्रमादबहुलत्वात् ॥

[भा.५६६] तम्हा खलु अब्बाले, अगिलाणे वत्तमप्पमत्ते य।
कप्पइ य वसहिपालो, धिइमं तह वीरियसमत्थो ॥

वृ- यस्माद् बालादीनामेते दोषास्तस्माद् यः खल्वबालोऽग्लानो व्यक्तो निद्रा-कथादिभिरप्रमत्तः, पुनः कथम्भूतः ? इत्याह-'धृतिमान्' यस्तृषा क्षुधा वा परितापितोऽपि न शून्यां वसतिं कृत्वा भक्तपानाय गच्छति स इति भावः, 'वीर्यसम्पन्नः' बलवान्, यः स्तेनानापततो निरोद्धुं समर्थ अग्न्यादिसम्भवे तूपधिमात्मानं च निस्तारयति ईदृशः कल्पते वसतिपालः ॥

अथ कियन्त ईदृशा वसतिपालाः स्थापयितव्याः ? तत आह-

[भा.५६७] सति लंभम्मि अनियया, पनगं जा ताव होति अच्छित्ती।
जहनेण गुरू चिट्ठइ, तस्संदिट्ठो विमा जयणा ॥

वृ- सति भैक्षस्य लाभे अनियता वसतिपालाः स्थापयितव्याः। अयमत्र भावः-यत्रैकः सङ्घाटको भैक्षस्य प्रचुरस्य लाभतोऽन्येषां त्रयाणां चतुर्णां चात्मनश्च पर्याप्तमानयति तत्र यावद्भिस्तिष्ठद्भिर्गच्छस्य पर्याप्त भवति तावन्तस्तिष्ठन्ति; अथवा आचार्यादयः पञ्च तिष्ठन्ति यैर्गच्छः समस्तोऽपि सङ्ग हीतो वर्त्तते; अथवा यो ज्ञायते 'एष सूत्रा-ऽर्थग्रहण-धारणा-समर्थोऽव्यवच्छित्तिं करिष्यति' स आचार्यस्य सहायस्तिष्ठति। अथैवमपि न निस्तरन्ति ततो जघन्यतो

Jain Education International For Private & Personal Use Only www.jainelibrary.org

गुरुरेककस्तिष्ठति शेषाः सर्वे हिण्डन्ते । अथाऽऽचार्योऽपि कुलादिकार्येषु निर्गच्छति ततो य आचार्येण सन्दिष्टः 'मयि निर्गते सर्वमेतस्य पुरत आलोचनादि कार्यम्' स तिष्ठति । ततोयत्र तानि बलिप्रभृतीनि पदानि स्वभावतः कैतवेन वा प्राप्तानि भवन्ति तत्र तेन वसतिपालेनेयं यतना कर्त्तव्या ।। तत्र बलिपाते तावदाह-

[भा.५६८] अप्पुव्वमतितिहिकरणे, गाहा न य अन्नभंडगं छिविमो ।
भणइ च अठायमाणे, जं नासइ तुज्झ तं उवरिं ।।

वृ-साधवो हि कारणेन सप्राभृतिकायामपि शय्यायां स्थिता भवेयुः । साधूनां चेयं सामाचारी-ऋतुबद्धे काले बद्ध उपधिस्तिष्ठति वर्षास्वबद्धः, तत्र सप्राभृतिकायां वसतौ वर्षास्वपि समस्तं भाण्डकमेकायोगं प्रकुर्वन्ति, ततो यदि बलिकाराः समागच्छन्ति तथापि न कश्चिद् दोषः । अथ ते कथमपहरणं कर्त्तुकामा ज्ञातव्याः ? उच्यते-अपूर्वान् दृष्ट्वा, ये स्वाभाविकास्ते प्रतिदिवसमागच्छन्तः परिचिताः, ये त्वपूर्वास्ते हर्तुकामा विज्ञेयाः । ये वा अतिथौ विशिष्टतिथ्यभावे बलिकरणाय समागतास्तेऽपि हर्तुकामा द्रष्टव्याः । तेऽपि यदि ब्रूयुः-निर्गच्छत वयं बलिं करिष्यामः, तदा गाथा वक्तव्या-

न वि लोणं लोणिज्जइ, न वि तुप्पिज्जइ घयं व तेल्लं वा ।
किह नाम लोगडंभग !, वट्टम्मि ठविज्जए वट्टो ? ।।
अन्नं भंडेहि वणं, वणकुट्टग ! जत्थ ते वहइ चंचू ।
भंगुरवणवुग्गाहित !, इमे हु खदिरा बइरसारा ।।

ततो जानते 'वयं प्रत्यभिज्ञाताः' इति । अथवा वक्तव्यम्-येषामेतदुपकरणं ते भैक्षस्यानयनाय गताः, वयं तु 'अन्यभाण्डकम्' अन्येषामुपकरणं न स्पृशामः । ततो यदि न तिष्ठन्ति ततो भूयो भणति-शृणुत, अस्माभिर्वारिता यूयं न तिष्ठथ ततो यदत्र नश्यति तद् युष्माकमुपरि; एवमुक्ते ते तिष्ठन्ति ।।

[भा.५६९] कारणे सपाहुडि ठिया, वासे वि करेंति एगमायोगं ।
सन्नाविय दिट्ठा वा, भणाइ जा सारवेमुवहिं ।।

वृ- कारणे सप्राभृतिकायां वसतौ स्थिता वर्षास्वपि समस्तस्यापि भाण्डकस्यैकमायोगं कुर्वन्ति ततो न किञ्चित् पलायते तत्र ये कैतवेन बलिकारकाः समागच्छन्ति तेषु यतनाविधिरुक्तः। सम्प्रति स्वाभाविकेष्वाह-"सन्नाविय" इत्यादि । ये शय्यातरेणान्येन वा बलिकाराः संज्ञापिता दृष्टा वा स्वयमन्यदाऽपि बलिं कुर्वाणास्तान् प्रति भणति वसतिपालः-तावत् प्रतीक्षध्वं यावदुपधिं सारयामि; एवमुक्ते ते प्रतीक्षन्ते ।।

[भा.५७०] उव्वरए कोणे वा, काऊण भणाति मा हु लेवाडे ।
बहु पेल्लणऽसारविए, तहेव जं नासती तुज्झं ।।

वृ- ततो वसतिपालो यदि कश्चिदस्त्यपवरकस्तत्र तदुपकरणं प्रक्षिपति, अथ नास्त्यपवरकस्तत एकस्मिन् कोणे सर्वमुपकरणं स्थलीकरोति भणति च-शनैर्बलिविधानं कुरुत, मा उपकरणं कूरसिक्थैः खरण्टयत । अथ ते बहवोऽगारा उन्मत्तकाः सहसैव प्रेर्य प्रविष्टा नैव

Jain Education International For Private & Personal Use Only www.jainelibrary.org

सार्यमाणमुपधि प्रतीक्षन्ते ततस्तथैव वक्तव्यं यथोक्तं प्राक्, यथा-यदत्र नश्यति तद् युष्माकमुपरीति ।। धर्मकथाद्वारे यतनामाह-

[भा.५७१] नत्थि कहालद्धी मे, पुव्वं दिट्ठे व बेति गेलन्नं।
दाणादि असंकाण व, आउज्जंतो परिकहेइ ।।

वृ- यदि ते कैतवेन स्वभावेन वा समागत्य धर्मकथामापृच्छन्ति तदा वक्तव्यम्-नास्ति मे कथालब्धिः । अथ धर्म कथयन् स पूर्वं दृष्टः ततो वदति-'ग्लानत्वं' शिरो मे दुःखयति गलको वेति । अथ ते धर्मकथाप्रष्टारो दानश्राद्धा आदिशब्दादभिगमसम्यक्त्वादयश्च सम्यग्ज्ञाता वर्त्तन्ते ततस्तेषां दानादिश्रावकाणाम् 'अशङ्कानां' शङ्काया अविषयाणां द्वारमूले स्थित्वा 'आयोजयन्' भाण्डकविषयमुपयोगं ददानः परिकथयति, मा कथाप्रमत्ते मयि कोऽपि हरेदिति हेतोः ।।

सम्प्रति क्रीडाद्वारे यतनामाह-

[भा.५७२] दट्ठुं पि ने न लब्भामो, मा किड्डह मा हरिज्झिहं को वि।
संमज्जणाऽऽवरिसणे, पाहुडिया चेव बलिसरिसा ।।

वृ- यदि केचित् तत्र कैतवेन स्वभावेन वाऽऽगत्य क्रीडन्ति तदा तान् प्रति वक्तव्यम्-वयमाचार्यादिपार्श्वतो द्रष्टुमपि क्रीतो न लभामहे तस्मादत्र मा क्रीडत, एतच्चैवमुच्यते 'मा कश्चिद् हरेत्' इति कृत्वा । प्रमार्जने आवर्षणे प्राभृतिकायां च यथा बलिद्वारे तथा यतना कर्त्तव्या ।।

[भा.५७३] खमणं निमंतिते ऊ, खंधारे कइयवे इमं भणति ।
किं ने निरागसाणं, गुत्तिकरो काहिई राया ।।

वृ- भिक्षां यदि कोऽपि निमन्त्रयति तदा वक्तव्यम्-ममाद्य क्षपणमिति । कैतवे च स्कन्धावारे इदं भणति-किं "ने" अस्माकं 'निरागसां' निरपराधानां 'गुप्तिकरः' रक्षाकरो राजा करिष्यति ?

यत्र तु स्वाभाविकः स्कन्धावारः समागच्छति तत्रेयं यतना-

[भा.५७४] पभु अनुपभुनो व निवेयणं तु पेल्लंति जाव नीणेमि ।
तह वि य अठायमाणे, पासे जं वा तरति नेउं ।।

वृ- प्रभुः नाम राजा, अनुप्रभुः सेनाधिपतिप्रभृतिकः, तं गत्वा धर्मलाभयति-विविक्तमस्माकमुपाश्रयं कुरुत । ततः स मनुष्यान् ददाति, ते प्रेरयन्ति समस्तानपि लोकानुपाश्रयप्रविष्टानिति। अथ स्कन्धावारो न व्रजति किन्तु तथैव स्थितवान्, तत्र यदि कोऽपि वसतिं स्थाननिमित्तं प्रेरयेद् अत्रापि प्रभोरनुप्रभोर्वा निवेदनं कर्त्तव्यं येन स वारयति । अथ प्रभुरनुप्रभुर्वा न वारयति अस्वाधीना वा ते पुरुषास्ततो ब्रूते-यावदुपकरणं नयामि तावत् प्रतीक्षस्व(क्षध्वम्] । ततः कल्पं विस्तार्य सर्वमुपकरणं तत्र प्रक्षिप्योपरि बद्धवा निष्काशयति । अथ प्रभूतमुपकरणं न शक्नोति सर्वमेकवारं नेतुंतदा त्रिषु चतुर्षु वा कल्पेषु बद्धवा कोल्लुकपरम्परकेण महाराष्ट्रप्रसिद्धकोलुल्लु-कचक्रपरम्परन्यायेन निष्काशयति । अथ ते हरन्त्युपकरणं ततो यत् पार्श्वे सारभाण्डमक्षादि यद्वा नेतुं शक्नोति तद् नयति ।। सम्प्रति स्वाभाविकाग्नौ यतनामाह-

[भा.५७५] कोल्लुपरंपर संकलि, आगासं नेइ वायपडिलोमं ।
अच्छुल्लूढा जलणे, अक्खाई सारभंडं तु ।।

वृ- ज्वलने प्रवर्द्धमाने सर्वमुपकरणमेकवारमशक्नुवन् कल्पेषु चतुर्षु पञ्चसु वा बघ्नाति,

Jain Education International For Private & Personal Use Only www.jainelibrary.org

बद्ध्वा च कोल्लुकचक्रन्यायेन परम्परया "संकलि" त्ति तान् पोट्टलकान् दवरकेण सङ्कलय्य यत्र न तृणादिसम्भवस्तत आकाशं तदपि वातप्रतिलोमं तत्र नयति। अथ ज्वलनेनातिप्रसरता ते 'अच्छुल्लूढाः' स्वस्थानं त्याजितास्ततो यत् सारं भाण्डमक्षादि तद् निष्काशयन्ति॥

मालव-स्तेनेषु यतनामाह-

[भा.५७६] असरीरतेमभंगे, पवलाए जने उ जं तरति नेउं।
न वि धूमो न वि बोलो, न द्दवति जनो कइयवेसुं॥

वृ- 'अशरीरस्तेनभङ्गे' ये शरीरं नापहरन्ति तैः स्तेनैर्भङ्गे-प्रपलायमाने जने यद् नेतुं शक्नेति तद् नयति। यदि पुनः कैतवेन केचन ब्रुवते 'अग्नि' समुच्छलितः स्तेना वा द्वेविधाः समापतिताः तदा ते वक्तव्याः-न वै धूमो दृश्यते "न वि बोलो" त्ति नापि जनस्य प्रपलायमानस्य बोलः तस्मान् द्रवति जनो विदग्धः कैतवेष्विति॥ स्वज्ञातिद्वारे यतनामाह-

[भा.५७७] अन्नकुल-गोत्तकहणं, पत्तेसु वि भीयपरिस पेल्लेइ।
पुव्वं अभीयपरिसे, भणाति लज्जाए न भणामि॥

[भा.५७८] जा ताव ठवेमि वए, पत्ते कुड्डादिछेय संगारो।
मा सि हीरे उवहिं, अच्छह जा सिं निवेएमि॥

वृ- यदि केचन स्वज्ञातय आगता वर्त्तन्ते न च ते तं प्रत्यभिजानते तदा 'अन्यकुल-गोत्रकथनं' कर्त्तव्यम् अन्यत् कुलमन्यच्च गोत्रमात्मनः कथयति। अथ ते सम्यग् ज्ञातारः समागतास्तत्र यदि ते भीतपर्षदस्तदा तान् प्रेरयति-ईदृशास्तादृशा यूयम्, बन्धयामि युष्मान् राजकुलेनेति। अथैवमुक्तास्ते न बिभ्यति तर्हि तान् अभीतपर्षदो वक्ति-ममाप्येतदभिप्रेतमुन्निष्क्रमणं परं लज्जया न भणामि युष्मान्, यथा-अहमुन्निष्क्रमामीति, न वा शक्नोमि लज्जया युष्माकं समीपमागन्तुम्, तद् भव्यं कृतं यद् यूयमागताः किन्तु तिष्ठत क्षणमात्रं यावदागच्छन्ति साधवः, ततस्तेषां समीपे व्रतानि निक्षिपामि; मा वा तेषां भट्टारकाणामुपकरणं शून्ये उपाश्रये केनापि ह्रियेत, यावच्च तेषां निवेदयामि; मा वा तेषां भट्टारकाणामुपकरणं शून्ये उपाश्रये केनापि ह्रियेत, यावच्च तेषां निवेदयामि यथा-'अहं गमिष्यामि' इति तावत् तिष्ठत। एतावतोपायेन तावत् तिष्ठति यावत् साधवः प्राप्ता भवन्ति, तत उपाश्रयकुड्यस्य च्छिद्रं पातयित्वा नश्यति सङ्केतं च करोति-अमुकस्थाने मां गवेषयत, आगत्य वा मम मिलितव्यमिति॥

[भा.५७९] खंधारादी नाउं, इयरे वि तहिं दुयं समभिएंति।
अप्पाहेई तेसिं, अमुगं कज्जं दुयं एह॥

वृ- 'इतरेऽपि' भिक्षार्थमटन्तः साधवः स्कन्धावारमग्नि-मालव-स्तेनपतनं वा ज्ञात्वा 'द्रुतं' सत्वरं 'समभियन्ति' समागच्छन्ति। स वा वसतिपालो भिक्षार्थं गतानां सन्देशं कथयति, यथा-अमुकं कार्यमापतितमिति द्रुतमागच्छत॥ गतं रक्षणद्वारम्। इदानीं ग्रहणकल्पिकमाह-

[भा.५८०] दुविहकरणोवघाया, संसत्ता पच्चवाय सिज्जविही।
जो जाणति परिहरिउं, सो गहणे कप्पितो होति॥

वृ- वसतेर्द्विविधं करणम्-मूलकरणमुत्तरकरणं च, तेन द्विविधेन करणेनोपघातो यस्याः सा द्विविधकरणोपघाता, मूलकरणोपहता उत्तरकरणोपहता चेत्यर्थः। तथा पृथिव्युदक-तेजो-

Jain Education International For Private & Personal Use Only www.jainelibrary.org

हरितत्रसप्राण-सागारिकसंयुक्ता संसक्ता । ब्रह्मव्रतादिविराधनाकारिणी प्रत्यवाया । तथा विधिर्विधानं भेदः प्रकार इत्यनर्थान्तरम्, शय्याया विधिर्वक्ष्यमाणा नव शय्याया भेदाः । एतैर्मूलकरणादिदोषैर्य सम्यक् परिहर्त्तुं जानाति स शय्याग्रहणे कल्पिको भवति ॥

अथ कतिविधं मूलकरणमुत्तरकरणं वा शोधनीयम् ? अत आह-

[भा.५८१] सत्तेव य मूलगुणे, सोही सत्तेव उत्तरगुणेसु ।
संसत्तम्मि य छक्कं, लहु-गुरु-लहुगा चरम जाव ॥

वृ- 'सत्तैव' सप्तप्रकारैव शोधिर्मूलगुणेषु, गाथायामेकवचनमार्षत्वात्, 'सत्तैव' सप्तप्रकारैवोत्तरगुणेषु शोधि । किमुक्तं भवति ? -मूलकरणं सप्तभेदं शोधनीयं वसतेः साधुभि, उत्तरकरणमपि सप्तविधमिति । तथा संसक्ते उपाश्रये 'षट्कं' पृथिव्यप्तेजो-वनस्पति-त्रसाय-सागारिकलक्षणं शोधनीयम् । किमुक्तं भवति ? -यथोक्तरूपेण षट्केन संसक्तायामपि न स्थातव्यम् । यदि तिष्ठति ततो लघु-गुरु-लघुका यावत 'चरमं' पाराञ्चितं तावत् प्रायश्चित्तम् । तद्यथा-पृथिव्यादिभिः कायैः संसक्तायां तिष्ठन्ति चत्वारो लघुकाः, हरितैरनन्तैश्चत्वारो गुरुकाः, प्रत्येकबीजैः पञ्च रात्रिन्दिवानि लघुकानि, अनन्तबीजैस्तान्येव गुरुकाणि, मिश्रैः पृथिव्यादिभिर्मासलघु, मिश्रैरनन्तैर्मासगुरु, बीजैः प्रत्येकैरनन्तैश्च मिश्रैः सचित्तैरिव, त्रसैः संसक्तायां चतुर्गुरु, एवं तिष्ठतः प्रायश्चित्तम् । अथ तिष्ठन् पृथिवीकायादिसङ्घट्टनादि करोति तदा लघुक-गुरुकादि प्रायश्चित्तम् "छक्काय चउसु लहुगा" इत्यादि गाथया प्रागुक्तप्रकारेणाभिहितं तावदवसेयं यावच्चरमं पाराञ्चितमिति ॥ "सप्तविधं मूलकरणं शोधनीयम्" इत्युक्तम् अतः सप्त मूलभेदानाह-

[भा.५८२] पट्ठीवंसो दो धारणाउ चत्तारि मूलवेलीतो ।
मूलगुणेहि उवहया, जा सा आहाकडा वसही ॥

वृ- उपरितनस्तिर्यक्पाती पृष्ठवंशः, द्वौ मूलधारणौ ययोरुपरि पृष्ठवंशस्तिर्यग् निपात्यते, चत+श्च मूलवेलय उभयोर्धारणयोरुभयतो द्विद्विवेलिसम्भवात् । एते वसतेः सप्त मूलभेदाः । एतैर्मूलगुणैः सप्तभिरुपहता या वसति सा आधाकृता भवति । साधून् आधाय-सम्प्रधार्य कृता आधाकृता, पृषोदरादित्वादिष्टरूपनिष्पत्ति ॥ उत्तरकरणं पुनरिदं सप्तविधम्-

[भा.५८३] वंसग कडणोक्कंचण, छावण लेवण दुवार भूमी य ।
सप्परिकम्मा वसही, एसा मूलोत्तरगुणेसु ॥

वृ- वंशका ये वेलीनामुपरि स्थाप्यन्ते, पृष्ठवंशस्योपरि तिर्यक् 'कटनं' कटादिभि समन्ततः पार्श्वानामाच्छादनम्, 'उत्कञ्चनम्' उपरि कम्बिकानां बन्धनम्, 'छादनं' दर्भादिभिराच्छादनम्, 'लेपनं' कुड्यानां कर्दमेन गोमयेन च लेपप्रदानम्, "दुवार" त्ति संयनिमित्नन्यतो वसतेर्द्वारकरणम्, "भूमि" त्ति समभूमिकरणम् । एतत् सप्तविधमुत्तरकरणम् । एषा सपरिकर्मा वसतिर्मूलगुणैरुत्तरगुणैश्च । एषा नियमेनाविशोधिकोटि । अन्येऽपि चोत्तरगुणा वसतेर्विद्यन्ते तैः कृता विशोधिकोटि ॥ के तेऽन्ये उत्तरगुणाः ? इत्यत आह-

[भा.५८४] दूमिय धूविय वासिय, उज्जोविय बलिकडा अवत्ता य ।
सित्ता सम्मट्ठा वि य, विसोहिकोडी कया वसही ॥

वृ- 'दूमिया' नाम सुकुमारलेपेन सुकुमारीकृतकुड्या सेटिकया धवलीकृतकुड्या च,

Jain Education International For Private & Personal Use Only www.jainelibrary.org

धूपिता अगुरुप्रभृतिभि, वासिता पटवास-कुसुमादिभि, 'उद्द्योतिता' अन्धकारेऽग्निकायेन कृतोश्योता, 'बलिकृता' यत्र संयतनिमित्तं बलिविधानं कृतम्, 'अवात्ता' नाम यत्र भूमिरुपलिप्ता, सिक्ता आवर्षणकरणतः, सम्मृष्ट सम्मार्जन्या संयतनिमित्तम् । एवमुत्तरगुणैः कृता वसतिर्विशोधिकोटिर्भवति ।। अत्रैव प्रायश्चित्तविधिमाह-

[भा.५८५] अप्फासुएण देसे, सव्वे वा दूमियादि चउलहुगा ।
अप्फासु धूमजोती, देसम्मि वि चउलहू होंति ।।

वृ- यत्र देशतः सर्वतो वा अप्राशुकेन दूमितादि आदिशब्दात् समस्तान्यपि पदानि गृहीतानि तत्र तिष्ठतः प्रत्येकं प्रायश्चित्तं चत्वारो लघुकाः । यत्र पुनरगुरुप्रभृतिभिर्धूपनमन्धकारेऽग्निकायेनोश्योतनं तत्र नियमादप्राशुकः-सचित्तोऽग्निकाय इति देशेऽपि चत्वारो लघुकाः किमुत सर्वतः?

[भा.५८६] सेसेसु फासुएणं, देसे लहु सव्वहिं भवे लहुगा ।
सम्मज्जण साह-कुसादि छिन्नमेत्तं तु सच्चित्तं ।।

वृ- 'शेषेषु' धूपितमुद्द्योतितं च मुक्त्वा अन्येषु दूमित-वासित-बलिकृता-ऽवात्त-सिक्त-सम्मृष्टरूपेषु भेदेषु प्राशुकेन देशतः करणे मासलघु, सर्वतश्चत्वारो लघवः । तथा यद् मार्ज्यते तत्र सचित्तं शाखा-कुशादि च्छिन्नमात्रं तद यदि देशतः सर्वतो वा सम्मार्ज्यते तदा चतुर्लघु ।।

[भा.५८७] मूलुत्तरचउभंगो, पढमे बीए य गुरुग सविसेसा ।
तइयम्मि होइ भयणा, अत्तट्ठकडो चरम सुद्धो ।।

वृ- मूलगुणाः पृष्ठवंशादयः उत्तरगुणा वंशकादयः तेषु मूलोत्तरगुणेषु चतुर्भङ्गी । गाथायां पुंस्त्वं प्राकृतत्वात् । मूलगुणा अपि पृष्ठवंशादयः संयतनिमित्तमुत्तरगुणा अप्यविशोधिकोटिगता वंशकादयः संयतनिमित्तमिति प्रथमो भङ्गः, अत्र प्रायश्चित्तं चत्वारो गुरुका, द्वाभ्यां गुरवः, तद्यथा-तपसा कालेन च । मूलगुणाः संयतार्थमुत्तरगुणा अविशोधिकोटिगताः स्वार्थमिति द्वितीयः, अत्र चत्वारो गुरुकास्तपोगुरवः काललघुकाः । "तइयम्मि होति भयण" त्ति मूलगुणाः स्वार्थमुत्तरगुणाः संयतार्थमिति तृतीयो भङ्गस्तस्मिन् भजना । सा चेयम्-येऽत्रोत्तरगुणास्ते यद्यविशोधिकोटिगतास्तदा चतुर्गुरवस्तपोलघवः कालगुरवः, अथ विशोधिकोटिगतास्ते ततोऽप्राशुकेन देशे सर्वस्मिन् वा परिकर्मणि चत्वारो लघवः, प्राशुकेन देशतो मासलघु, सर्वतश्चत्वारो लघुकाः । आत्मार्थं मूलगुणा आत्मार्थमेव चोत्तरगुणा इत्येवमात्मार्थकृतश्चरमभङ्गः शुद्धः ।।

तदेवं द्विविधकरणोपघातेति द्वारं व्याख्यातम् । अधुना संसक्तद्वारमाह-

[भा.५८८]पुढवि दग अगनि हरियग, तसपाण सागारियादि संसत्ता ।
बंभवयआदि-दंसणविराहिगा पच्चवाया उ ।।

वृ- पृथिव्या उदकेनाग्निना हरितकेन त्रसपाणैः 'सागारिकादिभिश्च' सागारिकः-शय्यातरः आदिशब्दादन्यस्त्र-पुरुषगृहस्थैः 'संसक्ता' सम्मिश्रा । तथा प्रत्यपाययति-प्रत्यपाये पातयतीति प्रत्यपाया ब्रह्मव्रतादीनां दर्शनस्य-सम्यक्त्वस्य विराधिका, यत्र ब्रह्मव्रतादीनां विराधनोपजायते सा सप्रत्यवाया शय्या इत्यर्थः ।। अत्रोभयत्रापि प्रायश्चित्तविधिमाह-

[भा.५८९] काएसु उ संसत्ते, सचित्त-मीसेसु होइ सट्ठाणं ।
सागारियसंसत्ते, लहुगा गुरुगा य जे जत्थ ।।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

वृ- 'कायैः' पृथिवीकायादिभि सचित्तैर्मिश्रैश्च ससक्ते उपाश्रये तिष्ठतः प्रायश्चित्तं 'स्वस्थानं' स्वस्थाननिष्पन्नं भवति । यथा-सचित्तैः पृथिवीकायादिभि संसक्ते चतुर्लघु, हरितैरनन्तैश्चतुर्गुरु, प्रत्येकबीजे रात्रिन्दिवपञ्चकं लघु, अननतबीजैर्गुरुकम्, मिश्रैः पृथिव्यादिभिर्मासलघु, हरितैरनन्तैर्मिश्रैर्मासगुरु, बीजैः प्रत्येकैरनन्तैश्च मिश्रैः सचित्तैरिव, त्रसकायैश्चत्वारो गुरुकाः । "सागारिय" इत्यादि पश्चिमार्द्धम् । निर्ग्रन्थानां पुरुषसंसक्ते उपाश्रये तिष्ठतां चत्वारो लघुकाः, स्त्रीसंसक्ते चत्वारो गुरुका- । निर्ग्रन्थीनां स्त्रीभिः संसक्ते चतुर्लघु, पुरुषसंसक्ते चतुर्गुरु । ये च यत्राऽऽज्ञाभङ्गादयो दोषास्ते च तत्र सप्रायश्चित्ता वक्तव्याः ॥

[भा.५९०] गुरुगा बंभावाए, आयाए चेव दंसणे लहुगा ।
आणादिणो विराधन, भवंति एक्केक्कगपयाओ ॥

वृ- 'ब्रह्मापाये' ब्रह्मप्रत्यवाये 'आत्मनि चैव' आत्मप्रत्यपाये 'गुरुकाः' चत्वारो गुरवः । 'दर्शने' दर्शनप्रत्यपाये चत्वारो लघवः । 'आज्ञादयश्च' आज्ञाभङ्गादयो विराधना एकैकपदाद् भवन्ति ज्ञातव्याः, द्विविधकरणोपघातादिषु सर्वेष्वपि पदेषु यथायोगमाज्ञाभङ्गादयो विराधनाः सप्रायश्चित्ता योजनीया इत्यर्थः ॥ अथ के ब्रह्मप्रत्यवाया आत्मप्रत्यवाया दर्शनप्रत्यवाया वा ? तत आह-

[भा.५९१] तिरिय-मनुइत्थियातो, बंभावातो उ तिविह पडिमातो ।
अहिबिल-चलंतकुड्डादि एवमादी उ आयाए ॥

वृ- यत्र तिर्यकिस्त्रयो मनुष्यस्त्रियो वा यदि वा यत्र 'त्रिविधाः प्रतिमाः' तिर्यक्स्त्रीप्रतिमा मनुष्यस्त्रीप्रतिमा देवस्त्रीप्रतिमा वा सा 'ब्रह्मापाया' ब्रह्मप्रत्यपाया, तस्यां स्थितानां ब्रह्मव्रत-विनाशसम्भवात् । यत्र पुनरहबिलानि चलन्ति-चलानि कुड्यानि आदिशब्दाच्चलवेलीधारणा-दिपरिग्रहः, एवमादिका 'आत्मनि' आत्मप्रत्यवाया ॥

[भा.५९२] आगाढमिच्छदिट्ठी, सव्वातिहि मरुग बहुजनट्ठाणा ।
पासंडा य बहुविहा, एसा खलु दंसणावाया ॥

वृ- तथा यत्राऽऽगाढमिथ्यादृष्टि, यत्र च सर्वेऽतिथयः समागच्छन्ति सङ्गमित्यर्थः, यत्र 'मरुकाः' बटुकास्तिष्ठन्ति चट्टशाला इति भावः, यच्च बहूनामागन्तुकानां जनानां स्थानं देशिककुटीत्यर्थः, यत्र च बहुविधाः पाषण्डाः, एषा एवंरूपा वसति- खलु 'दर्शनापाया' दर्शनप्रत्यपाया ॥ सम्प्रति शय्याविधिद्वारमाह-

[भा.५९३] कालातिक्कंतोवट्ठाण अभिकंत अनभिकंता य ।
वज्जा य महावज्जा, सावज्ज महऽप्पकिरिया य ॥

वृ- शय्या नवप्रकारा भवन्ति, तद्यथा-कालातिक्रान्ता १ उपस्थापना २ अभिक्रान्ता ३ अनभिक्रान्ता ४ वर्ज्या ५ महावर्ज्या ६ सावद्या ७ महासावद्या ८ अल्पक्रिया ९ च ॥

तत्र कालातिक्रान्तादिषु प्रायश्चित्तविधिमाह-

[भा.५९४] कालातीते लहुगो, चउरो लहुगा य चउसु ठाणेसु ।
गुरुगा तिसु जमलपया, अप्पकिरियाए सुद्धो उ ॥

वृ- ऋतुबद्धे काले कालातिक्रान्तं तिष्ठति मासलघु, वर्षाकाले चत्वारो लघवः । 'चतुर्षु

Jain Education International For Private & Personal Use Only www.jainelibrary.org

स्थानेषु' पस्थापनायामभिक्रान्तायामनभिक्रान्तायां वर्ज्यायां चेत्यर्थः तिष्ठतः प्रत्येकं चत्वारो लघुकाः । तथा 'त्रिषु' स्थानेषु महावर्ज्यायां सावद्यायां महासावद्यायां चेत्यर्थः प्रत्येकं चत्वारो गुरवः, परं तपः-कालविशेषिताः । तद्यथा-महावर्ज्याया चत्वारो गुरुकाः अतपोगुरवः, साद्यायां तपोगुरवः, महासावद्यायां तपसा कालेन च गुरवः । "जमलपया" इति तपःकालयोः संज्ञा, ततोऽयमर्थ-त्रिषु स्थानेषु गुरुकाः 'यमलपदाः' यमलपदवन्तस्तपः-कालविशेषिता द्रष्टव्याः । अल्पक्रियायां तु तिष्ठन् शुद्धः ॥

साम्प्रतमेतासामेव कालातिक्रान्तादीनां व्याख्यानमभिधित्सुराह-

[भा.५९५] उउ-वासा समतता, कालातीया उ सा भवे सेज्जा ।
स च्चेव उवट्ठाणा, दुगुमा दुगुणं अवज्जेत्ता ॥

वृ- ऋतुबद्धे काले वर्षाकाले च यत्र स्थितास्तस्यामृतुबद्धे काले मासे पूर्णे वर्षाकाले चतुर्मासे पूर्णे यत् तिष्ठति सा कालातिक्रान्ता सति । "सच्चैव" इत्यादि । या कालमर्यादाऽनन्तरमुक्ता 'ऋतुबद्धे मासो वर्षासु चत्वारो मासाः' इति तामेव द्विगुणां द्विगुणामवर्जयित्वा यत्र भूयः समागत्य तिष्ठन्ति सा उपस्थाना । किमुक्तं भवति ? -ऋतुबद्धे काले द्वौ मासौ वर्षास्वष्टमासान् अपरिहृत्य यदि पुनरागच्छति तस्यां वसतौ ततः सा उपस्थानाभवति, उपसामीप्येन स्थानम्-अवस्थानं यस्यां सा उपस्थानेति व्युत्पत्तेः । अन्ये पुनरिदमाचक्षते-यस्यां वसतौ वर्षावासं स्थितास्तस्यां द्वौ वर्षारात्रावन्यत्र कृत्वा यदि समागच्छन्ति ततः सा उपस्थाना न भवति अर्वाक् तिष्ठतां पुनरुपस्थापना ॥

[भा.५९६] जावंतिया उ सेज्जा, अन्नेहिं निसेविया अभिक्कंता ।
अन्नेहि अपरिभुत्ता, अनभिक्कंता उ पविसंते ॥

वृ- या शय्या आचण्डालेभ्यो यावन्तिकी सा यदाऽन्यैश्चरकादिभि पाषण्डस्थैर्गृहस्थैर्वा निषेविता पश्चात् संयतास्तिष्ठन्ति सा अभिक्रान्ता । सैव यावन्तिकी अन्यैः पाषण्डस्थैर्गृहस्थैर्वा अपरिमुक्ता तस्यां यदि संयताः प्रविशन्ति ततः साऽनभिक्रान्ता ॥

[भा.५९७] अत्तट्ठकडं दाउं, जतीण अन्नं करेंति वज्जा उ ।
जम्हा तं पुव्वकयं, वज्जंति ततो भवे वज्जा ॥

वृ- आत्मार्थकृतां वसतिं यतिभ्यो दत्वा पुनरन्यात्मार्थं कुर्वन्ति यदि ततः सा यतिदत्ता इत्यत आह-यस्मात् तां पूर्वकृतां वसतिं गृहस्था वर्जयन्ति, यतिभ्यः किल दत्तत्वात् । ततो वर्ज्यत इति वर्ज्या भवति सा पूर्वकृतेति ॥

[भा.५९८] पासंडकारणा खलु, आरंभो अभिनवो महावज्जा ।
समणट्ठा सावज्जा, महसावज्जा उ साहूणं ॥

वृ- यत्र बहूनां श्रमण-ब्राह्मणप्रभृतीनां पाषण्डानां कारणात्-कारणेन खल्वारम्भोऽभिनवः क्रियते सा महावर्ज्या । 'श्रमणार्था' पञ्चानां श्रमणानामर्थाय कृता सावद्या । या पुनरमीषामेव साधूनामर्थाय कृता सा महासावद्या ॥

[भा.५९९] जा खलु जुहुत्तदोसेहि वज्जिया कारिया सअट्ठाए ।
परिकम्मविप्पमुक्का, सा वसही अप्पकिरिया उ ॥

वृ- या पुनः 'यथोक्तदोषैः' कालातिक्रान्तादिलक्षणैर्वर्जिता केवलं स्वस्य-आत्मनोऽर्थाय

Jain Education International For Private & Personal Use Only www.jainelibrary.org

कारिता परिकर्मणा च विप्रमुक्ता सर्वस्यापि परिकर्मणः स्वत एवाग्रेप्रवर्त्तितत्वात् सा वसतिरल्पक्रिया वेदितव्या ॥ सम्प्रति यतनां दर्शयितुकाम इदमाह-

[भा.६००] हिट्ठिल्ला उवरिल्लाहि बाहिया न उ लभंति पाहन्नं ।
पुव्वाणुन्नाऽभिनवं, च चउसु भय पच्छिमाऽभिनवा ॥

वृ- अधस्तन्य उपरितनीभिर्बाध्यन्ते, बाधिताश्च सत्यः 'न तु' नैव लभन्ते प्राधान्यम् । इयमत्र भावना-नवापि वसतयः क्रमेण स्थाप्यन्ते, तत्राप्यल्पक्रिया निर्दोषेति प्रथमम् । त्यथा-अल्पक्रिया कालातिक्रान्ता उपस्थाना अभिक्रान्ता अनभिक्रान्ता वर्ज्या महावर्ज्या सावद्या महासावद्या च । अत्राधस्तनी अल्पक्रिया, अयां यद्यतिरिक्तं कालं तिष्ठति ततः सा कालातिक्रानतया बाध्यते, सा कालातिक्रान्ता भवतीति भावः । कालातिक्रान्तामपि यदि प्रागभिहितस्वरूपां कालमर्यादां द्विगुणां द्विगुणामपरिहत्योपागच्छन्ति ततः सा उपस्तानया बाध्यते, उपस्थाना सा भवतीति भावः । एवं यथासम्भवमुपयुज्य वक्तव्यम् । ''पुव्वाणुन्न'' त्ति आसां च नवानां शय्यानां मध्ये पूर्वस्याः पूर्वस्याः अनुज्ञा वेदितव्या । किमुक्तं भवति ? -

नवानां शय्यानां मध्ये या पूर्वा अल्पक्रिया सा तावत् प्रथममनुज्ञाता, लेशतऽपि सावद्याभावात्; तस्या अभावे शेषाणां मध्ये कालातिक्रान्ता पूर्वा सा अनुज्ञाता, अल्पक्रियाया अलाभे सा आश्रयणीया इति भावः; तस्या अप्यलाभे शेषाणां पूर्वा उपस्थाना सा अनुज्ञाता; एवं या या पूर्वा सा सा अनुज्ञाता तावद् वक्तव्या यावत् सावद्या महासावद्यायाः पूर्वा सा अनुज्ञाता । एवं पूर्वस्याः पूर्वस्या अलाभे उत्तरस्या उत्तरस्या अनुज्ञा वेदितव्या । ''अभिनवं च चउसु भय'' त्ति चतसृषु वसतिषु अभिनवेति दोषः सम्बध्यते अभिनवं दोषं 'भज' विकल्पय, कदाचिद् भवति कदाचिन्न भवतीति जानीहीत्यर्थः । अत्रापीयं भावना-अनभिक्रान्तायामपरिमुक्तेति कृत्वा चिरकृतायामप्यभिनवदोषो भवति, वर्ज्यादिषु पुनर्या परिभुक्तास्तासु नाभिनवदोषः, एषा भजना। ''पच्छिमाऽभिनव'' त्ति पश्चिमो नाम महासावद्योपाश्रयः तस्मिन्नभिनवकृते वा चिरकृते वा परिभुक्ते वा अभिनवदोषा भवन्ति, एकपक्षनिर्धारणात् । एतैर्मूलगुणादि दोषैर्य परिहर्त्तुं जानाति स ग्रहणे कल्पिकः ॥

कथं पुनर्जानाति परिहर्तुम् ? इति चेद् अत आह-

[भा.६०१] उग्गम-उप्पायण-एसणाहि सुद्धं गवेसए वसहिं ।
तिविहं तीहिं विसुद्धं, परिहर नवगेण भेदेणं ॥

वृ- उद्गमेनोत्पादनया एषणया शुद्धां वसतिं गवेषयति । तत्र त्रयाणां पदानामष्टौ भङ्गाः। तेषु च उपरितनेषु सप्तसु भङ्गेष्वशुद्धां परिहर्तुं यो जानाति स ग्रहणे कल्पिकः । कथम्भूतां वसतिमुद्गमादिशुद्धां गवेषयति ? इत्यत आह-'त्रिविधां' खातादिभेदतस्त्रीप्रकारां तथा 'त्रिभिः' मनसा वाचा कायेन च विशुद्धां गवेषयति । तथा खातादीस्तिस्रोऽपि वसतीरुद्गमाद्यशुद्धा नवकेन भेदेन परिहरति । तद्यथा-मनसा न गृह्णाति नापि ग्राहयति नापि गृह्णन्तमनुजानीते, एवं वा कायेन च वक्तव्यमिति ॥

[भा.६०२] पढिय सुय गुणियमगुणिय, धारमधार उवउत्तो परिहरति ।
आलोयणमायरिये, आयरिओ विसोहिकारो से ॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

वृ- अस्या व्याख्या प्राग्वत् उक्तः शय्याकल्पिकः । सम्प्रति वस्त्रकल्पिकमभिधित्सुराह-

[भा.६०३] नामं ठवणा वत्थं, दव्वे भावे य होइ नायव्वं ।
एसो खलु वत्थस्स उ, निक्खेवो चउव्विहो होइ ॥

वृ- वस्त्रं खलु चतुर्विधम् । तद्यथा-नामवस्त्रं स्थापनावस्त्रं द्रव्यवस्त्रं भाववस्त्र च । एष खलु वस्त्रस्य निक्षेपश्चतुर्विधो भवति ॥ तत्र नाम-स्थापने प्रतीते, द्रव्यवस्त्रमाह-

[भा.६०४] दव्वे तिविहं एगिंदि-विगल-पंचेंदिएहिं निप्फन्नं ।
सीलंगाइँ भावे, दव्वे पगयं तदट्ठाए ॥

वृ- द्रव्यवस्त्रं त्रिविधम् । तद्यथा-एकेन्द्रियनिष्पन्नं विकलेन्द्रियनिष्पन्नं पञ्चेन्द्रियनिष्पन्नं च । तत्रैकेन्द्रियनिष्पन्नं कार्पासिकादि, विकलेन्द्रियनिष्पन्नं कौशेयकादि, पञ्चेन्द्रियनिष्पन्नमौर्णि-कौष्ट्रिकादि । 'भावे' भाववस्त्रमष्टादश शीलाङ्गसहस्त्राणि । अथ कान्यष्टादश शीलाङ्गसहस्राणि? इति चेद् उच्यते-

करणे जोगे सण्णा, इंदिय भोमादि समणधम्मे य ।
सीलंगसहस्साणं, एताउ भवे समुप्पत्ती ॥

अस्या अक्षरगमनिका-करणं त्रिविधम्, तद्यता-करणं कारापणमनुमोदनं च । त्रिविधो योगः-मनोयोगो वाग्योगः काययोगश्च । संज्ञाश्चतस्रः, तद्यथा-आहारसंज्ञा भयसंज्ञा मैथुनसंज्ञा परिग्रहसंज्ञा च । इन्द्रियाणि पञ्च, तद्यथा-श्रोत्रेन्द्रियं चक्षुरिन्द्रियं घ्राणेन्द्रियं जिह्वेन्द्रियं स्पर्शनेन्द्रियं च । 'भोमादि'त्ति भौमः पृथिवीकायविषयः समारम्भः, आदिशब्दादप्कायसमारम्भस्तेजः कायसमारम्भो वायुकायसमारम्भो वनस्पतिकायसमारम्भो द्वीन्द्रियसमारम्भस्त्रीन्द्रिय-समारम्भश्चतुरिन्द्रियसमारम्भः पञ्चेन्द्रियसमारम्भोऽजीवकायसमारम्भश्च । श्रमणधर्मोऽपि दशधा-क्षान्तिर्मार्दवमार्जवमलोभता तपः सत्यं संयमस्त्यागोऽकिञ्चनता ब्रह्मचर्यं च । एतैः स्थानैरष्टादशानां शीलाङ्गसहस्राणामुत्पत्ति ॥ तद्यथा-

न करेइ सयं साहू, मनसा आहारसन्नउवउत्तो ।
सोइंदियसंवरणो, पुढविजिए खंतिसंपन्नो ॥
न करेइ सयं साहू, मनसा आहारसन्नउवउत्तो ।
सोइंदियसंवरणो, पुढविजिए मद्दवपवन्नो ॥

एवं तावद् वक्तव्यं यावद्दशम्यां गाथायां "बंभचेरगए" इति । एते दश भङ्गाः पृथिवीकायसमारम्भपरिहारेण लब्धाः, एवमप्कायादिपरिहारेणापि प्रत्येकं दश दश लभ्यन्ते इतिसर्वसङ्कलनया जातं शतम् । एतच्च श्रोत्रेन्द्रियेण लब्धम्, एवं शेषैरपीन्द्रियैः प्रत्येकं शतं शतं लभ्यते इति जातानि पञ्च शतानि । एतानि चाहारसंज्ञोपयुक्तेन लब्धानि, एवं शेषाभिरपि संज्ञाभिः प्रत्येकं पञ्च शतानीति सर्वसङ्कयया जाते द्वे सहस्रे । एते च 'न करोति' इत्यनेन पदेन लब्धे, एवं "न कारवेइ" इत्यनेन "नो अनुमन्नइ" इत्यनेन च प्रत्येकं लभ्य(भ्ये) ते इति स्वमीलने जातानि षट् सहस्राणि । एतानि लब्धानि मनोयोगेन, एवं वाग्योगेन काययोगेनापीति सर्वसङ्कयया जातान्यष्टादश सहस्राणि ॥ एतैरष्टादशभिः शीलाङ्गसहस्रैर्नित्यप्रावृता साधवोऽवतिष्ठन्ते तत एतानि भाववस्त्रम् । "दव्वे पगय"मित्यादि । अत्र द्रव्यवस्त्रेणाधिकारः, यतस्तद् द्रव्यवस्त्रं

Jain Education International For Private & Personal Use Only www.jainelibrary.org

'तदर्थाय' भाववस्त्राय भवति, भाववस्त्रस्योपग्रहं करोतीत्यर्थः। ततः प्रकृतमत्र द्रव्यवस्त्रेण॥

[भा.६०५] पुनरवि दव्वे तिविहं, जहन्नगं मज्झिमं च उक्कोसं।
एक्केकं तत्थ तिहा, अहाकड-ऽप्पं-सपरिकम्मं ॥

वृ- यद् द्रव्यवस्त्रमेकेन्द्रियादिनिष्पन्नतया त्रिविधमुक्तं तत् पुनरपि प्रत्येकं त्रिधा, तद्यथा-जघन्यं मध्यममुत्कृष्टं च। तत्र कार्पासिकं जघन्यं मुखपोतिकादि, मध्यमं पटलकादि, उत्कृष्टं कल्पादि। एवं शेषे अपि कौशेयकादिके यथायोगं भावनीये। एतेषामेकैकं 'त्रिधा' त्रिप्रकारम्, तद्यथा-यथाकृतमल्पपरिकर्म सपरिकर्म च ॥ एषामुत्पादने यथोक्तविध्यकरणे प्रायश्चित्तमाह-

[भा.६०६] चाउम्मासुक्कोसे, मासिय मज्झे य पंच य जहन्ने।
वोच्चत्थगहण-करणे, तत्थ वि सट्ठाणपच्छित्तं ॥

वृ- 'उत्कृष्टे' उत्कृष्टवस्त्रविषये विपर्यस्तग्रहणे-विपर्यासेन ग्रहणे प्रायश्चित्तं चतुर्मासम्, मध्यमे मासिकम्, जघन्ये पञ्च रात्रिन्दिवानि। इयमत्र भावना-उत्कृष्टस्य यथाकृतस्य वस्त्रस्योत्पादनाय निर्गतस्तस्य विषये योगमकृत्वा यद्यल्पपरिकर्मोत्कृष्टं गृह्णाति तदा तस्य प्रायश्चित्तं चतुर्लघु, यदा किल यथाकृतं योगे कृतेऽपि न लभ्यते तदाऽल्पपरिकर्म ग्रहीतव्यम् नान्यदा, अत्र तु विपर्यय इत्युक्तरूपं प्रायश्चित्तम्। अथोत्कृष्टमेवसपरिकर्म गृह्णाति तदाऽपि चतुर्लघु। अथ यथाकृतमुत्कृष्टं वस्त्र कृतेऽपि योगे न लब्धं तत उत्कृष्टस्याल्पपरिकर्मणो मार्गणं कर्त्तव्यमेव। तत्करणाय निर्गतस्तस्य योगमकृत्वा सपरिकर्मोत्कृष्टं वस्त्रमाददानस्य चतुर्लघु। एवमुत्कृष्टविषये त्रीणि चतुर्लघुकानि। तथा मध्यमस्य यथाकृतस्य वस्त्रस्योत्पादनाय निर्गतस्य योगमकृत्वा-ऽल्पपरिकर्म मध्यमं गृह्णाति मासलघु। अथ सपरिकर्म मध्यमं गृह्णाति तदाऽपि मासलघु। "यदा यथाकृतं न लभ्यते तदाऽल्पपरिकर्म मध्यमं याचनीयम्" इति वचनतो यथाकृतस्य योगे कृतेऽप्यलाभेऽल्पपरिकर्मण उत्पादनाय निर्गतस्तस्य विषये योगमकृत्वा यदि सपरिकर्म मध्यमं गृह्णाति तदाऽपि मासलघु। एवं मध्यमविषये त्रीणि मासिकानि। तथा जघन्यस्य यथाकृतस्योत्पादनाय निर्गतस्य योगमकृत्वाऽल्पपरिकर्म जघन् गृह्णाति तदा रात्रिन्दिवपञ्चकम्। अथ सपरिकर्म जघन्यमाददाति तदाऽपि पञ्चकम्। यदा तु योगे कृतेऽपि यथाकृतं न लभ्यते तदाऽल्पपरिकर्ममार्गयितव्यमिति तस्योत्पादनाय निर्गतस्तद्विषये योगमकृत्वा सपरिकर्म गृह्णानस्य पञ्चकम्। एवं जघन्यविषये त्रीणि पञ्चकानि।

एतच्च प्रायश्चित्तमधिकृतविषये योगाकरणे। योगे तु कृते लाभाभावतस्तथाग्रहणेऽपि दोषाभावः। तथाहि-यथाकृतस्य निर्गतः तच्च योगे कृतेऽपि न लब्धं ततोऽल्पपरिकर्मापि गृह्णानः शुद्धः। अल्पपरिकर्मणो वा निर्गतस्तद्योगे कृतेऽप्यलभमानः सपरिकर्म गृह्णन् शुद्धः। न केवलमेतद् विपर्यस्तग्रहणे प्रायश्चित्तं किन्तूत्कृष्टादिविपरयस्तग्रहणे स्वस्थानमपि। तद्यथा-उत्कृष्टस्योत्पादनाय निर्गतो मध्यमं गृह्णाति मासिकम्, जघन्यं गृह्णाति रात्रिन्दिवपञ्चकम्; मध्यमस्य निर्गत उत्कृष्टं गृह्णाति चतुर्लघु, जघन्यं गृह्णाति पञ्चकम्; जघन्यस्य निर्गत उत्कृष्टं गृह्णाति चतुर्लघु, मध्यमं गृह्णाति मासलघु; सर्वत्र चाऽऽज्ञादयो दोषाः। तदेवं ग्रहणे प्रायश्चित्तस्वस्थानमुक्तम्। एवं 'करणेऽपि' उत्कृष्टादिकरणेऽपि स्वस्थानप्रायश्चित्तमवसातव्यम्। तद्यथा-उत्कृष्टं वस्त्रं छित्त्वा सीवित्वा च मध्यमकं करोति मासलघु, जघन्यं करोति रात्रिन्दिवपञ्चकम्; मध्यमं छित्वा सीवित्वा

Jain Education International For Private & Personal Use Only www.jainelibrary.org

वा उत्कृष्टं करोति चतुर्लघु, जघन्यं करोति रात्रिन्दिवपञ्चकम्; जघन्यं छित्वा सीवित्वा वा उत्कृष्टं करोति चतुर्लघु, मध्यमं करोति मासिकम् । यत एवं स्वसथानप्रायश्चित्तं ततो विपर्यस्तग्रहण-करणे न विधेये ॥

मुनि दीपरत्नसागरेण संशोधिता सम्पादिता बृहतकल्पसूत्रे पीठिकायाः भाष्यस्य मलयगिरि आचार्येण विरचिता टीका परिसमाप्ता ।

—अथ क्षेमकीर्ति आचार्येण विरचिता पीठिकावृत्तिः—

॥ १ ॥ नतमघवमौलिमण्डलमणिमुकुटमयूखधौतपदकमलम् ।
सर्वज्ञममृतवाचं, श्रीवीरं नौमि जिनराजम् ॥
॥ २ ॥ चरमचतुर्दशपूर्वी, कृतपूर्वी कल्पनामकाध्ययनम् ।
सुविहितहितैकरसिको, जयति श्रीभद्रबाहुगुरु ॥
॥ ३ ॥ कल्पेऽनल्पमनर्धं, प्रतिपदमर्पयति योऽर्थनिकुरुम्बम् ।
श्रीसङ्घदासगणये, चिन्तामणये नमस्तस्मै ॥
॥ ४ ॥ शिवपदपुरपथकल्पं, कल्पं विषममपि दुःषमारात्रौ ।
सुगमीकरोति यच्चूर्णिदीपिका स जयति यतीन्द्रः ॥
॥ ५ ॥ आगमदुर्गमपदसंशयादिपातो विलीयते विदुषाम् ।
यद्वचनचन्दनरसैर्मलयगिरिः स जयति यथार्थः ॥
॥ ६ ॥ श्रुतलोचनमुपनीय, व्यपनीय ममापि जडिमजन्मान्ध्यम् ।
यैरदर्शि शिवमार्ग, स्वगुरूनपि तानहं वन्दे ॥
॥ ७ ॥ ऋजुपदपद्धतिरचनां, बालशिरःशेखरोऽप्यहं कुर्वे ।
यस्याः प्रसादवशतः, श्रुतदेवी साऽस्तु मे वरदा ॥
॥ ८ ॥ श्रीमलयगिरिप्रभवो, यां कर्त्तुमुपाक्रमन्त मतिमन्तः ।
सा कल्पशास्त्रटीका, मयाऽनुसन्धीयतेऽल्पधिया ॥

इह श्रीमदआवश्यकादिसिद्धान्तप्रतिबद्धनिर्युक्तिशास्त्रसंसूत्रणसूत्रधारः परोपकार-करणैकदीक्षादीक्षितः सुगृहीतनामधेयः श्रीभद्रबाहुस्वामी सकर्णकर्णपुटपीयमान- पीयूषायमान ललितपदकलितपेशलालापकं साधु-साध्वीगतकल्प्या-ऽकल्प्यपदार्थसार्थविधि-प्रतिषेधप्ररूपकं यथायोगमुत्सर्गा-ऽपवादपदपदवीसूत्रकवचनरचनागर्भं परस्परमनुस्यूताभि-सम्बन्धबन्धुर-पूर्वापरसूत्रसन्दर्भं प्रत्याख्यानाख्यनवमपूर्वान्तर्गताऽऽचारनामकतृतीय-वस्तुरहस्यनिष्यन्दकल्पं कल्पनामधेयमध्ययनं निर्युक्तियुक्तं निर्यूढवान् । अस्य च स्वल्प- ग्रन्थमहार्थतया प्रतिसमयम-पसर्पदवसर्पिणीपरिणतिपरिहीयमानमति-मेघा-धारणादिगुण-ग्रामाणामैदंयुगीनसाधूनां दुरवबोधतया च सकलत्रिलोकीसुभगङ्करणक्षमाश्रमणनामधेयाभिधेयैः श्रीसङ्घदासगणिपूज्यैः प्रतिपदप्रकटितसर्वज्ञाज्ञाविराधनासमुद्भूतप्रभूतप्रत्यपायजालं निपुणचरण-करणपरिपालनो-पायगोचरविचारवाचालं सर्वथादूषणकरणेनाप्यदूष्यं भाष्यं विरचयाञ्चक्रे । इदमप्यतिगम्भीरतया मन्दमेधसां दुरवगममवगम्य यद्यप्यनुपकृतपरोपकृतिकृता चूर्णिकृता चूर्णि- रासूत्रिता तथापि

Jain Education International For Private & Personal Use Only www.jainelibrary.org

सा निबिडजडिमजम्बालजालजटालानामस्मादृशां जन्तूनां न तथाविधमव-बोधनिबन्धनमुपजायत इति परिभाव्य शब्दानुशासनादिविश्वविद्यामयज्योति पुञ्ज- परमाणुघटितमूर्त्तिभि श्रीमलय-गिरिमुनीन्द्रर्षिपादैर्विवरणकरणमुपचक्रमे । तदपि कुतोऽपि हेतोरिदानीं परिपूर्णं नावलोक्यत इति परिभाव्य मन्दमतिमौलिमणिनाऽपि मया गुरूपदेशं निश्रीकृत्य श्रीमलयगिरिविरचित-विवरणादूर्द्ध विवरीतुमारभ्यते । कृतं विस्तरेण, प्रकृतं प्रस्तूयते-

इहायं कल्प-व्यवहारयोरनुयोगः प्रक्रान्तः । स च कतिभिर्द्वारैः प्ररूपणीयः ? इति स्वरूपनिरूपणायामनुयोगवक्तव्यताप्रतिबद्धद्वारकलापसूचिका तावदियं मूलगाथा-

निक्खेवेगट्ठ निरुत्ति विहि पवत्ती य केण वा कस्स ।
तद्दार भेय लक्खण, तयरिह परिसा य सुत्तत्थो ॥

अस्याश्च निक्षेपादीनि तदर्हपर्यन्तान्येकादश द्वाराणि व्याख्यातानि । सम्प्रति पर्षदिति द्वारमनुवर्त्तते । तत् चेदं द्वारश्लोकयुगलम्-

बहुस्सुए चिरपव्वइए, कप्पिए अ अचंचले ।
अवट्ठिए अ मेहावी, अपरिस्साई अ जे विऊ ॥
पत्ते य अणुन्नाए, भावओ परिणामगे ।
एयारिसे महाभागे, अनुओगं सोउमरिहइ ॥

अत्र च बहुश्रुत-चिरप्रव्रजिते द्वारे व्याख्याते, कल्पिकद्वारं व्याख्यायमानमस्ति । सोऽपि कल्पिको द्वादशविधः, तद्यथा-

सुत्ते अत्थे तदुभय, उवट्ठ वीयार लेव पिंडे य ।
सिज्ञा वत्थे पत्ते, उग्गहण विहारकप्पे य ॥

तत्र सूत्रकल्पिकादयः शय्याकल्पिकान्ता भाविताः । साम्प्रतं वस्त्रकल्पिको भाव्यते । तत्रापि गाथाचतुष्टयं श्रीमलयगिरिणैव व्याख्यातम्, इतः प्रभृति विव्रियते । तत्र यदुक्तमनन्तरगाथायां "वोच्चत्थगहण-करणे, तत्थ वि सट्ठाणपच्छित्तं"ति तदेतद् भावयति-

[भा.६०७] जोगमकाउमहागडे, जो गिण्हइ दोन्नि तेसु वा चरिमं ।
लहुगा उ तिन्नि मज्झम्मि मासिआ अंतिमे पंच ॥

वृ- 'योगं' व्यापारमुद्यममकृत्वा 'यथाकृते' यथाकृतवस्त्रविषयं यः साधुः 'द्वे' अल्पपरिकर्मसपरिकर्मणी गृह्णाति । तद्यथा-यथाकृतस्यार्थाय निर्गतस्तस्य योगमकृत्वा प्रथममेवाल्पपरिकर्म सपरिकर्म वा गृह्णाति । यथाकृतालाभे वा अल्पपरिकर्मणो योगमकृत्वा परथमत एव 'तयोः' अल्पपरिकर्म-सपरिकर्मणोर्मध्ये 'चरमम्' अन्त्यं सपरिकर्म गृह्णाति । तस्यैतेषु त्रिषु स्थानेषूत्कृष्ट-मध्यम-जघन्यान्यधिकृत्य यथाक्रमं प्रायश्चित्तम । तद्यथा-उत्कृष्टे त्रिषु स्थानकेषु त्रयश्चतुर्लघवः, मध्यमे त्रीणि मासिकानि, 'अन्तिमे' जघन्ये त्रीणि पञ्चरात्रिन्दिवानि । अत्र च भावना पूर्वगाथायां कृतेति न भूयो भाव्यते ॥ उक्तं यथाकृतादिविपर्यासग्रहणे प्रायश्चित्तम् । सम्प्रत्युत्कृष्टादिविषये विपर्यासेन ग्रहणे करणे च तदाह-

[भा.६०८] एगयरनिग्गो वा, अन्नं गिण्हिज्ज तत्थ सट्ठाणं ।
छित्तूण सिव्विऊण व, जं कुणइ तगं न जं छिंदे ॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

वृ- जघन्यादीनामेकतरस्यार्थाय निर्गतो वाशब्दो वैपरीत्यस्य प्रकारान्तरद्योतने 'अन्यत्' येन न प्रयोजनं तद् गृह्णीयात् तत्र स्वस्थानप्रायश्चित्तम्। तद्यथा-उत्कृष्टस्य निर्गतो मध्यमं गृह्णाति मासिकम्, जघन्यं गृह्णाति पञ्चकम्; मध्यमस्य निर्गत उत्कृष्टं गृह्णाति मासलघु; तथाऽऽज्ञा-भङ्गादयश्च दोषाः। यत् तेन विवक्षितवस्त्रेण कार्यं तस्यान्येनाप्रतिपूरणम्। जघन्येन प्रयोजने समापतिते मध्यमोत्कृष्टयोर्गृह्यमाणयोरतिरिक्तोपकरणदोषः। तथोत्कृष्टादिकं छित्वासीवित्वा वा यद् मध्यमादिकं करोति "तगं"ति तन्निष्पन्नं प्रायश्चित्तम्, न पुनर्यच्छिनत्ति तन्निष्पन्नम्। तथाहि-उत्कृष्टं छित्वा ,मध्यमं करोति मासलघु, जघन्यं करोति पञ्चकम्; मध्यमं छित्वा सीवित्वा चोत्कृष्टं करोति चतुर्लघु, जघन्यं करोति पञ्चकम्; जघन्यं सीवित्वा उत्कृष्टं करोति चतुर्लघु, मध्यमं करोति मासलघु इति। एवं यत् करोति तन्निष्पन्नमेव प्रायश्चित्तमापद्यते, न पुनश्छिद्यमान-सीव्यमानवस्त्रंनिष्पन्नम्। अत्राप्याज्ञाभङ्गादयो दोषा द्रष्टव्याः। नवरं विराधना द्विधा-संयमविराधना आत्मविराधना च। संयमविराधना वस्त्र छिद्यमाने सीव्यमाने वा तद्गताः षट्पदिकादयो विनाशमापद्यन्ते। आत्मविराधना हस्तोपघातादिका। तथा यावद् वस्त्र छिद्यते सीव्यते वा तावत् सूत्रा-ऽर्थपरिमन्थ इत्यादयो दोषा अभ्यूह्य वक्तव्याः। यत एवं दोषजालमुपढौकते ततः कारणाभावे छेदन-सीवनादि न कर्त्तव्यम्। कारणे तु यतनया कुर्वाणः शुद्धः॥ अथ वस्त्रस्य गवेषणे कति प्रतिमा गच्छवासिनाम्? कति गच्छनिर्गतानाम्? इत्यत आह-

[भा.६०९] उद्दिसिय पेह अंतर, उज्झियधम्मे चउत्थए होइ।
चउपडिमा गच्छ जिने, दोण्हऽग्गहऽभिग्गहऽन्नयरा॥

वृ- इह यद् वस्त्र गुरुसमक्षम् 'उद्दिष्टं' प्रतिज्ञातं यथा 'अमुकं जघन्यं मध्यममुत्कृष्टं वा आनेष्ये' तदेव गृहिभ्यो याचमानस्योद्दिष्टवस्त्रमिति प्रथमा प्रतिमा। तथा "पेह"त्ति प्रेक्षा अवलोकनं तत्पुरस्सरं यद् वस्त्र याच्यते तत् प्रेक्षावस्त्रम्। तथाऽभिनवं वस्त्रयुगलं परिधाय प्रावृत्य च पुरातनं स्थापयितुकामो न तावदद्यापि स्थापयति इत्यत्र अन्तराले यद् याच्यते तदन्तरावस्त्रम्। तथा उज्झनम्-उज्झितं परित्याग इत्यर्थः, धर्मशब्दश्च यद्यपि-

"धर्मो पमोपमा-पुण्य-स्वभावा-ऽऽचार-धन्वसु॥
सत्सङ्गेऽर्हत्यहिंसादौ, न्यायोपनिषदोरपि।"

इति वचनादनेकेष्वर्थेषु रूढः तथाऽपीह प्रकमात् स्वभावार्थो द्रष्टव्यः, तत उज्झितमेव धर्म-स्वभावो यस्य तदुज्झितधर्मं परित्यागार्हमित्यर्थः। एतच्च वस्त्रैषणासूत्रक्रमप्रामाण्यात् चतुर्थमेव चतुर्थकं भवति। एताश्चतस्रः 'प्रतिमाः' प्रतिपत्तयो वस्त्रस्य ग्रहणप्रकारा इत्यर्थः, "गच्छ"त्ति सूचकत्वात् सूत्रस्य गच्छवासिनामेताश्चतस्रोऽपि भवन्ति। "जिने"त्ति जिनकल्पिकानां यावज्जीवं द्वयोरुपरितनयोः आङ्-मर्यादया ग्रहः-स्वीकार आग्रहः, द्वयोरेवोपरितनयोर्ग्रहणं नाधस्तन-योर्द्वयोरित्यर्थः। तत्राप्यन्यतरस्यामभिग्रहः, किमुक्तं भवति?-यदा तृतीयस्यां ग्रहणं न तदा चतुर्थ्यामं, यदा चतुर्थ्यां न तदा तृतीयायामिति निर्युक्तिगाथासमासार्थः॥

अथैनामेव विवृणोति-

[भा.६१०] उद्दिट्ठ तिगेगयरं, पेहा पुन दट्ठु एरिसं भणइ।
अन्न नियत्थऽत्थुरिए, इतरऽवणिंतो उ तइयाए॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

वृ- 'उद्दिष्टं' गुरुसमक्षं प्रतिज्ञातं यद् जघन्य-मध्यमोत्कृष्टक्षणस्य त्रिकस्य एकेन्द्रिय-विकलेन्द्रियपञ्चेन्द्रियनिष्पन्नवस्त्रत्रिकस्य वा एकतरम् तदेवाद्दष्टं सद् याच्यमानमुद्दिष्टमिति भाविता प्रथमा प्रतिमा। अथ द्वितीया भाव्यते-"पेहा पुण" त्ति प्रेक्षावस्त्रं पुनरिदम्, यथा-कोऽपि साधुः कस्याप्यगारिणः सत्कं वस्त्र द्दष्ट्वा भणति-'याद्दशमेतद् वस्त्र द्दश्यते ताद्दशमिदमेव वा मे प्रयच्छ' इति भणन् तदेव वस्त्र हस्तप्रान्तेन दर्शयति तत् प्रेक्षावस्त्रमिति द्वितीया प्रतिमा। सम्प्रति तृतीया भाव्यते-तस्याश्चान्तरीयोत्तरीयवस्त्रयुगलद्वारेण प्ररूपणा कर्त्तव्या। तथा च श्रीमद्‌आचाराङ्गे द्वितीये श्रुतस्कन्धे प्रथमेऽध्ययने प्रथमोद्देशके सूत्रमिदम्-

अहावरा तच्चा पडिमा-से भिक्खू वा भिक्खुणी वा से जं पुण वत्थं जाणेज्जा, तंजहा-अंतरिज्जगं वा उत्तरिज्जगं वा। अथ किमिदमन्तरीयम् ? किं वा उत्तरीयम् ? उच्यते-अन्तरीयं नाम निवसनं परिधानमित्यर्थः, उत्तरीयं नम प्रावरणं प्रच्छदपटीत्यर्थः; अथवाऽन्तरीयं यत् शय्यायामधस्तनं वस्त्रमास्तीर्यते, उत्तरीयं पुनर्यत् तदुपरि प्रस्तीर्यते। तस्मिन्नन्तरीयोत्तरीयवस्त्रयुगले 'अन्यस्मिन्' अभिनवे "नियत्थ" त्ति निवसिते परिहिते प्रावृते वेत्यर्थः। द्वितीयव्याख्यानापेक्षया शय्याया उपरि "अत्थुरिइ" त्ति आस्तीर्णे 'इतरत्' पुराणमन्तरीयोत्तरीययुगलम् 'अपनयन्' स्थापयितुमना इत्यत्रान्तरा यद् मार्ग्यते तदन्तरावस्त्रमिति तृतीया प्रतिमा॥

सम्प्रति चतुर्थी व्याख्यानयति-

[भा.६११] दव्वाइ उज्झियं दव्वओ उ थूलं मए न घेत्तव्वं।
दोहिवि भावनिसिट्ठं, तमुज्झिओभट्ठऽनोभट्ठं॥

वृ- इह चतुर्थी प्रतिमा-उज्झितधर्म वस्त्र गवेषणीयम्, तच्च चतुर्द्धा-द्रव्योज्झितं आदिशब्दात् क्षेत्र-काल-भावोज्झितपरिग्रहः। तत्र द्रव्योज्झितं यथा-केनचिदगारिणा प्रतिज्ञातं 'मया स्थूलं वस्त्र न ग्रहीतव्यम्" अन्यदा तस्य तदेव केनापि वयस्यादिनोपढौकितम्, स च ब्रूते- 'पर्याप्तं ममैतेन, नाहं गृह्णामि' इतरोऽपि ब्रूते-'ममाप्यलमेतेन, नाहमात्मना दत्तं पुनः स्वीकरोमि' इत्येवं द्वाभ्यामपि दायक-ग्राहकाभ्यां भावतः-परमार्थतो निसृष्टं-परित्यक्तम्, अमुष्मिन् देश-काले यदि जिनकल्पिकादि साधुरवभाषितमनवभाषितं वा लभेत तद् द्रव्योज्झितं ज्ञातव्यम्। इह चावभाषितं याचितमनभाषितं याञ्चां विना स्वयमेव ताभ्यां प्रदत्तम्॥ अथ क्षेत्रोज्झितमाह-

[भा.६१२] अमुगिच्चगं न भुंजे, उवनीयं तं च केणई तस्स।
जं वुज्झे कप्पडिया, सदेस बहुवत्थ देसे वा॥

वृ- "अमुकिञ्चमं" अमुकदेशोद्‌भवं वस्त्रं 'न भुञ्जे' न परिधान-प्रावरणोपभोगमानयामि, यथा- 'लाटविषयोद्‌भवं वस्त्रं मया न परिभोक्तव्यम्' इति केनचित् प्रतिज्ञा कृता भवेत्, अथ कदाचित् तस्य "तं च" त्ति चशब्दस्यावधारणार्थत्वात् तदेव 'उपनीतम्' उपढौकितं केनचित्, ततः पूर्वोक्तनीत्या ताभ्यामुभाभ्यामपि परित्यक्तं क्षेत्रप्राधान्यविवक्षया क्षेत्रोज्झितं ज्ञातव्यम्। "जं वुज्झे कप्पडिय" त्ति वाशब्दः प्रकारान्तरोपदर्शने, प्रकारान्तरेण क्षेत्रोज्झितं प्ररूप्यते इत्यर्थः। यद् वस्त्रंजातम् 'उज्झेयुः' परित्यजेयुः कार्पटिकाः स्वदेशं प्रति व्यावृत्याऽऽगच्छन्तः स्वदेशाद्वा देशान्तरं प्रस्थिता अपान्तराले बह्वपायामरण्यानीं मत्वा 'किं तस्कराणां हेतोर्निरर्थकं वस्त्रभारं वहामः ?' इति कृत्वा यदुज्झन्ति यद्वा 'बहुवस्त्रे' वस्त्रंप्रचुरे देशेऽन्यत् सुन्दरतरं वस्त्रं लब्ध्वा

Jain Education International For Private & Personal Use Only www.jainelibrary.org

पुरातनं रिहरेयुः एतत् सर्वमपि क्षेत्रोज्झितम् ॥ कालोज्झितमाह-

[भा.६१३] कासाइमाइ जं पुव्वकालजोग्गं तदननिहिं उज्झे।
होहिइ व तस्सकाले, अजोग्गयमणागयं उज्झे ॥

वृ- कषायेण रक्ता काषायी-गन्धकाषायिकेत्यर्थः, साहि स्वभावत एवातिशीतला ग्रीष्मर्तुभरएऽपि सकलसन्तापनिर्वापिणी शास्त्रेषु पठ्यते; यत उक्तम्-

सरसो चंदनपंको, अग्घइ सरसा य गंधकासाई।
पाल सिरीस मल्लिय, पियाइँ काले निदाहम्मि ॥

वृ-आदिग्रहणेन शीतकालोचितवस्त्रपरिग्रहः। ततश्च काषाय्यादिकं यद् वस्त्र पूर्वस्मिन् ग्रीष्मादौ काले योग्यम्-उपयोगि तद् 'अन्यस्मिन्' वर्षाकालादौ 'उज्झेत्' परित्यजेत्। इयमत्र भावना-गन्धकाषायिकादिकं शीतवीर्यवस्त्रं यत् केनापि श्रीमता ग्रीष्मे परिभुज्यते तदेव वर्षास्वनुपयोगित्वात् परिह्रियते, तत् तथापरिह्रियमाणं कालोज्झितम्, एवमुष्णवीर्यादिष्वपि भावना कार्या। अथ प्रकारान्तरेणैतदेवाह-"होहिइ व" इत्यादि। भविष्यति वा गन्धकाषायिकादिकमेव एष्यति-आगामिनि काले-वर्षादावयोग्यमित्यभिसन्धाय 'अनागतं' वर्षाकालादर्वागेव यदुज्झेत् तदपि कालोज्झितम् ॥ अथ भावोज्झितमाह-

[भा.६१४] लद्धूण अन्न वत्थे, पोराणे सो उ देइ अन्नस्स।
सो वि अ निच्छइ ताइं, भावुज्झियमेवमाईयं ॥

वृ- कोऽपि कस्यापि पार्श्वे 'लब्ध्वा' प्राप्य 'अन्यानि' अभिनवानि वस्त्राणि ततः स पुराणानि 'अन्यस्य' कस्यचिद् ददाति, सोऽपि च 'तानि' दीयमानानि जीर्णानीति कृत्वा नेच्छति तदेतद् भावं-जीर्णतापर्यायमाश्रित्योज्झितं भावोज्झितमेवमादिकं ज्ञातव्यम्। तदेवं समर्थिता तुरीयाऽपि प्रतिमा ॥ "गच्छवासिनश्चतसृभि प्रतिमाभिर्वस्त्रं गवेषयन्ति" इत्युक्तम्, तत्र परः प्रश्नयति-कया सामाचार्या ते गवेषयन्ति ? इत्युच्यते-

[भा.६१५] जं जस्स नत्थि वत्थं, सो उ निवेएइ तं पवत्तिस्स।
सो वि गुरूणं साहइ, निवेइ वावारए वा वि ॥

वृ- 'यद्' वर्षाकल्पा-ऽन्तरकल्पादिकं 'यस्य' साधोः 'नास्ति' न विद्यते वस्त्रं सः 'तद्' विवक्षितवस्त्रभावस्वरूपं निवेदयति 'प्रवर्त्तिनः' प्रवर्त्तकाभिधानस्य तृतीयपदस्थगीतार्थस्य। स हि सकलस्यापि गच्छस्य चिन्तानियुक्तः, सर्वेऽपि साधवः स्वं स्वं प्रयोजनं तस्याग्रे निवेदयन्ति। ततः 'सोऽपि' प्रवर्त्तकः 'गुरूणाम्' आचार्याणां "साहइ" त्ति कथयति विज्ञपयतीत्यर्थः, यथा-भट्टारकाः ! नास्त्यमुकस्य साधोरमुकं वस्त्रमिति। गच्छे चेयं सामाचारी-यदुताऽऽभिग्रहिका भवन्ति, आभिग्रहिका नाम 'अस्माभिः सकलस्यापि गच्छस्य वस्त्राणि वा पात्राणि वा पूरणीयानि अपरेण वा येन प्रयोजनम्' इति प्रतिपन्नाभिग्रहाः, तेषामाचार्यो निवेदयति, यथा-आर्या ! नास्त्यमुकस्यामुकं वस्त्रम्। तेऽपि 'अनुग्रहोऽयमस्माकम्' इत्यभिधाय स्वाभिग्रहपरिपालनाय स्वयमेवोत्पादयन्ति। अथ न सन्त्याभिग्रहिकाः ततः स यदि वस्त्रार्थी साधुः स्वयमसमर्थ उत्पादयितुं ततोऽन्यं वस्त्रोत्पादनसमर्थं गुरवो व्यापारयेयुः, यथा-वस्त्राणि गवेषय। वाशब्दः पक्षान्तरद्योतने। 'अपि' सम्भावनायाम् ॥ तत्राभिग्रहिकेण व्यापारितेन वा केन विधिना वस्त्रमुत्पादयितव्यम् ?

Jain Education International For Private & Personal Use Only www.jainelibrary.org

उच्यते-

[भा.६१६] भिक्खं चिय हिंडंता, उप्पायंतऽसइ बिइअ पढमासु ।
एवं पि अलब्भंते, संघाडेक्केक वावारे ॥

वृ-सूत्रपौरुषीमर्थपौरुषीं च कृत्वा भिक्षामेव हिण्डमाना वस्त्रमुत्पादयन्ति । अथ भिक्षामटन्तो न लभेरन् ततः 'असति' इत्यलाभे द्वितीयस्यां पौरुष्यामर्थग्रहणं हापयित्वा, तस्यामप्यलाभे 'प्रथमायां' सूत्रपौरुष्यामुत्पादयन्ति । अथैकः सङ्घाटकः पर्यटन् न लभेत बहूनां वा साधूनामुत्पादनीयानि ततः को विधि ? इत्याह-'एवमपि' सूत्रपौरुषीहापनेऽप्येकसङ्घाटकेनालभ्यमाने बहूनां चोत्पादयितव्ये सङ्घाटकमेकैकं व्यापारयेत् । तेऽपि तथैव याचन्ते "भिक्खं चिअ हिंडंता" इत्यादि । अथ तथापि न प्राप्नुयुस्ततः "वृन्दसाध्यानि कार्याणि" इति वचनाद् वृन्देन पर्यटन्ति॥

आह च-

[भा.६१७] एवं पि अलब्भंते, मुत्तूण गणिं तु सेसगा हिंडे ।
गुरुगमणे गुरुग ओहामऽभियोगो सेहहीला य ॥

वृ- 'एवमपि' बहुभि सङ्घाटकैरप्यलभ्यमाने 'गणिनम्' आचार्यमेकं मुक्त्वा शेषाः सर्वेऽपि वृन्देन हिण्डन्ते । यदि गुरवः स्वयमेव पर्यटन्ति तदा तेषां गुरूणां गमने चत्वारो गुरुकाः । "ओहामि"त्ति 'यद्यमी आचार्या अपि सन्त एवमितरभिक्षुवत् पर्यटन्ति नूनमेतेषामाचार्यत्वमपीद्दशमेव' इति महती गुरूणामपभ्राजना भवेत् । तथा काचिदविरतिका सर्वाङ्गीणलावण्यश्रियाऽलङ्कृतमाचार्यमवलोक्य मदनपरवशा सती "अभियोग"त्ति कार्मणं कुर्यात् अन्यतीर्थिका वा आचार्याणां प्रतापमसहमाना विषप्रयोगं प्रयुञ्जीरन् । अवभाषितेषु वा वस्त्रेष्वलब्धेषु शैक्षाणामाचार्यविषया हीला स्यात्-दृष्टा आचार्याणां लब्धि, स्वयमपि याचमानाश्चीवराण्यपि न लभन्ते । यस्मादेते दोषास्तस्मादाचार्यैर्न पर्यटनीयं शेषाः सर्वेऽपि पर्यटन्ति ॥

[भा.६१८] सव्वे वा गीयत्था, मीसा व जहन्न एक्कु गीयत्थो ।
इक्कस्स वि असईए, करिंति तो कप्पियं एक्कं ॥

वृ- ते च वृन्देन पर्यटन्तः सर्वेऽपि गीतार्था भवेयुः मिश्रा वा । मिश्रा नाम केचन गीतार्थाः केचनागीतार्थाः । तत्र यदि बहवो गीतार्था न प्राप्यन्ते तदा जघन्यत एको गीतार्थः सर्वेषामगीतार्थानामग्रणीभूय पर्यटति । अथ नास्त्याचार्यं मुक्त्वाऽपरः कोऽपि गीतार्थ तत एकस्यापि गीतार्थस्य 'असति' अभावे यः प्रगल्भः सलब्धिकश्च तमेकं वस्त्रैषणामुत्सर्गापवादसहितां कथयित्वा कल्पिकं कुर्वन्ति गुरव इति ॥ अथ तैः केन विधिना गन्तव्यम् ? उच्यते-

[भा.६१९] आवाससोहि अखलंत समग उस्सग्ग दंडग न भूमी ।
पुच्छा देवय लंभे, न किंपमाणं धुवं दाहि ॥

वृ- इह समयपरिभाषया कायिकी-संज्ञाव्युत्सर्जनमवश्यं क्रियत इति व्युत्पत्तेरावश्यकमभिधीयते, तस्य शोधि-शोधनं कार्यम्, वस्त्राणामत्पादनाय गतानां भविष्यति न वेति प्रथममेवाऽऽवश्यकं शोधनीयमित्यर्थः । "खलंत"त्ति उत्तिष्ठतां पादयोः शिरसि वा स्खलनं यथा न भवति तथोत्थातव्यम्; यद्वा गुरुवचनमस्खलद्भिः-अविकुट्टयद्भिरुत्थातव्यम् । "समग"त्ति सर्वैरपि समकमुत्थानं कर्त्तव्यम्, नपुनरेके उत्थिताः प्रतीक्षन्ते अन्येऽद्याप्युपविष्टाः; अथवा समकं

Jain Education International For Private & Personal Use Only www.jainelibrary.org

सर्वैरुपयोगसम्बन्धी भूमौ स्थापयितव्याः। अपरे पुनर्यावद् व्यावृत्य न प्रतिश्रयमागताः तावदिति ब्रुवते। "पुच्छ"त्ति शिष्यः पृच्छति-किंनिमित्तं कायोत्सर्ग क्रियते ? किं देवताऽऽराधनार्थं यदसावाराधिता सती वस्त्राण्युत्पादयति ? आहोश्वित् कायोत्सर्गप्भावादेव वस्त्राणां भूयान् लाभो भूयादिति लाभनिमित्तम् ? । अत्र सूरि प्रत्युत्तरयति-"न"त्ति न भवति देवताऽऽराधननिमित्तं न वा लाभनिमित्तं किन्तूपयोगनिमित्तम्, उपयोजनमुपयोगः चिन्ता विमर्श इत्यनर्थान्तरम्, स च गणनाप्रमाणेन प्रमाणप्रमाणेन वा किंप्रमाणं वस्त्रं ग्रहीतव्यम् ? को वा याचितः सन् 'ध्रुवम्' अवश्यं दास्यति ? । यो ज्ञायते निश्चितमेष दास्यति स एव प्रथमं याच्यते ॥

अथ प्रथमं कायोत्सर्ग केनोत्सारणीयः ? इत्युच्यते-

[भा.६२०] रायणिओ उस्सारे, तस्सऽसतोमो वि गीतो लद्धीओ।
अग्गीतो वि सलद्धी,मग्गइ इअरे परिच्छंति ॥

वृ- यः 'रात्निकः' रत्नाधिकः सोऽपि यदि सलब्धिकस्तदा स एव प्रथमं कायोत्सर्गम् 'उत्सारयति' पारयति। 'तस्य' रत्नधिकस्य सलब्धिकस्य 'असति' अभावे 'अवमोऽपि' पर्यायलघुरपि गीतार्थो यः सलब्धिकः स प्रथमं पारयति। अथ नास्ति गीतार्थ सलब्धिकस्तत आह-अगीतार्थोऽपि यः सलब्धिकः स प्रथमं पारयति, स एव चाग्रणीत्वं कुर्वन् वस्त्राणि मार्गयति। 'इतरे' गीतार्था 'परीक्षन्ते' किं कल्पते ? न वा ?' इत्येवं पृष्ठतो लग्ना वस्त्रैषणाविधिं विचारयन्तीत्यर्थः ॥ अनन्तरोदितसामाचारीवैतथ्यकरणे प्रायश्चित्तमाह-

[भा.६२१] उस्सग्गाई वितहं, खलंत अन्नोन्नओ अ लहुओ उ।
उग्गम विप्परिणामो, ओभावण सावगं न तओ ॥

वृ- उत्सर्गः-कायोत्सर्गस्तमादिं कृत्वा सर्वेषु पदेषु सामाचारीं वितथां कुर्वाणस्य लघुमासः प्रायश्चित्तम्। तद्यथा-कायोत्सर्गं न कुर्वन्ति, आवश्यकं न शोधयन्ति, यमकसमकं कायोत्सर्गं न कुर्वन्ति, दण्डकं भूमौ लगयन्ति, पृथक् पृथग् गुरूणामादेशं मार्गयन्ति, 'इच्छाकारेण संदिसह'त्ति न भणन्ति, आचार्या 'लाभो'त्ति न भणन्ति, साधवः 'किह गिण्हामो'त्ति न भणन्ति, आचार्या 'जह गहियं पुव्वसाहूहिं'ति न भणन्ति, साधवः 'जस्स य जोगं'ति न भणन्ति, एतेषु सर्वेषु असामाचारीनिष्पन्नं मासलघु। आवश्यकी न कुर्वन्ति लघु रात्रिन्दिवपञ्चकम्। "खलंत"त्ति स्खलन्त उत्तिष्ठन्ति गुरुवचनंवा स्खलयन्ति मासलघु। "अन्नन्नउ"त्ति अन्यतश्चान्यतश्च व्रजन्ति न परस्परमेकया ऋजुश्रेण्या तत्रापि लघुको मासः। इत्थं सामाचारीं सम्पूर्णां कृत्वा यदि निर्गताः श्रावकमवभाषन्ते मासलघु, यतस्तस्मिन्नवभाष्यमाणे बहवो दोषाः। तानेवाह-"उग्गम" इत्यादि। कोऽपि श्रावकः साधुभिर्वस्त्रं याचितः स चिन्तयति-

'अहो ! अमी महात्मानस्तावद् यतस्ततः कारणं विना न वस्त्राणि याचन्ते न वा गृह्णन्ति, मद्भाग्यसम्भारप्रेरिता एव सन्तोषपोषितवपुषोऽपि मामित्थं याचन्ते, तत् परयच्छामि यथेच्छममीषां वस्त्राणि, मम पुनरन्यान्यपि भविष्यन्ति' इति परिभाव्य सर्वाण्यपि हर्षप्रकर्षारूढः प्रदद्यात्, ततोऽभिनववस्त्रनिर्मापण-क्रयणादिनोद्गमदोषा भवेयुः। विपरिणामो वा नवधर्मणः कस्यचिदुपासकस्य स्यात्, यथा-हुं ज्ञातममीषां श्रमणानां रहस्यम्, य एतेषामुपासको भवति

Jain Education International For Private & Personal Use Only www.jainelibrary.org

तमेवमेव याच्ञाभिरुद्वेजयन्तीति, ततश्च धर्मं प्रति वप्रतिपद्येत। यद्वा "ओभावण"त्ति अपभ्राजना भवेत्। इयमत्र भावना-तस्य श्रावकस्य कदाचिद् वस्त्राणि न भवेयुः ततो मिथ्यादृष्टयो ब्रवीरन्-अहो! अमीषां प्रतिबोधप्रसादः, यद् एतद्योग्यान्येतदीयोपासकानां वस्त्राणि न सम्पद्यन्ते; लोको वा ब्रूयात्-यद्येतेषां स्वकीया अपि श्रावका न प्रयच्छन्ति तदाऽन्यः को नाम दास्यति? इति। ततः श्रावकं नावभाषेत॥

[भा.६२२] दाउं व उड्डुरुस्से, फासुव्वरियं तु सो सयं देइ।
भावियकुलओभासण, नीणिइ कस्सेअ किं आसी॥

वृ-स श्रावको लोकलज्जया तदानीं दत्त्वा वा "उड्डुरुसे"त्ति प्रद्वेषं यायात्-किमेतैरेतदपि न ज्ञातं श्रावकस्य यद् वस्त्रादि स्वाधीनं तदयाचितमेव ददाति? किं तेन याचितेन? अतः परं न गच्छाम्यमीषां सकाशमिति। यत एते दोषास्ततः श्रावकं नावभाषेतेति पूर्वगाथाया अन्त्यपदेन सम्बन्धः। यस्मादुपासकस्यैषा सामाचारी-यत् 'प्राशुकम्' एषणीयम् 'उद्वरितम्' अधिकं वस्त्रं तत् 'स्वयमेव' अयाचितोऽपि निमन्त्रय ददाति। तेन तं मुक्त्वा यान्यन्यानि भावितानि साधुसंसर्गवासितानि सम्यक्त्वाद्यव्युत्पन्नमतीनि यथाभद्रकाणि कुलानि तेष्वेवावभाषणं कर्त्तव्यम्। कथम्? इति चेद् उच्यते-तत्र यः प्रमाणभूतः पुरुषस्तं धर्मलाभयित्वा ब्रुवते-श्रावक! साधवस्तव सकाशमागताः सन्ति,प्रयोजनस्माकमीदृशैर्वस्त्रैरिति। यदि पुनः 'धन्यस्त्वम्, श्लाध्यं ते जन्म जीवितम्, अनर्ध्य सुपात्राय वस्त्रपात्रादिदानम्' इति तद्गुणविकत्थन-वस्त्रदानफलोत्कीर्त्तनादि करोति तदा मासलघु। ततः स याच्यमान एवं ब्रूयात्-'अहो! मे धन्यता यस्य गृहाङ्गणं जङ्गमा इव कल्पपादपा अमी भगवन्तः स्वपादपल्लवैः पवित्रितवन्तः' इत्यभिधाय स्वयमन्येन वा गृहमध्याद् वस्त्रमानयेद् आनाययेद्वा। ततस्तस्मिन् 'नीणिइ'त्ति आनीते पृच्छ्यते-कस्यैतद् वस्त्रम्? किं वा आसीत्? उपलक्षणत्वात् किं भविष्यति? क च स्थापितमासीत्? । यदि 'कस्यैतद्?' इति न पृच्छन्ति तद मासिकम्॥ अथ को दोषो यद्येवं न परिपृच्छयते? उच्यते-

[भा.६२३] कास त्तऽपुच्छियम्मी, उग्गम-पक्खेवगाइणो दोसा।
किं आसऽपुच्छियम्मी, पच्छाकम्मं पवहणं व॥

वृ- 'कस्य सम्बन्धि?' 'इति' एवमपृष्टे उद्गमदोषाः प्रक्षेपकादयश्च दोषा भवेयुः, आदिग्रहणान्निक्षेपकपरिग्रहः। 'किमासीद्?' इत्यपृष्टे पश्चात्कर्मदोषः प्रवहणदोषो वा सम्भवेत्। एतच्चोत्तरत्र भावयिष्यते॥ अथ 'कस्य' इति पृच्छायामविधीयमानायां कथमुद्गमदोषा भवेयुः? उच्यते-

[भा.६२४] कीस न नहिह तुब्भे, तुब्भट्ठ कयं व कीय-धोयाई।
अमुएण व तुब्भट्ठा, ठवियं गेहे न गिण्हह से॥

'कस्येदम्?' इति पृष्टः कोऽपि ब्रूयात्-कस्मान्न ज्ञास्यथ यूयम्? ज्ञास्यथै, तथाप्यस्मान् पृच्छथ, पृच्छतां च कथयामः-युष्मदर्थमेव कृतमेतद् वस्त्रम्, वाशब्द उत्तरापेक्षया विकल्पार्थः, युष्मदर्थमेव क्रीतं धौतम्, आदिशब्दाद् धूपित-वासितादिपरिग्रहः। अमुकेन वा युष्मदर्थमस्मद्गृहे स्थापितम्, यतः 'से' तस्यामुकस्य गेहे न गृह्णीथ यूयमिति॥ अथ यदुक्तं "तुब्भट्ठ कयं" ति तत्र मूलगुणकृतं वा स्यादुत्तरगुणकृतं वा। अथ के मूलगुणाः? के चोत्तरगुणाः? इत्याह-

Jain Education International For Private & Personal Use Only www.jainelibrary.org

[भा.६२५] तन विनन संजयट्ठा, मूलगुणा उत्तरा उ पज्जणया।
गुरुगा गुरुगा लहुगा, विसेसिया चरिमए सुद्धो ॥

वृ- इह संयतार्थं वस्त्रनिष्पत्तिहेतोर्यत् 'तननं' तानपरिकर्म 'वितननं च' वानपरिकर्म क्रियते एतौ मूलगुणौ मन्तव्यौ। 'उत्तरा' उत्तरगुणरूपा 'पायनता' यद् वस्त्रं निष्पन्नं सत् खलिकां पाय्यते, उपलक्षणमिदम्, तेन यद् मोटयित्वा सलेषु प्रक्षिप्यते, तदादयो धावन-धूपनादयश्च वस्त्रस्योत्तरगुणा द्रष्टव्याः। अत्र चतुर्भङ्गी-तनन-वितनने संयतार्थं पायनमपि संयतार्थम् १, तनन-वितनने संयतार्थं पायनं स्वार्थम् २, तनन-वितनने स्वार्थं पायनं संयतार्थम् ३, तनन-वितनने स्वार्थं पायनमपि स्वार्थम् ४। अत्राद्येषु त्रिषु गुरुका गुरुका लघुकाश्च तपः-कालाभ्यां विशेषिताः प्रायश्चित्तम्। तद्यथा-प्रथमे भङ्गे चत्वारो गुरुकास्तपसा कालेन च गुरवः, द्वितीयेऽपि चतुर्गुरुकाः तपसा गुरवः कालेन लघवः, तृतीये चत्वारो लघुकाः कालेन गुरुवस्तपसा लघवः। "चरमए सुद्धु" त्ति 'चरमे' चतुर्थे भङ्गे द्वयोरपि मूलोत्तरगुणयोः स्वार्थत्वाच्छुद्धः ॥

अथ प्रक्षेपकादयो दोषा; कथं भवेयुः ? इत्यत आह-

[भा.६२६] समणे समणी सावग, साविग संबंधि इड्डि मानाए।
राया तेने पक्खेवए अ निक्खेवगं जाणे ॥

वृ- षष्ठी-सप्तम्योरर्थं प्रयभेदात् श्रमणस्य श्रमण्याः श्रावकस्य श्राविकायाः सम्बन्धिन ऋद्धिमतो मामाकसत्काया भार्याया राज्ञः स्तेनस्य च सम्बन्धी प्रक्षेपको भवति। प्रक्षेपणं प्रक्षेपकः नाचि मंसि च इति भावे णकप्रत्ययः, यथा अरोचनं अरोचक इत्यादि। निक्षेपक मप्येतेष्वेव स्थानेषु जानीयादितिस ङ्ग्रहगाथा समासार्थः साम्प्रतमेनामेव व्याख्यानयति-

[भा.६२७] लिंगत्थेसु अकप्पं, सावग-नीएसु उग्गमासंका।
इड्डि अपवेस साविग, इड्डिस्स व उग्गमासंका ॥

वृ- ये श्रमण-श्रमणीजना लिङ्गमात्रधारिणस्ते उद्गमादिभिर्दोषैरशुद्धानि वस्त्राणि गृह्णन्ति स्वयमेव वा तन्तुवायैर्वाययन्ति, लिङ्गतः प्रवचनतोऽपि साधर्मिकाश्च ते इति तेषु लिङ्गस्थेषु 'अकल्प्यम्' अकल्पनीयमिति हेतोः साधवो न गृह्णन्ति, ततस्ते लिङ्गस्थाः संविग्नबहमानिनः सन्तो वस्त्राण्यन्यत्र यथाभद्रककुलादौ प्रक्षिपेयुः 'यदि साधवो वस्त्राणि गवेषयेयुः तदा प्रददध्वम्' इति कृतवा। तथा श्रावकेषु उपलक्षणत्वात् श्राविकासु निजकेषु-सम्बन्धिषु भ्रातृ-भगिन्यादिषु उद्गमदोषाशङ्कया साधवो न गृहीयुरिति तेऽपि तथैवान्यत्र स्थापयेयुः। 'ऋद्धिमतः श्रेष्ठि-सार्थवाहादेर्गृहे यतस्ततः प्रवेशो न लभ्यन्ते, तस्य पत्नी श्राविका, सा भक्तिवशादन्यत्र प्रक्षिपेत्; यद्वा स ऋद्धिमान् पाषण्डिनां श्रमणानां वा पुण्यार्थं वस्त्राणि दद्यात् तेषु साधूनामुद्गमाशङ्का, ततो निमन्त्रिता अपि न स्वीकुर्यु तेन सोऽपि दानश्रद्धालुस्तथैवान्यत्र प्रक्षिपेत् ॥

[भा.६२८] एमेव मामगस्स वि, सड्डी मज्जा उ अन्नहिं ठवए।
निव तप्पिंडविवज्जी, मा होज्ज तदाहडं तेणे ॥

वृ- 'एवमेव' ऋद्धिमत्प्रकारेणैव 'मामाकस्यापि' 'प्रान्तत्वेनेर्षालुत्वेन वा कस्यापि स्वगृहे प्रवेशं न ददाति' इत्येवंलक्षणस्य भार्या श्राद्धिका भक्तिभर्रेरिता सती तथैवान्यस्मिन् गृहे स्थापयेत्। 'नृपः' राजा सोऽप्यन्यत्र स्वपुरुषैः प्रक्षेपयेत्, यतस्तस्य-राज्ञः पिण्डम्-आहार-वस्त्रादिलक्षणं

Jain Education International For Private & Personal Use Only www.jainelibrary.org

वर्जितुं शीलं येषां ते तत्पिण्डविवर्जिनः साधवः। किमुक्तं भवति? -कोऽपि राजा स्वभावत एव भद्रकः श्रावकोवा, ततः साधवोऽत्यर्थःमभ्यर्थिता अपि 'न कल्पते राजपिण्डः' इति हेतोर्यदा न गृह्णान्ति तदा सः 'यथा तथा पुण्यमुपार्जयामि' इति विचिन्त्यान्यत्र वस्त्राणि स्थापयेत्। स्तेनस्यापि वस्त्रं न गृह्णन्ति, मा भूत् 'तदाहृतं' स्तेनाहृतं तदीयं वस्त्रमिति, ततः सोऽपि संयतभद्रकः 'मदीयं न स्वीकुर्वन्ति' इत्यन्यत्र प्रक्षिपेत्॥ उपसंहारमाह-

[भा.६२९] एए उ अधिप्पंते, अन्नहि सन्निक्खिवंति समणट्ठा।
निक्खेवओ वि एवं, छिन्नमछिन्नो उ कालेण॥

वृ- 'एते' श्रमणादयोऽनन्तरोक्तकारणैः 'अगृह्यमाणे' वस्त्रे 'अन्यस्मिन्' भावितकुलादौ 'श्रमणार्थं' साधूनामर्थाय संनिक्षिपन्ति इत्युक्तः प्रक्षेपकः। सम्प्रति निक्षेपकः प्ररूप्यते- अथ प्रक्षेपक-निक्षेपकयोः कः प्रतिविशेषः? उच्यते-साधूनामेवार्थाय या वस्त्रस्य स्थापना स प्रक्षेपकः, यत् पुनः प्रथमं स्वार्थं निक्षिप्य पश्चात् साधूनामनुज्ञायते स निक्षेपकः, सोऽपि 'एवं' प्रक्षेपकवद् द्रष्टव्यः। इयमतर भावना-यथा प्रक्षेपकः श्रमणादिषु स्तेनान्तेषु स्थानेषु भावितः तथा निक्षेपकोऽपि भावनीयः। यस्तु विशेषस्तं दर्शयति-"छिन्न" इत्यादि। स निक्षेपकः कालेन च्छिन्नो वा स्यादच्छिन्नो वा। छिन्नो नाम निर्धारितः, यदि वयं देशान्तरं गताः सन्त एतावतः कालादर्वाग् न प्रत्यागच्छामः ततो युष्माभिरमूनि वस्त्राणि श्रमणेभ्यः प्रदातव्यानीति। अच्छिन्नः पुनःप्रतिनियतकालविवक्षारहितः

अत्र विधिमाह-

[भा.६३०] अमुगं कालमनागए, दिज्जह समणाण कप्पई छिन्ने।
पुन्न समकाल कप्पइ, ठवियगदोसा अईअम्मि॥

वृ-देशान्तरं जिगमिषुः कोऽपि कस्यापि गृहे किञ्चिद् वस्त्रजातं निक्षेप्तुकामो ब्रूते-'अमुकं' विवक्षितं कालं मय्यनागते यूयं मदीयं वस्त्रं श्रमणेभ्यो दद्यात इत्यभिधाय निक्षेपकं निक्षिप्य गतोऽसौ देशान्तरं नाऽऽयातस्तावतः कालावधेरर्वाक् ततः कल्पते तद् वस्त्रम्। एवं विधिच्छिन्ने निक्षेपके किं सर्वदैव? न इत्याह-पूर्णस्यावधेः समकालं कल्पते न परतः। कुतः? इत्याह-स्थापनैव स्थापितकं तस्य दोषा अतीते विवक्षितकालावधौ भवन्ति। अच्छिन्ने तु यदा प्रयच्छन्ति तदा कल्पते॥ अथ आधुनिक्षिप्तवस्त्रविधिमाह-

[भा.६३१] असिवाइकारणेहिं, पुन्नाईए मणुन्ननिक्खेवे।
परिभुंजंति ठविंति व, छड्डिंति व ते गए नाउं॥

वृ-अशिवं-व्यन्तरकृतोपद्रवविशेषः, आदिग्रहणादवमौदर्यादिपरिग्रहः, तैरशिवादिभिः कारणैः पूर्णेऽतीते वा काले मनोज्ञाः-साम्भोगिकास्तेषां निक्षेपके यद् वस्त्रजातं तत् परिभुञ्जते। इयमत्र भावना-साम्भोगिकसाधुभिरशिवादिभि कारणैर्देशान्तरं व्रजद्भिर्ग्लानादिप्रतिबन्धस्थितानां साधूनां समीपे यद् वस्त्रजातं निक्षिप्तं तत् पूर्णेऽतीते वा काले यद्यात्मनो वस्त्राणामसत्ता ततो वास्तव्यसाधवः परिभुञ्जते न तत्र कश्चित् स्थापनादिदोषः। अथ नास्ति वस्त्रणामसत्ता गृहीतानि वा यैः प्रयोजनं ततस्तथैव स्थापयन्ति। अथ ज्ञायते यथा-ते ततोऽपि दवीयांसमन्यं देशं गतास्ततस्तान् गतान् ज्ञात्वा "छड्डुंति" परिष्ठापयन्तीत्यर्थः॥ तदेवं कस्येति पृष्टे प्रक्षेपकादयो दोषाः सुनिर्णीता भवन्तीत्यावेदितम्। अथ कस्येति पृष्टे यो यादृशमाशङ्कावचनं ब्रूयात् तदेतदभिधित्सुराह-

[भा.६३२] दमए दूभगे भट्ठे, समणच्छन्ने अ तेनए ।
न य नाम न वत्तव्वं, पुट्ठे रुट्ठे जहावयणं ॥

वृ-द्रमके' दरिद्रे 'दुर्भगे' अनिष्टे 'भ्रष्टे' राज्य(ज)पदच्युते "समणच्छन्ने" त्ति भावप्रधानत्वात् श्रमणशब्दस्य श्रामण्येन-श्रमणवेषेण च्छन्ने-आच्छादितगार्हस्थ्ये 'स्तेनके' चौरे प्रथमं कस्येति पृष्टे ततः स्वहृदयसमुत्थया शङ्कया 'रुष्टे' कषायिते तस्य समाधानविधानार्थं न च नाम न वक्तव्यम् किन्तु वक्तव्यमेव वचनस्यानतिक्रमेण 'यथावचनं' यथायोगमाशङ्कापनोदकं वाक्यमित्यर्थः । तच्च यथावसरं पुरस्ताद् वक्ष्यते ॥ तत्र प्रथमं द्रमकद्वारं विवृणोति-

[भा.६३३] किं दमओ हं भंते !, दमगस्स वि किं मे चीवरा नत्थी ।
दमएण वि कायव्वो, धम्मो मा एरिसं पावे ॥

वृ-कस्येति पृष्टः कोऽपि ब्रूयात्-भदन्त ! भवद्भि किमहं द्रमकः सम्भावितो येनैवं पृच्छयते? यद्वा यद्यप्यहं द्रमकस्तथाऽपि किं मे चीवराण्यपि न सन्ति ? किन्तु सन्त्येव; किञ्च द्रमकेणापि धर्म कर्त्तव्यः, कुतः ? इत्यह-मा ईदृशं दारिद्योपद्रवलक्षणं दुःखं भूयः प्राप्नुयामिति कृत्वा । तस्य पुरतः साधुभिरभिधातव्यम्-भद्र ! न वयं भवन्तं द्रमकं भणित्वा कस्येति पृच्छामः किन्तु सार्वज्ञोऽस्माकमयमुपदेशः, यतः-कदाचित् तव स्वजन-रिजनमित्रादीनां सत्कमिदं भवेत्, ते चापरस्य तथाविधस्याभावेऽप्रतिकं कुर्यु अभिनवं वा वस्त्रं सम्मूर्च्छयेयुः क्रीणीयुर्वा, अस्माकं च तृतीयव्रतातिचारः स्यात्; यद्वा श्रमणादिभिः स्तेनपर्यन्तैरिदमस्मदर्थं स्थापितं भवेदित्यादयो दोषाः कस्येत्यपृच्छायां न परिहर्त्तुं शक्यन्ते इत्युक्ते यदि स ब्रूयात्-"ममैवैतद् नान्यस्य' इति तदा निर्दोषं मत्वा प्रतिगृह्यते । एवं दुर्भगादिष्वपि पदेषु यथायोगमुपयुज्य भावना कार्या ॥ दुर्भगद्वारमाह-

[भा.६३४] जइ रन्नो भज्जाए, व दूभगो दूभगा व जइ पइणो ।
किं दूभगो मि तुब्भ वि, वत्था वि व दूभगा किं मे ॥

वृ-दुर्भगो ब्रूयात्-यद्यहं राज्ञो भार्याया वा 'दुर्भगः' द्वेष्यस्ततत् किं युष्माकमपि दुर्भगः ? । यदि वा काचिदविरतिका दात्री तदा ब्रूयात्-यद्यहं पत्युर्दुर्भगा तत् किं युषमाकमपि दुर्भगा ? वस्त्राण्यपि वा किममूनि मे दुर्भगाणि यदेवं दीयमानान्यपि 'कस्य सत्कानि ?' इति पृच्छयन्ते ? अथ भ्रष्ट-श्रमणच्छन्नद्वारद्वयमाह-

[भा.६३५] जइ रज्जाओ भट्ठो, किं चीरेहिं पि पिच्छहेयाणि ।
अत्थि महं साभरगा, मा हीरेज्ज त्ति पव्वइओ ॥

वृ-राजपदच्युतः प्राह-यद्यहं राज्याद् भ्रष्टः तत् किं चीवरेभ्योऽपि ? नैवेत्यर्थः, 'पश्यत' अवलोकयत एतानि मद्गृहे भूयांसि वासांसीति ब्रुवन् हस्तसंज्ञया दर्शयति । श्रमणच्छन्नः प्राह-सन्ति मम पार्श्वे बहवः "साभरग" त्ति देशीवचनाद् रूपकाः, ते च मा राजकुलादिना ह्रियेरन्नित्यहं 'प्रव्रजितः' शाक्य-तापस-परव्राजका-ऽऽजीवकाख्यानां श्रमणानामन्यतमः संवृत्त इत्यर्थः ॥ अथ स्तेनको यद् ब्रूयात् तदाह-

[भा.६३६] अत्थि मे घरे वि वत्था, नाहं वत्थाइँ साहु ! चोरेमि ।
सुद्धु मुणिअं च तुब्भे, किं पुच्छह किं व हं तेनो ॥

वृ-सन्ति 'मे' मम गृहे वस्त्राणि अत एव हे साधो ! नाहं सवस्त्राणि चोरयामि; यद्वा 'सुष्ठु'

Jain Education International For Private & Personal Use Only www.jainelibrary.org

शोभनं 'मुणितं' परिज्ञातं युष्माभिर्यथाऽहं स्तेनः, को नाम साधून् मुक्त्वाऽपरो ज्ञास्यति ? तदहं सत्यं स्तेन एव, न पुनः साधूनामर्थाय चोरयामि; अथवा किं यूयं पृच्छत ? यस्य वा तस्य वा भवतु यूयं गृहीत; यद्वा किमहं स्तेनो येन यूयं 'कस्य' इति पृच्छथ ? । अत्रापि समाधानविधानं प्राग्वत् ।। अथ कस्येति पृच्छाप्रतिबद्धामेव द्वारान्तरप्रतिपादिकामिमां गाथामाह-

[भा.६३७] इत्थी पुरिस नपुंसग, धाई सुण्हा य होइ बोधव्वा ।
बाले अ वुड्ढयुगले, तालायर सेवए तेणे ।।

वृ- स्त्री-पुरुष-नपुंसका धात्री स्नुषा च भवति बोद्धव्या, ततो बालयुगलं वृद्धयुगलं तालाभिश्चरन्तीति 'तालाचराः' नटाः, सेवकः स्तेनश्च प्रतीत इति द्वारगाथा समासार्थः ।।

व्यासार्थं प्रतिद्वारं बिभणिषुराह-

[भा.६३८] तिविहित्थि तत्थ थेरिं, भणंति मा होज्ज तुज्झ जायाणं ।
मज्झिम मा पइ-देवर, कन्नं मा थेर-भाईणं ।।

वृ- त्रिविधा स्त्री, तद्यथा-स्थविरा मध्यमा कन्या च । तत्र स्थविरां दात्रीं भणन्ति-मा भूत् तव 'जातानां' पुत्राणां सत्कमिदं वस्त्रं तेन वयं कस्य इति पृच्छाम इति योजना सर्वत्र कर्त्तव्या । मध्यमा भण्यते-मा भूत तव पति-देवरयोः सत्कम् । 'कन्यां' कुमारीं भणन्ति-मा भूत् तव स्थविर-भ्रात्रोः सम्बन्धि । स्थविरः-पिता, भ्राता प्रतीतः ।।

[भा.६३९] एमेव य पुरिसाण वि, पंडगऽपडिसेवि मा निआणं ते ।
सामियकुलस्स धाई, सुण्हं जह मज्झिमा इत्थी ।।

वृ- 'एवमेव' यथा स्त्रीणां तथा पुरुषामपि स्थविर-मध्यम-तरुणभेदेस्त्रैविध्यं द्रष्टव्यम् । स्थविरः पुरुषो भण्यते-मा तव पुत्राणां कलत्रस्य वा सत्कं भवेत् । मध्यमोऽभिधीयते- मा भूत् तव भ्रातृणां पत्न्या वा सम्बन्धि । तरुण उच्यते-मा तव पितुर्मातुर्भ्रातृणां वा स्वाधीनं भवेत् । 'पण्डकः' नपुंसकः ''पडिसेवि''त्ति अकारप्रश्लेषाद् 'अप्रतिसेवी' तृतीयवेदोदयरहितोऽसङ्क्लिष्ट इत्यर्थः तस्य ग्रहीतुं कल्पते, स चाभिधीयते-मा ते 'निजानां' सम्बन्धिनामिदं वस्त्रं भवेत् । यः पुनस्तृतीयवेदोदययुक्तस्तस्य हस्ताद् गृह्णतां चत्वारो लघुकाः, आज्ञाभङ्गादय आत्म-परोभयसमुत्थाश्च दोषाः । या धात्री साऽभिधीयते-मा ते 'स्वामिकुलस्य' स्वामिनो गृहस्य सत्कं भवेत् । 'स्नुषां' वधूं भणन्ति यथा मध्यमा स्त्री भणिता-मा ते पत्युर्देवरस्य वा सम्बन्धि भवेत् ।।

[भा.६४०] दोण्हं पि अ जुयलाणं, जहारिहं पुच्छिऊण जइ पहुणो ।
गिण्हंति तओ तेसिं, पुच्छासुद्धे अणुन्नायं ।।

वृ- इह द्वे युगले नाम बालयुगलं वृद्धयुगलं च । बालयुगलं बालो बालिका, वृद्धयुगलं वृद्धो वृद्धा च, तयोर्द्वयोरपि युगलयोः 'यथार्हं' यथायोग्यं स्वरूपं पृष्ट्वा प्रत्ययिकपुरुषमुखेन च निश्चित्य यदि प्रभवस्ते बालादयस्ततो गृह्णन्ति तेषां हस्तात्, अथ न प्रभवस्तदा यः पितृपुत्रादि प्रभुस्तस्य वा पृच्छा-किं गृह्यतां न वा ? इति तया शुद्धे-गृह्यतां निर्विकल्पमित्यनुमत्या निसन्दिग्धे कृते ग्रहणमनुज्ञातम् ।।

[भा.६४१] तूरपइ दिंति मा ते, कुसीलवे तेसु तूरिए मा ते ।
तमेव भोगि सेवग, तेणो उ चउव्विहो इणमो ।।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

वृ- 'तूर्यपति' नटमहत्तरस्तस्मिन् ददति भण्यते-मा ते 'कुशीलवानां' नटानां सत्कं भविष्यति। 'तेषु' कुशीलवेषु ददत्सु मा युष्माकं 'तूर्यिकस्य' तूर्यपतेर्भवेत्। 'एवमेव' तूर्यपतिकुशीलवोक्त-प्रकारेणैव भोगिक-सेवकयोरपि वाच्यम्। यदि सेवको ददाति तदा वक्तव्यम्- मा ते भोगिकस्य-स्वामिनः स्वाधीनं भवेत्। भोगिके दातरि वाच्यम्-मा युष्माकं सेवकस्य सम्बन्धि भवतु। स्तेनस्वरूपमाह-स्तेनः पुनश्चतुर्विधः 'अयं' वक्ष्यमाणलक्षणः ॥ चातुर्विध्यमेवाह-

[भा.६४२] सग्गाम परग्गामे, सदेस परदेसे होइ उड्डाहो।
मूलं छेओ छम्मासमेव गुरुगा य चत्तारि ॥

वृ-यस्मिन् ग्रामे साधवः स्थिताः सन्ति स स्वग्रामस्तस्मिन यः स्तैन्यं करोति स स्वग्रामस्तेनः। तदपेक्षयाऽपरस्मिन् ग्रामे स्तैन्यं कुर्वन् परग्रामस्तेनः। 'स्वदेशे' विवक्षितसाधुविहारविषयभूते विषये चौर्यं कुर्वाणः स्वदेशस्तेनः। तदपेक्षयाऽपरत्र देशे चौरिकां विदधानः परदेशस्तेनः। एतेषु गृह्णताम् 'उड्डाहः' प्रवचनलाघवं भवति-अहो! अमी लुब्धशिरोमणयः तपस्विनः, यदेवं स्तेनाहृतानि वस्त्राणि गृह्णाना राजविरुद्धमपि नापेक्षन्त इति। तेषु प्रायश्चित्ततमाह- ''मूलमि''त्यादि। स्वग्रामस्तेने गृह्णतां मूलम्, परग्रामस्तेने छेदः, स्वदेशस्तेने षण्मासा गुरुकाः, परदेशस्तेने चत्वारो गुरुकाः, यथाक्रमं दूर-दूरतर-दूरतमस्तैन्यदोषत्वादिति भावः ॥ तदेवं व्याख्याता ''इत्थी पुरिस'' इत्यादिद्वारगाथा। तद्याख्याने च समर्थितं 'कस्य' इति पृच्छाद्वारम्। अथ 'किमासीत्?' इति पृच्छाद्वारमाह-

[भा.६४३] एवं पुच्छासुद्धे, किं आसि इं तु जं तु परिभुत्तं।
किं होहिइ त्ति अहतं, कत्थाऽऽसि अपुच्छणे लहुगा ॥

वृ- 'एवम्' अमुना प्रकारेण कस्येति पृच्छया शुद्धे-निर्दोषे निर्णीते सति यत् 'परिभुक्तं' भुक्तपूर्वं तत् पृच्छयते-'किमिदं वस्त्रमासीत्?' युष्माकं कीद्दशमुपयोगमागतवदित्यर्थः। यत् पुनः 'अहतम्' अपरिमुक्तं तत् पृच्छयते-किमेतद् भविष्यति? इति। ''कत्थासि''त्ति क पेडाया मञ्जूषायामपरस्मिन् वा स्थाने इदमासीत्?। तत्र यदि पेडायां तदा किं पृथिव्यादिषु कायेषु सा पेडा प्रतिष्ठिता? अप्रतिष्ठिता वा? इत्याद्युपयुज्य वाच्यम्। कस्येदम्? किमासीत्? कुत्रासीत्? किं भविष्यति? इति 'अप्रच्छने' चतसृणामपि पृच्छानामकरणे प्रत्येकं चत्वारो लघुकाः ॥ तत्र किमासीद्? इति पृष्टे ते गृहस्था अभिदध्युः-

[भा.६४४] निच्चनियंसण मज्जण, छणूसवे रायदारिए चेव।
सुत्तत्थजाणएणं, चउपरियट्टे तओ गहणं ॥

वृ- 'नित्यनिवसनं' नित्योपभोग्यमेतदासीत्। 'मज्जनिकं' नाम स्नानानन्तरं यत् परिधीयते धौतवस्त्रमित्यर्थः तदासीत्। तथा क्षणः-प्रतिनियतः कौमुदी-शक्रमहादिकः, उत्सवः-पुनरनियतो नामकरण-चूडाकरण-पाणिग्रहणादिकः; अथवा यत्र पक्कान्नविशेषः क्रियते स क्षणः, यत्र तु पक्कान्नं विनाऽपरो भक्तविशेषः स उत्सवः; क्षणे उत्सवे च परिभुज्यते यत् तत् णोत्सविकं तद्वाऽऽसीत्। तथा राजा-ऽमात्य-महत्तमादिभवनेषु गच्छद्भिर्यत् परिभुज्यते तद् राजद्वारिकं तद्वाऽऽसीत्। तत्रैवमुक्ते 'सूत्रार्थज्ञायकेन' गीतार्थेन चतुर्णां-नित्यनिवसनीयादीनां परिवर्त्तानां-वस्त्रयुगलानां समाहारश्चतुःपरिवर्त्तम्, तत्र याद्दशं परिवर्त्तमेकतरं वा वस्त्रं ददाति ताद्दशेऽस्मिन्

Jain Education International For Private & Personal Use Only www.jainelibrary.org

व्याप्रियमाणे सति ततो ग्रहणं कर्त्तव्यम् ।। एतदेव भावयति-

[भा.६४५] निच्चनियंसणियं ति य, अन्नासइ पच्छकम्म-वहणाई ।
अत्थि वहंते घिप्पइ, इयरय फुस-धोय-पगयाई ।।

वृ- यदि गृहस्थो ब्रूयात्-नित्यनिवसनीयमिदमासीत्, ततो यदि तस्यापरं नित्यनिवसनीयमस्ति ततः कल्पते, यतोऽन्यस्य नित्यनिवसनीयस्य असति-अभावे पश्चात्कर्म-वहनादयो दोषा भवन्ति । पश्चाद्-विवक्षितवस्त्रग्रहणानन्तरं कर्म-अभिनववस्त्रस्य कारापणं पश्चात्कर्म, वहनं नाम अव्याप्रियमाणं वस्त्रं यद् वहमानकं क्रियते, आदिग्रहणात् क्रीत-कृत-प्रामित्यादयो दोषाः, अतो यद्यपरं नित्यनिवसनीयमस्ति तदपि यदि वहमानं-व्याप्रियमाणं तदा गृह्यते । कुतः ? इत्याह-'इतरस्मिन' अवहमाने स्पर्शन-धौत-प्रकृतादयो दोषाः । इयमत्र भावना-यदवहमानं तस्योपभोगार्थमप्यकायेनोत्स्पर्शनं कुर्यात्, धावनं वा विदध्यात्, तस्य परिभोगप्रारम्भमुद्दिश्य प्रकरणं वा कुर्वीत, आदिग्रहणाद् धूपन-वासनादीनि वा विदधीत । यत एवं ततोऽन्यस्मिन् वहमाने ग्रहीतव्यम् ।। अपरिभुक्तमधिकृत्य किमेतद् भविष्यति ? इति पृष्टः सन्नेवं ब्रूयात्-

[भा.६४६] होहिइ व नियंसणियं, अन्नासइ गहण पच्छकम्माई ।
अत्थि नवे वि उ गिण्हइ, तहि तुल्ल पवाहणादोसा ।।

वृ- वाशब्दः परिभुक्तादपरिभुक्तस्य पक्षान्तरद्योतकः । 'भविष्यति नित्यनिवसनीयमेतत्' इत्यभिहिते यद्यपरं तादृशं नास्ति ततोऽन्यस्य तादृशस्यासति ग्रहणे त एव पश्चात्कर्मादयो दोषाः । अथास्त्यन्यत् तादृशं ततः कल्पते । तच्च तद्यपि नवमवहमानकं तथापि गृह्णाति, कुतः ? इत्याह-तुल्यास्तत्रप्रवाहनादोषाः । किमुक्तं भवति ?-यदि साधवो गृह्णन्ति न गृह्णन्ति वा तथापि स गृही तयोरपरिभुक्तवस्त्रयोरेकतरमात्मप्रयोगेणैव प्रवाहयिष्यति, ततः साधूनां गृह्णतामपि न कश्चिद् दोष इति ।।

[भा.६४७] एमेव मज्जणाई, पुच्छासुद्धं तु सव्वओ पेहे ।
मणिमाई दाइंति व, असिट्ठे मा सेहुवादानं ।।

वृ- 'एवमेव' यथा नित्यनिवसनीयभिहितं तथा मज्जनिक-क्षणोत्सविक-राजद्वारिकाण्यभिधातव्यानि । यदा पृच्छया शुद्धमिति निर्धारितं तदा 'सर्वतः' समन्तात् 'प्रेक्षेत' निभालयेत। प्रेक्ष्यमाणे च यदि 'मण्यादिकं' मणि-हिरण्य-सुवर्णादिकं किञ्चिदर्थजातमुपनिबद्धमुपलभ्यते तदा भण्यन्ते गृहस्थाः, यथा-निरीक्षध्वं समन्तादपि वस्त्रमिदम्, यदि निरीक्ष्यमाणैस्तैः स्वयमेव दृष्टं तदा लष्टम्, नो चेत् ततः साधवः "दाइंति"त्ति दर्शयन्ति-इदं यौष्माकीणं किमप्युपनिबद्धमस्ति। आह एवमभिधीयमाने कथमधिकरणदोषो न भवति ? इति उच्यते- अल्पीयानेवायं दोषः, 'अशिष्टे' अकथिते पुनः शैक्षस्यावधावितुकामस्य तद्द्रव्यमुपादानं भवेत्, तद् गृहीत्वोन्प्रव्रजेदित्यर्थः; अगारिणो वा महान्तमुड्डाहं कुर्यु, यथा-वस्त्रेण सार्द्धं स्तेनितमस्मद्रव्यमेभि श्रमणैः । अत एवं प्रभूततरो दोषो मा भूदिति कथ्यते ।। उपसंहरन्नाह-

[भा.६४८] एवं तु गविट्ठेसुं, आयरिया दिंति जस्स जं नत्थि ।
समभागेसु कएसु व, जहराइणिया भवे बीओ ।।

वृ- 'एवम्' उक्तप्रकारेणैव वस्त्रेषु गवेषितेषु यथासम्भवं लब्धेषु च गुरूणां समीपमागम्य

Jain Education International For Private & Personal Use Only www.jainelibrary.org

यथावदालोच्य च वस्त्रणि विधिवद् दर्शयति, तत आचार्या यस्य साधोर्यद् घन्यं मध्यममुत्कृष्टं वा वस्त्र नास्ति तस्मै तद् ददतीति प्रथमः प्रकारः । पश्चार्धेन द्वितीयमाह-समेषु-तुल्येषु भागेषु कृतेषु, साधूनां सङ्ख्यामनुमाय समांशतया वस्त्रेषु विभक्तेष्विति भावः । वाशब्दः प्रकारान्तरद्योतने। 'यथारत्नाधिकं' यो यो रत्नाधिकस्तस्मै तस्मै प्रथमं दीयते इत्ययं भवेद् द्वितीयो दानप्रकार इति।।

उक्तो वस्त्रकल्पिकः । सम्प्रति पात्रमिति पात्रकल्पिकद्वारम्, अत्रापि-

[भा.६४९] अपपत्ते अकहित्ता, अणहिगयऽपरिच्छणे य चउगुरुगा ।
दोहि गुरू तवगुरुगा, कालगुरू दोहि वी लहुगा ।।

वृ- इयं गाथा तथैव द्रष्टव्या । नवरमिह सूत्रमाचारान्तर्गतं पात्रैषणाध्ययनम्, तत्राप्राप्ते यदि पात्रानयनाय प्रेषयति तदा प्रायश्चित्तं चत्वारो गुरुकाः 'द्वाभ्यामपि गुरवः' तपसा कालेन च । अथ सूत्रं प्राप्तः परं नाद्यापि तस्यार्थं कथितस्तदा चत्वारो लघुकास्तपसा गुरवः । अथ कथितोऽर्थ परं नाद्यापि सम्यगधिगतः तदाऽपि चत्वारो लघुकाः कालेन गुरवः । अथाधिगतोऽर्थः श्रद्धानविषयीकृतश्च परं नाद्यापि परीक्षितः तदाऽपि चतुर्लघवः तपसा कालेन च लघुकाः । अतः सूत्रं पाठयित्वा तस्यार्थं कथयित्वा सम्यगधिगते श्रद्धिते चार्थे पात्राय परीक्ष्य प्रेषणीय इति ।।

तच्च पात्रं चतुर्विधम्, तद्यथा-

[भा.६५०] नामं ठवणा दविए, भावम्मि चउव्विहं भवे पायं ।
एसो खलु पायस्सा, निक्खेवो चउव्विहो होइ ।।

वृ- नामपात्रं स्थापनापात्रं द्रव्यपात्रंभावपात्रमिति चतुर्विधं पात्रम् । एष खलु पात्रस्य निक्षेपश्चतुर्विदो भवति ।। तत्र नाम-स्थापने सुगमत्वादनाहृत्य द्रव्य-भावपात्रे प्रतिपादयति-

[भा.६५१] दव्वे तिविहं एगिंदि-विगल-पंचिंदिएहिं निप्फन्नं ।
भावे आया पत्तं, जो सीलंगाण आहारो ।।

वृ- द्रव्यविषयं त्रिविधं पात्रम्, तद्यथा-एकेन्द्रियनिष्पन्नं विकलेन्द्रियनिष्पन्नं पञ्चेन्द्रियनिष्पन्नं च । एकेन्द्रियनिष्पन्नमलाबुकादि, विकलेन्द्रियनिष्पन्नं शुक्ति-शङ्खादि, पञ्चेन्द्रियनिष्पन्नं कुतुप-दन्त-शृङ्गपात्रादि । 'भावे' भावविषयं पात्रमात्मा । किं सर्व एव ? न इत्याह- यः पूर्वोक्तानाम् अष्टादशसहस्रसङ्ख्यानां शीलाङ्गानाम् 'आधारः' आश्रयः स आत्मा साधूनां सम्बन्धी भावपात्रमुच्यते, ''पात्रं भाजनमाधारः'' इति पर्यायवचनत्वात् । अत्र पुनर्भावपात्रोपयोगिना द्रव्यपात्रेणाधिकारः।। तदपि त्रिविधम्-

[भा.६५२] लाउय दारुय मट्टिय, तिविहं उक्कोस मज्झिम जहन्नं ।
एक्केक्कं पुण तिविहं, अहागडऽप्पं-सपरिकम्मं ।।

वृ- अलाबुमयं दारुमयं मृत्तिकामयम् । पुनरेकैकं त्रिविधम्-उत्कृष्टं मध्यमं जघन्यं च । उत्कृष्टं प्रतिग्रहः, मध्यमं मात्रकम्, जघन्यं टोप्परिकादि । एकैकं पुनस्त्रीधा-यथाकृतमल्पपरिकर्म -सपरिकर्म च ।। अत्र वैपरीत्यकरणे प्रायश्चित्तमाह-

[भा.६५३] वोच्चत्थे चउलहुआ, आणाइ विराधनाय दुविहा उ ।
छेयण-भेयणकरणे, जा जहि आरोवणा भणिया ।।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

वृ- विपर्यस्तेन ग्रहणे करणे वा चतुर्लघुकाः, उपलक्षणत्वाद् लघुमास-रात्रिन्दिवपञ्चके अपि। इदमुक्तं भवति-उत्कृष्टस्य यथाकृतस्य पात्रस्योत्पादनाय निर्गतस्तस्य योगमकृत्वाऽल्प-परिकर्मोत्कृष्टमेव गृह्णाति चतुर्लघु, सपरिकर्म वा प्रथमत एव गृह्णाति चतुर्लघु; यदा यथाकृतं योगे कृतेऽपि न लभ्यते तदाऽल्पपरकर्म गवेषणीयम्, तस्योत्पादनाय निर्गतः प्रथमत एव सपरिकर्म गृह्णाति चतुर्लघु, इति त्रीणि चतुर्लघुकानि; एवं मध्यमस्यापि त्रिषु स्थानेषु त्रीणि मासिकानि; जघन्यस्य स्थानकत्रयेऽपि त्रीणि रात्रिन्दिवपञ्चकानि। यथा यथाकृतादिविपर्यस्तग्रहणे प्रायश्चित्तमुक्तं तथोत्कृष्टादीनामपि परस्परं विपर्यस्तग्रहणे प्रायश्चित्तमवसातव्यम्। तद्यथा-उत्कृष्टस्य प्रतिग्रहस्यार्थाय निर्गतो मध्यमं मात्रकं गृह्णाति मासिकम्, जघन्यं टोप्परिकादि गृह्णाति पञ्चकम्; मध्यमस्य निर्गत उत्कृष्टं गृह्णाति मासिकम्। तदेवं विपर्यस्तग्रहणे प्रायश्चित्तमुक्तम्, सम्प्रति विपर्यस्तकरणेऽभिधीयते-उत्कृष्टं भङ्कत्वा मध्यमं करोति मासिकम्, जघन्यं करोति पञ्चकम्; मध्यमे संयोज्योत्कृष्टं भङ्क्त्वा मध्यमं करोति मासिकम्, जघन्यं करोति पञ्चकम्; मध्यमे संयोज्योत्कृष्टं करोति चतुर्लघु, तदेव भङ्क्त्वा जघन्यं करोति पञ्चकम्; मध्यमे संयोज्योत्कृष्टं करोति चतुर्लघु, तदेव भङ्क्त्वा जघन्यं करोति पञ्चकम्; जघन्ये संयोज्योत्कृष्टं करोति चतुर्लघु, मध्यमं करोति मासिकम्; आज्ञादयश्च दोषाः।

विराधना च द्विविधा-संयमे आत्मनि च। तथा चाह-पात्रस्य च्छेदनं भेदनं वा कुर्वत आत्मविराधना परिताप-महादुःखादिका, संयमविराधना तु तद्‌गता घुणादयो विनाशमश्नुवते। ततो या 'यस्यां' संयमविराधनायामात्मविराधनायां वा आरोपणा भणिता सा तस्यामभिधातव्या। तत्रात्मविराधनायां सामान्यतश्चतुर्गुरु, संयमविराधनायां "छक्काय चउसु लहुगा" इत्यादिका कायनिष्पन्ना। यत एवं ततो न विधेयं विपर्यस्तकरणम्॥ अथ कतिभिः प्रतिमाभि पात्रं गवेषणीयम्? उच्यते-

[भा.६५४] उद्दिसिय पेह संगय, उज्झियधम्मे चउत्थए होइ।
सव्वे जहन्न एक्को, उस्सग्गाई जयं पुच्छे॥

वृ-उद्दिष्टपात्रं प्रेक्षापात्रं सङ्गतिकपात्रमुज्झितधर्मकं च चतुर्थम् इति चतस्र पात्रगवेषणायां प्रतिमाः। गच्छवासिनः प्रतिमाचतुष्टयेनापि पात्रं गृह्णन्ति, जिनकल्पिकानामधस्तनाभ्यां द्वाभ्या-मग्रहणमुपरितनयोर्द्वयोरेकतरस्यामभिग्रहः। अथ ग्रन्थगौरवभयादतिदिशन्नाह-"सव्वे जहन्न एक्को" त्ति "यद यस्य नास्ति वस्त्र इत्यारभ्य सर्वे वा गीतार्था मिश्रा वा जघन्यत एको गीतार्थ" इतिपर्यन्तं यथा वस्त्रविषये भावितं तथा पात्रेऽपि सर्वं तदवस्थमेव भावनीयम्, नवरं पात्राभिलापः कर्त्तव्यः। "उस्सग्गाइ" त्ति कायोत्सर्गादिकं "आवाससोहि अखलंत समग उस्सग्ग०" इत्यादिगा-थोक्तं सप्रायश्चित्तं तथैव वक्तव्यम्। "जयं पुच्छे" ति यतमानः पूर्वोक्तां यतनां कुर्वन् पृच्छेत्। किमुक्तं भवति? - श्रावकेषु नावभाषितव्यम्, किं तर्हि? भावितकुलेषु, तत्रापि पात्रे दर्शिते 'कस्येदम्? किमासीत्? क्व चाऽऽसीत्? किं भविष्यति?' इति पृच्छाचतुष्टयं तथैव कर्त्तव्यम्। किं बहुना? य एव वस्त्रस्य विधिः

"एवं तु गविट्ठेसुं, आयरिया दिंति जस्स जं नत्थि।
समभागेसु कएसु च, जहरायणिया भवे बिइओ॥"

Jain Education International For Private & Personal Use Only www.jainelibrary.org

इति पर्यन्तः प्रायः स एव पात्रस्यापि द्रष्टव्यः । यस्तु विशेषः स उपरिष्टाद् दर्शयिष्यते ॥ सम्प्रति प्रतिमाचतुष्कं बिभावयिषुराह-

भा. (६५५] उद्दिट्ठ तिगेगयरं, पेहा पुन दु एरिसं भणइ ।
दोण्हेगयरं संगइ, वाहयई वारएणं तु ॥

वृ-त्रिकस्य-जघन्यादित्रयस्यैकतरं यद् गुरुसमक्षं प्रतिज्ञातं तदेव याच्यमानमुद्दिष्टपात्रमिति प्रथमा । प्रेक्षापात्रं पुनः 'दृष्ट्वा' अवलोक्य यद् 'ईदृशं मम प्रयच्छ' इति भणति तत् प्रेक्षापूर्वकं याच्यमानत्वात् प्रेक्षापातरमिति द्वितीया । अथ तृतीया-तस्याश्च स्वरूपमाचाराङ्गे द्वितीयश्रुतस्कन्धे षष्ठाध्ययने प्रथमोद्देशके इत्थमभिहितम्- अहावरा तच्चा पडिमा-से भिक्खू वा भिक्खुणी वा से जं पुन पायं जाणेज्जा, तं जहा-संगइयं वा वेजयंतियं वा । अथ किमिदं सङ्गतिकम् ? किं वा वैजयन्तिकम् ? इत्याह-''दोण्हेगयरमि''त्यादि । इह कस्यचिगारिणो द्वे पात्रे, स च तयोरेकतरं दिने दिने वारकेण वाहयति, तत्र यस्मिन् दिवसे यद् वाह्यते तत् सङ्गतिकमभिधीयते, इतरद् वैजयन्तिकम्। तयोरेकतरं यदभिग्रहविशेषेण गवेष्यते सा तृतीया प्रतिमा ॥

चतुर्थी प्रतिपादयति-

[भा.६५६] दव्वाइ दव्व हीनाहियं तु अमुगं च मे न घेत्तव्वं ।
दोहि वि भावनिसिट्ठं, तमुज्झिओभट्ठऽणोभट्ठं ॥

वृ- उज्झितं चतुर्था, द्रव्य-क्षेत्र-काल-भावोज्झितभेदात् । तत्र द्रव्योज्झितं यथा-केनचिदगारिणा प्रतिज्ञातम् 'इयत्प्रमाणाद्धीनाधिकंपात्रममुकं वा कमढक-प्रतिग्रहादिकं मया न ग्रहीतव्यम्' तदेव केनचिदुपनीतम्, ततः प्रागुक्तयुक्त्या द्वाभ्यामपि भावतो निसृष्टं तद् अवभाषितमनवभाषितं वा दीयमानं द्रव्योज्झितम् ॥ क्षेत्रोज्झितमाह-

[भा.६५७] अमुइच्चगं न धारे, उवनीयं तं च केणई तस्स ।
जं वुज्झे भरहाई, सदेस बहुपायदेसे वा ॥

वृ- अमुकदेशोद्‌भवं पात्रं न धारयामि, तदेव च केनचिदुपनीतम्, तद् उभाभ्यामपि पूर्वोक्तहेतोः परित्यक्तं क्षेत्रोज्झितम् । यद्वा पात्रमुज्झेयुः 'भरतादयः' भरतः-नटः, आदिशब्दात् चारणादिपरिग्रहः, स्वदेशं गताः सन्तो बहुपात्रदेशे वा तदपि क्षेत्रोज्झितम् ॥ कालोज्झितमाह-

[भा.६५८] दगदोद्धिगाइ जं पुव्वकाल जुग्गं तदन्नहि उज्झे ।
होहिइ व एस्सकाले, अजोग्गयणणागयं उज्झे ॥

वृ- दोद्धिगं-तुम्बकम्, एकस्य-जलस्य यद् म्रियते तुम्बकं तद् दकतुम्बकम्, आदिशब्दात् तक्रतुम्बकादि च यत् पूर्वस्मिन्-ग्रीष्मादौ काले योग्यं तद् 'अन्यस्मिन्' वर्षाकालादावुज्झेत्, भविष्यति वा एष्यति कालेऽयोग्यम् अतोऽनागतमेव यदुज्झेत्, तदेतदुभयथाऽपि कालोज्झितं ज्ञातव्यम् ॥ भावोज्झितमाह-

[भा.६५९] लद्धूण अन्नपाएष पोराणे सो उ देइ अन्नस्स ।
सो वि अ निच्छइ ताइं, भावुज्झिय एवमाईयं ॥

वृ- लब्ध्वा अन्यानि-अबिनवानि पात्राणि पुराणानि स गृही अन्यस्य कस्यचिद् ददाति सोऽपि च ''तानि दीयमानान्यपि यदा नेच्छति तदा एवमादिकं भावोज्झितं द्रष्टव्यम् ॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

उक्ताश्चतस्रोऽपि प्रतिमाः । अथ पात्रस्यैव विशेषविधिं बिभणिषुराह-

[भा.६६०] ओभासणा य पुच्छा, दिट्ठे रिक्के मुहे वहंते य ।
संसट्ठे उक्खित्ते, सुक्के अपगासे दट्ठूणं ॥

वृ- पात्रस्योत्पादनायामवभाषणं कर्त्तव्यम् । तत्र "पुच्छ"त्ति शिष्यः पृच्छति-किं दृष्टं पात्रं प्रशस्यम्? उतादृष्टम्?; एवं रिक्तमरिक्तं वा कृतमुखमकृतमुखं वा वहमानकमवहमानकं वा संसृष्टमसंसृष्टं वा उत्क्षिप्तं निक्षिप्तं वा शुष्कमार्द्रं वा प्रकाशमुखमप्रकाशमुखं वा इत्यष्टौ पृच्छाः। आसां निर्वचनं स्वयमेव सूरिरभिधास्यति । तथा "दट्ठूणं" ति 'दृष्ट्वा' चक्षुषा निरीक्ष्य पात्रं यदि निर्दोषं तदा गृह्णाति ॥

अथैनामेव गाथां विवरीषुः प्रथमद्वितीयपृच्छयोरेकगाथया परिहारमाह-

[भा.६६१] दिट्ठमदिट्ठे दिट्ठं, खमतरमियरे न दिस्सए काया ।
दहिमाईहि अरिक्कं, वरं तु इयरे सिया पाणा ॥

वृ- दृष्टा-ऽदृष्टयोः पात्रयोर्मध्ये दृष्टं क्षमतरम्, क्षमशब्द इह युक्तार्थ, ततश्च क्षमतरम्-अदृष्टादतिशयेन ग्रहीतुं युक्तम् । कुतः ? इत्याह-'इतरस्मिन्' अदृष्टे "न दीसए"त्ति प्राकृतत्वादेकवचनम् न दृश्यन्ते 'कायाः' पृथिव्यादयः । तथा दध्यादिभिरिति आदिग्रहणाद् मोदकादिपरिग्रहः तैः 'अरिक्तं' पूर्णवरम्, 'इतरस्मिन्' रिक्ते 'स्यु' भवेयुः कदाचित् 'प्राणाः' कुन्थुप्रभृतयो जीवाः । यदि पुनर्न तत्र प्राणसम्भवस्तदा तदपि सम्यगुपयुज्य गृह्णतां न दोषः ॥ अथ कृतमुखा-ऽकृतमुखयोः किं कृतमुखं ग्राह्यम्? उताकृतमुखम्? उच्यते-

[भा.६६२] अकयमुहे दुप्पस्सा, बीयाई छेयणाइ दोसा वा ।
कुंथूमादवहंते, फासुवहंतं अओ धन्नं ॥

वृ-अकृतमुखे भाजने 'दुर्दर्शा' दुःप्रत्युपेक्षा बीजादयो जीवाः, तत्र बीजानि तदुद्भवानि, आदिशब्दात् त्रसादिपरिग्रहः, छेदन-भेदनादयो वा दोषास्तत्र भवेयुः, यत एवं ततो अकृतमुखं परिहर्त्तव्यम् । अथ वहमानका-ऽवहमानकयोः कतरत् श्रेष्ठम् ? इत्याह-कुन्थ्वादयः सत्त्वा अवहमानके प्रायः सम्भवन्ति । अथ प्राशुकेन वस्त्रादिना वहमानकं-व्याप्रियमाणं यत् यत् पात्रं धनाय हितमिति 'धन्यं' संयमधनोपकारकमित्यर्थः ॥ अथ संसृष्टादि पृच्छात्रयं प्रतिविधत्ते-

[भा.६६३] एमेव य संसट्ठं, फासुअ अप्फासुएण पडिकुट्ठं ।
उक्खित्तं च खमतरं, जं चोल्लं फासुदव्वेणं ॥

वृ- 'एवमेव' यथा वहमानकं तथा संसृष्टमपि । यत् प्राशुकेन भक्तादिना संसृष्टं-खरण्टितं तत् प्रशस्यम्, अप्राशुकेन पुनः संसृष्टं 'प्रतिक्रुष्टं' निषिद्धम् । उत्क्षिप्त-निक्षिप्तयोर्मध्ये यद् आत्मप्रयोगेणैव गृहिणा पात्रमुत्क्षिप्तं तद् निक्षिप्तात् 'क्षमतरं' युक्ततरम् । यच्चार्द्रं प्राशुकद्रव्येण तक्रादिना तत् पात्रं श्रेयः, अर्थादापन्नम्-अप्राशुकेणार्द्रं परिहार्यम् ॥ अथ किं प्रकाशमुखं गृह्यताम्? अप्रकाशमुखं वा ? उच्यते-

[भा.६६४/१] जं होइ पगासमुहं, जोग्गयरं तं तु अप्पगासाओ ।

वृ-यद् भवति प्रकाशमुखं तत् तु 'योग्यतरं' संयमा-ऽऽत्मविराधनाया अभावाद् विशेषेण योग्यम् 'अप्रकाशाद्' अप्रकाशमुखभाजनात् । इत्थं पात्रस्य प्रशस्या-ऽप्रशस्यरूपतामुपवर्ण्य

Jain Education International For Private & Personal Use Only www.jainelibrary.org

तस्यैव विधिशेषमभिधातुमुपक्रमते-

[भा.६६४/२] तस-बीयाइ अदट्ठुं, इं तु जयणं पुणो कुणइ ॥

वृ- "तस-बीयाइ"इत्यादि पश्चार्धम् । तत् पात्रं चक्षुषा प्रत्युपेक्ष्य यदि त्रस-बीजादिकं जन्तु जातं किञ्चिद् न पश्यति तदा तद् अदृष्ट्वा 'इमां' वक्ष्यमाणां यतनां पुनः करोति ॥ तामेवाह-

[भा.६६५] ओमंथ पाणमाई, पुच्छा मूलगुण उत्तरगुणे य ।
तिट्ठाणे तिक्खुत्तो, सद्धो ससिणिद्धमाईसु ॥

वृ- "ओमंथ"त्ति तत् पात्रमवाङ्मुखं कृत्वा त्रीणि स्थानानि समाहृतानि त्रिस्थानं-मणिबन्धहस्ततल-भूमिकालक्षणम् तत्र 'त्रिकृत्वः' त्रीन् वारान् प्रत्येकं प्रस्फोटयेत् । ततः प्राणाः-त्रसाः तान् आदिशब्दाद् जीवादीनि वा दृष्ट्वा न गृह्णाति । "पुच्छा मूलगुण उत्तरगुणे य"त्ति शिष्यः पृच्छति-के मूलगुणाः ? त्ति यत्राप्कायः प्रक्षिप्यमाण आसीत् तदधुनाऽपनीताप्कायतया कदाचित् सस्निग्धं भवेत्, तच्च यदि त्रिकृत्वः प्रस्फोटनादिविधिं कुर्वता न परिभावितं तथापि श्रुतज्ञानप्रामाण्यबलेन शुद्धः, आदिशब्दाद् बीजकायपरिग्रहः ॥ एतदेव भावयति-

[भा.६६६] दाहिणकरेण कोणं, घेत्तुत्ताणेण वाममणिबंधे ।
खोडेइ तिन्नि वारे, तिन्नि तले तिन्नि भूमीए ॥

वृ- दक्षिणेन करेणोत्तानेन पात्रस्य 'कोणं' कर्णं गृहीत्वा पात्रमवाङ्मुखं कृत्वा वामहस्तस्य मणिबन्धे त्रीन् वारान् प्रस्फोटयति, ततस्त्रीन् वारान् हस्ततले, त्रीन् भूमिकायामिति ॥

[भा.६६७] तस-बीयाइ व दिट्ठे, न गिण्हई गिण्हई उ अद्दिट्ठे ।
गहणम्मि उ परिसुद्धे, कप्पइ दिट्ठेहि वि बहूहिं ॥

वृ- नवकृत्वः प्रस्फोटिते सति त्स-बीजादिजन्तुजातं यदि दृष्टं तदा न गृह्णाति, अथादृष्टं ततो गृह्णाति । अथ महताऽपि प्रयत्नेन प्रत्युपेक्ष्यमाणानि तदा बीजादीनि सन्त्यपि शुषिरत्वान्न दृष्टानि ततः को विधि ? इत्याह-कल्पते बहुभिरपि बीजादिभि पश्चाद्द दृष्टैरिति । किमुक्तं भवति? -तत् पात्रमप्राशुकमिति मत्वा न भूयोऽगारिणः प्रत्यर्प्यते, न वा परिष्ठाप्यते, श्रुतप्रामाण्येन गृहीतत्वात्; किन्त्वेकान्ते बहुप्राशुके प्रदेशे तानि बीजानि यतनया परिष्ठापयेत् ॥ अथ "पुच्छा मूलगुण उत्तरगुणे" त्ति अस्य निर्वचनमाह-

[भा.६६८] मुहकरणं मूलगुणा, पाए निक्कोरणं च इअरे उ ।
गुरुगा गुरुगा लहुगा, विसेसिया चरिमए सुद्धो ॥

वृ- पात्रस्य यद् मुखकरणं तद् मूलगुणाः । यत् पुनर्मुखकरणानन्तरं तदभ्यन्तरवर्तिनो गिरस्योत्किरणं तद् निक्कोरणमित्यभिधीयते तद् 'इतरे' उत्तरगुणाः । अत्र चतुर्भङ्गी-संयतार्थं कृतमुखं संयतार्थमेव चोत्कीर्णमिति प्रथमो भङ्गः, संयतार्थं कृतमुखं स्वार्थमुत्कीर्णमिति द्वितीयः, स्वार्थं कृतमुखं संयतार्थमुत्कीर्णमिति तृतीयः, स्वार्थं कृतमुखं स्वार्थमेवोत्कीर्णमिति चतुर्थ । अत्र त्रिषु भङ्गेषु प्रायश्चित्तम्, तद्यथा-प्रथमे भङ्गे चत्वारो गुरुकास्तपसा कालेन च गुरवः, द्वितीयेऽपि चतुर्गुरुकास्तपसा गुरवः कालेन लघवः, तृतीये चतुर्लघुकाः कालेन गुरवः तपसा लघवः । 'चरमे' चतुर्थे भङ्गे शुद्धः, उभयस्यापि स्वार्थत्वादिति ॥ व्याख्यातः पात्रकल्पिकः, अथावग्रहकल्पिकः प्ररूप्यते । तत्रापि "अप्पत्ते अकहित्ता" इत्यादिगाथा तथैव द्रष्टव्या । नवरं सूत्रमत्र आचारद्वितीय-

Jain Education International For Private & Personal Use Only www.jainelibrary.org

श्रुतस्कन्धस्य सप्तमम् अवग्रहप्रतिमानामकमध्ययनम् । अथ कतिविधोऽयमवग्रहः ? उच्यते-

[भा.६६९] देविंद-राय-गहवइउग्गहो सागारिए अ साहम्मी ।
पंचविहम्मि परूविए, नायव्वो जो जहिं कमइ ॥

वृ- देवेन्द्रः-शक्र ईशानो वा, स यावतः क्षेत्रस्य प्रभवति तावान् देवेन्द्रावग्रहः । राजा-चक्रवर्त्तिप्रभृतिको महर्द्धिकः पृथ्वीपति, स यावतः षट्खण्डभरतादेः क्षेत्रस्य प्रभुत्वमनुभवति तावान् राजावग्रहः । गृहपति-सामान्यमण्डलाधिपति, तस्याप्याधिपत्यविषयभूतं यद् भूमिखण्डं स गृहपत्यवग्रहः सागारिकः-शय्यातरः, तस्य सत्तायां यद् गृह-पाटकादिकं स सागारिकावग्रहः। साधर्मिकाः-समानधर्माणः साधवः, तेषां सम्बन्धि सक्रोशयोजनादिकं यद् आभाव्यं क्षेत्रं स साधर्मिकावग्रहः । एष च पञ्चविधोऽवग्रहः । एतस्मिन् पञ्चविधेऽवग्रहे वक्ष्यमाणभेदैः प्ररूपिते सति ज्ञातव्यो विधिरित्युपस्कारः । यः 'यत्र' देवेन्द्रादौ 'क्रमते' अवतरति स तत्रावतारणीय इति सङ्ग्रहगाथासमासार्थः ॥ साम्प्रतमेनामेव विवरीषुरमीषां पञ्चानां मध्ये कः कस्माद् बलीयान् ? इति जिज्ञासायां तावदिदमाह-

[भा.६७०] हेट्ठिल्ला उवरिल्लेहि बाहिया न उ लहंति पाहन्नं ।
पुव्वाणुन्नाऽभिनवं, च चउसु भय पच्छिमेऽभिनवा ॥

वृ- 'अधस्तनाः' देवेन्द्रावग्रहादयः 'उपरितनैः' राजावग्रहादिभिर्यथाक्रमं बाधिताः, अत एव 'न तु' नैव लभन्ते 'प्राधान्यम्' उत्तमत्वम् । किमुक्तं भवति ? -राजावग्रहे राजैव प्रभवति न देवेन्द्रः, ततो देवेन्द्रेणानुज्ञातेऽप्यवग्रहे यदि राजा नानुजानते तदा न कल्पते तदवग्रहे स्थातुम्; अथानुमतं गृहपतिना स्वभूमिखण्डेऽवस्थानं परं न सागारिकेण स्वावग्रहे, ततोऽपि न कल्पते वस्तुम्; अथानुज्ञातः सागारिकेण स्वावग्रहः परं न साधर्मिकैः, तथापि न कल्पते इति; एवमुपरितनैरधस्तना बाध्यन्ते । तथा पूर्वामनुज्ञामभिनवां च चतुर्ष्ववग्रहेषु 'भज' विकल्पय, केषाञ्चित् साधूनां पूर्वानुज्ञा तदपरेषामभिनवेति भजना कार्येत्यर्थः । अथ केयं पूर्वानुज्ञा ? का वाऽभिनवानुज्ञा ? इति, उच्यते-इह योऽवग्रहः पुरातनसाधुभिरनुज्ञापितः स यत् पाश्चात्यैरेवमेव परिभुज्यते न भूयोऽनुज्ञाप्यते सा पूर्वानुज्ञा । यथा-चिरन्तनसाधुभिर्देवेन्द्रो यदवग्रहमनुज्ञापितः सैव पूर्वानुज्ञा साम्प्रतकालीनसाधूनामप्यनुवर्त्तते न पुनर्भूयोऽप्यनुज्ञाप्यते । अभिनवानुज्ञा नाम यदा किलान्यो देवेन्द्रः समुत्पद्यते तदा तत्कालवर्त्तिभि साधुभिर्यदसावभिनवोत्पन्नतयाऽवग्रह-मनुज्ञाप्यते सा तेषां साधूनामभिनवानुज्ञा तदन्येषां तु पूर्वानुज्ञैव । राजावग्रहेऽपि यो यदा चक्रवर्ती समुत्पद्यते स तत्कालवर्तिभि साधुभिर्यदनुज्ञाप्यते सा तेषामभिनवानुज्ञा, तदपरेषां पूर्वानुज्ञा । एवं शेषनृपति-गृहपतीनामपि पूर्वा-ऽभिनवानुज्ञे भावनीये । सागारिकोऽपि प्रथमत उपागतैः साधुभिर्यदुपाश्रयमनुज्ञाप्यते सा तेषामभिनवानुज्ञा । तेषु साधुषु तत्र स्थितेषु यदन्ये साधवः समागत्य तदनुज्ञापितमवग्रहं परिभुञ्जते सा पूर्वानुज्ञा । तदेवं चतुर्ष्ववग्रहेषु पूर्वा-ऽभिनवानुज्ञ-योर्भजना भाविता । तथा पश्चिमे साधर्मिकावग्रहेऽभिनवानुज्ञैव भवति न पूर्वानुज्ञा । तथाहि-यो यदाऽवग्रहार्थं साधर्मिकमुपसम्पद्यते स सर्वोऽपि तदानीं तमनुज्ञाप्यैवावतिष्ठते नान्यथेत्यभिन-वानुज्ञैवैका ॥ अथामीषां पञ्चानामपि भेदानाह-

[भा.६७१] दव्वाई एक्केक्को, चउहा कित्तं तु तत्थ पाहन्ने ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

तत्थेव य जे दव्वा, कालो भावो अ सामित्ते ॥

वृ- एकैकोऽवग्रहश्चतुर्द्धा-द्रव्यतः क्षेत्रतः कालतो भावतश्च । तत्र प्रथमतः क्षेत्रावग्रहः प्ररूप्यते । कुतो हेतोः ? इति चेद् उच्यते-'क्षेत्रं तु' क्षेत्रं पुनः 'तत्र' तेषु द्रव्यादिषु मध्ये प्राधान्ये वर्त्तते, इहावग्रहस्य प्ररूप्यमाणत्वात् तस्य च तत्त्वतः शक्रादिक्षेत्ररूपतयाऽभिधीयमानत्वादिति भावः । यतश्च 'तत्रैव च' क्षेत्रे यानि द्रव्याणि यश्च कालो भावश्च एतेषां त्रयाणामपि क्षेत्रमाधारभूतं स्वामित्वे वर्त्तते, क्षेत्रस्यैव सम्बन्धित्वात् तेषाम् । तस्मिंश्च प्रथमं प्ररूपिते द्रव्यादयस्तदन्तर्गताः प्ररूपिता एव भवन्तीति ॥ प्रथमतः क्षेत्रावग्रहं प्ररूपयति-

[भा.६७२] पुव्वावरायया खलु, सेढी लोगस्स मज्झयारम्मि ।
जा कुणइ दुहा लोगं, दाहिण तह उत्तरद्धं च ॥

वृ- इह सर्वस्यापि लोकस्य 'मध्यकारे' मध्यभागे मन्दरस्य पर्वतस्योपरि 'श्रेणि' आकाशप्रदेशपङ्क्तिरेकप्रादेशिकी पूर्वापरयोर्दिशोरायता-प्रदीर्धा समस्ति, 'या' श्रेणिर्लोकमेकरूपमपि द्विधा करोति । तद्यथा-दक्षिणलोकार्द्धमुत्तरलोकार्द्धं च । तत्रदक्षिणलोकार्द्धस्य शक्रः प्रभुत्वनुभवति, उत्तरलोकार्द्धस्य पुनरीशानकल्पनायकः । तथा दक्षिणलोकार्द्धे यान्यावलिकाप्रविष्टानि पुष्पावकीर्णानि वा विमानानि तानि शक्रस्यैवाऽऽभाव्यानि, यानि पुनरुत्तरार्द्धे तानि सर्वाण्यपि द्वितीयकल्पाधिपतेः ॥

अथ यानि मध्यमश्रेण्यां तानि कस्याऽऽभवन्ति ? इत्याह-

[भा.६७३] साधारण आवलिया, मज्झम्मि अवड्ढचंदकप्पाणं ।
अद्धं च परक्खित्ते, तेसिं अद्धं च सक्खित्ते ॥

वृ- 'अपार्द्धचन्द्रकल्पयोः' अर्द्धचन्द्राकारयोः सौधर्मेशानकल्पयोः पूर्वा-ऽपरायतायां मध्यमश्रेण्यां या विमानानामावलिका सा साधारणा शक्रेशानयोः । किमुक्तं भवति ?-तस्यां मध्यमश्रेण्यां पूर्वस्यामपरस्यां च दिशि त्रयोदशस्वपि प्रस्तटेषु यानि विमानानि तानि कानिचित् शक्रस्य कानिचिदीशानस्याऽऽभाव्यानि । तत्र यानि वृत्ताकाराणि तानि सर्वाण्यपि शक्रस्यैच, यानि पुनस्त्र्यस्राणि चतुरस्राणि वा तान्येकं शक्रस्यैकमीशानस्येत्येवमुभयोरपि साधारणानि । तथा चोक्तम्-

जे दक्खिणेण इंदा, दाहिणओ आवली भवे तेसिं ।
जे पुन उत्तरइंदा, उत्तरओ आवली तसिं ॥
पुव्वेण पच्छिमेण य, जे वट्टा ते विदाहिणल्लस्स ।
तंस चउरंसगा पुन, सामन्ना हुंति दोण्हं पि ॥

तेषां च मध्यमश्रेणिगतानां विमानानामर्द्धं 'स्वक्षेत्रे' स्वस्वकल्पसीमनि प्रतिष्ठितम्, तदपरमर्द्धं 'परक्षेत्रे' अपरकल्पसीमनीति ॥ अथ शक्रमुद्दिश्य क्षेत्रावग्रहप्रमाणमाह-

[भा.६७४] सेढीइ दाहिणेणं, जा लोगो उड्ढ मो सकविमाणा ।
हेट्ठा वि य लोगंतो, खित्तं सोहम्मरायस्स ॥

वृ- 'सौधर्मराजस्य' सौधर्मकल्पाधिपतेस्तावत् क्षेत्रमाधिपत्यविषयभूतम्-तिर्यग्दिश-मधिकृत्य 'श्रेण्याः' पूर्वोक्तायाः 'दक्षिणेन' दक्षिणस्यां दिशि 'यावद् लोकः' इति तिर्यग्लोकपर्यन्तः,

Jain Education International For Private & Personal Use Only www.jainelibrary.org

ऊर्ध्वदिशमाश्रित्य 'मो' पादपूरणे यावत् स्वविमानानि स्तूप-ध्वजकलितानि, अधोदिशमुद्दिश्य यावदधस्तनो लोकान्त इति ॥ भावितो देवेन्द्रक्षेत्रावग्रहः । सम्प्रति चक्रिणः क्षेत्रावग्रहमाह-

[भा.६७५] सरगोयरो अ तिरियं, बावत्तरिजोयणाइं उड्ढं तु ।
अहलोगगाम-अधमाइ हेट्ठओ चक्किणो खित्तं ॥

वृ-यावत् शरस्य-बाणस्य गोचरः-विषयस्तावत् चक्रिणस्तिर्यक् क्षेत्रम् । इदमुक्तं भवति-चक्रवर्ती दिग्विजययात्रां कुर्वन् मागधादिषु तीर्थेषु यं नामाङ्कितं बाणं निसृजति स पूर्व-दक्षिणा-ऽपरसमुद्रेषु द्वादशयोजनान्तं यावद् गच्छति, एतावदन्तश्चक्रिणस्तिर्यगवग्रहः । स एव बाणः क्षुद्रहिमवत्कुमारदेवसाधनार्थं चक्रिणैव निसृष्ट ऊर्ध्वं द्वासप्ततियोजनानि यावद् गच्छति तावानूर्धमवग्रहः । अधः पुनरधोलोकग्रामाः, तथा अधा-गर्त्ता, आदिशब्दाद्वापी-कूप-भूमि-गृहादिपरिग्रहः । इयमत्र भावना-जम्बूद्वीपापारविदेहवर्त्तिनलिनावती-वप्राभिधानविजययुगल-समुद्भवा योजनसहस्रद्वेधाः समयप्रसिद्धा येऽधोलोकग्रामास्तेषु ये चक्रवर्त्तिनः समुत्पद्यन्ते तेषां त एवाधः क्षेत्रावग्रहः, तदपरेषां तु गर्त्ता-कूप-भूमिगृहादिकमिति ॥ प्ररूपितो राज्ञः क्षेत्रावग्रहः। अथ गृहपति-सागारिकयोस्तमाह-

[भा.६७६] गहवइणो आहारो, चउद्दिसिं सारियस्स घरवगडा ।
हेट्ठा अधा-ऽगडाई, उड्ढं गिरि-गेहधय-रुक्खा ॥

वृ- 'गृहपतेः' मण्डलेश्वरस्य यावान् 'आधारः' विषयः प्रभुत्वविषयभूतश्चतसृषु दिक्षु तावानस्योत्कृष्टस्तिर्यगवग्रहः । 'सागारिकस्य' शय्यतरस्य 'गृहवगडा' गृहवृतिपरिक्षेप उत्कृष्ट-स्तिर्यगवग्रहः । द्वयोरपि चाधस्ताद् 'अधा-ऽगडादयः' अधा-गर्त्ता ह्रदो वा, अगडः-कूपः, आदि-शब्दाद् वाप्यादयः; उर्ध्वं 'गिरि-गेहध्वज-वृक्षाः' गिरयः-पर्वताः, गृहध्वजाः-गृहोपरि वर्त्तिन्यः पताकाः, वृक्षाः-सहकारादयः । साधर्मिकाणां तु क्षेत्रावग्रह उत्कृष्टः कुतोऽपि हेतोरत्र नोक्तः, परं बृहद्भाष्ये इत्थमभिहितः-

खित्तोग्गहो सकोसं, जोयण साहम्मियाण बोधव्वं ।
छद्दिसि जा एगदिसिं, उज्जाणं वा मडंबाई ॥

मडम्बादौ उद्यानं यावदुत्कृष्टः क्षेत्रावग्रहः । शेषंसुगमम् ॥ अथ जघन्यमभिधातुकाम आह-

[भा.६७७] अजहन्नमणुक्कोसो, पढमो जो आवि चक्कवट्टीणं ।
सेसनिव रोहगाइसु, जहन्नओ गहवईणं च ॥

वृ- 'प्रथमः' दवेन्द्रावग्रह 'अजघन्योत्कृष्टः' न जघन्यो न वा उत्कृष्टः किन्तूभयविवक्षारहितः, सर्वदैवैकरूपत्वात् । यश्चाप्यवग्रहः चक्रवर्तिनां सम्बन्धी सोऽप्यजघन्योत्कृष्टः, सर्वचक्रवर्तिना-माधिपत्यस्यैकरूपत्वात् । 'शेषनृपाणां' चक्रवर्त्तिव्यतिरिक्तानां नृपतीनां गृहपतीनां च रोधकादिषु जघन्यः क्षेत्रावग्रहो द्रष्टव्यः । रोधनं रोधकः-परचक्रेण नगरादेर्वेष्टनम्, आदिशब्दादन्यस्याप्ये-वंविधविड्वरस्य परिग्रहः । इयमत्र भावना-कोऽपि बलवान् राजा मण्डलेश्वरो वा कस्याप्यलपबलस्य नरपतेर्गृहपतेर्वा बाह्यनीवृतमात्मात्कृत्य यदा तदीयं नगरादि निरुध्यावतिष्ठते तदा तस्य तावान् नगरादिमात्रको जघन्यः क्षेत्रावग्रहः ॥

[भा.६७८] नगराइ निरुद्ध धरे, जा याऽणुन्ना उ दु चरिम जहन्नो ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

अक्कोसो उ, अनियओ, अचक्किमाईचउण्हं पि ॥

वृ- 'द्वौ चरमौ' सागारकसाधर्मिकौ तयोरयं जघन्यः क्षेत्रावग्रहो नगरादौ केनचिद् राज्ञा निरुद्धे बाहिरिकावास्तव्यजनैरभ्यन्तरतः प्रविशद्भिः शय्यातरगृहं साधर्मिकोपाश्रयो वा यदा प्रेर्यते तदा या काचित् तेषामनुज्ञा, यथा-एतावति प्रदेशे युष्माभि स्थातव्यम् एतावत्य स्माभिरिति स जघन्यः क्षेत्रावग्रहः। उत्कृष्टः पुनरवग्रहः अनियतः, कस्याप्यल्पीयान् कस्यापि भूयानिति भावः केषाम्? इत्याह-अचक्र्यादीनां चतुर्णामपि, यश्चक्री न भवति किन्तु सामान्यपार्थिवः स नञः पर्युदासप्रतिषेधतया तत्सदृशग्राहकत्वादचक्री भण्यते, आदिशब्दाद् गृहपत्यादयो गृह्यन्ते॥ अथ सागारिकावग्रहस्य विशेषत उपयोगित्वाद् विधिमाह-

[भा. ६७९] अणुन्नाए वि सव्वम्मी, उग्गहे घरसामिणा।
तहा वि सीमं छिंदंति, साहू तप्पियकारिणो ॥

वृ- 'गृहस्वामिना' शय्यातरेण 'भाजनधावन-कायिक्यादिव्युत्सर्जन-स्वाध्याय-ध्यानादिकं यत्र यत्र भवतां रोचते तत्र तत्र कुरुत' इत्येवं यद्यपि सर्वोऽप्यवग्रहोऽनुज्ञातस्तथापि साधवः तस्य-सागारिकस्य प्रियकारिणः-समाधिविधित्सवः 'सीमां' मर्यादां 'छिन्दन्ति' निर्धारयन्ति, व्यवस्थां स्थापयन्तीत्यर्थः॥ तामेव सीमामभिधत्ते-

[भा. ६८०] झाणट्ठया भायणधोवणाई, दोण्हऽट्ठया अच्छणहेउगं च।
मिउग्गहं चेव अहिट्ठयंते, मा सो व अन्नो व करेज्ज मन्नुं ॥

वृ- ध्यानार्थं भाजनधावनाद्यर्थं द्वयोः-उच्चार-प्रश्रवणयोरर्थाय "अच्छण"त्ति उपविश्यावस्थानं तद्धेतुकं च-तन्निमित्तकं 'मितावग्रहमेव' परिमितमेवावग्रहमधितिष्ठन्ति। किमुक्तं भवति? साधवो व्यवस्थां स्थापयन्ति शय्यातरमामन्त्रय ब्रुवते-श्रावक! वयमियति प्रदेशे ध्यानमध्यासिष्यामहे नेतः परम्, अत्र भाजनानि धाविष्यामो नान्यत्र, यदि नाम ग्लानादे रात्रावुच्चार-सम्भवो भवेत् ततोऽत्र परिष्ठापयिष्यते, अत्र पुनः कायिकी व्युत्सृजिष्यते, इह पुनः साधवो भाजनरञ्जनादिकं कुर्वन्तः कियतीमपि वेलामासिष्यन्ते, एवं व्यवस्थाप्य मितमेवावग्रहमधितिष्ठन्ति। कुतः? इत्याह-मा 'स वा' सागारिकः 'अन्यो वा' तदीयो वयस्य-स्वजनादि सबाल वृद्धाकुलेन गच्छेनातिप्राचुर्येणाऽऽक्रान्ते कायिक्यादिना वाविनाशितेऽवग्रहे 'मन्युम्' अप्रीतिकं कुर्यात्। अपि च तथा साधुभिरप्रमत्तैस्तत्र स्थातव्यं यता शय्यातरश्चिन्तयेत्-अहो! निभृतस्वभावा अमी मुनयः, यदेतावन्तोऽपि सन्तः स्वसमयोदितमाचारमाचरन्तोऽपि परस्परं विकथादिकमकुर्वन्तो निर्व्यापारा इव लक्ष्यन्ते, तत् सर्वथा कृतार्थोऽस्म्यहममीषां भगवतां शय्यायाः प्रदानेन, तीर्णप्रायो मयाऽयमपारोऽपि संसारपारावार इति ॥ प्ररूपितः क्षेत्रावग्रहः। सम्प्रति द्रव्यावग्रहमाह-

[भा. ६८१] चेयणमचित्त मीसग दव्वा खलु उग्गहेसु एएसु।
जो जेन परिग्गहिओ, सो दव्वे उग्गहो होइ ॥

वृ- 'एतेषु' देवेन्द्राद्यवग्रहेषु यानि 'चेतनानि' स्त्र-पुरुषादीनि 'अचित्तानि' वस्त्र-पात्रादीनि 'मिश्राणि' सभाण्डोपकरणस्त्र-पुरुषादीनि यानि द्रव्याणि सः 'द्रव्ये' द्रव्यविषयोऽवग्रहः। कथम्भूतः? इत्याह-यो येन शक्रादिना परिगृहीतः स तस्य सम्बन्धी द्रव्यावग्रहः। किमुक्तं

Jain Education International For Private & Personal Use Only www.jainelibrary.org

भवति ? -देवेन्द्रावग्रहक्षेत्रे यानि सचित्ता-ऽचित्त-मिश्राणि द्रव्याणि तानि सर्वाण्यपि देवेन्द्रद्रव्यावग्रहः। एवं राजावग्रहादिष्वपि भावना कार्या ॥ उक्तो द्रव्यावग्रहः, अथ कालावग्रहमाह-

[भा.६८२] दो सागरा उ पढमो, चक्की सत्त सय पुव्व चुलसीई।
सेसनिवम्मि मुहुत्तं, जहन्नमुक्कोसए भयणा ॥

वृ- 'प्रथमः' देवेन्द्रावग्रहः स द्वेसागरोपमे यावद् भवति, शक्रस्य द्विसागरोपमस्थितिकत्वात्। 'चक्री' चक्रवर्त्यवग्रहो जघन्यतः सप्त वर्षशतानि ब्रह्मदत्तवत्, उत्कर्षतः पुनश्चतुरशीतिपूर्वशतसहस्राणि भरतचक्रवर्त्तिवत्। तथा च चूर्णिः- चक्कवट्टिउग्गहो जहन्नेणं सत्त वाससया बंभदत्तस्स, उक्कोसेणं चउरासीइपुव्वसयसहस्साइं भरहस्स ॥ अत्र परः प्राह-ननु ब्रह्मदत्तः कुमारतायामष्टाविंशतिं माण्डलिकत्वे षट्पञ्चाशतं दिग्विजये षोडश वर्षाण्यतिवाह्य षड् वर्षशत्येव चक्रवर्तिपदवीमनुबभूव, भरतोऽपि सप्तसप्ततिपूर्वलक्षाणि कुमारभावमनुभूय वर्षसहस्रं माण्डलिकत्वमनुपाल्य षष्टिवर्षसहस्राणि विजययात्रायां व्यतीत्य ततः किञ्चिद् न्यूनानि षट् पूर्वलक्षाणि सार्वभौमश्रियं बुभुजे, ततः कथमनयोः सप्त वर्षशतानि चतुरशीतिपूर्वलक्षाणि च यथाक्रमं चक्रवर्त्यवग्रहः प्रतिपाद्यमानो न विरुध्यते ? नैष दोषः, इह योग्यतामङ्गीकृत्य भरतादयो जन्मत एव चक्रवर्तिनो मन्तव्याः, यत उत्पन्नमात्र एव चक्रवर्त्तिनि तदीयतथाविधाद्भुतभाग्यसम्भार-समावर्जितास्तदाभाव्यक्षेत्रनिवासिदेवताः 'उत्पन्नोऽयं सकलमहीवलयस्वामी' इति प्रमोदभाजस्तदानुकूल्यवृत्तयस्तज्जयामिलाषिण्यस्तत्तत्प्रत्यनीकप्रयुक्तप्रत्यूहापहाराय प्रवर्त्तन्त इति समीचीनमेव यथोक्तमवग्रहकालमानम्; अन्यथा वा बहुश्रुतैरुपयुज्य निर्वचनीयमिति। "सेसनिवम्मि मुहुत्तं" ति चक्रवर्त्तितं मुक्त्वा यः शएषो नृपस्तस्य जघन्यतोऽन्तर्मुहूर्त्तं कालावग्रहः, कृतराज्याभिषेकस्यान्तर्मुहूर्ताद्दूर्द्ध मरणाद् राज्यपदपरिभ्रशाद्वा। "उक्कोसए भयण" त्ति शेषनृपतीनामुत्कृष्टे कालावग्रहे भजना कार्या। किमुक्तं भवति ? -अन्तर्मुहूर्त्तादारभ्य समयवृद्या वर्द्धमानानि चतुरशीतिपूर्वलक्षाणि यावद् यान्यु स्थानानि तेषां मध्ये यद् येन नृपतिनाऽऽयुःस्थानं निर्वर्त्तितं यो वा यावन्तं कालं राज्यैश्वर्यमनुभवति तस्य स उत्कृष्टः कालावग्रहः ॥

[भा.६८३] एवं गहवइ-सागारिए वि चरिमे जहन्नओ मासो।
उक्कोसो चउमासा, दोहि वि भयणा उ कज्जम्मि ॥

वृ- एवं गृहपति-सागारिकयोरपि शेषनृपतिवद् जघन्य उत्कृष्टश्च कालावग्रहो द्रष्टव्यः। इह च यद्यपि शेषनृपति-गृहपति-सागारिकाणामाद्यंपि पूर्वकोटिपर्यवसितान्यपि सम्भाव्यन्ते तथापि चूर्णिकृता किमपि बाहुल्यादि कारणमुद्दिश्य चतुर्शीतिपूर्वलक्षपर्यन्तान्येवाभिहितानीति अत्रापि तदनुरोधेन तथैव व्याख्यातानि। तथा 'चरमे' साधर्मिकावग्रह ऋतुबद्धे मासकल्पविहारिणां जघन्यो मासमेकम् उत्कृष्टो वर्षासु चतुरो मासान् कालावग्रहः। "दोसु वि मयणा उकज्जम्मि" त्ति 'द्वयोरपि' जघन्योत्कृष्टयोः कार्ये समापतिते भजना। किमुक्तं भवति ? -ग्लानादिभि कारणैः कदाचिद् ऋतुबद्धे मासो वर्षासु चत्वारो मासा न प्रतिपूर्येरन् अतिरिक्ता वा भवेयुः ॥ गतः कालावग्रहः। अथ भावावग्रहमाह-

[भा.६८४] चउरो ओदइअम्मी, खओवसमियमम्मि पच्छिमो होइ।
मनसी करणमणुन्नं, च जाण जं जत्थ ऊ कमइ ॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

वृ- 'चत्वारः' ,देवेन्द्र-राज-गृहपति-सागारिकाणामवग्रहा औदयिके भावे वर्त्तन्ते, 'ममेदं क्षेत्रम्' इत्यादिमूर्च्छायास्तेषु सद्भावात्, तस्याश्च कषायमोहनीयोदयजन्यत्वात् । 'पश्चिमः' साधर्मिकावग्रहः स क्षायोपशमिके भावे वर्त्तते, कषायमोहनीयक्षयोपशमयुक्ततया 'ममेदं क्षेत्रम्, ममायमुपाश्रयः' इत्यादिमूर्च्छायाः साधूनामभावात् । एष भावावग्रहः । तदेवं प्ररूपितः पञ्च-विधोऽप्यवग्रहः । अथ यदुक्तं द्वारगाथायाम् "पंचविहम्मि परूविए, वावओ जो जहिं कमइ" त्ति तदिदानीं भाव्यते-"मनसी करणमणुन्नं चे"त्यादि । मनसि करणमनुज्ञां च जानीहि, यद् 'यत्र' देवेन्द्रावग्रहादौ 'क्रामति' अवतरति तत्र 'मनसि' चेतसि करणम् 'अनुजानीतां यस्यावग्रहः' इति मनस्येवानुज्ञापनमिति हृदयम् । यत् पुनर्वचसाऽनुज्ञाप्यते साऽनुज्ञा, अन्तर्भूतण्यर्थत्वादनुज्ञा-पनेति भावः । तत्र देवेन्द्र-राजावग्रहयोर्मनसैवानुज्ञपनं करोति, गृहपत्यवग्रहस्य मनसा वा वचसा वा, सागारिक-साधर्मिकावग्रहयोर्नियमाद् वचसाऽनुज्ञापना, यथा-अनुजानीतास्माकं शय्यां वस्त्र-पात्र-शैक्षादिकं वेत्यादि ॥ अथ भावावग्रहं प्रकारान्तरेणाह-

[भा.६८५] भावोग्गहो अहव दुहा, मइ-गहणे अत्थ-वंजणे उ मई ।
गहणे जत्थ उ गिण्हे, 'मणसी कर' अकरणे तिविहं ॥

वृ- अथवा भावावग्रहो द्विधा-मतिभावावग्रहो ग्रहणभावावग्रहश्च । तत्र 'मति' मतिज्ञानरूपभावावग्रहो भूयोऽपि द्विधा-व्यञ्जनावग्रहोऽर्थावग्रहश्च । गाथायां बन्धानुलोम्येन पूर्वमर्थशब्दस्य निर्देशः । 'ग्रहणे' ग्रहणविषयो भावावग्रहः 'यत्र तु' यस्मिन् पुनर्देवेन्द्रावग्रहादौ यदा साधुः किञ्चिद् वस्तुजातं गृह्णाति सचित्तमचित्तं मिश्रंवा तस्य तदा ग्रहणभावावग्रहः । "मनसी कर" त्ति मनसि करणस्य उपलक्षणत्वाद् अनुज्ञापनायाश्चाकरणे त्रिविधं प्रायश्चित्तम् ॥ एतदेव सविशेषमाह-

[भा.६८६] पंचविहम्मि परूविए, स उग्गहो जाणएण घेत्तव्वो ।
अन्नाए उग्गहिए, पायच्छित्तं भवे तिविहं ॥

वृ- 'पञ्चविधे' अवग्रहे प्ररूपित सतीदं तात्पर्यमभिधीयते-स एवंविधोऽवग्रहः 'ज्ञायकेन' पञ्चप्रकारावग्रहस्वरूपवेदिना ग्रहीतव्यो नाज्ञायकेन । कुतः ? इत्याह-'अज्ञाते' अनधिगते सति यद्यवग्रहमवगृह्णाति ततस्तस्मिन्नवगृहीते त्रिविधं प्रायश्चित्तं भवति ॥ तदेवाह-

[भा.६८७] इक्कड-कढिणे मासो, चाउम्मासो अ पीढ फलएसु ।
कट्ठ-कलिंचे पणगं, छारे तह मल्लगाईसु ॥

वृ-इक्कडं-ढण्ढणी कठिनः-शरस्तम्बः तयोः संस्तारकं मासलघु । काष्ठमयेषु पीठेषु फलकेषु च प्रत्येकं चत्वारो मासलघवः । काष्ठं च-काष्ठशकलं कलिञ्चं च-वंशदलं काष्ठ-कलिञ्चं तत्र तथा 'क्षारे' भस्मनि 'मल्लकादिषु' मल्लकं-शरावम् आदिशब्दात् तृण-डगलादिपरिग्रहः, एतेषु सर्वेष्वपि 'पञ्चकं' पञ्च रात्रिन्दिवानि इति त्रिविधं प्रायश्चित्तमज्ञातावग्रहस्वरूपस्यावग्रहणे द्रष्टव्यम् ॥

उक्तोऽवग्रहकल्पि । सम्प्रति विहारकल्पिकमाह-

[भा.६८८] गीयत्थो य विहारो, बीओ गीयत्थनिस्सिओ भणिओ ।
इत्तो तइयविहारो, नाणुन्नाओ जिनवरेहिं ॥

वृ- गीतः-परिज्ञातोऽर्थो यैस्ते गीतार्था-जिनकल्पिकादयः, तेषां स्वातन्त्र्येण यद् विहरं

Jain Education International For Private & Personal Use Only www.jainelibrary.org

स गीतार्थो नाम प्रथमो विहारः । तथा गीतार्थस्य-आचार्योपाध्यायलक्षणस्य निश्रिताः-परतन्त्रायद् गच्छवासिनो विहरन्ति स गीतार्थनिश्रितो नाम द्वितीयो विहारो भणितः । इत ऊर्द्ध्वमीतार्थस्य स्वच्छन्दविहारितारूपस्तृतीयोविहारो नानुज्ञातः 'जिनवरैः' भगवद्भिस्तीर्थकरैरिति ।।

अथैनामेव निर्युक्तिगाथां विवृणोति-

[भा.६८९] गीयं मुणितेगट्ठं, विदियत्थं खलु वयंति गीयत्थं ।
गीएण य अत्थेण य, गीयत्थो वा सुयं गीयं ।।

वृ- गीतं मुणितम्मि वैकार्थम् । ततश्च विदितः-मुणितः परिज्ञातोऽर्थ छेदसूत्रस्य येन तं विदितार्थं खलु वदन्ति गीतार्थम् । यद्वा गीतेन चार्थेन च यो युक्तः स गीतार्थो भण्यते, गीता-ऽर्थावस्य विद्येते इति अभ्रादित्वाद् अप्रत्ययः । अथ गीतं किमुच्यते ?, अत आह- 'श्रुतं' सूत्रं गीतमित्यभिधीयते ।। एतदेव भावयति-

[भा.६९०] गीएण होइ गीई, अत्थी अत्थेण होइ नायव्वो ।
गीएण य अत्थेण य, गीयत्थं तं विजाणाहि ।।

वृ- इह सूत्रा-ऽर्थधरत्वे चतुर्भङ्गी, तद्यथा-सूत्रधरो नामैको नार्थधरः १ अर्थधरो नामैको न सूत्रधरः २ एकः सूत्रधरोऽप्यर्थधरोऽपि ३ अपरो न सूत्रधरो नार्थधरः ४। अयं चतुर्थो भङ्ग उभयशून्यत्वादवस्तुभूतः, शेषं भङ्गत्रयमधिकृत्याह-'गीतेन' सूत्रेण केवलेन सम्यक्पठितेन गीतमस्यास्तीति गीती भवति । अर्थेन केवलेन सम्यगधिगतेनार्थी भवति ज्ञातव्यः, अर्थधर इत्युक्तं भवति । यस्तु गीतेन चार्थेन चोभयेनापि युक्तस्तं गीतार्थं विजानीहि इति । इदमत्र तात्पर्यम्-तृतीयभङ्गवर्त्त्येव तत्त्वतो गीतार्थशब्दमविकलमुद्वोढुमर्हति, न प्रथमद्वितीयभङ्गवर्त्ति-नाविति ।। अथ येषां गीतार्थानां तन्निश्रितानां वा विहारो भवति तान् दर्शयति-

[भा.६९१] जिनकप्पिओ गीयत्थो, परिहारविसुद्धिओ वि गीयत्थो ।
गीयत्थे इड्ढिदुगं, सेसा गीयत्थनीसाए ।।

वृ- जिनकल्पिको नियमाद गीतार्थ, परिहारविशुद्धिकः अपिशब्दात् प्रतिमाप्रतिपन्नको यथालन्दकल्पिकश्चावश्यंतया गीतार्थः, जघन्यतोऽप्यधीतनवमपूर्वान्तर्गताचारनामकतृतीय-वस्तुकत्वादेषामिति । तथा गच्छे गीतार्थविषयमृद्धिमतो-आचार्योपाध्याययोर्द्धिकं द्रष्टव्यम्, सूत्रे मतुलोपः प्राकृतत्वात्, आचार्य उपाध्यायो वा नियमाद् गीतार्थ इत्यर्थः । एषां सर्वेषामपि स्वातन्त्र्येण विहारो विज्ञेयः । 'शेषाः' सर्वेऽपि साधवः 'गीतार्थनिश्रया' आचार्योपाध्यायलक्षण-गीतार्थपारतन्त्र्येण विहरन्ति ।। इदमेव पश्चार्द्धं भावयति-

[भा.६९२] आयरिय गणी इड्ढी, सेसा गीता वि होंति तन्नीसा ।
गच्छगय निग्गया वा, थाणनिउत्ताऽनिउत्ता वा ।।

वृ- 'आचार्य' सूरि 'गणी' उपाध्याय एतौ यतः 'ऋद्धिमन्तौ' सातिशयज्ञानादिऋद्धिसव्यन्नौ, अतिशायनेऽत्र मत्वर्थीयः, यथा रूपवती कन्येत्यादौ, अतः शेषाः साधवो गीतार्था अपि तन्निश्रया विहरन्ति । अथ के ते शेषाः ? इत्याह-गच्छगता गच्छनिर्गता वा । तत्र गच्छगताः गच्छमध्यवर्त्तिनः, गच्छनिर्गताः "असिवे ओमोअरिए" इत्यादिभि कारणैरेकाकीभूताः; अथवा 'स्थाननियुक्ताः स्थानानियुक्ता वा' स्थाने-पदे नियुक्ताः-व्यापारिताः 'स्थानानियुक्ताः' सामान्यसाधव इत्यर्थः ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

एते सर्वेऽप्याचार्योपाध्यायनिश्रया विहरन्ति ॥ कथम् ? इत्याह-

[भा.६९३] आयारपकप्पधरा, चउदसपुव्वी अ जे अ तम्मज्झा ।
तन्नीसाए विहारो, सबाल-वुड्डस्स गच्छस्स ॥

वृ- 'आचारप्रकल्पधराः' निशीथाध्ययनधारिणो जघन्या गीतार्था, चतुर्दशपूर्विणः पुनरुत्कृष्टाः, 'तन्मध्यवर्त्तिनः' कल्प-व्यवहार-दशाश्रुतस्कन्धधरादयो मध्यमाः । तेषां-जघन्य-मध्यमोत्कृष्टानां गीतार्थानां निश्रा सबाल-वृद्धस्यापि गच्छस्य विहारो भवति, न पुनरगीतार्थस्य स्वच्छन्दमेकाकिविहारः कर्त्तुं युक्तः ॥ कुतः ? इति चेद् उच्यते-

[भा.६९४] एगविहारी अ अजायकप्पिओ जो भवे चवणकप्पे ।
उवसंपन्नो मंदो, होहिइ वोसट्ठतिट्ठाणो ।

वृ- एकः सन् विहरतीत्येवंशील एकविहारी, स च 'अजातकल्पिकः' अगीतार्थ, तथा च्यवनं-चारित्रात्प्रतिपतनं तस्य कल्पः-प्रकारश्च्यवनकल्पः, पार्श्वस्थादिविहार इत्यर्थः, तस्मिन् यो भवेत् स एकाकित्वम् 'उपसम्पन्नः' प्रतिपन्नः सन् 'मन्दः' सद्बुद्धिविकलो भविष्यति 'व्युत्सृष्ट-त्रिस्थानः' व्युत्सृष्टानि-परित्यक्तानि त्रीणि स्थानानि-ज्ञानादिरूपाणि येन स व्युत्सृष्टत्रिस्थानः । एषा निर्युक्तिगाथा ॥ अथैनामेव विवृणोति-

[भा.६९५] मोत्तूण गच्छनिग्गते, गीयस्स वि एक्कगस्स मासो उ ।
अविगीए चउगुरुगा, चवणे लहुगा य भंगट्ठ ॥

वृ- मुक्त्वा 'गच्छनिर्गतान्' जिनकल्पिकादीन् गीतार्थस्यापि 'एककस्य' एकाकिविहारं कुर्वतो मासलघु । 'अविगीते' अगीतार्थे एकाकिविहारिणि चत्वारो गुरुकाः । 'च्यवने' पार्श्वस्थादिविहारे यदि मनसाऽपि संकल्पं कुरुते तदा चत्वारो लघुकाः । ''भंगट्ठ''त्ति अष्टौ भङ्गा अत्र कर्त्तव्याः, तद्यथ-एकाकी अजातकल्पिकश्च्यवनकल्पिकश्च १ एकाकी अजातकल्पिको न च्यवनकल्पिकः २ एकाकी जातकल्पिकश्च्यवनकल्पिकः ३ एकाकी जातकल्पिको न च्यवनकल्पिकः ४, एवमेकाकिपदेन चत्वारो भङ्गा लब्धाः; अनेकाकिपदेनापि चत्वारो लभ्यन्ते, सर्वसङ्ख्यया अष्टौ भङ्गाः । अत्राष्टमो भङ्गस्त्रिष्वपि पदेषु शुद्धत्वात् प्रायश्चित्तरहितः । शेषेषु तु यथायथमनन्तरोक्तं प्रायश्चित्तम् ॥ एतेषु सप्तस्वपि भङ्गेषु वर्त्तमानस्य दोषमुपदर्शयन्नुपसम्पन्न-मन्दपदे व्याचष्टे-

[भा.६९६] एगागित्तमणट्ठा, उवसंपज्जइ चुओ व जो कप्पा ।
सो खलु सोच्चो मंदो, मंदो पुण दव्व-भावेणं ॥

वृ- य एकाकित्वम् 'अनर्थाद्' ज्ञानादिप्रयोजनाभावाद् 'उपसम्पद्यते' अङ्गीकरोति, यो वा 'च्युतः' प्रतिपतितः 'कल्पात्' संविग्नविहारात् स खलु वराको द्रव्यजीवितेन जीवन्नपि 'शोच्यः' शोचनीयः संयमजीविताभावात्, मन्दश्चासौ । अथ मन्द इति कोऽर्थः ? इत्याह-मन्दः पुनः 'द्रव्य-भावेन' द्रव्यतो भावतश्च मन्दो भवतीत्यर्थः ॥

[भा.६९७] एक्केको पुन उवचय, अवचय भावे उ अवचए पगयं ।
तलिना बुद्धी सेट्ठा, उभयमओ केइ इच्छन्ति ॥

वृ- द्रव्यमन्दो भावमन्दश्चैकैकः पुनर्द्विधा-उपचयेऽपचये च । तत्रोपचयद्रव्यमन्दो नाम

Jain Education International For Private & Personal Use Only www.jainelibrary.org

य परिस्थूरतरशरीरतया गमनादिव्यापारं कर्तुं न शक्नोति। अपचयद्रव्यमन्दस्तु यः कृशशरीरतया मपि प्रयासं न कर्तुमीष्टे। उपचयभावमन्दः पुनर्यो बुद्धेरुपचयेन यतस्ततः कार्यं कर्तुं नोत्सहते। अपचयभावमन्दस्तु यो निजसहजबुद्धेरभावेनान्यदीयाया बुद्धेरनुपजीवनेन हिताऽहितप्रवृत्ति-निवृत्ती न कर्तुमीशः स बुद्धेरपचयेन भावतो मन्दत्वादपचयभावमन्दः। अत्र चानेनैव भावतोऽपचयमन्देन प्रकृतम्, शेषास्तु शिष्यमतिविकाशनार्थं प्ररूपिताः। अथवा 'तलिना' सूक्ष्मा कुशाग्रीया बुद्धि श्रेष्ठा, ततः सा सूक्ष्मतन्तुव्यूतपटीवद् अन्तःसारवत्वेन पचितेति कृत्वा यः कुशाग्रीयमति स उपचयभावमन्दः। यस्तु परिस्थूरमति स बुद्धेः स्थूलसूत्रतया स्थूलशाटिकाया इव अन्तर्निसारतालक्षणमपचयमधिकृत्यापचयभावमन्द इति। अतः केचिदाचार्या उभय-मप्यपचयमन्दमिच्छन्ति, प्रथमव्याख्यानापेक्षया निर्बुद्धिकं द्वितीयव्याख्यानपक्षे तु परिस्थूरबुद्धि-कमपचयभावमन्दमत्र प्रस्तावे गृह्णन्तीति भावः॥ अथ यदुक्तं निर्युक्तिगाथायाम् "होहिइ वोसट्ठतिट्ठाणो" त्ति तत्र कानि पुनस्तानि त्रीणि स्थानानि यानि तेन परित्यक्तानि? उच्यते-

[भा.६९८] नाणाई तिट्ठाणा, अहवण चरणऽप्पओ पवयणं च।
सुत्त-ऽत्थ-तदुभयाणि व, उग्गम उप्पायणाओ वा॥

वृ- एकाकी 'ज्ञानादीनि' ज्ञान-दर्शन-चारित्राणि त्रीणि स्थानानि वक्ष्यमाणनीत्या परित्यजतीति। "अहवण" त्ति अखण्डमव्ययमथवार्थे, चरणमात्मा प्रवचनं चेति वा त्रीणि स्थानानि, तत्रागीतार्थतयाऽसौ षटकायविराधनया चरणम्, अतिप्रचुराहारभक्षणादिना ग्लानत्वाद्यापत्तावात्मानम्, अयतनया संज्ञाव्युत्सर्गादिना प्रवचनं च परित्यजति। अथवा सूत्रा-ऽर्थ-तदुभयानि त्रीणि स्थानानि, तत्रासावेकाकितया कदाचित् सूत्रं विस्मारयति। कदाचिदर्थं कदाचित् तदुभयम्। यद्वा उद्गमो त्पादना वाशब्दादेषणा चेति त्रीणि स्थानानि, तानि च निरङ्कुशत्वादेकाकी परित्यजतीति प्रकटमेव॥

अथ यथाऽसौ ज्ञान-दर्शन-चारित्राणि परिहरति तथाऽभिधित्सुराह-

[भा.६९९] अपुव्वस्स अगहणं, न य संकिय पुच्छणा न सारणया।
गुणयंते अ अदट्ठं, सीदइ एगस्स उच्छाहो॥

वृ- अपूर्वस्य श्रुतस्याग्रहणम्, एकाकितया पाठयितुरभावात्। न च शङ्किते सूत्रेऽर्थे वा कस्यापि पार्श्वे प्रच्छनम्। न वा सूत्रमर्थं वा विकुट्टयतः 'सारणा' शिक्षणा 'मैवं पाठीः' इत्यादिका भवति। तथाऽपरान् साधून् 'गुणयतः' परावर्त्तयतोऽदृष्टवा 'सीदति' परिहीयते 'एकस्य' एकाकिनः 'उत्साहः' सूत्रा-ऽर्थपरावर्त्तनायामभियोग इति॥

उक्तो ज्ञानपरिहारः। सम्प्रति दर्शन-चरणयोः परिहारमाह-

[भा.७००] चरगाई वुग्गाहण, न य वच्छल्लाइ दंसणे संका।
थी सोहि अणुज्जमया, निप्परगहया य चरणम्मि॥

वृ- 'चरकादिभिः' कणाद-सौगत-साङ्ख्यप्रभृतिभि पाषण्डिभिः कुयुक्तियुक्ताभिःरुक्ति-भिर्व्युद्ग्राहणमगीतार्थतया तस्य भवेत्, न चासावेकाकितया साधर्मिकाणां वात्सल्यम् आदिशब्दादुपबृहणं स्थिरीकरणं तीर्थप्रभावनां वा कुर्यात्, शङ्कादयो वा दोषा देशतः सर्वतो वा तस्य भवेयुरिति, एवं दर्शनमसौ परिहरन्ति। तथा "थी" इति एकाकिनः स्त्रिया सम्भाषणा-

Jain Education International For Private & Personal Use Only www.jainelibrary.org

दिनाऽऽत्म-परोभयसमुत्था दोषा भवेयुः । "सोहि" त्ति 'शोधि' प्रायश्चित्तम्, तद् अपराधमापन्नस्य तस्य को नाम ददातु ? । अनुद्यमता च तस्य सारणादीनामभावाद् भवति । "निप्पग्गहया य" त्ति इह प्रग्रहशब्दो यद्यपि-

"तुलासूत्रेऽश्वादिरश्मौ, सुवर्णे हलिपादपे ।
बन्धने किरणे बन्द्यां, भुजे च प्रग्रहं विदुः ॥"

इति वचनादनेकार्थ तथाप्यत्राश्वादिरश्मिवाचको द्रष्टव्यः, ततो यथा तया शम्या वल्गापरपर्याययोन्मार्गप्रस्थितस्तुरङ्गमो मार्गेऽवतार्यते तथा गुरूणामप्याज्ञावल्गाया साधुः प्रमादत उत्पथप्रतिपन्नोऽपि सन्मार्गेऽवतार्यते इति प्रग्रहशब्देन गुर्वाज्ञाऽभिधीयते, प्रग्रहो नियन्त्रणा गुर्वाज्ञेति यावत्, निर्गतः प्रग्रहादिति निष्प्रग्रहः, तस्य भावो निष्प्रग्रहता, गुर्वाजञाया अभावात् पाणि-पाद-मुखधावनादि निशङ्कं करोतीत्यर्थः । एवं चरणविषयः परित्याग इति ॥ किञ्च-

[भा.७०१] सामन्नाजोगाणं, बज्झो गिहिसन्नसंथुओ होइ
दंसण-नाण-चरित्ताण मइलणं पावई एक्को ॥

वृ- स एकाकी "सामन्न" त्ति श्रामण्य-भाविनां विनय-वैयावृत्यप्रभृतीनां योगानां 'बाह्यः' अनाभागी भवति । गृहिणाम्-अगारिणां संज्ञा-समाचारस्तस्यां संस्तुतः-परिचयवान् भवति । दर्शन-ज्ञान-चारित्राणां च मालिन्यमेकः सन् प्राप्नोति, तत्र बौद्धादिभिर्विपरिणामितमतेः 'अहो! अमीषामपि दर्शनं निपुणोपपत्ति-दृष्टान्तसंवर्मितं समीचीनमिव प्रतिभासते' इत्यादिना चित्तविप्लवेनोन्मार्गप्ररूपणया वा दर्शनमालिन्यम्, विशाखिल-वात्स्यायनादिपापश्रुतान्यभ्यस्य-तस्तेषु बहुमानबुद्धिं कुर्वतो ज्ञानमालिन्यम्, चारित्रमालिन्यं पुनरेकाकिनः सुप्रतीतमेव ॥ अथ गृहिसंज्ञासंस्तुतः कथं भवति ? इति उच्यते-

[भा.७०२] कयमकए गिहिकज्जे, संतप्पइ पुच्छई तहिं वसइ ।
संथव-सिनेहदोसा, भासा हिय नट्ठ सोगो अ ॥

वृ- 'गृहिकार्ये' क्रय-विक्रयादावनभिमते कृतेऽभिमते वा अकृते स एकाकी विवक्षिते गृहस्थे ममत्वातिरेकतः 'संतप्यते' सन्तापमनुभवति, यथा-आः ! शोभनं न समजनि यदेते-नागारिणाऽमुकं वस्तु व्यवहृतं अमुकं न व्यवहृतमित्यादि । तथा "पुच्छइ" त्ति सुख-दुःखलाभा-ऽलाभादिकां वार्त्तां तस्य पार्श्वेव पृच्छति । "तहिं वसइ" त्ति 'तत्र' तेषां गृहस्थानां मध्य एवासौ वसति । तत्र चवसतो निरन्तरं यस्तैः सह संस्तवस्तेनात्यन्तिकः स्नेहस्तेषु समुल्लसति, तद्वशात् तदीयापत्यानां यत् क्रीडापनं यच्चाक्षर-गणितादिशिक्षापणं यच्च तदुपरोधतः कुण्टलविण्टलादिकरणं तदेवमादयो दोषा द्रष्टव्याः । तथा भाषां सावद्यामसावगीतार्थतया ब्रूयात्, यथा-हे श्रावक ! गम्यताम् आगम्यताम् उपविश्यतामित्यादि । गृहिसत्के च वस्तुजाते केनचित् चौरादिना हृते स्वयं वा नष्टे तस्य स्नेहातिरेकतः 'शोकः' परिदेवनादिरूपः स्यादिति । यत एवंविधदोषोपनिपातस्तत एकाकिविहारविरहेण गच्छवासमध्यासीनेन साधुना यावज्जीवं विहरणीयम् ॥ तस्य च गच्छस्याधिपतिराचार्यो भवति ततः शिष्यः प्रश्नयति-कीदृशस्य गच्छो दीयते ? अयोग्यस्य वा गच्छं प्रयच्छन् अयोग्यो वा गच्छं धारयन् कीदृशं प्रायश्चित्तं प्राप्नोति ? उच्यते-

[भा.७०३] अबहुस्सुए अगीयत्थे निसिरए वा वि धारए व गणं ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

तद्दैवसियं तस्सा, मासा चत्तारि भारिया ॥

वृ- अबहुश्रुतो नाम येनाऽऽचारप्रकल्पाध्ययनं नाधीतं अधीतं वापरं विस्मारितम्, अगीतार्थः येन च्छेदश्रुतार्थो न गृहीतो गृहीतो वा परं विस्मारितः, तस्मिन् अबहुश्रुतेऽगीतार्थे यः 'गणं' गच्छं 'निसृजति' निक्षिपति तस्य चत्वारो भारिका मासाः। यो वा अभहुश्रुतो अमीतार्थो वा गणं निसृष्टं धारयति तस्यापि चत्वारो मासा गुरुकाः। एतच्च 'तद्दैवसिकं' तद्दिवसनिष्पन्नं प्रायश्चित्तम्, द्वितीयादिषु तु दिवसेषु यत् प्रायश्चित्तमापद्यते तदुपरिष्टाद् वक्ष्यते ॥ अथैनामेव निर्युक्तिगाथां भावयति-

[भा.७०४] अबहुस्सुअस्स देइ व, जो वा अबहुस्सुओ गणं धरए।
भंगतिगम्मि वि गुरुना, चरिमे भंगे अणुन्नाओ ॥

इह चत्वारो भङ्गाः, तद्यथा-अबहुश्रुतो नामैकोऽगीतार्थश्च १ अबहुश्रुतो गीतार्थः २ बहुश्रुतोऽगीतार्थः ३ बहुश्रुतो गीतार्थश्चेति ४। तत्र अबहुश्रुतस्यागीतार्थस्य गणं ददाति चत्वारो गुरवः। अबहुश्रुतस्य गीतार्थस्य ददाति चतुर्गुरवः; अस्य च प्रमादादिना सूत्रं विस्मृतम् अर्थं पुनः स्मरतीत्यबहुश्रुतस्य गीतार्थत्वम्, यद्वा आज्ञा-धारणादिमात्रव्यवहारेणाबहुश्रुतस्यापि गीतार्थत्वमिति। बहुश्रुतस्यागीतार्थस्य ददाति चत्वारो गुरवः, अनेन चाऽऽचारप्रकल्पाध्ययनं सूत्रतोऽधीतं न पुनरर्थतः श्रुत्वा सम्यगधिगतमिति बहुश्रुतस्यागीतार्थत्वम्। बहुश्रुतस्य गीतार्थस्य ददातीत्यत्र चतुर्थे भङ्गे शुद्धः। यो वा अबहुश्रुतो गीतार्थो धारयति २ बहुश्रुतोऽगीतार्थो धारयति ३ त्रिष्वपि चतुर्गुरुकाः। बहुश्रुतो गीतार्थो धारयतीत्यत्र शुद्धः। अत एवाह-'भङ्गत्रिकेऽपि' त्रिष्वप्याद्यभङ्गेषु गणदायक-धारकयोरुभयोरपि 'गुरुकाः' चतुर्गुरवः। 'चरमे' चतुर्थे भङ्गे शुद्धत्वाद् दायको धारको वा अनुज्ञातः, न तत्र कश्चिद्दोषः ॥ अत्र परः प्राह-यदेतत् प्रायश्चित्तं भणितं किमेतावता पर्यवसितम्? किं वा न? इति उच्यते-नेति। तथा चाह निर्युक्तिकारः- -

[भा.७०५] सत्तरत्तं तवो होइ, तओ छेओ पहावई।
छेएणऽच्छिन्नपरियाए, तओ मूलं तओ दुगं ॥

वृ- सप्तरात्रमिति जातावेकचनम्, ततोऽयमर्थ-त्रीणि सप्तरात्राणि यावत् चतुर्गुर्वादिकं तपो भवति। त्रिष्वपि सप्तरात्रेषु गतेषु यद्यनुपरतौ 'ततः' सप्तरात्रत्यानन्तरं छेदस्तयोराचार्ययोरभिमुखं प्रकर्षेण धावति प्रधावति। छेदेनापि यस्य प्रभूतत्वात् पर्यायो न च्छिद्यते तस्मिन्नाचार्ये छेदेनाच्छिन्नपर्याये एकेनैव दिवसेन मूलम्। ततो 'द्विकम्' अनवस्थाप्य-पाराञ्चिकयुगम् ॥

अथैनं श्लोकं विवरीषुराह-

[भा.७०६] एक्केक्कं सत्त दिने, दाऊण अइच्छियम्मि उ तवम्मि।
पंचाइ होइ छेदो, केसिंचि जहा कडो तत्तो ॥

वृ- 'एकैकं' तपश्चतुर्गुरुकादि सप्त सप्त दिनानि दत्त्वा ततस्तपःप्रायश्चित्तेऽतिक्रान्ते पञ्चकादिकश्छेदो भवति। केषाञ्चिदाचार्याणामयादेशः-'यथा' ,यत एवं स्थानात् तपः 'कृतं' प्राब्धं तत आरभ्य च्छेदोऽपि दीयते, चतुर्गुरुकादित्यर्थः। इयमत्र भावना-तयोराचार्ययोः प्रथमतः सप्तरात्रं यावद् दिवसे दिवसे चतुर्गुरुकम्; यद्येतावति गते केनाप्यपरेण गीतार्थेन 'आचार्या! न कल्पते अबहुश्रुतस्यागीतार्थस्य वा गणं दातुं धारयितु वा, ततः प्रतिपद्यध्वं सम्प्रत्यपि प्रायश्चित्तम्'

Jain Education International For Private & Personal Use Only www.jainelibrary.org

इति प्रज्ञापितौ स्वयं वा यद्युपरतौ ततः प्रायश्चित्तमप्युपरतम्; अथ नोपरमेते ततो द्वितीयं सप्तरात्रं दिने दिने षड्लघवः; यदि द्वितीये सप्तरात्रेऽपि गते न प्रति निवृत्तौ तदा तृतीयं सप्तरात्रं प्रत्यहं षड्गुरवः । यद्येतावता स्थितौ ततः सुन्दरमेव, नो चेत् ततश्छेदः प्रधावति । तत्रैके आचार्या पञ्चरात्रिन्दिवादरभ्य च्छेदं प्रस्थापयन्ति, अपरे पुनश्चतुर्गुरुकादिति । पञ्चरात्रिन्दिवप्रस्थापनायां भूयोऽप्यादेशयुगम्, तद्यथा-केचिदाचार्या लघुभ्यः केचित्तु गुरुभ्यः पञ्चरात्रिन्दिवेभ्यः छेदं प्रारभन्ते। तत्र लघुपञ्चरात्रिन्दिवप्रस्थापना प्रथमतो भाव्यते-सप्तरात्रत्रयानन्तरं तुरीयं सप्तरात्रं लघुपञ्चकच्छेदः, नवमं गुरुपञ्चदशकः, दशमं लघुर्विंशतिरात्रिन्दिवः, चतुर्दशं लघुमासिकः, पञ्चदशं गुरुमासिकः, षोडशं चत्रुलघुमासिकः, सप्तदशं चतुर्गुरुमासिकः, अष्टादशं लघुषाण्मासिकः, एकोनविंशं सप्तरात्रं गुरुषाण्मासिकच्छेद इति सर्वसङ्ख्यया त्रयस्त्रिंशं शतमहोरात्राणां भवति ।

गुरुपञ्चकप्रस्थापनायां तु सप्तरात्रत्रयानन्तरं सप्ताहोरात्राणि प्रथमत एव गुरुपञ्चकश्छेदः, ततः सप्ताहं लघुदशकः, एवं पूर्वोक्तविधिना गुरुदशकादयोऽपि षडगुरुकान्ताश्छेदाः सप्ताहं सप्ताहं प्रत्येकं द्रष्टव्या इति; अत्र चाष्टादशभिः सप्तरात्रैः षड्विंशं शतं रात्रिन्दिवानां भवति । यदा तु यतः प्रभृति तपःप्रायश्चित्तमुपक्रान्तं तत आरभ्य च्छेदविवक्षा क्रियते तदा चतुर्थे सप्तरात्रे प्रथमत एव चतुर्गुरुकच्छेदः, पञ्चमे षड्लघुकः, षष्ठे षडगुरु, एवं षड्भिः सप्तरात्रैर्द्वाचत्वारिंशद् दिनानि भवन्ति । इत्थं त्रयाणामादेशानामन्यतमेनादेशेन च्छिद्यमानोऽपि भूयस्त्वाद् यदा पर्यायो न च्छिद्यते ततो यद्यपि देशोनपूर्वकोटीप्रमाणः पर्यायोऽवशिष्यते तथापि स सर्वोऽपि युगपदेकदिनेनैव च्छिद्यते इति सर्वच्छेदलक्षणं ततो मूलम्, ततो द्वितीये दिवसेऽनवस्थाप्यम्, तृतीये पाराञ्चितम् ।। अथ सामान्यतस्तपःस्थानानि च्छेदस्थानानि च परस्परं किं तुल्यानि ? किं वा हीना-ऽधिकानि ? उच्यते-तुल्यानि । यत आह-

[भा.७०७] तुल्ला चेव उ ठाणा, तव-छेयाणं हवंति दोण्हं पि ।
पणगाइ पणगवुड्ढी, दोण्ह वि छम्मास निट्ठवणा ।।

वृ- तपश्छेदयोर्द्वयोरपि स्थानानि तुल्यान्येव भवन्ति, न हीनानि नाप्यधिकानीति एव-शब्दार्थः । कुतः ? इत्याह-"पनगा" इत्यादि । यतः 'द्वयोरपि' तपश्छेदयोः पञ्चकं-पञ्च रात्रिन्दिवान्यादौ कृत्वा पञ्चकवृध्या वर्द्धमानानां स्थानानां षअमासेषु 'निष्ठापना' समापनं भवति । इयमत्र भावना-लघुपञ्चकादीनि गुरुषाण्मासिकपर्यन्तानि यान्येव तपःस्थानानि तान्येव च्छेदस्यापीति तुल्यान्येवानयोः स्थानानि । एतेन च लघुपञ्चकादर्वाग् गुरुभ्यः षण्मासेभ्य ऊर्ध्वं छेदो न भवतीत्यावेदितं द्रष्टव्यम् ।। अथ कीदृशस्य गणधरपदाध्यारोपणा विधीयते ? उच्यते-

[भा.७०८] पढिय सुय गुणिय दारिय, करणे उवउत्तो छहि वि ठाणेहिं ।
छट्ठाणसंपउत्तो, गणपरियट्टी अणुन्नाओ ।।

वृ- निशीथाध्ययने 'पठिते' सूत्रतः सम्पूर्णेऽप्यधीते, ततः 'श्रुते' अर्थतः सद्गुरु-मुखादाकर्णिते, 'गुणिते' परावर्त्तना-ऽनुप्रेक्षाभ्यामत्यन्तस्वभ्यस्तीकृते, 'धारिते' चेतसि सम्यग्व्यवस्थापिते, ततः 'करणे' तदुक्ताया विधि-प्रतिषेधरूपाया आज्ञाया विधाने, 'उपयुक्तः' प्रमादरहितः, केषु ? इत्याह-'षट्सु स्थानेषु' पञ्चसु महाव्रतेषु रात्रिभोजनविरमणषष्ठेष्वित्यर्थः, गाथायां प्राकृतत्वात् तृतीयार्थे सप्तमी । एतैः षड्भिः स्थानैः-पठित-श्रुत-गुणितधारित-यथोक्तकरण-

Jain Education International For Private & Personal Use Only www.jainelibrary.org

व्रतषटकोपयोगलक्षणैः सम् इति-समुदितैः प्रकर्षेण युक्तः सम्प्रयुक्तः 'गणपरिवर्त्ती' गच्छ-वर्त्तापकोऽनुज्ञातस्तीर्थकर-गणधरैः ॥ अथवा-

[भा.७०९] सत्तऽट्ठ नवग दसगं, परिहरई जो विहारकप्पी सो।
तिविहं तीहि विसुद्धं, परिहर नवएण भेएण ॥

वृ- य आचार्यादि सप्तविधमष्टविधं नवविधं दशविधं प्रायश्चित्तं परिहरति, कथम्भूतं तत्? इत्याह-'त्रिविधं' दान-तपः-कालप्रायश्चित्तभेदादेकैकमपि त्रिभेदं परिहारविषयेण नवकेन भेदेन परिहरति। तद्यथा-मनसा वचसा कायेन स्वयं परिहरति अन्यैः स्वपरिवारसाधुभि परिहारयति अन्यान् परिहरतोऽनुमन्यते। यामि प्रतिसेवनाभि प्रतिसेविताभि सप्तविधादिकं प्रायश्चित्तं भवति ताः करणत्रय-योगत्रयविशुद्धं परिहरतीति भावः ॥ अथ कथं सप्तविधं प्रायश्चित्तं भवति? इति उच्यते-आलोचनार्हं प्रतिक्रमणार्हं तदुभयार्हं विवेकार्हं व्युत्सर्गार्हं तपोऽर्हं छेदार्हमिति। अथ मूला-ऽनवस्थाप्य-पाराञ्चिकानि क्वान्तर्भवन्ति? उच्यते-

[भा.७१०] दुविहो अ होइ छेदो, देसच्छेदो अ सव्वछेदो अ।
मूला-ऽनवट्ठ-चरिमा, सव्वच्छेओ अतो सत्त ॥

वृ- इह च्छेदो द्विविधो भवति-देशच्छेदश्च सर्वच्छेदश्च। पञ्चकादिकः षण्मासपर्यन्तो देशच्छेदः। मूला-ऽनवस्थाप्य-पाराञ्चिकानि पुनर्देशोनपूर्वकोटिप्रमाणस्यापि पर्यायस्य युगपत् छेदकत्वात् सर्वच्छेदः। एष द्विविधोऽपि सामान्यतश्छेदशब्देन गृह्यत इति विवक्षया सप्तविधं प्रायश्चित्तम् ॥ अथाष्टविधं कथं भवति? इति उच्यते-

[भा.७११] छिज्जंते वि न पावेज्ज कोइ मूलं अओ भवे अट्ठ।
चिरघाई वा छेओ, मूलं पुण सज्जघाई उ ॥

वृ- छिद्यमानेऽपि पर्याये कश्चित् चिरप्रव्रजितत्वेन मूलं यदा न प्राप्नुयात् तदा तस्य षण्मासच्छेदादूर्द्ध्व यद् मूलं दीयते तत् प्राग्दत्तच्छेदविलक्षणत्वादष्टमं भवतीत्यष्टौ प्रायश्चित्तभेदा भवेयुः। यद्वा छेद-मूलयोस्तात्पर्यार्थोऽयमभिधीयते-चिरघाती छेदः, चिरेण पर्यायस्य च्छेदकत्वात्। सद्योघाति मूलम्, झगित्येव निशेषपर्यायत्रोटकत्वादित्यष्टविधं प्रायश्चित्तम् ॥

अथ नवविध-दशविधे प्रतिपादयति-

[भा.७१२] वूढे पायच्छित्ते, ठविज्जई जेन तेन नव होंति।
जं वसइ खित्तबाहिं, चरिमं तम्हा दस हवंति ॥

वृ- येन कारणेन द्वादशवार्षिकादिके परिहारतपःप्रायश्चित्ते व्यूढे सत्यनवस्थाप्यो व्रतेषु स्थाप्यते नान्यथा, तेन मूलादनवस्थाप्यं विलक्षणमिति कृत्वाऽनवस्थाप्यप्रक्षेपाद् नव भेदा भवन्ति। यत् पुनस्तदेव परिहारतपःप्रायश्चित्तं वहमानः सन्नेकाकी सक्रोशयोजनप्रमाणक्षेत्राद् बहिर्वसति तदेतातांशेनानवस्थाप्यात् 'चरमं' पाराञ्चितं विभिन्नमिति तस्माद् दश प्रायश्चित्तभेदा भवन्तीति॥ उक्तो विहारकल्पिकः। तदुक्तौ च व्याख्याता "सुत्ते अत्थे तदुभय" इत्यादिका प्रतिद्वारगाथा। अथ कल्पिकद्वारमुपसंहरन्नाह-

[भा.७१३] एयं दुवालसविहं, जिणोवइट्ठं जहोवएसेणं।
जो जाणिऊण कप्पं, सद्दहणाऽऽयरणयं कुणइ ॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

वृ- 'एनम्' अनन्तरोदितं 'द्वादशविधं' सूत्रा-ऽर्थादिभिर्द्वारैर्द्वादशप्रकारं 'कल्पं' साधुसमाचारं 'जिनोपदिष्टं' सर्वज्ञैरुक्तमिति, अनेन स्वमनीषिकाव्युदासमाह, 'यथोपदेशेन' उपदेशाऽवैपरीत्येन 'ज्ञात्वा' अवबुध्य यः श्रद्धानमाचरणं च करोति। 'श्रद्धानं' नाम य एष कल्पः प्ररूपितः स निशङ्कमेवमेव नान्यथा, जिनोपदिष्टत्वात्; न खलु जिनोपदेशः कदाचिदपि विसंवादपदवीमासादयति। यत उक्तम्-

रागाद्वा द्वेषाद्वा, मोहाद्वा वाक्यमुच्यते ह्यनृतम्।
यस्य तु नैते दोषास्तस्यानृतकारणं किं स्यात्? ॥

तथा 'आचरणं' नाम यथावसरं द्वादशविधस्यापि कल्पस्यानुपालनम्। एते श्रद्धाना-ऽऽचरणे यः करोति स सिद्धिं गच्छतीति सण्टङ्कः ॥ कथम्भूतः? इत्याह-

[भा.७१४] सो भविय सुलभबोही, परित्तसंसारिओ पयनुकम्मो।
अचिरेण उ कालेणं, गच्छइ सिद्धिं धुयकिलेसो ॥

वृ- 'भव्यः' सिद्धिगमनयोग्यः, न खल्वभव्यस्यैवंविधकल्पविषयाणिसम्यग्ज्ञान-श्रद्धाना-ऽऽचरणानि समुपजायन्ते। भव्योऽपि कदाचिद् दुर्लभबोधिकः स्यादित्याह-सुलभा-सुप्रापा बोधि-अर्हद्धर्मप्राप्तिर्यस्यासौ सुलभबोधिकः। असावपि दीर्घसंसारी स्यादित्याह-परीत्तः-परिमितः संसारो यस्यासौ परीत्तसंसारिकः। अयमपि गुरुकर्मा भवेदित्याह-प्रकर्षेण तनु-प्रकृति-स्थिति-प्रदेशा-ऽनुभावैरल्पीयः कर्म यस्यासौ 'प्रतनुकर्मा' लघुकर्मेत्यर्थः। एवंविधोऽसौ 'इचिरेणैव कालेन' जघन्यतस्तेनैव भवग्रहणेनोत्कर्षतः सप्ताष्टभवग्रहणैः 'सिद्धिं' मोक्षं गच्छति धुतक्लेशः सन्। क्लिश्यन्ते-बाध्यन्ते शारीर-मानसैर्दुःखैःसंसारिणः सत्त्वा एभिरिति क्लेशाः-कर्माणि, धुताः-अपनीताः क्लेशा येनासौ 'धुतक्लेशः' क्षीणाष्टकर्मेति भावः ॥ तदेवं व्याख्यातं कल्पिकद्वारम्। अथाऽऽनुषङ्गिकमुत्सारकल्पिकद्वार-मभिधित्सुः प्रस्तावनामाह-

[भा.७१५] चोयग पुच्छा उस्सारकप्पिओ नत्थि तस्स किह नामं।
उस्सारे चउगुरुगा, तत्थ वि आणाइणो दोसा ॥

वृ- कल्पिकद्वारे व्याख्याते सति लब्धावकाशो नोदकः पृच्छां करोति-भगवन्! अमीषां कल्पिकानां मध्ये किमित्युत्सारकल्पिको नोपन्यस्तः?। सूरिराह-नास्त्युत्सारकल्पिक इति। भूयोऽपि परः प्राह-यद्युत्सारकल्पिको नास्ति ततः कथं तस्य नाम श्रुयते?। गुरुराह-यद्यप्युत्सारकल्पो नाम्ना व्यवह्रियते तथापि न कल्पते उत्सारयितुम्, यद्युत्सारयति तदा चत्वारो गुरुकाः। तत्राप्याज्ञादयो दोषा द्रष्टव्याः ॥ तानेवाह-

[भा.७१६] आणाऽणवत्थ मिच्छा, विराधना संजमे य जोगे य।
अप्पा परो पवयणं, जीवनिकाया परिच्चत्ता ॥

वृ- आज्ञा भगवतां तीर्थकृताभुत्सारकल्पकृता न कृता भवति। तमाचार्यमुत्सारयन्तं दृष्ट्वा अन्येऽप्याचार्या उत्सारयिष्यन्ति, तदीया अन्यदीया वा शिष्या विवक्षितशिष्यस्पर्धानुबन्धा-दुत्सारापयिष्यन्ति चेत्यनवस्था। मिथ्यात्वं वाप्रतिपन्नाभिनवधर्माणः सत्त्वा व्रजेयुः। विराधना 'संयमे च' संयमविषया 'योगे च' योगविषया भवति। तथा तेनोत्सारकेण 'आत्मा' स्वजीवः 'परः' उत्सारकल्पविषयः शिष्यः 'प्रवचनं' तीर्थं 'जीवनिकायाः' पृथिव्यादय एतानि परित्यक्तानि

Jain Education International For Private & Personal Use Only www.jainelibrary.org

भवन्तीति द्वारगाथासमासार्थः ।। साम्प्रतमेनामेव विवरीषुराज्ञा-ऽनवस्थे क्षुन्नत्वादनादृत्य मिथ्यात्वं दर्शयितुं दृष्टान्तमाह-

[भा.७१७] पुव्विं मलिया उससारवायए आगए पडिमिलंति ।
पडिलेह पुग्गलिंदिय, बहुजण ओभावणा तित्थे ।।

वृ-तत्र तावत् प्रथमं कथानकमुच्यते-इह पुरा केचिदाचार्या पूर्वान्तर्गतसूत्रा-ऽर्थधारकतया लब्धवाचकनामेयाः सर्वज्ञशासनसरसीरुहविकाशनैकसहस्ररश्मयः प्रावृषेण्यपयोमुच इव सरसदेशनाधाराधोरणीनिपातेन महीमण्डलमेकार्णवधर्मकमादधाना गन्धहस्तिन इव कलमयूथेन सातिशयगुणवता निजशिष्यवर्गेण परिकरिता एकं कञ्चिद् ग्राममुपागमन् । तत्र चाधिगतजीवा-जीवादिविशेषणविशिष्टा बहवः श्रमणोपासकाः परिवसन्ति । ते च गुरूणामामनमाकर्ण्य प्रमोद-मेदुरमानसाः स्वस्वपरिवारपरिवृताः सर्वेऽप्यागम्य तदीयं पादारविन्दमभिवन्ध योजितकरकुडाला यथावत् तत्पुरत आसाञ्चक्रिरे । ततः सूरिभिरपि रचिता यथोचिता धर्मदेशना । तदाकर्णनेन सञ्जातः संवेगसुधासिन्धुधौतान्तरमलः सकलोऽपि श्रावकलोको गतः परमपरितोषपरवशः सूरीणांगुणग्रामोपवर्णनं कुर्वन् स्वं स्वं स्थानम् । तैश्च वाचकनभोमणिभिस्तत्रायातैः प्रतिहतः खद्योतपोतकल्पानामन्ययूथिकानां प्रभाप्रसरः ।

ततः न शक्नुवन्ति तेऽन्ययूथिका आचार्याणां व्याख्यानादिभिर्गुणैर्जायमानं निरुपमानं महिमानं द्रष्टुम् इति सम्भूय सर्वेऽपि 'अमुमाचार्यं वादे पराजित्य तृणादपि लघु करिष्यामः' इत्येकवाक्यतया चेतसि व्यवस्थाप्य समाजग्मुः सरूणामन्तिकम् । सूरिभिरपि निष्प्रतिम-प्रतिभाप्राग्भारप्रभववादलब्धिसम्पन्नैर्निपुणहेतु-दृष्टान्तोपन्यासपुरस्सरं मध्येविद्वज्जनसभं कृतास्ते निष्पृष्टप्रश्न-व्याकरणाः । ततः समुच्छलितः पारमेश्वरप्रवचनगोचरः कीर्त्तिकोलाहलः, प्रादुर्भूतः परतीर्थिकानामपि परमः पराभवः, निमग्नः प्रमोदपीयूषपयोनिधावस्तोकः श्रमणोपासकलोकः, सम्पादिता सपदि विशेषतस्तेन महती तीर्थस्य प्रभावना । ततस्ते वाचकाः कियन्तमपि कालमलङ्घ्य तं ग्रामं प्रबोध्य मिथ्यात्वनिद्राविद्राणचैतन्यं भव्यजन्तुजातमन्यत्र कुत्रापि व्यहार्षु । तेषु च दिनकरवदन्यत्र प्रतापलक्ष्मीमुद्वहमानेषु परतीर्थिका उलूका इवाऽऽप्तप्रसरतया घोरघूत्कारकल्पं प्रवचनावर्णवादं कर्त्तुमारब्धाः । वदन्ति च श्रावकान् प्रति-भोः श्वेताम्बरोपासकाः ! यद्यस्ति भवतां कोऽपि कण्डूलमुखो वादी स प्रयच्छतु साम्प्रतमस्माकं वादमिति । श्रावकैरुक्तम्-अये ! विस्मृतमधुनैव भवतां भवान्तरानुभूतमिव तत् तादृशमद्यश्वीनमपि लागवम् यदेवमनात्मज्ञा असमञ्जसं प्रलपत ? भवत्वेवम्, तथाप्यायान्तु तावत् केचिद् वाचका वा गणिनो वा, पश्चाद् यद् भणिष्यन्ति भवन्तस्तत् करिष्याम इति । अथैकदा कदाचिद् निजपाण्डित्याभिमानेन त्रिभुवनमपि तृणवद् मन्यमानस्तुण्डताण्डवाडम्बरेण वाचस्पतिमपि मूकमाकलयन् समागतः कतिपयशिष्य-कलित उत्सारकल्पिकवाचकः । ततः प्रमुदिताः श्रावकाः गता अन्ययूथिकानामभ्यर्णे । निवेदितं तत्पुरतः-युष्माभिस्तदानीमस्माकं समीपे वादः प्रार्थित आसीत्, अस्माभिश्च भणितमभूत्-यदा वाचका अत्राऽऽगमिष्यन्ति तदा सर्वमपि युष्मदभिप्रेतं विधास्याम इति, तदिदानीमागताः सन्ति वाचकाः, कुरुत तैः सह वादगोष्ठीम्, पूरयत स्वप्रतिज्ञाम्-इत्यभिधाय गताः श्रावकाः स्वस्थानम् । तैश्चान्ययूथिकैः प्राचीनपराभवप्रभवभयभ्रान्तैरेकः प्रच्छन्नवेषधारी प्रत्युपेक्षकः 'किं सहृदयः

Jain Education International For Private & Personal Use Only www.jainelibrary.org

शास्त्रपरिकर्मितमतिर्वाग्मी वाचकः ? किं वा न ?' इति ज्ञापनाय प्रेषितः। स चाऽऽगम्योत्सार-कल्पिकवाचकं प्रश्नयति-परमाणुपुद्गलस्य कतीन्द्रियाणि भवन्ति ? इति। ततः स एवंपृष्टः सन् किञ्चिन्मात्रपल्लवत्वरितग्राहितया यथोक्ताव्यभिचारिविचारबहिर्मुखत्वाच्चिन्तयति-यः परमाणुपुद्गल एकस्माल्लोकचरमान्तादपरं लोकचरमान्तमेकेनैव समयेन गच्छति स निश्चितं पञ्चेन्द्रियः, कुतोऽनीदृशस्यैवंविधा गमनवीर्यलब्धिः ? -इत्यभिसन्धाय प्रतिवचनमभिधत्ते-भद्र! परमाणुपुद्गलस्य पञ्चापीन्द्रियाणि भवन्तीति।

तत एवंविधं निर्वचनमवधार्य स पुरुषः प्रत्यावृत्य गतोऽन्ययूथिकानां सन्निधौ, कथितं सर्वमपि स्वरूपं तदग्रतः। ततश्चिन्तितं स्वचेतसि तैः-नूनमयं शारदवारिद इव बहिरेव केवलं गर्जति, अन्तस्तु तुच्छ एव-इति विमृश्य समागताः सम्भूय भूयांसं लोकमीलं कृत्वा वाचकान्तिकम्। क्षुभितोऽसौ स्वतुच्छतया तावन्तं समुदायमवलोक्य, सञ्जातस्वेदबिन्दुस्तबकितशरीर आक्षिप्तः साटोपमन्यतीर्थिकैः, ग्राहितो यथाऽभिमतं पक्षविशेषम्, न शक्नोति निर्वोढुं प्रश्नितो दुस्तराणि प्रश्नोत्तराणि, न जानीते लेशतोऽपि प्रतिवक्तुम्। ततः कृतो मिथ्यादृष्टिभि 'जितं जितस्माभिः' इत्युत्कृष्टिकलकलः, प्रादुर्भूतं प्रवचनमालिन्यम्, मुकुलितानि श्रमणोपासकवदनकमलानि, विप्रतिपन्ना यथाभद्रकादय इति॥

अथ गाथाक्षरार्थ-पूर्वं कैश्चिद् वाचकैरन्ययूथिकाः "मलिय" त्ति मानमर्दनेन मर्दिताः। तत उत्सारवाचके आगते सति 'प्रतिमर्दयन्ति' प्रत्यावृत्या मानमर्दनं कुर्वन्ति। कथम् ? इत्याह-"पडिलेह" इत्यादि। तैरयन्तीर्थिकैः प्रत्युपेक्षकः पुरुषःप्रेषितः। ततः स आगत्य पृष्टवान्-'पुद्गलस्य' परमाणोः कतीन्द्रियाणि ?। तेन च प्रत्युक्तम्-पञ्चेति। ततस्तैर्बहुजनमध्ये स वाचको वादे निरुत्तरीकृतः। एवम् 'अपभ्राजना' लाघवं तीर्थस्य भवति। तत्र चामिनवधर्मणां चेतसि विकल्प उपजायते-यदि नाम वाचकोऽप्ययं न शक्नोति निर्वचनमर्पयितुं तद् नूनमेतेषां तीर्थकरेणैव न सम्यग् वस्तुतत्त्वं परिज्ञातम्, अन्यथा कथमेष एवंविधेऽर्थे व्यामुह्येत ?-इति विपरिणामतो मिथ्यात्वगमनं भवेत्॥ भावितं मिथ्यात्वद्वारम्। अथ संयमविराधनां भावयति-

[भा.७१८] जीवा-ऽजीवे न मुणइ, अलियभया साहए दग-मिताई।
करणे अ विवच्चासं, करेइ आगाढऽनागाढे॥

वृ- जीवाश्चाजीवाश्च जीवा-ऽजीवाः, तानसौ वाचनामात्ररूपेणोत्सारकल्पेनानुयोगम-वगाह्यमानो वैविक्त्येन 'न मुणति' न जानीते, तदपरिज्ञानाच्च कुतः संयमसद्भावः ? तदुक्तं परमर्षिभिः-

जो जीवे वि न याणेइ, अजीवे वि न याणई।
जीवा-ऽजीवे अयाणंतो, कह सो नाहिइ संजमं ?॥

तथा अलीकम्-असत्यं तद्भयाद् दक-मृगादीन् कथयति। किमुक्तं भवति ?-स उत्सार कल्पिकः पल्लवमात्रग्राहितया 'सत्यमेव भाषितव्यम्, नासत्यम्' इति कृत्वा उदकार्थिनां 'नदी-तडागादौ पानीयमस्ति ? नास्ति वा ?' इति पृच्छताम् 'अलीकं मा भूत्' इति कृत्वा 'विद्यते नद्यादौ जलम्' इति कथयति, मृगयाप्रस्थितानां च व्याधानां 'दृष्टं मृगवृन्दम् ? न वा ?' इति पृच्छतामलीकभयादेव 'दृष्टम्' इति कथयति, आदिशब्दात् शूकरादिपरिग्रहः; न पुनर्जानीते

Jain Education International For Private & Personal Use Only www.jainelibrary.org

यथा-"सच्चा वि सा न वत्तव्वा, जओ पावस्स आगमो" त्ति; ततश्च जलगतसूक्ष्मजन्तुजातस्य मृगादीनां वा यद् व्यपरोपणं ते करिष्यन्ति तत् सर्वमुत्सारकल्पकारकः प्राप्नोति। तथा 'करणे' चारित्रे उत्सर्गा-ऽपवादविधिमजानन् यद् विपर्यासं करोति, तद्यथा-'आगाढे' ग्लानादिकार्ये 'अनागाढं' त्रिकृत्वः परिभ्रमणादिलक्षणम्, अनागाढे वा 'आगाढे' ग्लानादिकार्ये 'अनागाढं' त्रिकृत्वः परिभ्रमणादिलक्षणम्, अनागाढे वा 'आगाढं' सद्यःप्रतिसेवनात्मकं करोति। एषा सर्वाऽपि संयमविराधना ॥ अथ योगविराधनामाह-

[भा.७१९] तुरियं नाहिज्झंते, नेव चिरं जोगजंतिता होंति।
लद्धो महंतसद्दो, त्ति केइ पासाइँ गेण्हंति ॥

वृ- 'अनुज्ञातोऽस्माकं गुरुभि' सकलोऽपि श्रुतस्कन्धः, ततः किमनेन पठितेन कार्यम्?' इति कृत्वा ते शिष्याः 'त्वरितं' शीघ्रं नाधीयते, नैव च ते चिरं योगैः-श्रुताध्ययननिबन्धनतपोविशेषैः यन्त्रिताः-नियमिता भवन्ति, एकदिनेनापि प्रभूतसूत्रार्थवाचनानुज्ञाप्रदानात्। तथा 'लब्धोऽस्माभि 'गणिरयम्, वाचकोऽयम्' इति महान् शब्दः, ततः कुतो हेतोर्वयमत्राऽऽचार्यसन्निधौ निष्फलं तिष्ठामः?' इति परिभाव्य 'केचिद्' गुरुचरणपर्युपासनापरिभग्नाः पार्श्वानि गृह्णन्ति, पार्श्वतो ग्रामेषु यथास्वेच्छं विहरन्तीति भावः ॥

[भा.७२०] कमजोगं न वि जाणइ, विगईओ का य कत्थ जोगम्मि।
अन्नस्स वि दिंति तहा, परंपरा घंटदिट्ठंतो ॥

वृ- "कमजोगं" इति प्राकृतत्वाद् व्यत्यासेन पूर्वापरनिपातः, ततो योगक्रमं 'नापि' नैव जानाति, यथा-अस्मिन् योगे, एतावन्त्याचाम्लानि इयन्ति निर्विकृतिकानि इत्थं वा उद्देशादयः क्रियन्ते। तथा विकृतयः काः कुत्र योगे कल्पन्ते ? न वा ? इत्येवमपि न जानाति, यथा-कल्पिकाकल्पिक-निशीथादियोगेषु न विसृज्यन्ते काश्चनापि विकृतयः, व्याख्याप्रज्ञप्तियोगेषु पुनरवगाहिमविकृतिर्विसृज्यते, दृष्टिवादयोगेषु तु मोदकः। तथा चाऽऽहाऽस्यैव कल्पाध्ययनस्य चूर्णिकृत्- जहा कप्पियाकप्पिय-निसीहाईणं विगईओ न विसज्जिज्झंति, पन्नत्तीए ओगाहिमगविगई विसज्जिज्जइ, दिट्ठीवाए मोदगो त्ति। निशीथचूर्णिकृत् पुनराह- जोगो दुविहो-आगाढो अनागाढो वा। आगाढतरा जम्मि जोगे जयणा सो आगाढो, यथा-भगवतीत्यादि। इतरो अनागाढो, यथा-उत्तराध्ययनादि। आगाढे ओगाहिमगवज्जाओ नव विगईओ वज्जिज्झंति, दसमाए भयणा। महाकप्पसुए एक्का परं मोदगविगई कप्पइ। सेसा आगाढेसु सव्वविगईओ न कप्पंति। अनागाढे पुन दस वि विगईओ भइयाओ, जओ गुरुअणुन्नाए कप्पंति अननुन्नाए पुन न कप्पंति त्ति।

एवंविधां योग्यव्यवस्थामजानन् यदसौ विराधयति सा योगविराधना। तथा "अन्नस्स वि दिंति तह" त्ति ते उत्सारकल्पिकाः 'अन्यस्यापि' स्वशिष्यादेः 'तथैव' उत्सारकल्पेनैव वाचना प्रयच्छन्ति, सोऽप्यपरेषां तथैव इत्येवम् उत्सारकल्पे प्रवाहतः क्रियमाणे परम्परया सूत्रार्थव्यवच्छेदः प्राप्नोति। घण्टादृष्टान्तश्चात्र वक्तव्यः ॥ तमेवोपनययुक्तं गाथात्रयेणाह-

[भा.७२१] उच्छुकरणोव कोट्टुगपडणं घंटा सियालनासणया।
विगमाई पुच्छ परंपराए नासंति जा सीहो ॥

[भा.७२२] पडियरिउं सीहेणं, स हओ आसासिया मिगगणा य।

इय कइवयाइँ जाणइ, पयाणि पढमिल्लुगुस्सारी ॥

[भा.७२३] किं पि त्ति अन्नपुट्ठो, पच्चंतुस्सारणे अवोच्छित्ती ।
गीताऽऽगमण खरंटण, पच्छित्तं कित्तिया चेव ॥

वृ-अत्र कथानकम्-एगस्स गाहावइस्स उच्छुवाडो बहुसइओ निप्फन्नो, तं सियाला पइसरित्ता खाइंति। ताहे सो उच्छुसामी सियालगहणनिमित्तं तस्स उच्छुवाडस्स परिपेरंतेसु चउद्दिसिं खाइयं खणावेइ। तत्थ एगो सियालो पडिओ। सो वराओ गिण्हित्ता कन्ने पुच्छं च छिंदित्ता दीवियचम्मेण वेढित्ता घंटं आबंधित्ता विसज्जिओ। सो नासंतो सियालेहिं दिट्ठो दूरओ। ते सियाला 'अन्नारिसो' त्ति काउं भएण पलाया। ते विरूएहिं दिट्ठा, पुच्छिया-किं नासह ? त्ति। तेहिं कहियं-अपुव्वं सरं करेमाणं किं पि अपुव्वं भूयं एति। ते वि भएण पलायंता वरक्खूहिं दिट्ठा, पुच्छिया। तेहिं कहियं-किं पि किर एति, तुरियं पलायह। ते वि पलायंता सीहेण पुच्छिया। कहियं तेहिं। सीहो चिंतेइ-मा पाणियसद्देण उवाहणाओ मुयामि, गवेसामि ताव। तेण सणियं पडियरियत्ता 'सियालो' त्ति हओ घंटासियालो 'कीस आउलीकया मो ?' त्ति रोसेणं। ते अ सियालादयो मिया आसासिया-मा भायह, हओ सो वराओ मए दीवियचम्मोणद्धो घंटासियालो। केण वि अवराहे घेत्तुं तहाकओ।

एस दिट्ठंतो ॥ अयमत्थोवणओ-जस्स तं उस्सारिज्जति सो जावतिएहिं दिवसेहिं जोगो समप्पइ तावति दिवसे कतिवयाणं आलावगाणं किंचि सुत्तफासियं सिक्खित्ता पच्चंतं गंतूण गच्छपागड्ढित्तमं करेति, अन्नेसिं च उस्सारेति। ते वि उस्सारावेत्ता पत्तेयं गच्छपागड्ढित्तणेणं ठाएत्ता सिस्साणं पडिच्छयाण य उस्सारकप्पं करेंति-अम्हे किर सुत्तत्थाणं अव्वोच्छित्तिं करेमो। तत्थ जो सो पढमिल्लुगउस्सारी सो जहा ते सियाला तस्स घंटासियालस्स आकितिं घंटासद्दं च जाणंति, न उण 'को एस ? किं वा एयस्स गलए ? कस्स वा एस सद्दो ?' एवं सो पढमिल्लुगुस्सारी किंचि जाणइ न सव्वं सब्भावं। जो एयस्स पासे उस्सारकप्पं करेति सो कइ वि आलावए जाणेति न पुन अत्थं। सो सिस्सेणं पुच्छिओ भणति-किं पि केरिसो वि अत्थि एयस्स अत्थो। सेसा कतिवए वि आलावए न कड्ढंति, ते सिस्सेहिं पुच्छिज्जंता भणंति-न याणामो, अत्थि पुन किं पि एयं तस्स तुब्भे जोगं वहह। एवं ते अप्पाणं च परं च नासिंता विहरंति। अह अन्नया गीयत्था आयरिया आगया, तेहिं ते उवालद्धा, गच्छा य अच्छिन्ना, गच्छेसु य पवेसिया सव्वे। जम्हा एते दोसा तम्हा न उस्सारेयव्वं। केत्तिया ते भविस्संति जे एवं निहोडिहिंति ? ॥

गाथात्रयस्याप्यक्षरगमनिका-इक्षवः क्रियन्ते यत्र तत् 'इक्षुकरणम्' इक्षुवाटस्तस्य रक्षणार्थम् 'उवकः' गर्त्ता खातिकेत्यर्थः सा खानिता। तत्र च क्रोष्टु-शृगालस्य पतनम्। ततो गृहपतिना गलके घण्टां बद्ध्वा मुक्तस्य तस्य दर्शनम्। शृगालानां नाशनम्। ततो वृकादीनां पृच्छा। ततः सर्वेऽपि परम्परया नश्यन्ति, यावत् सिंहः समागतः। तेन सिंहेन 'प्रतिजागर्य' निरूप्य 'सः' घण्टाश्रृगालो हतः। शेषाः 'मृगगणाः' श्रृगाल-वृकादयः आश्वासिताः ॥ अयं दृष्टान्तः, अथ दार्ष्टान्तिकयोजनामाह-"इय कइवयाइं" इत्यादि। 'इति' अमुनैव प्रकारेण प्रथमिल्लुकोत्सारी शिष्यः 'कतिपयानि पदानि' सूत्रालापकरूपाणि किञ्चिन्मात्रसूत्रस्पर्शकनिर्युक्तिमिश्रितानि जानीते। अस्य च समीपे योऽन्योऽधीते स कतिपयान् सूत्रालापकान् जानीते न पुनरर्थम्। तस्यापि पार्श्वे यः पठति स सूत्रालापकानपि नाऽऽकर्षति, अन्येन पृष्टः प्रतिभणति-अस्ति किमप्येतदङ्गोपाङ्गादिकं

Jain Education International For Private & Personal Use Only www.jainelibrary.org

श्रुतम्, तद् यूयमेतस्य योगमुद्वहतेति। एते च दुरधीतविद्यत्वात् प्रायः प्रत्यन्तग्राम एवार्घं लभन्ते, यत उक्तम्-

पाएण खीणदव्वा, धणियऽपरद्धाकयाराहा य।
पच्चंतं सेवंती, पुरिसा दुरहीयवेज्ञा या॥

अतः प्रत्यन्तं गत्वा सूत्रार्थयोरुत्सारणं कुर्वन्ति, वदन्ति च-वयं सूत्रार्थयोरव्यवच्छित्तिं कुर्म इति। अन्यदा च तत्र प्रत्यन्तग्रामे गीतार्थानामागमनम्। तैरुत्सारकल्पिकानां खरण्टनम्, यथा-आः! किमेवं सूत्रार्थयोः परिपाटिवाचनां परित्यज्य सकलश्रुतधर्मधूमकेतुकल्पमुत्सारकल्पमाचरन्त आत्मानं च परं च नाशयत इत्यादि। ततश्च गच्छानाच्छिद्य तेषामपुनःकरणेन प्रतिक्रान्तानां प्रायश्चित्तं दत्तम्। "कित्तिय"त्ति कियन्त एतादृशा गीतार्था भविष्यन्ति य एवं शिक्षयिष्यन्ति?। तस्मात् प्रथमत एव नोत्सारणीयम्॥ भाविता सप्रपञ्चं योगविराधना। अथाऽऽत्मा परश्च परित्यक्त इति पदद्वयं भावयति-

[भा.७२४] अप्पत्ताण उ दिंतेण अप्पओ इह परत्थ वि य चत्तो।
सो वि अ हु तेन चत्तो, जं न पढइ तेन गव्वेणं॥

वृ- 'अपात्राणाम्' अयोग्यानां यद्वा 'अप्राप्तानां' विवक्षितानुयोगभूमिमनुपागतानां श्रुतं ददता उत्सारकल्पकृता आत्मा इह परत्रापि च त्यक्तः, तत्रेह तद्वाचनादानसमुद्भूतापयशः प्रवादादिना परत्र तु बोधिदुर्लभत्वादिना। तथा सोऽपि शिष्यः 'हु' निश्चितं 'तेन' आचार्येण परित्यक्तः, यत् तेन गणि-वाचकत्वादिगर्वेणाधिष्ठितः सन् न पठति, पठनाभावे हि कुतो यथावत् चरण-करणप्रतिपालनम्? इति भावः। प्रवचनमपि तेन परित्यक्तम्, कथम्? इति चेद् उच्यते-तस्य वाचकत्वप्रवादं श्रुत्वा केचित् सहृदया वाग्मिनो बहुविधग्रन्थदृश्वानस्तत्परीक्षां कर्त्तुकामा यदा कमपि सिद्धान्तारथं प्रश्नयेयुरिति तदाऽसावप्रबुद्धत्वाद् न किमपि तात्त्विं निर्वचनमभिधआथउणईशः। ततस्ते चिन्तयन्ति-अहो! परिफल्गुप्रवचनममीषाम्, यत्रेदृशा अपि वाचकपदमध्यारोप्यन्ते। ततः केचिद् देशविरतिं केचित् सर्वविरतिं प्रतिपित्सवो यदि विपरिणमन्ते ततः प्रवचनं परित्यक्तमवसातव्यम्॥ किञ्च-

[भा.७२५] अज्ञस्स हीलणा लज्जणा य गारविअकारणमणज्जे।
आयरिए परिवाओ, वोच्छेदो सुतस्स तित्थस्स॥

वृ- आर्य-सुजनः सुमानुषमित्येकोऽर्थः, तस्य यथावदागमार्थावबोधविकलस्य वाचकनाम्ना हीलना भवति-अहो! हीलेयं मम यदहं 'वाचक! वाचक!'इत्यभिधीये। तथा "लज्जण"त्ति 'वाचकमिश्राः! कथयत कथमयमालापकः सिद्धान्ते विद्यते? को वाऽस्याऽऽलापकस्यार्थ?' इति केनापि पृष्टस्य व्याकरणं दातुमशक्नुवतो भृशं लज्जा भवति; ततश्चश्यामवदनः कुब्जीकृतकन्धरश्चिन्तया विमनायमानोऽवतिष्ठते। 'अनार्ये' अनार्यस्य पुनस्तदेव 'गौरव्यकारणं' गर्वनिबन्धनं जायते-अहो! वयमेव निस्सीमप्रतिष्ठापात्रं जगति वर्त्तामिह यदेवं वाचकपदवीमध्यारोहाम इति। इत्थं परः परित्यक्तो मन्तव्यः। आचार्ये च परिवादो भवति, तथाहि-स बहुश्रुताचार्यपार्श्वादुत्सारकल्पं कारयित्वा गतः क्वापि नगरादौ, पृष्टश्च कैश्चिन्निष्णातैः किमप्यर्थपदं यावन्न किञ्चिज्जानीते, ततस्ते ब्रुवते-यैरेष मूर्खमण्डलीमध्यलब्धरेख आचार्यपदभाजनमकारि

Jain Education International For Private & Personal Use Only www.jainelibrary.org

तेऽप्याचार्या एवंविधा एव भविष्यन्तीत्यात्मा परित्यक्तः । तथा प्रवचनमपि तेनाऽऽचार्येण परित्यक्तम् । कथम् ? इत्याह-श्रुतस्योत्सारकल्पवशादनधीयमानस्य व्यवच्छेदः प्राप्नोति, श्रुते च व्यवच्छिद्यमाने ज्ञानाभेव च दर्शन-चारित्रयोरप्यभावात् तीर्थस्यापि व्यवच्छेदः प्राप्नोति ।। यदि नाम तीर्थं व्यवच्छिद्यते ततः को दोषः ? इत्याह-

[भा.७२६] पवयणवोच्छेए वट्टमाणो जिनवयणबाहिरमईओ ।
बंधइ कम्मरय-मलं, जर-मरणमणंतयं घोरं ।।

वृ- प्रवचनं-तीर्थं तस्य व्यवच्छेदे हेतुरूपतया वर्त्तमानः, कथम्भूतोऽसौ ? इत्याह- 'जिनवचनबाह्यमतिकः' सर्वज्ञशासनबहिर्मुखशेमुषीकः, न खल्वनीदशस्य प्रवचनव्यवच्छेदं कर्तुं मतिरुत्सहते, स एवम्भूतो बध्नाति 'कर्मरजो-मलं' रजःशब्देन बद्धावस्थं मलशब्देन निकाचितावस्थं कर्म परिगृह्यते, जश्च मलश्चेति रजो-मलम्, कर्मैव रजोमलं कर्मरजो-मलम्, निकाचिता-ऽनिकाचितावस्थं कर्मं यथाध्यवसायस्थानमनुबध्नातीत्यर्थः । कथम्भूतम् ? अनन्तानि जरा-मरणानि यस्मात् तद् अनन्तजरा-मरणम्, गाथायां प्राकृतत्वादनन्तशब्दस्य परनिपातः, 'घोरं' रौद्रं शारीर-मानसदुःखोपनिपातनिबन्धनत्वादिति । तथा षड्जीवनिकायानप्यगीतार्थतयाऽसौ विराधयतीति जीवनिकाया अपि तेनोत्सारकेण परित्यक्ता अवसातव्याः । यत एते दोषास्ततो नोत्सारणीयम् ।। अथ क्रमेणैवाधीयमाने सूत्रे के गुणाः ? उच्यते-

[भा.७२७] आणा विकोवणा बुज्झणा य उवओग निज्जरा गहणं ।
गुरुवास जोग सुस्सूसणा य कमसो अहिज्जंते ।।

वृ- 'क्रमशः' क्रमेणाधीयमानेऽध्याप्यमाने च सूत्रे एते गुणाः । तद्यथा-आज्ञा तीर्थकृतां शिष्येणाऽऽचार्येण चाऽऽराधिता भवति । "विकोवण" त्ति योगोद्वहनविधौ गच्छसामाचार्यां च 'विकोपना' व्युत्पादना शिष्यस्य कृता भवति; ततश्च स्वयं सामाचारीवैतथ्यं न करोति, अपरान् कुर्वतो निवारयति । तथा गच्छमध्ये द्वितीयपौरुष्यामनुयोगः प्रवर्त्तते तदाकर्णनाद् मन्दबुद्धेरपि 'बोधनं' जीवा-ऽजीवादितत्त्वेषु प्रबुद्धता सम्पद्यते । बुध्यमानस्य च श्रुते निरन्तरमुपयोगो जायते। निरन्तरोपयुक्तस्य च महती निर्जरा, प्रतिसमयसङ्ख्येयभवोपात्तकर्मपरमाणुपटलापगमात् । उक्तञ्च-

कम्ममसंखेज्जभवं, खवेइ अणुसमयमेव आउत्तो ।
अन्नयरम्मि वि जोगे, सज्झायम्मी विसेसेणं ।।

नित्योपयुक्तस्य च शीघ्रं सूत्रार्थयोर्ग्रहणं भवति । तथा गुरुवासेन-गुरुकुलवासेन सार्द्धं योगः-सम्बन्धो भवति, अन्यथा क्रमेण सूत्रार्थाध्ययनायोगात् । यद्वा पदद्वयमिदं पार्थक्येन व्याख्यायते-गुरूणामन्तिके वासो गुरुवासः स सेवितो भवति, योगाश्च विधिवदाराधिता भवन्ति। आचार्यादीनां शुश्रूषा विनय-वैयावृत्यादिना कृता भवति । यत एते गुणास्ततः क्रमेणैवाध्येतव्यम्।। उपसंहरन्नाह-

[भा.७२८] इय दोस-गुणे नाउं, उक्कम-कमओ अहिज्जमाणाणं ।
उभयविसेसविहिन्नू, को वंचणमब्भुवेज्जाहि ।।

वृ- इतिशब्द एवमर्थे । एवमुत्क्रमतः क्रमतश्चाधीयानानाम् उपलक्षणत्वादध्यापयतां च

Jain Education International For Private & Personal Use Only www.jainelibrary.org

यथाक्रमं दोषान् गुणाँश्च ज्ञात्वा 'उभयविशेषविधिज्ञः' क्रमा-ऽक्रमाध्ययनगुण-दोषविभागवेदी आचार्य शिष्यो वा को नामोत्सारकल्पस्य करणेन कारापणेन वा आत्मनो वञ्चनम् 'अभ्युपेयाद्' अङ्गीकुर्यात् ? न कश्चिदित्यर्थः। यतश्चैवमतोऽनुपयोगित्वाद् नास्त्युत्सारकल्पिक इति ॥

अत्र पुनरपि परः प्राह-

[भा.७२९] जइ नत्थि कओ नामं, असइ हु अत्थे न होइ अभिहाणं।
तम्हा तस्स पसिद्धी, अभिहाणपसिद्धिओ सिद्धा ॥

वृ- यदि नास्त्युत्सारकल्पिकः ततः कुतोऽस्य 'नाम' अभिधानमिदमायातम् ? (न कुतश्चिदित्यर्थः)। अनेन प्रतिज्ञार्थ सूचितः। कुतः ? इत्याह- 'असति' अविद्यमाने 'अर्थे' अभिधेये हुशब्दस्य हेत्वर्थवाचकत्वाद् यस्मान्न भवत्यभिधानं किन्तु सत्येवेति। अनेन च हेत्वर्थ उपात्तः। यतश्चैवं तस्मात् 'तस्य' अर्थस्य प्रसिद्धिरत्राभिधानप्रसिद्धित एव 'सिद्धा' प्रतिष्ठितेति निगमनार्थ। दृष्टान्तोपनयौ स्वयमेवाभ्यूह्य वाच्यौ। अत्र प्रयोगः-अस्त्युत्सारकल्पिकः, अभिधानवत्त्वात्, घटादिवत्, यद् यद् अभिधानवत् तत् तद् अस्ति, यथा घटपटादि, अभिधानवच्चेदम्, तस्मादस्तीति ॥ इत्थं परेण स्वपक्षे समर्थिते सति प्रतिविधीयते-भो भद्र मुग्धप्रमाणिक ! अनैकान्तिकोऽयं भवता हेतुरुपन्यस्तः। तथा चाह-

[भा.७३०] जइ सव्वं वि य नामं, सअत्थगं होज्ज तो भवे दोसो।
जम्हा सअत्थगत्ते, भजियं तम्हा अनेगंतो ॥

वृ- यदि सर्वमपि नाम सार्थकं भवेत् ततो भवेदस्माकं 'दोषः' उत्सारकल्पिकस्यास्तित्वा-पत्तिलक्षणः। यस्मात् पुनः सार्थकत्वे नाम 'भक्तं' विकल्पितम्, स्यात् सार्थकं स्यान्निरर्थकमिति भावः। तत्र सार्थकं जीवा-ऽजीवादिकम्, निरर्थं खरविषाणा-ऽऽकाशकुसुम-कूर्मरोमवन्ध्या-पुत्रादिकम्। यत एवं तस्मादनेकान्तोऽयम्-यदसद्भूतेऽर्थे न भवत्यभिधानम्। इदमत्र तात्पर्यम्-अभिधानस्य भावा-ऽभावयोरुभयोरपि सद्भावादभिधानवत्त्वलक्षणो हेतुर्यथा उत्सारकल्पिकस्या-स्तित्वं साधयति तथा नास्तित्वमपि साधयति, उभयत्रापि साधारणत्वात्; अतः साधारण-रूपानैकान्तिकदोषदुष्टोऽयं हेतुरिति ॥

इत्थं व्यभिचरितपक्षतया विलक्षीभूतः परः परित्यज्य यदृच्छाजल्पमाचार्यवचनेव प्रमाणीकुर्वन्नित्थमाह-भगवन् ! अभ्युपगतं मयाऽनन्तरोक्तयुक्तितोऽभिधानस्य सार्थकत्वमनर्थकं चेति, परमिदमुत्सारकल्पिकाभिधानं किं सार्थकम् ? आहोखिद् निरर्थकम् ? इति विवर्तते संशयावर्त्तगर्त्तायामस्माकं चेतः, तदिदानीमुद्भियतां निजवाग्वरत्रयेति उच्यते-

[भा.७३१] निक्कारणम्मि नामं, पि निच्छिमो इच्छिमो अ कज्जम्मि।
उस्सारकप्पियस्स उ, चोयग ! सुण कारणं तं तु ॥

वृ- वत्स ! 'निष्कारणे' कारणाभावे नामापि नेच्छामो वयम् किं पुनरर्थम् ?। 'कार्ये' प्रयोजने तु प्राप्ते इच्छाम उत्सारकल्पिकस्य नामाप्यर्थमपि। 'तत्तु' कारणं हे नोदक ! 'शृणु' निशमय ॥ तत्र तिष्ठतु तावत् कारणम्, कर्तुरधीनाः सर्वा अपिक्रिया इति ज्ञापनार्थं प्रथमत उत्सारकारकमाह-

[भा.७३२] आयार-दिट्ठिवायत्थजाणए पुरिस-कारणविहिन्नू।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

संविग्गमपरितंते, अरिहइ उस्सारणं काउं ॥

वृ- आचारः-प्रथममङ्गं दृष्टिवादः-चरं तयोरर्थं जानातीत्याचार-दृष्टिवादार्थज्ञः । इहाऽऽचारदृष्टिवादग्रहणं वक्ष्यमाणकारणैरनयोरेवोत्सारणीयत्वादित्येवमर्थम् । "पुरिस-कारणविहिन्नू" इति पुरुष-कारणविधिज्ञो नाम 'किमयं पुरुष उत्सारकल्पमर्हति ? न वा ? येन च कारणेनोत्सार्यते तदस्ति ? न वा ?' इत्येवंविधविधिवेदी तथा 'संविग्नः" मोक्षाभिलाषी 'अपरितान्तः' सूत्रार्थग्राहणायामहोरात्रमप्यपरिश्रान्त एवंविध उत्सारणं कर्तुमर्हति, एवंगुणोपेत एवोत्सारकल्पं करोतीत्यर्थः ॥ अथ यस्योत्सारकल्पः क्रियते तस्य गुणानाह-

[भा.७३३] अभिगए पडिबद्धे, संविग्गे अ सलद्धिए ।
अवट्ठिए अ मेहावी, पिबुज्झी जोअकारए ॥

वृ-अभिगतः प्रतिबद्धः संविग्नश्च सलब्धिकः अवस्थितश्च मेधावी प्रतिबोधी योगकारकः, ईदृग्गुणोपेत उत्सारकल्पयोग्य इति निर्युक्तिश्लोकमासार्थ ॥ अथैनमेव विवृणोति-

[भा.७३४]सम्मत्तम्मि अभिगओ, विजाणओ वा वि अब्भुवगओ वा ।
सज्झाए पडिबद्धो, गुरूसु नीएल्लएसुं वा ॥

वृ- सम्यक्त्वे य आभिमुख्येन गतः-प्रविष्टः सोऽभिगत उच्यते, यो वा जीवादिपदार्थानां 'विज्ञायकः' विशेषेण ज्ञाता सोऽभिगतः, यद्वा यः 'अभ्युपगतः' 'यावज्जीवं मया गुरुपादमूलं न मोक्तव्यम्' इति कृताभ्युपगमः सोऽभिगतः । यः पुनः 'स्वाध्याये' परावर्त्तना-ऽनुप्रेक्षादौ सततमायुक्तः, गुरुषु वा स्थिरममत्वानुबन्धः, 'निजकेषु' भ्रातृ-भ्रातृव्यादिषु वा सम्बन्धिषु प्रव्रज्याप्रतिपन्नेषु सञ्जातप्रेमस्थेमा, एष त्रिविधोऽपि प्रतिबद्ध उच्यते ॥

[भा.७३५] संविग्गो दव्व मिओ, भावे मूलुत्तरेसु उ जयंतो ।
लद्धी आहाराइसु, अनुओगे धम्मकहणे य ॥

वृ- संविग्नो द्विधा-द्रव्यतो भावतश्च । 'द्रव्ये' द्रव्यसंविग्नो मृगः, सदैव सर्वतोऽपि चकि-तत्वात् । 'भावे' भावसंविग्नः 'मूलोत्तरेषु तु' मूलगुणोत्तरगुणेषु पुनः 'यतमानः' उद्यमं विदधानः साधुर्मन्तव्यः, सदैव संसारापायचकितत्वात् । तथा लब्धिराहारादिषूत्पादयितवयेषु अनुयोगे दातव्ये धर्मकथने च विधेये यस्य स सलब्धिक इति ॥

[भा.७३६] लिंग विहारेऽवट्ठिओ, मेरामेहावि गहणओ भइओ ।
पडिबुज्झइ जं कत्थइ, कुणइ अ जोगं तदट्ठस्स ॥

वृ-अवस्थितो द्विधा-लिङ्गे विहारे च । लिङ्गावस्थितः स्वलिङ्गं न परित्यजति, विहारावस्थितः संविग्नविहारं विहाय न पार्श्वस्थादिविहारमाद्रियते । मेधावी द्विधा-ग्रहणमेधावी मर्यादामेधावी च । उभावपि वक्ष्यमाणस्वरूपौ । तत्र मर्यादामेधाविन उत्सारकल्पः क्रियते । स पुनर्ग्रहणे मेधावी वा स्यादमेधावी वा, द्विविधस्यापि कारणविशेषे उत्सार्यत इति ग्रहणतो मेघावी 'भक्तः' विकल्पितः । तथा यत् 'कथ्यते' अभिधीयते तत् सर्वं यः प्रतिबुध्यते स प्रतिबोद्धं शीलमस्येति प्रतिबोधी । यत् तसय सूत्रमुत्सार्यते तदर्थस्य ग्रहणे 'योगं' व्यापारं यः करोति न कदाचित् प्रमाद्यति स योगकारक इति ॥ तदेवं व्याख्याता "अभिगए" इत्यादि गाथा । अथोत्सारकल्पिकस्यैवापराचार्यपरिपाट्या गुणानाह-

Jain Education International For Private & Personal Use Only www.jainelibrary.org

[भा.७३७] अभिगय थिर संविग्गे, गुरुअमुई जोगकारए चेव।
दुम्मेहसलद्धीए, पडिबुज्झी परिणय विणीए॥

वृ- 'अभिगतः' प्रबुद्धः। 'स्थिरः' सम्यग्दर्शनादक्षोभ्यः। 'संविग्नः' प्रागुक्तः। 'गुर्वमोची' निष्ठुरं निर्भर्त्सितोऽपि गुरूणाममोचनशीलः। 'योगकारकः' पूर्ववत्। दुर्मेधा अपि यः सलब्धिकः। 'परिणतः' परिपक्ववयाः परिणामको वा। 'विनीतः' अभ्युत्थानादिविनयोद्यतः॥

[भा.७३८] आयरियवन्नवाई, अनुकूले धम्मसड्ढिए चेव।
एतारिसे महाभागे, उस्सारं काउमरिहइ॥

वृ- 'आचार्यवर्णवादी' गुरूणां गुणोत्कीर्त्तनकारी। 'अनुकूलः' आचार्याणामन्येषां वा पूज्यानां वैयावृत्यादिना हितकारी। धर्मे-तपः-संयमात्मके चारित्रधर्मे श्रद्धिकः-श्रद्धावान् अत्यन्ताभिलाषुकः। चः समुच्चये। एवः पादपूरणे। 'एतादृशः' एवंविधगुणोपेतः 'महाभागः' शिष्य उत्सारं कर्तुमर्हति, उत्सारकल्पस्य योग्यो भवतीत्यर्थः॥

अनीदृशानुत्सारयितुः प्रायश्चित्तमाह-

[भा.७३९] अनभिगयमाइआणं, उस्सारिंतस्स चउगुरू होंति।
उग्गहणम्मि वि गुरुगाऽकालमसज्झायऽवक्खेवे॥

वृ- आदेशद्वयेनापि ये गुणाः पूर्वमुक्तास्तद्विपरीता येऽनभिगतादयः, तद्यथा-अनभिगतः अप्रतिबद्धः असंविग्नः अलब्धिकः अनवस्थितः अमर्यादामेधावी अप्रतिबोधी अयोगकारकः अपरिणतः अविनीतः आचार्यावर्णवादी अननुकूलः अधर्मश्रद्धालुः। एतेषाम् 'उत्सारयतः' उत्सारकल्पं कुर्वत आचार्यस्य प्रत्येकं चतुर्गुरवः प्रायश्चित्तम्। "उग्हणम्मि वि गुरुग" त्ति सूत्रमर्थं वा झगित्येवावगृह्णातीत्यवग्रहणः, "नन्द्यादिभ्योऽनः" इति कर्त्तरि अनप्रत्ययः, ग्रहणमेधावीत्यर्थः, तस्य यदि निष्कारणमुत्सारयति तदाऽपि चत्वारो गुरुकाः। अथ किमर्थं मेधाविनो नोत्सार्यन्ते? उच्यते-यतोऽसौ प्रज्ञालत्वादेवाऽऽनुपूर्व्यैव पाठ्यमानो झगित्येव विवक्षितमुत्सारणीयं श्रुतं प्राप्स्यति, ततः को नाम तस्योत्सारकल्पकरणेऽभ्यधिको गुणः,?। अथवा "उग्गहणम्मि वि" त्ति यस्य आचारान्तर्गतवस्त्रैषणाध्ययनस्योपक्रमणनिमित्तमुत्सार्यते तस्य यद्यप्युत्सारकल्पसमकालमेव सर्वमपि सूत्रमर्थं वाऽवगृह्णाति, अपिशब्दाद् मन्दमेधस्तया यद्यपि नावगृह्णाति, तथाऽप्यवग्रहणेऽनवग्रहणे वाऽकालोऽस्वाध्यायिकं व्याक्षेपश्च न कर्त्तव्यः। यदि करोति तदा चत्वारो गुरुकाः। एतच्चाकालादिकमुपरिष्टाद् भावयिष्यते।

अथवा "उग्गहणम्मि वि गुरुग" त्ति अन्यथा व्याख्यायते-योऽवग्रहणे समर्थ उत्तममेधावी, अपिशब्दः सम्भावनायाम्, किं सम्भावयति? यावन्मात्रं सूत्रं तस्योद्दिश्यते तावदशेषमप्यर्थेन युक्तमवगृह्णाति, यो वा वैरस्वामिवत् पदानुसारिप्रतिभो भूयस्तरमप्यनुसरति तस्योत्सारणीयम्। अथ नोत्सारयति तदा चतुर्गुरुकाः। तत्रापि यावदुत्सारकल्पः क्रियते तावदकालोऽस्वाध्यायिकं व्याक्षेपश्च न कर्त्तव्यः। यदि करोति तदाऽपि चतुर्गुरुकाः॥ अथोत्सारकल्पकरणे यत् प्राक् कारणं सांन्यासिकीकृतं तद् दर्शयति-

[भा.७४०] गच्छो अ अलद्धीओ, ओमाणं चेव अनहियासा य।
गिहिणो अ मंदधम्मा, सुद्धं च गवेसए उवहिं॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

वृ- कस्याप्याचार्यस्य गच्छः सर्वोऽपि वस्त्र-पात्र-शय्योत्पादने अलब्धिकः, तत्र च क्षेत्रे स्वपक्षतः परपक्षतो वाऽवमानं विद्यते, ते च साधवः 'अनधिसहाः' शीतादिपरीषहान् सोढुमसमर्था, गृहस्थाश्च 'मन्दधर्माणः' तुच्छधर्मश्रद्धाका अप्रज्ञापिताः सन्तो न वस्त्रादि प्रयच्छन्ति, 'शुद्धं चोपधिं साधवो गवेषयेयुः' इति भगवतामुपदेशः, स च दुर्लभत्वाद् यादृशेन तादृशेन साधुना न लभ्यते, अत ईदृशे कार्ये लब्धिमान् दुर्मेधा अप्युत्सारकल्पं कृत्वा वस्त्रैषणाद्यध्ययनमुद्दिश्य कल्पिकः क्रियते ।। ततश्च कल्पिकीकृतः सन् किं करोतु ? इत्याह-

भा. (७४१) हिंडउ गीयसहाओ, सलद्धि अह ते हणंति से लद्धिं ।
तो एक्कओ वि हिंडइ, आयारुस्सारियसुअत्थो ।।

वृ- असौ 'सलब्धिकः' लब्धिमान् 'गीतसहायः' गीतार्थसाधुसहितो वस्त्राद्युत्पादनार्थं हिण्डताम् । अथ 'ते' गीतार्थास्तस्य लब्धिमुपन्धन्ति ततः 'एककोऽपि' असहायोऽपि 'आचारोत्सारितसूत्रार्थः' आचारान्तर्गतवस्त्रैषणादिसूत्रार्थमुत्सारकल्पकरणेन ग्राहितः सन् हिण्डते ।। ननु च किं कोऽपि कस्यापि लाभान्तरायकर्मक्षयोपशमसमुत्थां लब्धिमुपहन्ति ? येनैवमुच्यते-ते गीतार्थास्त्य लब्धिमुपघ्नन्ति इति, अत्रोच्यते- भो भद्र ! किं न कर्णकोटरमुपागतं सुप्रतीतमपि भवतो ढण्ढणमहर्षेरलब्धिस्वरूपं येनैवमनभिज्ञ इव भवान् परिप्रश्नयति ? ।यद्वाऽस्मिन्नेवार्थेऽपरो भवतः प्रत्यायनाय दृष्टान्तः प्रतिपाद्यते-

[भा.७४२] भिक्खु विह तण्ह वद्दल, अभागधेज्जो जहिं तहिं न पडे ।
दुग-तिगमाईभेदे, पडइ तहिं जत्थ सो नत्थि ।।

वृ- कोइ किर पंचसइओ सत्थो अडविं पवन्नो । तत्थ य एगो रत्तपडो निब्भग्गसिरसेहरो पंचण्ह वि सयाणं पुन्ने उवहणइ । सो अ सत्थो तण्हाए पारद्धो । दूरे अ अब्भवद्दलयं वासइ, तेसिं उवरि न पडइ । ते दुहा भिन्ना । इयरो रत्तपडो पुव्विल्लाणं मज्झे मेलिओ । सव्वत्थ पडइ, जत्थ सो तत्थ न पडइ, जाव निव्वेडिओ एक्कओ जाओ । जत्थ सो तत्थ न पडइ । एवं एयारिसा परस्स पुन्ने उवहणंति ।।

अथ गाथाक्षरार्थः-भिक्षुरेकः सार्थेन सार्द्धं 'विहम्' अध्वानं प्रविष्ट इति शेषः । तत स्तृष्णया सार्थ प्रारब्धः । वार्दलं च वर्षितुमारब्धम् । यत्र तेषां मध्ये सोऽभागधेयो भिक्षुस्तत्र न वर्ष पतति। ततः 'द्विक-त्रिकादिना' द्विधा-त्रिधादिना प्रकरेळ सार्थस्य भेदः कृतः । तस्मिश्रच कृते यत्र स भिक्षु पञ्चशतिकस्यापि सार्थस्य पुण्यान्युपहतवान् एवमन्येऽप्येवंविधा अपरेषां लब्धिमतामपि स्वस्वकर्मक्षयोपशमसमुत्थां लब्धिमुध्नन्तीति ।।अथासौ कथं वस्त्राण्युत्पादयति ? इत्युच्यते-

[भा.७४३] भिक्खं वा अडंतो, बिईय पढमाए अहव सव्वासु ।
सहिओ व असहिओ वा, उप्पाए वा पभावे वा ।।

वृ- भिक्षामटन् वस्त्राण्युत्पादयति । वाशब्दो वक्ष्यमाणपक्षापेक्षया विभाषायाम् । अपिशब्दः सम्भावनायाम्, सम्भाव्यते अयमपि प्रकार इति । अथ न शक्नोति युगपद् भिक्षामप्यटितुं वस्त्राण्यप्युत्पादयितुम्, व्यतिक्रामति वा वेला भैक्षस्य वस्त्राण्युत्पादयतः, भिक्षां वा अटद्भिर्न प्राप्यन्ते वस्त्रणीत्यादिना कारणेन द्वितीयायां पौरुष्यामनुयोगग्रहणं हापियत्वा वस्त्राण्युत्पादयेत्। अथ तदा न लभेत वही या हिण्डि कर्त्तव्यो सा च द्वितीयस्यां पौरुष्यां कर्तुं न पार्यते इत्यतः

Jain Education International For Private & Personal Use Only www.jainelibrary.org

प्रथमायामप्युत्पादयेत् । अथ वहवो गृहस्था द्रष्टव्या महता च कष्टेन ते श्रद्धां ग्राह्यन्ते ततो द्वयोरपि पौरुष्योः सर्वासु वा पौरुषीषु पर्यटति । यद्यपरे गीतार्थास्तस्य लब्धिं नोपघ्नन्ति तदा स तैः सहित एवोत्पादयेद् वा वस्त्राणि, प्रभावयेद् वा दानधर्मं गृहिणां पुरतः । यथा--ईद्दशः साधूनां धर्म, न कल्पते अमीषां भगवतामुद्रमोत्पादनैषणादोषदुष्टं पिण्ड-शय्या-वस्त्र-पात्रचतुष्टयं ग्रहीतुम्, तदमीषां वस्त्रादावुपयोज्यमाने महती कर्मनिर्जरेत्यादि । अथ ते गीतार्थास्तस्य लब्धिमुपहन्युस्ततस्तैः 'असहितोऽपि' एकाकी उत्पादयतु वा प्रभावयतु वा, न कश्चिद्दोषः ।। इत्थं तावद् वस्त्रादीनां कल्पिको भवत्विति कृत्वा यथा आचार उत्सार्यते तथा प्रतिपादितम् । अथ दृष्टिवादो येन कारणेनोत्सार्यते तत् प्रतिपादयति-

[भा.७४४] कालियसुआनुओगम्मि गंडियाणं समोयरणहेउं ।
उस्सारिंति सुविहिया, भूयावायं न अन्नेणं ।।

वृ- इह यो धर्मकथालब्धिसम्पन्नः परमद्यापि स्वल्पपर्यायत्वाद् द्दष्टिवादं पठितुमप्राप्तस्तस्य कालिकश्रुतानुयोगेन धर्मकथां कुर्वाणस्य गण्डिकाः-कुलकर-तीर्थकरगण्डिकादयो द्दष्टिवादान्तर्गता उपयुज्यन्त इति तासां गण्डिकानां कालिकश्रुतानुयोगे समवतारणाहेतोरुद्देश-समुद्देशादिविधिं विना न कल्पते तासामध्ययनादिकमिति कृत्वा 'सुविहिताः' शोभनविहितानुष्ठाना आचार्या 'भूतवादं' दृष्टिवादमुत्सारयन्ति, न 'अन्येन' 'वाचको भूयात्' इत्यादिना कारणेन ।। तदेवमाचारो दृष्टिवादश्च यथोत्सार्यते तथाऽभिहितम्, बाहुल्येनानयोरेवोत्सारणीयत्वात्; अत एवोक्तं पूर्वम्- "आयारदिट्ठिवायत्थजाणए" त्ति । अथ "कालमसज्झायऽवक्खेवे" त्ति यत् प्राक् पदत्रयमुक्तं तत्राऽऽद्यं पदद्वयं तावद् विवृणोति-

[भा.७४५] सज्झायमसज्झाए, सुद्धासुद्धे व उद्दिसे काले ।
दो दो अ अनोएसुं, ओएसु उ अंतिमं एक्कं ।।

वृ- तस्योत्सारकल्पे क्रियमाणे स्वाध्यायिके अस्वाध्यायिके वा शुद्धे वा काले विवक्षित-श्रुतमुद्दिशेत्, "सर्व वाक्यं सावधारणं भवति" इति न्यायादुद्दिशेदेव, न व्याघातं कुर्यात् । केन विधिना ? इत्यत आह--"दो दो अ अनोएसुं" त्ति ओजःशब्देन विषममुच्यते, तद्विपरीता अनोजसः-समा द्वि-चतुः-षडादय उद्देशका यत्रोध्ययने तत्र अनोजस्सु उद्देशकेषु दिने दिने द्वौ द्वावुद्देशकावुद्दिशेत् । कथम् ? इति चेद् उच्यते-प्रथमायां पौरुष्यां प्रथममुद्देशकमुद्दिश्य समुद्दिश्य च द्वितीय उद्दिश्यते, द्वितीयस्यामुभयोरप्युद्देशकयोः तस्य अनुयोगो दीयते, ततश्चरमपौरुष्यां प्रथममुद्देशकमनुज्ञाय द्वितीयोद्देशकः समुद्दिश्यते अनुज्ञायते चेति चूर्णिलिखिता सामाचारी । तथा 'ओजस्सु' त्रि-पञ्च-सप्तादिसङ्खकेषु विषमेषूद्देशकेषु अन्तिममुद्देशकमेवोद्दिशेत्, यथा शस्त्रपरिज्ञाध्येयने । तथाहि-तत्र सप्तोद्देशकाः, तेषु च त्रिभिर्दिवसैः षडुद्देशकानुद्दिश्य चतुर्थे दिवसे एक एव अवशिष्यमाणः सप्तम उद्देशक उद्दिश्यते । स च प्रथमपौरुष्यामुद्दिश्य समुद्दिश्य चरमायामनुज्ञायते ।।

[भा.७४६] एगंतरमायंबिल, विगईए मक्खियं पि वज्रेति ।
जावइअं च अहिज्जइ, तावइयं उद्दिसे केइ ।।

वृ- तथा 'एकान्तरम्' एकदिवसान्तरितमाचाम्लमसौ करोति, एकस्मिन् दिवसे

Jain Education International For Private & Personal Use Only www.jainelibrary.org

आचाम्लमपरस्मिन्निर्विकृतिकं करोतीति भावः । तथा विकृत्या 'म्रक्षितमपि' खरण्टितमप्यसौ वर्जयति । केचित् पुनराचार्या ब्रुवते-'यावत्' यत्परिमाणं श्रुतमसावधीते तावदुद्दिशेत्, यदि मेघावितया द्वे त्रीणि चत्वारि भूरितराणि वा अध्ययनान्यागमयति ततस्तानि सर्वाण्युद्दिश्यन्ते, न कश्चिद्दोष इति भावः ।। व्याख्यातं "कालमसज्झाय"त्ति पदद्वयम् ।

अथ "अवक्खेवे"त्ति पदं विवृण्वन्नाह-

[भा.७४७] आहारे उवकरणे, पडिलेहण लेव खित्तपडिलेहा ।
अप्पाहारो परिहार मोअ जह अप्पनिद्दो अ ।।

वृ- तस्योत्सारकल्पे कर्तुमारब्धे आहारग्रहणे उपकरणस्य प्रत्युपेक्षणे क्षेत्रप्रत्युपेक्षां च व्याक्षेपो न कर्त्तव्यः । अल्पाहारश्च यथा स भवति तथा कार्यम् । 'परिहारः' संज्ञा 'मोकः' कायिकी तयोः खल्पताऽल्पाहारतायां भवति । यथा चाऽसावल्पनिद्रो भवति तथा कर्त्तव्यिमिति। एषा सङ्ग्रहगाथा ।। अथैनामेव प्रतिपदं विवृणोति-

[भा.७४८] हिंडाविंति न वा णं, अहवा अन्नट्ठया न सो अडइ ।
पेहिति व से उवहिं, पेदेइ व सो न अन्नेसिं ।।

वृ- "णं" इति तमुत्सारकल्पिकमाचार्या भिक्षां न हिण्डापयन्ति । वाशव्दस्यानुक्त-समुच्चयार्थत्वात् संस्तरणे सतीति द्रष्टव्यम् । यदि पुनरसंस्तरणं तदा, 'अथवा' इति संस्तरणा-पेक्षयाऽसंस्तरणस्य प्रकारान्तरत्ताद्योतकः, 'अन्यार्थम्' अन्येषाम्-आचार्य-ग्लान-बाल-वृद्धादी-नामर्थाय नासावुत्सारकल्पिकः पर्यटति, यावन्मात्रमाहारमात्मना भुङ्क्ते तावन्मात्रमेवाऽऽ-नयतीत्यर्थः । तथा 'प्रेक्षन्ते वा' प्रत्युपेक्षन्ते "से" तस्य-उत्सारकल्पिकस्योपधिं शेषसाधवः । 'स वा' उत्सारकल्पिको न 'अन्येषाम्' आचार्य-क्षपकादीनामुपधिं प्रत्युपेक्षते । सर्वत्र 'मा भूदध्ययनव्याघातः' इति योज्यम् ।।

[भा.७४९] एमेव लेवगहणं, लिंपइ वा अप्पणो न अन्नस्स ।
खेत्तं च न पेहावे, न यावि तेसोवहिं पेहे ।।

वृ- एवमेव लेपग्रहणम् उपलक्षणत्वाद् लेपनमपि पात्रस्य तस्य निमित्तमन्यैः साधुभिः कर्त्तव्यम् । अथ शेषसाधवः कुतोऽपि हेतोः अक्षणिकास्ततः स आत्मन एव पात्राणि लिम्पति नान्यस्य साधोः । क्षेत्रं च तेन 'न प्रेक्षापयेत्' क्षेत्रप्रत्युपेक्षणार्थं तं न प्रहिणुयादित्यर्थः । न चाप्यसावुत्सारकल्पिकः 'तेषा' क्षेत्रप्रत्युपेक्षकाणामुपधिं प्रत्युपेक्षेत ।।

[भा.७५०] दिंति पनीयाहारं, न य बहुगं मा हु जग्गतोऽजिन्नं ।
मोआइनिसग्गेसु अ, बहुओ मा होज्ज पलिमंथो ।।

वृ- 'प्रणीतं' स्निग्ध-मधुरमाहारं परमात्र-शर्करादिकं तस्य गुरवः प्रयच्छन्ति, सुखेनैवाहर्निशमपि दृष्टिवादादिसूत्रार्थानुप्रेक्षानिमित्तमिति भावः । तमपि प्रणीतं 'न च' नैव बहुकं किन्तु स्वल्पम्, कुतः ? इत्याह-मा भूत् सूत्रार्थनिमित्तं रजन्यामपि जाग्रतोऽजीर्णिमिति । रुक्षाहारभोजिनश्च 'बहूशः' बहून् वारान् 'मोकादिनिसर्गेषु च' प्रश्रवण-संज्ञादिव्युत्सर्गेषु विधीयमानेषु 'परिमन्थः' सूत्रार्थव्याघातो मा भूदिति कृत्वा प्रणीतं दीयते । अल्पा च निद्रा स्वल्पप्रणीताहारभोजिनः प्रायो भवतीत्यल्पनिद्राद्वारमपि व्याख्यातमवसातव्यम् । इत्थमुत्सारकल्पे

Jain Education International For Private & Personal Use Only www.jainelibrary.org

समापिते सति विवक्षितं वस्त्रोत्पादनादि कार्यंपूर्वोक्तविधिना कार्यते ॥ तदेवं व्याख्यातमानुषङ्गिकमुत्सारकल्पिकद्वारम् । अथाचञ्चलद्वारम् । तत्राऽचञ्चलोऽनुयोगं श्रोतुर्महति न चञ्चल इति चञ्चलखरुपं तावदाह-

[भा.७५१] गइ-ठाण-भास-भावे, लहुओ मसो उ होइ एक्केक्के ।
आणाइणो य दोसा, विराहणां संजमाऽऽयाए ॥

वृ- चञ्चलश्चतुर्द्धा । तद्यथा-गतिचञ्चलः स्थानचञ्चलो भाषाचञ्चलो भावचञ्चलश्च । एतेषामेकैकस्मिन् लघुको मासः प्रायश्चित्तम्, आज्ञादयश्च दोषाः, विराधना संयमे आत्मनि च । तत्र च संयमविराधना गतिचञ्चलस्य त्वरितं गच्छतः पृथिव्यादीनां कायानामुपमर्दनम् । आत्मविराधना प्रपतन-प्रस्खलन-देवताच्छलनीदिका । यद्वा तं त्वरितगामिनं दृष्ट्वा द्वितीयः साधुः प्रतिनोदनां दद्यात्-'किमेवं त्वरितं गच्छसि ? न कल्पते साधूनामेवं गन्तुम्' इत्याद्युक्ते प्रकोपनतया असङ्खडकरणेऽस्थिमङ्गादयो दोषाः । एवं स्थानचञ्चलादिष्वप्युपयुज्य आत्म-संयमविराधने वक्तव्ये ॥ अथ गति-स्थानचञ्चलौ तावदाह-

[भा.७५२] दावद्दविओ गइचंचलो उ ठाणचवलो इमो तिविहो ।
कुड्डादऽसइं फुसइ व, भमइ व पाए व विच्छुभइ ॥

वृ- इह द्रवशब्दो द्रुतार्थवाचकः, ततः 'द्रावद्रविकः' नाम द्रुतद्रुतगामी स गतिचञ्चलो भण्यते । स्थानचञ्चलः पुनरयं त्रिविधः, तद्यथा-यो निषन्नः सन् पृष्ठ-बाहु-कर-चरणादिभिः कुडयम् आदिशब्दात् स्तम्भादिकम् 'असकृद्' अनेकशः स्पृशति १, वाशब्द उत्तरापेक्षया विकल्पार्थः, यो वा निपन्न एवेतस्ततो भ्राम्यति २, पादौ वा 'विक्षिपति' पुनः पुनः सङ्कोचयति प्रसारयति चेत्यर्थः ३ ॥ भाषाचपलमाह-

[भा.७५३] भासाचपलो चउहा, अस त्ति अलियं असोहणं वा वि ।
असभाजोग्गमसब्भं, अणूहिउं तं तु असमिक्खं ॥

वृ- भाषाचपलश्चतुर्धा-असत्प्रलापी असभ्यप्रलापी असमीक्षितप्रलापी अदेशकालप्रलापी च । तत्रासत् प्रलपितुं शीलमस्येत्यसत्प्रलापी । अथासदिति कोऽर्थ ? इत्याह-असदिति शब्देनालीकमशोभनं वाऽभिधीयते । तत्रालीकं साधुमसाधुं ब्रवीति, असाधुं साधुमित्यादि । अशोभनं-गर्वादिदूषितं वचनम् । तथा असभायोग्यमसभ्यमभिधीयेते, इह सभा-एकत्रोपविष्टशिष्टरुपसमुदायः, तथा चोक्तम्-

धम्म-ऽत्थसत्थकुसला, सभासया जत्थसा सभा नाम ।
जा पुन अविहिपलुट्टा, बुहेहि सा भन्नए मेली ॥

तस्याः सभाया योग्यं यद् वचनं तत् सभ्यम्, तद्विपरीतमसभ्यम्, तच्च 'दास ! चण्डाल !' इत्यादिकं जकार-मकारादिवाक्यरूपं वा, तत् प्रलपितुं शीलमस्येत्यसभ्यप्रलापी । 'अनूहित्वा' अविचार्य 'किमिदं पूर्वापरविरुद्धम् ? किं वा इह-परलोकबाधकम् ?' इत्यादि अविमृश्य यद् वदति तत्तु वचनमसमीक्षितमुच्यते, तत्प्रलपनशीलोऽसमीक्षितप्रलापी ॥

अथादेशकालप्रलापिनमाह-

[भा.७५४] कज्जविवत्तिं दट्ठुं, भणाइ पुव्विं भए उ विन्नायं ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

एवमिदं तु भविस्सइ, अदेसकालप्पलावी उ ॥

वृ- 'कार्यविपत्तिं' कार्यस्य विनाशं दृष्ट्वा कश्चिद् भणति, यथा-मया पूर्वमेव विज्ञातम् 'इदं कार्यमेवं भविष्यति'। यथा-केनचित् साधुना पात्रं लेपितम्, ततो रूढं सत् कुतोऽपि प्रमादतो भग्नम्, ततः कश्चिदात्मनो दक्षत्वं ख्यापयन् ब्रवीति-यदैवेदं परिकर्मयितुमारब्धं तदैव मया ज्ञातम्, यथा-'इदं निष्पन्नमपि भङ्क्ष्यते'। एष एवंविधः अदेशकाले अनवसरे प्रलपनशीलोऽदेशकाल-प्रलापी ॥ व्याख्यातश्चतुर्विधोऽपि भाषाचपलः। अथ भावचपलमाह-

[भा.७५५] जं जं सुयमत्थो, उद्दिहं तस्स पारमप्पत्तो।
अन्नन्नसुयदुमाणं, पल्लवगाही उ भावचलो ॥

वृ- यद् यद् आवश्यक-दशवैकालिकादेर्ग्रन्थस्य 'श्रुतं' सूत्रमर्थो वा 'उद्दिष्टं' प्रारब्धं 'तस्य' इत्यत्रापि वीप्सा गम्यते तस्य तस्य पारमप्राप्तः सन् 'अन्यान्यश्रुतद्रुमाणाम्' आचारादिरूपापरार-शास्त्रतरूणां पल्लवान्-तन्मध्यगतालापक-श्लोक-गाथारूपान् सूत्रार्थलवान् स्वरुच्या ग्रहीतुं शीलमस्येति पल्लवग्राही, 'तुः पुनरर्थे, य एवंविधः स पुनः "भावचलः" भावचपलो मन्तव्यः ॥ भवेत् कारणं येन चञ्चलत्वमपि कुर्यात्। किं पुनस्तत् ? इत्याह-

[भा.७५६] तेने सावय ओसह, खित्ताई वाइ सेहवोसिरणे।
आयरिय-बालमाई, तदुभयछेए य बिइयपयं ॥

वृ- स्तेनभयेन श्वापदभयेन वा द्रुतमपि गच्छेद्, न दोषः। ग्लानो वा कश्चिदागाढस्त-स्यौषधानयननिमित्तं शीघ्रमपि गच्छेद् न च प्रायश्चित्तमाप्नुयात्। "खित्ताइ"त्ति क्षिप्तचित्त आदिशब्दाद् दृप्तचित्तो यक्षाविष्य उन्मादप्राप्तश्च एते स्थानचञ्चलत्वमपि कुड्यादिस्पर्शन-हस्तभ्रामणादिकं कुर्यु न च प्रायश्चित्तमाप्नुयुः, अनात्मवशत्वाद्। "वाइ"त्ति वादिनो बुद्धिं परिभवितुमलीकमपि ब्रूयात्, यथा-रोहगुप्तेन पोट्टशालपरिव्राजकमतिव्यामोहनार्थं जीवा अजीवा नोजीवाश्चेति त्रयो राशयः स्थापिताः। तथा शैक्षस्य पण्डकादेर्व्युत्सर्जने विधेये तं निर्भर्त्सयन् असभ्यमपि भणेत्, येनोद्वेजितः स्वयमेव गणाद् निष्क्रम्य गच्छेत्। आचार्या वा कुतश्चित् प्रमादस्थानाद् नोपरमन्ते ततोऽदेशकालप्रलापित्वमपि कुर्यात्, यथा-क्षमाश्रमणाः ! अमुकः संयतोऽमुकश्च श्रावको मम पुरत इदं भणति, यथा-त्वदीया गुरवः इत्थम्भूतां प्रमादप्रतिसेवनामा-सेवमाना अचिरादेव पार्श्वस्थीभवन्तः सम्भाव्यन्ते; एतच्च मया पूर्वमपि विज्ञातमासीत्, यथा।

क्षमाश्रमणानामेवमाचरतामपवादो भविष्यति, तत इदानीमप्युपरमध्वं भगवन्तः! एतस्मात् प्रमादस्थानात्; एवमुक्ते तेऽश्लोकभयेनैवोपरमन्ते। बालो वा केलि-कन्दर्पादिकं कुर्वाणो वार्यमाणोऽपि न निवर्त्तते ततोऽनूहितमपि यदपि तदपि भाषित्वा निवारणीयः, आदिग्रहणात् प्रत्यनीकादयो वा खर-परुषादिभाषैरुपशमयितव्याः। तथा 'तदुभयच्छेदः' इति कस्याप्या-चार्यस्यापूर्वं सूत्रमर्थो वा विद्यते तस्योभयस्यापि तत्पार्श्वादनधीयमानस्य व्यवच्छेदो भवति अतः पूर्वारब्धं शास्त्रमर्धपठितमपि मुक्त्वा तत् तदुभयमध्येतव्यमिति यथाक्रमं गति-स्थान-भाषा-भावचपलेषु चतुर्ष्वपि द्वितीयपदमवसातव्यम्। एतद्गाथोक्तकारणाद् ये गतिचपलादयस्तद्विपरीता ये गति-स्थान-भाषा-भावैश्चतुर्भिरप्यचपलास्तेऽस्य कल्पाध्ययनस्यानुयोगमर्हन्तीति ॥ गतमचञ्चलद्वारम्। अथावस्थितद्वारम्। तत्रानवस्थितं तावदाह-

Jain Education International For Private & Personal Use Only www.jainelibrary.org

[भा.७५७] दुविहो लिंग विहारे, एक्केक्को चेव होइ दुविहो उ।
चउरो य अनुग्घाया, तत्थ वि आणाइणो दोसा ॥

वृ- अनवस्थितो द्विविधः, तद्यथालिङ्गानवस्थितो विहारानवस्थितश्च। एकैकः पुनरपि द्विविदो भवति। तद् उभयमपि द्वैविध्यमनन्तरगाथायां वक्ष्यते। चत्वारश्च मासाः अनुद्धाताः' गुरवः, उपलक्षणत्वाद् लघुमासादिकं चात्र प्रायश्चित्तं भवति। तच्च यथास्थानमेव भावयिष्यते। तत्रापि लिङ्गानवस्थित-विहारानवस्थितयोरुभयोरप्याज्ञादयो दोषा द्रष्टव्याः ॥

अथैनामेव गाथां व्याख्यानयति-

[भा.७५८] गिहिलिंग अन्नलिंगं, जो उ करेई स लिंगओ दुविहो।
चरणे गणे अ अथिरो, विहारअणवट्ठिओ एस ॥

वृ- 'गृहिलिङ्गं' गृहस्थानां वेषम् 'अन्यलिङ्गम्' अन्यतीर्थिकानां नेपथ्यं 'यः' साधुः, तुशब्दो विशेषणे, किं विशिनष्टि ? दर्पेण यो लिङ्गद्वयं करोति स एष लिङ्गतो द्विविधोऽनवस्थितः। अस्य च द्विविधस्यापि मूलम्। तथा चोलपट्टकं बध्नतः १ एकत उभयतो वा स्कन्धोपरि कल्पाञ्चलानामारोपणरूपं गरुडपाक्षिकं प्रावृण्वतः २ उत्तरासङ्गरूपमर्द्धासन्यासं कुर्वतः ३ प्रत्येकं चत्वारो गुरुमासाः। द्वावपि बाहू छादयित्वा संयतीप्रावरणमातन्वानस्य चत्वारो लघवः। कल्पेन शिरःस्थगनरूपां शीर्षद्वारिका कुर्वतो मासलघु। चतुष्फलं मुत्कलं वा कल्पं स्कन्धोपरि कृत्वा गोपुच्छवदधोलमबमानं कुर्वतो मासलघु। एतेऽपि लिङ्गानवस्थितेऽन्तर्भवन्ति। तथा 'चरणे' चारित्रे 'अस्थिरः' यः पुनः पुनश्चारित्रात् प्रतिपतति तस्य यदि सूत्रं ददाति तदा चतुर्लघु, अर्थं ददाति तदा चतुर्गुरु। 'गणे' गच्छे 'अस्थिरः' पुनः पुनर्गणाद् गणं सङ्क्रामति। एष द्विविधोऽपि विहारानवस्थितः। एतद्विपरीतस्य स्वलिङ्गावस्थितस्य संविग्नविहारावस्थितस्य च दातव्यम्। यदि न ददाति तदा तथैव सूत्रे चतुर्लघु, अर्थे चतुर्गुरु ॥ गतमवस्थितद्वारम्।

अथ मेधाविद्वारमाह-

[भा.७५९] उग्गहण धारणाए मेराए चेव होइ मेधावी।
तिविहम्मि अहीकारो, मेरासंजुत्तो मेहावी ॥

वृ- मेधावी त्रिविधः, तद्यथा-अवग्रहणमेधावी सूत्रार्थग्रहणपटुप्रज्ञावान् १, धारणामेधावी पूर्वाधीतयोः प्रभूतयोरपि सूत्रार्थयोश्चिरमवधारणाबुद्धिमान् २, मर्यादामेधावी चरण-करणप्रवणमतिमान् ३। एभिस्त्रीभिः पदैरष्टौ भङ्गाः, तद्यथा-ग्रहणमेधावी धारणामेधावी मर्यादामेधावी १ ग्रहणमेदावी धारणामेधावी अमर्यादामेधावी २ इत्यादि। इह च यत्र यत्र भङ्गे मर्यादामेधावी न भवत तत्र तत्र न दातव्यम्, यदि ददाति तदा प्रायश्चित्तम्। तत्र यदि पार्श्वस्थादिभ्यः सूत्रमर्थं वा ददाति तदा चत्वारो लघवः, यथाच्छन्देभ्यः प्रददाति चत्वारो गुरुमासाः। "तिविहम्मि अहीगारो"त्ति मर्यादामेधाविनो ग्रहण-धारणामेधाविभ्यां सम्पन्नस्यासम्पन्नस्य वा दातव्यम्, मर्यादाविकलयोरितरयोर्न दातव्यमिति त्रिविधेनापि दाना-ऽदानरूपतया यथायोगमत्राधिकार इति। गाथायां तृतीयार्थे सप्तमी। अथ मर्यादामेधाविनो व्युत्पत्तिमाह- "मेरासंजुत्तो मेहावि"त्ति मेरा-मर्यादा तत्संयुक्तो मेधावी मर्यादामेधावी, शाकपार्थिवादिवद् मध्यपदलोपी समासः ॥

गतं मेधाविद्वारम्। अथापरिश्राविद्वारमाह-

Jain Education International For Private & Personal Use Only www.jainelibrary.org

[भा.७६०] परिसाइ अफरिसाई, दव्वे भावे य लोग उत्तरिए।
एक्केक्को वि य दुविहो, अमच्च बडुईए दिट्ठंतो ॥

वृ- परिश्रवितुं शीलमस्येति परिश्रावी, तद्विपरीतोऽपरिश्रावी। उभावपि द्विविधौ-द्रव्ये भावे च। तत्र द्रव्यतः परिश्रावी घटादि, अपरिश्रावी तुम्बकादि। भावतः परिश्रावी अपरिश्रावी च। एकैकोऽपि द्विविधः, तद्यथा-"लोग" त्ति लौकिकः "उत्तरिए" त्ति पदैकदेशे पदसमुदायोपचाराद् लोकोत्तरिकः। तत्र लौकिके भावतः परिश्राविणि अमात्यदृष्टान्तः। स चायम्- एगो राया। तस्स कन्ना गद्दभस्स जारिसा। सो निच्चं खोलाए अमुक्कियाए अच्छइ। सो अन्नया अमच्चेणं एगंते पुच्छिओ-किं तुब्भे भट्टारयपादा! खोलाए आविद्धियाए अच्छह? न कस्सइ सीसं कन्ना य दरिसेह?। रन्ना सब्भावो कहिओ, भणियं च-मा रहस्सभेयं काहिसि त्ति। तेन अगंभीरयाए तं रहस्स अणहियासमाणेण अडविं गंतुं रुक्खकोट्टरे मुहं छोढूणं भणियं-गद्दभकन्नो राया, गद्दभकन्नो राया। तं रुक्खं अन्नेण केणइ छेत्तुं वादित्रं कृतं। भवियव्ववायसेण य तं रन्नो पुरओ पढमं वाइयं। तं वज्जंतं भणइ-गद्दभकन्नो राया, गद्दभकन्नो राया। रन्ना अमच्च पुच्छिओ-तुमे परं एयं रहस्सं नायं, कस्स ते कहियं?। अमच्चेण जहावत्तं सिट्ठं। एस लोइओ परिस्सावी ॥

लोउत्तरिओ जो अनहियासमाणो पुच्छिओ वा अपुच्छिओ वा अरिणयाणं अववायपयाणि सुणेत्ता उट्ठिओ, तओ जइ कोइ अपरिणओ पुच्छइ-किं एयं कहिज्जइ?। भणइ-चरण-करणं साहूणं वन्निज्जइ ॥ ईदृशस्यापरिश्राविणो यदि सूत्रं न ददाति तदा चतुर्लघु, अर्थं न ददाति चतुर्गुरु॥ अथ "यश्च विद्वान्" इति द्वारमाह-

[भा.७६१] विदु जाणए विनीए, उववाए जो उ वट्टए गुरूणं।
तव्विवरीयऽविणीए, अदिंत दिंते अ लहु-गुरुगा ॥

वृ- "विदंक् ज्ञाने" इत्यस्य धातोर्वेत्ति-जानातीति व्युत्पत्या विद्वान् ज्ञायक उच्यते, स चेहाभ्युत्थाना-ऽऽसनप्रदानादिरूपस्य विनयस्य विज्ञाता ग्राह्यः, न केवलं ज्ञायकः किन्तु 'विनीतः' यथावसरमभ्युत्थानादिनिवयप्रयोक्ता, तथा 'उपपाते' आज्ञानिर्देशे गुरूणां 'यस्तु' यः पुनर्वर्त्तते तस्य सूत्रं न ददाति चतुर्लघु, अर्थं न ददाति चतुर्गुरु। तथा तस्य-विदुषो विपरीतस्तद्विपरीतस्तस्य विनयस्वरूपमजानत इत्यर्थः "विनीए" त्ति अकारप्रश्लेषाद् अविनीतस्य च सूत्रं ददाति चतुर्लघु, अर्थं ददाति चतुर्गुरु॥ गतं "यश्च विद्वान्" इति द्वारम्। अथ "पत्ते य" त्ति द्वारम्-अत्र च तिस्र व्याख्याः, तद्यथा-पात्रमेवानुयोगं श्रोतुमर्हति नापात्रमिति प्रथमा, प्राप्त एवानुयोगश्रवणं कारयितव्यो नाप्राप्त इति द्वितीया, वयक्त एवानुयोगं श्रावणीयो नाव्यक्त इति तृतीया, अस्यां च तृतीयव्याख्यायां "वत्ते य" त्ति पाठो द्रष्टव्यः। अथाभूनेव व्याचिख्यासुराह-

[भा.७६२] तिंतिनिए चलचित्ते, गाणंगणिए अ दुब्बलचरित्ते।
आयरियपारिभासी, वामावट्टे य पिसुणे य ॥

[भा.७६३] आदीअदिट्ठभावे, अकडसमायारि तरुणधम्मे य।
गव्विय पइन्न निण्हइ, छेअसुए वज्जए अत्थं ॥

वृ- तिन्तिणिकश्चलचित्तो गाणङ्गणिकश्च दुर्बलचारित्रः आचार्यपरिभाषी आचार्यपरिभावी वा वामावर्त्तश्च पिशुनश्च "आदीअदिट्ठभावे" त्ति आदौ-आवश्यकादिशास्त्रेषु वर्त्तमाना अदृष्टा

Jain Education International For Private & Personal Use Only www.jainelibrary.org

भावा येन स आद्यदृष्टभावः, तथा-अकृतसामाचारीकः तरुणधर्मा च गर्वितः "पइन्न" त्ति प्रकीर्णप्रश्नः प्रकीर्णविद्यश्च "निण्हइ" त्ति गुरुनिह्नवी एतेषां छेदश्रुतविषयमर्थं वर्जयेत्, न दद्यादित्यर्थः इति द्वारगाथाद्वयसमासार्थः ॥

व्यासार्थं प्रतिद्वारमभिधित्सुः प्रथमतस्तिन्तिणिकद्वारं व्याचष्टे-

[भा.७६४] डज्झंतं तिंबुरुदारुयं व दिवसं पि जो तिडितिडेइ ।
अह दव्वतिंतिणो भावओ उ आहारुवहि-सेज्जा ॥

वृ- 'तिम्बुरुकदारुकं' तिम्बुरुकवृक्षकाष्ठमग्नौ प्रक्षिप्तं दह्यमानं सद् यथा त्रटत्रटिति कुर्वदास्ते, एवं यो गुर्वादिभिः खरण्टितः सम्पूर्णमपि दिवसं "तिडितिडेइ" त्ति अनुकरणशब्दत्वात् 'त्रटत्रटायते' मम सम्मुखमिदमिदं च जल्पितमेभिरिति ऋषन्नास्ते इति भावः । अथैष द्रव्यतिन्तिणिकः । भावतस्तु तिन्तिणिकः त्रिविधः, तद्यथा-आहारे उपधौ शय्यायां चेति । पुनरेकैको द्विविधः-अन्तःसंयोजनया बहिसंयोजनया च ॥ तत्रोभयथाऽप्याहारतिन्तिणिकं तावदाह-

[भा.७६५] अंतो-बहिसंजोअण, आहारे बाहि खीर-दधिमाई ।
अंतो उ होइ तिविहा, भायण हत्थे मुहे चेव ॥

वृ- आहारविषया संयोजना द्विविधा-अन्तर्बहिश्च । तत्र बहिस्तावद् भाव्यते-कश्चित् साधुर्भिक्षामटन् क्षीरं वा दधि वा लब्ध्वा रसगृध्नुतया कलमशालिप्रभृतिकमोदनं चिरगोचर-चर्याकरणेनाप्युत्पाद्य यत् तेनैव क्षीरादिना सार्धमुपाश्रयाद् बहि संयोजयति, आदिशब्दात् परमान्नादिकं वा लब्ध्वा घृत-खण्डादिना बहिरेव स्थितः सन् यद् योजयति एषा बहिसंयोजना । अन्तस्तु प्रतिश्रयाभ्यन्तरे पुनः संयोजना त्रिविधा भवति, तद्यथा-भाजने हस्ते मुखे चैव । तत्र भाजनविषया यत्र भाजने कलमशाल्योदनस्तत्र दुग्ध-दध्यादि प्रक्षिपति । हस्तविषया मण्डक-पूपलिकादिना गुड-शर्करादि हस्तस्थितं वेष्टयित्वा मुख् प्रक्षिपति । मुखविषया पूर्वं मण्डकादि मुखे प्रक्षिप्य ततः शक्रका-खण्डादि प्रक्षिपति । एवंविधां द्विविधामप्याहारसंयोजनां लोभाभिभूततया कुर्वन् यदा यदा संयोजनीयवस्तुयोगं न लभते तदा तदा तिन्तिणिकत्वं करोतीत्याहारतिन्तिणिक उच्यते ॥ गत आहारतिन्तिणिकः । साम्प्रतमुपधि-शय्यातिन्तिणिकावतिदिशति-

[भा.७६६] एमेव उवहि सेज्जा, गुणोवमारी उ जस्स जं होइ ।
सो तेण जोययंतो, तदभावे तिंतिणो होइ ॥

वृ- एवमेवोपधि-शय्ययोरपि संयोजनाया भावना कार्या । सा चेयम्-उपधिसंयोजना द्विविधा-बहिरन्तश्च । तत्र बहिसंयोजना उत्कृष्टं कल्पं लब्ध्वा चोलपट्टकमपि उत्कृष्टमुत्पादयति, और्णिकं वा कल्पं सुन्दरं लब्ध्वा तदनुरूपमेव सौत्रिकमुत्पादयति, उत्पाद्य च तदुभयपरिभोगेन संयोजयति । अन्तः संयोजना पुनर्विभूषार्थं श्वेतकम्बल्यां कृष्णदवरकसीवनिकां ददाति इत्यादि । शय्या-प्रतिश्रयस्तस्य संयोजनाऽपि द्विविधा-बहिरन्तश्च । तत्र बहि-संयोजना अकपाटमुपाश्रयं लब्ध्वा कपाटाभ्यां संयोजयति । अन्तः संयोजना शोभार्थं प्रतिश्रयं गोमय-मृदादिना लिम्पति सेटिकया वा धवलयति । अथवा शय्याशब्देन संस्तारक उच्यते, ततश्च सुन्दरतरं संस्तारकं लब्ध्वा यद् उत्तरपट्टमपि तदनुरूपमुत्पाद्य परिभुङ्क्ते सा बहिसंयोजना । यत् पुनः सुकुमारस्पर्शार्थं विभूषार्थं वा सुन्दरया भङ्ग्या संस्तारकं प्रस्तृणाति सा अन्तःसंयोजना । तदेवं यद् उपध्यादिकं

Jain Education International For Private & Personal Use Only www.jainelibrary.org

'यस्य' साधोः 'गुणोपकारि' विभूषादिगुणोपयोगि भवति स 'तेन' विवक्षितेन वस्तुना सार्द्ध तदेव वस्तु 'योजयन्' मीलयन् 'तदभावे' विवक्षितवस्तुयोगाभावे 'तिन्तिणिको भवति' 'हा! नास्त्यमुकं वस्तु अत्र स्थण्डिलप्राये सन्निवेशे' इत्यादि जल्पतीत्यर्थः ॥

गतं तिन्तिणिकद्वारम् । अथ चलचित्तद्वारमतिदेशेनैवाह-

[भा.७६७] चलचित्तो भावचलो, उस्सग्गऽववायतो उ जो पुव्विं ।
भणितो सो चेव इहं, गाणंगणियं अतो वोच्छं ॥

वृ- चलचित्त इह 'भावचलः' अपरापरशास्त्रपल्लवग्राही गृह्यते । स च उत्सर्गतोऽपवादतश्च यः पूर्वमचञ्चलद्वारं भणितः स एवेहापि भणितव्यः । गाणङ्गणिकमत ऊर्ध्वं वक्ष्ये ॥ तमेवाह-

[भा.७६८] छम्मास अपूरित्ता, गुरुगा बारससमासु चउलहुगा ।
तेन परं मासलहू, गाणंगणि कारमे भइतो ॥

वृ- उपसम्पन्नः साधुः कारणाभावे षण्मासान् अपूरयित्वा यद्येकस्माद् गणाद् अपरं गणं सङ्क्रामति तदा तस्य चत्वारो गुरुकाः । षन्मास्याः परतो यावद् द्वादश समा-वर्षाणि ता अपूरयित्वा गच्छतश्चतुर्लघुकाः । ततः परं-द्वादशभ्यो वर्षेभ्य ऊर्द्ध निष्कारणं गणाद् गणं सङ्क्रामतो मासलघु। "गाणंगणि"त्ति भावप्रधानो निर्देशः, ततो गाणङ्गणिकत्वं 'कारणे' ज्ञान-दर्शनचारित्राणामन्यतरस्मिन् पुष्टालम्बने समुत्पन्ने 'भाज्यं' सेवनीयम् । किमुक्तं भवति ? -कारणे मध्येद्वादशवर्षमन्तः षण्मासं वा गणाद् गणं सङ्क्रामन्नपि न प्रायश्चित्तभाग् भवतीति ॥ गतं गाणङ्गणिकद्वारम् । सम्प्रति दुर्बलचारित्रद्वारमाह-

[भा.७६९] मूलगुण उत्तरगुणे, पडिसेवइ पनगमाइ जा चरिमं ।
धिइ-वीरियपरिहीणो, दुब्बलचरणो अनट्ठाए ॥

वृ- मूलगुणोत्तरगुणविषयानपराधान् यः प्रतिसेवते । कथम् ? इत्याह-'पञ्चकादि यावच्चरमम्' इह पञ्चकशब्देन यत्र प्रतिसेविते रात्रिन्दिवपञ्चकमापद्यते स सर्वजघन्यश्चरणापराधः परिगृह्यते, आदिशब्दाद् दशरात्रिन्दिवादिप्रायश्चित्तस्थानानि यावत् चरमं सर्वोत्कृष्टचरणापराधलक्षणं पाराञ्चिकप्रायश्चित्तस्थानमिति । कथम्भूतः सन् प्रतिसेवते ? इत्याह-'धृति-वीर्यपरिहीणः' मानसिकावष्टम्भवबलरहितः असौ, न खल्वनीदृशश्चरण-करणविषयभूतान्यपराधपदान्यासेवितुमुत्सहते । सोऽपि यदि पुष्टालम्बनतः प्रतिसेवते ततो न दोषभाग् भवेदित्याह- "अनट्ठाए"त्ति अर्थ-दर्शन-ज्ञानादिकं प्रयोजनं तदभावोऽनर्थं तेन यः प्रतिसेवते स एष दुर्बलचरणः॥ एवंविधस्य च्छेदश्रुतार्थदाने दोषबाहुल्यख्यापनार्थमिदमाह-

[भा.७७०] पंचमहव्वयभेदो, छक्कायवहो अ तेनऽणुन्नाओ ।
सुहसील-ऽवियत्ताणं, कहेइ जो पवयणरहस्स ॥

वृ- 'तेन' आचार्येण पञ्चमहाव्रतभेदः षट्कायवधश्चानुज्ञातः, यः 'सुखशीला-ऽव्यक्तानां' सुखं-शरीरशुश्रूषादिकं शीलयन्तीति सुखशीलाः-पार्श्वस्थादयः, अव्यक्ताः श्रुतेन वयसा च, सुखशीलाश्चाव्यक्ताश्चेति द्वन्द्वस्तेषामिति चूर्णिकृतोऽभिप्रायः । निशीथचूर्णिक-तः पुनरयम्- सुखे-शरीरसौख्ये शीलं-स्वभावो व्यक्तः-परिस्पष्टो येषां ते सुखशीलव्यक्तास्तेषाम्, यद्वा सुखं- मोक्षसौख्यं तद्विषयं यत् शलं-मूलोत्तरगुणानुष्ठानं ततो विगतो यत्नः-उद्यम आत्मा वा येषां ते

Jain Education International For Private & Personal Use Only www.jainelibrary.org

सुखशीलवियलाः सुखशीलव्यात्मानो वा तेषाम्, उभयत्रापि पार्श्वस्थादीनामित्यर्थः ।'प्रवचनरहस्यं' छेदग्रन्थार्थतत्वं कथयति ॥

कथं पुनस्तेन पञ्चमहाव्रतभेदः षट्कायवधश्चानुज्ञातो भवति ? इति उच्यते-

[भा.७७१] निस्साणपदं पीहइ, अनिस्साणविहारयं न रोएइ ।
तं जाण मंदधम्मं, इहलोगगवेसगं समणं ॥

वृ- निश्रीयते-मन्दश्रद्धाकैरासेव्यत इति निश्राणं तच्च तत् पदं निश्राणपदम्-अपवादपदमित्यर्थः, तदेव यः 'स्पृहयति' रुचिपदमवतारयति, अनिश्राणविहारितां तु न रोचयति, तमेवंविधं श्रमणं जानीहि मन्दधर्माणं 'इहलोकगवेषकं' मनोज्ञभक्त-पानाद्युपभोगेन केवलस्यैवेहलोकस्य चिन्तकं परलोकपराङ्मुखम् । एवंविधस्य च प्रवचनरहस्यप्रदाने विशेषतः पञ्चमहाव्रतभेदः षट्कायवधश्च भवतीति युक्तमुक्तं "तेनानुज्ञातः" इति ॥

गतं दुर्बलचारित्रद्वारम् । अथाऽऽचार्यपरिभाविद्वारमाह-

[भा.७७२] डहरो अकुलीनो त्ति य, दुम्मेहो दमग मंदबुद्धि त्ति ।
अविअप्पलाभलद्धी, सीसो परिभवइ आयरियं ॥

वृ- कश्चित् कुशिष्यः सूचया असूचया वा आचार्यं परिभवति । सूचा नाम स्वव्यपदेशेन परस्वरूपसूचनम्, यथा कोऽपि वयःपरिणतः साधुर्बालकमाचार्यं ब्रवीति-अद्यापि 'डहराः' बालका वयम्, किं नामास्माकमाचार्यपदस्य योग्यत्वम् ? इति । असूचा स्फुटमेव परदोषोद्घट्टनम्, यथा-भो आचार्य ! त्वं तावदद्यापि "डहरो" मुग्धः क्षीरकण्ठो वर्तसे, अतः कीद्दशं भवत आचार्यत्वम्? इति । योऽकुलीन आचार्यस्तमुद्दिश्य भणति-अहो ! उत्तमकुलसम्भूता अमी योग्या एवाऽऽचार्यपदस्य, वयं तु हीनकुलोत्पन्नाः, कुतोऽस्माकं सूरिपदयोग्यता ? ।यद्वा धिक् कष्टं यदकुलीनोऽप्ययमाचार्यपदे निवेशित इति । तथा 'दुर्मेधाः' मन्दप्रज्ञः 'द्रमकः' नाम दरिद्रो भूत्वा यः प्रव्रजितः 'मन्दबुद्धि' स्वल्पमति । अपि सम्भावनायाम्, सम्भाव्यते कुतोऽपि कारणादेवंविधोऽप्याचार्य इति । अल्पा-तुच्छा वस्त्र-पात्रादिलाभे लब्धिर्यस्य सोऽल्पलाभलब्धिः । एतानप्येवमेव सूचया असूचया च परिभवति ॥ अथ शिष्यपदं व्याचष्टे-

[भा.७७३] सो वि य सीसो दुविहो, पव्वावियगो अ सिक्खओ चेव ।
सो सिक्खओ अ तिविहो, सुत्ते अत्थे तदुभए य ॥

वृ- यः शिष्यो गुरून् परिभवति सोऽपि च द्विविधः-प्रव्राजितकश्च शिक्षकश्चैव । यस्तेनैव परिभूयमानगुरुणा दीक्षां ग्राहितः स प्रव्राजितकः । शिक्षकस्तु गच्छान्तरादध्ययनार्थमागतः । स च शिक्षकस्त्रिविधः-सूत्रेऽर्थे तदुभये च, सूत्रग्राहकोऽर्थग्राहकस्तदुभयग्राहकश्चेत्यर्थः ॥ गतमाचार्यपरिभाविद्वारम् । सम्प्रति वामावर्त्तद्वारमाह-

[भा.७७४] एहि भणिओ उ वच्चइ, वच्चसु भऊणिओ दुतं समल्लियइ ।
जं जह भन्नति तं तह, अकरेंतो वामवट्टो उ ॥

वृ- यः शिष्यः 'एहि' आगच्छेति भणितः सन् व्रजति, व्रजेति भणितः सन् 'द्रुतं' शीघ्रं समालीयते । एवमन्यदपि कार्यं यद् यथा भण्यते तत् तथा अकुर्वाणो वामावर्त्त उच्यते ॥

अथ पिशुनद्वारमाह-

Jain Education International For Private & Personal Use Only www.jainelibrary.org

[भा.७७५] पीईसुन्नण पिसुनो, गुरुगाइ चउण्ह जाव लहुओ उ।
अहच असंतासंते, लहुगा लहुगो गिही गुरुगा ॥

वृ- "पीईसुन्नण"त्ति अलीकानीतराणि वा परदूषणानि भाषमाणः प्रीतिं शून्यां करोतीति पिशुनः, नैरुक्ती शब्दनिष्पत्ति। स च यद्याचार्यस्य पैशून्यं करोति तदा चतुर्गुरु, उपाध्यायस्य करोति चतुर्लघु, भिक्षोः करोति मासगुरु, क्षुल्लकस्य करोति मासलघु इति चूर्ण्यभिप्रायः। निशीथचूर्ण्यभिप्रायेण तु-यद्याचार्य पैशून्यं करोति तदा चत्वारो गुरवः, उपाध्यायः करोति चत्वारो लघवः, भिक्षु करोति मासगुरु, क्षुल्लकः करोति मासलघु। अमुमेवार्थं सञ्जिघृक्षुराह-"गुरुगा" इत्यादि। 'चतुर्णाम्' आचार्यो-पाध्याय-भिक्षु-क्षुल्लकरूपाणां पैशून्यकरणे विषयभूतानां कर्तृभूतानां वा यथाक्रमं गुरुकादयो यावद् लघुको मासः प्रायश्चित्तम्। 'अथवा' इति प्रकारान्तरोपन्यासे, सामान्यतः संयतः संयतेषु पैशून्यं करोति तत्रासद्दूषणविषये पैशून्ये चत्वारो लघवः, सद्दूषणविषये लघुको मासः। एते एव प्रायश्चित्ते गृहिषु गुरुके अवसातव्ये। तद्यथा-गृहस्थेषु असद्भिर्दोषैः पैशून्यं करोति चत्वारो गुरवः, सद्भिः करोति गुरुमासः॥ अथादिमादृष्टभावद्वारं विवृणोति-

[भा.७७६] आवासगमाईया, सूयगडा जाव आइमा भावा।
ते उ न दिट्ठा जेणं, अदिट्ठभावो हवइ एसो ॥

वृ-आवश्यकादयः सूत्रकृताङ्गं यावद् ये आगमग्रन्थास्तेषु ये पदार्था अभिधेयास्ते आदिमा भावा उच्यन्ते। 'ते तु' ते पुनर्भावा येन न दृष्टाः-नावगताः स एषोऽदृष्टभाव इति, उपलक्षणत्वाद आदिमादृष्टभावो भवतीति॥ अथाकृतसामाचारीकद्वारं बिभावयिषुः सामाचारीस्वरूपं तावदाह-

[भा.७७७] दुविहा सामायारी, उवसंपद मंडलीए बोधव्वा।
अनालोइयम्मि गुरुगा, मंडलिमेरं अतो वोच्छं ॥

वृ-सामाचारी द्विविधा-उपसम्पदि मण्डल्यां च बोद्धव्या। तत्रोपसम्पत् त्रिविधा-ज्ञानोपसम्पद् दर्शनोपसम्पत् चारित्रोपसम्पत्। आसां च सामान्यत इयं सामाचारी-गच्छान्तरा दुपसम्पदः प्रतिपत्यर्थःमायातः साधुः पर्यनुयोक्तव्यः-'वत्स! कस्त्वम्? कुतो वा गच्छादागतोऽसि? किंनिमित्तमिहायातः?' इत्येवं यद्यपर्यनुयुज्य तस्योपसम्पदं प्रतीच्छति तदा 'अनालोचिते' अपर्यनुयुक्ते सति चत्वारो गुरुकाः। यद्वा 'अनालोचिते' आलोचनामदापयित्वा यदि तं परिभुङ्क्ते वाचयति वा तदा चत्वारो गुरुकाः। अत्र च ज्ञानोपसम्पदाऽधिकारः। "मंडलिमेरं अतो वोच्छं" ति मण्डली-सूत्रार्थमण्डलीरूपा तस्याः सम्बन्धिनीं मर्यादां-सामाचारीं अत ऊर्द्धं वक्ष्ये॥ प्रतिज्ञातमेवाह-

[भा.७७८] सुत्तम्मि होइ भयणा, पमाणतो यावि होइ भयणा उ।
अत्थम्मि उ जावइया, सुणिंति थेवेसु अन्ने वि ॥

वृ- 'सूत्रे' सूत्रमण्डल्यां निषद्यायां भजना कार्या-यदि तरुणो निरुपहतशरीरश्चाऽऽचार्यो न च निषद्याप्रियस्ततो न क्रियते निषद्या, अथ स्थविर आमयावी वा तरुणो वा निषद्याप्रियः ततः क्रियते। प्रमाणतोऽपि सूत्रमण्डल्यां निषद्याविषये भजना। किमुक्तं भवति?-कदाचिद् एकस्मिन कल्पे कदाचिद् द्वयोस्त्रिषु यावन्मात्रेषु वा कल्पेषूपविष्टः सुखेनैव वाचनां ददाति तावद्भि कल्पैर्निषद्या क्रियते। 'अर्थे' अर्थमण्डल्यां पुनर्यावन्तः साधवोऽर्थं शृ ण्वन्ति तावन्तः सर्वेऽप्यवश्यन्तया स्वं

Jain Education International For Private & Personal Use Only www.jainelibrary.org

स्वं कल्पं निषद्याकारकस्य प्रयच्छन्ति, स च तैः कल्पैर्निषद्यां रचयति। अथ स्तोका एवानुयोगं प्रगीतारस्ततः स्तोकेषु सत्सु 'अन्येऽपि' अनुयोगमश्रोतारोऽपि यावद्भिर्निषद्या भवति तावतः कल्पानर्पयन्ति ॥ अथार्थमण्डल्या एव विधिमाह-

[भा.७७९] मज्जण निसिज्ज अक्खा, किइकम्मुस्सग्ग वंदनग जेट्ठे।
परियाग जाइ सुअ सुणण समत्ते भासई जो उ॥

वृ- 'मार्जनम्' अनुयोगमण्डल्याः प्रमार्जनं तत्प्रथमतः कर्त्तव्यम्। ततो निषद्याद्वयं रचनीयम्-एका गुरूणामपरा पुनरक्षाणाम्। ततोऽक्षाः प्रमार्ज्य निषद्याया उपरि स्थापनीयाः। ततः 'कृतिकर्म' वन्दनकं गुरूणां दातव्यम्। ततोऽनुयोगप्रस्थापनार्थम् 'उत्सर्गः' कायोत्सर्गः, तत्र चाष्टावुच्छ्वासाश्चिन्तनीयाः। ततः पञ्चमङ्गलमुच्चार्य च्छोभवन्दनकं दत्त्वा "नाणंपंचविहं पन्नत्तं" इत्यादिना नन्द्याकर्षणे कृते ज्येष्ठस्य वन्दनं-प्रणामः कर्त्तव्य इति। अत्र परः प्राह-किं यः पर्यायेण ज्यायान् स ज्येष्ठः ? किं वा यो जात्या उपलक्षणत्वात् कुलेन वा ? यद्वा येन श्रुतं बह्वधीतम् ? अथ येन बहुभि परिपाटीभिरर्थस्य श्रवणं कृतम् ? एतेषां मध्ये क इह ज्येष्ठोऽधिक्रियते ?। अत्राचार्य प्रत्युत्तरयति-एतेषां मध्यादेकोऽपि नात्राधिक्रियते किन्तु 'समाप्ते' समर्थिते व्याख्याने उत्थितानां यो व्याख्यानलब्धिमान् 'अनुभाषते' अग्रणीभूय चिन्तनिकां कारयति स इह ज्येष्ठो भण्यते, तस्य जिनवचनव्याख्यानलक्षणगुणाधिकतयाऽवमरात्निकस्यापि वन्दनं विधेयम्। तथा गुरूणां हेतोः खेल-कायिकीमात्रके प्रथममेव तत्र स्थापयितव्ये, मा भूदनुयोगं शृण्वतां तदानयने श्रवणव्याघातः। एतच्च गाथायामनुक्तमपि प्रक्रमादत्र ज्ञातव्यम्, अन्यत्राऽऽवश्यकादावुक्तत्वात् ॥ अथात्रैव वैपरीत्यकरणे प्रायश्चित्तमाह-

[भा.७८०] अवितहकरणे सुद्धो, वितह करेंतस्स मासियं लहुगं।
अक्ख निसिज्जा लहुगा, सेसेसु वि मासियं लहुगं॥

वृ- प्रमार्जनादिषु पदेषु अवितथकरणे 'शुद्धः' न प्रायश्चित्तभाग्। एतेष्वेव सामाचारीं वितथां कुर्वाणस्य लघु मासिकम्, इदं च सामान्यत उक्तम्। अत इदमेव सविशेषं विषयविभागेनाह-"अक्ख" इत्यादि। अक्षाणामप्रमार्जनेऽस्थापने वा निषद्यामन्तरेण वा स्थापनेऽनुयोगं ददतः शृण्वतां वा चत्वारो लघुकाः। गुरूणां निषद्याया अकरणे श्रोतॄणां चत्वारो लघवः। शेषेष्वपि सर्वेषु मासिकं लघुकं प्रायश्चित्तम्। तद्यथा-अनुयोगमण्डलीस्थानं न प्रमार्जयन्ति, वन्दनकं गुरूणां न ददति, अनुयोगप्रारम्भनिमित्तं कायोत्सर्गं न कुर्वन्ति, खेलमात्रकादिकं न ढौकयन्ति, ज्येष्ठस्य प्रणामं न कुर्वन्ति, सर्वत्रापि प्रत्येकं मासलघु। एवंविधामुपसम्पन्मण्डलीविषयां द्विविधामपि सामाचारीं यो न करोति स्म सोऽकृतसामाचारीक उच्यते ॥ गतमकृतसामाचारीकद्वारम्।

सम्प्रति तरुणधर्मद्वारमाह-

[भा.७८१] तिण्हाऽऽरेण समाणं, होइ पकप्पम्मि तरुणधम्मो उ।
पंचण्ह दसाकप्पे, जस्स व जो जत्तिओ कालो॥

वृ- व्रतपर्यायमधिकृत्य तिसृणां 'समानां' वर्षाणां 'आरेण' अर्वाग् वर्त्तमानः 'प्रकल्पे' निशीथाध्ययने 'तरुणधर्मा' अविपक्वपर्यायो भवति। तुशब्दो विशेषणे। किं विशिनष्टि ? इह यः स्वल्पसञ्जातपञ्चकुर्चीकः स त्रिवर्षपर्यायेऽपि वर्त्तमानो निशीथाध्ययनस्यायोग्यो मन्तव्य

Jain Education International For Private & Personal Use Only www.jainelibrary.org

इति। पञ्चानां वर्षाणामर्वाग् वर्त्तमानस्तु "दसाकप्पे" ति उपलक्षणत्वाद् दशा-कल्प-व्यवहाराणां तरुणधर्मा ज्ञातव्यः। 'यस्य वा' सूत्रकृताङ्गादेः श्रुतस्य यो यावान् कालो व्यवहाराध्ययने दशमोद्देशके भणितः तस्य तावन्तं कालमसमापयन् तरुणधर्मा भवति। यथा- "कप्पइ चउवासपरियायस्स समणस्स निग्गंथस्स सूअगडं नाम अंगं उद्दिसित्तए" इत्यादि॥

गतं तरुणधर्मद्वारम्। अथ गर्वितद्वारमाह-

[भा.७८२] पुरिसम्मि दुव्विनीए, विनयविहाणं न किंचि आइक्खे।
न वि दिज्जइ आभरणं, पलियत्तियकन्न-हत्थस्स॥

इह यः श्रुतमधीयानः तदवलेपादेव दुर्विनीतो भवन्नुपलभ्यते, तादृशे पुरुषे 'विनयविधानं' कर्मविनयनोपायमाऽऽचारादि श्रुतजातम् 'किञ्चिदपि' स्तोकमात्रमपि 'नाऽऽचक्षीत' न प्रतिपादयेत्। यद्वा विनयः-द्वादशावर्त्तवन्दनकप्रदानादिप्रतिरूपोपचाररूपो विधीयते यस्मिन्नधीयमाने तद् 'विनयविधानम्' आचारादि श्रुतमेव तद् नाऽऽचक्षीत। कुतो हेतोः? इति चेद् अत आह- "न वि दिज्जइ" इत्यादि। 'नापि' नैव दीयते 'आभरणं' कुण्डलकङ्कणादिकं परिकर्त्तितकर्ण-हस्तस्य पुरुषस्य, आविध्यमानस्यापि तस्य तदङ्गे शोभाया अलभमानत्वात्; एवं श्रुताभरणमपि विनयविकलाङ्गस्य योज्यमानं न शोभां बिभर्त्ति इति जिनवचनवेदिना तस्य तद् न दातव्यम्॥ अथाऽस्यैव सविशेषमपात्रताख्यापनार्थमाह-

[भा.७८३] मद्दवकरणं नाणं, तेनेव उ जे मदं समुवहंति।
ऊणगभायणसरिसा, अगदो वि विसायते तेसिं॥

वृ- मार्दवं-माननिग्रहस्तत्करणं-तत्कारकं 'ज्ञानं' श्रुतरूपम्, 'तेनैव' ज्ञानेन 'ये' दुर्विदग्धाः 'मदम्' अहङ्कारं समुद्वहन्ति। कथम्भूताः? 'ऊनकभाजनसदृशाः' असम्पूर्णभृतघटादिभाजनतुल्याः, यथा किल तद् झलझलायते तथैतेऽपि दुरधीतविद्यालवतया निजपाण्डित्यगर्वाध्माता यदपि तदपि लपन्तस्तिष्ठन्ति। तेषाम् 'अगदोऽपि' विषापहारकमप्यौषधं 'विषायते' विषरूपतया परिणमते श्रुतरूपम्। तथा चैतदर्थसंवादकमेवेदं सूक्तम्-

ज्ञानं मद-दर्पहरं, माद्यति यस्तेन तस्य को वैद्यः।
अमृतं यस्य विषायति, तस्य चिकित्सा कथं क्रियते?॥

गतं गर्वितद्वारम्। अथ प्रकीर्णकद्वारमाह-

[भा.७८४] सोउं अनभिगताणं, कहेइ अमुगं कहिज्जई इत्थं।
एस उ पइन्नपन्नो, पइन्नविज्ञो उ सव्वं पि॥

वृ- अर्थमण्डल्यां यो राहसिकग्रन्थार्थं श्रुत्वा उत्थितः सन् 'अनभिगतानाम्' अपरिणतानां लेशोद्देशतः कथयति-यथा 'अमुकं' प्रलम्बग्रहणादिकम् 'अत्र' सूत्रे कल्पनीयतया कथ्यते; एष प्रकीर्णप्रज्ञः। प्रज्ञाशब्देनेह प्रकर्षेण ज्ञायते उत्सर्गा-ऽपवादतत्त्वमनयेति व्युत्पत्त्या छेदसूत्रान्तर्गता रहस्यवचनपद्धतिरुच्यते, सा प्रकीर्णा-विक्षिप्ता येन स प्रकीर्णप्रज्ञः। "प्रकीर्णप्रश्नः" ("पइन्न-पण्हो"] इति वा पाठः, तत्र चापरिणतैः 'किमेतद् रहस्यभूतमत्राभिधीयते?' इत्युल्लेखेन पृच्छयत इति प्रश्नः-छेदश्रुतान्तः पाती रहस्यार्थ इत्यर्थः, स प्रकीर्णो येन स प्रकीर्णप्रश्न इति। तथा

Jain Education International For Private & Personal Use Only www.jainelibrary.org

प्रकीर्णविद्यस्तु सर्वमप्यादेरारभ्य पर्यन्तं यावत् छेदश्रुतमुत्सर्गाऽपवादसहितमपरिणतानां कथयति। विद्याशब्देन चात्राऽखण्डं छेदश्रुतमभिधीयते, प्रकीर्णा विद्या येन स प्रकीर्णविद्य इति ॥ अथ द्विविधस्यापि प्रकीर्णव्याकर्तुर्दोषानाह-

[भा.७८५] अप्पच्चओ अकित्ती, जिनान ओहाव मइलणा चेव।
दुल्लहबोहीअत्तं, पावंति पइन्नवागरणा ॥

वृ- अपरिणतादीनां राहसिकेषु पदेषु ज्ञाप्यमानेषु 'अप्रत्ययः' अविश्वासो भवति; पूर्वापरविरुद्धमिदं शास्त्रम्, यत पूर्वं "न कल्पते तालप्रलम्बं प्रतिग्रहीतुम्" इति प्ररूप्य पश्चात् "कल्पते" इत्यनुज्ञायाः प्रतिपादनात्; यथा चैतदलीकं तथा सर्वमपि जिनवचनमीदृशमेवेति। ते चैवं विपरिणताः सन्तः 'जिनानां' तीर्थकृतामकीर्तिं कुर्यु, कुत एषां सर्वज्ञत्वम्? यैरीदृशं पूर्वापरव्याहतं भाषितमिति। ततश्च ते "ओहाव"त्ति 'अवधावनम्' उत्प्रव्रजनं कुर्वीरन्। अथ नोत्प्रव्रजेयुस्तथापि "मइलण"त्ति तेषामद्याप्यपरिणतत्वादपवादपदं श्रुत्वाऽपरिणामकत्वेनाति-परिणामकत्वेन वा शङ्कादिदोषतो ज्ञानादीनां 'मलिनता' मालिन्यं स्यादिति। ततश्चैवमप्रत्ययादिकं जनयन्तो दुर्लभबोधिकत्वं प्राप्नुवन्ति, क एते? इत्याह-'प्रकीर्णव्याकरणाः' प्रविस्तारितच्छेद-श्रुतरहस्यार्थनिर्वचनाः, प्रकीर्णप्रश्नाः प्रकीर्णविद्याश्चेत्यर्थः ॥

व्याख्यातं प्रकीर्णद्वारम्। अथ निह्नवद्वारं विवृणोति-

[भा.७८६] सुत्त-ऽत्थ-तदुभयाइं, जो घेत्तुं निण्हवे तमायरियं।
लहुया गुरुया अत्थे, गेरुयनायं अबोही य ॥

वृ- यः सूत्रा-ऽर्थ-तदुभयानि कस्यचित् पार्श्वे गृहीत्वा तमाचार्यं 'निह्नुते' अपलपति, अपरं कमपि विख्यातगुणमाचार्यमुद्दिशति, अथवा ब्रूयात्-मया स्वयमेवाभ्यूह्याभ्यूह्य सकलमपि श्रुतं निर्णीतम्, केवलं तैर्वाचनाचार्यैर्मम दिङ्मात्रमेव दत्तमिति। अत्र च यदि सूत्राचार्यं निह्नुते तदा चत्वारो लघकाः, 'अर्थे' अर्थदायकमाचार्यं निह्नुवानस्य चत्वारो गुरुकाः, तदुभयाचार्यमपलपतः तदुभयं प्रायश्चित्तमिति। गेरुकः-परिव्राजकस्तस्य ज्ञातं-दृष्टान्तः। स चायम्-

एगस्स ण्हावियस्स छुरघरगं विज्ञाए आगासे चिट्ठइ। तं च एगो परिव्वायगो बहूहिं उवासनाहिं आराहेऊण तस्स सगासे विज्जं गिण्हित्ता अन्नत्थ गंतुं तिदंडेणं आगासगएण अच्छइ, तओ सो लोगेणं पूइज्जइ। अन्नया रन्ना पुच्छिओ-भगवं! किं विज्ञाइसओ? उआहु तवाइसओ?। भणइ-विज्ञाइसओ। कओ आगमिउ? त्ति। भणइ-हिमवंते पव्वए फलाहारनामस्स महरिसिस्स सगासाउ-त्ति भणिए तं तिदंडं खड त्ति पडियं। एस दिट्ठंतो। अयमत्थोवणओ-जहा सो ण्हावियं विज्ञायरियं निण्हवेंतो ओहावणं पत्तो, एवं अन्ने वि अप्पगासं पि वायणायरियं निण्हवेंता इहलोए चेव बहूणं समण-सावगाईणं हीलणिज्ञा भवंति देवयाहि य छलिज्जंति त्ति। तथा "अबोही य"त्ति परलोके अबोधिफलं कर्म गुरुनिह्नावकोऽर्जयति। एवंविधस्य न दातव्यम् ॥ यत आह-

[भा.७८७] उवहयमइ-विन्नाणे, न कहेयव्वं सुयं व अत्थो वा।
न मणी सयसाहस्सो, आविज्झइ कोत्थु भासस्स ॥

वृ- मतिश्च स्वाभाविकी विज्ञानं च गुरूपदेशजं मति-विज्ञाने, ते उपहते-दूषिते यस्य सः 'उपहतमति-विज्ञानः' गुरुनिह्नोता। कथम्? इति चेद् उच्यते-इह तावद् गृहस्था अपि

Jain Education International For Private & Personal Use Only www.jainelibrary.org

मिथ्यादृष्टयस्तत्वा-ऽतत्वव्यतिकरविवेकविकला ऐहिकफलार्थमर्थशास्त्र-धनुर्वेदादि यस्य सकाशे शिक्षितवन्तास्तं यावज्जीवं गुरुं प्रतिपद्यमानाः सर्वस्यापि लोकस्य पुरतः श्लाघन्ते, न पुनः कदापि कस्यापि पुरतो निह्नुवते; स पुनः सर्वज्ञशासनप्रतिपन्नोऽप्यचिन्त्यचिन्तामणिकल्पश्रुतदायकानपि परमगुरून् निह्नुते इत्यतोऽसौ तेभ्योऽप्यधमत्वादुपहतमति-विज्ञानोऽभिधीयते। एवंविधे शिष्ये न कथयितव्यं 'श्रुतं वा' सूत्रम् 'अर्थो वा' तदभिधेयः। अमुमेवार्थं प्रतिवस्तूपमया द्रढयति- "न मणी" इत्यादि। "कोत्थु" त्ति आर्षस्वात् कौस्तुभो नाम मणि 'शतसहस्र' लक्षमूल्यः 'भासस्य' शकुन्तोख्यस्य पक्षिणो गलके नाऽऽविध्यते, अयोग्यत्वात्; एवमस्यापि गुरुनिह्नोतुरत्यन्तापात्र-भूतस्य श्रुतरत्नप्रदानमनुचितमिति न विधेयम्॥ गतं निह्नवद्वारम्। अत्र च तिन्तिणिक-चलचित्त-गाणङ्गणिक-दुर्बलचारित्रा-ऽऽचार्यपरिभाषि-वामावर्त्त-पिशुना-ऽकृतसामाचारीक-गर्वित-प्रकीर्ण-निह्नविनः एकादशाऽपात्रभूताः शिष्याः, आदिमादृष्टभावोऽप्राप्तः, तरुणधर्मा पुनरव्यक्तः। अथैषां सूत्रार्थप्रदाने प्रायश्चित्तमाह-

[भा.७८८] अव्वत्ते अ अपत्ते, लहुगा लहुगा य होंति अप्पत्ते।
लहुगा य दव्वतिंतिणि, रसतिंतिणि होंति चतुगुरुगा॥

वृ- अव्यक्तः-तरुणधर्मा तस्य तथा "अपत्ते" त्ति अपात्राणामेकादशसङ्खयाकानां सूत्रार्थौ यदि ददाति तदा चत्वारो लघुकाः। "लहुगा य होंति अप्पत्ते" त्ति अप्राप्त-आद्यदृष्टभावस्तस्य ददाति चत्वारो लघवः। 'रसतिन्तिणिकस्य' आहारतिन्तिणिकस्य ददाति चत्वारो गुरवः। उपधि-शय्यातिन्तिणिकयोर्ददानस्य चत्वारो लघव इत्यनुक्तमप्यत्रावसातव्यम्, निशीथ चूर्णा वुक्तत्वात्॥

[भा.७८९] अंतो बहिं च गुरुगा, आयरिय-गिलाण-बाल विइअपयं।
आयरियपारिभासिस्स होंति चउरो अनुग्घाया॥

वृ- आहारोपधि-शय्याविषयामन्तर्बहिर्वा संयोजनां कुर्वतश्चत्वारो गुरवः। आचार्य-ग्लान-बालादीनामर्थाय द्वितीयपदं भवति, एतदर्थं संयोजनामपि कुर्वन् शुद्ध इत्यर्थः। आचार्यपरिभाषिणः पुनश्चत्वारोऽनुद्धाताः प्रायश्चित्तम्॥ अथोपसंहरन्नाह-

[भा.७९०] तम्हा न कहेयव्वं, आयरिएणं तु पवयणरहस्सं।
खेत्तं कालं पुरिसं, नाऊण पगासए गुज्झं॥

वृ- यस्मादेवं प्रायश्चित्तमभिहितं तस्मात् तिन्तिणिकादीनामाचार्येण 'प्रवचनरहस्यम्' अपवादपदं 'न कथयितव्यम्' न प्ररूपणीयमिति। कथं पुनः कथयितव्यम्? इत्याह-'क्षेत्रम्' अध्वादिकं प्रवेष्टव्यं ज्ञात्वा प्रथमतोऽध्वकल्पादिकं प्रवचनरहस्यभूतमपरिणतानामपि कथयितव्यम्, अन्यथा तेषां मार्गे गच्छतां संयमा-ऽऽत्मविराधना स्यात्। एवं 'कालमपि' दुर्भिक्षादिकमागमिष्यन्तमागतं वा ज्ञात्वा यथायोगमपरिणतानामपि राहसिकश्रुतार्थं प्रकाशयेत्। 'पुरुषं वा' परिणामकलक्षणम् उपलक्षणत्वाद् भावं वा-ग्लान-बाल-वृद्धा-ऽसहिष्णुप्रभृतीना-मुपग्रहकरणादिलक्षणं ज्ञात्वा प्रकाशयेद् 'गुह्यं' छेदश्रुतरहस्यभूतमपवादपदमिति॥

व्याख्यातं "पत्ते अ" त्ति द्वारम्। अथानुज्ञातद्वारमाह-

[भा.७९१] चउभंगो अणुन्नाए, अननुन्नाए अ पढमतो सुद्धो।
सेसाणं मासलहू, अविनयमाई भवे दोसा॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

वृ-अत्रानुज्ञाता-ऽननुज्ञातपदाभ्यां चतुर्भङ्गी कार्या, तद्यथा-अनुज्ञातमनुज्ञातो वाचयतीति प्रथमः, अस्य भावना-कश्चित् प्रातीच्छिको गच्छान्तरादागम्य सूत्राध्ययनार्थमुपसम्पन्नः, स चाऽऽचार्यैरनुज्ञातः-आर्य ! उपाध्यायस्य सकाशेऽधीष्वेति; ततः स उपाध्यायस्य समीपे गत्वा ब्रूते-भगवन् ! गुरुभिरहमादिष्टो भवतां पादमूले पठनार्थमिति; तत उपाध्यायेनागत्याचार्या प्रच्छनीयाः, यथा-क्षमाश्रमणाः ! पाठयाम्यहममुकं साधुम् ? इति; ततो गुरुभि 'बाढम्' इत्युक्ते स उपाध्यायेन पाठनीयः; एवंकुर्वन् अनुज्ञातमनुज्ञातो वाचयतीति अभिधीयते, एष प्रथमो भङ्गः शुद्धः । अनुज्ञातमननुज्ञात इति द्वितीयः, तद्भावना-स साधुराचार्यैर्भणितः-पठोपाध्यायान्तिके, स चैवमादिष्टः पठितुमुपस्थित उपाध्यायसन्निधौ, स उपाध्यायो यद्याचार्याननपृष्ट्वा तं पाठयति तत उपाध्यायस्य मासलघु । अननुज्ञातमनुज्ञात इति तृतीयः, अत्राचार्यैरुपाध्यायस्तस्य साधोः शृण्वतः सन्दिष्टः-आर्य ! पाठयेरमुं साधुमिति, न पुनरितरः सन्दिष्टः, ततः स उपस्थितः सन्नुपाध्यायेन प्रश्ननीयः-सौम्य ! क्षमाश्रमणैः सन्दिष्टस्त्वम् ? न वा ? इति; स प्रतिब्रूयात्-'मया युष्माकमादेशो दीयमानः श्रुतो न पुनरहं सन्दिष्टः' इत्युक्ते यद्युपाध्यायः पाठयति तदा द्वयोरप्यध्यापका-ऽध्यायकयोर्मासलघु; अथ न पाठयति तत उपाध्यायः शुद्धः । अननुज्ञातमननुज्ञातो वाचयतीति चतुर्थो भङ्गः, अत्र चोपाध्यायोऽप्यननुज्ञातः शिष्योऽप्यननुज्ञात इति कृत्वा द्वयोरपि मासलघु । अत एवाह- 'शेषेषु' प्रथमभङ्गव्यतिरिक्तेषु भङ्गेषु मासलघु । गाथायां प्राकृतत्वात् सप्तम्यर्थे षष्ठी । अविनयादयश्च दोषा भवन्ति, आदिशब्दाद् अनवस्था-अन्येषामपि यदृच्छयाऽध्ययना-ऽध्यापनलक्षणा इत्यादयो दोषाः परिगृह्यन्ते ।।

गतमनुज्ञातद्वारम् । अथ भावतः परिणामक इति द्वारं व्याख्यायते-अत्र च भावग्रहणाद् द्रव्य-क्षेत्र-काला अपि गृहीता द्रष्टव्याः, परिणामकप्रक्रमाच्चाऽपरिणामका-ऽतिपरिणामकावपि व्याख्येयाविति चेतसि व्यवस्थाप्य सूरिरिमां निर्युक्तिगाथामाह-

[भा.७९२] परिणाम अपरिणामे, अइपरिणाम पडिसेह चरिमदुए ।
अंबाईदिट्ठंतो, कहणा य इमेहि ठाणेहिं ।।

वृ- परिणामका-ऽपरिणामका-ऽतिपरिणामकानां प्ररूपणा कर्त्तव्या । प्रतिषेधः 'चरमद्विकस्य' अपरिणामका-ऽतिपरिणामकयुगलस्य कर्त्तव्यः, अनयोश्छेदश्रुतं न दातव्यमिति भावः । एषां च त्रयाणामपि परीक्षार्थमाम्रादिदृष्टान्तो वक्तव्यः, आदिशब्दाद् वृक्षमाणैः 'स्थानैः' प्रकारैराचार्येण कर्त्तव्येति ।। अथैनामेव गाथां विवृणोति-

[भा.७९३] जो दव्व-खेत्तकय-काल-भावओ जं जहा जिनक्खायं ।
तं तह सद्दहमाणं, जाणसु परिणामयं साधुं ।।

वृ-अत्र "तुलादण्डमध्यग्रहण" न्यायेन कृतशब्दो मध्येऽभिहितोऽपि सर्वत्रापि सम्बध्यते। यः कश्चिद् द्रव्यकृतं क्षेत्रकृतं कालकृतं भावकृतम्, द्रव्यादिभिर्भेदैः सूत्रे विहितमित्यर्थः, यद् वस्तु 'यथा' येनोत्सर्गा-ऽपवादरूपेण प्रकारेण जिनैराख्यातं तत् तथा श्रद्दधाति, तमेवं 'श्रद्दधानं' रोचयन्तं जानीहि परिणामकं साधुम् । इयमत्र भावना-द्रव्यतः सचित्ता-ऽचित्तमिश्राणि द्रव्याणि यादृशे कार्ये कल्पन्ते न वा, क्षेत्रतोऽध्वनि वा जनपदे वा यद् यथाऽध्वकल्पादिकमाचारणीयम्, यादृग् विधिः । तदेवं सर्वमपि श्रद्दधानो यथावसरं प्रयुञ्जानश्च परिणामको ज्ञातव्यः ।।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

अपरिणामकमाह-

[भा.७९४] जो दव्व-खेत्तकय-काल-भावओ जं जहा जिणक्खायं ।
तं तह असद्दहंतं, जाण अपरिणामयं साहुं ।।

वृ-यो द्रव्य-क्षेत्र-काल-भावकृतं यद् यथा जिनैराख्यातं तन्न श्रद्दधाति, तं तथा अश्रद्दधन्तं जानीहि अपरिणामकं सादुम् ।। अतिपरिणामकमाह-

[भा.७९५] जो दव्व-खेत्तकय-काल-भावओ जं जहिं जया काले ।
तल्लेसुस्सुत्तमई, अइपरिणामं वियाणाहि ।।

वृ- यो द्रव्य-क्षेत्र-काल-भावकृतं 'यद्' वस्तु 'यस्मिन्' विकृष्टाध्वादौ 'यदा काले' आत्यन्तिकदुर्भिक्षादौ भणितम्, "तल्लेसु"त्ति तस्मिन्-द्रव्यादिकृते आपवादिकवस्तुनि लेश्या यस्य स तल्लेश्यः, 'पश्यामि तावदत्र किमपि निश्रापदं ततस्तदेवालम्बयिष्यामि' इत्यपवाद-पदैकमतिरित्यर्थः । तथा सूत्राद्-अपवादश्रुताद् उत्-प्राबल्येन मतिरस्येत्युत्सूत्रमति, श्रुतोक्ता-पवादादभ्यधिकापवादबुद्धिरिति भावः । तमेवंविधं साधुमतिपरिणामकं विजानीहीति ।।

अथामीषामेव व्युत्पत्तिनिमित्तं लक्षणमाह-

[भा.७९६] परिणमइ जहत्थेणं, मई उ परिणामगस्स कज्जेसु ।
बिइए न उ परिणमई, अहिगं मइ परिणमे तइओ ।।

वृ- परिणामकस्य मति कार्येषु 'यथाथ्येर्न' यथार्थग्राहकतया परिणमते, अत एवासौ परिणामक उच्यते । 'द्वितीये' द्वितीयस्यापरिणामकस्य मति 'न तु' नैव परिणमते, अत एवासावपरिणामक उच्यते । तृतीयः पुनरधिकां मतिं परिणमयतीत्यतिपरिणामकोऽभिधीयते।। एतदेव स्पष्टयति-

[भा.७९७] दोसु वि परिणमइ मई, उस्सग्गऽववायओ उ पढमस्स ।
बिइतस्स उ उस्सग्गे, अइअववाए य तइयस्स ।।

वृ- 'प्रथमस्य' परिणामकस्य मतिरुत्सर्गा-ऽपवादयोर्द्वयोरपि परिणमति (ते] । किमुक्तं भवति ? - यः परिणामको भवति तस्योत्सर्गे प्राप्ते उत्सर्ग एव मति परिणमते, अपवादे प्राप्तेऽपवादे एव मति परिणमते; यत्रोत्सर्गो बलीयान् तत्रोत्सर्गं समाचरति, यत्रापवादो बलवान् तत्रापवादं गृह्णाति । 'द्वितीयस्य' अपरिणामकस्य पुनरुत्सर्ग एव मति परिणमते, न पुनरपवादे । तृतीयस्य तु अति-अत्यर्थम् अपवादे मति परिणमते; स च द्रव्यादिकारणेषु प्रतिसेवनामनुज्ञातां ज्ञात्वा न किञ्चित् परिहरति, कारणमन्तरेणापि प्रतिसेवते ।। अथ यदुक्तमासीत् "अंबाईदिट्ठंतो" त्ति तद् इदानीं भाव्यते-एतेषां परिणामकादीनां त्रयाणामपि जिज्ञासया केचिदाचार्या स्वशिष्यानित्थ-मभिदध्यु-'आर्या ! आम्रैरस्माकं प्रयोजनमस्ति' इत्युक्ते यः परिणामकः शिष्यः स ब्रूयात्-

[भा.७९८] चेयणचेयण भाविय, केद्दह छिन्ने अ कित्तिया वा वि ।
लद्धा पुणो व वोच्छं, वीमंसत्थं व वुत्तो सि ।।

वृ- भगवन् ! यैराम्रैः प्रयोजनं तानि किं चेतनानि ? उताचेतनानि ? किं 'भावितानि' लवणादिभिर्वासितानि ? उताभावितानि ? "केद्दह" त्त किंप्रमाणानि ? किंम महान्ति ? किं वा लघूनि ? "छिन्न"त्ति किं पूर्वच्छिन्नानि ? वा इदानीं छित्वा ? अथवा "छिन्न" त्ति किं 'छिन्नानि'

Jain Education International For Private & Personal Use Only www.jainelibrary.org

खण्डीकृतानि ? किं वा सकलानि ? "कित्तिया वा वि" त्ति कियन्ति वा गणनया द्वित्र्यादिसङ्ख्याकान्यानयामि? अपिशब्दात् किं बद्धास्थिकानि ? अबद्धास्थिकानि वा ? तरुणानि ? जरठानि वा ? इत्याद्यपि द्रष्टव्यम् । इत्थं शिष्येणाभिहिते आचार्येण वक्तव्यम्-सौम्य ! लब्धानि सन्त्यग्रेऽपि मम पुनः पुरा विस्मृतान्यासन् इदानीं स्मृतिपथमवतीर्णानीति; यद्वा पर्याप्तं तावदिदानीम्, प्रयोजने समापतिते पुनर्मभवन्तं 'वक्ष्यामि' भणिष्यामि; अथवा वत्स ! किं ममाऽऽम्रैः कार्यम् ? 'विमर्शार्थं' 'किमयं विनीतः ? न वा ?, परिणामको वा ? न वा ?' इति विन्यासनार्थमुक्तोऽसीति ॥

यः पुनरपरिणामकः स ब्रूयात्-

[भा.७९९] किं ते पित्तपलावो, मा बीयं एरिसाई जंपाहि ।
मा णं परो वि सोच्छिहि, कहं पि नेच्छामो एयस्स ॥

वृ- भो आचार्य ! किं ते पित्तप्लावः समजनि यदेवमुन्मत्तवदसम्बद्धं प्रलपसि ?, यद्येकवारं ममाग्रे जल्पितं तर्हि जल्पितं नाम, मा पुनर्द्वितीयं वारं ईदृशानि सावद्यानि वचनानि जल्पेति; यतः मा "णं" इति एतत् त्वदीयं वचनं 'परोऽपि' अन्योऽपि श्रोष्यति, वयं पुनः कथामपि नेच्छामः 'एतस्य' अर्थस्य आम्रानयनलक्षणस्य किं पुनः कर्त्तव्यतामित्यपिशब्दार्थः ॥

यः पुनरतिपरिणामकः स एवमभिदध्यात्-

[भा.८००] कालो सिं अइवत्तइ, अम्ह वि इच्छा न भाणिउं तरिमो ।
किं एच्चिरस्स वुत्तं, अन्नाणि वि किं व आणेमि ॥

वृ- क्षमाश्रमणाः ! यदि युष्माकमाम्रैः प्रयोजनं तत इदानीमप्यानयामि, यतः "सिं" इति एषामाम्राणां कालः 'अतिवर्त्तते' अतिक्रामति, अद्य तावत् तानि तरुणानि वर्त्तन्ते अत ऊर्द्ध्वं जरठभविष्यन्तीत्यर्थः । यद्वाऽस्माकमप्याम्राणां ग्रहणे महती इच्छा, परं किं कुर्म ? न वयं यौष्माकीणभयभीता भणितुं किमपि "तरामु" त्ति शक्नुमः । अथवा यद्याम्राण्यपि ग्रहीतुं कल्पन्ते ततः किमियतश्चिरात् कालादुक्तम् ?, वञ्चिताः स्मो वयमियन्तं कालमिति भावः । किं वा अन्यान्यपि मातुलिङ्गादीन्यानयामीति ॥ अनयोरपरिणामका-ऽतिपरणामकयोरेवंजल्पतोराचार्येणेदमुत्तरं दातव्यम्-

[भा.८०१] नाभिप्पायं गिण्हसि, असमत्ते चेव भाससी वयणे ।
सुत्तंबिल-लोणकए, भिन्ने अहवा वि दोच्चंगे ॥

वृ- भो मुग्ध ! त्वं मदीयमभिप्रायं न गृह्णासि, किन्तूत्सुकतया मदीये वचनेऽसमाप्त एवेदृशं समयविरुद्धं निष्ठुरं वचनं भाषसे; मया पुनरनेनाभिप्रायेणाभिहितम्-"सुत्तंबिल" इत्यादि, शुक्लं-काञ्जिकं तदेवात्यम्लं शुक्लाम्लं तेन लवणेन वा कृतानि-भावितानि शुक्लाम्ल-लवणकृतानि भिन्नानि च । किमुक्तं भवति ?-न मया भवतः पार्श्वादपरिणतान्याम्राण्यानायितानि, किन्तु चतुर्थरसिकभावितानि वा लवणभावितानि वा; यद्वा द्रव्यतो भावतश्च भिन्नानि, परिणतानीति भावः । अथवा "दोच्चंगे" त्ति सामयिकी संज्ञा, ओदनादिमूलाङ्गापेक्षया भोजनस्य द्वितीयाङ्गनिराद्धशाकरूपाणि तानि मया आनायितानीति प्रक्रमः ॥ "अंबाई" इत्यत्राऽऽदिशब्दसूचितौवृक्ष-बीजदृष्टान्ताविमौ-आचार्या भणन्ति-अज्जो ! रुक्खेहिं बीएहिं वा पओअणं ति । अत्रापि परिणामकादिजल्पस्तथैवावसातव्यः । नवरमपरिणामका-ऽतिपरिणामकौ प्रति सूरिणा प्रतिवक्तव्यम्-

Jain Education International For Private & Personal Use Only www.jainelibrary.org

[भा.८०२] निप्फाव-कोद्दवाईणि बेमि रुक्खाणि न हरिए रुक्खे ।
अंबिल विद्धत्थाणि अ, भणामि न विरोहणसमत्थे ॥

वृ- निष्पावाः-वल्लाः कोद्रवाः-प्रतीतास्तदादीनि यानि "रुक्खाणि"त्ति रूक्षाणि द्रव्याणि तान्येवाहं ब्रवीमि, न तु 'हरितान्ट सचित्तान् वृक्षान् । तथा बीजान्यपि यानि अम्लभावितानि 'विध्वस्तानि वा' व्यवच्छिन्नयोनिकानि तान्यह भणामि, 'न विरोहणसमर्थानि' न पुनरङ्कुरोद्भवनशक्तिकानीति । एष आम्रादिदृष्टान्तः । कथना चाऽऽचार्येणामीभि स्थानैः "सुत्तंबिल" इत्यादिभिः प्रकारैः कृता । एवं परीक्ष्य यः परिणामकस्तस्य दातव्यम् ॥

कथं पुनस्तेन श्रोतव्यम् ? इत्याह-

[भा.८०३] निद्दा-विगहापरिवज्जिएण, गुत्तिंदिएण पंजलिणा ।
भत्ती बहुमाणेण य, उवउत्तेणं सुणेयव्वं ॥

वृ-निद्रायमाणः सन् न किञ्चिदप्यवधारयति विकथायां क्रियमाणायां व्याघातो भवतीत्यतो निद्रा-विकथापरिवर्जितेन श्रोतव्यम् । गुप्तानि-स्वस्वविषयप्रवृत्तिनिरोधेन संवृतानीन्द्रियाणि येनासौ गुप्तेन्द्रियस्तेन । तथा 'प्राञ्जलिना' योजितकरयुगलेन । भक्त्या बहुमानेन च श्रोतव्यम्, भक्तिर्नाम गुरूणामितिकर्त्तव्यतायां निषद्यारचनादिका या बाह्या प्रवृत्ति, बहुमानस्तु गुरूणामुपरि आन्तरः प्रतिबन्धः । अत्र चतुर्भङ्गी-भक्तिर्नामैकस्य न बहुमानः, बहुमानो नामैकस्य न भक्ति, एकस्य भक्तिरपि बहुमानोऽपि, एकस्य न भक्तिर्न वा बहुमान इति । अत्र च भक्ति-बहुमानयोर्विशेषज्ञापकं शिवाख्यव्यमन्तरभक्तयोर्मरुक-पुलिन्दयोरुदाहरणम्, तच्च सुप्रसिद्धमिति कृत्वा न लिख्यते । यदि भक्तिं बहुमानं वा न करोति तदा चतुर्लघु तथा 'उपयुक्तेन' अनन्यमनसा श्रोतव्यम् ॥

[भा.८०४] अभिकंखंतेण सुभासियाइँ वयणाइँ अत्यमहुराइं ।
विम्हियमुहेण हरिसागएण हरिसं जणंतेण ॥

वृ- "अभिकंखंतेण" इत्यादि । 'वचनानि' श्रुतव्याख्यानरूपाणि 'सुभाषितानि' शोभनभणितिभिर्भणितानि 'अर्थमधुराणि' भावार्थसुखादूनि 'अभिकाङ्क्ता' आभिमुख्येन वाञ्छता । तथा 'विस्मितमुखेन' अपूर्वापूर्वार्थश्रवणसमुद्भूतविस्मयस्मेरवदनेन । 'हर्षागतेन' 'अहो ! अभीभगवन्तः स्वगल-तालुशोषमवगणय्यास्मन्निमित्तमेवंविधं सूत्रार्थव्याख्यानं कुर्वन्ति, नानृणीभवेयममीषां परमोपकारिणामहम्' इत्येवंविधं हर्षमागतः-प्राप्तो हर्षागतस्तेन । तथा गुरूणामपि स्ववदनप्रसन्नतया उत्फुल्ललोचनतया च 'हर्षम्' 'अहो ! कथमयं संवेगरङ्गतरङ्गितमानसः परमागमव्याख्यानं शृणोति ?' इति लक्षणं प्रमोदं जनयता श्रोतव्यमिति ॥

अथ परिणामकद्वारमुपसंहरन्नाह-

[भा.८०५] आधारिय सुत्तत्थो, सविसेसो दिज्जए परिनयस्स ।
सुपरिच्छित्ता य सुनिच्छियस्स इच्छागए पच्छा ॥

वृ- यः कल्प-व्यवहारादेः सूत्रार्थ 'सविशेषः' सापवादः स्वगुरुसकाशाद् 'आधारितः' आगृहीतः स सर्वोऽपि दीयते 'परिणतस्य' परिणामकस्य शिष्यस्य 'सुपरीक्ष्य' पूर्वोक्ताम्रादिदृष्टान्तैः सुष्ठु-अविसंवादेन परीक्षां कृत्वा 'सुनिश्चितस्य' प्रारब्धसूत्रार्थे ग्रहीतव्ये कृतनिश्चयस्य, यद्वा 'ज्ञान-दर्शन-चारित्राणां यावज्जीवं मया विराधना न कर्त्तव्या' इत्येवं सुष्ठु निश्चितः-निश्चयवान्

Jain Education International For Private & Personal Use Only www.jainelibrary.org

यः स सुनिश्चितस्तस्य दीयते। "इच्छागए पच्छि" त्ति अपरिणामका-ऽतिपरिणामकयोः पुनर्यदा सा आत्मीया यथाक्रमं केवलोत्सर्ग-केवलापवादरुचिलक्षणा इच्छा गता-नष्टा भवति तदा पश्चात् तयोः छेदश्रुतानि दातव्यानीति ॥

उक्तं परिणमकद्वारम्। तदुक्तौ च व्याख्यातं सप्रपञ्चं "बहुस्सुए चिरव्वइए" इत्यादिकं द्वारश्लोकयुगलम्। तद्याख्याने च समर्थितं "निक्खेवेगट्ठ निरुत्ति" इत्यादिमूलद्वारगाथा सूचितं पर्षदिति द्वारम्। अत्र च लक्षण-तदर्ह-पर्षद्वाराणि निक्षेपनामकस्यानुयोगद्वारद्वितीयभेदस्य प्रासङ्गिकतया तदन्तःपातीन्येवावसातव्यानीति। गतं निक्षेपद्वारमिति ॥

चारित्रभूपालनिवासहेतुप्रासादकल्पे किल कल्पशास्त्रे।
सुवर्णबद्धा सुरसावगाढा, समर्थिता सम्प्रति पीठिकेयम् ॥

बृहतकल्पे पीठिका समाप्ताः

मुनि दीपरत्नसागरेण संशोधिता सम्पादिता बृहत्कल्पसूत्रे पीठिकायाः संघदास गणि विरचितं भाष्यं एवं क्षेमकीर्तिआचार्येण विरचिता टीका परिसमाप्ता।

———×———×———

उद्देशकः-१

वृ-अथानुगमद्वारम्। स चानुगमो द्विधा-निर्युक्त्यनुगमः सूत्रानुगमश्च। निर्युक्त्यनुगमः। सूत्रानुगमश्च। निर्युक्त्यनुगमस्त्रिविधः-निक्षेपनिर्युक्त्यनुगम उपोद्घातनिर्युक्त्यनुगमः सूत्रस्पर्शिकनिर्युक्त्यनुगमश्च। तत्र निक्षेपनिर्युक्त्यनुगमोभिहितः, ओघनिष्पन्ने निक्षेपेऽध्ययनपदस्य नामनिष्पन्ने च कल्पपदस्य निक्षिप्तत्वाद् वक्ष्यते च सूत्रालापकनिष्पन्ने सूत्रपदानां निक्षेप्स्यमानत्वात् १। उपोद्घातनिर्युक्त्यनुगमः पुनराभ्यां द्वारगाथाभ्यामनुगन्तव्यः। तद्यथा-

उद्देसे निद्देसे, य निग्गमे खेत्त काल पुरिसे य।
कारण पच्चय लक्खण, नए समोयारणाऽनुमए ॥
किं कइविहं कस्स कहिं, केसुकहं केच्चिरं हवइ कालं।
कइ संतरमविरहियं, भवाऽऽगरिस फासणनिरुत्ती ॥

अनयोरर्थो मूलावश्यकादिटीकातोऽवसातव्यः २। सूत्रस्पर्शिकनिर्युक्त्यनुगमः सूत्रपदव्याख्यानरूपः, स चावसरप्राप्तोऽपि नाभिधीयते; कुतः? इति चेत्, उच्यते-सूत्रमेव तावदद्यापि न प्राप्यते, अतः सूत्राभावात् कस्य स्पर्शनं करोत्वसौ? इति, अतः क्रमप्राप्ते सूत्रानुगमे यदा सूत्रं वक्ष्यते ततः कस्मादत्रावसरे पठ्यते? उच्यते- निर्युक्तिमात्रसाम्यादसावत्राभिधीयत इत्यदोषः ३। अथ सूत्रानुगमः, स चेदानीमवसरप्राप्त एवेत्यत्र सूत्रानुगमे सूत्रमुच्चारणीयम्, ततः सूत्रालापकनिक्षेपेण निक्षेपणीयम्, ततोऽपि सूत्रस्पर्शिकनिर्युक्त्या तदेव विस्तारणीयम्। अत्र च सूत्रानुगमादीनामित्थं विषयविभागव्यवस्था द्रष्टव्या-पदच्छेदसहितया संहितया सूत्रमुच्चार्य सूत्रानुगमः कृतार्थो भवति, नामादनिक्षेपविनियोगं विधाय सूत्रालापकनिष्पन्ननिक्षेपः, पदार्थ-पदविग्रह-चालना-प्रत्वस्थानलक्षणव्याख्याचतुष्टये कृते सूत्रस्पर्शिकनिर्युक्ति। नैगमादयो नया

Jain Education International For Private & Personal Use Only www.jainelibrary.org

अपप्रायः सूत्रगतपदार्थादिगोचरा इति तत्त्वतो नयलक्षणं चतुर्थमनुयोगद्वारमपि सूत्रस्पर्शिकनिर्युक्त्यन्तः पाति प्रतिपत्तव्यम् । तथा चाह श्रीजिनभद्रगणिक्षमाश्रमणपूज्यः-

होइ कयत्थो वोत्तुं, सपयच्छेयं सुयं सुयानुगमो ।
सुत्तालावगनासो, नामाइन्नासविनिओगं ॥
सुत्तप्फासियनिज्जुत्तिनिओगो सेसओ पयत्थाई ।
पायं सो च्चिय नेगमनयादिमयगोअरो होइ ॥

एते च सूत्रानुगमादयः सूत्रेण समकमेव व्रजन्ति । यत उक्तम्-

सुत्तं सुत्तानुगम, सुत्तालावगगओ य निक्खेवो ।
सुत्तप्फासियनिज्जुत्ती, नया य वच्चंति समगं तु ॥

तत्र प्रथमं सूत्रानुगमे सूत्रामुच्चारणीयम्, तच्चाहीनाक्षरादि गुणोपेतम् । तद्यथा-अहीनाक्षरम् अनत्यक्षरम् अव्याविद्धाक्षरं अस्खलितम् अमिलितम् अव्यत्याम्रेडितं प्रतिपूर्णं प्रतिपूर्णघोषं कण्ठोष्ठविप्रमुक्तं गुरुवाचनोपगतम् । एवं च सूत्रे समुच्चारिते सति केषाञ्चिद् भगवतामुद्धटितज्ञानां केचिदर्थाधिकारा अधिगता भवन्ति, केचित् पुनरनधिगताः, ततोऽनधिगतार्थाधिगमनाय व्याख्या प्रवर्त्तते । अत्रान्तरे "निक्खेवे" इत्यादि मूलगाथासूचितं सूत्रार्थद्वारं समापतितम् । तच्चेदं सूत्रम्-

मू. (१) *नो कप्पइ निग्गंथाण वा निग्गंथीण वा आमे तालपलंबे अभिन्ने पडिगाहित्तए ॥*

वृ- अस्य च व्याख्या षोढा । तद्यथा-

संहिता च पदं चैव, पदार्थः पदविग्रहः ।
चालना प्रत्यवस्थानं, व्याख्या तन्त्रस्य षड्विधा ॥

तत्र संहिता-नो कल्पते निर्ग्रन्थानां वा निर्ग्रन्थीनां वा आमं तालप्रलम्बमभिन्नं प्रतिग्रहीतुम् १ । अथ पदमिति पदविच्छेदः कर्त्तव्यः । स चायम्-नो इति पदं कल्पते इति पदं निर्ग्रन्थानामिति पदं वा इति पदं निर्ग्रन्थीनामिति पदं वा इदि पदम् आममिति पदं ताल इति पदं प्रलम्बमिति पदं अभिन्नमिति पदं प्रतिग्रहीतुमिति पदमिति गतः पदविच्छेदः २ ।

अथ पदार्थ उच्यते-स च चतुर्द्धा, तद्यथा-कारकविषयः समासविषयः तद्धितविषयो निरुक्तविषयश्च । तत्र कारकविषयः पचतीति पाचकः, पठतीति पाठकः, भुज्यत इति भोजनम्, स्नाति जनोऽनेनेति स्नानीयं चूर्णम्, दीयतेऽस्मै इति दानीयोऽतिथि, बिभेति जनोऽस्मादिति भीमः, शेरतेऽस्यामिति शय्या इत्यादि । समासविषयो यथा-आरूढो वानरो यं वृक्षं स आरूढवानरो वृक्ष इति बहुव्रीहिः १, गङ्गायाः समीपमुपगङ्गमित्यव्ययीभावः २, राज्ञः पुरुषो राजपुरष इति ततुपुरुषः ३, नीलं च तदुत्पलं च नीलोत्पलमिति कर्मधारयः ४, चतुर्णां मासानां समाहारश्चतुर्मासी इति द्विगुः ५, धवश्च खदिरश्च पलाशश्च धव-खदिर-पलाशा इति द्वन्द्वः ६ इत्यादि । तद्धितविषयः-नाभेरपत्यं नाभेयः, जिनो देवताऽस्येति जैनः, भद्रबाहुणा प्रोक्तं शास्त्रं भाद्रबाहवमित्यादि । निरुक्तविषयः-भ्रमति च रौति चेति भ्रमरः, मह्यां शेते महिषः, जीवनस्य-जलस्य मूतः-पुटबन्धो जीमूत इत्यादि, कृतं विस्तरेण । एष चतुर्विधोऽपि पदार्थ समस्तो व्यस्तो वा यो यत्र सूत्रे सम्भवति स तत्र योजनीय इति । सम्प्रति प्रकृतसूत्रस्य पदार्थ उच्यते-नोशब्दः प्रतिषेधे, "कृपौङ् सामर्थे" इत्यस्य धातोर्वर्त्तमानविभक्तेरात्मनेपदीयान्यदर्थैकवचनान्तस्य कल्पते इति रूपम्, ततश्च 'नो

Jain Education International For Private & Personal Use Only www.jainelibrary.org

कल्पते'नो समर्थीभवति, न युज्यते इत्यर्थः। एवं सर्वत्र प्रकृति-प्रत्ययविभागः शब्दशास्त्रानुसारेण स्वधिया योजनीयः । तथा ग्रन्थः-परिग्रहः, स च बाह्याऽऽभ्यन्तरभेदाद् द्विधा, बाह्यः क्षेत्र-वास्त्वादि, आभ्यन्तरः क्रोधादि, ततो निर्गता ग्रन्थादिति निर्ग्रन्थाः-साधवस्तेषाम्। एवं 'निर्ग्रन्थीनां' साध्वीनाम्। वाशब्दावुभयस्यापि वर्गस्य प्रलम्बकल्प्यताप्रतिषेधमधिकृत्य तुल्यकक्षतासूचकौ। 'आमम्' अपक्वम्। तलः-वृक्षविशेषस्तत्र भवं तालं-तालफलम्, प्रकर्षेण लम्बते इति प्रलम्बं-मूलम्, तालं च प्रलम्बं च तालप्रलम्बं समाहारद्वन्द्वः । 'अभिन्नं' द्रव्यतो अविदारितं भावतोऽव्यपगतजीवम्। किम् ? इत्याह-'प्रतिग्रहीतुम्' आदातुमिति पदार्थ ३।

पदविग्रहस्तु यानि समासभाञ्जि पदानि तेषु पदार्थमध्य एव वर्णित इति ४। चालना-प्रत्यवस्थाने तु भाष्यगाथाभिरेव सविस्तरं भावयिष्येते इति सूत्रसमासार्थ।। भाष्यकारः प्रतिपदमेव सूत्रं व्याचिख्यासुः प्रथमतो नोकारपदं निर्ग्रन्थपदं च व्याख्यानयति-

[भा.८०६] अकार-नकार-मकारा, पडिसेहा होंति एवमाईया।
सहिरन्नगो सगंथो, अहिरन्न-सुवन्नगा समणा ।।

वृ- अकार-नकार-मकारा एवमादयः शब्दाः, अत्राऽऽदिग्रहणाद् नोकारो गृह्यते, एते प्रतिषेधवाचकाद्रष्टव्याः, 'अकरणीयं न करोषि, मा कार्षी, नो कुरुषे' इत्यादिष्वमीषां प्रतिषेधवाचिनां प्रयोगदर्शनात् । तथा सहिरण्यकः सग्रन्थ उच्यते, अत्र हिरण्यग्रहणं बाह्या-ऽऽभ्यन्तरपरिग्र-होपलक्षणम्, ततो यः सपरिग्रहः स सग्रन्थः। श्रमणाः पुनरहिरण्य-सुवर्णका अतो निर्ग्रन्थाः। हिरण्यं-रूप्यं सुवर्णं-कनकम्। अत्र च "कल्पते" इति पदं सुगमत्वाद् भाष्यकृता न व्याख्यातम्, निर्ग्रन्थीशब्दव्युत्पत्तिरपि निर्ग्रन्थशब्दवद् द्रष्टव्या, लिङ्गमात्रकृतभेदत्वादनयोरिति ।। अथ नोकारशब्दस्यैव भावनां करोति-

[भा.८०७] नोकारो खलु देसं, पडिसेहयई कयाइ कप्पिज्जा।
आमं च अणन्नत्ते, तलो य खलु उस्सए होइ ।।

वृ- नोशब्दः प्रायो देशप्रतिषेधे वर्त्तते, यथा "नोघटः" इत्युक्ते घटैकदेशः कपालादिकः प्रतीयते, एवमत्रापि नोकारो देशं प्रतिषेधयति। ततश्चेदमुक्तं भवति-कदाचित् कल्पेत तालप्रलम्बम्, उत्सर्गपदरूपे देशे तावन्न कल्पते आत्यन्तिके पुनरपवादपदे कल्पतेऽपीति भावः। 'आमं च' आमशब्दश्च 'अनन्यत्वे' अनन्यभावे वर्त्तते। किमुक्तं भवति ? -पूर्वकालभाविनीमपक्वावस्थामपेक्ष्य तदुत्तरकालभाविनी पक्वावस्था अन्या-अपराऽभिधीयते, तदभावरूपेऽनन्यत्वे अपक्वावस्थाया-मामशब्दो वर्त्तते। तलशब्दश्चोच्छ्रये भवति, द्राधीयःस्कन्धरूपेणोच्छ्रयेणोच्छ्रितो यो वृक्षविशेषः स तलः-तालवृक्ष इति भावः; तत्र भवं तालं-तालवृक्षफलम् ।। अथ प्रलम्बादिपदानि व्याचष्टे-

[भा.८०८] पडिलंबना पलंबं, अविदारिय मो वयंति उ अभिन्नं।
अहवा वि दव्व भावे, तंपइगहणं निवारेइ ।।

वृ- 'प्रतिलम्बनात्' प्रति-प्रकर्षेण लम्बत इति 'प्रलम्बम्' तस्यैव तलवृक्षस्य मूलम्। तथा यद् अविदारितं 'मो' इति पादपूरणे तद् वदन्ति श्रुतवेदिनो अभिन्नम्। अथवा अभिन्नं द्विधा-द्रव्यतो भावतश्च। तत्र द्रव्यतो यद् अविदारितम्, भावतः पुनरव्यपगतजीवम्। 'तत्प्रतिग्रहणं' तस्य-आमतालप्रलम्बस्याभिन्नस्यादानं निवारयति नोकार इति एष सूत्रपदार्थः ।। अथ चालना-

Jain Education International For Private & Personal Use Only www.jainelibrary.org

प्रत्यवस्थाने अभिधीयेते। तत्र सूत्रगोचरमर्थगोचरं वा दूषणं चाल्यते-आक्षिप्यते यया वचनपद्धत्या सा चालना। तथा प्रति इति-परोक्तदूषणप्रातिकूल्येनावस्थीयते अन्तर्भूतण्यर्थत्वादवस्थाप्यते-युक्तिपुरस्सरं निर्दोषमेतदिति शिष्यबुद्धावारोप्यते येन तत् प्रत्यवस्थानं-प्रतिवचनम्। अत्र तावदियं चालना-ननु च सर्वाण्यपि शास्त्राणि माङ्गलिकाभिधानपुरस्सराणि प्रवर्त्तन्ते, इदं तु सूत्रं भवद्भिः प्रतिषेधकत्वात् प्रथमत एवामाङ्गलिकमारब्धम्। तथा चात्र प्रयोगः- अमाङ्गलिकमेतत् सूत्रम्, प्रतिषेधरूपत्वात्, इह यद् यत् प्रतिषेधरूपं तत् तद् अमाङ्गलिकम्, यथा गन्तुं प्रस्थितस्य कस्यापि पुरुषस्य 'मा यासीः' इत्यादि वचनम्, प्रतिषेधरूपं चेदं सूत्रम्, तस्मादमाङ्गलिकम्; एवं परेणोक्ते सति सूरि प्रत्यवस्थानमाह-

[भा.८०९] जं गालयते पावं, मं लाइ व कहममंगलं तं ते।
जा य अणुन्ना सव्वा, कहमिच्छसि मंगलं तं तु ॥

वृ-इह मङ्गलशब्दस्य निरुक्तं पूर्वसूरिभिरित्थमभिधीयते-मां 'लाति' दुर्गतौ पतन्तं गृह्णाति पापं च गालयतीति मङ्गलम्। एतच्च निरुक्तमत्रापि घटते, यत आह-यदिदं "नो कप्पइ" इत्यादि सूत्रं तत् पापं सचित्तवनस्पतिग्रहणरूपं गालयति, तथा मामिति-आत्मद्रव्यं नरकादौ पतन्तं लाति-धारयति तद् एवंविधमपि कथं नाम 'ते' तवामङ्गलं भणितुमुचितम्? न कथञ्चिदित्यर्थः। किञ्च-यदि प्रतिषेधमात्रमेवामङ्गलं भवत इष्टम् ततो या काचिदनुज्ञा पापस्य धर्मस्य वा सा सर्वाऽपि भवतो मङ्गलं प्राप्नोति। यदि नामैवं ततः किम्? इत्याह-'कथं' केन प्रकारेण 'तां' सर्वमप्यनुज्ञां मङ्गलमिच्छसि? । किमुक्तं भवति-यदि पापानुज्ञाऽपि प्रतिषेधविषयविद्वेषमात्रादेव भवता मङ्गलमभ्युपगम्यते तर्हि धर्म-पापानुज्ञयोः सङ्करदोषः प्रसज्येत, उभयोरपि मङ्गलरूपत्वात्; ततश्चाधर्मस्यापि मङ्गलरूपतया करणीयतापत्ति स्यात्; न चैतद् दृष्टमिष्टं वा, ततो न सर्वाऽप्यनुज्ञा मङ्गलम् न वा प्रतिषेधः सर्वोऽप्यमङ्गलम्, किन्तु या धर्मस्यानुज्ञा यश्च पापस्य प्रतिषेध एतौ द्वावपि मङ्गलम्, तदितरावनुज्ञा-प्रतिषेधावमङ्गलमिति ॥ अमुमेवार्थं द्रढयन्नाह-

[भा.८१०] पावाणं समणुन्ना, न चेव सव्वम्मि अत्थि समयम्मि।
तं जइ अमंगलं ते, कयरं नु हु मंगलं तुज्झं ॥

वृ-'पापानां' प्राणिवधादीनां समनुज्ञा नैवास्ति सर्वस्मिन्नपि 'समये' सिद्धान्ते, न केवलमत्रैव सूत्रे इत्यपिशब्दार्थ, किन्तु सर्वत्रापि प्रतिषेध एव; ततो यदि ते 'तत्' तथाविधमपि पापप्रतिषेधकं सूत्रममङ्गलम् ततः कतरद् 'नुः' इति वितर्के 'हुः' निश्चये तव मङ्गलं भविष्यति?, न किमपीत्यर्थः ॥ किञ्च-

[भा.८११] पावं अमंगलं ति य, तप्पडिसेहो हु मंगलं नियमा।
निक्खेवे वा वुत्तं, जं वा नवमम्मि पुव्वम्मि ॥

वृ-पापं नियमादमङ्गलम्, तत्प्रतिषेधः पुनर्नियमाद् मङ्गलम्, यत एवं ततो माङ्गलिकमेतत् सूत्रमिति। तथा चात्र प्रयोगः-माङ्गलिकं "नो कप्पइ निग्गंथाण वा निग्गंथीण वा" इत्यादि सूत्रम्, पापप्रतिषेधकत्वात्, इह यद् यत् पापप्रतिषेधकं तत् तद् माङ्गलिकम्, यथा "सव्वे जीवा न हंतव्वा" इत्यादि वचनम्, पापप्रतिषेधकं चेदं सूत्रम्, तस्माद् माङ्गलिकम्। अथवा 'निक्षेपे' नामनिष्पन्नलक्षणे "छव्विह १ सत्तविहे या २, दसविह ३ वीसइविहे य ४ बायाला ५।" इति

Jain Education International For Private & Personal Use Only www.jainelibrary.org

पञ्चविधभावकल्पसम्बन्धायातस्य पञ्चकल्पस्यादौ ।

वंदामि भद्दबाहुं, पाईणं चरिमसयलसुयनाणिं ।
सुत्तस्स कारगमिसिं, दसाण कप्पे य ववहारे ।।

इत्यधिकृतसूत्रकारनमस्काररूपं यद् मङ्गलमुक्तम्, यद्वा 'नवमे पूर्वे' प्रत्याख्याननामके प्रथमप्रारम्भे यद् मङ्गलाभिधानं कृतं तेनैवास्य सूत्रस्य माङ्गलिकत्वं मन्तव्यमिति ।। अथेत्थमपि स्थापितं सूत्रस्य माङ्गलिकत्वं स्वाग्रहाभिनिवेशादप्रतिपद्यमानं परमुपलभ्य सूरिरिदमाह-

[भा.८१२]　अद्दागसमो साहू, एवं सुत्तं पि जो जहा वयइ ।
तह होइ मंगलममंगलं व कल्लाणदेसिस्स ।।

वृ- "अद्दाग" त्ति आदर्श-दर्पणस्तत्समः-तत्सदृशः साधुः । किमुक्तं भवति ? -यथा दर्पणे स्वरूपतो निर्मलेऽपि तत्तदुपाधिवशतः सुन्दरा-ऽसुन्दररूपाणि प्रतिरूपाणि विलोक्यन्ते तथा साधुमपि परममङ्गलभूतं दृष्ट्वा मङ्गलबुद्धिं कुर्वतः प्रशस्तचेतोवृत्तेर्भव्यस्य मङ्गलं भवति, तदितरस्य संक्लिष्टकर्मणो दूरभव्यादेरमङ्गलबुद्धिं कुर्वाणस्यामङ्गलं भवति । 'एवम्' आदर्श-साधुदृष्टान्तेन सूत्रमपि स्वरूपतः परममङ्गलभूतं यो यथा वदति तस्य तथैव 'मङ्गलममङ्गलं वा भवति' मङ्गलबुध्या परिगृह्यमाणं मङ्गलम् अमङ्गलबुध्या तु परिगृह्यमाणममङ्गलं भवतीत्यर्थः । एवं च माङ्गलिकेऽपि सूत्रे यदि त्वममङ्गलुद्धिं करोषि भवतु तर्हि कल्याणद्वेषिणो भवतोऽमङ्गलम् ।। किञ्चान्यत्-

[भा.८१३]　जइ वा सव्वनिसेहो, हवेज्ज तो कप्पणा भवे एसा ।
नंदी य भावमंगल, वुत्तं तत्तो अणन्नमिदं ।।

वृ- वाशब्दः प्रत्यवस्थानस्य प्रकारान्तरोपदर्शनार्थ । यद्यत्र सूत्रे 'सर्वनिषेधः' सर्वथैव प्रतिषेधः स्यात् ततो भवेत् तावकीना प्रतिषेधकत्वादमङ्गलमित्येषा कल्पना । यस्मात् पुनरत्र नोशब्दो देशप्रतिषेध एव वर्त्तते अतः परिफल्गुरियं भवदीया कल्पनेति । यद्वा 'नन्दी च' पञ्चप्रकारज्ञानरूपा भावमङ्गलमुच्यते, तच्च "नंदी य मंगलट्ठा" इत्यादिना ग्रन्थेन पीठिकायां प्रोक्तमेव । यदि नाम प्रोक्तं ततः किमायातम् ? इत्याह-'तस्माच्च'नन्दीरूपाद् भावमङ्गलात् 'अनन्यत्' अपृथग्भूतमिदं सूत्रम्, अस्यापि श्रुतत्वात् श्रुतस्य च ज्ञानपञ्चकान्तर्गतत्वादिति भाव इतिः अतोऽपि माङ्गलिकमिदम् ।। तदेवं स्थापितमनेकधा भाष्यकृता सूत्रस्य माङ्गलिकत्वम् । सम्प्रति निर्युक्तिकृद् नोशब्दाभिधेयस्य प्रतिषेधस्य निक्षेपमनन्तरोक्तमर्थं च सूचयन्नाह-

[भा.८१४]　पडिसेहम्मि उ छक्कं, अमंगलं सो त्ति ते भवे बुद्धी ।
पावाणं जदकरणं, तदेव खलु मंगलं परमं ।।

वृ- 'प्रतिषेधे' प्रतिषेधविषयं 'षट्कं' नाम-स्थापना-द्रव्य-क्षेत्र-काल-भावलक्षणं निक्षेपणीयम् । तत्र नाम्नः प्रतिषेधः 'न वक्तव्मुकं नाम' इतिलक्षणः, यथा-

अज्जए पज्जए वा वि, वप्पो चुल्लपिउ त्ति य ।
माउलो भायणिज्ज त्ति, पुत्ता नत्तुणिय त्ति य ।।
हे हो हले त्ति अन्ने त्ति, भट्टा सामिय गोमिय ।
होल गोल वसुल त्ति, पुरिसं नेवमालवे ।। इत्यादि ।

स्थापना आकारो मूर्त्तिरिति पर्यायाः, तस्याः प्रतिषेधो यथा-

Jain Education International　For Private & Personal Use Only　www.jainelibrary.org

वितहं पि तहामुत्तिं, जो तहा भासए नरो।
सो वि ता पुट्ठो पावेमं, किं पुणं जो मुसं वए ॥

द्रव्यप्रतिषेधो ज्ञशरीरे-भव्यशरीरव्यतिरिक्तः पुनरयम्- नो कप्पइ निग्गंथाण वा निग्गंथीणवा आमे तालपलंबे अभिन्ने पडिगाहित्तए त्ति। क्षेत्रप्रतिषेधो यथा-नो कप्पइ निग्गंथाण वा निग्गंथीण वा रातो वा वियाले वा अद्धाणगमणं एत्तए कालप्रतिषेधो यथा-

अत्थंगयम्मि आइच्चे, पुरत्था य अनुग्गए।
आहारइयं सव्वं, मणसा वि न पत्थए ॥

-- भावप्रतिषेध औदयिकभावनिवारणरूपो यथा --

कोहं मानं च मायं च, लोभं च पाववड्ढणं।
वमे चत्तारि दोसे उ, इच्छंतो हियमप्पणो ॥ इत्यादि।

अत्र च सूत्रे द्रव्यप्रतिषेधेनाधिकारः। तथा 'स इति' प्रतिषेधोऽमङ्गलमिति 'ते' तव बुद्धिर्भवेत् सा चायुक्ता, यतः पापानां यदकरणं तदेव खलु परमं मङ्गलं ज्ञातव्यमिति पूर्वमेव भावितम्॥ तदेवमुक्तः सङ्क्षेपतः सूत्रार्थः। सम्प्रति विस्तरार्थं सूत्रस्पर्शिकनिर्युक्त्या प्रतिपादयितुमाह-

[भा.८१५] आइनकारे गंथे, आमे ताले तहा पलंबे य।
भिन्नस्स वि निक्खेवो, चउक्कओ होइ एक्केक्के ॥

वृ-आदौ नकार आदिनकारः स विचारणीयः। तथा ग्रन्थपदस्य आमपदस्य तालपदस्य प्रलम्बपदस्य भिन्नपदस्यापि च निक्षेपः 'चतुष्कः' नाम-स्थापना-द्रव्य-भावरूपः कर्त्तव्यो भवति 'एकैकस्मिन् एकैकपदविषयः॥ तत्राऽऽदिनकारपदं विव्रियते। शिष्यः प्रश्नयति-योऽयमादौ प्रतिषेधः स नकारेण भवत मा नोकारेण, तद्यथा- "न कप्पइ निग्गंथाण वा आमे तालपलंबे अभिन्ने पडिगाहित्तए"। एवं च क्रियमाणे सूत्रं लघु भवति, "मात्रयाऽपि च सूत्रस्य लाघवं महानुत्सवः" इति विद्वत्प्रवादः, नोशब्देन पुनः प्रतिषेधे विधीयमाने सूत्रगौरवं भवति। अत्राचार्य प्रतिवक्ति-भद्र! कारणमत्रास्ति यतो नोकारेण प्रतिषेधः क्रियते। आह-किं पुनस्तत् कारणम्? उच्यते-

[भा.८१६] पडिसेहो उ अकारो, माकारो नो अ तह नकारो अ।
तब्भाव दुविहकाले, देसे संजोगमाईसु ॥

वृ-प्रतिषिध्यतेऽनेनेति 'प्रतिषेधः' प्रतिषेधको वर्ण, स चतुर्धा-अकारो माकारो नोकारस्तथा नकारश्च। तत्राऽकारस्तद्भावप्रतिषेधं करोति। माकारः पुनर्द्विविधकालविषयं प्रतिषेधम्, तद्यथा-प्रत्युत्पन्नविषयम् अनागतविषयं च। नोकारो देशप्रतिषेधम्। नकारःपुनः 'संयोगादिषु' संयोग-समवाय-सामान्य-विशेषचतुष्टयप्रतिषेधं करोति॥ तत्राकार-माकार-नोकाराणामुदाहरणान्याह-

[भा.८१७] निदरिसणं अघडोऽयं, मा य घडं भिंद मा य भिंदिहिसि।
नो उ घडोघडदेसो, तव्विवरीयं च जं दव्वं ॥

वृ-निर्दर्शनमिति जातावेकवचनम्, ततोऽमीषां प्रतिषेधकवर्णानां यथाक्रमं निदर्शनानि। अकारस्य तद्भावप्रतिषेधे निदर्शनं यथा-अघटोऽयमिति, न घटो अघटः, घटव्यतिरिक्तः पटादिकः

Jain Education International For Private & Personal Use Only www.jainelibrary.org

पदार्थः इत्यर्थः। माकारो वर्त्तमाना-ऽनागतकालप्रतिषेधको यथा-मा घटं भिन्द्धि, मा घटं भेत्स्यसि, चकारौ समुच्चयार्थौ। नोकारो देशप्रतिषेधकस्तदन्यभावसूचको वा यथा-नोघट इत्युक्ते घटैकदेशः कपालदिकोऽवयवः, तद्विपरीतं वा अन्यद् द्रव्यं पटादिकम् ॥

अथ संयोगादिविषयं नकारप्रतिषेधं भावयति-

[भा.८१८] संजोगे समवाए, सामन्ने खलु तहा विसेसे अ।
कालतिए पडिसेहो, जत्थुवओगो नकारस्स ॥

वृ- संयोगे मवाये सामान्ये विशेषे चेति चतुर्धा प्रतिषेधो नकारस्य भवति। स च प्रत्येकमतीता-ऽनागत-वर्त्तमानलक्षणकालत्रिकविषयत्वादेकैकस्त्रिविध इति सर्वसङ्ख्यया द्वादशविधो नकारप्रतिषेधः। यत्रच क्वापि नकारस्योपयोगो भवति तत्रामीषां द्वादशानां भेदानामन्यतमः प्रतिषेधः प्रतिपत्तव्य इति ॥ अथ संयोगादिषु यथाक्रमं प्रतिषेधमुदाहरति-

[भा.८१९] नत्थि घरे जिनदत्तो, पुव्वपसिद्धाण तेसि दोण्हं पि।
संजोगो पडिसिज्झइ, न सव्वसो तेसि अत्थित्तं ॥

वृ- 'नास्ति गृहे जिनदत्तः' इत्यत्र प्रयोगे पूर्वप्रसिद्धयोस्तयोर्गृह-जिनदत्तयोर्द्वयोरपि 'संयोगः' सम्बन्धमात्रं प्रतिषिध्यते न पुनः सर्वथैव तयोरस्तित्वमिति संयोगप्रतिषेधः ॥

[भा.८२०] समवाए खरसिंगं, सामन्ने नत्थि चंदिमा अन्नो।
नत्थि य घडप्पमाणा, विसेसओ होंति मुत्ताओ ॥

वृ- समवायप्रतिषेधे तु खरश्रृङ्गमुदाहरणम्-खरोऽप्यस्ति श्रृङ्गमप्यस्ति परं खरशिरसि श्रृङ्गं नास्तीति 'समवायः' एकत्र संश्लेष उभयोरपि प्रतिषिध्यते इति समवायप्रतिषेधः। सामान्यप्रतिषेधो यथा-नास्त्यस्मिन् स्थानेऽन्य ईद्दशश्चन्द्रमा इति। विशेषमाश्रित्य पुनरयं प्रतिषेधः-न सन्ति घटप्रमाणाः 'मुक्ताः' मुक्ताफलानीत्यर्थः, सन्ति मुक्ताफलानि परं न घटप्रमाणानीति घटप्रमाणत्वलक्षणस्य विशेषस्य प्रतिषिध्यमानत्वाद् विशेषप्रतिषेधः ॥ भावितः संयोगादिचतुष्टय-विषयः प्रतिषेधः। सम्प्रति कालत्रयविषयं तमेव भावयति-

[भा.८२१] नेवाऽऽसी न भविस्सइ, नेव घडो अत्थि इति तिहा काले।
पडिसेहेइ नकारो, सज्जं तु अकार-नोकारा ॥

वृ- नैवासीत् न भविष्यति नैवास्ति घट इति यथाक्रममतीता-ऽनागत-वर्त्तमानभेदात् त्रिधा कालविषयं वस्तु नकारः प्रतिषेधयति। अकार-नोकारौ तु 'सद्यः' वर्त्तमानकालमेव प्रायः प्रतिषेधयतः, यथा-अकरोषि त्वम्, नो कल्पते तालप्रलम्बं प्रतिग्रहीतुमित्यादि। माकारस्य तु द्विविधकालप्रतिषेधकत्वं पूर्वमुक्तमेवेति न पुनरुच्यते ॥

इत्थं सप्रपञ्चं प्रतिषेधमुपवर्ण्य प्रस्तुतार्थयोजनामाह-

[भा.८२२] जम्हा खलु पडिसेहं, नोकारेणं करेंति णऽन्नेणं।
तम्हा उ होज्ज गहणं, कयाइ अववायमासज्ज ॥

वृ- यस्मात् खलु प्रतिषेधं नोकारेणैव कुर्वन्ति भगवन्तः सूत्रकृतो नान्येन नकारादिना तत एव ज्ञायते-भवेद् ग्रहणं कदाचित् तलप्रलम्बस्यापवादपदमासाद्येति ॥ व्याख्यातमादिनकारपदम्। अथ ग्रन्थपदम्-तस्य च नामादिभेदाच्चतुर्धा नक्षेपः। तत्र नाम-स्थापने गतार्थे द्रव्यग्रन्थस्त्रिधा-

Jain Education International For Private & Personal Use Only www.jainelibrary.org

सचित्ता-ऽचित्त-मिश्रभेदात्। तत्र सचित्तश्चम्पकमालेत्यादि, अचित्त एकावलिहारादिकः, मिश्रः शुष्कपत्रमिश्रिता प्रसूनमाला। भावग्रन्थस्तु स उच्यते येन क्षेत्र-वास्त्वादिना क्रोधादिना वा अमी जन्तवः कर्मणा सहाऽऽत्मानं ग्रन्थयन्ति। तं च भाष्यकार एव सविस्तरं व्याख्यानयति-

[भा.८२३] सो वि य गंथो दुविहो, बज्झो अब्भिंतरो अ बोधव्वो।
अंतो अ चोद्दसविहो, दसहा पुन बाहिरो गंथो ॥

वृ- सोऽपि च भावग्रन्थो द्विविधः, तद्यथा-बाह्योऽभ्यन्तरश्च बोद्धव्यः। तत्राभ्यन्तरो ग्रन्थश्चतुर्दशविधो वक्ष्यमाणः। बाह्यः पुनर्ग्रन्थो 'दशधा' दशप्रकारो वक्ष्यमाण एव ॥

यदि नामैवं द्विविधो ग्रन्थस्ततो निर्ग्रन्थ इति किमुक्तं भवति? इत्याह-

[भा.८२४] सहिरन्नगो सगंथो, नत्थि से गंथो त्ति तेण निग्गंथो।
अहवा निराऽवकरिसे, अवचियगंथो व निग्गंथो ॥

वृ- सहिरण्यक इति "एकग्रहणे तज्जातीयग्रहणम्" इति न्यायाद् हिरण्य-सुवर्णादिबाह्य-ग्रन्थसहित उपलक्षणत्वाद् आन्तरग्रन्थयुक्तश्च सग्रन्थ उच्यते। 'नास्ति' न विद्यते "से" तस्य तथाविधो द्विविधोऽपि ग्रन्थः स निर्ग्रन्थः। अथवा निर्ग्रन्थ इत्यत्र यो निरशब्दः सः 'अपकर्षे' अपचये वर्त्तते, ततश्चापचितः-प्रतनूकृतो ग्रन्थो बाह्य आभ्यन्तरश्च येन स निर्ग्रन्थ उच्यते ॥

अथ यदुक्तं "बाह्यो ग्रन्थो दशधा" इति वद् विवरीषुराह-

[भा.८२५] खेत्तं १ वत्थुं २ धण ३ धन्न ४ संचओ ५ मित्त-नाइ-संजोगो ६।
जाण ७ सयणा-ऽऽसणाणि य ८, दासी-दासं च ९ कुवियं च १० ॥

वृ- 'क्षेत्रं' धान्यनिष्पत्तिस्थानम् १, 'वास्तु' भूमिगृहादि २, 'धनं' सुवर्णादि ३, 'धान्यं' बीजजाति ४, 'सञ्चयः' तृण-काष्ठादिसङ्ग्रहः ५, मित्राणि-सुहृदो ज्ञातयः-स्वजनाः संयोगः-श्वसुरकुलसम्बन्ध इति त्रिभिरप्येक एव ग्रन्थः ६, 'योनानि' वाहनानि ७, 'शयना-ऽऽसनानि च' पलयङ्क-पीठकादीनि ८, दास्यश्च दासाश्च दासी-दासम् ९, 'कुप्यं च' उपस्कररूपम् १० इति। एष दशविधो ग्रन्थः ॥ अथैनमेव प्रतिभेदं यथाक्रमं व्याचष्टे-

[भा.८२६] खेत्तं सेउं केउं, सेयऽरहट्टाइ केउ वरिसेणं।
भूमिघर वत्थु सेउं, केउं पासाय-गिहमाई ॥

वृ- क्षेत्रं द्विधा-सेतु केतु च। तत्र "सेयऽरहट्टाइ" त्ति अरहट्टादिना सिच्यमानं यद् निष्पद्यते तत् सेतु, अत्राऽऽदिशब्दात् तडागादिपरिग्रहः। यत् पुनः 'वर्षेण' मेघवृष्ट्या निष्पद्यते तत् केतु। वास्त्विपि सेतु-केतुभेदाद् द्विधा। भूमिगृहं सेतु, प्रासाद-गृहादिकं केतु। तत्र नरेन्द्राध्यासितः सप्तभूमादिरावासविशेषः प्रासादः, गृहं शेषजनाधिष्ठितमेकभूमादिकम्, आदिग्रहणात् कुटी-मण्डपा-ऽपवरकादिकं परिगृह्यते ॥

[भा.८२७] तिविहं च भवे वत्थुं, खायं तह ऊसियं च उभयं च।
भूमिघरं पासाओ, संबद्धघरं भवे उभयं ॥

वृ- अथवा वास्तु त्रिविधं भवेत्, तद्यथा-खातं तथा उच्छ्रितं च 'उभयं च" खातोच्छ्रित-मित्यर्थः। त्रिविधमपि क्रमेणोदाहरति-"भूमिघर"मित्यादि। खातं भूमिगृहम्। उच्छ्रितं प्रासादः, उपलक्षणत्वादन्यदप्येकभूम-द्विभूमादिकं गृहमुच्छ्रितम्। यत् पुनः प्रासाद-गृहादिकं भूमिगृहेण

Jain Education International For Private & Personal Use Only www.jainelibrary.org

सम्बद्धं तद् भवेत् 'उभयं' खातोच्छ्रितम् ॥

[भा.८२८] घडिएयरं खलु धणं, सणसत्तरसा बिया भवे धन्नं।
तण-कट्ठ-तेल्ल-घय-मधु-वत्थाई संचओ बहुहा ॥

वृ- यद् घटितम् 'इतरद् वा' अघटितं सुवर्णादिकं तद् धनमुच्यते । तथा शणं सप्तदशं येषां तानि शणसप्तदशानि बीजानि धान्यं भवेदिति । तानि चामूनि-

व्रीहिर्यवो मसूरो, गोधूमो मुद्ग-माष-तिल-चणकाः ।
अणवः प्रियङ्गु-कोद्रवमकुष्ठकाः शालिराढक्यः ॥
किञ्चकलाय-कुलत्थौ, शणसप्तदशानि बीजानि । इति ।

तथा तृण-काष्ठतैल-घृत-मधु-वस्त्रादीनाम् आदिशब्दाद् बुस-पलालादीनां सङ्ग्रहरूपः सञ्चयो बहुधा द्रष्टव्य इति ॥

[भा.८२९] सहजायगाइ मित्ता, नाई माया-पिईहि संबद्धा ।
ससुरकुलं संजोगो, तिन्नि वि मित्तादयो छट्ठो ॥

वृ- सहजातकादयः सुहृदो मित्राणि, आदिग्रहणात् सहवर्द्धितकाः सहपांसुक्रीडितकाः सहदारदर्शिनश्चेति । ज्ञातयो मातृपितृसम्बद्धा-, मातृकुलसम्बद्धाः पितृकुलसम्बद्धाश्चेत्यर्थः । तत्र मातृकुलसम्बद्धाः मातुल-मातामहादयः, पितृकुलसम्बद्धाः पितृव्य-पितामहादयः । श्वसुरकुलं संयोगोऽभिधीयते, किमुक्तं भवति ?-श्वसुरकुलपाक्षिका ये केचित् श्वसुर-श्वसुर-श्वश्रू-शालकादयस्तेषां सम्बन्धः संयोग उच्यते । एते मित्रादयस्त्रयोऽपि पक्षाः षष्ठो ग्रन्थः ॥

[भा.८३०] जाणं तु आसमाई, पल्लंकग-पीढिगाइ अट्ठमओ ।
दासाइ नवम दसमो, लोहाइउवक्खरो कुप्पं ॥

वृ- यानमिति जातावेकवचनम्, ततोऽयमर्थ-यानानि पुनरश्वादीनि, आदिशब्दाद् गजवृषभ-रथ-शिबिकादीनि । तथा पल्यङ्कादीनि शयनानि, पीठिकादीनि च आसनानि, एष शयना-ऽऽसनरूपोऽष्टमो ग्रन्थः । दासादिकः सर्वोऽप्यनुजीविवर्गो नवमो ग्रन्थः । तथा लोहादिक उपस्करः कुप्यमुच्यते । तत्र लोहोपस्करो लोहमयकवल्ली-कुद्दालिका-कुठारादिकः । आदिशब्दाद् मार्त्तिकोपस्करो घटादिकः, कांस्योपस्करः स्थाल-कच्चोलकादिक इत्यादिकः सर्वोऽपि परिगृह्यते। एष दशमो ग्रन्थः ॥ प्ररूपितो दशविधोऽपि बाह्यग्रन्थः, सम्प्रति चतुर्दशविधमभ्यन्तरं ग्रन्थमाह-

[भा.८३१] कोहो १ माणो २ माया ३, लोभो ४ पेज्जं ५ तहेव दोसो अ ६ ।
मिच्छत्त ७ वेद ८ अरइ ९, रइ १० हास ११ सोगो १२ भय १३ दुगुंछा १४ ॥

वृ- क्रोधो मानो माया लोभश्चेति चत्वारोऽपि प्रतीताः ४ । प्रमेशब्देनाभिष्वङ्गलक्षणो रागोऽभिधीयते ५ । दोषशब्देन त्वप्रीतिकलक्षणो द्वेषः ६ । 'मिथ्यात्वम्' अर्हत्प्रणीततत्वविपरीतावबोधरूपम् । तच्च द्विविधं वा त्रिषष्टयधिकशतत्रयभेदं वा अपरिमितभेदं वा । तत्रानाभिग्रहिकमाभिग्रहिकं चेति द्विविधम् । अनाभिग्रहिकं पृथिव्यादीनाम् । आभिग्रहिकं तु षड्विधम्-

नत्थि न निच्चो न कुणइ, कयं न वेएइ नत्थि निव्वाणं ।
नत्थि य मोक्खोवाओ, छव्विह मिच्छत्तऽभिग्गहियं ॥

— त्रिषष्टयधिकशतत्यविधं पुनरिदम् —

Jain Education International For Private & Personal Use Only www.jainelibrary.org

असियसयं करियाणं, अकिरियवाईण होइ चुलसीई।
अन्नाणी सत्तट्ठी, वेणइयाणं च बत्तीसा॥
– अपरिमितभेदं तु –
जावइया नयवाया, तावइया चेव होंति परसमया।
जावइया परसमया, तावइया चेव मिच्छत्ता॥

एवमनेकविकल्पमपि सामान्यतो मिथ्यात्वशब्देन गृह्यते इति सप्तमो भेदः ७। वेदस्त्रिविधः स्त्री-पुं-नपुंसकभेदात्। तत्र यत् स्त्रियाः पित्तोदये मधुराभिलाष इव पुंस्यभिलाषो जायते स स्त्रिवेदः, यत् पुनः पुंसः श्लेष्मोदयादम्लाभिलाषवत् स्त्रियामभिलाषो भवति स पुंवेदः, यत्तु पण्डकस्य पित्त-श्लेष्मोदये मज्जिकाभिलाषवदुभयोरपि स्त्रि-पुंसयोरभिलाषः समुदेति स नपुंसकवेद इति त्रयोऽप्येक एव भेदः ८। तथा यदमनोज्ञेषु शब्दादिविषयेषु संयमे वा जीवस्यचित्तोद्वेगः सा अरति ९। यत् पुनस्तेष्वेव मनोज्ञेषु असंयमे वा रमणं सा रति १०। यत्तु सनिमित्तमनिमित्तं वा हसति तद् हास्यम् ११। प्रियविप्रयोदिविह्वलचेतोवृत्तिराक्रन्दनादिकं यत् करोति स शोकः १२। सनिमित्तमनिमित्तं वा यद् बिभेति तद् भयम् १३। यत् पुनरस्नाना-ऽदन्तपवन-मण्डलीभोजना-दिकमपरं वा मृतकलेवर-विष्टादिकं जुगुप्सते सा जुगुप्सा १४। एष चतुर्दशविधोऽप्याभ्यन्तरग्रन्थ उच्यते॥ प्रस्तुतयोजनामाह-

[भा.८३२] सावज्जेण विमुक्का, सब्भिंतर-बाहिरेण गंथेण।
निग्गहपरमा य विदू, तेनेव य होंति निग्गंथा॥

वृ- सावद्यः-सपापः कर्मोपादाननिबन्धनत्वाद् यो ग्रन्थस्तेन साभ्यन्तर-बाह्येन ये मुक्तास्ते निर्ग्रन्था उच्यन्ते, येऽपि चाऽऽन्तरग्रन्थेन न सर्वथा मुक्तास्तेऽपि; येन विद्वांसः क्रोधादि-दोषवेदिनस्तथा 'निग्रहपरमाः' तन्निर्जयप्रधानाः, तेनैव कारणेन ते निर्ग्रन्था भवन्ति॥

अथाऽऽन्तरग्रन्थमधिकृत्य ये मुक्ता ये चामुक्तास्तदेतदभिधित्सुराह-

[भा.८३३] केई सव्वविमुक्का, कोहाईएहि केइ भइयव्वा।
सेढिदुगं विरएत्ता, जाणसु जो निग्गओ जत्तो॥

वृ- 'क्रोधादिभिः' आन्तरग्रन्थैः केचित् 'सर्वविमुक्ताः' सर्वैरपि विप्रमुक्ताः, केचित् पुनः 'भक्तव्याः' विकल्पनीयाः, कैश्चिद् मुक्ताः कैश्चिदपि न मुक्ता इत्यभिप्रायः। अत्र शिष्यः प्राह- कथं नु नामेदं ज्ञास्यते 'अमी सर्वथा मुक्ता अमी च न मुक्ताः' ? इति, उच्यते- 'श्रेणिद्विकम्' उपशमश्रेणि-क्षपकश्रेणिलक्षणं 'विरचय्य' यथोक्तपरिपाट्या स्थापयित्वा ततो जानीहि यः 'यतः' क्रोधादेर्निर्गतो अनिर्गतो वेति॥ अथ केयमुपशमश्रेणि ? का वा क्षपकश्रेणि ? इत्याशङ्कप-नोदाय प्रथमत उपशमश्रेणिमाह-

[भा.८३४] अण दंस नपुंसि-त्थीवेय च्छक्कं च पुरिसवेयं च।
दो दो एगंतरिए, सरिसे सरिसं उवसमेइ॥

वृ- इहोपशमश्रेणेः प्रारम्भकोऽप्रमत्तसंयतः, समाप्तौ पुनः प्रमत्तसंयतोऽविरतसम्यग्दृष्टिर्वा भवेत्। यत उक्तम्-

18 15

Jain Education International For Private & Personal Use Only www.jainelibrary.org

उवसामगसेढीए, पट्ठवओ अप्पमत्तविरओ उ।
पज्जवसाणे सो वा, होइ पमत्तो अविरओ वा।।

अविरत-देशविरत-प्रमत्ता-ऽप्रमत्तसंयतानामन्यतमः प्रतिपद्यते इत्येके। प्रतिपत्तिक्रमश्चायम्- "अण"त्ति प्रथमतो युगपदन्तर्मुहूर्त्तेनानन्तानुबन्धिनः क्रोध-मान-माया-लोभानुपशमयति। ततः 'दर्शनं' मिथ्यात्व-सम्यग्मिथ्यात्व-सम्यग्दर्शनभेदात् त्रिविधमपि युगपदुपशमयति। सर्वत्र युगपदुपशमनकालोऽन्तर्मुहूर्त्तप्रमाणो द्रष्टव्यः। ततो यदि पुरुषः प्रारम्भकस्ततः प्रथमं नपुंसकवेदम्, पश्चात् स्त्रीवेदम्, ततो हास्य-रत्य-ऽरति-शोक-भय-जुगुप्साषट्कम्, ततः पुरुषवेदम्; अथ स्त्री प्रारम्भिका ततः प्रथमं नपुंसकवेदम्, पश्चात् पुरुषवेदम्, ततो हास्यादिषट्कम्, ततः स्त्रीवेदम्; अथ नपुंसक एव प्रारम्भकस्ततः प्रथमं स्त्रीवेदम्, पश्चात् पुरुषवेदम्, ततः षट्कम्, ततो नपुंसकवेदम्। तथा 'द्वौ द्वौ' अप्रत्याख्यान-प्रत्यख्यानरूपौ क्रोधादिकौ 'एकान्तरितौ' सञ्ज्वलनक्रोधाद्यन्तरितौ 'सदृशौ' तुल्यावुपशमय्य सदृशमेवोपशमयति। इयमत्र भावना-अप्रत्याख्यान-प्रत्याख्यानौ क्रोधौ क्रोधत्वेन परस्परं सदृशौ युगपदुपशमयति, ततः सञ्ज्वलनक्रोधमेकाकिनमेव; ततोऽप्रत्याख्यान-प्रत्याख्यानौ मानौ, ततः सञ्ज्वलनमानम्; ततोऽप्रत्याख्यान-प्रत्याख्याने माये, ततः सञ्ज्वलनमायाम्; ततोऽप्यप्रत्याख्यान-प्रयाख्यानौ लोभौ, ततः सञ्ज्वलनलोभम्। तं चोपशमयँस्त्रिधा करोति, आद्यौ द्वौ भागौ युगपदुपशमयति, तृतीयं भागं सङ्ख्येयानि खण्डानि करोति, तान्यपि पृथक् पृथक् कालभेदेनोपशमयति, पुनः सङ्ख्येयखण्डानां चरमखण्डमसङ्ख्येयानि खण्डानि करोति, ततः समये समये एकैक मुपशमयति। इह च दर्शनसप्तके उपशान्ते सति निवृत्तिवादरः, तत ऊर्ध्वमनिवृत्तिबादरो यावद् लोभस्य द्विचरम सङ्ख्येयखण्डम्, चरमसङ्ख्येयखण्डस्य पुनरसङ्ख्येयखण्डान्युपशमयत् सूक्ष्मसम्पराय उच्यते।

एवं समापितोपशमश्रेणीक उपशान्तमोहवीतरागगुणस्थानकमनुभवन् यथाख्यातचारित्री भवति। स च यदि बद्धायुः प्रतिपद्यते तदवस्थश्च म्रियते ततो नियमादनुत्तरविमानवासिषूपपद्यते, श्रेणिप्रच्युतस्य पुनरनियमः अथाबद्धायुस्ततो जघन्येनैकसमयमुत्कर्षतोऽन्तर्मुहूर्त्तमुपशमकनिर्ग्रन्थो भूत्वा नियमतः कापि वस्तुनि लुब्धः पुनरप्युदितकषायः श्रेणिप्रतिलोममावर्त्तय देशप्रतिपातेन सर्वप्रतिपातेन वा प्रतिपतति, यतो नासौ जघन्यतोऽपि तद्भव एव निश्रेयसपदमश्नुते, उत्कर्षतः पुनर्देशोनापार्द्धपुद्गलपरावर्त्थं संसारं संसरति। यत उक्तम्-

तम्मि भवे निव्वाणं, न लहइ उक्कोसओ वि संसारं।
पोग्गलपरियट्टद्धं, देसूणं कोइ हिंडेज्ञा।।

अस्यां चोपशमश्रेण्यां प्रविष्टेन येन यद् अनन्तानुबन्ध्यादिकमुपशमितं स उपशमनां प्रतीत्य तेन विप्रमुक्त उच्यते।। प्ररूपिता उपशमश्रेणि। क्षपकश्रेणिमाह-

[भा.८३५] अण ४ मिच्छ ५ मीस ६ सम्मं ७, अट्ठ १५ नपुंसि १६ त्थिवेय १७ छक्कं च २३।
पुमवेयं च २४ खवेई, कोहईए अ संजलणे २८।।

वृ- इह क्षपकश्रेणिमविरत-देशविरत-प्रमत्ता-ऽप्रमत्तसंयतानामन्यतम उत्तमसंहननः प्रशस्तध्यानोपगतमानसः प्रतिपद्यते। तदुक्तं क्षपकश्रेणिप्रक्रमे-

पडिवत्तीए अविरय-देस-पमत्ता-ऽपमत्तविरयाणं।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

अन्नयरो पडिवज्जइ, सुद्धज्झाणोवगयचित्तो ॥

तत्रपूर्वविदप्रमत्तः शुक्लध्यानोपगतोऽपि प्रतिपद्यते, शेषास्तु धर्मध्यानोपगता एवेति। प्रतिपत्तिक्रमश्चायम्-प्रथममन्तर्मुहूर्तेनानन्तानुबन्धिनः क्रोधादींश्चत्वारोऽपि युगपत् क्षपयति। तदनन्तभागं तु मिथ्यात्वेप्रक्षिप्य तेन सह मिथ्यात्वं क्षपयति। तस्याप्यनन्तभागं सम्यग्मिथ्यात्वे प्रक्षिप्य तदपि सावशेषं क्षपयति। आह किं पुनः कारणं सावशेषं क्षपयति? इति, उच्यते-यथा खल्वतिसम्भृतो दावानलो दरदग्धेन्धन एवेन्धनान्तरमासाद्योभयमपि दहति एवमसावपि क्षपकस्तीव्रशुभपरिणामत्वात् प्राक्तने कर्मण्यनि-शेषित एवापरं क्षपयितुमारभते। एवं सम्यग्मिथ्यात्वस्यावशेषं सम्यकत्वे प्रक्षिप्य तेन सह सम्यक्त्वं निरवशेषमेव क्षपयति। यदाह चूर्णिकृत्- जं तं सेसं तं सम्मत्ते छुभित्ता निरवसेसं खवेइत्ति।" एतच्च बद्धायुष्कापेक्षं सम्भाव्यते, आवश्यकादौ तमेवाधिकृत्य सम्यक्त्वनिरवशेषक्षपणस्योक्तत्वात्। इह च यदि बद्धायुः प्रतिपद्यते अनन्तानुबन्धिक्षये च व्युपरमते ततो मिथ्यादर्शनोदयतस्तान् पुनरप्यनुचिनोति, मिथ्यात्वे तद्बीजसम्भवात्; क्षीणमिथ्यात्वस्तु नोपचिनोति, मूलाभावात्; तदवस्थश्च मृतोऽवश्यमेव त्रिदशेषूपपद्यते। क्षीणदर्शनसप्तकोऽप्यप्रतिपतितपरिणामो म्रियमाणः सुरगतावेवोपपद्यते। प्रतिपतितपरिणामस्तु नानामतित्वात् सर्वगतिभाग् भवति। तथा चोक्तम्-

बद्धाऊ पडिवन्नो, पढमकसायक्खए जइ मरिज्ञा।
तो मिच्छत्तोदयओ, चिणिज्ज भुज्जो न खीणम्मि ॥
तम्मि मओ जाइ दिवं, तप्परिणामो य सत्तए खीणे।
उवरयपरिणामो पुण, पच्छा नाणामइ-गईओ ॥

स च यदि बद्धायुः प्रतिपद्यते ततो नियमाद् दर्शनसप्तके क्षीणे सत्युपरमते। अबद्धायुष्कः पुनरनुपरत एव समस्तां श्रेणिं समापयति। स च स्वल्पसम्यग्दर्शनावशेष एवाप्रत्याख्यान-प्रत्याख्यानावरणकषायाष्टकं क्षपयितुं युगपदारभते। एतेषां च सङ्ख्येयतमं भागं क्षपयन् एताः षोडश प्रकृतीः क्षपयति। तद्यथा-नैरयिकगतिनाम तिर्यग्गतिनाम एकेन्द्रियजातिनाम द्वीन्द्रिय-जातिनाम त्रीन्द्रियजातिनाम चतुरिन्द्रियजातिनाम नरकानुपूर्वीनाम तिर्यगानुपूर्वीनाम अप्रशस्तविहायोगतिनाम स्थावरनाम सूक्ष्मनाम अपर्याप्तनाम साधारणनाम निद्रानिद्रां प्रचलाप्रचलां सत्यानगृद्धिमिति। ततोऽष्टानां कषायाणामवशेषं क्षपयति। ततो नपुंसकवेदम्। ततः स्त्रवेदम्। ततो हास्यादि षट्कम्। ततः पुरुषवेदं त्रिधा कृत्वा खण्डद्वयं युगपत् क्षपयति, तृतीयं तु खण्डं सञ्ज्वलनक्रोधे प्रक्षिपति, पुरुषे प्रतिपत्तर्ययं क्रमः। स्त्री-नपुंसकयोः प्तिपत्रोरुप-शमश्रेणिन्यायो वक्तव्यः। क्रोधादींश्च सञ्ज्वलनान् प्रत्येकमन्तर्मुहूर्तेनानेनैव खण्डत्रयरचनान्यायेन क्षपयति। श्रेणिपरिसमाप्तिकालोऽप्यन्तर्मुहूर्त्तप्रमाण एव द्रष्टव्यः। केवलं बृहत्तरमत्रान्तर्मुहूर्तम्, अन्तर्मुहूर्तानामसङ्ख्येयभेदत्वात्। लोभचरमखण्डं तु सङ्ख्येयानि खण्डानि कृत्वा पृथक् पृथक् क्षपयति। इह च क्षीणदर्शनसप्तको निवृत्तिबादरसम्पराय उच्यते, तत ऊर्ध्वमनिवृत्तिबादरसम्परायो यावत् सञ्ज्वलनलोभस्य द्विचरमसङ्ख्येयखण्डम्, चरमसङ्ख्येयखण्डस्य पुनरसङ्ख्येयानि खण्डानि क्षपयन् सूक्ष्मसम्पराय उच्यते, तत ऊर्द्ध क्षीणमोहच्छद्मस्थवीतरागो यथाख्याचारित्री भवति। ततो यथा कश्चिद् महापुरुषो बाहुभ्यानपारगम्भीरां महानदीं तीर्त्वा स्ताधमासाद्य क्षणमेकं

Jain Education International For Private & Personal Use Only www.jainelibrary.org

विश्राममादत्ते एवमयमपि दुस्तरं मोहसागरं तीर्त्वा सञ्जातपरिश्रमो विश्राम्यतीति। ततश्छद्मस्थ-वीतरागत्वसम्बन्धिनि समयद्वयेऽवशिष्यमाणे प्रथमे समये निद्रां १ प्रचलां २ देवगतिं ३ देवानुपूर्वी ४ वैक्रियशरीरनामकर्म ५ वज्रर्षभनाराचसहननं मुक्त्वा शेषाणि संहननानि १० षन्नां संस्थानानां मध्ये यस्मिन् व्यवस्थितस्तदेकं मुक्त्वा शेषाणि संस्थानानि १५ आहारकशरीरनाम १६ यद्यतीर्थकरः प्रतिपत्ता ततस्तीर्थकरनामकर्मापि १७ इत्येवं सप्तदश प्रकृतीः क्षपयति। ततो द्वितीये समये पञ्चप्रकारं ज्ञानावरणं चतुर्विधं दर्शनावरणं पञ्चविधमन्तरायं च क्षपयित्वा विमलकेवलश्रियमवाप्नोतीति।

एनां च क्षपकश्रेणिमध्यासीनेन येन यदनन्तानुबन्ध्यादिकं क्षपितं स तेन मुक्त इत्यवसातव्यम्। येऽपि श्रेणिद्वयमद्यापि न प्रतिपद्यन्ते किन्तु सामायिक-च्छेदोपस्थापनीय-परिहारविशुद्धिकानामन्यतमस्मिन् संयमे वर्त्तन्ते तेऽपि सञ्जवलनचतुष्टयवर्जैर्द्वादशभि कषायैर्मुक्ता इत्यवगन्तव्यम्। यत उक्तम्-

बारसविहे कसाए, खविए उवसामिए व जोगेहिं।
लब्भइ चरित्तलंभो, तस्स विसेसा इमे पंच॥

ततश्च- जे वि अ न सव्वगंथेहि निग्गया होंति केइ निग्गंथा।
ते वि य निग्गहपरमा, हवंति तेसिं खउज्जुत्ता॥

वृ- येऽपि च सरागसंयमवर्तिनः सर्वेभ्य आन्तरग्रन्थेभ्यो न निर्गताः तेऽपि 'तेषां' सञ्जवलनकषायादीनां 'क्षयोद्युक्ताः' उदयनिरोधोदयप्राप्तविफलीकरणाभ्यां क्षयकरणायोद्यताः सन्तः 'निग्रहपरमाः' आन्तरग्रन्थनिग्रहप्रधाना भवन्ति इत्यतो निर्ग्रन्था उच्यन्ते॥ अपि च-

[भा.८३७] कलुसफलेण न जुज्जइ, किं चित्तं तत्थ जं विगयरागो।
संते वि जो कसाए, निगिण्हई सो वि तत्तुल्लो॥

वृ- कलुषयन्ति-सहजनिर्मलं जीवं कर्मरजसा मलिनयन्तीति "अच्" इति अच्प्रत्यये कलुषा-कषायास्तेषां यत् फलं-परुषभाषण-नयनमुखविकार-रौद्रध्यानानुबन्धादिकं तेन सह यद् 'न युज्यते' न सम्बन्धमुपयाति 'विगतरागः' विशेषेण-अपुनर्भावेन गतो रागो यस्मात् स विगतरागः, क्षीणमोह इत्यर्थः। तत्र 'किं चित्रम्?' किमाश्चर्यम्? कषायलक्षणकारणाभावाद् न किञ्चिदित्यर्थः। यस्तु 'सतोऽपि' विद्यमानानपि कषायान् 'निगृह्णाति' उदीयमानानेव प्रथमतो निरुणद्धि कथञ्चिदुदयप्राप्तान् वा विफलीकरोति सोऽपि 'तत्तुल्यः' वीतराग इव निष्कषायो मन्तव्यः, सतामपि कषायाणामसत्कल्पताकरणात्। अतः सरागसंयतोऽपि निर्ग्रन्थोऽभिधीयते इति॥ अथ परः प्रश्नयति

[भा.८३८] जइ अब्भिंतरमुक्का, बाहिरगंथेण मुक्कया किह नु।
गिण्हंता उवगरणं, जम्हा अममत्तया तेसु॥

वृ- यद्यनन्तरोक्तप्रकारेणाऽभ्यन्तरग्रन्थमुक्तास्ततो वस्त्र-पात्रादिकमुपकरणं गृह्णन्तः कथं 'नुः' इति वितर्के बाह्यग्रन्थेन मुक्ता उच्येरन्?, वस्त्रादेरपि ग्रन्थरूपत्वादित्यभिप्रायः। सूरिराह-यस्मात् 'तेषु' वस्त्र-पात्रादिषु न विद्यते ममत्वं-मूर्च्छा येषां ते 'अममत्वकाः' "शेषाद्वा" इति कच्प्रत्ययः मूर्च्छारहितास्तेन बाह्यग्रन्थमुक्ता अप्यभिधीयन्ते। इयमत्र भावना-मूर्च्छा परिग्रहो

Jain Education International For Private & Personal Use Only www.jainelibrary.org

गीयते न तूपकरमादिधारणमात्रम्, "मुच्छा परिग्गहो वुत्तो" इति ज्ञातव्यः । तदुक्तं परमगुरुभिः-

अज्झत्थविसोहीए, उवगरणं बाहिरं परिहरंतो ।
अपरिग्गहो त्ति भणिओ, जिणेहि तेल्लोक्कदंसीहिं ।।

गतं ग्रन्थपदम् । अथाऽऽमपदं विवरीषुराह-

[भा.८३९] नामं ठवणा आमं, दव्वामं चेव होइ भावामं ।
उस्सेइम संसेइम, उवक्खडं चेव पलियामं ।।

वृ-आमं चतुर्धा, तद्यथा-नामामं स्थापनामं द्रव्यामं भावामम् । तत्र नाम-स्थापने गतार्थे। द्रव्यामं पुनश्चतुर्धा, तदेव दर्शयति-"उस्सेइम" इत्यादि । उत्-ऊर्द्ध निर्गच्छता बाष्पेण यः स्वेदः स उत्स्वेदः, उत्स्वेदेन निर्वृत्तमुत्स्वेदिमम्, "भावादिमः" इति सूत्रेण इमप्रत्ययः, उत्स्वेदिमं च तदामं च उत्स्वेदिमामम्१ । मम्-एकीभावेन स्वेदः संस्वेदः, तेन निर्वृत्तं संस्वेदिमम् तदेवामं संस्वेदिमामम् २ । तथोपस्कृता-राद्धा ये वल्ल-चणकादयः, तेषां मध्ये यदामं तदुपस्कृतामम् ३ । पर्यायः-स्वाभाविक औषाधिको वा फलानां पाकपरिणामः, तस्मिन्प्राप्तेऽपि यदामं तत् पर्यायामम् ४ ।। अथोत्स्वेदिमादिचतुष्टयमेव व्याचष्टे-

[भा.८४०] उस्सेइम पिट्ठाई, तिलाइ संसेइमं तु णेगविहं ।
कंकडुयाइ उवक्खड, अविपक्करसं तु पलियामं ।।

वृ- उत्स्वेदिमं 'पिष्टादि' पिष्टं-सूक्ष्मतन्दुलादिचूर्णिनिष्पन्नम्, तद्धि वस्त्रान्तरितमधःस्थि-तस्योष्णोदकस्य बाष्पेणोत्स्विद्यमानं पच्यते, तत्र यदामं तद् उत्स्वेदिमामम्, आदिग्रहणाद् भरोलादिपरिग्रहः । संस्वेदिमं पुनस्तिलादिकमनेकविधम्, इह क्वचित् पिठरादौ पानीयं तापयित्वा पिठरिकायां प्रक्षिप्तास्तिलास्तेनोष्णोदकेन सिच्यन्ते ततस्ते तिलाः संस्विद्यन्ते, तेषां संस्विन्नानां मध्ये ये आमास्तत् संस्वेदिमामम्, आदिग्रहणेन यदन्यदप्येतेन क्रमेण संस्विद्यते तत् संस्वेदिमा-मम् । तथा चणक-मुद्गादीनामुपस्कृतानां ये कङ्कटुकादय आमास्ते उपस्कृतामम् । पर्यायामं पुनरविपक्वरसं फलादिकमुच्यते ।। तच्चतुर्विधम्, तद्यथा-

[भा.८४१] इंधन धूमे गंधे, वच्छप्पलियामए अ आमविही ।
एसो खलु आमविही, नेयव्वो आनुपुव्वीए ।।

वृ-इन्धनपर्यायामं धूमपर्यायामं गन्धपर्यायामं वृक्षपर्यायाममित्येवं पर्यायामे आमविधि-श्चतुःप्रकारः । एष खलु आमविधिर्ज्ञातव्यः 'आनुपूर्व्या' यथोक्तया परिपाट्या । यद्वा आनुपूर्वी नाम वक्ष्यमाणलक्षणा पलालवेष्टन-गर्त्ताखनन-करीषप्रक्षेपणादिका यथायोगमामफलपाचनाय रचना तया ज्ञातव्य आमविधिरिति ।। अथेन्धन-धूमपर्यायामे विवृणोति-

[भा.८४२] कोद्दवपलालमाई, धूमेणं तिंदुगाइ पच्चंते ।
मज्झऽगडाऽगणि पेरंत तिंदुया छिद्दधूमेणं ।।

वृ-कोद्रवपलालादिकमिन्धनमुच्यते, आदिग्रहणेन शालिपलालपरिग्रहः, तेन चाऽऽम्र-फलादीनि फलानि वेष्टयित्वा पाच्यन्ते, तत्र यान्यपक्वानि फलानि तद् इन्धनपर्यायामम् । तथा धूमेन तिन्दुकादीनि फलानि पाच्यन्ते, कथं पाच्यन्ते ? इत्याह-"मज्झऽगडाइ"त्ति प्रथमतो गर्त्ताया मध्ये करीषः प्रक्षिप्यते, तस्याश्च गर्त्तायाः पार्श्वेष्वपरा गर्त्ताः खन्यन्ते, तासु च गर्त्तासु

Jain Education International For Private & Personal Use Only www.jainelibrary.org

तिन्दुकादीनि फलानि प्रक्षिप्य मध्यमायां करीषगर्त्तायां "अगनि"त्ति अग्निर्दीयते, तासां च "पेरंत"त्ति पर्यन्तगर्त्तानां श्रोतांसि मध्यमगर्त्तया सह मीलितानि क्रियन्ते, ततस्तस्याः करीषगर्त्तायाः सकाशाद् धूमस्तैः श्रोतोभि पर्यन्तगर्त्तासु प्रविशति, ततस्तच्छिद्रसम्बन्धिना धूमेन प्रसरता तानि फलानि पाच्यन्त इति, तेषां मध्ये यदामं तद् धूमपर्यायामम् ।। अथ गन्ध-वृक्षपर्यायामे भावयति-

[भा.८४३] अंबग-चिब्भिडमाई, गंधेणं जं च उवरि रुक्खस्स ।
कालप्पत्त न पच्चइ, वत्थप्पलियामगं तं तु ।।

वृ- आम्रक-चिर्भटादीनि आदिशब्दाद् बीजपुरकादीनि यान्यपक्वानि फलानि तेषां मध्ये पक्वानि प्रक्षिप्यन्ते, तेषां गन्धेन प्राक्तनान्यामकानि पच्यन्ते, तत्र यद् अपक्वं फल तद् गन्ध-पर्यायामम् । तथा "जं च"त्ति चशब्दस्य पुनरर्थत्वाद् यत् पुनर्वृक्षस्योपरि शाखायां वर्त्तमानं काले-वसन्तादिलक्षणे पाकगसमये प्राप्तेऽपि परिपक्केष्वप्यपरफलेषु न पच्यते तद् वृक्षपर्यायामम्।। व्याख्यातं चतुर्विधमपि पर्यायामम् । तध्याख्याने च समर्थितं द्रव्यामम् । अथ भावामस्वरूपं निरूपयति-

[भा.८४४] भावामं पि य दुविहं, वयणामं चेव नो य वयणामं ।
वयणाम अणुमयत्थे, आमं ति हि जो वदे वक्कं ।।

वृ- भावाममपि द्विविधम्-वचनामं चैव नोवचनामं च । वचनरूपमामं वचनामम्, अनुमतार्थे 'आमम्' इति यः 'वाक्यं' वचनं वदेत् तद् वचनामम् । यथा-कोऽपि साधुर्गुरूणां कार्येण गच्छन्नपरेण पृष्टः-आर्य ! किं गुरुकार्येण गम्यते ? , स प्रत्याह-आमम्, एवमेतदित्यर्थः ।।

[भा.८४५] नोवयणामं दुविहं, आगमतो चेव नो अ आगमतो ।
आगमे नाणुवउत्तो, नोआगमओ इमं होइ ।।

वृ- नोवचनामं द्विविधम्-आगमतश्चैव नोआगमतश्च । तत्रागमत आमपदार्थज्ञानयुक्तस्तत्र चोपयुक्तः, उपयोगस्य भावरूपत्वाद् ज्ञानस्य चागमरूपतवात् । नोआगमतो भावाममिदं भवति।। तदेवाह-

[भा.८४६] उग्गमदोसाईया, भावतो अस्संजमो अ आमविही ।
अन्नो वि य आएसो, जो वरिससयं न पूरेइ ।।

वृ- उद्गमदोषाः-आधाकर्मादयः, आदिग्रहणाद् उत्पादनादोषा एषणादोषाश्च, एतद् भावामं प्रतिपत्तव्यम् । तथा च आचाराङ्गसूत्रम्- सव्वामगंधं परिन्नाय निरामगंधो परिव्वए 'असंयमश्च' पृथिव्याद्युपमर्दलक्षणो भावतः आमविधिरेव ज्ञातव्यः, चारित्रापक्वताकरणात् । यद्वाऽन्योऽपि 'आदेशः' प्रकारो भण्यते-यो वर्षशतायुः पुरुष आयुष्कोपक्रमेण वर्षशतमपूरयित्वा म्रियते सोऽपि भावत आमः, आयुषः परिपाकमन्तरेण मरणात् । अत्र च द्रव्यामेणाधिकारः, तत्रापि वृक्षपर्यायामेण, शेषाणामुच्चारितसदृशतया विनेयव्युत्पादनार्थं प्रसङ्गतः प्ररूपितत्वात् ।। व्याख्यातमामपदम् ।

अथ तालपदं विवृणोति-

[भा.८४७] नामं ठवणा दविए, तालो भावे य होइ नायव्वो ।
जो भविओ सो तालो, दव्वे मूलुत्तरगुणेसु ।।

वृ- नामतालः स्थापनातालो द्रव्यतालो भावतालश्च भवति ज्ञातव्यः । तत्र नाम-स्थापने

Jain Education International For Private & Personal Use Only www.jainelibrary.org

क्षुण्णे। द्रव्यतालः पुनरयम्-"जो भविउ"त्ति यः खलु 'भव्यः' भावितालपर्यायः। स च त्रिधा-एकभविको बद्धायुष्कोऽभिमुखनाम-गोत्रश्च। तत्रैकभविको नाम यो विवक्षितभवानन्तरं तालत्वेनोत्पत्स्यते, बद्धायुष्को येन तालोत्पत्तिप्रायोग्यमायुः कर्म बद्धम्, अभिमुखनाम-गोत्रः पुनर्विपाकोदयाभिमुखतालसम्बन्धिनाम-गोत्रकर्मा तालत्वेनोत्पित्सया विक्षिप्तजीवप्रदेशः। यद्वा द्रव्यतालो द्विविधः-मूलगुणनिर्विर्तित उत्तरगुणनिर्वर्त्तितश्च। तत्र स्वायुषः परिक्षयादपगतजीवो यः स्कन्धादिरूपस्तालः स मूलगुणनिर्वर्त्तितः, यस्तु काष्ठ-चित्रकर्मादिष्वालिखितः स उत्तरगुणनिर्वर्त्तितः। एष द्रव्यातालः॥ सम्प्रति भावतालमाह-

[भा.८४८] भावम्मि होंति जीवा, जे तस्स परिग्गहे समक्खाया।
बिइओ वि य आदेसो, जो तस्स विजाणओ पुरिसो॥

वृ- 'भावे' भावविषयस्तालो ये जीवाः 'तस्य' तालस्य परिग्रहे मूल-कन्दादिगतास्ते सर्वेऽपि समुदिताः सन्तो भावताल इति समाख्याताः, नोआगमत इति भावः। द्वितीयोऽप्यत्देशोऽस्ति-यः 'तस्य' तालस्य 'विज्ञायकः' उपयुक्तः पुरुषः सोऽपि भावताल उच्यते, आगमत इत्यर्थः। अत्र च नोआगमत भावतालेनाधिकारः, तस्य सम्बन्धि यत् फलं तदिह तालशब्देन प्रत्येतव्यम्॥ गतं तालपदम्। अथ प्रलम्बपदं विवृणोति-

[भा.८४९] नामं ठवण पलंबं, दव्वे भावे अ होइ बोधव्वं।
अट्ठविह कम्मगंठी, जीवो उ पलंबए जेणं॥

वृ- नामप्रलम्बं स्थापनाप्रलम्बं द्रव्यप्रलम्बं भावप्रलम्बं च भवति बोद्धव्यम्। नाम-स्थापने सुगमे। द्रव्यप्रलम्बमेकभविक-बद्धायुष्का-ऽभिमुखनामगोत्रभेदभिन्नं मूलोत्तरगुणभेदभिन्नं च द्रव्यतालवद् भावप्रलम्बं च भावतालवद् वक्तव्यम्। यद्वा अष्टविधः कर्मग्रन्थिर्भावप्रलम्बमुच्यते। कुतः ? इत्याह-येन कर्मणा जीवः तुशब्दः संसारीति विशेषणार्थं 'प्रलम्बते' नैरयिकादिकां गतिं गतिं प्रति लम्बत इति तद् भावतः प्रलम्बम्॥ अत्र परः प्राह-

[भा.८५०] तालं तलो पलंबं, तालं तु फलं तलो हवइ रुक्खो।
पलंबं च होइ मूलं, झिञ्झिरिमाई मुनेयव्वं॥

वृ- किमिदं तालम् ? को वा तलः ? किं वा प्रलम्बम् ? । अत्र सूरिराह-तालं तावत् फलं तलवृक्षसम्बन्धि, तच्चाग्रप्रलम्बमुच्यते। तलः पुनस्तदाधारभूतो वृक्षः। प्रलम्बं पुनर्मूलं भवति, प्रलम्बशब्देनेह मूलप्रलम्बं गृहीतमिति भावः। तच्च 'झिञ्झिर्यादिकं' झिञ्झिरिप्रभृतिवृक्षसम्बन्धि "मुनेयव्वं" ज्ञातव्यम्॥ तदेव मूलप्रलम्बमाह-

[भा.८५१] झिञ्झिरि-सुरभिपलंबे, तालपलंबे अ सल्लइपलंबे।
एतं मूलपलंबं, नेयव्वं आनुपुव्वीए॥

वृ- झिञ्झिरी-वल्लीपलाशकः सुरभि-सिग्गुकः तयोः प्रलम्ब-मूलम्। एवं तालप्रलम्बं च सल्लकीप्रलम्बम्, चशब्दादन्यदपि मूलं यद् लोकस्योपभोगमायाति तदेतद् मूलप्रलम्बं ज्ञातव्यमानु-पूर्व्या॥ अथाग्रप्रलम्बं विवृणोति-

[भा.८५२] तल नालिएर लउए, कविट्ठ अंबाड अंबए चेव।
एअं अग्गपलंबं, नेयव्वं आनुपुव्वीए॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

वृ- तलफलं नालिकेरफलं लकुचफलं कपित्थफलम् आम्रातकफलम् आम्रफलं चशब्दस्यानुक्तसमुच्चयार्थत्वाद् अन्यदपि कदलीफल-बीजपूरादिकम् एतदग्रप्रलम्बं ज्ञातव्यमानुपूर्व्या ।। अथ परः प्राह-

[भा.८५३] जइ मूल-ऽग्गपलंबा, पडिसिद्धा न हु इदार्णि कंदाई ।
कप्पंति न वा जीवा, को व विसेसो तदग्गहणे ।।

वृ- यदि मूलप्रलम्बा-ऽग्रप्रलम्बे प्रतिषिद्धे न पुनः 'इदानीम्' अस्मिन् सूत्रे 'कन्दादयः' कन्दस्कन्ध-त्वक्-शाखा-प्रवाल-प्र-पुष्प-बीजानि प्रतिषिद्धनि, यतश्चैतेषां प्रतिषेधं न करोति सूत्रं ततो मदीयायां मतौ प्रतिभासते-अवश्यमेते कन्दादयः कल्पन्ते प्रतिग्रहीतुं जीवा अपि सन्तः, अथवा तत्त्वतो नाऽमी जीवा भवन्ति, यदि हि जीवा भवेयुस्ततः प्रतिषेधोऽप्यमीषामस्मिन् सूत्रे कृतः स्यात्; अथेत्थं भणिष्यन्ति भवन्तः-जीवा एवामी न च कल्पन्ते ततः सूत्रं दुर्बद्धम्; अथ ब्रवीध्वम्-जीवा अमी न च कल्पन्ते सूत्रं च सुबद्धम्, ततः को वा विशेषहेतुस्तेषां-कन्दादीनामग्रहणे येन तेन गृहीताः ? इति ।। अत्र सूरि प्रतिवचनमाह-

[भा.८५४] चोयग ! कन्नसुहेहिं, सद्देहि समुच्छितो विसह फासे ।
मज्झम्मि अट्ठ विसया, गहिया एवऽट्ठ कंदाई ।।

वृ- हे नोदक ! यथा दशवैकालिके-

कन्नसोक्खेहि सद्देहिं, पेमं नाभिनिवेसए ।
दारुणं कक्कसं फासं, काएण अहियासए ।।

इत्यस्मिन् श्लोके ''कर्णसुखैः' सुश्रवैः शब्दैरमूर्च्छितो भवेत्'' इति शब्दविषयो रागः प्रतिषिद्धः, ''विषहेत स्पर्शं दारुणम्'' इत्यनेन तु स्पर्शविषयो द्वेष इति शब्द-रूप-रस-गन्ध-स्पर्शाना-मिष्टानिष्टरूपतया दशविधानां मध्यादिष्टशब्दा-ऽनिष्टस्पर्शयोराद्यन्तयोरेव सूत्रलाघवार्थं ग्रहणं कृतम्, अन्यथा ह्येवमभिधातव्यं स्यात्-

कन्नसोक्खेहि सद्देहिं, पेमं नाभिनिवेसए ।
दारुणं कक्कसं सद्दं, सोएण अहियासए ।
चक्खुसोक्खेहि रूवेहिं, पेमं नाभिनिवेसए ।
दारुणं कक्कसं रूवं, चक्खुणा अहियासए ।।

परम् ''आद्यन्तग्रहणे मध्यस्यापि ग्रहणम्'' इति न्यायादष्टावपि मध्यवर्त्तिनोऽनिष्टशब्दाद्या इष्टस्पर्शान्ता विषया गृहीता भवन्ति; एवमत्रापि 'सूत्रं बृहत्तरं मा भूत्' इति हेतोराद्यान्त्ययोरग्रमूल-प्रलम्बयोर्ग्रहणे मध्यवर्त्तिनः कन्दादयोऽष्टावपि गृहीता द्रष्टव्याः । एतेषां मूल-कन्दादीनां दशानामपि भेदानां सुखप्रतिपत्त्यर्थमियं गाथा लिख्यते-

मूले कंदे खंधे, तया य साले पवाल पत्ते य ।
पुप्फे फले य बीए, पलंबसुत्तम्मि दस भेया ।।

– प्रकारान्तरेण प्रतिवचनमाह –

[भा.८५५] अहवा एगग्गहणे, गहणं तज्जातियाण सव्वेसिं ।
तेनऽग्गपलंबेणं, तु सूइया सेसगपलंबा ।।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

वृ- अथवा "एकग्रहणे तज्जातीयानां सर्वेषां ग्रहणं भवति" इति न्यायो यतः समस्ति तेनाग्रप्रलम्बग्रहणेन तुशब्दाद् मूलप्रलम्बग्रहणेन च शेषाणि-कन्दादीनि प्रलम्बानि सूचितानि ॥

अथ पुनरपि परः प्राह-

[भा.८५६] तलगहणाउ तलस्सा, न कप्पे सेसाण कप्पई नामं ।
एगग्गहणा गहणं, दिट्ठंतो होइ सालीणं ॥

वृ- 'तलग्रहणात्' इति उपलक्षणत्वात् तालप्रलम्बग्रहणात् तालस्यैव सम्बन्धीनि मूल-कन्दादीनि प्रलम्बानि न कल्पन्ते 'शेषाणां पुनः' आम्रादीनां प्रलम्बानि कल्पन्त इत्यर्थादापन्नम्। 'नाम' इति सम्भावनायाम्, सम्भाव्यते अयमर्थ इति भावः । सूरिराह-एकग्रहणात् तज्जातीयानां सर्वेषां ग्रहणं भवति, द्दष्टान्तः शालिसम्बन्धी अत्र भवति । यथा 'निष्पन्नः शालि' इत्युक्ते नैक एव शालिकणो निष्पन्नः प्रतीयते किन्तु शालिजाति, तथाऽत्रापि तलप्रलम्बग्रहणेन न केवलस्यैव तालस्य किन्तु सर्वेषां वृक्षजातीयानां प्रलम्बान्युपात्तानि प्रतिपत्तव्यानि ॥ अथ पुनरपि प्रश्नयति-

[भा.८५७] को नियमो उ तलेणं, गहणं अन्नेसि जेन न कयं तु ।
उभयमवि एइ भोगं, परित्त साउं च तो गहणं ॥

वृ-को नाम नियमस्तलेन येन तस्यैव ग्रहणं कृतं नान्येषां वृक्षाणाम् ? । सूरिराह-तालस्य सम्बन्धि मूला-ऽग्रप्रलम्बरूपमुभयमपि 'भोगम्' उपयोगमेति, तथा 'परीत्तं' प्रत्येकशरीरं 'स्वादु च' मधुरं तद् भवति, अतस्तस्य प्रतिषेधे सुतरामनन्तकायिकादीनां प्रतिषेधः कृतो भवति, ततस्तालस्य ग्रहणं कृतमिति ॥ गतं प्रलम्बपदम् । अथ भिन्नपदं व्याचिख्यासुराह-

[भा.८५८] नामं ठवणा भिन्नं, दव्वे भावे अ होइ नायव्वं ।
दव्वम्मि घड-पडाई, जीवजढं भावतो भिन्नं ॥

वृ-नामभिन्नं स्थापनाभिन्नं द्रव्यभिन्नं भावभिन्नं च भवति बोद्धव्यम् । नाम-स्थापने क्षुन्ने। द्रव्यभिन्नं घट-पटादिकं वस्तु यद् भिन्नं-विदारितम् । भावतो भिन्नं तु यद् जीवेन जढं-परित्यक्तं तद् मन्तव्यम् ॥ अत्र चतुर्भङ्गीमाह-

[भा.८५९] भावेण य दव्वेण य, भिन्ना-ऽभिन्ने चउक्कभयणा उ ।
पढमं दोहि अभिन्नं, बिइयं पुन दव्वतो भिन्नं ॥

वृ- भावेन च द्रव्येण च भिन्ना-ऽभिन्नयोः 'चतुष्कभजना' चतुर्भङ्गीरचना कर्त्तव्या । तत्र 'प्रथमं' प्रथमभङ्गवर्त्ति प्रलम्बं 'द्वाभ्यामपि' भावेन द्रव्ये च अभिन्नम् । द्वितीयं पुनर्द्रव्यतो भिन्नं भावतस्त्वभिन्नम् ॥

[भा.८६०] तइयं भावतो भिन्नं, दोहि वि भिन्नं चउत्थगं होइ ।
एएसिं पच्छित्तं, वोच्छामि अहानुपुव्वीए ॥

वृ- तृतीयं भावतो भिन्नं द्रव्यतः पुनरभिन्नम् । चतुर्थं 'द्वाभ्यामपि' भावतो द्रव्यतश्च भिन्नं भवति। 'एतेषां' चतुर्णामपि प्रायश्चित्तं 'यथाऽऽनुपूर्व्या' यथोक्तपरिपाट्या 'वक्ष्यामि' भणिष्यामि॥ प्रतिज्ञातमेव निर्वाहयति-

[भा.८६१] लहुगा य दोसु दोसु य, लहुओ पढमम्मि दोहि वी गुरुगा ।
तवगुरुअ कालगुरुओ, दोहि वि लहुओ चउत्थो उ ॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

वृ- प्रथम-द्वितीययोर्द्वयोर्भङ्गयोश्चत्वारो लघुकाः, भावतोऽभिन्नतया सचेतनत्वात्। 'द्वयोस्तु' तृतीय-चतुर्थयोर्मासलघु। तथा प्रथमे भङ्गे ये चत्वारो लघुकास्ते द्वाभ्यामपि गुरवः तपसा कालेन च। द्वितीये भङ्गे ये चत्वारो लघवस्ते तपसा गुरवः कालेन लघवः। तृतीयभङ्गे यद् मासलघु तत् कालेन गुरु तपसा लघु। चतुर्थस्तु भङ्गो द्वाभ्यामपि लघुकः तपसा कालेन च। लघुकं तत्र (त्वत्र) मासलघु द्रष्टव्यमित्यर्थः ॥

[भा.८६२] उग्घाइया परित्ते, होंति अनुग्घाइया अनंतम्मि।
आणाऽणवत्थ मिच्छा, विराधना कस्स गीयत्थे ॥

वृ- एतानि प्रायश्चित्तानि 'उद्घातिकानि' लघुकानि 'परीत्ते' प्रत्येकप्रलम्बे भणितानि। 'अनन्ते' अनन्तकाये पुनरेतान्येव 'अनुद्घातिकानि' गुरुकाणि ज्ञातव्यानि, प्रथम-द्वितीययोश्चत्वारो गुरुकाः तृतीय-चतुर्थयोस्तु भङ्गयोर्मासगुरु प्रायश्चित्तं तपःकालविशेषितं पूर्ववद् वक्तव्यमिति भावः। तथा प्रलम्बं गृह्णता तीर्थकृतामाज्ञाभङ्गः कृतो भवति, अनवस्था मिथ्यात्वं विराधना च संयमाऽऽत्मविषया कृता भवति। शिष्यः पृच्छति-कस्यैतत् प्रायश्चित्तमाज्ञादयश्च दोषाः ?। गुरुराह-अगीतार्थस्य भिक्षोरिति। एतच्च सप्रपञ्चमुपरिष्टाद् भावयिष्यते॥ अथ प्रलम्बग्रहणे विस्तरेण प्रायश्चित्तं वर्णयितुकाम इमां द्वारगाथामाह-

[भा.८६३] अन्नत्थ-तत्थगहणे, पडिते अच्चित्तमेव सच्चित्ते।
छुभणाऽऽरुहणा पडणे, उवही तत्तो य उड्डाहो ॥

वृ- प्रलम्बग्रहणं द्विधा-अन्यत्रग्रहणं तत्रग्रहणं च। वृक्षादन्यत्र-अन्यस्मिन् प्रदेशे ग्रहणम् अन्यत्रग्रहणम्, तत्रैव-वृक्षप्रदेशे ग्रहणं तत्रग्रहणम्। तथा पतितं वृक्षस्याधस्ताद् यद् गृह्णाति तद् द्विधा-अचित्तं सचित्तं च। तस्य पतितस्याप्राप्तौ वृक्षोपरिस्थितप्रलम्बपातनाय "छुभण" त्ति काष्ठादेः प्रक्षेपणम्। तथाऽप्यप्राप्तौ "आरुहण" त्ति तस्मिन् वृक्षे आरोहणं करोति। आरूढस्य च कदाचित् पतनं भवेत्। प्रलम्बं गृह्णन्तं दृष्ट्वा च प्रान्तेन केनचिदुपधिरपह्रियेत। ततश्चोड्डाहः सञ्जायेतेति द्वारगाथासमासार्थः ॥ विस्तरार्थं प्रतिद्वारं बिभणिषुः प्रथमतोऽन्यत्रग्रहणं विवृणोति-

[भा.८६४] अन्नगहणं तु दुविहं, वसमाणेऽडवि वसंति अंतो बहिं।
अंताऽऽवण तव्वज्जे, रच्छा गिह अंतो पासे वा ॥

वृ- अन्यत्रग्रहणं द्विविधम्, तद्यथा-वसति अटव्यां च। तत्र यद् वसति प्रदेशे तद् द्विधा-ग्रामादीनामन्तो बहिश्च। यद् ग्रामादीनामन्तस्तत् पुनर्द्विविधम्-आपणे तद्वर्जे च। आपणःहट्टः, तत्र स्थितस्य प्रलम्बस्य यद् ग्रहणं तद् आपणविषयम्। यत् पुनरापणवर्जे गृहे वा रथ्यायां वा गृह्णाति तत् तद्वर्जविषयम्। तत्र यद् आपणविषयं तद् आपणस्यान्तर्वा भवेत् पार्श्वतो वा। यत् तद्वर्जविषयं तदपि रथ्याया गृहस्य वा अन्तर्वा भवेत् पार्श्वतो वेति। एतच्च सर्वमपि द्विधा-अपरिग्रहं सपरिग्रहं च। तत्रापणे तद्वर्जे वा अपरिग्रहे गृह्णानस्य द्रव्य-क्षेत्र-काल-भावभेदात् चतुर्विधं प्रायश्चित्तम् ॥ तत्र द्रव्यतस्तावदाह-

[भा.८६५] कब्बट्ठदिट्ठे लहुओ, अट्ठुप्पत्तीय लहुग ते चेव।
परिवड्ढमाणदोसे, दिट्ठाई अन्नगहणम्मि ॥

वृ- कल्पस्थः समयपरिभाषया बालक उच्यते, तेन प्रलम्बमचित्तं गृह्णानो यदि दृष्टस्तदा

Jain Education International For Private & Personal Use Only www.jainelibrary.org

मासलघु। अथ संयतं प्रलम्बं गृह्णन्तं दृष्ट्वा कल्पस्कस्यार्थ-प्रयोजनं तस्योत्पत्ति-'अहमपि गृह्णामि' इत्येवंलक्षणा भवति ततश्चतुर्लघवः । अथ न कगल्पस्थेन किन्तु महता पुरुषेण प्रलम्बं गृह्णानो दृष्टस्तदा ''ते चेव'' त् त एव चत्वारो लघवः । अथ तस्याप्यर्थोत्पत्ति-'अहमपि गृह्णामि' इति लक्षणा जायते ततोऽपि चत्वारो लघवः । अत्र च ये दृष्टादयः परिवर्द्धमाना दोषा अन्यत्रग्रहणे भवन्तिताननन्तरगाथया वक्ष्यमाणान् शृणुत ।। तानेवाह-

[भा.८६६] दिट्ठे संका भोइय-निआ-ऽऽरक्खि-सेट्ठि-राईणं ।
चत्तारि छच्च लहु गुरु, छेदो मूलं तह दुगं च ।।

वृ- युवादिना महता पुरुषेण प्रलम्बानि गृह्णन् दृष्टः चतुर्लघु । ततस्तस्य शङ्का जायते 'किं सुवर्णादिकं गृहीतम् ? उत प्रलम्बम् ?' तदाऽपि चतुर्लघु । निशङ्किते चत्वारो गुरवः । अथासौ ''भोइय'' त्ति भोजयति भर्त्तारमिति भोजिका-भार्या तस्याः कथयति-'प्रिये ! मया संयतः फलानि गृह्णानो दृष्टः' इत्युक्ते यदि तथा प्रतिहतः ''मैवं वादीः, न सम्भवत्येवेदृशं महात्मनि साधौ' इति ततश्चतुर्गुरुकमेव । अथ तया न प्रतिहस्तस्ततः षड् लघवः । आसन्नतरः सम्बन्ध इति कृत्वा प्रथमं भोजिकाया अग्रे कथयतीति, एवं मित्रादिष्वपि मन्तव्यम् । ततः ''घाडि''त्ति घाटः सङ्घाटः सौहृदमित्येकोऽर्थ, स विद्यतेऽस्येति 'घाटी' सहजातकादि वयस्य इत्यर्थः, तस्याग्रे तथैव कथयति, तेनापि यदि प्रतिहतस्तदा षड् लघव एव । अथ न प्रतिहतस्ततः षड् गुरवः । ततो निजाः-माता-पित्रादयस्तेषां कथयति, तैः प्रतिहतः षड् गुरव एव । अप्रतिहते पुनश्छेदः । तत आरक्षिकेण आरक्षिकपुरुषैर्वा तस्य सकाशादन्यतो वा प्रलम्बग्रहणवृत्तान्ते श्रुते ततः प्रतिहते छेद एव । अप्रतिहते पुनर्मूलम् । ततः श्रेष्ठिनः श्रीदेवताध्यासितसौवर्णपट्टविभूषितोत्तमाङ्गस्य ततोऽन्यतो वा वृत्तान्तश्रवणे तेन च प्रतिहतेऽनवस्थाप्यम् । अप्रतिहते पाराञ्चिकम् । पश्चार्द्धे यथाक्रममषीमेव प्रायश्चित्तान्यभिहितानि, तानि च भावितान्येव । नवरं ''दुगं'' ति अनवस्थाप्यपाराञ्चिकद्वयम्।।

[भा.८६७] एवं ता अदुगुंछिए, दुगुंछिए लसुणमाइ एमेव ।
नवरिं पुण चउलहुगा, परिग्गहे गिण्हणादीया ।।

वृ- एवं तावद् 'अजुगुप्सिते' आम्रादौ प्रलम्बे गृह्यमाणे प्रायश्चित्तं द्रष्टव्यम् । जुगुप्सिते पुनरिदं नानात्वम् । जुगुप्सितं द्विधा-जातिजुगुप्सितं स्थानजुगुप्सितं च । तत्र जातिजुगुप्सितं लशुनादि, आदिग्रहणेन पलाण्डुप्रभृतिपरिग्रहः । स्थानजुगुप्सितं पुनरशुचिस्थाने कर्दमादौ पतितम्। द्विविधेऽपि जुगुप्सिते 'एवमेव' अजुगुप्सितवत् प्रायश्चित्तं वक्तव्यम् । 'नवरं' केवलं पुनः कल्पस्थकदृष्टं जुगुप्सितं गृह्णानस्य चतुर्लघवोऽत्र ज्ञातव्याः । अजुगुप्सिते पुनः ''कप्पट्ठदिट्ठे लहुओ'' त्ति लघुमास एवोक्त इति विशेषः । एतच्च सर्वमप्यपरिग्रहमधिकृत्योक्तम् । ''परिग्गहे गिण्हणादीय'' त्ति यत् पुनः प्रलम्बं कस्यापि परिग्रहे वर्त्तते तस्मिन् जुगुप्सिते वा अजुगुप्सिते वा प्रायश्चित्तं तथैव वक्तव्यम्, परं यस्य श्रेष्ठयादेः परिग्रहे तानि प्रलम्बानि वर्त्तन्ते तत्कृता ग्रहणा-ऽऽकर्षण-व्यवहारादयो दोषा अत्राधिका भवन्तीति ।।

गतं द्रव्यतः प्रायश्चित्तम् । अथ क्षेत्रतः कालतश्च प्ररूपयति-

[भा.८६८] खेत्ते निवेसणाई, जा सीमा लहुगमाइ जा चरिमं ।
केसिंची विवरीयं, काले दिन अट्ठमे सपदं ।।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

वृ- क्षेत्रतो निवेशनमादौ कृत्वा यावद् ग्रामस्य सीमा एतेषु स्थानेषु गृह्णानस्य लघुकादिकं यावत् 'चरिमं' पाराञ्चिकम् । किमुक्तं भवति ?-निवेशने-महागृहपरिवारभूतगृहसमुदायरूपे गृह्णाति चत्वारो लघवः, पाटके गृह्णाति चत्वारो गुरवः, साहिकायां-गृहपङ्क्तिरूपायां गृह्णाति षड् लघवः, एवं ग्राममध्ये षड् गुरवः, ग्रामद्वारे च्छेदः, ग्रामस्य बहिर्मूलम्, उद्यानेऽनवस्थाप्यम्, ग्रामसीमायां पाराञ्चिकम् । केषाञ्चिदाचार्याणां मतेन 'विपरीतम्' उक्तविपर्यस्तं प्रायश्चित्तम् । तद्यथा-सीमायामन्यग्रामे वा गृह्णाति चतुर्लघु, उद्याने च चतुर्गुरु, ग्रामबहिः षड्लघु, ग्रामद्वारे षडगुरु, ग्राममध्ये च्छेदः, प्रायश्चित्तमष्टमे दिने 'स्वपदं' पाराञ्चिकम् । इयमत्र भावना-प्रलम्बानि गृह्णतः प्रथमे दिवसे चत्वारो लघवः, द्वितीये चत्वारो गुरवः, तृतीये षड् लघवः, चतुर्थे षड्गुरवः, पञ्चमे च्छेदः, षष्ठे मूलम्, द्वितीये चत्वारो गुरवः, तृतीये षड् लघवः, चतुर्थे षडगुरवः, पञ्चमे च्छेदः, षष्ठे मूलम्, सप्तमेऽनवस्थाप्यम्, अष्टमे पाराञ्चिकम् ॥

अथ प्रकारान्तरेण क्षेत्रत एव प्रायश्चित्तमाह-

[भा.८६९] निवेसण वाडग साही, गाममज्झे अ गामदारे अ ।
उज्जाणे सीमाए, अन्नग्गामे य खेत्तम्मि ॥

वृ- क्षेत्रे प्रकारान्तरेण प्रायश्चित्तमिदम्-निवेशने चतुर्लघु, पाटके चतुर्गुरु, साहिकायां षडलघु, ग्राममध्ये षड्गुरु, ग्रामद्वारे च्छेदः, उद्याने मूलम्, सीमायामनवस्थाप्यम्, अन्यग्रामे पाराञ्चिकम् ।। अथ भावतः प्रायश्चित्तमाह-

[भा.८७०] भावऽड्डवार सपदं, लहुगाई मीस दसहि चरिमं तु ।
एमेव य बहिया वी, सत्थे जत्ताइठाणेसु ॥

वृ- भावे अष्टाभिवरैः 'स्वपदं' पाराञ्चिकम् । किमुक्तं भवति ?-एकं वारं प्रलम्बानि गृह्णाति चत्वारो लघवः, द्वितीयं वारं चत्वारो गुरवः, तृतीयं वारं षड् लघवः, चतुर्थं वारं षड् गुरवः, पञ्चमं वारं छेदः, षष्ठं वारं मूलम्, सप्तमं वारमनवस्थाप्यम्, अष्टमं वारं गृह्णतः पाराञ्चिकम्। एतच्च सर्वमपि सचित्तप्रलम्बविषयं भणितम् । मिश्रप्रलम्बे तु गृह्यमाणे लघुमासादिकं दशभिः स्थानैः 'चरमं' पाराञ्चिकम् । तद्यथा-मिश्रप्रलम्बं गृह्णाने कल्पस्थकेन दृष्टे मासलघु, महता पुरुषेण दृष्टे शङ्कायां मासलघु, निशङ्के मासगुरुं, भोजिकायाः कथने चतुर्लघु, घाटिनो निवेदने चतुर्गुरु, ज्ञातीनां ज्ञापने षड्लघु, आरक्षिकाणां निवेदने षड्गुरु,सार्थवाहज्ञाते च्छेदः, श्रेष्ठिकथने मूलम्, अमात्यनिवेदिते अनवस्थाप्यम्, राज्ञो ज्ञापिते पाराञ्चिकम् । एतद् द्रव्यतः प्रायश्चित्तम्, क्षेत्रतः पुनरिदम्-निवेशने मासलघु, पाटके मासगुरु, साहिकायां चतुर्लघु, ग्राममध्ये चतुर्गुरु, ग्रामद्वारे षड्लघु, ग्रामबहि षड्गुरु, उद्याने च्छेदः, उद्यानसीम्नोरन्तरे मूलम्, सीमायामनवस्थाप्यम्, सीमायाः परतोऽन्यग्रामादौ पाराञ्चिकम् । कालतः पुनः प्रथमे दिवसे मासलघु, द्वितीये मासगुरु, एवं यावद् दशभिर्दिवसैः पाराञ्चिकम् । भावतः प्रथमं वारं गृह्णतो मासलघु, द्वितीयं मासगुरु, एवं यावद् दशभिवरैः पाराञ्चिकम् । गतमापण-तद्वर्जभेदाद् द्विविधमपि ग्रामान्तर्विषयं ग्रहणम् । अथ ग्रामबहिर्भावग्रहणमाह-"एमेव य" इत्यादि पश्चार्द्धम् । एवमेव बहिरपि ग्रामस्य ग्रहणं भणितव्यम् । तत् पुनर्बहिर्ग्रहणं "सत्थे" त्ति सार्थावासस्थाने वा भवेद् यात्रादिस्थाने वा । यात्रास्थानं यत्र लोक उद्यानिकादियात्रया गच्छति, आदिशब्दादन्यस्याप्येवंविधस्थानस्यपरिग्रहः ॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

अथ बहिर्ग्रहणे प्रायश्चित्तमतिदिशन्नाह-

[भा.८७१] अंतो आवणमाईगहणे जा वन्निया सवित्थारा।
बहिया उ अन्नगहणे, पडियम्मि उ होइ स चेव ॥

वृ- ग्रामादीनाम् 'अन्तः' मध्ये आपणादौ-आपणे आपणवर्जे वा जुगुप्सितेऽगुप्सिते वा सपरिग्रहेऽपरिग्रहे वा ग्रहणे वा सविस्तरा "दिट्ठे संका भोइय" इत्यादिलक्षणप्रपञ्चसहिता वर्णिता शोधिरित्युपस्कारः सैव ग्रामादीनां बहि पतितप्रलम्बविषयेऽन्यत्रग्रहणे निरवशेषा द्रष्टव्या ॥ उक्तं बहिर्ग्रहणम्, तद्भणे च समर्थितं वसत्प्रदेशविषयं ग्रहणम्। अथाटवीविषयमाह-

[भा.८७२] कोट्टगमाई रन्ने, एमेव जणो उ जत्थ पुंजेइ।
तहियं पुण वच्चंते, चउपयभयणा उ छद्दसिया ॥

वृ- 'जनः' लोकः प्रचुरफलायामटव्यां गत्वा फलानि यावत्पर्याप्तं गृहीत्वा यत्र गत्वा शोषयति, पश्चाद् गन्त्री-पोट्टलकादिभिरानीय नगरादौ विक्रीणाति तत् कोट्टकमुच्यते। ततश्चारण्ये कोट्टकादौ प्रदेशे यत्र जनः फलानि शोषणार्थं 'पुञ्जयति' पुञ्जीकरोति तत्र प्रलम्बग्रहणे 'एवमेव' यथा वसिमे "दिट्ठे संका भोइय" इत्यादिकमुक्तं तथैव प्रायश्चित्तमवसातव्यम्। विशेषः पुनरयम्- "तहियं पुण" इत्यादि। 'तत्र पुनः' कोट्टकादौ व्रजतः चतुर्भि पदैः 'भजना' भङ्गकरचना 'षड्दशिका' षोडशभङ्गप्रमाणा कर्त्तव्या ॥ कथम्? इति चेद् उच्यते-

[भा.८७३] वच्चंतस्स य दोसा, दिया य रातो य पंथ उप्पंथे।
उवउत्त अणुवउत्ते, सालंब तहा निरालंबे ॥

वृ- तत्र व्रजतो बहवो दोषा भवन्ति, ते चोपरिष्टाद् भणिष्यन्ते। दिवा च रात्रिश्च पन्था उत्पथश्च उपयुक्त अनुपयुक्तः सालम्बस्तथा निरालम्बश्चेति अक्षरयोजना। अथ भावार्थ उच्यते- दिवा गच्छति पथा उपयुक्तः सालम्बः १ दिवा गच्छति पथा उपयुक्तो निरालम्बः ४, एवमुत्पथपदेनापि चत्वारो भङ्गाः प्राप्यन्ते, जाता अष्टौ भङ्गाः ८, एते दिवापदममुञ्चता लब्धाः, एवं रात्रिपदममुञ्चताऽप्यष्टौ भङ्गा लभ्यन्ते, सर्वसङ्ख्यया षोडश भङ्गाः ॥ अमीषां रचनोपायमाह-

[भा.८७४] अट्ठग चउक्क दुग एक्कगं च लहुगा य होंति गुरुगा य।
सुद्धा एगंतरिया, पढमरहिय सेसगा तिन्नि ॥

वृ- इहाक्षाणां चतस्रः पङ्क्तयः स्थाप्यन्ते। तत्र प्रथमपङ्क्तौ प्रथममष्टौ लघुकास्ततोऽप्यष्टौ गुरुका इत्येवं षोडशाक्षा निक्षेपणीयाः, द्वितीयपङ्क्तौ चत्वारः प्रथमं लघुकास्ततश्चत्वारो गुरुकाः पुनश्चत्वारो लघुकास्तदनु चत्वारो गुरुकाः, तृतीयपङ्क्तावपि षोडशाक्षा द्वौ लघुकौ द्वौ गुरुकावित्यनेन क्रमेण निक्षेप्याः, चतुर्थपङ्क्तावेको लघुक एको गुरुक इत्येकान्तरितलघु-गुरुरूपाः षोडशैवाक्षाः स्थापयितव्याः। एवमन्यत्रापि भङ्गकप्रस्तारे यत्र यावन्तो भङ्गकास्तत्र तावदायामः चरमपङ्क्तावेकान्तरितानाम् अर्वाक्तनपङ्क्तिषु पुनर्द्विगुणद्विगुणानां लघु-गुरूणामक्षाणां निक्षेपः कर्त्तव्यः। उक्तञ्च-

भंगपमाणायामो, लहुओ गुरुओ य अक्खनिक्खेवो।
आरओ दुगुणा दुगुणो, पत्थारे होइ निक्खेवो ॥

एतेष्वेव शुद्धा-ऽशुद्धस्वरूपं दर्शयति-"सुद्धा एगंतरिया" इत्यादि। प्रथमे भङ्गकाष्टके

Jain Education International For Private & Personal Use Only www.jainelibrary.org

प्रथमभङ्गरहिताः शेषास्त्रयो भङ्गका एकान्तरिताः शुद्धाः । इदमुक्तं भवति-प्रथमो भङ्गकश्चतुर्ष्वपि पदेषु निरवद्यत्वादेकान्तेन शुद्ध इति न काचित् तदीया विचारणा, तं मुक्त्वा ये प्रथमाष्टके शेषा भङ्गकास्ते एकान्तरितास्तृतीय-पञ्चम-सप्तमरूपास्त्रयः क्वचिदुत्पथादौ पदेऽशुद्धा अपि सालम्बनत्वाच्छुद्धाः प्रतिपत्तव्याः । अर्थादापन्नं द्वितीय-चतुर्थ-षष्ठा-ऽष्टमा भङ्गका दिवादौ पदे शुद्धा अपि निरालम्बनत्वादशुद्धाः । एवं द्वितीयाष्टकेऽपि प्रथमो भङ्गः शुद्धः शेषास्त्रयः एकान्तरिताः शुद्धाः, सालम्बनत्वात् ।। अत एवाह-

[भा.८७५] पढमो एत्थ उ सुद्धो, चरिमो पुण सव्वहा असुद्धो उ ।
अवसेसा वि य चउदस, भंगा भइयव्वगा होंति ।।

वृ- प्रथमो भङ्गः 'अत्र' एषां षोडशानां मध्ये 'शुद्धः' सर्वथा निर्दोषः, चरमश्च भङ्गः सर्वथा अशुद्धः, अवशेषाश्चतुर्दश भङ्गाः 'भक्तव्याः' विकल्पयितव्या भवन्ति, केचित् शुद्धाः केचित् पुनरशुद्धा इति भावः ।। कथम् ? इति चेद् उच्यते-

[भा.८७६] आगाढम्मि उ कज्जे, सेस असुद्धो वि सुज्झए भंगो ।
न विसुज्झे अनागाढे, सेसपदेहिं जइ वि सुद्धो ।।

वृ- 'आगाढे कार्ये' पुष्टे आलम्बने गच्छतः 'शेषैः' रात्र्युत्पथानुपयुक्तलक्षणैः पदैरशुद्धोऽपि भङ्गः शुध्यति । 'अनागाढे' आलम्बनाभावे शेषैः-दिवापथोपयुक्तलक्षणैः पदैर्यद्यपि शुद्धस्तथापि न विशुध्यति ।। अथ किं कुत्र प्रायश्चित्तं भवति ? इत्युच्यते-

[भा.८७७] लहुगा य निरालंबे, दिवसतो रत्तिं हवंति चउगुरुगा ।
लहुगो य उप्पहेणं, रीयादी चेवऽनुवउत्ते ।।

वृ- यत्र यत्र निरालम्बस्तत्र तत्र दिवसतो गच्छतः चत्वारो लघुकाः, रात्रौ चत्वारो गुरुकाः । यत्र यत्र दिवसत उत्पथेन तत्र तत्र मासलघु । यत्र यत्र दिवसत ईर्याप्रभृतिसमितिष्वनपयुक्तो गच्छति तत्र तत्र मासलघु । रात्रावुत्पथगमेऽनुपयुक्तगमने च मासगुरु ।।

अथ प्रकारान्तरेण प्रायश्चित्तमाह-

[भा.८७८] दिय-राओ लहु-गुरुगा, आणा चउ गुरुग लहुग लहुगा य ।
संजम-आयविराधन, संजमे आरोवणा इणमो ।।

वृ- अशुद्धेषु भङ्गेषु सर्वेषवपि दिवसतो गच्छतश्चत्वारो लघुकाः, रात्रौ पुनश्चत्वारो गुरुकाः । तीर्थकराणामाज्ञाभङ्गे चतुर्गुरुकाः । अनवस्थायां चत्वारो लघुकाः । मिथ्यात्वेऽपि चत्वारो लघुकाः । अत्र चानवस्था-मिथ्यात्वे प्रक्रमाद् द्रष्टव्ये । विराधना द्विविधा-संयमे आत्मनि च । तत्र संयमविराधनायाम् 'इयं' वक्ष्यमाणा 'आरोपणा' प्रायश्चित्तम् ।। तामेवाह-

[भा.८७९] छकाय चउसु लहुगा, परित्त लहुगा य गुरुग साहारे ।
संघट्टण परितावण, लहु गुरुगऽतिवायणे मूलं ।।

वृ- 'षट्कायाः' पृथिव्यप्तेजोवायुवनस्पतित्रसरूपाः । तेषां मध्ये 'चतुर्षु' पृथिव्यप्तेजोवायुषु सङ्घट्टनादौ लघुकपर्यन्तं प्रायश्चित्तम् । 'परीत्ते' प्रत्येकवनस्पतिकायेऽपि लघुकान्तम् । 'साधारणे' अनन्तवनस्पतौ गुरुकान्तम् । तथा द्वीन्द्रियादीनां सङ्घट्टने परितापने च यथायोगं लघुका गुरुकाश्च प्रायश्चित्तम्, 'अतिपातने' विनाशने मूलम् । इयमत्र भावना-पृथिवीकायं सङ्घट्टयति मासलघु,

Jain Education International For Private & Personal Use Only www.jainelibrary.org

परितापयति मासगुरु, अपद्रावयति चुतर्लघु; एवमप्काये तेजःकाये वायुकाये प्रत्येकवनस्पतिकाये च द्रष्टव्यम्; अनन्तवनस्पतिं यदि सङ्घट्टयति तदा मासगुरु, परितापयति चतुर्लघु अपद्रावयति चतुर्गुरु; द्वीन्द्रियं सङ्घट्टयति चतुर्लघु, परितापयति चतुर्गुरु, जीविताद् व्यपरोपयति षड्लघु; त्रीन्द्रियं सङ्घट्टयतश्चतुर्गुरु, परितापयतः षड्लघु, जीविताद् व्यपरोपयतः षड्गुरु; चतुरिन्द्रियं सङ्घट्टयतः षड्लघु, परितापयतः षड्गुरु, जीविताद् व्यपरोपयतः छेदः; पञ्चेन्द्रियं सङ्घट्टयतः षड्गुरु, परितापयतो लघुमासिकच्छेदः, अपद्रावयतो मूलम् ॥

अथैतदेव प्रायश्चित्तं रात्रौ विशेषयन्नाह-

[भा.८८०]जहिं लहुगा तहिं गुरुगा, जहि गुरुगा कालगुरुग तहि ठाणे ।
छेदो य लहुय गुरुओ, काएसाऽऽरोवणा रत्तिं ॥

वृ- यत्र दिवसतः 'लघुकानि' मासलघु-चतुर्लघु-षड्लघुरूपाणि तत् रात्रावेतान्येव 'गुरुकाणि' मासगुरु-चतुर्गुरु-षड्गुरुरूपाणि कर्त्तव्यानि । यत्र पुनरग्रेऽपि गुरुकाणि मासादीनि तत्र स्थाने तान्येव कालगुरुकाणि दातव्यानि । यत्र च च्छेदो लघुकस्तत्र स एव गुरुकः कर्त्तव्यः। 'काये' कायविषया एषा आरोपणा रात्रौ ज्ञातव्या ॥ अथाऽऽत्मविराधनामाह-

[भा.८८१]कंट-ऽट्ठि खाणु विज्ञल, विसम दरी निन्न मुच्छ-सूल-विसे ।
वाल-ऽच्छभल्ल-कोले, सीह-विग-वराह-मेच्छित्थी ॥

वृ- स साधुः कोट्टकादौ व्रजन् कण्टकेन वा अस्था वा स्थाणुना वा पदयोः परिताप्येत । 'विज्ञलं' पङ्किलम् 'विषमं' निम्नोन्नतम् 'दरी' कुसारादिका 'निम्नं' गम्भीरा गर्त्ता; एतेषु पतितस्य मूर्च्छा वा भवेत्, शूलं वा अनुधावेत्, "विसं"ति विषकण्टकेन वा विध्येत, विषफलं वा भक्षयेत्, तथा व्यालेन-सर्पादिना अच्छभल्लेन वा-ऋक्षेण कालेन वा-महाशूकरेण सिंहेन वा वृकेण वा वाहेण वा उपद्रूयेत, म्लेच्छः पुरुष- प्रान्ततया प्रहारादिकं दद्यात्, स्त्री वा तं साधुमुपसर्गयेत्, अथवा म्लेच्छस्त्री-पुलिन्दीप्रभृतिका तमुपसर्गयेत्, तन्निमित्तं म्लेच्छः कुपितो वध-बन्धादि कुर्यात्॥

[भा.८८२] तेने देव-मनुस्से, पडिनीए एवमाइ आयाए ।
मास चउ छच्च लहु गुरु, छेदो मूलं तह दुगं च ॥

वृ-स्तेनो द्विविधः-शरीरस्तेन उपधिस्तेनश्च, तेनोपद्रवः क्रियेत, देवता वा प्रान्ता तं साधुं प्रमत्तं दृष्ट्वा च्छलयेत्, अपरो वा कोऽपि प्रत्यनीको मनुष्यो विजनमरण्यं मत्वा मारणादि कुर्यात्, एवमादिका आत्मनि विराधना भवति । तत्रेदं प्रायश्चित्तम्-"मास चउ" इत्यादि पश्चार्द्धम् । कण्टकादिभिरनागाढं परिताप्यते चतुर्लघु, आगाढं परिताप्यते चतुर्गुरु, अथ महादुःखमुत्पद्यते ततः षड्लघु, मूर्च्छामूर्च्छे षड्गुरु, कृच्छ्रप्राणे च्छेदः, कृच्छ्रोच्छ्वासे मूलम्, मारणान्तिकसमुद्घातेऽनवस्थाप्यम्, कालगते पाराञ्चिकम् ॥ अथाऽऽत्मविराधनायामेव सामान्यतः प्रायश्चित्तमाह-

[भा.८८३] कंट-ऽट्ठिमाइएहिं, दिवसतो सव्वत्थ चउगुरू होंति ।
रत्तिं पुण कालगुरू, जत्थव अन्नत्थ आयवहो ॥

वृ-कण्टका-ऽस्थिकादिभिः परितापनायां सर्वत्र दिवसतश्चतुर्गुरवो भवन्ति । रात्रौ पुनस्त एव चतुर्गुरवः कालगुरवो ज्ञातव्याः । अन्यत्रापि यत्र 'आत्मवधः' आत्मविराधना भवति तत्र सर्वत्रापि चतुर्गुरवः प्रायश्चित्तम् ॥ तथा-

Jain Education International For Private & Personal Use Only www.jainelibrary.org

[भा.८८४] पोरिसिनासण परिताव ठावणं तेण देह उवहिगतं।
पंतादेवयछलणं, मणुस्सपडिणीयवहणं च ॥

वृ- कण्टकादिना पीडितः सन् सूत्रपौरुषीं न करोति मासलघु, अर्थपौरुषीं न करोति मासगुरु, सूत्रं नाशयति चतुर्लघु, अर्थं नाशयति चतुर्गुरु। ''परिताव''त्ति अनागाढपरितापे चतुर्लघु, आगाढपरितापे चतुर्गुरु। ''ठावण''त्ति अनाहारं स्थापयति चतुर्लघु, आहारं स्थापयति चतुर्गुरु, परीत्तं स्थापयति चतुर्लघु, अनन्तं स्थापयति चतुर्गुरु, अस्नेहं स्थापयति चतुर्लघु, सस्नेहं स्थापयति चतुर्गुरु। तथा ''तेण'' त्ति उपधिस्तेनाः, तैः उपधौ ह्रियमाणे उपधिगतं जघन्यमध्यमोत्कृष्टोपधिनिष्पन्नं प्रायश्चित्तम्। ''देह''त्ति देहस्तेनाः-शरीरापहारिणस्तैरेकः साधुः ह्रियते मूलम्, द्वयोर्ह्रियमाणयोरनवस्थाप्यम्, त्रिषु ह्रियमाणेषु पाराञ्चिकम्। प्रान्तया देवतया यदि च्छलनं क्रियते ततश्चतुर्गुरु। प्रत्यनीकमनुष्येण पुरुषेण स्त्रिया नपुंसकेन वा हन्येत चत्वारो गुरवः॥ अथ प्रकृतमर्थमुपसंहरन्नर्थान्तरमुपन्यस्यन्नाह-

[भा.८८५] एवं ता असहा, सहायसहिए इमे भवे भेदा।
जय अजय इत्थि पंडे, अस्संजइ संजईहिं च॥

वृ-एवं तावत् 'असहायस्य' एकाकिनो व्रजतो दोषा उक्ताः। सहायसहिते व्रजति विचार्यमाणे एते सहायस्य भेदा भवन्ति। तद्यथा-'यताः' संयताः 'अयताः' असंयताः ''इत्थि''त्ति पाषण्डिस्त्रियः 'पण्डकाः' नपुंसकाः 'असंयत्यः' गृहस्थस्त्रियः 'संयत्यः' साध्व्यः, एतैः सार्द्धं गच्छति॥ इदमेव व्याचष्टे-

[भा.८८६] संविग्गाऽसंविग्गा, गीया ते चेव होंति अग्गीया।
लहुगा दोहि विसिट्ठा, तेहि समं रत्ति गुरुगा उ॥

वृ-संविग्ना गीतार्थाः, असंविग्ना गीतार्थाः, संविग्ना अगीतार्थाः, असंविग्ना अगीतार्थाः, एतैः समं गच्छतः 'द्वाभ्यां' तपः-कालाभ्यां विशिष्टा लघुकाः प्रायश्चित्तम्। तद्यथा-संविग्नैर्गीतार्थै समं व्रजति चत्वारो लघवस्तपसा कालेन च लघुकाः, असंविग्नैर्गीतार्थै समं गच्छति चतुर्लघवः तपसा लघुकाः कालेन गुरुकाः, संविग्नैरगीतार्थै सार्द्धं याति चतुर्लघु कालेन लघु तपसा गुरु, असंविग्नैरगीतार्थै समं व्रजति चतुर्लघु तपसा कालेन च गुरु। एतद् दिवसतो ज्ञातव्यम्। रात्रौ तैःसमं व्रजतः एवमेव तपः-कालविशेषिताश्चतुर्गुरुकाः॥

[भा.८८७] अस्संजय-लिंगीहिं उ, पुरिसागिइपंडएहि य दिवा उ।
अस्सोय सोय छल्लहु, ते चेव उ रत्ति गुरुगा उ॥

वृ-असंयता द्विविधाः-गृहिणो लिङ्गिनश्च। लिङ्गमेषां विद्यत इति लिङ्गिनः-अन्यपाषण्डिन इत्यर्थः। तथा पुरुषाकृतयः-पुरुषनेपथ्यधारिणः पण्डकाः। एते त्रयोऽपि प्रत्येकं द्विविधाः-शौचवादिनोऽशौचवादिनश्च। तत्राशौचवादिभिर्गृहिभिः समं व्रजति षड्लघु उभयलघुकम्, शौचवादिभिः समं व्रजति षड्लघु कालगुरुकम्। अन्यलिङ्गिभिरशौचवादिभि सार्द्धं व्रजति षड्लघु कालगुरुकम्, शौचवादिभिः समं व्रजति षड्लघु तपोगुरुकम्। पुरुषाकृतिभिः पण्डकैरशौचवादिभिः समं व्रजति षड्लघु तपोगुरुकम्, शौचवादिभिः समं व्रजति षड्लघु तपसा कालेन च गुरुकम्। एतद् दिवसतः प्रायश्चित्तमुक्तम्। रात्रौ तु 'त एव' षण्मासाः गुरुकाः, षड् गुरवस्तपःकालविशेषिता

Jain Education International	For Private & Personal Use Only	www.jainelibrary.org

एवमेव दातव्या इति भावः ॥

[भा.८८८] पासंडिणित्थि पंडे, इत्थीवेसेसु दिवसतो छेदो।
तेहिं चिय निसि मूलं, दिय-रत्ति दुगं तु समणीहिं ॥

वृ-तापसी-परिव्राजिकादिभिः पाषण्डिनीभिः "इत्थि" त्ति गृहस्थस्त्रीभिः स्त्रीवेषधारिभिश्च पण्डकैरशौचवादिभिः सह दिवसतो गच्छतो लघुकश्छेदः शौचवादिभि सह गुरुकश्छेदः । तैरेव सह 'निशि' रात्रौ गच्छतो गच्छतो लघुकश्छेदः शौचवादिभि सह गुरुकश्छेदः । तैरेव सह 'निशि' रात्रौ गच्छतो मूलम् । श्रमणीभिः समं दिवा गच्छतोऽनवस्थाप्यम् । रात्रौ श्रमणीभिः सह गच्छति पाराञ्चिकम् ॥ प्रकारान्तरेणात्रैव प्रायश्चित्तमाह-

[भा.८८९] अहवा समणा-ऽसंजय-अस्संजइ-संजईहि दियराओ।
चत्तारि छच्च लहु गुरु, छेओ मूलं तह दगं च ॥

वृ- 'अथवा' इति प्रकारान्तरद्योतने । 'श्रमणाः' संयतास्तैः सार्द्धं दिवा गच्छति चतुर्लघु, रात्रौ गच्छति चतुर्गुरु । असंयतैः । सार्द्धं दिवा गच्छति षड्लघु, रात्रौ गच्छति षड्गुरु । असंयतीभिः समं दिवा व्रजति च्छेदः, रात्रौ गच्छति मूलम् । संयतीभि सह दिवसतो गच्छति अनवस्थाप्यम्, रात्रौ गच्छति पाराञ्चिकम् ॥ तदेवमुक्तमटवीविषयं ग्रहणम् । तदुक्तौ चावसितमन्यत्रग्रहणम् । अथ तत्रग्रहणं बिभावयिषुरुक्तार्थसदृशं विधिमतिदिशन्नाह-

[भा.८९०] जह चेव अन्नगहणेऽरन्नो गमणाइ वन्नियं एयं ।
तत्थगहणे वि एवं, पडियं जं होइ अचित्तं ॥

वृ- यथैवान्यत्रग्रहणेऽरण्यविषयं षोडशभङ्गरचनया गमनम् आदिशब्दात् संयमा-ऽऽत्मविराधनासमुत्थं दोषजालं प्रायश्चित्तं च 'एतद्' अनन्तरमेव वर्णितं 'तत्रग्रहणेऽपि' विवक्षितप्रलम्बाधारभूतवृक्षस्याधः पतितं यदचित्तं प्रलम्बं तद् गृह्णानस्याप्येवमेव निरवशेषं वर्णनीयं यावत् श्रमणीभिः सह गमनमिति ॥ यस्तु विशेषस्तमुपदिदर्शयिषुराह-

[भा.८९१] तत्थग्गहणं दुविहं, परिग्गहमपरिग्गहं दुविहभेयं ।
दिट्ठादपरिग्गहिए, परिगहिए अनुग्गहं कोइ ॥

वृ-तत्रग्रहणं द्विविधम्, तद्यथा-सपरिग्रहमपरिग्रहं च । यद् देवतादिभि परिगृहीतं वृक्षादि तद्विषयं सपरिग्रहम्, तद्विपरीतमपरिग्रहम् । तदुभयमपि 'द्विविधभेदं' द्विविधेन-सचित्ता-ऽचित्तभेदद्वयेन भेदः-पार्थक्यं यस्य तद् द्विविधभेदम्, सचित्ता-ऽचित्तभेदभिन्नमिति भावः । तत्र यदपरिगृहीतमचित्तं तद् गृह्णानस्य "दिट्ठाइ" त्ति "दिट्ठे संका भोइय" इत्यादिका आरोपणा सर्वाऽपि प्राग्वद् द्रष्टव्या । यत् पुनः परिगृहीतमचित्तं तद् गृह्णतः कश्चिद् भद्रकः परिग्रहीता अनुग्रहं मन्येत । एतदग्रतो भावयिष्यते ॥ अथ सपरिग्रहस्यैव स्वरूपं निरूपयति-

[भा.८९२] तिविह परिग्गह दिव्वे, चउलहु चउगुरुग छल्लहुक्कोसे ।
अहवा छल्लहुग च्चिय, अंत गुरू तिविह दिव्वम्मि ॥

वृ-सपरिग्रहं त्रिविधम्, तद्यथा-देवपरिगृहीतं मनुष्यपरिगृहीतं तिर्यक्परिगृहीतं च । तत्र यद् दिव्यं - देवपरिगृहहीतं तद् त्रिविधम्-जघन्यं मध्यममुत्कृष्टं च । व्यन्तर परिगृहीतं जघन्यम्,

Jain Education International For Private & Personal Use Only www.jainelibrary.org

भवनपति-ज्योतिष्कपरिगृहीतं मध्यमम्, वैमानिकपरिगृहीतमुत्कृष्टम्। तत्र जघन्यपरिगृहीतं प्रलम्बं गृह्णाति चत्वारो लघवः, मध्यमपरिगृहीतं गृह्णाति चत्वारो गुरवः, उत्कृष्टपरिगृहीतं गृह्णाति षड लघवः । अथवा त्रिवपि जघन्य-मध्यमोत्कृष्टेषु षड् लघव एव प्रायश्चित्तम्, केवलं तपः-काल-विशेषितम्-जघन्ये तपोलघु कालगुरुकम्, मध्यमे काललघु तपोगुरुकम्, 'अन्त्ये च' उत्कृष्टे द्वाभ्यामपि गुरुकं कर्त्तव्यमिति त्रिविधदिव्यविषयं प्रायश्चित्तम् ॥ गतं देवपरिगृहीतम् ।

अथ मनुष्यपरिगृहीतमाह-

[भा.८९३] सम्मेतर सम्म दुहा, सम्मे लिंगि लहु गुरुओ गिहिएसुं ।
मिच्छा लिंगि गिही वा, पागय-लिंगीसु चउलहुगा ॥

वृ- मनुष्यपरिगृहीतं द्विधा-सम्यग्दृष्टिपरिगृहीतं "इयर" त्ति थ्यादृष्टिपरिगृहीतं च । तत्र यत् सम्यदृष्टिपरिगृतं तद् द्विधा-पार्श्वस्थादिलिङ्गस्थपरिगृहीतं गृहस्थपरिगृहीतं च। लिङ्गस्थपरिगृहीते मासलघु, गृहिभिः सम्यग्दृष्टिभिः परिगृहीते मासगुरु । यत्पुनर्मिथ्यादृष्टिपरिगृहीतं तद् द्विविधम्- "लिंगि" त्ति अन्यपाषण्डिपरिगृहीतं गृहस्थपरिगृहीतं च । तत्र गृहस्थपरिगृहीतं त्रिधा-प्राकृतपरिगृहीतं कौटुम्बिकपरिगृहीतं दण्डिकपरिगृहीतं च। तत्र प्राकृतपरिगृहीते लिङ्गिपरिगृहीते च चतुर्लघुकाः ॥

[भा.८९४/१] गुरुगा पुन कोडुंबे, छल्लहुगा होंति दंडियारामे ।

वृ- कौटुम्बिकपरिगृहीते पुनश्चत्वारो गुरुकाः । 'दण्डिकारामे' दण्डिकपरिगृहीते उद्याने षड् लघुकाः । गतं मनुष्यपरिगृहीतम् । अथ तिर्यक्परिगृहीतं भाव्यते-

[भा.८९४/२]तिरिया य दुट्ठ-ऽदुट्ठा, दुट्ठे गुरुगाइरे (गेयरे) लहुगा ॥

वृ- तिर्यञ्चश्च द्विविधाः-दुष्टा अदुष्टाश्च । दुष्टाः हस्ति-शुनकादयः, अदुष्टा रोझ-हरिणादयः। दुष्टतिर्यक्परिगृहीते चतुर्गुरुकाः, 'इतरैः' अदुष्टैः परिगृहीते चतुर्लघुकाः ।। गतं तिर्यक्परिगृहीतम्। अथ यदुक्त "परिगहिए अनुग्गहं कोइ" त्ति तदेतद् भावयति-

[भा.८९५] भद्देतर सुर-मनुया, भद्दो घिप्पंति दट्ठुणं भणइ ।
अन्ने वि साहु ! गिण्हसु, पंतो छण्हेगयर कुज्ञा ॥

वृ- यस्य सुरस्य मनुजस्य वा परिग्रहे स आरामो वर्त्तते स भद्रो वा भवेत् 'इतरो वा' प्रान्तः। तत्र भद्रः प्रलम्बं गृह्यमाणं दृष्ट्वा तं साधुं भणति-साधु त्वया कृतम्, तारिता वयं संसारसागरात्, अन्यान्यपि हे साधो ! पर्याप्तानि गृहाण इत्यादि । प्रान्तः पुनः षन्नां प्रकाराणामेकतरं कुर्यात् ॥ अथ क एते षट् प्रकाराः ? उच्यते-

[भा.८९६] पडिसेहणा खरंटण, उवलभ पंतावणा य उवहिम्मि ।
गिण्हण-कड्ढण-ववहार-पच्छकडुड्डाह-निव्विसए ।।

वृ- प्रतिषेधनं प्रतिषेधना-निवारणेत्यर्थः १ 'खरण्टना' खर-परुषवचनैर्निर्भर्त्सना २ 'उपालम्भः' सपिपासवचनैः शिक्षा ३ 'प्रान्तापना' यष्टि-मुष्ट्यादिभिस्ताडना ४ "उवहिम्मि" त्ति उपधिहरणम् ५ इति पञ्च भेदाः, ग्रहणाकर्षणव्यवहारपश्चात्कृतोड्डाहनिर्विषय इत्येक एव षष्ठो भेदः ६ इति सङ्ग्रहगाथासमासार्थ ॥ अथैनामेव विवरीषुराह-

[भा.८९७] जं गहियं तं गहि, बिइयं मा गिण्ह हरइ वा गहियं ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

जायसु ममं व कज्जे, मा गिण्ह सयं तु पडिसेहो ॥

वृ- 'यद् गृहीतं प्रलम्बं तद् गृहीतं नाम, द्वितीयं पुनर्वारं मा ग्रहीः' इति वचनं यद् वक्ति, यद्वा गृहीतं सत् प्रलम्बं तस्य प्रव्रजितस्य हस्ताद् 'हरति' उद्दालयति, भणति वा 'कार्ये समापतिते मामेव याचस्व, स्वयं पुनर्मा गृहाण' इत्येष सर्वोऽपि प्रतिषेध उच्यते ॥ अथ खरण्टनामाह-

[भा.८९८] धी मुंडितो दुरप्पा, धिरत्थु ते एरिसस्स धम्मस्स ।
अन्नत्थ वा वि लब्भिसि, मुक्को सि खरंटणा एसा ॥

वृ- धिग् मुण्डितो दुरात्मा । धिगस्तु 'ते' तव सम्बन्धिन ईदृशस्य धर्मस्य, यत्र चौर्यं क्रियत इति भावः । यद्वा मया मुक्तोऽसि परमन्यत्रात्ममीदृशीश्चेष्टितैर्विडम्बनां लप्स्यसे । एषा निष्पिपासनिर्भर्त्सना खरण्टना भण्यते ॥ उपालम्भमाह-

[भा.८९९] आमफलाणि न कप्पंति तुम्ह मा सेसए वि दूसेहिं ।
मा य सकज्जे मुज्झसु, एमाई होउवालंभो ॥

वृ- आमफलानि युष्माकं ग्रहीतुं न कल्पन्ते, अतः शेषानपि साधून् 'मा दूषय' निजदुश्चरितने मा कलङ्कितान् कुरु, म च 'स्वकार्ये' निरवद्यप्रवृत्यात्मके चारित्रे मुहः, एवमादिकः सपिपासशिक्षारूप उपालम्भो भावति ॥ प्रान्तापनोपधिहरणे भावयति-

[भा.९००] कर-पाय-दंडमाइसु, पंतावणगाढमाइ जा चरिमं ।
अप्पो अ अहाजाओष सव्वो दुविहो वि जं च विना ॥

वृ- कर-पाद-दण्डादिभिः आदिशब्दाद् लतादिभिश्च ताडनं प्रान्तापना । तस्यां चानागाढपरितापादिषु 'चरमं' पाराञ्चिकं यावत् प्रायश्चित्तम् । अल्पं वा बहुं वा स उपधिं हरेत् । अल्पो नाम यथाजातः, निषधाद्वयोपेतं रजोहरणं मुखवस्त्रिका चोलपट्टकश्चेत्यर्थः । बहुः पुनः 'सर्व' चतुर्दशविध उपधिः । अथवा 'द्विविधः' औधिकौपग्रहिकरूपः । यच्च तृणग्रहणादिकमुपधिं विना भवेत् तन्निष्पन्नं प्रायश्चित्तम् ॥ सम्प्रत्यनुग्रहादिपदेषु प्रायश्चित्तमाह-

[भा.९०१] लहुगा अनुग्गहम्मी, अप्पत्तिय गुरुग तीसु ठाणेसु ।
पंतावणे चउगुरुगा, अप्प बहुम्मी हिए मूलं ॥

वृ- यस्य सम्बन्धी स आरामः स यदि चिन्तयति 'अनुग्रहो मे यद् मदीयानि प्रलम्बानि साधवो गृह्णन्ति' इत्यनुग्रहे मन्यमा चतुर्लघवः । अथाप्रीतिकं करोति तूष्णीकश्च तिष्ठति ततश्चतुर्गुरुकाः । अथाप्रीतिकवशात् प्रतिषेधं खरण्टनामुपालम्भं वा कुर्यात् ततस्त्रिष्वपि स्थानेषु प्रत्येकं प्रत्येकं चुतुर्गुरवः । प्रान्तापनेऽपि चतुर्गुरुकाः । अल्पे वा बहौ वा उपधौ हृते मूलम् । यद्वोपधिनिष्पन्नम्, तद्यथा-उत्कृष्टे उपधौ चतुर्लघवः, मध्यमे मासलघु, जघन्ये रात्रिन्दिवपञ्चकम् । आह कथमेकत्रैव मूलम् ? उपधिनिष्पन्नं वा ? उच्यते-प्रमादतः प्रलम्बानि गृह्णत उपधिकरणे उपधिनिष्पन्नम्, दर्पतस्तु प्रलम्बानि गृह्णानस्योपकरणापहारे मूलम् ॥

अथ "पंतावणगाढमाइ चरिमं पि (जा चरिमं) पदं व्याचष्टे-

[भा.९०२] परितावणाइ पोरिसि, ठवमा महय मुच्छ किच्छ कालगए ।
मास चउ छच्च लहु गुरु, छेओ मूलं तह दुगं च ॥

वृ- प्रान्तापितस्य सतोऽनागाढा परितापना भवति चतुर्लघु, आगाढा भवति चतुर्गुरु,

Jain Education International For Private & Personal Use Only www.jainelibrary.org

परितापनाभिभूतः सन् सूत्रपौरुषीं न करोति मासलघु, अर्थपौरुषीं न करोति मासगुरु, सूत्रं नाशयति चतुर्लघु, अर्थं नाशयति चतुर्गुरु, प्राशुकं स्थापयति चतुर्लघु, अप्राशुकं स्थापयति चतुर्गुरु, प्रत्येकस्थापने चतुर्लघु, अनन्तस्थापने चतुर्गुरु इत्यादि प्राग्वद् वक्तव्यम्। "महय" त्ति महादुखे षड्लघु, मूर्च्छायां षड्गुरु, कृच्छ्रप्राणे च्छेदः, कृच्छ्रेच्छ्वासे मूलम्, समवहतेऽनवस्थाप्यम्, कालगते पाराञ्चिकम् ।। अथ "यच्च तृणग्रहणादिकमुपधिना विना भवेत्" इति पदं विवृणोति-

[भा.९०३] तणगहणे झुसिरेतर, अग्गी सड्डाण अभिनवे जं च।
एसणपेल्लण गहणे, काया सुत मरण ओहाणे ।।

वृ- वर्षाकल्पादावुपकरणे हृते शीताभिभूतास्तृणानि गृह्णन्ति-सेवन्ते। तत्र शुषिरतृणसेवने चतुर्लघु, अशुषिरतृणसेवने मासलघु। अग्निं सेवन्ते तत्र स्वस्थानप्रायश्चित्तम्, चतुर्लघु इत्यर्थः। अथाभिनवमग्निं जनयनति मूलम्, यच्चाग्निसमारम्भेऽन्येषां जीवानां विराधनं तन्निष्पन्नमपि प्रायश्चित्तम्। अथोपकरणाभावे उद्गमादिदोषदुष्टं वस्त्रादि गृह्णन्त एषणां प्रेरयन्ति ततस्तन्नष्पन्नम्; "गहणे" त्ति शीतादिभिः परिताप्यमाना गृहस्थैरदत्तमपि वस्त्रादि गृह्णीयुस्तन्नियुस्तन्निष्पन्नम्। निशीथचूर्णिकृता तु "गणे" त्ति पाठो गृहीतः, तत्र चोपधिं विना शीतादिपरीषहमविषहमाणो यद्यन्यतीर्थिकेष्वेकः साधुर्गच्छति मूलम्, द्वयोर्गच्छतोरनवस्थाप्यम्, त्रिषु पाराञ्चिकम्। "काय" त्ति अग्निं सेवमाना एषणां प्रेरयन्तो वा यत् पृथिव्यादिकायान् विराधयन्ति तन्निष्पन्नम्। "सुत" त्ति 'श्रुतं' सूत्रं तस्य पौरुषीं न कुर्वन्ति, उपलक्षणत्वाद् अर्थपौरुषीं न कुर्वन्ति सूत्रं नाशयन्ति अर्थं नाशयन्ति तन्निष्पन्नम्। "मरण" त्ति उपकरणं विना यद्येकोऽपि म्रियते तथापि पाराञ्चिकम्, "ओहाण" त्ति यद्येकः साधुरवधावति मूलम्, द्वयोरनवस्थाप्यम्, त्रिषु पाराञ्चिकम् ।।

अथ ग्रहणाकर्षणादिरूपं षष्ठं प्रकारं भावयति-

[भा.९०४] गेण्हण गुरुगा छम्मास कड्ढणे छेदो होइ ववहारे।
पच्छाकडम्मि मूलं, उड्डहण विरुंगणे नवमं ।।

वृ- प्रलम्बानि गृह्णानो यदि प्रलम्बस्वामिना दृष्ट्वा गृहीतस्ततो ग्रहणे चतुर्गुरुकाः। अथ तेनोपकणे हस्ते वा गृहीत्वा राजकुलाभिमुखमाकृष्टस्तत आकर्षणे षण्मासा गुरवः। अथ कारणिकानं समीपे व्यवहारे कारयितुमारब्ध ततश्छेदः। व्यवहारे विधीयमाने यदि पश्चात्कृतः पराजितस्ततो मूलम्। अथ चतुष्क-चत्वरादिषु 'एष प्रलम्बचौरः' इतिघोषणापुरस्करमुद्‌गधः हस्त-पादादौ वा अवयवे व्यङ्गितस्तत एवमुद्दहने "विरुंगणे" त्तिव्यङ्गने वा 'नवमम्' अनवस्थाप्यम् ।।

[भा.९०५] उद्दवणे निव्विसए, एगमनेगे पदोस पारंची।
अणवट्ठप्पो दोसु य, दोसु य पारंचिओ होइ ।।

वृ- अथान्यायोदीर्णकोपानलेन राजादिना अपद्रावितो निर्विषयो वा आज्ञप्तस्ततोऽपद्रावणे निर्विषये वा कृते पाराञ्चिकम्। अथवा एकस्यानेकेषां वा साधूनामुपरि प्रद्वेषं यदि व्रजति तदा पाराञ्चिकम्। अत्र च 'द्वयोः' उद्दहन-व्यङ्गनयोरनवस्थाप्यो भवति, 'द्वयोश्च' अपद्रावण-निर्विषययोः पाराञ्चिक इति ।। अथ परिग्रहविशेषेण प्रायश्चित्तविशेषमाह-

[भा.९०६] आराम मोल्लकीए, परतित्थिय भोइएण गामेण।
वणि-घड-कुडुंबि-राउलपरिग्गहे चेव भद्दितरा ।।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

वृ- इहाऽऽरामः कश्चिदादित एवाऽऽत्मीयो वा भवेद् मूल्येन क्रीतो वा । यो मूल्येन क्रीतः स केन क्रीतो भवेत् ? उच्यते-परतीर्थिकेन वा १ भोगिकेन वा २ ग्रामेण वा ३ वणिजा वा ४ घट्या वा गोष्ठयेत्यर्थः ५ कौटुम्बिकेन वा ६ आरक्षिकेण वा ७ राज्ञा वा ८ एतद् द्वयमपि राजकुलशब्देनगृहीतम् । एतेषां परिग्रहे वर्त्तमानादारमात् प्रलम्बानि गृह्णतो यथाक्रमं प्रायश्चित्तं चतुर्लघु १ चतुर्गुरु २ षड्लघु ३ षड्गुरु ४ छेदः ५ मूलं ६ अनवस्थाप्यं ७ पाराञ्चिकम् ८। अत्रापि त एव 'भद्रेतराः' भद्रक-प्रान्तकृता अनुग्रह-प्रतिषेधादयो दोषा वक्तव्याः । एतत् सर्वमयाचिते प्रलम्बे द्रष्टव्यम् । याचिते तु ग्रहणा-ऽऽकर्षणादिदोषान् विना शेषमिति ।। एतावता वृक्षस्याधःप्रपतितमचित्तं व्याख्यातम् । अथ सचित्तादिद्वारचतुष्टयमभिधित्सुराह-

[भा.९०७] एमेव य सच्चित्ते, छुभणा आरोहणा य पडणा य ।
जं इत्थं नाणत्तं, तमहं वोच्छं समासेणं ।।

वृ- यथा अचित्ते "दिट्ठे संका भोइय" इत आरभ्य "आराम मोल्लकीए" इति पर्यन्तं भणितम् एवमेव सचित्तेऽपि द्रष्टव्यम् । प्रक्षेपणमारोहणं पतनमित्येतान्यपि द्वाराणि तथैव वक्तव्यानि । यत् पुनरत्र 'नानात्वं' विशेषस्तदहं वक्ष्ये समासेन ।। तत्र सचित्ते तावद् विशेषमाह-

[भा.९०८] तं सच्चित्तं दुविहं, पडियाऽपडियं पुणो परित्तियरं ।
पडितऽसति अपावंते, छुभई कट्ठाइए उवरिं ।।

वृ- तत् पुनः सचित्तं द्विविधम्-पतितमपतितं च । पुनरेकैकं द्विधा-'परित्तं' प्रत्येकम् 'इतरद्' अनन्तं च । तत्र पतितस्य 'असति' अभावे वृक्षप्रतिष्ठितेऽपि हस्तादिना अप्राप्यमाणे ततः प्रलम्बपातनार्थं काष्ठादीन्युपरि क्षिपति ।। तत्र यद् वृक्षोपरिस्थितं भूमिस्थितो हस्तेन गृह्णाति तत्र प्रायश्चित्तमाह-

[भा.९०९] सजियपयट्ठिए लहुगो, सजिए लहुगा य जत्तिया गाहा ।
गुरुगा होंति अनंते, हत्थप्पत्तं तु गेण्हंते ।।

वृ- सजीववृक्षप्रतिष्ठितमचित्तफलं गृह्णाति मासलघु । अत्र च यावतो ग्राहान् करोति तावन्ति मासलघुकानि । अथ सजीवं सचित्तवृक्षप्रतिष्ठितं गृह्णाति चतुर्लघु, सच्चित्तप्रतिष्ठितप्रत्ययं च मासलघु, तत्रापि यावतो ग्राहान् करोति तावन्ति चतुर्लघूनि मासलघूनि च । एतत् प्रत्येके भणितम् । अनन्ते पुनरेतान्येवप्रायश्चित्तानि 'गुरुकाणि' मासगुरु-चतुर्गुरुस्वरूपाणि भवन्ति । एवं भूमिस्थितस्य वृक्षस्थितं हस्तप्राप्तं प्रलम्बं गृह्णतः प्रायश्चित्तमुक्तम् ।। अथ यदुक्तम् "छुभई कट्ठाइए उवरिं" ति तदेतद् विवरीषुराह-

[भा.९१०] छुभमाण पंचकिरिए, पुढवीमाई तसेसु तिसु चरिमं ।
तं काय परिचयई, आवडणे अप्पगं चेव ।।

वृ- प्रलम्बपातनार्थं काष्ठ-लेष्ठु-शुष्कगोमयादिकं गवेषयति चतुर्लघु । काष्ठादिकं लब्ध्वा वृक्षाभिमुखं क्षिपति चतुर्लघव एव । स च क्षिपन्नेव 'पञ्चक्रियः' पञ्चभि क्रियाभि स्पृष्टः, तद्यथा-कायिक्या १ आधिकरणिक्या २ प्राद्वेषिक्या ३ पारितापनिक्या ४ प्राणातिपातक्रियया ५ चेति। पृथिव्यादिषु च जीवेषु सङ्घट्टना-परितापना-ऽपद्रावणैर्लघुमासादिकं प्रायश्चित्तं यथास्थानं ज्ञातव्यम्। "तसेसु तिसु चरिमं" ति त्रिषु पञ्चेन्द्रियरूपेषु त्रसेषु व्यपरोपितेषु 'चरमं' पाराञ्चिकम् । तथा

Jain Education International For Private & Personal Use Only www.jainelibrary.org

काष्ठादिकं क्षिपन् 'तं कायं' वनस्पतिलक्षणं नियमादेव परित्यजति। स च लगुडादिरूरर्द्धं क्षिप्तः शाखादौ प्रतिस्खल्य निवृत्तस्तस्यैव सरीराभिमुखमापतति, तस्यापतने आत्मानं च परित्यजतीति॥ कथं पुनः पृथिव्यादिकायानां विराधको भवति ? इत्युच्यते-

[भा.९११] पावंते पत्तम्मि य, पुणोपडंते अ भूमिपत्ते अ।
रय-वास-विज्जुयाई, वाय-फले मच्छिगाइ तसे ॥

वृ- तत् काष्ठादिकं हस्तात् च्युतं सद् यावद् वृक्षेनाऽऽस्फलति तावत् प्राप्नुवद् भण्यते तस्मिन् प्राप्नुवति, तथा वृक्षं प्राप्ते पुनः पतति च भूमिप्राप्ते च षट्कायविराधना ज्ञातव्या। कथम् ? इति चेद् इत्याह-"रय" इत्यादि। आदिशब्दः प्रत्येकं सम्बध्यते, ततश्च रजःप्रभृतिकं पृथिवीकायं वर्षोदकादिकमप्कायं विद्युदारिकं तेजःकायं 'वातं च' तत्रैव वातं फलानि तस्यैव वृक्षस्य सत्कानि उपलक्षणत्वात् पत्रादीन्यपि मक्षिकादींश्च त्रसान् विराधयति॥ इदमेव स्पष्टयन्नाह-

[भा.९१२] खोल्ल-तयाईसु रओ, महि-वासोस्साइ अग्गि दरदड्ढे।
तत्थेवऽनिल वणस्सइ, तसा उ किमि-कीड-सउणाई ॥

वृ- "खोल्लं" ति देशीशब्दत्वात् कोटरम्, त्वक् प्रतीता, तदादिषु स्थानेषु वृक्षे रजः सम्भवेत् ततः पृथिवीकायविराधना। महिकायां निपतन्त्यां वर्षे अवश्याये वा निपतति आदिग्रहणेन हरतनुकादिसम्भवेऽप्कायविराधना। वनदवादिना दरदग्धे वृक्षे उपलक्षणत्वाद् विद्युति वाऽग्निकायविराधना। तत्रैवाग्नौ नियमाद् 'अनिलः' वायुः सम्भवतीति वायुकायविराधना। वनस्पति स एवप्रलम्बलक्षणः पत्र-पुष्पादिर्वा। त्रसास्तु कृमि-कीट-शकुनादिका विराध्यन्ते कृमयः-विष्ठादिसमुद्भवाः, कीटकाः-घुणादयः, शकुनाः-काक-कपोतादयः, आदिग्रहणेन सरटादिपरिग्रहः। एवं वृक्षमप्राप्ते काष्ठादौ षट्कायविराधना। एवमेव प्राप्ते पुनः पतति भूमिप्राप्तेऽपि ज्ञातव्यम्॥ यत आह-

[भा.९१३] अप्पत्ते जो उ गमो, सो चेव गमो पुनोपडंतम्मि।
सो चेव य पडियम्मि वि, निक्कंपे चेव भोमाई॥

वृ- य एवाप्राप्ते 'गमः' प्रकारः स एव गमः पुनःपतति उपलक्षणत्वात् प्राप्तेऽपि, भूयो गमशब्दोच्चारणं षट्कायविराधनां प्रतीत्याऽऽत्यन्तिकतुल्यताख्यापनार्थम्, स एव भूमौ पतितेऽपि काष्ठादौ प्रकारः प्रतिपत्तव्यः। केवलं "निक्कंपे चव भोमाइ" त्ति तत् काष्ठादिकं महता भारगौरवेण 'निष्कम्पं' निस्सहं पृथिव्यां यद् निपतति तेन 'भौमादीनां' पृथिव्यादीनां महती विराधनेति चूर्णिकृदभिप्रायः। निशीथचूर्णिकाराभिप्रायेण तु "निक्कंपे चेव भूमीए" इति पाठः। अस्य व्याख्या-यस्यां भूमौ स्थितः काष्ठादिक्षेपणाय विशिष्टं स्थानबन्धमध्यास्ते तत्रापि पादयोर्निष्कम्पत्वेन षण्णां कायानां विराधको भवति॥

[भा.९१४] एवं दव्वतो छण्हं, विराधओ भावओ उ इहरा वि।
चिज्जइ हु घणं कम्मं, किरियग्गहणं भयनिमित्तं॥

वृ- 'एवम्' एतेन प्रकारेण चतुर्ष्वप्यप्राप्तादिपदेषु द्रव्यतः षण्णां कायानां विराधकः प्रतिपत्तव्यः। भावतस्तु 'इतरथाऽपि' द्रव्यतो विराधनां विनाऽप्यसौ षट्कायविराधको लभ्यते, संयमं प्रति निरपेक्षतया तस्य भावतः प्राणातिपातसद्भावात्। भावप्राणातिपातेन च यथा 'घनं'

Jain Education International For Private & Personal Use Only www.jainelibrary.org

निबिडं कर्म चीयते न तथा द्रव्यप्राणातिपातेन । आह यदुक्तं "पञ्चभिः क्रियाभिः स्पृष्टः" तत् कथं संवादमश्नुते ? यावता यदि न विराधयति तदा कायिकी आधिकरणिकी च क्रिये सम्भवतः पारितापनिक-प्राणातिपातिकक्रिययोस्तु कुतः सम्भवः ?, अथ विराधयति तदेताश्चतस्रोऽपि भवेयुः प्राद्वेषिकी पुनः कथं भवेत् ? । सूरिराह-क्रियाग्रहणं 'भयनिमित्तं' भयजननार्थं क्रियते, येन साधवः क्रियापञ्चकापत्तिदोषभीता मूलत एव प्रलम्बग्रहणे न प्रवर्त्तन्ते; यद्वा दृष्टिवादनयाभिप्रायनैपुण्याद् यत्रैका क्रिया तत्र पञ्चापि क्रियाः सम्भवन्तीति न दोषः ।

यदाह निशीथचूर्णिकृत्- अहवा जत्थ एगा किरिया तत्थ दिट्ठिवायनयसुहुमत्तणतो पञ्च किरियाओ भवंति, अतो पंचकिरियग्गहणे न दोसो ॥

एवं तावत् संयमविराधना भाविता । अथाऽऽत्मविराधनां भावयति-

[भा.९१५] कुवणय पत्थर लेट्ठ, पुव्वच्छूढे फले च पवडंते ।
पच्चुप्फिडणे आया, अच्चायामे य हत्थाई ॥

वृ- अन्येन केनचित् प्रलम्बार्थिना पूर्वं "कुवणउ" त्ति लगुडः क्षिप्तः, स तत्रैव वृक्षशाखायां विलग्नः सन् वायुप्रयोगेण विवक्षितसाधुक्षिप्तकाष्ठादिप्रयोगेण वा सञ्चालितस्तस्यैव साधोरुपरि निपतन् विराधनां कुर्यात् । एवं 'प्रस्तरः' पाषाणः 'लेष्टु' इष्टकाशकलं मृत्तिकापिण्डो वा पूर्वक्षिप्तः पतेत्, फलं वृन्तच्युतं वृक्षात् प्रपतेत् । तस्यैव काष्ठादेः प्रतिनिवृत्य स्वसम्मुखं प्रत्यास्फलने आत्मविराधना भवेत् । 'अत्यायामेन च' अतीहस्तसमुच्छ्रयणेन काष्ठादौ क्षिप्यमाणे हस्तादेः परितापना भवेदिति ॥ गतं क्षेपणाद्वारम् । अथाऽऽरोहणद्वारमाह-

[भा.९१६] खिवणे वि अपावंतो, दुरुहइ तहि कंट-विच्छु-अहिमाई ।
पक्खि-तरच्छाइवहो, देवयखेत्ताइकरणं च ॥

वृ- काष्ठादेः क्षेपणे कृतेऽपि यदा प्रलम्बानि न पतन्ति तदाऽधःस्थितस्तानि 'अप्राप्नुवन्' अलभमानस्तं वृक्षं "दुरुहइ" त्ति आरोहति । स च यावद्भिर्बाहुक्षेपकैरारोहत तावन्ति चतुर्लघुकानि, अनन्ते पुनश्चतुर्गुरुकाणि । 'तत्र' वृक्षे आरोहन् यत् कण्टकैर्विध्यते, यच्च वृश्चिकेनाऽहिना वा आदिशब्दाद् नकुलादिना वा दश्यते, यच्च पक्षिभि-श्येनादिभिः तरक्षादिभिश्च-आटव्यजीवैर्वधो भवति, यया वा देवतया अधिष्ठितोऽसौ वृक्षस्तया यदसौ साधुः क्षिप्तचित्तः क्रियते, आदिग्रहणेनापरया कयाचिद् विडम्बनया विडम्ब्यते ॥

[भा.९१७] तत्थेव य निट्ठवणं, अंगेहि समोहएहि छक्काया ।
आरोवण स च्चेव य, गिलाणपरितावणाईया ॥

वृ- यद्वा सा देवता स्वाधिष्ठितवृक्षारोहणकुपिता तत्रैव 'निष्ठापनम्' आयुषः समापनं तस्य यत् कुर्यात्, अथवा तं साधुमारोहन्तमे यत् पातयेद् एषा सर्वाऽप्यात्मविराधना । पातितस्य च तयाङ्गानि 'समवहन्यन्ते' भज्यन्त इत्यर्थः, तैरङ्गैर्हस्त-पादादिभि समवहतैर्यत्र भूमावसौ पतति तत्र षट् काया विराध्यन्ते । तेषां च सङ्घट्टनादिभिरारोपणा सैव द्रष्टव्या या "छक्काय चउसु लहुगा" इत्यादि गाथायामुक्ता । आत्मविराधनायां च ग्लानविषया परितापनादिनिष्पन्ना या आरोपणा साऽपि प्राग्वदवसातव्या ॥ गतमारोहणद्वारम् । अथ पतनद्वारमाह-

[भा.९१८] मरण-गिलाणाईया, जे दोसा होंति दूहमाणस्स ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

ते चेव य सारुवणा, पवडंते होंति दोसा उ ॥

वृ- कदाचिदसौ तं वृक्षमारोहन् पतेत्, ततश्च मरण-ग्लानत्वादिका ये दोषा आरोहतो भवन्ति प्रपततोऽपि त एव दोषाः 'सारोपणाः' सप्रायश्चित्ता निरवशेषा वक्तव्याः । "पवडंते होंति सविसेसा" इति निशीथचूर्णिलिखितः पाठः, तत्रायमर्थ-आरोहतो दोषाणां सम्भव एव भणितः, पततः पुनरवश्यमभाविनो गात्रभङ्गादयो दोषा इति सविशेषग्रहणम् ॥

गतं पतनद्वारम् । अथोपधिद्वारं विवृणोति-

[भा.९१९] तंमूल उवहिगहणं, पंतो साहूण कोइ सव्वेसिं ।
तण-अग्गिगहण परितावणा य गेलन्न पडिगमणं ॥

वृ- यस्य परिग्रहे तानि प्रलम्बानि सः 'तन्मूलं' प्रलम्बग्रहणनिमित्तं तस्यैव साधोरुपधिग्रहणं कुर्यात्, यद्वा कश्चित् प्रान्तः सर्वेषां साधूनामुपधिं गृह्णीयात् । तत्र यथाजाते रजोहरणादिके उपधौ हृते मूलम्, शेषे पुनरुत्कृष्टे चतुर्लघु, मध्यमे मासलघु, जघन्ये पञ्चकम् । उपधिं विना तृणानि गृह्णीयात्, अग्निग्रहणं वा कुर्यात्, अग्निं सेवेतेति भावः, अथाग्निं न सेवते ततः शीतेन परितापना तस्य भवेत्, शीतेन वा भुक्ते अजीर्यमाणे ग्लानत्वं भवेत्, शीताभिभूता वा साधवः पाशर्वस्थादिषु प्रतिगमनं कुर्युः ॥ सम्प्रत्यत्रैव प्रायश्चित्तमाह-

[भा.९२०] तणगहण अग्गिसेवण, लहुगा गेलन्ने होइ तं चेव ।
मूलं अणवट्ठप्पो, दुग तिग पारंचिओ होइ ॥

वृ- अशुषिरतृणानि गृह्णाति मासलघु, शुषिरतृणानि गृह्णाति चतुर्लघु । परकृतमग्निं सेवते चतुर्लघु, अभिनवमग्निं जनयति मूलम्, अग्निशकटिकायां वा तापयन् यावतो वारान् हस्तं वा पादं वा सञ्चालयति तावन्ति चतुर्लघूनि । यस्तु धर्मश्रद्धालुरग्निं न सेवते स शीतेन ग्लानः सञ्जायते, ग्लानत्वे चानागाढपरितापनादौ तदेव प्रायश्चित्तम् । अथ शीतपरीषहमसहिष्णुः पाशर्वस्थादिषु व्रजति चतुर्लघु, यथाच्छन्देषु व्रजति चतुर्गुरु । यद्येकोऽवधावतो अन्यतीर्थिकेषु वा याति ततो मूलम्, द्वयोरनवस्थाप्यम्, त्रिषु पाराञ्चिकम् ॥

गतमुपधिद्वारम् । अथोड्डाहद्वारं विवृणोति-

[भ .९२१] अपरिग्गहिय पलंबे, अलभंतो समणजोगमुक्क धुरो ।
रसगेहीपिबद्धो, इतरे गिण्हंतो गहिओ य ॥

वृ- अपरिगृहीतानि प्रलम्बान्यलभमानः 'श्रमणयोगमुक्तधुरः' परित्यक्तश्रमणव्यापारभार इति भावः, रसगृद्धिप्रतिबद्धः 'इतराणि' परिगृहीतप्रलम्बानि गृह्णन् प्रलम्बस्वामिना दृष्ट्वा गृहीतः ॥ ततश्च-

[भा.९२२] महजनजाननया पुण, सिंघाडग-तिग-चउक्क-गामेसु ।
उड्डहिऊण विसज्जिते, महजननाए एतो मूलं ॥

वृ- तेन प्रलम्बस्वामिना गृहीत्वा शृङ्गाटक-त्रिक-चतुष्कस्थानेषु ग्रामेषु वा बहुषु नीत्वा महाजनस्य- पौर-जानपदरूपस्य ज्ञापना कृता, यथा 'एतेन मदीयानि प्रलम्बानि चोरितानि' इत्यादि महाजनस्य पुरत उद्दह्य "विसर्जितः मुक्तः तत एवं महाजनज्ञाते सति मूलं नाम प्रायश्चित्तम्॥ कथमुद्दग्धः ? इत्याह-

Jain Education International For Private & Personal Use Only www.jainelibrary.org

[भा.९२३] एस उ पलंबहारी, सहोढ गहिओ पलंबठाणेसु ।
सेसाण वि छाधाओ, सविहोढ विलंबिए होइ ।।

वृ- येनाऽऽरामाधिपतिना स प्रलम्बानि गृह्णानो गृहीतः स तं रासभारोपितं शृङ्गाटक-त्रिक-चतुष्कादिषु सर्वतः परिभ्रामयन्नेवमुद्धोषयति-'भो भोः पौराः ! श्रूयतामस्य प्रव्रजितकस्य दुश्चरितम्-एषः 'प्रलम्बहारी' मदीयारामसत्कलम्बचौरः 'सहोढः' सलोप्त्रो गृहीतो मया दुरात्मा 'प्रलम्बस्थानेषु' आरामप्रदेशेषु इत्यादिघोषणापुरस्सरमितश्चेतश्च नीयमानो महाजनेन सखेदमवलोक्यमानः स्वकृतेन कर्मणा विडम्ब्यते । ततश्च 'सविहोढं' सजुगुप्सनीयं यथा भवत्येवं विडम्बिते तस्मिन् शेषाणामपि साधूनां 'छायाघातः' 'सर्वेऽप्यमी एवंविधा एव' इति प्रभापरिभ्रंशो भवतीति ।। व्याख्यातमुद्धारद्वारम् । तद्व्याख्याने च समर्थिता "अन्नत्थ-तत्थगहणे" इत्यादिद्वारगाथा। अथ यदुक्तमधस्तात् "आणाऽणवत्थ मिच्छा, विराधना कस्सऽगीयत्थे" तदिदानीं प्राप्तावसरं व्याख्यायते । तत्र आज्ञेति द्वारम्-भगवता प्रतिषिद्धं यत् "प्रलम्बं न कल्पते" तद्ग्रहणं कुर्वता भगवतामाज्ञाभङ्गः कृतो भवति, तस्मिंश्चाज्ञाभङ्गे चतुर्गुरुकाः । अत्र परः प्राह-

[भा.९२४] अवराहे लहुगतरो, आणाभंगम्मि गुरुतरो किह नु ।
आणाए च्चिय चरणं, तब्भंगे किं न भग्गं तु ।।

वृ- 'अपराधे' चारित्रातिचारे लघुतरो दण्डो भवद्भि पूर्वं भणितः; तथाहि-अचित्ते प्रलम्बे मासलघु, सचित्ते तु चतुर्लघु; इह पुनराज्ञाभङ्गे चतुर्गुरुकमिति गुरुतरो दण्डः 'कथं' कस्मात् ?, 'नुः' इति वितर्के; अपि च अपराध जीवोपघातो इति लघुतर एवात्र भणितुमुचित इति । आचार्य प्राह-आज्ञायामेव भागवत्यां 'चरणं' चारित्रं व्यवस्थितम्, अतः 'तद्भङ्गे' तस्याः-आज्ञाया भङ्गे 'किम् ?' इति परिप्रश्ने आचार्य शिष्यं प्रश्नयति-किं तद् मूलोत्तरगुणादिकं वस्तु समस्ति यदाज्ञाभङ्गे न भग्नम् ? अपि तु सर्वमपि मग्नमिति, अत आज्ञायां गुरुतरो दण्ड उच्यते ।।

अस्यैवार्थस्य प्रसाधनार्थं दृष्टान्तमाह-

[भा.९२५] सोऊण य घोसणयं, अपरिहरंता विणास जह पत्ता ।
एवं अपरिहरंता, हियसव्वस्सा उ संसारे ।।

वृ- राज्ञा कारितां घोषणां श्रुत्वा घोषणया च निवारितमर्थमपरिहरन्तो यथा द्रव्यापहारलक्षणं विनाशं प्राप्ताः, एवं तीर्थकरनिषिद्धं प्रलम्बग्रहणमपरिहरन्तः 'हृतसर्वस्वाः' अपहृतसंयमरूप-सर्वसाराः संसारे दुःखमवाप्नुवन्ति । एषा श्रीभद्रबाहुस्वामिविरचिता गाथा ।। अथास्या एव भाष्यकारो व्याख्यानं करोति-

[भा.९२६] छ प्पुरिसा मज्झ पुरे, जो आसादेज्ज ते अजाणंतो ।
तं दंडेमि अकंडे, सुणेंतु पउरा ! जनवया ! य ।।

[भा.९२७] आगमिय परिहरंता, निद्दोसा सेसगा न निद्दोसा ।
जिनआणागमचारि, अदोस इयरे भवे दंडो ।।

वृ- जइ कोइ नरवई, सो छहिं पुरिसेहिं अन्नतरे कज्जे तोसितो इमेणऽत्थेण घोसणं कारेइ-'इमे छ प्पुरिसा मज्झ पुरे अप्पणो इच्छाए विहरमाणा महाजनेनं अदिट्ठपुव्वा अनुवलद्धविभवनेवत्था अच्छंति, जो ते छिवइ वा पीडेइ वा मारेइ वा तस्स उग्गं दंडं करेमि, हंदि सुणंतु एअं पउरा ! य

Jain Education International   For Private & Personal Use Only   www.jainelibrary.org

जनवया ! य' त्ति । एयं घोसणयं सोऊण ते पउरा जनवया य दंडभीता ते पुरिसे पयत्तण वन्न-रूवाईहिं चिंधेहिं आगमिऊणं पीडापरिहारकयबुद्धी तेसिं छण्हं पुरिसाणं पीडं परिहरंति ते निद्दोसा। जे पुन अनायारमंता न परिहरंति ते रन्ना सव्वस्सावहारदंडेणं दंडिया । एस दिट्ठंतो । अयमत्थोवणओ-रायत्थानीया तित्थयरा । पुरत्थानीओ लोगो । छप्पुरिसत्थानीया छक्काया । घोसणत्थानीया छक्कायरक्खणपरूवणपरा छज्जीवणियादओ आगमा । छिवणाइत्थानीया संघट्टणादी । पउर-जणवयत्थाणीया साहू । दंडत्थाणीओ संसारो । तत्थ जे पयत्तेण छण्हं कायाणं सरूवं रक्खणोवायं च आगमेऊण जहुत्तविही पीडं परिहरंति ते कम्बंधदंडेणं न दंडिज्जंति, इयरे पुन संसारे पुणो पुणो सारीर-माणसेहिं दुक्खसयसहस्सेहिं दंडिज्जंति त्ति ।।

अथाक्षरगमनिका-"षट् पुरुषा मम पुरे वर्त्तन्ते, यस्तानजानन्नपि 'आशातयेत्' स्पर्शादिनाऽपि पीडयेत् तमहं दण्डयामि 'अकाण्डे' अकाले, श्रृण्वन्तु एतत् 'पौराः !' पुरवासिनः! 'जानपदाश्च' ग्रामवासिनो लोकाः !" इति राज्ञा कारितां घोषणां श्रुत्वा तान् पुरुषान् 'आगम्य' उपलक्ष्य परिहरन्तः सन्तो निर्दोषाः, 'शेषाः' पुनर्ये पीडां न परिहरन्ति ते न निर्दोषा इति दण्डिताः। एवमत्रापि जिनाज्ञया यः षट्कायानामागमः-परिज्ञानं तत्पूर्वकचारिणः-संयमाध्वगामिनः सन्तोऽदोषाः, इतरेषां 'भवे' संसारे शारीर-मानसिकदुःखलक्षणो दण्डः ।। गतमाज्ञाद्वारम् । अथानवस्थाद्वारमाह-

[भा.९२८] एगेन कयमकज्जं, करेइ तप्पच्चया पुणो अन्नो ।
सायाबहुल परंपर, वोच्छेदो संजम-तवाणं ।।

वृ-इह प्रायः सर्वेऽपि प्राणिनः कर्मगुरुकतया दृष्टमात्रसुखाभिलाषिणः, न दीर्घसुखदर्शिनः, ततः सातलम्पटतया 'एकेन' केनचिदाचार्यादिना किमपि 'अकार्यं' प्रमादस्थानं 'कृतं' प्रतिसेवितं ततोऽन्योऽपि तत्प्रत्ययाद् 'एष आचार्यादि श्रुतधरोऽप्येवं करोति नूनं नास्त्यत्र दोषः' इति तदेवाकार्यं करोति, ततोऽपरोऽपि तथैव करोति, तदन्योऽपि तथैव इत्येवं 'सातबहुलानां' सातगौरवप्रतिबद्धानां प्राणिनां परम्परया प्रमादस्थानमासेवमानानां संयम-तपसोर्व्यवच्छेदः प्राप्नोति । यद्धि संयमस्थानं तपःस्थानं वा पूर्वाचार्येण सातगौरवगृध्नुतया वर्जितं तत् पाश्चात्यैरदृष्टमिति कृत्वा व्यवच्छिन्नमेवेति ।। गतमनवस्थाद्वारम् । अथ मिथ्यात्वद्वारं विवृणोति-

[भा.९२९] मिच्छत्ते संकाई, जहेय मोसं तहेव सेसं पि ।
मिच्छत्तथिरीकरणं, अब्भुवगम वारणमसारं ।।

वृ- मिथ्यात्वे विचार्यमाणे शङ्कादयो दोषा वक्तव्याः । शङ्का नाम-किं मन्ये अमी यतावादिनस्तथाकारिणो न भवन्ति येन प्रलम्बानि गृह्णन्ति ?, आदिशब्दात् काङ्क्षादयो दोषाः । तथा यथैतद् मृषा तथैव 'शेषम्' अन्यदप्येतेषां मिथ्यारूपमेवेति चित्तविप्लुति स्यात् । मिथ्यात्वाद् वा चलितभावस्य सम्यक्त्वाभिमुखस्य प्रलम्बग्रहणदर्शनात् पुनरपि मिथ्यात्वे स्थिरीकरणं भवति। अभ्युपगमं वा प्रव्रज्याया अणुव्रतानां सम्यग्दर्शनस्य वा कर्त्तुकामस्यापरः कश्चिद् वारणं कुर्यात्-मा एतेषां समीपे प्रतिपद्यस्वे, 'असारं' निस्सारममीषां प्रवचनम्, मयेदं चेदं दृष्टमिति ।। गतं मिथ्यात्वद्वारम् । अथ विराधना, सा च द्विविधा-संयमे आत्मनि च । द्वे अपि प्रागेव सप्रपञ्चं भाविते, तथापि विशेषमुपदर्शयितुमाह-

Jain Education International	For Private & Personal Use Only	www.jainelibrary.org

[भा.९३०] तं काय परिच्चयई, नाणं तह दंसणं चरित्तं च।
बीयाईपडिसेवग, लोगो जह तेहि सो पुट्ठो ॥

वृ- प्रलम्बं गृह्णन् 'तं कायं' वनस्पतिलक्षणं परित्यजति, तथा ज्ञानं दर्शनं चारित्रं चेति। बीजादिप्रतिसेवको लोको यथा असंयमेन स्पृष्टस्तथा सोऽपि साधुस्तैः प्रलम्बैरासेवितैरसंयमेन स्पृष्ट इति निर्युक्तिगाथाक्षरार्थः ॥ अथैनामेव विवरीषुराह-

[भा.९३१] कायं परिच्चयंतो, सेसे काए वए वि सो चयई।
नाणे नाणुवदेसे, अवट्टमाणो उ अन्नाणी ॥

वृ- प्रलम्बानि गृह्णानो वनस्पतिकायं परित्यजति, तं च परित्यजन् शेषानपि कायानसौ भावतः परित्यजति, तत्परित्यागे च प्रथमव्रतपरित्यागः, प्रथमव्रतपरित्यागे च शेषव्रतपरित्यागोऽप्युपजायत-इति "व्रतान्यप्यसौ परित्यजति" इत्युक्तम्। तथा 'ज्ञाने' ज्ञानविषये परित्यागे चिन्त्यमाने ज्ञानोपदेशे क्रियाद्वारेणाऽवर्त्तमानोऽसौ ज्ञान्यपि अज्ञानी मन्तव्यः ॥

[भा.९३२] दंसण-चरणा मूढस्स नत्थि समया वन नत्थि सम्मं तु।
विरईलक्खण चरमं, तदभावे नत्थि वा तं तु ॥

वृ- ज्ञानाभावादसौ मूढो भवति, मूढस्य दर्शन-चारित्रे न स्तः। यद्वा प्रलम्बग्रहणादस्य जीवेषु समता न विद्यते। समताया अभावाच्च सम्यक्त्वमपि नास्ति, तस्यापि सामायिकभेदतया समतारूपत्वात्। विरतिलक्षणं चरणं भणितम्, तच्च लक्षण प्रलम्बानि गृह्णतो न विद्यते। 'तदभावे' लक्षणाभावे 'तत्तु' तत् पुनश्चारित्रं नास्ति। वाशब्दः प्रकारान्तरद्योतकः ॥ अथ "बीयाई" इत्यादि व्याख्यावते-फलाद् बीजं भवतीति कृत्वा बीजग्रहणम्, आदिशब्दात् फल-पुष्प-पत्र-प्रबाल-शाखा-त्वक्-स्कन्ध-कन्द-मूलानि गृह्यन्ते। शिष्यः प्राह-सर्वेऽपि वनस्पतयस्तावद् मूलादय एव भवन्ति अतः "मूलाईपडिसेवग" इति कर्तुमुचितम् किमिति "बीयाईपडिसेवग" त्ति कृतम्? सूरिराह-

[भा.९३३] पाएण बीयभोई, चोयग! पच्छानुपुव्वि वा एवं।
जोनिग्घाते व हतं, तदादि वा होइ वनकाओ ॥

वृ- लोकः प्रायेण बीजभोजी, तेन कारणेन बीजमादौ कृतम्। यद्वा हे नोदक! स्वसमये त्रिविधाऽऽनुपूर्वी प्ररूप्यते, तद्यथा-पूर्वानुपूर्वी पश्चानुपूर्वी अनानुपूर्वी च। त्रिविधाऽपि च यथावसरं व्याख्याङ्गमित्यत्र पश्चानुपूर्वी गृहीत। अथवा बीजं वनस्पतीनां योनि-उत्पत्तिस्थानम् अतस्तस्य घाते-विनाशे सर्वमपि मूलादिकं निरपेक्षतया हतं भवति। यदि वा तदादिर्वनस्पतिकायो भवति। तद्-बीजमादिर्यस्य स तदादि, सर्वेषामपि वनस्पतीनां तत एव प्रसूतेः। अतो बीजादिग्रहणं कृतम् ॥ ततश्च-

[भा.९३४] विरइसभावं चरणं, बीयासेवी हु सेसघाती वि।
अस्संजमेण लोगो, पुट्ठो जह सो वि हु तहेव ॥

वृ- यो बीजासेवी स नियमात् 'शेषाणां' मूलादीनामपि घाती विज्ञेयः। यश्च मूलादीनि घातयति तस्य विरतिस्वभावं यत् 'चरणं' चारित्रं तन्न भवति। यथा च बीजादिप्रतिसेवको लोकोऽसंयमेन स्पृष्टस्तथैवासावपि तैः प्रलम्बैरासेवितैरसंयमेन स्पृष्ट इति ॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

गता संयमविराधना। अथाऽऽत्मविराधनामाह-

[भा.९३५]तं चेव अभिहणेज्ञा, आवडियं अहव जीहलोलुयता (यया)।
बहुगाइं भुंजित्ता, विसूचिकाईहि आववहो ॥

वृ- तद् लगुडादिकं क्षिप्तं पुनरापतितं सत् 'तमेव' साधुमभिहन्यात्। इदं च प्रागुक्तमपि स्थानाशून्यार्थमत्रोपात्तमिति न पुनरुक्तदोषः। अथवा जिह्वालोलुपतया बहुकानि प्रलम्बानि भुक्त्वा विसूचिकादिभिः आदिशब्दाद् ज्वरा-ऽतीसारादिभी रोगैरुत्पन्नैरात्मवधो भवति ॥ उक्ताऽऽत्मविराधना। तदुक्तौ च व्याख्याता आज्ञादयश्चत्वारोऽपि दोषाः। अथ "कस्स अगीयत्थे" त्ति पदं व्याचिख्यासुराह-

[भा.९३६] कस्सेयं पच्छित्तं, गणिणो गच्छं असारविंतस्स।
अहवा वि अगीयत्थस्स भिक्खुणो विसयलोलस्स ॥

वृ-शिष्यः प्रश्नयति-यद् 'एतद्' अन्यत्रग्रहणादावनेकधा प्रायश्चित्तमुक्तं तत् कस्य भवति? सूरिराह-'गणिनः' आचार्यस्य गच्छम् असारयतः सतः। असारणा नाम अगवेषणा-कः कुत्र गतः? को वा मामापृच्छय गतः? को वा अनापृच्छया? यद्वा प्रलम्बं गृहीत्वा आगत्यालोचितेऽन्येन वा निवेदिते यत् प्रायश्चित्तं तन्न ददाति, दत्त्वा वा न कारयति, न वा नोदनादिना खरण्टयति; एषा सर्वाऽप्यसारणाऽभिधीयते। आह किं कारणमाचार्यस्य षट्कायानविराधयतोऽपि प्रायश्चित्तम्? उच्यते-स्वसाधूनुत्पथे प्रवर्त्तमानानसारयन्नसौ गच्छस्य विराधनायां वर्त्तते। तथा चोक्तमिदमेव सहेतुकं बृहद्भाष्ये-

किं कारणं तु गणिणो, असारवेंतस्स होइ पच्छित्तं ?।
वट्टति जेम गणहरो, विराधनाए उ गच्छस्स ॥
किह पुन विराधनाए, गच्छस्स गणी उ वट्टती स खलु ?।
भन्नइ सुणसु जह गणी, विराहओ होइ गच्छस्स ॥
जह सरणमुवगयाणं, जीवियववरोवणं नरो कुणइ।
एवं सारणियाणं, आयरिओ असारओ गच्छे ॥
किह सरणभुवगया पुन ?, पक्खे पक्खम्मि जं उवट्ठंति।
इच्छामि खमासमणो !, कतकितिकम्मा उ जं अम्हे ॥

अत आचार्यस्य सर्वमेतत् प्रायश्चित्तम्। अथवा यो भिक्षुरगीतार्थ अपिशब्दाद् गीतार्थोऽपि विषयलोलः-सुखादुरसास्वादलम्पटो भूत्वा प्रलम्बानि गृह्णाति तस्यैतत् प्रायश्चित्तम्। अत्र चाऽऽचार्यविषया अष्टौ भङ्गाः-अगीतार्थ आचार्यो गच्छं न सारयति विषयलोलश्च १ अगीतार्थ आचार्यो गच्छं न सारयति विषयनिस्पृहश्च २ इत्यादि। अत्र चान्तिमो भङ्गः शुद्धः, शेषाः सप्त परित्यक्तव्याः ॥ यत आह-

[भा.९३७] देसो व सोवसग्गो, वसणी व जहा अजानगनरिंदो।
रज्जं विलुत्तसारं, जह तह गच्छो वि निस्सारो ॥

वृ-भङ्गसप्तकवर्ती आचार्यो देश इव सोपसर्गो व्यसनी वा यथा अज्ञायकनरेन्द्रः परित्यज्यते तथा परित्याज्यः। यथा च राज्ञा अचिन्त्यमानं राज्यं विलुप्तसारं भवति तथा गच्छोऽप्याचा-

Jain Education International For Private & Personal Use Only www.jainelibrary.org

र्येणाऽसार्यमाणो निस्सारो भवतीति परिहरणीय इति सङ्ग्रहगाथाक्षरार्थः ॥

अथैनामेव विवरीषुः प्रथमतो "देसो व सोवसग्गो" इति पदं व्याचष्टे-

[भा.९३८] ओमोदरिया य जहिं, असिवं च न तत्थ होइ गंतव्वं।
उप्पन्ने न वसियव्वं, एमेव गणी असारणीओ ॥

वृ- यत्र देशेऽवमौदरिका अशिवं च उपलक्षमत्वाद् अपरोऽप्युपद्रवो भवति तत्र गन्तव्यं न भवति, अथ तत्र देशे वसतामेवाऽवमौदर्यादिकमुत्पन्नं तत उत्पन्ने सति तत्र न वस्तव्यम्, एवमेव 'गणी' आचार्य 'असारणिकः' गच्छसारणाविकलो नानुगन्तव्यः ॥ अथ "वसनी व जहा अजानगनरिंदो" त्ति व्याख्याति-

[भा.९३९] सत्तण्हं वसणाणं, अन्नयरजुतो न जाणई रज्जं।
अंतेउरे व अच्छइ, कज्जाइँ सयं न सीलेइ ॥

वृ- यथा सप्तानां व्सनानामन्यतरेण व्यसनेन युतो राजा राज्यं पालयितुं न जानाति, यो वा शेषव्यसनैरनभिभूतोऽपि विषयलोलुपतया नित्यमन्तः पुरे आस्ते सोऽपि 'कार्याणि' व्यवहारादीनि स्वयमात्मना 'न शीलयति' नावलोकत इत्युक्तं भवति, ततश्च यथेच्छमुच्छृङ्खलाः प्रजाः सञ्जायन्ते। एवमाचार्योऽप्यगीतार्थो गीतार्थो वा सातगौरवादिव्यसनोपहततया यदि स्वगच्छं न सारयति तदा गच्छः सर्वोऽपि निरङ्कुशः सञ्जायते। यतश्चैवमतोऽसारणिक आचार्यो दूरंदूरेण परिहर्त्तव्यः ॥ अथ व्यसनसप्तकमाह-

[भा.९४०] इत्थी जूयं मज्जं, मिगव्व वयणे तहा फरुसया य।
दंडफरुसत्तमत्थस्स दूसणं सत्त वसणाइं ॥

वृ- यद् राजा अन्तःपुरस्त्रीषु नित्यमासक्तिस्तिष्ठति तत् स्त्रीव्यसनम्। यत्तु द्यूतविनोदेनानवरतं दीव्यति तद् द्यूतव्यसनम्। यत् पुनर्मद्यपानकेन नित्यं मूर्च्छित इवाऽऽस्ते तद् मद्यव्यसनम्। यत्तु मृगया-आखेटकस्तत्रानेकेषां मृगादिजन्तूनां वधं करोति तद् मृगयाव्यसनम्। एतेषु चतुर्ष्वप्यासक्तो राज्यकार्याणि न शीलयति। तथा यत् खर-परुषवचनैः सर्वानपि जनान् निर्विशेषमाक्रोशति तद् वचनपरुषताव्यसनम्, अत्र वचनदोषेण दुरधिगमनीयो भवति। यत् पुनरनपराधे स्वल्पे वाऽपराधे अत्युग्रं दण्डं निर्वर्त्तयति तद् दण्डपारुष्यव्यसनम्, अत्र च पौर-जानपदानामत्युग्र-दण्डभयेन नश्यतां क्रमेण च प्रजाया अभावे कीदृशं राज्यम् ? इति। अर्थोत्पत्तिहेतवो ये सामाद्युपायचतुष्टयप्रभृतयः प्रकारास्तेषां यद् दूषणं तद् अर्थदूषणव्यसनम्, अत्र चार्थोत्पत्तिहेतून् दूषयतो न तथाविधोऽर्थ उत्पद्यते, अर्थोत्पत्यभावे चाचिरादेव कोशः परिहीयते, परिहीणकोशस्य च विनष्टमेव राज्यम्। एतानि सप्त व्यसनानि ॥ अथ प्रकारान्तरेण भङ्गानाह-

[भा.९४१] अहवा वि अगीयत्थो, गच्छं न सारेइ इत्थ चउभंगो।
बिइए अगीयदोसो, तइतो न सारेतरो सुद्धो ॥

वृ- अथवा अगीतार्थो गच्छं न सारयतीत्यत्र चतुर्भङ्गी। गाथायां पुंस्त्वं प्राकृतत्वात्। सा चेयम्-अगीतार्थो गच्छं न सारयति १ अगीतार्थो गच्छं सारयति २ गीतार्थो गच्छं न सारयति ३ गीतार्थो गच्छं सारयति ४। अत्र प्रथमस्य द्वौ दोषौ अगीतार्थत्वोषः असारणादोषश्च। द्वितीयस्य पुनरेक एवागीतार्थत्वदोषः। तृतीयस्तु यन्न सारयति स एकस्तस्याऽसारणादोषः। 'इतरः'

Jain Education International For Private & Personal Use Only www.jainelibrary.org

चतुर्थो भङ्गः शुद्धः ॥ आद्यानां त्रयाणां भङ्गानां भावनामाह-

[भा.९४२] देसो व सोवसग्गो, पढमो तइओ तु होइ वसनी वा।
बिइओ अजाणतुल्लो, सारो दुविहो दुहेक्केक्को ॥

वृ- 'प्रथमः' प्रथमभङ्गवर्त्ती आचार्य सोपसर्गदेश इव परित्यक्तव्यः । 'तृतीयः' गीतार्थोऽप्यसारणिकत्वाद् व्यसनीव राजा परिहर्त्तव्यः । 'द्वितीयः' सारणिकोऽप्यगीतार्थत्वाद-ज्ञनरेन्द्रतुल्य इति कृत्वा परिहार्य इति चूर्ण्यभिप्रायः ।

अथ निशीथचूर्ण्यभिप्रायेण व्याख्यायते-प्रथमः सोपसर्गदेश इव परिहार्य । द्वितीयः पुनरगीतार्थ परं सारणिकः स च व्यसनीव ज्ञातव्यः । किमुक्तं भवति ? -सोऽगीतार्थ सन् यत् किमपि स्वशिष्यान् नोदयति सा नोदना तस्य व्यसनमिव द्रष्टव्यम्, अतो व्यसनाभिभूतभूपतिदसी परिहार्यः । तृतीयः पुनरसारणिकत्वाद् गीतार्थोऽप्यज्ञनृपतुल्य इति कृत्वा परित्याज्यः । व्याख्याने "देसो व सोवसग्गो, पढमो बिइओ उ होइ वसणी वा । तइओ अजाण तुल्लो" त्ति पाठो द्रष्टव्यः। पुस्तकेष्वपि बहुष्वयमेव दृश्यत इति । यदुक्तं "रज्जं विलुत्तसारं, जह तह गच्छो वि निस्सारो" त्ति तदेतद् भावयति-"सारो दुविहो दुहेक्केक्को" सारो द्विविधः-लौकिको लोकोत्तरिकश्च । पुनरेकैको द्विधा-बाह्य आभ्यन्तरश्च ॥ एतदेव व्याचष्टे-

[भा.९४३] गो-मंडल-धन्नाई बज्झो कनगाइ अंतो लोगम्मि ।
लोगुत्तरिओ सारो, अंतो बहि नाण-वत्थाई ॥

वृ- गोशब्देन गावो बलीवर्दास्चोच्यन्ते, उपलक्षणत्वाद् हस्त्यश्वादीनामपि परिग्रहः मण्डलमिति देशखण्डम्, यथा-षन्नवतिमण्डलानि सुराष्ट्रादेशः; अथवा गोमण्डलं नाम गोवर्ग, उपलक्षणत्वाद् मष्यादिवर्गोऽपि; धान्यानि शालिप्रभृतीनि, आदिशब्दाद् वास्तु-कुप्यादिपरिग्रहः; एष लौकिको बाह्यः सारः । कनकं-सुवर्णम्, आदिग्रहणेन रूप्य-रत्नादीनि; एषः 'अन्तः' इति आभ्यन्तरः सारः 'लोके' लोकविषयो मन्तव्यः । एतेन द्विप्रकारेणापि सारेण राज्यं पार्थिवेना-ऽचिन्त्यमानं निस्सारं भवति । लोकोत्तरिकः सारो द्विधा-अन्तर्बहिश्च । तत्रान्तःसारो ज्ञानम्, आदिशब्दाद् दर्शन-चारित्रे च । बहिसारो वस्त्रदिकः, आदिग्रहणेन शय्या-पात्रादीनि गृह्यन्ते । अनेन च द्विविधेनापि लोकोत्तरिकसारेणाऽऽचार्येणाऽसार्यमाणो गच्छो निस्सारो भवतीति प्रकृतम्। तस्माद् गणिनो गच्छमसारयत एतत् प्रायश्चित्तम् । गीतार्थोपदेशमन्तरेण वाऽगीतार्थस्य स्वयमेव कार्येषु प्रवर्त्तमानस्याऽयं दोषो भवति ॥

[भा.९४४] सुहसाहगं पि कज्जं, करणविहूणमणुवायसंजुत्तं ।
अन्नायऽदेस-काले, विवत्तिमुवजाति सेहस्स ॥

वृ- सुखेन साधः-साधनं यस्य तत् सुखसधकम्, "शेषाद्वा" इति कच्प्रत्ययः, सुखसाध्यमित्यर्थः । तदपि कार्यं करणम्-आरम्भः प्रयत्न इत्येकोऽर्थस्तद्विहीनम्, तथा यस्य कार्यस्य यः साधनोपायस्तद्विपरीतेनानुपायेन संयुक्तम्, "अन्नाय"त्ति यद् यस्य कार्यमज्ञातं तत् तेनाऽऽरभ्यमाणम्, 'अदेश-काले च' अनवसरे विधीयमानं शैक्षस्याऽज्ञस्य विपत्तिमुपयाति। विपत्तिशब्देन कार्यस्याऽसिद्धिरत्राभिधीयते । तदुक्तम्-

सम्प्राप्तिश्च विपत्तिश्च, कार्याणां द्विविधा स्मृता ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

सम्प्राप्ति सिद्धिरर्थेषु, विपत्तिश्च विपर्यये ॥

ततो न निष्पद्यत इत्युक्तं भवति ॥ अत्रैव निदर्शनमाह-

[भा.९४५] नक्खेणावि हु छिज्जइ, पासाए अभिनवुट्ठितो रुक्खो ।
दुच्छेज्जो वड्ढंतो, सो च्चिय वत्थुस्स भेदाय ॥

वृ- प्रासादे वट-पिप्पलादिर्वृक्षः 'अभिनवोत्थितः' अधुनोद्गतः सन् नखेनाऽपि 'हुः' निश्चितं 'छिद्यते' छेत्तुं शक्यते इति, अनेन कार्यस्य सुखसाध्यतोक्ता । स एव वृक्षः 'वर्धमानः' शाखाप्रशाखाभि प्रसरन् दुश्छेद्यो भवति, कुठारेणापि च्छेत्तुं न शक्यत इति भावः । अपरं च 'वास्तुनः' प्रासादस्य भेदाय जायते ॥

[भा.९४६] जो य अनुवायछिन्नो, तस्सइ मूलाइं वत्थुभेदाय ।
अहिनव उवायछिन्नो, वत्थुस्स न होइ भेदाय ॥

वृ- यश्चानुपायेन-मूलोद्धरणलक्षणोपायमन्तरेण च्छिन्नः तस्यापि मूलान्यनुद्ध तानि वास्तुभेदाय जायन्ते । एतेन चानारम्भे अदेश-कालारम्भेऽनुपायारम्भे च सुखसाध्यस्यापि कार्यस्य विपत्ति क्लेशसाध्यता चोक्ता । अथ देश-काले उपायेन विधीयमानस्य यथा निष्पत्तिर्भवति तथा निदर्शयति-"अहिनव" इत्यादि उत्तरार्द्धम् । यस्तु वृक्षः 'अभिनवः' उद्गतमात्र उपायेन-प्रयत्नपूर्वकं छिन्नो मूलान्यपि तस्योद्ध त्य करीषाग्निना दग्धानि स वास्तुनो भेदाय न भवति ॥

एष दृष्टान्तः । अयमस्यैवोपनयः-

[भा.९४७] पडिसिद्ध त्ति तिगिच्छा, जो उ न कारेइ अभिनवे रोगे ।
किरियं सो उ न मुच्चइ, पच्छा जत्तेण वि करेंतो ॥

वृ- यस्य साधोर्ज्वरादिको रोग उत्पन्नः स यदि –

"तेगिच्छं नाभिनंदेज्जा, संचिक्खऽत्तगवेसए ।
एवं खु तस्स सामन्नं, जं न कुज्जा न कारवे ॥"

इति सूत्रमनुश्रित्य "प्रतिषिद्धा चिकित्सा" इति कृत्वा अभिनवे रोगे 'क्रियां' चिकित्सां न कारयति स पश्चात् तस्मिन् रोगे प्रवर्धिते सति 'यत्नेनापि' महताऽप्यादरेण क्रियां कुर्वाणो न मुच्यते रोगात् । यदि पुनरधुनोत्थित एव रोगे क्रियामकारयिष्यत् ततो नीरुगभविष्यत् ॥

[भा.९४८] सहसुप्पइअम्मि जरे, अट्ठम काऊण जो वि पारेइ ।
सीयल-अंबदवाणी, न हु पउणइ सोवि अनुवाया ॥

वृ-यो वा अनुपायेन क्रियां करोति सोऽपि न प्रमुणीभवति, यथा सहसोत्पन्ने ज्वरेऽन्यस्मिन् वा अजीर्णप्रभवे रोगे "सहसुप्पन्नं रोगं, अट्ठमेण निवारए" इति वचनादष्टमं कृत्वा योऽपि न केवलं क्रियाया अकारक इत्यपिशब्दार्थः "सीयलअंबदवाणि"त्ति शीतलकूरा-ऽम्लद्रवादीनि पारयति 'मा पेया कारणीया भवतु' इति कृत्वा सोऽपि न प्रगुणीभवति 'अनुपायात्' उपायाभावात्, प्रत्युत तेन शीतलकूरादिना स रोगस्तस्य गाढतरं प्रकुप्यति । यदि पुनस्तेन पेयादिनोपायेनाऽपारयिष्यत् ततः पटुरभविष्यत् इत्युपाया-ऽनुपायस्वरूपमगीतार्थो न जानाति । ततश्च "अज्ञात - मदेशकाले वा कार्यं कुर्वतस्तस्य शैक्षस्य विपत्तिमुपयाति" इति प्रकृतम् ॥ अत्रैव तात्पर्यमाह-

[भा.९४९] संपत्ती य विपत्ती, य होज्ज कज्जेसु कारगं पप्प ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

अनुवायतो विवत्ती, संपत्ती कालुवाएहिं ॥

वृ- सम्प्राप्तिश्च विपत्तिश्च कार्येषु 'कारकं' कर्त्तारं प्राप्य भवति । यदि अज्ञः कर्त्ता ततस्तेनाऽदेश-काले अनुपायत आरब्धस्य कार्यस्य विपत्तिर्भवति । अथासौ ज्ञस्ततस्तेन कालोपायाभ्यां देशकाले उपायेन चारब्धस्य कार्यस्य 'सम्प्राप्ति' सिद्धिर्भवति ॥ उपसंहरन्नाह-

[भा.९५०] इय दोसा उ अगीए, गीयम्मि उ कालहीणकारिम्मि ।
गीयत्थस्स गुणा पुण, हंति इमे कालकारिस्स ॥

वृ- "इय" एवमगीतार्थे कार्यकर्त्तरि दोषा भवन्ति । गीतार्थेऽपि कालहीनकारिणि हीने वा अधिके वा काले कार्यकारिणि एत एव दोषाः । यः पुनर्गीतार्थ उपायेनाऽन्युनातिरिक्ते काले कार्यं करोति तस्य गीतार्थस्य कालकारिण इमे गुणा भवन्ति ॥ तानेवाह-

[भा.९५१] आयं कारण गाढं, वत्थुं जुत्तं ससत्ति जयणं च ।
सव्वं च सपडिवक्खं, फलं च विधिवं वियाणाइ ॥

वृ- 'आयं' लाभं 'कारणम्' आलम्बनं 'गाढम्' आगाढग्लानत्वं 'वस्तु' द्रव्यं दलिक-मित्यनर्थान्तरं 'युक्तं' योग्यं 'सशक्तिकं' समर्थं 'यतनां' त्रिपरिभ्रमणादिलक्षणाम्; एतदायादिकं सर्वमपि सप्रतिपक्षं गीतार्थो विजानाति । तत्राऽऽयस्य प्रतिपक्षोऽनायः, कारणस्याऽकारणम्, आगाढस्याऽनागाढम्, वस्तुनोऽवस्तु, युक्तस्याऽयुक्तम्, सशक्तिकस्याऽशक्तिकः, यतनाया अयतनेति यथाक्रमं प्रतिपक्षाः । तथा फलं चैहिकादिकं 'विधिवान्' गीतार्थो विजानातीति निर्युक्तिगाथासमासार्थः ॥ अथ प्रतिपदं विस्तरार्थमाह-

[भा.९५२] सुंकादीपरिसुद्धे, सइ लाभे कुणइ वाणिओ चिट्ठं ।
एमेव य गीयत्थो, आयं दट्ठुं समायरइ ॥

वृ- शुल्कं-राजदेयं द्रव्यम्, आदिशब्दाद् भाटक-कर्मकरवृत्यादिपरिग्रहः, यथा शुल्कादिभिर्द्रव्योपक्षयहेतुभिः परिशुद्धः-निर्वटितो यदि कोऽपि लाभ उत्तिष्ठते तत एवं शुल्का-दिपरिशुद्धे लाभे सति वाणिजो देशान्तरं गत्वावाणिज्यचेष्टां 'करोति' आरभते, अथ लाभमुत्तिष्ठमानं न पश्यति ततो नारमते । एवमेव च गीतार्थोऽपि ज्ञानादिकम् 'आयं' लाभं दृष्ट्वा प्रलम्बाद्य-कल्प्यप्रतिसेवां समाचरति नान्यथा ॥ इदमेव स्पष्टयन्नाह-

[भा.९५३] असिवाईसुंकत्थाणिएसु किंचिखलियस्स तो पच्छा .
वायण वेयावच्चे, लाभो तव-संजम-ऽज्झयणे ॥

वृ- स हि गीतार्थ प्रलम्बादिकं प्रतिसेवमान एवं चिन्तयति-अशिवादिषु शुल्कस्थानीयेषु अकल्प्यप्रतिसेवया केभ्योऽपि संयमस्थानेभ्यः स्खलितस्यापि मम 'ततः पश्चात्' अशिवादिषु व्यतीतेषु वाचनां ददत आचार्यादीनां वैयावृत्ये तपः-संयमा-ऽध्ययनेषु वा उद्यमं कुर्वाणस्य भूयानन्यो लाभो भविष्यति, अकल्प्यप्रतिसेवाजनितं चातीचारं प्रायश्चित्तेन शोधयिष्यामि-इति बहुतरं लाभमल्पतरं व्ययं परिभाव्य गीतार्थ समाचरति । अगीतार्थ पुनरेतदाय-व्ययस्वरूपं न जानातीति ॥ गतमायद्वारम् । अथ कारणा-ऽऽगाढद्वारद्वयमाह –

[भा.९५४] नाणाइतिगस्सऽट्ठा, कारण निक्कारणं तु तव्वज्जं ।
अहिडक्क विस विसूइय, सज्जक्खयसूलमागाढं ॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

वृ- गीतार्थः कारण एव प्रतिसेवते नाकारणे। आह किमिदं कारणम्? किं वा अकारणम्? इत्याह- 'ज्ञानादित्रयस्य' ज्ञान-दर्शन-चारित्ररूपस्याऽर्थाय यत प्रतिसेवते तत् कारणम्, 'तद्वर्जं' ज्ञानादित्रयवर्जं सेवमानस्य निष्कारणमुच्यते। तथा गीतार्थो यादृशमागाढे प्रतिसेव्यं तादृशमागाढ एव यादृशं पुनरनागाढे तादृशमनागाढ एव प्रतिसेवते। अथ किमिमागाढम्? किं वा अनागाढम्? उच्यते-अहिना-सर्पेण दष्टः कश्चित् साधुः, विषं वा केनचिद् भक्तादिमिश्रितं दत्तम्, विसूचिका वा कस्यापि जाता, सद्य-क्षयकारि वा कस्यापि सूलमुत्पन्नम्, एवमादिकमाशुधाति सर्वमप्यागाढम्; एतद्विपरीतं तु चिरघाति कुष्ठादिरोगात्मकमनागाढम् ।। अथ वस्तु-युक्तद्वारे व्याचष्टे—

[भा.९५५] आयरियाई वत्थुं, तेसिं चिय जुत्त होइ जं जोग्गं।
गीय परिणामगा वा, वत्थुं इयरे पुन अवत्थुं ।।

वृ- आचार्यादि प्रधानपुरुषो यद्वा गीतार्थ सामान्यतो वस्तु भण्यते, परिणामका वा साधवो वस्तु। एतादृशमात्मानं परं वा वस्तुभूतं ज्ञात्वा प्रतिसेवते प्रतिसेवाप्यते वा। 'इतरे' प्रतिपक्षभूताः पुनरनाचार्यादिरगीतार्थो वा अपरिणामका-ऽतिपरिणामका वा सर्वेऽप्यवस्तु भण्यन्ते। एतेषामेवाचार्यादीनां यद् योग्यं भक्त-पानौषधादिकं तद् युक्तम्, तद्विपरीतं पुनरयुक्तम्। एतद् युक्ताऽयुक्तस्वरूपं गीतार्थ एव जानाति नेतर इति ।।

अथ सशक्तिक-यतनाद्वारद्वयमाह-

[भा.९५६] धिइ सारीरा सत्ती, आय-परगता उ तं न हावेति।
जयणा खलु तिपरिरया, अलंभे पच्छा पनगहानी ।।

वृ- शक्तिर्द्वेधा, धृति-संहननभेदात्। तत्र धृतिरूपां शारीरां च-संहननरूपामात्मगतां परगतां च शक्तिं ज्ञात्वा आचार्योऽन्यो वा गीतार्थस्तां न हापयतीत्यत्र चतुर्भङ्गी सूचिता सा चेयम्- आत्मगता शक्तिर्विद्यते न परगता १ परगता नात्मगता २ आत्मगताऽपि परगताऽपि ३ नात्मगता न परगता ४। तत्रप्रथमभङ्गे आचार्य आत्मनः शक्तिं न हापयति, परस्य पुनरशक्तत्वाद् यथायोगं प्रतिसेवनामनुजानीते। द्वितीयभङ्गे अशक्तत्वादात्मना प्रतिसेवते, परस्य तु समर्थत्वाद् नानुजानाति। तृतीयभङ्गे उभयोरपि शक्तिसद्भावादात्मनाऽपि न प्रतिसेवते परस्यापि न वितरति। चतुर्थभङ्गे पुनरुभयोरप्यशक्तत्वादात्मनाऽपि प्रतिसेवते परेणापि प्रतिसेवापयति। तथा यतना खलु त्रिपरिरया द्रष्टव्या, "रींश् गतौ" परि-समन्ताद् रयणं परिरयः-परिभ्रमणमित्यर्थः, त्रयः परिरया यस्यां सा त्रिपरिरया। किमुक्तं भवति ?-एषणीयाहारान्वेषणार्थं स्वग्रामादौ तिस्रो वाराः सर्वतः पर्यट्य यद्येषणीयं न लभते ततः पश्चाद् 'अलाभे' अप्राप्तौ पञ्चकपरिहाण्या यतते।। अथ फलद्वारम्-गीतार्थ प्रथममेव कार्यं प्रारभमाणः परिभावयति-एवमनुतिष्ठतो ममान्यस्य वा फलं भविष्यति ? न वा ? । तच्च फलं द्विविधम्। तदेवाह-

[भा.९५७] इह-परलोगे य फलं, इह आहाराइ इक्कमेक्कस्स।
सिद्धी सग्ग सुकुलता, फलं तु परलोइयं एयं ।।

वृ- इहलोकफलं परलोकफलं चेति फलं द्विधा। तत्रेहलोकफलमाहारादि; आदिशब्दाद् वस्त्रपात्रादि। तथा सिद्धिगमनं स्वर्गगमनं सुकुलोत्पत्तिश्च एतत् पारलौकिकं फलम्। 'एतद्'

Jain Education International For Private & Personal Use Only www.jainelibrary.org

द्वयमपि 'एकैकस्य' आत्मनः परस्य च परस्परोपकारेण यथा भवति तथा गीतार्थः समाचरति। यच्च गीतार्थोऽरक्त-द्विष्टः प्रतिसेवते तत्र नियमादप्रायश्चित्ती भवति ॥

आह केन पुनः कारणेनाप्रायश्चित्ती ? उच्यते-

[भा.९५८] खेत्तोयं कालोयं, करणमिणं साहओ उवाओऽयं।
कत्त त्ति य जोगि त्ति य, इय कडजोगी वियाणाहि ॥

वृ- यो न रागे न द्वेषे किन्तु तुला-दण्डवद् द्वयोरप मध्ये प्रवर्त्तते स ओजा भण्यते। क्षेत्रे-अध्वादौ ओजाः क्षेत्रौजाः, काले-अवमौदर्यादौ ओजाः कालौजाः, क्षेत्रे काले च प्रतिसेवमानो न राग-द्वेषाभ्यां दूष्यते इत्यर्थः। कथम्? इत्याह-यतःस गीतार्थ 'करणमिदं' 'सम्यक्क्रियेयम्, एवं क्रियमाणे महती कर्मनिर्जरा भवति' इति विमृशति। तथा ज्ञान-दर्शन-चारित्राणि साधनीयानि, तेषां च साधकोऽयमुपायः, यद् असंस्तरणे यतनया प्रलम्बसेवनम्। तथा 'कृतयोगी' गीतार्थ स कर्त्तेति च योगीति च भण्यते, "इय" एवं विजानीहि इति निर्युक्तिगाथासमासार्थ ॥

अथैनामेव विवृणोति-

[भा.९५९] ओयब्भूतो खित्ते, काले भावे य जं समायरइ।
कत्ता उ सो अकोप्पो, जोगीव जहा महावेज्जो ॥

वृ- यः 'ओजोभूतः' राग-द्वेषविरहितो गीतार्थ 'क्षेत्रे' अध्वादौ 'काले' दुर्भिक्षादौ 'भावे च' ग्लानत्वादौ प्रलम्बादिप्रतिसेवारूपं यत् किमपि समाचरति सः 'सम्यक्क्रियेयम्, साधकोऽयमुपायः' इत्यालोच्यकारी कर्त्ता 'अकोप्यः' अकोपनीयः, अदूषणीय इत्युक्तं भवति। क इव? इत्याह-'योगीव यथा महावैद्यः' इति, 'यथा' इति दृष्टान्तोपन्यासे, 'योगी' धन्वन्तरि, तेन च विभङ्गज्ञानबलेनाऽऽगामिनि काले प्राचुर्येण रोगसम्भवं दृष्ट्वा अष्टाङ्गायुर्वेदरूपं वैद्यकशास्त्र चक्रे, तच्च यथाम्नायं येनाधीतं स महावैद्य उच्यते। स च आयुर्वेदप्रामाण्येन क्रियां कुर्वाणो 'योगीव'वन्तन्तरिरिव न दूषणभाग् भवति, यथोक्तक्रियाकारिणश्च तस्य तत् चिकित्साकर्म सिध्यतिः एवमत्रापि योगी तीर्थकरः, तदुपदेशानुसारेणोत्सर्गा-ऽपवादाभ्यां यथोक्तां क्रियां कुर्वन् गीतार्थोऽपि न वाच्यतामर्हति ॥ अथ "कत्त त्ति य जोगि त्ति य" पदद्वयमेव प्रकारान्तरेण व्याख्याति-

[भा.९६०] अहवण कत्ता सत्था, न तेण कोविज्जती कयं किंचि।
कत्ता इव सो कत्ता, एवं जोगी वि नायव्वो ॥

वृ- "अहवण"त्ति अखण्डमव्ययं अथवार्थे वर्त्तते। कर्त्ता 'शास्ता' तीर्थकर उच्यते। यथा 'तेन' तीर्थकरेण कृतं कार्यं किञ्चिदपि नकोप्यते एवमसावपि गीतार्थो विधिना क्रियां कुर्वन् 'कर्त्ता इव' तीर्थकर इवाकोपनीयत्वात् कर्त्ता द्रष्टव्य। एवं योग्यपि ज्ञातव्यः। किमुक्तं भवति? - यथा तीर्थकरः प्रशस्तमनोवाक्कायोगं प्रयुञ्जानो योगी भण्यते, एवं गीतार्थोऽप्युत्सर्गा-ऽपवादबलवेत्ता अपवादक्रियां कुर्वाणोऽपि प्रशस्तमनोवाक्कययोगं प्रयुञ्जानो योगीव ज्ञातव्यः॥ एवमाचार्येणोक्ते शिष्यः प्राह-

[भा.९६१] किं गीयत्थो केवलि, चउव्विहे जानने य गहणे य।
तुल्ले राग-द्दोसे, अनंतकायस्स वज्जणया ॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

वृ- किं गीतार्थ केवली येन तीर्थकृत इव तस्य वचनं करणं चाकोपनीयम् ? । सूरिराह-ओमिति ब्रूमः । तथाहि-द्रव्यादिभेदाद् यत् चतुर्विधं ज्ञानं तद् यथा केवलिनस्तथा गीतार्थस्यापि; तथा यत् प्रलम्बानामेकानेकग्रहणविषयं विषमप्रायश्चित्तप्रदानम्, यश्च तत्र तुल्येऽपि जीवत्वे राग-द्वेषाभावः, या चाऽनन्तकायस्य वर्जना एतानि यथा केवली प्ररूपयति तथा गीतार्थोऽपीति द्वारगाथासमासार्थः ॥ विस्तरार्थं प्रतिपदं बिभणिषुराह-

[भा.९६२] सव्व नेयं चउहा, तं वेइ जिणो जहा तहा गीतो ।
चित्तमचित्तं मीसं, परित्तऽनंतं च लक्खणतो ॥

वृ- 'सर्वमपि' जगत्रयगतं ज्ञेयं चतुर्धा । तद्यथा-द्रव्यतः क्षेत्रतः कालतो भावतश्च । 'तत्' चतुर्विधमपि यथा 'जिनः' केवली ब्रूते तथा गीतार्थोऽपि । यद्वा "तं वेइ" त्ति 'तत्' चतुर्विधं ज्ञेयं यथा जिनः 'वेत्ति' जानाति तथा गीतार्थोऽपि श्रुतज्ञानी जानात्येव । तथाहि-यथा केवली सचित्त-मचित्तं मिश्रं परीत्तमनन्तं च लक्षणतो जानाति प्रज्ञापयति वा तथा श्रुतधरोऽपि श्रुतानुसारेणैव सचित्तलक्षणेन सचित्तं एवमचित्त-मिश्र-परीत्ता-ऽनन्तान्यपि स्वस्वलक्षणावैपरीत्येन जानाति प्ररूपयति चेति केवलीव द्रष्टव्यः ॥ आह केवली समस्तवस्तुस्तोमवेदी, श्रुतकेवली पुनः केवलज्ञानानन्ततमभागमात्रज्ञानवान् ततः कथमिव केवलितुल्यो भवितुमर्हति ? इत्याह-

[भा.९६३] कामं खलु सव्वन्नू, नाणेणऽहिओ दुवालसंगीतो ।
पन्नत्तीइ उ तुल्लो, केवलनाणं जओ मूयं ॥

वृ- काममनुमतं खल्वस्माकं 'सर्वज्ञः' केवली 'द्वादशाङ्गिनः' श्रुतकेवलिनः सकाशाद् ज्ञानेनाऽधिकः परं 'प्रज्ञप्तया' प्रज्ञापनया श्रुतकेवलिनः केवली 'तुल्यः' सदृशवाक्पर्यायः । कुतः ? इत्याह-यतः केवलज्ञानं 'मूकं' अमुखरम् । किमुक्तं भवति ? -यावतः पदार्थान् श्रुतकेवली भाषते तावत एव केवल्यपि, ये तु श्रुतज्ञानस्याऽविषयभूता भावाः केवलिनाऽवगम्यन्ते तेषामप्रज्ञापनीयतया केवलिनाऽपि वक्तुमशक्यत्वात् ॥ आह कियन्तः प्रज्ञापनीयाः ? कियन्तोवा अप्रज्ञापनीया भावाः ? इति तावद् वयं जिज्ञासामहे अतो निरुच्यतामेतद् भगवद्भिरित्याशङ्कयाह-

[भा.९६४] पन्नवणिज्जा भावा, अनंतभागो उ अनभिलप्पाणं ।
पन्नवणिज्जाणं पुण, अनंतभागो सुअ निबद्धो ॥

वृ- ये प्रज्ञापयितुं-वक्तुं शक्यन्ते ते प्रज्ञापनीयाः अभिलाप्या इत्येकोऽर्थ, ते च भू-भूधरविमान-ग्रह-नक्षत्रादयः । एतद्विपरीता अप्रज्ञापनीयाः । द्वावपि च राशी अनन्तौ, परं महान् परस्परं विशेषः । तथाहि-प्रज्ञापनीयाभावाः सर्वेऽपि समुदिताः सन्तोऽनभिलाप्यानां भावानामनन्तभागो भवति, अनन्ततमे भागे वर्त्तन्त इति भावः । तेषामपि प्रज्ञापनीयानां भावानामनन्ततम एव भागः 'श्रुते' द्वादशाङ्गलक्षणे सूत्ररचनया निबद्धः, अनन्तकस्याऽनन्तभेदभिन्नत्वादित्यभिप्रायः ॥ आह कथमेतत् प्रतीयते यथा 'प्रज्ञापनीयानामनन्तभागः श्रुते निबद्धः' ? उच्यते-

[भा.९६५] जं चउदसपुव्वधरा, छट्ठाणगया परोप्परं होंति ।
तेन उ अनंतभागो, पन्नवणिज्जाण जं सुत्तं ॥

वृ- 'यद्' यस्मात् चतुर्दशपूर्वधराः 'षट्स्थानगताः' अनन्तभागादिषट्स्थानवर्त्तिनः परस्परं भवन्ति । कथम् ? इति चेद् उच्यते-इह चतुर्दशपूर्वी चतुर्दशपूर्विणः किं तुल्यः ? किंवा हीनः ?

Jain Education International For Private & Personal Use Only www.jainelibrary.org

किं वाऽभ्यधिकः ? इति चिन्तायां निर्वचनं तुल्यो वा हीनो वा अभ्यधिको वा । यदि तुल्यस्तदा तुल्यत्वादेव नास्ति विशेषः । अथ हीनस्ततो यदपेक्षया हीनस्तमुद्दिश्याऽनन्तभागहीनो वा असङ्ख्येयभागहीनो वा सङ्ख्येयभागहीनो वा सङ्ख्येयगुणहीनो वा असङ्ख्येयगुणहीनो वा अनन्तगुणहीनो वा । अथाभ्यधिकस्ततो यदपेक्षयाऽभ्यधिकस्तं प्रतीत्याऽनन्तभागाभ्यधिको वा असङ्ख्येयभागाभ्यधिको वा सङ्ख्येयभागाभ्यधिको वा सङ्ख्येयगुणाभ्यधिको वा असङ्ख्येय-गुणाभ्यधिको वा अनन्तगुणाभ्यधिको वा । आह समाने सर्वेषामप्यक्षरलाभे षट्स्थानपतितत्वमेव कथं जाघटीति ? उच्यते-एकस्मात् सूत्रादनन्ता-ऽसङ्ख्येय-सङ्ख्येयगम्यार्थगोचरा ये मतिविशेषाः श्रुतज्ञानाभ्यन्तरवर्त्तिनस्तैः परस्परं षट्स्थानपतितत्वं न विरुध्यते । तदुक्तम्-

अक्खरलंभेण समा, ऊणहिया हुंति मइविसेसेहिं ।
ते पुन मईविसेसे, सुयनाणब्भंतरे जाण ॥

एवंविधं च षट्स्थानपतित्वं प्रज्ञापनीयानामनन्ततमभागमात्र एव श्रुतनिबद्धे घटमानकं भवति । यदि हि सर्व एव प्रज्ञापनीया भावाः श्रुते निबद्धा भवेयुस्तर्हि चतुर्दशपूर्विणोऽपि परस्परं तुल्या एव भवेयुर्न षट्स्थानपतिता इति । अत एवाह-'तेन' कारणेन यत् किमपि 'श्रुतं' चतुर्दशपूर्वरूपं तत् प्रज्ञापनीयानामनन्ततमो भागो वर्त्तते इति ॥

अथ यदुक्तं "प्रज्ञापनया द्वावपि तुल्यौ" तद्भावनामाह-

[भा.९६६]　केवलविन्नेयत्थे, सुयनाणेणं जिनो पगासेइ ।
सुयनाणकेवली वि हु, तेनेवऽत्थे पगासेइ ॥

वृ- केवलेन विज्ञेया येऽर्थास्तान् यावतः श्रुतज्ञानेन 'जिनः' केवली प्रकाशयति । इह च केवलिनः सम्बन्धी वाग्योग एव श्रोतॄणां भावश्रुतकारणत्वात् कारणे कार्योपचारात् श्रुतज्ञानमुच्यते, न पुनस्तस्य भगवतः किमप्यपरं केवलज्ञानव्यतिरिक्तं श्रुतज्ञानं विद्यते, "नट्ठम्मि उ छाउमत्थिए नाणे" इति वचनात् । श्रुतज्ञानकेवल्यपि तानेव तावतः 'तेनैव' श्रुतज्ञानेन 'अर्थान्' जीवादीन् प्रकाशयति । अतः "श्रुतकेवलि-केवलिनौ द्वावपि प्रज्ञापनया तुल्यौ" इति स्थितम् । तदेवं यथा केवली द्रव्य-क्षेत्र-काल-भावैर्वस्तु जानाति तथा गीतार्थोऽपि जानीते ॥ अत्र पुनः प्रलम्बाधिकाराद् द्रव्यतः परीत्तमनन्तं वा येन लक्षणेन जानाति तदभिधित्सुराह-

[भा.९६७]　गूढछिरागं पत्तं, सच्छीरं जं च होइ निच्छीरं ।
जं पि य पणट्ठसंधिं, अनंतजीवं वियाणाहि ॥

वृ- यत् पत्रं सक्षीरं निक्षीरं वा 'गूढशिराकं भवति' गूढाः-गुप्ता अनुपलक्ष्याः शिराः-स्नायवो यस्य तद् गूढशिराकम्, तथा यदपि च 'प्रनष्टसन्धिकं' सर्वथाऽनुपलक्ष्यमाणपत्रार्द्धद्वयसन्धिः, तदेवंविधं पत्रम् 'अनन्तजीवम्' अनन्तकायिकं विजानीहीति ॥

अथ मूल-स्कन्धादीनां सर्वेषामप्यनन्तकायत्वे लक्षणमाह-

[भा.९६८]　चक्कागं भज्जमाणस्स, गंठी चुण्णघंनो भवे ।
पुढविसरिसेण भेएणं, अनंतजीवं वियाणाहि ॥

वृ- यस्य मूलादेर्भज्यमानस्य चक्राकारो भङ्गो भवति सम इत्यर्थः । तथा 'ग्रन्थि' पर्व सामान्यतो भङ्गस्थानं वा स यस्य चूर्णघनो भवति । कोऽर्थः ? -यस्य भज्यमानस्य ग्रन्थेर्घनश्चूर्णः

Jain Education International　For Private & Personal Use Only　www.jainelibrary.org

उड्डीयमानो दृश्यते। पृथिवी नाम केदाराद्युपरिवर्त्तिनी शुष्ककोप्पटिका श्लक्ष्णखटिकानिर्मिता वा, यथा तस्या भिद्यमानायाः समो भेदो भवति एवं समभेदेन भिद्यमानं तदेवंविधं मूलादिकमनन्तजीवं विजानीहि ॥ इदमेव स्पष्टयन्नाह-

[भा.९६९] जस्स मूलस्स भग्गस्स, समो भंगो पदीसई।
अनंतजीवे उ से मूले, जे याऽवऽन्ने तहाविहे ॥

वृ-यस्य मूलस्य भग्नस्य समो भङ्गः प्रदृश्यते अनन्तजीवं तु तद् मूलम्। यश्च 'अन्योऽपि' स्कन्धादिकस्तथाविधः समभङ्गेन भज्यते सोऽप्यनन्तजीवो ज्ञातव्य इति ॥

[भा.९७०] जस्स मूलस्स भग्गस्स, हीरो भंगे पदिस्सए।
परित्तजीवे उ से मूले, जे याऽवऽन्ने तहाविहे ॥

वृ-यस्य मूलस्य भग्नस्य 'हीरः' तन्तुकविशेषो भङ्गे वंशस्येव प्रदृश्यते परीत्तजीवं तु तद् मूलम्। यश्च 'अन्योऽपि' स्कन्धादिकस्तथाविधो भङ्गे दृश्यमानहीरः सोऽपि प्रत्येकजीव इति ॥

[भा.९७१] जस्स मूलस्स कट्ठातो, छल्ली बहलतरी भवे।
अनंतजीवा उ सा छल्ली, जा याऽवऽन्ना तहाविहा ॥

वृ-यस्य मूलस्य सम्बन्धिनः 'काष्ठात्' सारात् 'छल्ली' बाह्या त्वक् 'बहलतरा' स्थूलतरा भवेत्, यथा शतावर्या, अनन्तजीवा तु सा छल्ली। या चान्याऽपि तथाविधा। काष्ठमपि तस्यानन्तजीवं द्रष्टव्यम् ॥

[भा.९७२] जस्स मूलस्स कट्ठातो, छल्ली तणुयतरी भवे।
परित्तजीवा तु सा छल्ली, जा याऽवऽण्णा तहाविहा ॥

वृ- यस्य मूलस्य काष्ठात् छल्ली 'तनुकतरा' श्लक्ष्णतरा भवेत् परीत्तजीवा तु सा छल्ली, यथा सहकारादेः, या चान्याऽपि तथाविधा ॥ गतं द्रव्यतो लक्षणम्। अथ क्षेत्रत आह-

[भा.९७३] जोअनसयं तु गंता, अनहारेणं तु भंडसंकंती।
वाया-ऽगनि-धूमेण य, विद्धत्थं होइ लोणाई ॥

वृ-लवणादिकं स्वस्थानाद् गच्छत् प्रतिदिवसं बहुबहुतरादिक्रमेण विध्वस्यमानं योजनशतात् परतो गत्वा सर्वथैव 'विध्वस्तम्' अचित्तं भवति। आह शस्त्राभावे योजनशतगमनमात्रेणैव कथमचित्तीभवति? इत्याह-अनाहारेण, यस्य यद् उत्पत्तिदेशाधिकं साधारणं तत् ततो व्यवच्छिन्नं स्वोपष्टम्भकाहारव्यवच्छेदाद् विध्वस्यते। तच्च लवणादिकं भाण्डसङ्क्रान्त्या पूर्वस्मात् पूर्वस्माद् भाजनादपरापरभाजनेषु, यद्वा पूर्वस्या भाण्डशालाया अपरस्यां भाण्डशालायां सङ्क्रम्यमाणं विध्वस्यते। तथा वातेन वा अग्निना वा महानसादौ धूमेन वा लवणादिकं विध्वस्तं भवति ॥

"लोणाई" इत्यत्र आदिशब्दादमी द्रष्टव्याः-

[भा.९७४] हरियाल मनोसिल पिप्पली य खज्जूर मुद्दिया अभया।
आइन्नमणाइन्ना, ते वि हु एमेव नायव्वा ॥

वृ-हरितालं मनःशिला पिप्पली च खर्जूरः एते प्रतीताः, 'मुद्रिका' द्राक्षा 'अभया' हरीतकी। एतेऽपि 'एवमेव' लवणवद् योजनशतगमनादिभिः कारणैरचितीभवन्तो ज्ञातव्याः। परमेकेऽत्राचीर्णा अपरेऽनाचीर्णा। तत्र पिप्पली-हरीतकीप्रभृतय आचीर्णा इति कृत्वा गृह्यन्ते।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

खर्जूर-मुद्रिकादयः पुनरनाचीर्णा इति न गृह्यन्ते ॥ अथ सर्वेषां सामान्येन परिणमनकारणमाह-

[भा.९७५] आरुहणे ओरुहणे, निसियण गोणादिणं च गाउम्हा ।
भुम्माहारच्छेदे, उवक्कमेणं च परिणामो ॥

वृ- शकटे गवादिपृष्ठेषु च लवणादीनां यद् भूयो भूय आरोहणमवरोहणं च, तथा यत् तस्मिन् शकटादौ लवणादिभरोपरि मनुष्या निषीदन्ति, तेषां गवादीनां च यः कोऽपि पृष्ठादिगात्रोष्मा तेन च परिणामो भवति। तथा यो यस्य भौमादिकः-पृथिव्यादिक आहारस्तद्यवच्छेदे तस्य 'परिणामः' उपक्रमः शस्त्रम्, उपक्रम्यन्ते जीवानामायूंषि अनेनेति व्युत्पत्तेः। तच्च शस्त्र त्रिधा-स्वकायशस्त्र वा पाण्डुभूमस्येति । परकायशस्त्र यथा-अग्निरुदकस्य, उदकं वा अग्नेरिति । तदुभयशस्त्र यथा-उदकमृत्तिका शुद्धोदकस्येत्यादि। एवमादीनि सचित्तवस्तूनां परिणमनकारणानि मन्तव्यानि॥

[भा.९७६] चोएई वनकाए, पगए लोणादियाण किं गहणं ।
आहारेणऽहिगारो, तस्सुवकारी अतो गहणं ॥

वृ- शिष्यो नोदयति-'वनस्पतिकाये' प्रलम्बलक्षणे प्रकृते लवणादीनां पृथिवीकायिकानां किमर्थमत्र ग्रहणं क्रियते ? इति । सूरिराह-आहारेण तावदत्र सूत्रेऽधिकारः, तस्य चाहारस्य लवणमतिशयेनोपकारि, तद्विरहितस्याऽऽहारस्य नीरसत्वात्, अतस्तद्ग्रहणमिति ॥ यद्येवं ततः-

[भा.९७७] छहि निप्फज्जइ सो ऊ, तम्हा खलु आनुपुव्वि किं न कया ।
पाहन्नं बहुयत्तं, निप्फत्ति सुहं च तो न कमो ॥

वृ- 'षड्भिः' पृथिवीकायादिभि 'सः' आहारो निष्पद्यते अतः षडपि कायाः किं नानुपूर्व्या सूत्रे 'कृताः' गृहीताः ?, यथा- "नो कप्पइ निग्गंथाण वा निग्गंथीण वा पुढविकाइए गिण्हित्तए" इत्यादि। आचार्य प्राह-तस्मिन्नाहारे वनस्पतेः प्राधान्यम्, मुख्यतया तस्यैवाऽऽहरणीयत्वात्। तथा 'बहुत्वम्' उपयोगबाहुल्यं वनस्पतिरागच्छति । वनस्पतिकायेन च यथा सुखमाहारस्य निष्पत्तिर्न तथा पृथिव्यादिभिः कायैः। तत एभि कारणैर्न 'क्रमः' पृथिव्यादीनामानुपूर्वीग्रहणलक्षणः कृतः, किन्तु केवलस्यैव वनस्पतेः सूत्रे ग्रहणं कृतमिति ॥ गतं क्षेत्रतो लक्षणम्। अथ कालत आह-

[भा.९७८] उप्पल-पउमाइं पुण, उण्हे दिन्नाइँ जाम न धरिंती ।
मोग्गरग-जूहियाओ, उण्हे छूढा चिरं होंति ॥

वृ- उत्पलानि पद्मानि च 'उष्णे' आतपे दत्तानि "यामं प्रहरमात्रं कालं 'न ध्रियन्ते' नावतिष्ठन्ते किन्तु प्रहरादर्वागेवाचित्तीभवन्ति । 'मुद्गरकाणि' मगदन्तिकापुष्पाणि यूथिकापुष्पाणि चोष्णयोनिकत्वाद् उष्णे क्षिप्तानि चिरमपि कालं भवन्ति, सचित्तान्येव तिष्ठन्तीति भावः ॥

[भा.९७९] मगदंतियपुप्फाइं, उदए छूढाइँ जाम न धरिंती ।
उप्पल-पउमाइं पुण, उदए छूढा चिरं होंति ॥

वृ- मगदन्तिकापुष्पाणि उदके क्षिप्तानि 'यामं' प्रहरमपि न ध्रियन्ते। उत्पल-पद्मानि पुनरुदके क्षिप्तानि चिरमपि भवन्ति, उदकयोनिकत्वात् ॥ गतं कालतो लक्षणम्। अथ भावत आह-

[भा.९८०] पत्ताणं पुप्फाणं, सरडुफलाणं तहेव हरियाणं ।
विंटम्मि मिलाणम्मी, नायव्वं जीवविप्पजढं ॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

वृ-पत्राणां पुष्पाणां 'सरडुफलानाम्' अबद्धास्थिकफलानां तथैव 'हरितानां' वास्तुलादीनां सामान्यतस्तरुणवनस्पतीनां वा 'वृन्ते' मूलनाले म्लाने सति ज्ञातव्यम्, यथा-जीवविप्रमुक्तमेतत् पत्रादिकम् ।। उक्तं भावतोऽपि लक्षणम् । तदुक्तौ च समर्थितं चतुर्विधज्ञानद्वारम् ।

अथ ग्रहणद्वारमाह-

[भा.९८१] चउभंगो गहण पक्खेवए अ एगम्मि मासियं लहुयं ।
गहणे पक्खेवम्मिं, होंति अनेगा अनेगेसु ।।

वृ-चतुर्भङ्गी ग्रहणे प्रक्षेपके च द्रष्टव्या । तद्यथा-एकं ग्रहणं एकः प्रक्षेपकः १ एकं ग्रहणमनेके प्रक्षेपकाः २ अनेकानि ग्रहणानि एकः प्रक्षेपकः ३ अनेकानि ग्रहणानि अनेके प्रक्षेपकाः ४ । अत्र च हस्तेन यत् प्रलम्बानामादानं तद् ग्रहणम्, यत् पुनर्मुख प्रवेशनं स प्रक्षेपकः । तत्र प्रथमभङ्गे एकस्मिन् ग्रहणे प्रक्षेपके च प्रत्येकं मासलघु । द्वितीयभङ्गे एकस्मिन् ग्रहणे मासलघु, प्रक्षेपस्थाने यावतःप्रक्षेपकान् करोति तावन्ति मासलघूनि । तृतीयभङ्गे तु यावन्ति ग्रहणानि तावन्ति मासलघुकानि, प्रक्षेपविषयस्त्वेको लघुमासः । चतुर्थभङ्गेऽनेकेषु ग्रहणेष्वनेकेषु प्रक्षेपकेषु चानेकान्येव मासलघुकानि । एतच्चासामाचारीनिष्पन्नं मन्तव्यम् । यत् पुनर्जीवघातनिष्पन्नं चतुर्लघुकादिकं तत् स्थितमेव । एतच्च ग्रहण-प्रक्षेपकनिष्पन्नं प्रायश्चित्तं यथा केवली जानाति तथा गीतार्थोऽपीति।। गतं ग्रहणद्वारम् । अथ तुल्ये राग-द्वेषाभाव इति द्वारम् । तत्र शिष्यः प्राह-

[भा.९८२] पडिसिद्धा खलु लीला, बिइए चरिमे य तुल्लदव्वेसु ।
निद्दयता वि हु एवं, बहुघाए एगपच्छित्तं ।।

वृ- अहो ! भगवन्तो राग-द्वेषाध्यासितमनसः । तथाहि-'तुल्यद्रव्येषु' समानेऽपि प्रलम्बद्रव्याणां जीवत्वे इत्यर्थः द्वितीयभङ्गे एकफलस्य चरमभङ्गे तु बहूनां फलानां बहून् वारान् प्रक्षेपं करोतीति बहूनि मासिकानि दत्थ, तृतीयभङ्गे तु बहूनि वनफलनि गृहीत्वा छित्वा वा एकः प्रक्षेपक इति कृत्वैकं मासिकं ददध्वे, तद् मम मनसि प्रतिभासते नूनं लीलयैव युष्माभि प्रतिषिद्धा न पुनर्जीवोपघातः । एवं च भगवतां द्वितीयभङ्गे प्रलम्बजीवानामुपरि रागो बहुमासिकदानात्, तृतीयभङ्गे तु द्वेषः एकस्यैव मासिकस्य दानात्; यद्वा द्वितीयभङ्गे गृह्णतां शिष्याणामुपरि द्वेषः, तृतीये तु रागः, कारणं प्राग्वदेव । किञ्च युष्माकमेवं 'बहुघाते' युगपद् बहूनां मुखे प्रक्षिप्य भक्षणे एकमेव मासिकं प्रायश्चित्तं ददता निर्दयता भवति ।।

अथ राग-द्वेषाभावं समर्थयन् सूरि परिहारमाह-

[भा.९८३] चोयग ! निद्दयतं चिय, नेच्छंता विडसणं पि नेच्छामो ।
निव मिच्छ छगल सुरकुड, मता-ऽमताऽऽलिंप भक्खणता ।।

वृ-हे नोदक ! निर्दयतामेवानिच्छन्तो वयं विदशनमपि नेच्छामः, विविधं दशनं-भक्षणं विदशनं लीला इत्यर्थः । अत्र चाचार्या म्लेच्छद्वयदृष्टान्तं वर्णयन्ति- जहा एगस्स रन्नो दो मिच्छा ओलग्गगा । तेन रन्ना तेसिं मिच्छाणं तुट्ठेण दो सुरकुडा दो य छगला दिन्ना । ते तेहिं गहिया । तत्थ एगेणं छगलो एगप्पहारेणं मारितूण खइओ दोहिं तिहिं वा दिनेहिं । बितिओ एक्केक्कं अंगं छेत्तुं खायति, तं पि सो छेदथामं लोणेणं आसुरीहिं वा छगणेण वा लिंपइ । एवं तस्स छगलस्स जीवंतस्सेव गाताणि छेत्तुं खइयाणि, मतो य । पढमस्स एगप्पहारेण एक्को वधो । बितियस्स जत्तिएहिं छेदेहिं

Jain Education International For Private & Personal Use Only www.jainelibrary.org

मरति तत्तिया वधा, लोगे य पावो गणिज्जति। एवं जेन पलंबस्स एक्को पक्खेवो कओ तस्स एक्कं मासियं, जो विडसंतो खायति तस्स तत्तिया पच्छित्ता, घनचिक्कणाए य पारितावणियाए किरियाए वट्टति। विडसना नाम आसादेंतो थोवं थोवं खायइ ॥ अत एवाह-"निव मेच्छ" इत्यादि। कस्यचिद् नृपस्य द्वौ म्लेच्छाववलगकौ। तेन तुष्टेन तयोः छगलकौ सुराकुटौ च दत्तौ। तत्रैकेन च्छगलकस्य मृतस्य द्वितीयेन पुनरमृतस्यैवैकैकमङ्गं छित्वा लवणादिभिरालिम्प्य भक्षणं कृतमिति॥ किञ्च-

[भा.९८४] अच्चित्ते वि विडसणा, पडिसिद्धा किमु सचेयणे दव्वे।
कारणे पक्खेवम्मि उ, पढमो तइओ अ जयणाए॥

वृ-अचित्तेऽपि द्रव्ये विदशना प्रतिषिद्धा किं पुनः सचेतने द्रव्ये?, सचित्तं प्रलम्बं सुतरां विदशनया न भक्षणीयमिति भावः। यत्र पुनः कारणे सचित्तं मुखे प्रक्षिपति तत्रापि 'प्रथमभङ्गः' एकग्रहणैकप्रक्षेपरूपः 'तृतीयभङ्गश्च' अनेकग्रहणैकप्रक्षेपरूपो यतनया सेवितव्यः॥

अथानन्तकायस्य वर्जनेति द्वारम्। तत्र प्रथमतो द्वारगाथामाह-

[भा.९८५]पायच्छित्ते पुच्छा, उच्छुकरण महिड्ढि दारु थली य दिट्ठंतो।
चउत्थपदं च विकडुभं पलिमंथो चेवऽनाइन्नं॥

वृ- प्रथमं प्रायश्चित्ते पृच्छा कर्त्तव्या। ततः 'इक्षुकरणेन' इक्षुवाटेन 'महर्द्धिकेन' राज्ञा "दारु" त्ति दारुभारेण 'स्थल्या च' द्रेवद्रोण्या दृष्टान्तः कर्त्तव्यः। चतुर्थं च-द्रव्यतोऽपि भावतोऽपि भिन्नमिति यत् पदं तत्र त्रीणि द्वाराणि-विकटुभं परिमन्थः अनाचीर्णमिति समासार्थः॥

अथ विस्तरार्थमाह-

[भा.९८६] चोएइ अजीवत्ते, तुल्ले कीस गुरुगो अनंतम्मि।
कीस य अचेयणम्मी, पच्छित्तं दिज्जए दव्वे॥

वृ- शिष्यो नोदयति-भावतो भिन्नं द्रव्यतोऽभिन्नं भावतो भिन्नं द्रव्यतोऽपि भिन्नमिति तृतीय-चतुर्थयोर्भङ्गयोः परीत्ते अनन्ते च अजीवत्वे तुल्येऽपि कस्माद् अनन्ते गुरुमासः परीत्ते लघुमासो दीयते? कस्माच्चाचेतने द्रव्ये परीत्तेऽनन्ते वा जीवोपघातं विनाऽपि प्रायश्चित्तं दीयते? अपरं च राग-द्वेषवन्तो भवन्तः, यदचेतने परीत्ते मासलघु अनन्तेऽचेतनेऽपि मासगुरु प्रयच्छत॥ तत्र यत् तावद् नोदितम् "कस्मात् परीत्ते मासलघु अनन्ते मासगुरु?" तद्विषयं समाधानमाह-

[भा.९८७] साऊ जिनपडिकुट्ठो, अनंतजीवाण गायनिप्फन्नो।
गेही पसंगदोसा, अनंतकाए अतो गुरुगो॥

वृ-परीत्ताद् अनन्तकायः स्वादुः स्वादुतरः। तथा जिनैः-तीर्थकरैः प्रतिक्रुष्टः, 'कारणेऽपि परीत्तं ग्रहीतव्यं नानन्तम्' इति जिनोपदेशात्। अनन्तानां च जीवानां गात्रेण स निष्पन्नः। सुस्वादुत्वाच्चाधिकतरा तत्रगृद्धिर्भवति। तस्याश्च प्रसङ्गेनानेषणीयमपि गृह्णीयादित्यादयो बहवो दोषाः, अतोऽनन्तकायेऽचित्तेऽपि गुरुको मासः प्रायश्चित्तम्। एवं च द्रव्यानुरूपं प्रायश्चित्तं ददतामस्माकं राग-द्वेषावपि दूरापास्तप्रसराविति॥ यच्चोक्तम् "कस्मादचित्ते प्रायश्चित्तं प्रयच्छत?" इत् तत्रापि समाधीयते-अनवस्थाप्रसङ्गनिवारणार्थं सजीवग्रहणपरिहारार्थं चाचित्तेऽपि प्रायश्चित्तप्रदानमुपपन्नमेव। तथा चात्राचार्या इक्षुकरणदृष्टान्तमुपदर्शयन्ति-

Jain Education International For Private & Personal Use Only www.jainelibrary.org

[भा.९८८] न वि खाइयं न वि वइं, न गोण-पहियाइए निवारेइ।
इति करणभई छिन्नो, विवरीय पसत्थुवणओ य ॥

वृ- एगेन कुटुंबिणा उच्छुकरणं रोवियं। तस्स परिपेरंतेण तेण न वि खाइया कया, न वि वईए फलिहियं, न वि गोणाई निवारेइ, नावि पहिए खायंते वारेइ। ताहे तेहिं गोणाईहिं अवारिज्जमाणेहिं तं सव्वं उच्छाइयं। एवंकरिंतो सो कम्मकराण भईए छिन्नो। जं च परायय़ं खेत्तं वाविंतेणं वुत्तं 'एत्तियं ते दाहं' ति तं पि दायव्वं। एवं सो उच्छुकरणे विणट्ठे मूलच्छिन्ने जं जस्स देयं तं अदेंतो बद्धो विनट्ठो य। एस अप्पसत्थो ॥ अन्नेण वि उच्छुकरणं कयं। सो विवरीओ भाणियव्वो। खाइयादि सव्वं कयं। जे य गोणाई पडंति ते तहा उत्रासयति जहा अन्ने वि न ढुक्कंति। एस पसत्थो ॥ अथाक्षरार्थः-कश्चित् कुटुम्बी इक्षुकरणं रोपयित्वा नापि स्वातिकां नापि वृतिं कृतवान्, न वा गो-पथिकादीन् स्वादतो निवारयति। 'इति' एवंकुर्वन् इक्षुकरणस्य सम्बन्धिनी या भृतिः-कर्मकरादिदेयं द्रव्यं तया 'छिन्नः' त्रुटितः सन् विनष्टः। एतद्विपरीतश्च प्रशस्तदृष्टान्तो वक्तव्यः। उपनयश्च द्वयोरपि दृष्टान्तयोर्भवति ॥ स चायम्-

[भा.९८९] को दोसो दोहि भिन्ने, पसंगदोसेण अणरुई भत्ते।
भिन्नाभिन्नग्गहणे, न तरइ सजिए वि परिहरिउं ॥

वृ- कश्चिद् निर्धर्मा प्रलम्बानि ग्रहीतुकामः "को दोषः स्यात् 'द्वाभ्यां' द्रव्य-भावाभ्यां भिन्ने प्रलम्बे गृह्यमाणे ?" इति परिभाष्य द्रव्य-भावभिन्नानि प्रलम्बान्यानीतवान्। यदि च तस्य प्रायश्चित्तं न दीयते तदा स निर्विशङ्कं भूयो भूयस्तानि गृह्णाति। ततश्च लब्धप्रलम्बरसास्वादस्य प्रसङ्गदोषेण तैः प्रलम्बैरलभ्यमानैस्तस्य भक्ते 'अरुचिः' अरोचको भवति। ततो यानि भावतो भिन्नानि द्रव्यतोऽभिन्नानि तेषां ग्रहणे प्रवर्त्तते। यदा तान्यपि न लभते तदाऽसौ प्रलम्बरसगृद्धः सजीवान्यपि प्रलम्बानि न शक्नोति परिहर्तुमिति। विशेषयोजना त्वेवम्-कुटुम्बिस्थानीयः साधुः, इक्षुकरणस्थानीयं चारित्रम्, परिखास्थानीया अचित्तप्रलम्बादिनिवृत्ति, वृतिस्थानीया गुर्वाज्ञा, गो-पथिकादिस्थानीया रसगौरवादयः, तैरुपद्रूयमाणं प्रलम्बग्राहिणश्चारित्रमचिरादेव विनश्यति, यथा चासौ कर्षक एकभविकं मरणं प्राप्तस्तथाऽयम्पयनेकानि जन्म-मरणानि प्राप्नोतीत्येष अप्रशस्त उपनयः। प्रशस्तः पुनरयम्-यथा तेन द्वितीयकर्षकेण कृतं सर्वमपि परिखादिकम्, उत्त्रासिता गवादयः, रक्षितं स्वक्षेत्रम्, सञ्जातोऽसावैहिकानां कामभोगानामाभागी; एवमत्रापि केनापि साधुना द्रव्यभावभिन्नं प्रलम्बमानीतमाचार्याणामालोचितम्, तैराचार्यैः स साधुरत्यर्थं खरण्टितः॥ ततश्च-

[भा.९९०] छड्डाविय-कयदंडे, न कमेति मती पुणो वि तं घेत्तुं।
न य से वड्ढइ गेही, एमेव अनंतकाए वि ॥

वृ- स साधुराचार्यैः प्रलम्बानि च्छर्दापितः-त्याजितः प्रायश्चित्तदण्डश्च तस्य कृतः, ततश्च च्छर्दापित-कृतदण्डस्य पुनरपि 'तत्' प्रलम्बजातं ग्रहीतुं मति 'न क्रमते' नोत्सहते, 'न च' नैव "से" तस्य प्रलम्बे गृद्धिर्वर्धते, ततश्चासौ विरतिरूपया परिखया गुर्वाज्ञारूपया वृत्त्या परिक्षिप्तभिक्षुकरणकल्पं चारित्रं रसगौरवादिगो-पथिकैरुपद्रूयमाणं सम्यक् परिपालयितुमीष्टे, जायते चैहिकाऽऽमुष्मिककल्याणपरम्पराया भाजनम्। एवं तावत् प्रत्येके भणितम्,

Jain Education International For Private & Personal Use Only www.jainelibrary.org

अनन्तकायेऽप्येवमेव द्रष्टव्यमिति ।। अथ महर्द्धिक-दारुभरदृष्टान्तद्वयमाह-

[भा.९९१] कन्नंतेपुर ओलोयणेण अनिवारियं विनट्ठं तु ।
दारुभरो य विलुत्तो, नगरद्दारे अवारिंतो ।।

[भा.९९२] बितिएणोलोयंती, सव्वा पिंडित्तु तालिता पुरतो ।
भयजननं सेसाण वि, एमेव य दारुहारी वि ।।

वृ- महिड्ढिओ राया भण्णइ । तस्स कन्नंतेपुरं वायायणेहिं ओलोएइ तं न को वि वारेइ । ताहे तेन पसंगेणं निग्गंतुमाढत्ताओ तह वि कोति वारेइ । पच्छा विडपुत्तेहिं समं आलावं काउमाढत्ताओ । एवं आवारिज्जंतीओ विनट्ठाओ ।।

दारुभरदिट्ठंतो- एगस्स सेट्ठिस्स दारुभरिया भंडी पविसति । नगरदारे एगं दारुअं सयं पडियं तं चेडरूवेण गहितं । तं पासित्ता 'न वारियं' ति काउं अन्नेन चेडरूवेण भंडीओ चेव गहियं । तं अवारिज्जमाणं पासित्ता सव्वो दारुभरो विलुत्तो लोगेणं । एते अपसत्था । इमे पसत्था- बितिएणं अंतेपुरवालगेण एगा ओलोयंती दिट्ठा, ताहे तेन सव्वाओ पिंडित्ता तासिं पुरओ सा तालिता । ताहे सेसियाओ वि भीयाओ पलोएंति । एवं अंतेउरं रक्खियं ।। एवं पढमदारुहारी वि पिट्टित्ता दारुभरो वि रक्खितो ।।

अथाक्षरगमनिका-कन्यान्तः पुरम् 'अवलोकनेन' वातायनेनाऽवलोकमानमनिवारितं सत् क्रमेण विटपुत्रैः सार्द्धमालापकरणाद् विनष्टम् । एवं दारुभरोऽपि नगरद्वारे दारूणि गृह्णन्ति चेट्टरूपाण्यवारयति शाकटिके सर्वोऽपि 'विलुप्तः' मुषितः । द्वितीयेन पुनरन्तः पुरपालकेनैका कन्यका अवलोकमाना दृष्टा, ततः सर्वा अपि कन्यकाः पिण्डीकृत्य तासां पुरतः ताडिता, यथा शेषाणामपि भयजननं भवति । एवमेव च दारुहार्यपि प्रथमः कुट्टितो यथा शेषा बिभ्यतीत्ति ।। स्थलीदृष्टान्तमाह-

[भा.९९३] थलि गोणि सयं मुय भक्खणेण लद्धपसरा थलिं तु पुणो ।
घातेसुं बितिएहि उ, कोट्टग बंदिग्गह नियत्ती ।।

वृ- थली नाम देवद्रोणी । ततो गावीणं गोयरं गयाणं एक्का जरग्गवी मया । सा पुलिंदेहिं 'सयं मय' त्ति खइया । कहियं गोवालएहिं देवद्रोणीपरिचारगाणं । ते भणंति-जइ खइया खइया नाम । पच्छा ते पसंगेणं अवारिज्जंता अप्पणा चेव मारेउमारद्धा । पच्छा तेहिं लद्धपसरेहिं थली चेव घातिता । एस अपसत्थो ।। इमो पसत्थो-तहवे गावीणं गोयरं गयाणं एक्का मया । सा पुलिंदेहिं खइया । गोवालेहिं सिट्ठं परिचारगाणं । तेहिं गंतूणं बिइयदिवसे तं कोट्टं भग्गं 'मा पसंगं काहिंति' त्ति काउं । तत्थ बंदिग्गहो कओ ।। अथाक्षरार्थ-स्थलीसम्बन्धिनीनां गवां गोचरगतानामेका जरद्गवी स्वयं मृता । तस्या भक्षणेन लब्धप्रसराः पुलिन्दाः पुनः स्वयमेवागम्य स्थलीं घातितवन्तः । द्वितीयैः पुनर्देवद्रोणीपरिचारकैः 'कोट्टकं' पुलिन्दपल्ली तद् गत्वा भग्नं 'मा भूत् प्रसङ्गः' इति कृत्वा, तेषां पुलिन्दानां बन्दिगृहे निवृत्ति कृता । उपनययोजना "को दोसो दोहि भिन्ने, पसंगदोसेन अनरुई भत्ते" इत्यादि प्रागुक्तानुसारेण सर्वत्रापि द्रष्टव्या ।।

अथ विकडुभ-पलिमन्थद्वारे व्याख्यानयति-

[भा.९९४] विकडुभमग्गने दीहं, च गोयरं एसणं च पिल्लिज्जा ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

निप्पिसिय सोंड नायं, मुग्गछिवाडीए पलिमंथो ॥

वृ-इह प्रलम्बरसभिन्नदाढतया प्रलम्बैर्विना केवलः कूरो यदा न प्रतिभासते, ततोऽन्यस्मिन् भक्तपाने लब्धेऽपि विकटुभं-शालनकं तद् मार्गयन् अलभमानो दीर्घं गोचरं करोति, एषणीयं वा अलभमानोऽनेषणीयं विकटुभं गृह्णन्नेषणां प्रेरयेत्। अत्र च 'निष्पिशितः' पिशितवर्जी 'शौण्डः' मद्यपः 'ज्ञातम्' उदाहरणम्-

जहा एगो अमंसभक्खी पुरिसो। तस्स य मज्जपाएहिं सह संसग्गी। अन्नया तेहिं भणिओ-मज्जे निज्जीवे को दोसो ?। तेहिं य सो सवहं गाहितो। तओ लज्जमाणो एगंते परेण आनियं पिबइ। पच्छा लद्धपसरो बहुजणमज्झे वीहीए वि चत्तलज्जो पाउमाढत्तो। तेसिं पुन मंसं विलंको उपदंश इत्यर्थः। इयरस्स पुण चिब्भिड-चणय-पप्पडगाईणि। ताणि य सव्वकालं न भवंति। पुणो तेहिं भणियं-केरिसं मज्जपाणं विणा विलंकेणं ? परमारिए य मंसे को दोसो ? खायसु इमं। तत्थ वि सो सवहं गाहितो। 'परमारिए नत्थि दोसो' त्ति खायइ। पच्छा लद्धरसो कढिणचित्तीभूतो निद्धंधसपरिणामो अप्पणा वि मारउं खायइ। निस्सूगो जाओ। उक्तं च-

करोत्यादौ तावत् सघृणहृदयः किञ्चिदशुभं
द्वितीयं सापेक्षो विमृशति च कार्यं च कुरुते।
तृतीयं निशङ्को विगतघृणमन्यत् प्रकुरुते।
ततः पापाभ्यासात् सततमशुभेषु प्ररमते ॥

जहा सो सोंडओ विलंकेण विना न सक्केइ अच्छिउं, एवं तस्स वि पलंबेहिं विना कूरो न पडिहाइ। तस्स एरिसी गेही तेसु जायइ जीए एगदिणमवि तेहिं विना न सक्केइ अच्छिउं। पच्छा सणियं सयं चेव रुक्खेहिंतो गिण्हइ त्ति। तथा मुग्गछिवाडी-कोमला मुद्गफली, उपलक्षणत्वाद् इक्षुखण्ड-तिन्दुकादिकमन्यदपि यत् तुच्छौषधिरूपं तस्मिन् भक्ष्यमाणे 'परिमन्थः' सूत्रार्थव्याघातो भवति, न पुनः काचित् तृप्तिमात्रा सञ्जायते। अपि च कदाचिदात्मविराधनाऽपि भवेत्। तथा चात्र दृष्टान्तः- एक्का अविरइया मुग्गखेत्ते कोमलाओ मुग्गफलियाओ खायंती रन्ना आहेडएणं वच्चंतेण दिट्ठा, एंतेण वि दिट्ठा सा तहेव। तस्स कोउयं जायं 'केत्तियाओ पुण खतिया होज्ज ?' त्ति पोट्टं से फाडियं। जाव नवरं दिट्ठं फेणरसो। एवं विराहणा होज्जा ॥ गते विकटुभ-परिमन्थद्वारे।

अथानाचीर्णद्वारमाह-

[भा.९९५] अवि य हु सव्व पलंबा, जिन-गणहरमाइएहऽनाइन्ना।
लोउत्तरिया धम्मा, अनुगुरुणो तेन ते वज्जा ॥

वृ- 'अपि च' इति दूषणाभ्युच्चये, पूर्वोक्ता दोषास्तावत् स्थिता एव दूषणान्तरमप्यस्तीति भावः। 'हुः' निश्चितं 'सर्वाणि' सचित्ता-ऽचित्तादिभेदभिन्नानि मूल-कन्दादिभेदाद् दशविधानि वा प्रलम्बानि जिनैः-तीर्थकरैः गणधरैश्च-गौतमादिभिः आदिग्रहणेन जम्बू-प्रभव-शय्यम्भवादिभिः स्थविरैरपि 'अनाचीर्णानि' अनासेवितानि। लोकोत्तरिकाश्च ये केचन 'धर्मा' समाचारास्ते सर्वेऽपि 'अनुगुरवः' यद् यथा पूर्वगुरुभिराचरितं तत् तथैव पाश्चात्यैरप्याचरणीयमिति, गुरुपारम्पर्यव्यवस्थया व्यवहरणीया इति भावः। येनैवं तेन 'तानि' प्रलम्बानि 'वर्ज्यानि' परिहर्त्तव्यानीति ॥ अत्र परः प्राह-यदि यद् यत् प्राचीनगुरुभिराचीर्णं तत् तत् पाश्चात्यैरप्याचरितव्यं तर्हि तीर्थकरैः प्राकारत्रय-

Jain Education International For Private & Personal Use Only www.jainelibrary.org

च्छत्त्रत्रयप्रभृतिका प्राभृतिका तेषामेवार्थाय सुरैर्विरचिता यथा समुपजीविता तथा वयमप्यस्मन्निमित्तकृतं किं नोपजीवामः ? । सूरिराह-

[भा.९९६]कामं खलु अनुगुरुणो, धम्मा तह वि हु न सव्वसाहम्मा ।
गुरुणो जं तु अइसए, पाहुडियाई समुपजीवे ॥

वृ- 'कामम्' अनुमतं खल्वस्माकं यद् अनुगुरवो धर्मा, तथापि न सर्वसाधर्म्यात्त चिन्त्यते किन्तु देशसाधर्म्यादेव । तथाहि-'गुरवः' तीर्थकराः 'यत् तु' यत् पुनः 'अतिशयान्' प्राभृतिकादीन् प्राभृतिका-सुरेन्द्रादिकृता समवसरणरचना आदिशब्दादवस्थितनख-रोमा-ऽधोमुखकण्टका-दिसुरकृतातिशयपरिग्रहः तान् समुपजीवन्ति 'स तीर्थकरजीतकल्पः' इति कृत्वा न तत्रानुधर्मता चिन्तनीया । यत्र पुनस्तीर्थकृतामितरेषां च साधूनां सामान्यधर्मत्वं तत्रैवानुधर्मता चिन्त्यते ॥

सा चेयमनाचीर्णेति दर्श्यते-

[भा.९९७] सगड-द्दह-समभोमे, अवि य विसेसण विरहियतरागं ।
तह वि खलु अणाइन्नं, एसऽनुधम्मो पवयणस्स ॥

वृ- यदा भगवान् श्रीमन्महावीरस्वामी राजगृहनगराद् उदायननरेन्द्रप्रव्राजनार्थं सिन्धुसौवीरदेशवतंसं वीतभयं नगरं प्रस्थितस्तदा किलाऽपान्तराले बहवः साधवः क्षुधार्त्तास्तृषार्दिताः संज्ञाबाधिताश्च बभूवुः । यत्र च भगवानावासितस्तत्र तिलभृतानि शकटानि पानीयपूर्णश्च ह्रदः 'समभौमं च' गर्त्ता-बिलादिवर्जितं स्थण्डिलमभवत् । अपि च विशेषेण तत् तिलोदकस्थण्डिलजातं 'विरहिततरं' अतिशयेनाऽऽगन्तुकैस्तदुत्थैश्च जीवैर्वर्जितमित्यर्थः तथापि खलु भगवता 'अनाचीर्णं' नानुज्ञातम् । एषोऽनुधर्म 'प्रवचनस्य' तीर्थस्य, सर्वैरपि प्रवचन-मध्यमध्यासीनैरशस्त्रापहतपरिहारलक्षण एष एव धर्मोऽनुगन्तव्य इति भावः ॥ अथैतदेव विवृणोति-

[भा.९९८] वक्कंतजोणि थंडिल, अतसा दिन्ना ठिई अवि छुहाए ।
तह वि न गेण्हिसु जिनो, मा हु पसंगो असत्थहए ॥

वृ- यत्र भगवानावासितस्तत्र बहूनि तिलशकटान्यावासितान्यासन् । तेषु च तिलाः 'व्युत्क्रान्तयोनिकाः' अशस्त्रापहता अप्यायुःक्षयेणाचित्तीभूताः । ते च यद्यस्थण्डिले स्थिता भवेयुस्ततो न कल्पेरन्नित्यत आह-स्थण्डिले स्थिताः । एवंविधा अपि त्रसैः संसक्ता भविष्यन्तीत्याह-'अत्रसाः' तदुद्भवा-ऽऽगन्तुकत्रसविरहिताः । तिलशकटस्वामिभिश्च गृहस्थैर्दत्ता, एतेन चादत्ता-दानदोषोऽपि तेषु नास्तीत्युक्तं भवति । अपि च ते साधवः क्षुधा पीडिता आयुषः स्थितिक्षयमकार्षु तथापि 'जिनः' वर्द्धमानस्वामी नाऽग्रहीत्, 'मा भूदशस्त्रहते प्रसङ्गः, 'तीर्थकरेणापि गृहीत्तम्' इति मदीयमालम्बनं कृत्वा मत्सन्तानवर्त्तिनः शिष्या अशस्त्रापहतं मा ग्रहिषुः' इति भावात्, व्यवहारनयबलीयस्त्वख्यापनाय भगवता न गृहीता इति हृदयम्; युक्तियुक्तं चैतत् प्रमाण-स्थपुरुषाणाम् । यत उक्तम्-

प्रमाणानिप्रमाणस्थै, रक्षणीयानि यत्नतः ।
विषीदन्ति प्रमाणानि, प्रमाणस्थैर्विसंस्थुलैः ॥

[भा.९९९] एमेव य निज्जीवे, दहम्मि तसवज्जिए दए दिन्ने ।
समभोम्मे य अवि ठिती, जिमिता सन्ना न याऽणुन्ना ॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

वृ-एवमेव च ह्रदे 'निर्जीवे' यथायुष्कक्षयादचित्तीभूतेऽचित्तपृथिव्यां च स्थिते त्रसवर्जिते च 'दके' पानीयेह्रदस्वामिना च दत्ते तृषार्दितानां च साधूनां स्थितिक्षयकरणेऽपि भगवान्नानुजानीते स्म 'मा भूत् प्रसङ्गः' इति। तथा स्वामी तृतीयपौरुष्यां जिमितमात्रैः साधुभिः सार्धमेकामटवीं प्रपन्नः, "सन्न"त्ति संज्ञाया आबाधा, यद्वा "आसन्न"त्ति भावासन्नता साधूनां समजनि, तत्र च समभौमं गर्त्ता-गोष्पद-बिलादिवर्जितं यथास्थितिक्षयव्युत्क्रान्तयोनिकपृथिवीकं त्रसप्राणविरहितं स्थण्डिलं वर्त्तते, अपरं च शस्त्रापहतं स्थण्डिलं नास्ति न वा प्राप्यते, अपि च ते साधवः संज्ञाबाधिताः स्थितिक्षयं कुर्वन्ति तथापि भगवान् नानुज्ञां करोति यथा 'अत्र व्युत्सृजत' इति, 'मा भूदशस्त्रहते प्रसङ्गः' इति। एष अनुधर्म प्रवचनस्येति सर्वत्र योज्यम्॥ एष सर्वोऽपि विधिर्निर्ग्रन्थानाश्रित्योक्तः। अथ निर्ग्रन्थीरधिकृत्यामुमेवातिदिशन्नाह-

[भा.१०००] एसेव गमो नियमा, निग्गंथीणं पि होइ नायव्वो।
सविसेसतरा दोसा, तासिं पुन गिण्हमाणीणं॥

वृ-एष एव सर्वोऽपि 'गमः' प्रकारो निर्ग्रन्थीनामपि भवति ज्ञातव्यः। तासां पुनर्गृह्णतीनां प्रलम्बेन हस्तकर्मकरणादिना सविशेषतरा दोषा वक्तव्या इति॥ सूत्रम्-

मू. *(२) कप्पइ निग्गंथाण वा निग्गंथीण वा आमे तालपलंबे भिन्ने पडिगाहित्तए॥*

वृ-अस्य व्याख्या प्राग्वत्। नवरं 'भिन्नं' भावतो व्यपगतजीवम् द्रव्यतो भिन्नमभिन्नं वा, तृतीय-चतुर्थभङ्गवर्तीत्यर्थः। एवं च सूत्रेणानुज्ञातम्, यथा-आमं भिन्नं कल्पते, अर्थतः पुनः प्रतिषेधयति-न कल्पते॥ आह यदि न कल्पते ततः किं सूत्रे निबद्धं "कल्पते" इति? उच्यते-

[भा.१००१] जइ वि निबंधो सुत्ते, तह वि जईणं न कप्पई आमं।
जइ गिण्हइ लग्गति सो, पुरिमपदनिवारिए दोसे॥

वृ-यद्यपि सूत्रे निबन्धः "कल्पते भिन्नम्" इतिलक्षणस्तथापि यतीनां न कल्पते आमं भिन्नमपि यदि गृह्णाति ततः स पूर्वपदे-पूर्वसूत्रे निवारिता ये दोषास्तान् 'लगति' प्राप्नोति॥ आह यदि सूत्रेऽनुज्ञातमपि न कल्पते तर्हि सूत्रं निरर्थकम्, सूरिराह-

[भा.१००२] सुत्तं तू कारणियं, गेलन्न-ऽद्धाण-ओममाईसु।
जह नाम चउत्थपदे, इयरे गहणं कहं होज्जा॥

वृ-सूत्रं कारणिकम्। तानि च कारणान्यमूनि-ग्लानत्वम् अध्वा अवमौदर्यम्, एवमादिषु कारणेषु कल्पते। तत्र प्रथमतश्चतुर्थभङ्गे तदलाभे तृतीय-द्वितीय-प्रथमभङ्गेष्वपि। आह यथा नाम 'चतुर्थपदे' चतुर्थभङ्गे ग्रहणं तथा 'इतरस्मिन्' भङ्गत्रये कथं ग्रहणं भवेत्? उच्यते- तत्रापि कारणतो ग्रहणं भवत्येव। यथा च भवति तथोत्तरत्राभिधास्यते॥ अथ पुनरप्याह-

पुव्वमभिन्ना भिन्ना, य वारिया कहमियाणि कप्पंति।
सुण आहरणं चोयग!, न कमति सव्वत्थ दिट्ठंतो॥

पूर्वसूत्रे भवद्भिरभिन्नानि भिन्नानि च 'वारितानि' प्रतिषिद्धानि, कथम् 'इदानीम्' अस्मिन् सूत्रे "कल्पन्ते" इति भणत? न युक्तं पूर्वापरव्याहतमीदृशं वक्तुमिति भावः। अत्राचार्य प्राह- 'शृणु' निशमय 'आहरणं' दृष्टान्तं हे नोदक! यथा कल्पन्ते। अत्र नोदको गुरुवचनमनाकर्ण्य दुर्विदग्धतादर्पाध्मातः प्रतिवक्ति-आचार्य! न सर्वत्राप्यर्थे दृष्टान्तः क्रमते, दृष्टान्तमन्तरेणाप्यर्थ-

Jain Education International For Private & Personal Use Only www.jainelibrary.org

प्रतिपत्तेः ।। तथाहि-

[भा.१००४] जइ दिट्ठंता सिद्धी, एवमसिद्धी उ आणगेज्झाणं ।
अह ते तेसि पसिद्धी, पसाहए किन्नु दिट्ठंतो ।।

वृ- यदि दृष्टान्तादर्थानां सिद्धिस्तर्हि 'आज्ञाग्राह्याणां' निगोद-भव्या-ऽभव्यादीनामर्थानामसिद्धि प्रसज्येत । अथ 'ते' तव आज्ञया तेषां प्रसिद्धिस्ततः 'किन्नु' इति वितर्के 'हुः' एवमर्थे किमेवं दृष्टान्ततोऽर्थसिद्धि क्रियते ? ।। किञ्चान्यत्-

[भा.१००५]कप्पम्मि अकप्पम्मि य, दिट्ठंता जेन होंति अविरुद्धा ।
तम्हा न तेसि सिद्धी, विहि-अविहिविसोवभोग इव ।।

वृ- दृष्टान्तेन यद् यद् आत्मन इष्टं तत् तत् सर्वं यदृच्छया प्रसाध्यते, यथा-कल्पते हिंसा कर्तु विधिनेति प्रतिज्ञा १, निष्प्रत्यपायत्वादिति हेतुः २, यथा विधिना विषोपभोग इति दृष्टान्तः, अस्य च भावना-यथा विधिना मन्त्रपरिगृहीतं विषं खाद्यमानमदोषाय भवति, अविधिना पुनः खाद्यमानं महान्तमनर्थमुपढौकयति ३, एवं हिंसाऽपि विधिना विधीयमाना न दुर्गतिगमनाय प्रभवति, अविधिना तु विधीयमाना दुर्गतिगमनायोपतिष्ठते ४, यतश्चैवमतो निष्प्रत्यपायत्वात् कल्पते कर्तु हिंसेति निगमनम् ५ । एवं कल्प्येऽकल्प्ये च येन कारणेन दृष्टान्ता अविरुद्धा भवन्ति, कल्प्यमप्यकल्प्यम् अकल्प्यमपि कल्प्यं यदृच्छया दृष्टान्तबलेन क्रियत इति भावः, तस्माद् नैतेभ्यो दृष्टान्तेभ्योऽर्थानां सिद्धिर्भवति । गाथायां पञ्चम्यर्थे षष्ठी । विधिना अविधिना च विषोपभोग इवेति ।। इत्थं नोदकेन स्वपक्षे स्थापिते सति सूरिराह-

[भा.१००६] असिद्धी जइ नाएणं, नायं किमिह उच्यते ।
अह ते नायतो सिद्धी, नायं किं पडिसिज्झती ।।

वृ- यदि 'ज्ञातेन' दृष्टान्तेनार्थानमसिद्धिस्ततस्त्वया 'ज्ञातं' विषदृष्टान्तः इह 'किमुच्यते' किमेवमभिधीयते ? । अथ 'ते' तव 'ज्ञाततः' दृष्टान्ततः सिद्धि ततोऽस्माभिरुच्यमानं ज्ञातं किं प्रतिषिध्यते ? ।। किञ्च-

[भा.१००७] अंधकारो पदीवेण, वज्जए न उ अन्नहा ।
तहा दिट्ठंतिओ भावो, तेणेव उ विसुज्झई ।।

अन्धकारशब्दस्य पुंनपुंसकलिङ्गत्वाद् यथाऽन्धकारो रात्रौ प्रदीपेनैव 'वर्ज्यते' विशोध्यते 'न तु' नैवान्यथा, विशोधिते च तस्मिन् घटादिकं वस्तु परिस्फुटमुपलभ्यते; तथाऽत्रापि 'दार्ष्टान्तिकः' दृष्टान्तग्राह्यः 'भावः' पदार्थोऽन्धकारवदतिगहनोऽपि 'तेनैव' दृष्टान्तेन प्रदीपकल्पेन 'विशुध्यते' निर्मलीभवति, विशुद्धे च तस्मिन् परिस्फुटा विवक्षितार्थप्रतिपत्तिर्भवतीति दृष्टान्तोपदर्शनमत्र क्रियते । किञ्च सौम्य ! प्रीणिता वयं स्ववाक्येनैव भवता यद् दृष्टान्तेनार्थप्रसाधनमभ्युपगतम् । असमाकमपि त्वदीय एव द्दष्टान्तः सूत्रस्य सार्थकत्वं प्रसाधयिष्यति ।। कथम् ? इति चेद् उच्यते-

[भा.१००८] एसेव य दिट्ठंतो, विहि-अविहीए जहा विसमदोसं ।
होइ सदोसं च तथा, कज्जितर जया-ऽजय फलाई ।।

वृ- 'एष एव' त्वदुक्तो दृष्टान्तोऽस्माभिः प्रस्तुतसूत्रार्थेऽवतार्यते-यथा विधिना विषमुपभुज्यमानमदोषम्, अविधिना भुज्यमानं तदेव सदोषम्; तथा कार्ये यतनया फलादीनि

Jain Education International　For Private & Personal Use Only　www.jainelibrary.org

आसेव्यमानानि न दोषायोपतिष्ठन्ते, "इयरे"त्ति इतरस्मिन्-अकार्ये यतनया वा अयतनया वाऽऽसेव्यमानानि दोषायोपकल्पन्ते ॥ अपि च-

[भा.१००९] आयुहे दुन्निसट्ठम्मि, परेण बलसा हिए।
वेताल इव दुज्जुत्तो, होइ पच्चंगिराकरो ॥

वृ- यथा केनापि शारीरबलदर्पोद्धुतेन परवधायाऽऽयुधं निसृष्टं-मुक्तम्, तच्च दुर्निसृष्टं कृतं येन तदेव परेण 'हृतं' गृहीतम्, यद्वा अनिसृष्टमेवायुधं परेण "बलस"त्ति छान्दसत्वाद् बलात्कारेण हृतम्, ततस्तस्मिन्नायुधे दुर्निसृष्टे परेण बलात्कारेण वा हृते सति तस्यैव तेन प्रतिघातः क्रियते। एवं त्वयाऽप्यस्मदभिप्रेतदृष्टान्तप्रतिघाताय विषदृष्टान्त उपन्यस्तः, अस्माभिस्तु तेनैव दृष्टान्तेन "न सर्वत्र दृष्टान्तः क्रमते" इति भवत्प्रतिज्ञायाः प्रतिघातः कृतः, स्वाभिप्रेतश्चार्थ प्रसाधित इति। तथा केनचिद् मन्त्रवादिना होम-जापादिभिर्वेताल आहूत आगतश्च, स च वेतालः, किञ्चित् तदीयस्खलितं दृष्ट्वा 'दुर्युक्तः' दुःसाधितो न केवलं तस्य साधकस्याभीष्टमर्थं न साधयति किन्तु कुपितः सन् 'प्रत्यङ्गिराकरः' प्रत्युत तस्यैव साधकस्योन्मत्ततादिलक्षणापकारकारी भवति; एवं भवताऽपि स्वपक्षसाधनार्थं विषदृष्टान्त उपात्तः स च दुःप्रयुक्तत्वात् प्रत्युत भवत एव प्रतिज्ञोपघातलक्षणमपकारमादधाति स्मेति ॥ किञ्च-

[भा.१०१०]निरुतस्स विकडुभोगो, अपत्थओ कारणे य अविहीए।
इय दप्पेण पलंबा, अहिया कज्जे य अविहीए ॥

वृ-यथा नीरुजस्य विशेषेण कटुकं विकटुकम्-औषधमित्यर्थः तस्य यो भोगः-उपयोगः, तथा 'कारणे च' रोगादौ यस्तस्यैवाऽविधिना भोगः, स उभयोऽपि 'अपथ्यः' अहितः-विनाशकारणं जायते। 'इति' एवं 'दर्पेण' कारणाभावेनाऽऽसेव्यमानानि प्रलम्बानि 'अहितानि' संसारवर्द्धनानि भवन्ति, 'कार्ये च' अवमौदर्यादौ 'अविधिना' अयतनया गृहीतानीह परत्र चाहितानि जायन्ते ॥

अथ दृष्टान्तमेव समर्थयन्नाह-

[भा.१०११]जइ कुसलकप्पिताओ, उवमाओ न होज्ज जीवलोगम्मि।
छिन्नब्भं पिव गगने, भमिज्ज लोगो निरुवमाओ ॥

वृ- कुशलैः-पण्डितैः कल्पिताः-तेषु तेषु ग्रन्थेषु विरचिताः 'उपमाः' दृष्टान्ता अस्मिन् जीवलोके यदि न भवेयुस्तर्हि 'छिन्नाभ्रमिव' छिन्नं-व्यवच्छिन्नमेकीभूतं यद् अभ्रं यद् यथा प्रचण्डपवनेन गगने इतस्ततो भ्राम्यते एवमयमपि लोकः 'निरुपमाकः' तत्तदर्थप्रसाधकदृष्टान्तविकलो दोलायमानमानसः संशयादिभिरितस्ततो भ्राम्येत, न कस्याप्यर्थस्य निर्णयं कुर्यादिति भावः। उक्तं च-

तावदेव चलत्यर्थो, मन्तुर्विषयमागतः।
यावन्नोत्तम्भनेनेव, दृष्टान्तेनावलम्ब्यते ॥

एवं च बहुभिः प्रकारैर्व्यवस्थापितं दृष्टान्तं प्रमाणयन् शिष्यः प्राह-भगवन्! यद्येवं ततः क्रियतां दृष्टान्तः। उच्यते, कुर्म, आकर्ण्यतां दत्तकर्णेन भवता-

[भा.१०१२] मरुएहि य दिट्ठंतो, कायव्वो चउहि आनुपुव्वीए।
एवमिहं अद्धाणे, गेलन्ने तहेव ओमम्मि ॥

वृ- 'मरुकैः' ब्राह्मणैश्चतुर्भिर्दृष्टान्तः कर्त्तव्य आनुपूर्व्या। 'एवं' मरुकदृष्टान्तानुसारेण इह

Jain Education International For Private & Personal Use Only www.jainelibrary.org

अध्वनि ग्लानत्वे तथैवावमे द्वितीयपदं द्रष्टव्यमिति निर्युक्तिगाथासमासार्थः ।।

अथ पूर्वार्द्धं तावद् व्याख्याति-

[भा.१०१३] चउमरुग विदेसं साहपारए सुणग रन्न सत्थवहे।
तितियदिन पूतिमुदगं, पारगो सुणयं हणिय खामो ।।

[भा.१०१४]परिणामओऽत्थ एगो, दो अपरिणया तु अंतिमो अतीव।
परिणामो सद्दहती, कन्नऽपरिणमतो मतो बितितो ।।

[भा.१०१५] तइओ एयमकिच्चं, दुक्खं मरिउं ति तं समारद्धो।
किं एच्चिरस्स सिद्धं, अइपरिणामोऽहियं कुणति ।।

[भा.१०१६]पच्छित्तं खु वहिज्जह, पढमो अहालहुस धाडितो तइतो।
चउथो अ अतिपसंगा, जाओ सोवागचंडालो ।।

वृ-जहा चत्तारि मरुआ 'अज्झाइस्सामो'त्ति काउं विदेसं पत्थिता। तेहि य एगो साहापारओ दिट्ठो, पुच्छिओ-कत्थ वच्चसि ?। सो भणइ-जत्थेव तुब्भे। ताहे ते एगम्मि पच्चंते अद्धाण सीसए सत्थं पडिच्छंति, सो य। सत्थो मिलइ। साहापारगो एगं सुणगं सारवेइ। तेहिं भणियं-किं तुब्भं एएणं। सो भणइ-अहमेयं जाणामि कारणं। तओ ते सत्थेण समं अडविं पविट्ठा। तेसिं तत्थ रन्ने पवन्नाणं सो सत्थो मुट्ठो दिसोदिसिं पलातो। इतरे वि मरुया पंच जना सुणगछट्ठा एक्कतो पट्ठिता अतीवतिसिय-भुक्खिया तइयदिणे पेच्छंति पूइमुदगं मयगकलेवराउलं। तत्थ ते साहापारगेण भणिता-एयं सुणगं मारेउं खामो, एयं च सरुहिरं पानियं पिबामो, अन्नहा विवज्जामो, एयं च वेदरहस्स आवतीए भणियं चेव, न दोसो। एवं तेन ते भणिता। तेसिं मरुयाणं एक्को परिणामतो, दो अपरिणामगा, चउत्थतो अतिपरिणामओ। तत्थ जो सो परिणामगो तेण ,तं साहापारगवयणं सद्दहियं अब्भुवगयं च। जे ते दो अपरिणामगा तेसिं एक्केण साहापारवयणं सोउं कन्ना ठइया 'अहो ! अकज्जं, कण्णा वि मे सुणंति' सो अपरिणामगो तिसिय-भुक्खिओ मओ। जो सो बितिओ अपरिणामगो सो भणइ-'एयं एयवत्थाए वि अकिच्चं, किं पुन दुक्खं मरिज्जति ?' त्ति काउं खइयं नेन। जो सो अतिपरिणामो सो भणति-किह चिरस्ससिद्धं ? वंचिया मो अतीते काले जं खातियं। सो अन्नाणि वि गावि-गद्दभमंसाणि खादिउमाढत्तो, मज्जं च पाउं। तत्थ जेहिं खतियं ते साहापारगेण भणिता-इतो नित्थिन्ना समाणा पच्छित्तं वहेज्जह। तत्थ जो सो परिणामगो तेण अप्पसागारियं एगस्स अज्झावगस्स आलोइयं। तेन 'सुद्धो'त्ति भाणियं, पंचगव्वं वा दिन्नं। तत्थ जो सो अपरिणामओ सो नित्थिण्णो समाणो सुणगकत्तिं सिरे काउं माहणे मेलित्ता चाउव्वेज्जस्स पादेहिं पडित्ता साहइ, सो चाउव्वेज्जेण 'धिद्धि'कतो निच्छूढो। जो सो अइपरिणामगो 'नत्थि किंचि अभक्खं अपेयं वा' अतिपरिणामपसंगेण सो मायंगचंडालो जाओ ।।

अथाक्षरार्थः-चत्वारो मरुका विदेशं प्रस्थिताः। ततः 'शाखापारगः' वेदाध्ययनपारगतो मरुकस्तेषां मिलितः, तेन च शुनकः सार्द्धं गृहीतः। अरण्ये च गतानां सार्थस्य वधः-मोषणं। ततस्तैर्मरुकैरेकां दिशं गृहीत्वा पलायितैः तृतीयदिने 'पूति' कुथितं मृतकडेवराकीर्णमुदकं दृष्टम्। शाखापारगो वक्ति-एनं शुनकं हत्वा भक्षयामः। अत्र चैकः परिणामकः, द्वौ 'अपरिणतौ' अपरिणामकौ, 'अन्तिमः' चतुर्थोऽतीवपरिणामकः। तत्र परिणामकः शाखापारगवचनं श्रद्धत्ते। 'द्वितीयः

Jain Education International For Private & Personal Use Only www.jainelibrary.org

पुनः' अपरिणतः कर्णौ स्थगितवान् 'न श्र णुमः एनां वार्त्तामपि' इति कृत्वा मृतः । तृतीयोऽप्यपरिण-तत्वात् चिन्तयति-'एतद् एतस्यामप्यवस्थायामकृत्यम्, परं किं क्रियते ? दुःखं मत्तुम्' इति 'तत्' शुनकभक्षणं कर्त्तु समारब्धः । चतुर्थस्त्वतिपरिणामकः किमियतः कालात् 'शिष्टं' कथितम् ? इत्युक्त्वा 'अधिकं करोति' गो-गर्दभादिमांसान्यपि भक्षयतीति । शाखापारगेण च ते भाणिताः-अटव्या उत्तीर्णा प्रायश्चित्तं बहध्वम् । तत्र यः प्रथमः परिणामकः स यथालघुकप्रायश्चित्तेन शुद्धः । द्वितीयस्तु मृत एव । तृतीयो निर्घाटितश्चातुर्विद्यैः, पङ्क्तेर्बहिकृत इत्यर्थः । चतुर्थश्चातिप्रसङ्गात् 'नास्ति किञ्चिदभक्ष्यमपेयं च' इति श्वपाकरूपश्चण्डालो जात इति ॥ अथोपनययोजनामाह-

[भा.१०१७]जह पारगो तह गणी, जह मरुगा एव गच्छवासीओ ।
सुणगसरिसा पलंबा, पलंबा, मडतोयसमं दगमफासुं ॥

वृ-यथा शाखापारगस्तथा 'गणी' आचार्यः । यथा चत्वारो मरुकाः 'एवम्' अमुना प्रकारेण 'गच्छवासिनः' साधवः । शुकनसदृशानि अत्र प्रलम्बानि, विकृष्टाध्वादिकारणं विना साधूनामभक्षणीयत्वात् । 'मृतकडेवराकुलोदकतुल्यमप्राशुकोदकं ज्ञातव्यम्, अपेयत्वात् ॥

अथ यदुक्तं "एवमिहं अद्धाणे, गेलन्ने तहेव ओमन्नि ।" तत्राध्वद्वारं विवृणोति-

[भा.१०१८] उद्दद्दरे सुभिक्खे, अद्धाणपवज्जणं तु दप्पेण ।
लहुगा पुन सुद्धपदे, जं वा आवज्जती तत्थ ॥

वृ-ऊर्ध्वं दराः पूर्यन्ते यत्र काले तद् ऊर्ध्वदरम्, प्राकृतशैल्या उद्दद्दरम् । ते च दरा द्विविधाः-धान्यदरा उददरदराश्च । धान्यानामाधारभूता दरा धान्यदराः कट-पल्यादयः, उदराण्येव दरा उदरदराः; ते उभयेऽपि यत्र पूर्यन्ते तद् ऊर्द्धदरम् । तथा सुभिक्षं-भिक्षाचरैः सुलभभिक्षम् । अत्र चतुर्भङ्गी-ऊर्ध्वदरं सुभिक्षं च १ ऊर्ध्वदरं न सुभिक्षं २ सुभिक्षं नोर्ध्वदरं ३ नोर्ध्वदरं न सुभिक्षम् ४। तत्र प्रथमभङ्गे तृतीयभङ्गे वा यद्यध्वानं दर्पेण प्रतिपद्यते तदा यद्यपि न मूलोत्तरगुणविराधनादिकं किमप्यापद्यते तदाऽपि शुद्धपदे चत्वारो लघुकाः प्रायश्चित्तम्, कस्मात् ? दर्पेणाध्वानं प्रतिपद्यते इति हेतोः । 'यद् वा' आत्मविराधनादिकं यत्रापद्यते तत्र तन्निष्पन्नं प्रायश्चित्तम् । अर्थादापन्नम्-शेषभङ्गद्वये दुर्भिक्षत्वादध्वगमनं प्रतिपत्तव्यमिति । प्रथम-तृतीययोरपि भङ्गयोः कारणतो भवेदध्वगमनम् ॥ आह किं तत् कारणम् ? उच्यते-

[भा.१०१९] असिवे ओमोयरिए, रायदुट्ठे भए व आगाढे ।
गेलन्न उत्तिमट्ठे, नाणे तह दंसण चरित्ते ॥

वृ- विवक्षितदेशे आगाढमशिवमवमौदर्यं राजद्विष्टं भयं वा प्रत्यनीकादिसमुत्थम्, आगाढशब्दः प्रत्येकमभिसम्बध्यते, तथा तत्र वसतां ग्लानत्वं भूयोभूय उत्पद्यते, यद्वा देशान्तरे ग्लानत्वं कस्यापि समुत्पन्नं तस्य प्रतिजागरणं कर्त्तव्यम्, उत्तमार्थं वा कोऽपि प्रतिपन्नस्तसय निर्यापनं कार्यम् । तथा विवक्षिते देशे ज्ञानं वा दर्शनं वा चारित्रं वा नोत्सर्पति ॥

[भा.१०२०] एएहि कारणेहिं, आगाढेहिं तु गम्ममाणेहिं ।
उवगरणपुव्वपडिलेहिएण सत्थेण गंतव्वं ॥

वृ- 'एतैः' अनन्तरोक्तैः कारणैरागाढैरुत्पन्नैः सद्भिर्गम्यते । गच्छद्भिश्चाध्वप्रायोग्य-

Jain Education International For Private & Personal Use Only www.jainelibrary.org

मुपकरणं गुलिकादिकं गृहीत्वा सार्थ पूर्वमेव प्रत्युपेक्षणीयः, तेन पूर्वप्रत्युपेक्षितेन सार्थेन सार्द्ध गन्तव्यम् ।। अत्र विधिमाह-

[भा.१०२१] अद्धाणं पविसंतो, जानगनीसाए गाहए गच्छं ।
अह तत्थ न गाहेज्ञा, चाउम्मासा भवे गुरुगा ।।

वृ- अध्वानं प्रविशन्नाचार्यो ज्ञायकः-गीतार्थस्तन्निश्रया गच्छं सकलमप्यध्वकल्पस्थितिं ग्राहयति । अथ 'तत्र' अध्वप्रवेशेऽध्वकल्पस्थितिमाचार्या न ग्राहयेयुस्ततश्चतुर्मासा गुरवः प्रायश्चित्तं भवेयुः ।। स्यान्मति-कः कथं वा गच्छमध्वकल्पं ग्राहयति ? इति, उच्यते-

[भा.१०२२] गीयत्थेण सयं वा, गाहइ छड्डिंतो पच्चयनिमित्तं ।
सारिंति तं सुयत्था, पसंग अप्पच्चओ इहरा ।।

वृ- यद्याचार्य आत्मना केनापि कार्येण व्यापृतस्ततोऽन्येनोपाध्यायादिना गीतार्थेन, अथ न व्यापृतस्ततः 'स्वयम्' आत्मनैवान्यगीतार्थान् पुरतः कृत्वा अध्वकल्पसामाचारीं गच्छं ग्राहयति। स च कथको ग्राहयन्नन्तराऽन्तरा अर्थपदजातं 'छर्दयन्' परित्यजन् कथयति । ततो ये ते 'श्रुतार्था' गीतार्थास्ते 'तद्' अर्थपदजातं त्यक्तं सत् स्मारयन्ति, यथा-विस्मृतं भवतामेतच्चैतच्चार्थपदमिति। किंनिमित्तमेवं क्रियते ? इत्याह-अगीतार्थानां प्रत्ययनिमित्तम्, यथा सर्वेऽप्येते यदेनां सामाचारीमित्थमेव जानन्ति तन्नूनं सत्यैवेयमिति । 'इतरथा' यद्येवं न क्रियते ततस्तेषामगीतार्थानां मध्ये येऽतिपरिणतास्ते अध्वन उत्तीर्णा अपि तत्रैव प्रसङ्गं कुर्यु, ये त्वपरिणामकास्तेषामप्रत्ययो भवेत्, यथा-एते इदानीमेव स्वबुद्धिकल्पनाशिल्पनिर्मितामेवंविधां स्थितिं कुर्वन्तीति ।। शिष्यः प्राह-या काचिदध्वनि प्रलम्बग्रहणे सामाचारी तामिदानीमेव भणत । गुरुराह-

[भा.१०२३] अद्धाणे जयणाए, परूवणं वक्खती उवरि सुत्ते ।
ओमेऽवुवरिं वोच्छिइ, रोगाऽऽयंकेसिमा जयणा ।।

वृ- अध्वनि गच्छतां याप्रलम्बग्रहणे यतना-सामाचारी तस्याः प्ररूपणमुपरि अध्वसूत्रे इहैवोद्देशके वक्ष्यति । अवमेऽपि यः कोऽपि विधि स सर्वोऽप्युपरि इहैव प्रलम्बप्रकृते वक्ष्यते । अत्र पुनर्यद् ग्लानत्वद्वारं तद् अभिधीयते । तच्च ग्लानत्वं द्विधा-रोग आतङ्कश्च । तयो रोगाऽऽतङ्कयोर्द्वयोरपि 'इयं' वक्ष्यमाणलक्षणा यतना ।। तत्र तिष्ठतु तावद् यतना, रोगाऽऽतङ्कयोरेव कः परस्परं विशेषः ? उच्यते-

[भा.१०२४] गंडी-कोढ-खयाई, रोगो कासाइगो उ आयंको ।
दीहरुया वा रोगो, आतंको आसुधाती उ ।।

वृ-गण्डी-गण्डमालादिकः, कुष्ठं-पाण्डुरोगो गलत्कोष्ठं वा, क्षयः-राजयक्ष्मा, आदिशब्दात् श्लीपद-श्वयथु-गुल्मादिकः सर्वोऽपि रोग इति व्यपदिश्यते । कासादिकस्तु आतङ्कः, आदिग्रहणेन श्वास-शूल-हिक्का-ज्वरा-ऽतीसारादिपरिग्रहः । अथवा दीर्घकालभाविनी सर्वाऽपि रुग् रोग उच्यते । यस्तु आशुघाती विसूचिकादिकः स आतङ्कः ।। अथ सामान्यतो ग्लानत्वे विधिमाह-

[भा.१०२५] गेलन्नं पि य दुविहं, आगाढं चेव नो य आगाढं ।
आगाढे कमकरणे, गुरुगा लहुगा अनागाढे ।।

वृ- ग्लानत्वमपि द्विविधम्-आगाढं चैव नोआगाढं च अनागाढमित्यर्थः । आगाढे यदि

Jain Education International For Private & Personal Use Only www.jainelibrary.org

क्रमेण-पञ्चकपरिहाण्या करोति ततश्चत्वारो गुरवः, अनागाढे तु यद्यागाढकरणीयं करोति करोति तदा चत्वारो लघवः ।। एतदेव स्पष्टयन्नाह-

[भा.१०२६] आगाढमनागाढं, पुव्वुत्तं खिप्पगहणमागाढे ।
फासुगमफासुगं वा, चउपरियट्टं तऽनागाढे ।।

वृ- आगाढमनागाढं च 'पूर्वोक्तम्' "अहिडक्क विस विसूइय" इत्यादिना पूर्वमेव व्याख्या-तम्। तत्रागाढे शूल-विसूचिकादौ ग्लानत्वे समुत्पन्ने प्राशुकमप्राशुकं वा एषणीयमनेषणीयं वा क्षिप्रमेव ग्रहीतव्यम् । अथागाढे त्रिपरिवर्त्तनरूपया पञ्चकपरिहाणिरूपया वा यतनया क्रमेण गृह्णाति ततश्चत्वारो गुरवः । अनागाढे पुनस्त्रिकृत्वः परिवर्त्तने कृतेऽपि यदि शुद्धं न प्राप्यते ततश्चतुर्थे परिवर्ते पञ्चकादियतनया अनेषणीयं गृह्णाति । अथानागाढे त्रि-परिवर्त्तनं पञ्चकपरिहाणिं वा न करोति ततश्चतुर्लघवः ।। अथ ग्लानत्वविषयां यतनामाह-

[भा.१०२७] विज्जे पुच्छण जयणा, पुरिसे लिंगे य दव्वगहणे य ।
पिट्ठमपिट्ठे आलोयणा य पन्नवण जयणा य ।।

वृ- प्रथमतो वैद्यस्वरूपं वक्तव्यम् । ततस्तस्य पार्वे यथा प्रच्छने यतना क्रियते तथा वाच्यम् । 'पुरुषः' आचार्यादिकोऽभिधातव्यः । "लिंगे य"त्ति स्वलिङ्गेनाऽन्यलिङ्गेन वा यथा प्रलम्बग्रहणं भवति तथा वक्तव्यम् । 'द्रव्यग्रहणं वा' लेपादिद्रव्योपादानमभिधानीयम् । पिष्टस्या-पिष्टस्य च प्रलम्बस्य ग्रहणे विधिर्वक्तव्यः । तत आलोचना प्रज्ञापना यतना चाभिधातव्येति निर्युक्तिगाथासमासार्थः ।। अथास्या एव भाष्यकृद् व्याख्यानमाह-

[भा.१०२८] वेज्जट्ठग एगदुगादिपुच्छणे जा चउक्क उवएसो ।
इह पुन दव्वे पलंबा, तिन्नि य पुरिसाऽऽयपरियमाई ।।

वृ- 'वैद्याष्टकम्' अष्टौ वैद्याः

संविग्ग १ मसंविग्गा २, लिंगी ३ तह सावए ४ अहाभद्दे ५ ।
अनभिग्गहमिच्छे ६ तर ७, अट्ठमए अन्नतित्थी य ८ ।।

इति गाथोक्ताः प्रष्टव्याः । एते च मासकल्पप्रकृते ग्लानद्वारे व्याख्यास्यन्ते । एतेषां च प्रच्छने इयं यतना-वैद्यस्य समीपे एकः प्रच्छको न गच्छति, मा 'यमदण्ड आगतः' इति निमित्तं ग्रहीत्; द्वावपि न व्रजतः, 'यमदूतावेतौ' इति मननात्; आदिशब्दात् चत्वारोऽपि न व्रजन्ति, 'नीहरणकारिण एते' इति कृत्वा; यत एवं ततस्त्रयः पञ्च वा गच्छन्ति इत्यादिको विधिस्तावद् ज्ञेयो यावत् 'किमस्मिन् रोगे प्रतिकर्त्तव्यम् ?' इति पृष्टः सन् स वैद्यश्चतुष्कोपदेशं दद्यात् । तद्यथा-द्रव्यतः क्षेत्रतः कालतो भावतश्च । एते च ग्लानद्वार एव व्याख्यास्यन्ते । इह पुनर्द्रव्यतः प्रलम्बानि, पुरुषाश्च त्रयः 'आचार्यादयः' आचार्योपाध्याय-भिक्षुरूपा द्रष्टव्या इति । तत्र वैद्यः पृष्टः कदाचिदेवमभिदध्यात्-यादृशं रोगं यूयं कथयत ईदृशस्योपशमनार्थमिदं वनस्पतिजातं ग्लानस्य दातव्यम् ।। स च वनस्पतिर्यो यस्य रोगस्योपशमनाय प्रभवति तद्विषयं तमभिधित्सुराह-

[भा.१०२९] पउमुप्पले माउलिंगे, एरंडे चेव निंबपत्ते य ।
पित्तुदय सन्निवाए, वायक्कोवे य सिंभे य ।।

वृ- पित्तोदये पद्मोत्पलमौषधम्, सन्निपाते 'मातुलिङ्गं' बीजपूरकम्, वातप्रकोपे एरण्डपत्राणि

Jain Education International For Private & Personal Use Only www.jainelibrary.org

''सिंभे''त्ति श्लेष्मोदये निम्बपत्राणि ।। अथ यदुक्तं ''तिन्नि य पुरिसाऽऽयरियमाइ'' त्ति तदेतद् भावयति-

[भा.१०३०]गणि-वसभ-गीत-परिणामगा य जाणंति जं जहा दव्वं ।
इयरे सिं वाउलणा, नायम्मि य भंडि-पोउवमा ।।

वृ- योऽसौ ग्लानः स गणी-आचार्यो वृषभः-उपाध्यायो भिक्षुश्चेति त्रयः पुरुषाः । अत्र भिक्षुर्द्विधा-गीतार्थोऽगीतार्थश्च, परिणामकोऽपरिणामको वा । तत्र गणि-वृषभ-गीतार्थभिक्षूणां त्रयाणां पुरुषाणां प्राशुकैषणीयेन द्रव्येणाऽऽलेपनादि कर्त्तव्यम्; यदा प्राशुकमेषणीयं वा न प्राप्यते तदा तदितरेणापि कर्त्तव्यम् । एतेषां च यद् यथा गृहीतं तत् तथैव निवेद्यते, निवेदिते च ते तथैवागमप्रामाण्येन सचित्तमचित्तं वा शुद्धमशुद्धं वा द्रव्यं यद् यस्मिन्नवसरे कल्पते तद् यथावद् जानन्ति । यस्त्वगीतार्थ परं पारिणामिकः सोऽपि यद् यथा क्रियते तत् तथैव परिणामकत्वात् कथितं सद् जानीते । 'इतरे' अपरिणामकाः सन्तो येऽगीतार्थास्तेषां न कथ्यते, यथा 'अप्राशुकमनेषणीयं वा गृहीतम्' किन्तु तेषां व्याकुलना क्रियते, यथा 'अमुकगृहादात्मार्थं कृतमानीतमिदम्' । अथ कथमपि तैर्ज्ञातं यथा 'एतदप्राशुकमनेषणीयं वा' ततो ज्ञाते सति भण्डी-गन्त्री पोतः-प्रवहणं तदुपमा कर्त्तव्या । यथा-

जा एगदेसे अदढा उ भंडी, सीलप्पए सा उ करेति कज्जं ।
जा दुब्बला सीलविया वि संती, न तं तु सीलेंति विसिन्नदारुं ।।
'शीलाप्यते' समारच्यते इत्यर्थः । तथा-
जो एगदेसे अदढो उ पोतो, सीलप्पए सो उ करेइ कज्जं ।
जो दुब्बलो सीलविओ वि संतो, न तं तु सीलेंति विसिन्नदारुं ।।

एवं त्वमपि यदि जानीषे-'अहं प्रगुमीभविष्यामि, प्रगुणीभूतश्च प्रायश्चित्तं वोढास्मि, अपरं च स्वाध्याय-वैयावृत्य-तपःप्रभृतिभिरधिकं लाभमुपार्जयिष्यामि' इति तत इदं प्रतिसेवस्व अकल्पनीयम्; अथैतेषामसमर्थस्ततो मा प्रतिसेवस्वेति ।। गतं वैद्यप्रच्छन-यतनापुरुषलक्षणं द्वारत्रयम् । अथ लिङ्गादीनि सर्वाण्यपि द्वाराणि गाथाद्वयेन भावयति-

[भा.१०३१] सो पुन आलेवो वा, हवेज्ज आहारिमं व मिस्सियरं ।
पुव्वं तु पिट्ठगहणं, विगरण जं पुव्वछिन्नं वा ।।

वृ- यो वनस्पतिभेदो व्रणादौ पित्तोदयादौ वा उपयुज्यते स पुनरालेपो वा स्यात्, बहिपिण्डीप्रदानादिक इत्यर्थः, 'आहारिमं वा' बीजपूरादिकम् । तच्चोभयमपि प्रथमतोऽचित्तम्, तदलाभे मिश्रम्, तस्याप्यभावे 'इतरत्' सचित्तम् । अथवा 'मिश्रं' नाम यद् आलेप आहारयितव्यं च भवति, 'इतरत्' नाम यन्नालेपो नाहारयितव्यम् । तच्च स्पर्शेन स्पर्शनीयं वा स्यात् पद्मोत्पलवद्, नासिकया आघ्रातव्यं वा भवेत् पुष्पादिवत् । एतावता द्रव्यग्रहणद्वारं व्याख्यातम् । अथ पिष्टापिष्टद्वारम्-तत्राऽऽलेपादिकं सर्वमपि यत् पूर्वपिष्टं लभ्यते तस्य ग्रहणं कर्त्तव्यम्, पूर्वपिष्टस्यालाभे तृतीयेनापि भङ्गेन, तस्याप्यलाभे द्वितीयेन, तस्याप्यसति प्रथमभङ्गेन यत् पूर्वच्छिन्नं तद् विकरणं कृत्वा ग्राह्यम्, विविधम्-अनेकप्रकारं करणं-खण्डनं यस्य तद् विकरणम्, तत् तादृशं चानीय पेषणीयम् । एतेन च यदधस्तादुक्तं ''इयरे गहणं कहं होज्ज़ा'' इति तद् एवं भवेदिति प्रतिपत्तव्यम्।।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

[भा.१०३२] भावियकुलेसु गहणं, तेसऽसति सलिंगे गेण्हमाऽवन्नो ।
विकरणकरणालोयण, अमुगगिहे पच्चओ गीते ॥

वृ- अथ पूर्वच्छिन्नं न लभ्यते तत आत्मानऽपि च्छिन्दन्ति । तच्च पूर्वच्छिन्नं भावितकुलेषु ग्रहीतव्यम् । तत्र यानि श्राद्धकुलानि माता-पितृसमानानि साधूनामपवादपदेऽप्राशुकादिकं गृह्णतामनुग्राहकारीणि तानि भावितकुलान्युच्यन्ते । तेषामसति यद्यभावितकुलेषु स्वलिङ्गेन गृह्णाति ततो महानवर्णो भवति, अतस्तेषवन्यलिङ्गेन ग्रहीतव्यमिति लिङ्गद्वारमपि व्याख्यातम् । अथवा भावितकुलानामभावे यानि सुप्रज्ञापनीयानि कुलानि तानि प्रज्ञाप्य मार्गयति गृह्णाति च, एषा प्रज्ञापना मन्तव्या । एतानि पुनः प्रथम-द्वितीयभङ्गवर्तीनि प्रलम्बानि यत्र गृहीतानि तत्रैव विकरणानि कृत्वा आनीय गुरुसमीपे आलोचयति अगीतार्थप्रत्ययनिमित्तम्, यथा-अमुकस्य गृहे स्वार्थं कृतानि मया लब्धानीत्येषा आलोचना । यतना तु-सर्वथा पूर्वच्छिन्नानामलाभे स्वयमपि च्छेत्तव्यानि, तानि च प्रथमं परीत्तानि, ततोऽनन्तान्यपि, पूर्वं स्वलिङ्गेन, तत इतरेणापि ॥

एतच्च निर्ग्रन्थानाश्रित्य भणितम् । अथ निर्ग्रन्थीनां विधिमतिदिशन्नाह-

[भा.१०३३] एतेव अमी नियमा निग्गंथीण ।
आमे भिन्नाऽभिन्ने, जाव उ पउमुप्पलाईणि ॥

वृ- एष एव गमो नियमाद् निर्ग्रन्थीनामपि ज्ञातव्यो यावत् पद्मोत्पलादीनि "पउमुप्पल माउलिंगे" इत्यादिगाथां यावत् । एतच्च निर्युक्तिमङ्गीकृत्योक्तम्, भाष्यमाश्रित्य तु-"अमुगगिहे पच्चओ गीए" त्ति पर्यन्तं द्रष्टव्यम् । नवरं तासामामे प्रलम्बे भिन्ना-ऽभिन्नपदाभ्यां विधिभिन्ना-ऽविधिभिन्नपदसहिताभ्यां षड् भङ्गाः कर्त्तव्याः, ते चानन्तरसूत्रे स्वस्थान एव भावयिष्यन्ते ॥

सूत्रम्-

मू. (३) *कप्पइ निग्गंथाणं पक्के तालपलंबे भिन्ने वा अभिन्ने वा पडिगाहित्तए ॥*

मू. (४) *नो कप्पइ निग्गंथीणं पक्के तालपलंबे अभिन्ने पडिगाहित्तए ॥*

मू. (५) *कप्पइ निग्गंथीणं पक्के तालपलंबे भिन्ने पडिगाहित्तए से वि य विहिभिन्ने नो चेव णं अविहिभिन्ने ॥*

वृ- एतानि त्रीणि सूत्राणि समकमेव व्याख्यायन्ते-कल्पते निर्ग्रन्थानां पक्वं तालप्रलम्बं द्रव्यतो भिन्नं वा अभिन्नं वा प्रतिग्रहीतुम् ३ । नो कल्पते निर्ग्रन्थीनां पक्वं तालप्रलम्बमभिन्नं प्रतिग्रहीतुम् ४ । कल्पते निर्ग्रन्थीनां पक्कं तालप्रलम्बं द्रव्यतो भिन्नं प्रतिग्रहीतुम्, तदपि च 'विधिभिन्नं' विधिना-वक्ष्यमाणलक्षणेन भिन्नं-विदारितम्, नैव 'णं' वाक्यालङ्कारे अविधिभिन्नमिति सूत्रार्थः ५ ॥ अथ निर्युक्तिविस्तरः-

[भा.१०३४] नामं ठवणा पक्कं, दव्वे भावे य होइ नायव्वं ।
उस्सेइमाइ तं चिय, पक्किंधणजोगतो पक्कं ॥

वृ- नामपक्वं स्थापनापक्वं द्रव्यपक्वं च भवति ज्ञातव्यम् । तत्र नाम-स्थापने गतार्थे । द्रव्यपक्वं तदेवोत्स्वेदिमादिकं यद् आमं भणितम् । किमुक्तं भवति ?-यद् द्रव्यामं उत्स्वेदिम-संस्वेदिमोपस्कृतपर्यायामभेदात् चतुर्द्धा भणितम् तदेव यदा इन्धनसंयोगात् पक्वमुपजायते तदा द्रव्यपक्वं मन्तव्यम् ॥ गतं द्रव्यपक्कम् । भावपक्वमाह-

Jain Education International For Private & Personal Use Only www.jainelibrary.org

[भा.१०३५] संजम-चरित्तजोगा, उग्गमसोही य भावपक्वं तु।
अन्नो वि य आएसो, निरुवक्कमजीवमरणं तु ॥

वृ- संयमयोगाः-प्रत्युपेत्रक्षणादयश्चारित्रं च मूलोत्तरगुणरूपं सुविशुद्धं भावपक्व मुच्यते। गाथायां बन्धानुलोम्येन चारित्रशब्दस्य व्यत्यासेन निर्देशः। यद्वा या उदुगमादीनां दोषाणां शुद्धिस्तद् भावपक्वम्। अन्योऽप्यादेशो वर्त्तते-येन यद् आयुष्कं निर्वर्त्तितं तत् सर्वमनुपाल्य म्रियमाणस्य निरुपक्रमायुर्जीवस्य यद् मरणं तद् भावपक्कम्। अत्र च द्रव्यपक्वेणाधिकारः, तत्रापि पर्यायपक्वेण, तत्रापि वृक्षपर्यायपक्वेणेति ॥ गतं पक्वपदम्। अथ भिन्ना-ऽभिन्नपदे व्याचष्टे-

[भा.१०३६] पक्के भिन्ना-ऽभिन्ने, समणाण वि दोसो किं तु समणीणं।
समणे लहुओ मासो, विंकडुभमाई य ते चेव ॥

वृ- 'पक्कं' यद् निर्जीवं तद् द्रव्यतो भिन्नं वा स्यादभिन्नं वा, तत्रोभयेऽपि श्रमणानामपि दोषो भवति 'किं तु' किं पुनः श्रमणीनाम्? । श्रमणा यदि गृह्णन्ति ततो मासलघु द्वाभ्यामपि तपः-कालाभ्यां लघुकम्, विकटुभ-पलिमन्थादयश्च त एव दोषाः ॥ इदमेव स्फुटतरमाह-

[भा.१०३७] आणादि रसपसंगा, दोसा ते चेव जे पढमसुत्ते।
इह पुनसुत्तनिवाओ, ततिय-चउत्थेसु भंगेसु ॥

वृ- आज्ञादयो रसप्रसङ्गादयश्च दोषास्त एव पक्वप्रलम्बग्रहणेऽपि भवन्ति ये प्रथमसूत्रे अभिहिताः। यद्येवं ततः सूत्रमपार्थकमित्याह-इह पुनः सूत्रनिपातस्तृतीय-चतुर्थयोर्भङ्गयोर्भवति, भावतो भिन्नमिति कृत्वा तृतीय-चतुर्थरूपं भङ्गद्वयमधिकृत्य सूत्रं प्रवृत्तमिति भावः ॥

[भा.१०३८] एमेव संजईण वि, विकडुभ-पलिमंथमाइया दोसा।
कम्माईया य तहा, अविभिन्ने अविहिभिन्ने य ॥

वृ- एवमेव संयतीनामपि विकटुभ-पलिमन्थादयो दोषाः। तथा अविभिन्नेऽविधिभिन्ने च प्रलम्बे हस्तकर्मादयः सविशेषा दोषा मन्तव्याः, अतस्तासां विधिभिन्नमेव कल्पते नाविधिभिन्नम्॥ अत्र च षड्भङ्गीमाह-

[भा.१०३९] विहि-अविहीभिन्नम्मि य, समणीणं होंतिमे उ छ ब्भंगा।
पढमं दोहि अभिन्नं, अविहि-विही दव्व बिइ-तइए ॥

वृ- "से वि य विहिभिन्ने नो चेव णं अविहिभिन्ने" इत्यत्र श्रमणीनां सूत्रे इमे षड् भङ्गा भवन्ति। "पढमं" इत्यादि, प्रथमं 'द्वाभ्यामपि' भावतोऽपि द्रव्यतोऽप्यभिनन्म्, द्वितीयं भावतोऽभिन्नं द्रव्यतोऽविधिभिन्नम्, तृतीयं भावतोऽभिन्नं द्रव्यतो विधिभिन्नम् ॥

[भा.१०४०] एमेव भावतो वि य, भिन्ने तत्थेक्क दव्वओ अभिन्नं।
पंचम-छट्ठे दोहि वि, नवरं पुन पंचमे अविही ॥

वृ- एवमेव भावतो भिन्नेऽपि भङ्गत्रयम्। तत्रैकं चतुर्थं भावतो भिन्नं द्रव्यतोऽभिन्नम्, पञ्चमषष्ठौ भङ्गौ द्वाभ्यामपि भिन्नौ, 'नवरं' केवलं पञ्चमेऽविधिभिन्नम्, भावतो भिन्नं द्रव्यतोऽविधिभिन्नमिति भावः। अर्थादापन्नं षष्ठे भावतो भिन्नं द्रव्यतो विधिभिन्नमिति ॥

अथ षट्स्वपि भङ्गेषु यथाक्रमं प्रायश्चित्तमाह-

[भा.१०४१] लहुगा तीसु परित्ते, लहुओ मासो उ तीसु भंगेसु।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

गुरुगा होंति अनंते, पच्छित्ता संजईणं तु ॥

वृ- आद्येषु त्रिषु भङ्गेषु परीत्तवनस्पतौ चत्वारो लघुकाः प्राग्वत् तपः-कालविशेषिताः, भावतोऽभिन्नत्वात्। उत्तरेषु त्रिषु भङ्गेषु परीत्तवनस्पतावेव लघुको मासस्तपः-कालविशेषितः प्राग्वत्, भावतोभिन्नत्वात्। अनन्तवनस्पतौ तु त एव गुरुकाः कर्त्तव्याः, चत्वारो गुरवो गुरुमासाश्चेति भावः। इत्थं षट्स्वपि भङ्गेषु संयतीनां प्रायश्चित्तानि द्रष्टव्यानि ॥ अथ हस्तकर्मसम्भवा-ऽसम्भवौ चेतसि व्यवस्थाप्य प्रकारान्तरेणात्रैव प्रायश्चित्तमाह-

[भा.१०४२]अहवा गुरुगा गुरुगा, लहुगा गुरुगा य पंचमे गुरुगा।
छट्ठम्मि हवति लहुतो, लहुगत्थाणे गुरूऽणंते ॥

वृ- अथवा प्रथमे भङ्गे गुरुकाः, अभिन्नत्वात्। द्वितीयेऽपि गुरुकाः, अविधिभिन्नत्वात्। तृतीये लघुकाः, विधिभिन्नत्वात्। चतुर्थे गुरुकाः, अभिन्नत्वात्। पञ्चमेऽपि गुरुकाः, अविधिभिन्नत्वात्। षष्ठे लघुको मासः, विधिभिन्नत्वात्। एतच्च परीत्ते भणितम्। अनन्ते तु लघुकस्थाने गुरुकम्, यत्र चतुर्लघवस्तत्र चतुर्गुरवो यत्र लघुमासस्तत्र गुरुमास इत्यर्थः ॥

[भा.१०४३]आयरिओ पवत्तिणीए, पवित्तिणी भिक्खूणी न कहेइ।
गुरुगा लहुगा लहुओ, तत्थ वि आणाइणो दोसा ॥

वृ- एतत् प्रलम्बसूत्रमाचार्य प्रवर्त्तिन्या न कथयति चत्वारो गुरवः। प्रवर्त्तिनी भिक्षुमीनां न कथयति चत्वारो लघवः। यदि भिक्षुण्यो न शृ ण्वन्ति ततो लघुमासः। 'तत्रापि' अकथनेऽश्रवणे वा आज्ञादयो दोषाः ॥

[भा.१०४४] गेण्हंतीणं गुरुगा, पवत्तिणीए पवत्तिणी जइ वा।
न सुणेती गुरुगाती, मासलहू भिक्खुणी जाव ॥

वृ- यदि भिक्षुणीनां प्रलम्बं गृह्णतीनां प्रवर्त्तिनी सारणादिकं न करोति तदा प्रवर्त्तिन्याश्चत्वारो गुरवः। प्रवर्त्तिनी यद्याचार्याणां कथयतां न श्र णोति तदा चत्वारो गुरवः। प्रवर्त्तिन्याः पार्श्वे गणावच्छेदिनी न शृ णोति चत्वारो लघवः। अभिषेका न श्र णोति मासगुरु। भिक्षुणी न शृ णोति मासलघु ॥ अथ निर्ग्रन्थीरधिकृत्य द्वारगाथामाह-

[भा.१०४५]अभिन्ने महव्वयपुच्छा, मिच्छत्त विराधना य देवीए।
किं पुण ता दुविहाओ, भुत्तभोगी अभुत्ता य ॥

वृ- अभिन्ने महाव्रतपृच्छ्या कर्त्तव्या। तथा अङ्गादानसदृशमभिन्नं प्रलम्बं गृह्णतीं निर्ग्रन्थीं दृष्ट्वा कश्चिद् मिथ्यात्वं व्रजेत्-यदेषा अङ्गादानाकारमेवंविधं फलं गृह्णाति तद् नूनमेतेषां तीर्थकृता नैष दोषो दृष्टः, असर्वज्ञ एवामीषां गुरुरित्यादि। विराधना भवेत्। तत्र च देव्या दृष्टान्तो वक्तव्यः। यदि च तस्या अपि देव्याः प्रतिसेवनाकौतुकं समजनि किं पुनः श्रमणीनाम्? इति वक्तव्यम्। ताश्च श्रमण्यो द्विविधाः-भुक्तभोगिन्योऽभुक्तभोगिन्यश्चेति समासार्थः ॥ अथ विस्तरार्थोऽभिधीयते-तत्र प्रथममभिन्ने महाव्रतपृच्छाद्वारम्, शिष्यः पृच्छति- निग्रन्थानां भिन्नमभिन्नं वा पक्वं कल्पते, निर्ग्रन्थीनां पुनर्भिन्नमेव कल्पते नाभिन्नम् तदपि विधिभिन्नमित्यत्र यथा भेदस्तथा किमेवं महाव्रतेष्वपि तासां भेदः?; यथा किल तच्चन्निकानां मते भिक्षूणामर्द्धतृतीयानि शिक्षापदशतानि भिक्षुणीनां पञ्च शिक्षापदशतानि, एवं किं निर्ग्रन्थीनामपि षण्महाव्रतानि दश

Jain Education International For Private & Personal Use Only www.jainelibrary.org

वा येनैवमभिधीयते ? उच्यते-

[भा.१०४६]न वि छम्महव्वया नेव दुगुणिया जह उ भिक्खुणीवग्गे।
बंभवयरक्खणट्ठा, न कप्पती तं तु समणीणं ॥

वृ-नापि निर्ग्रन्थीनां षड् महाव्रतानि, नैव साधूनां सम्बन्धिभ्यः पञ्च महाव्रतेभ्यः 'द्विगुणितानि' दशेत्यर्थः, यथा सौगतानां मते भिक्षुणीवर्गे द्विगुणानि शिक्षापदानि भवन्ति न तथाऽत्रकिन्तु पञ्चेवेति भावः। यद्येवं तर्हि किमर्थमत्र निर्ग्रन्थीनामभिन्नं न कल्पते ? उच्यते-ब्रह्मव्रतरक्षणार्थं 'तत्तु' अभिन्नं श्रमणीनां न कल्पते, मा करकर्मादिकमनेन कार्षुरिति कृत्वा ॥

न केवलमत्रैव प्रलम्बे श्रमणीनां विशेषः किन्त्वन्यत्रापीति दर्शयति-

[भा.१०४७] अन्नत्थ वि जत्थ भवे, एगयरे मेहुणुब्भवो तं तु।
तस्सेव उ पडिकुट्ठं, बिइयस्सऽन्नेण दोसेणं ॥

वृ-अन्यत्रापि यत्र भुक्ते स्पृष्टे वा ''एगयरे'' इति षष्ठी-सप्तम्योरर्थं प्रत्यभेदात् 'एकतरस्य' साधुपक्षस्य साध्वीपक्षस्य वा मैथुनोद्भवो भवति 'तत्तु' वस्तु 'तस्यैव' विवक्षितपक्षस्य, तुशब्दो मैथुनोद्भवदोषपरिहारार्थमित्यस्यार्थस्य सूचनार्थ, 'प्रतिक्रुष्टं' प्रतिषिद्धम्। द्वितीयस्य तु पक्षस्य तदेव 'अन्येन' असंयमलक्षणेन दोषेण प्रतिषिध्यते ॥ निदर्शनमाह-

[भा.१०४८] निल्लोम-सलोमऽजिने, दारुगदंडे सवेंट पाए य।
बंभवयरक्खणट्ठा, वीसुं वीसुं कया सुत्ता ॥

वृ- यथा निर्ग्रन्थानां निर्लोमाजिनं स्मृतिकरण-कौतुकादिदोषपरिहारार्थं प्रतिषिद्धम्, निर्ग्रन्थीनां पुनः प्राणिदयानिमित्तमतिरिक्तोपधिभारपरिहारार्थं च तदेव प्रतिषिध्यते; एवं सलोमाजिनं निर्ग्रन्थीनां स्मृतिकरणादिदोषनिवारणार्थम्, निर्ग्रन्थीनां पुनस्तदेव प्राणिदयानिमित्तं प्रतिषिद्धम्। दारुदण्डकं पादप्रोञ्छनं सवृन्तपात्रं च च निर्ग्रन्थीनां ब्रह्मव्रतानुपालनार्थं निर्ग्रन्थानां पुनरतिरिक्तोपधिदोषपरिहरणार्थं नानाज्ञातम्। एवं ब्रह्मव्रतरक्षणार्थं निर्ग्रन्थानां निर्ग्रन्थीनां च 'विष्वग् विष्वक्' पृथक् पृथक् सूत्राणि कृतानि ॥ आह कर्मोदयादेव प्राणिनां मैथुनोद्भवो भवति, ततः किमेवं सलोमादिपरिहारः क्रियते ? उच्यते-

[भा.१०४९]नत्थि अनिदानओ होइ उब्भवो तेन परिहर निदानं।
ते पुन तुल्ला-ऽतुल्ला, मोहनिदाणा दुपक्खे वि ॥

वृ- निदानं कारणमित्येकोऽर्थः, तच्चेहेष्टशब्द-रूप-रस-गन्ध-स्पर्शात्मकं यत् प्रतीत्य पुरुषवेदादिमोहनीयमुदयमासादयति। तदुक्तम्-

दव्वं खेत्तं कालं, भावं च भवं तहा समासज्ज।
तस्स समासुद्दिट्ठो, उदओ कम्मस्स पंचविहो ॥

ततश्च 'नास्ति' न विद्यते एतद् यद् 'अनिदानकः' निदानमन्तरेण मोहनीयोद्भवो भवति, 'तेन' कारणेन परिहर 'निदानम्' इष्टशब्दादिरूपम्। 'ते पुनः' शब्दादयो मोहनिदानभूता द्वयोः पक्षयोः समाहारो द्विपक्षं-पुरुषवर्गद्वयं तस्मिन् द्विपक्षेऽपि मोहोद्भवं प्रति केचित् तुल्याः केचित् त्वतुल्याः ॥ तानेवाह-

[भा.१०५०] रस-गंधा तहि तुल्ला, सद्दाई सेस भय दुपक्खे वि।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

सरिसे वि होइ दोसो, किं पुन ता विसम वत्थुम्मि ॥

वृ- स्त्रीणां पुरुषाणां च 'तत्र' मोहोद्भवे रस-गन्धास्तुल्याः । किमुक्तं भवति ? -यथा स्निग्ध-मधुरादिरसैः स्रक्-चन्दनादिगन्धैश्च पुरुषाणामिन्द्रियाणि मोहोद्रेकभाञ्जि भवन्ति तथा स्त्रणांमपीतिमोहोद्भवं प्रति रस-गन्धास्तुल्याः । 'शेषान्' शब्द-रूप-स्पर्शान् 'भज' विकल्पय 'द्विपक्षेऽपि' उभयपक्षयोरपि । यतः पुरुषस्य पुरुषसम्बन्धिनि शब्दे श्रुते रूपे दृष्टे स्पर्शे च स्पृष्टे मोहोदयो भवेद् वा न वा, यदि भवेन्न तादृशस्तीव्रः, स्त्रसम्बन्धिनि तु प्रायो भवत्येव तीव्रश्च जायते; स्त्रियास्तु स्त्रिसम्बन्धिषु शब्द-रूप-स्पर्शेषु गोचरमुपागतेषु मोहोद्रेको भवेद् वा न वा, यदि भवेन्न ताध्शस्तीव्रः, पुरुषसम्बन्धिषु तु प्रायो भवत्येव तीव्रश्च भवति । तदेवं सध्शेऽपि स्पर्शादौ वस्तुनि दोषो भवति, किं पुनस्तावद् 'विषमे' विसध्शे वस्तुनि ? इति । यतश्चैवमतः सलोम-निर्लोमादीन्यतुल्यनिदानानि विशेषतः परिह्रियन्ते; अत एव चात्राभिन्नमविधिभिन्नं च न कल्पते ॥ गतमभिन्ने महाव्रतपृच्छेति द्वारम् । मिथ्यात्वद्वारं तु सुबोधत्वाद् भाष्यकृता न भावितम्। अथ विराधनाद्वारम्-अभिन्नं गृह्णतीनां निर्ग्रन्थीनामात्मनो ब्रह्मव्रतस्य वा विराधना भवेत् । अत्र च देव्या ध्ष्टान्तः । तमेवाह-

[भा.१०५१] चीयत्त कक्कडी कोउ कंटक विसप्प समिय सत्थे य ।

पुनरवि निवेस फाडण, किमु समणि निरोह भुत्तितरा ॥

वृ- एगस्स रन्नो महादेवी । तीसे कक्कडियाओ पियाओ । ताओ अ एगो निउत्तपुरिसो दिने दिने आनेति । अन्नया तेन पुरिसेन अहापवित्तीए अंगादानसंठिया कक्कडिया आनिता । तीसे देवीए तं कक्कडियं पासेत्ता कोतुयं जायं-पेच्छामि ताव केरिसो फासो त्ति एयाए पडिसेवियाए ? ताहे ताए सा कक्कडिया पादे बंधिउं सागारियट्ठाणं पडिसेविउमाढत्ता । तीसे कक्कडियाए कंटओ आसी, सो तम्मि सागारिए लग्गो । विसप्पियं च तं । ताहे वेज्जस्स सिट्ठं । ताहे वेज्जेणं समिया मद्दिया, तत्थ निवेसाविया, उट्ठवेत्ता सुसियप्पदेसं चिंधियं । तम्मि पदेसे तीए अपेच्छमाणीए सत्थयं उप्परामुहधारं खोहियं । पुणो तेनेवागारेण निवेसाविया । फोडियं । पूएण समं निग्गओ कंटओ । पउणा जाया । जति ताव तीसे देवीए दंडिएण पडिसेविज्जमाणीए कोउयं जायं, किमंग पुन समणीणं निच्चणिरुद्धाण भुत्तभोगीणं अभुत्तभोगीण य ? ॥

अथ गाथाक्षरार्थ-राज्ञः कस्यचिद् देव्याः कर्कटिकाः "चीयत्ता" इति प्रीतिकराः, रुच्या इत्यर्थः । अङ्गादानाकारं च कर्कटिकां ध्ष्ट्वा कौतुकमुत्पन्नम् । ततः प्रतिसेवमानायास्तस्याः कण्टकः सागारिके लग्नः । विसर्पितं च तत् सागारिकम् । ततो वैद्येन 'समिता' कणिक्का तस्यां मर्दितायां निवेशिता । ततः शुष्कप्रदेशे शस्त्रकं प्रक्षिप्तम् । ततः पुनरपि तथैव निवेश्य तेन शस्त्रकेण सागारिकस्य पाटने कृते पूयेन समं कण्टके निर्गते प्रगुणीकृता । यदि तस्या अप्येवंविधं कौतुकमजनिष्ट, किं पुनः श्रमणीनां नित्यनिरोधानां भुक्तानाम् 'इतरासां वा' अभुक्तानाम् ॥

इदमेव स्पष्टयन्नाह-

[भा.१०५२] कसिणाऽविहिभिन्नम्मि य, गुरुगा भुत्ताण होइ सइकरणं ।

इयरासि कोउगाई, घिप्पंते जं चउ उड्डाहो ॥

वृ- कृत्स्नम्-अभिन्नं तत्र अविधिभिन्ने च श्रमणीनां चत्वारो गुरुकाः, भुक्तभोगिनीनां

स्मृतिकरणम् इतरासां कौतुकादयो दोषा भवन्ति । तस्मिंश्चाङ्गादानाकारे गृह्यमाणे यश्चोड्डाहो भवति यथा 'नूनमेतेनैषा पादकर्ण करिष्यति' तन्निष्पन्नमपि प्रायश्चित्तम् ॥

तेन च प्रलम्बेन सा पादकर्म कृत्वा चिन्तयति-

[भा.१०५३] जइ ताव पलंबाणं, सहत्थणुन्नाण एरिसो फासो ।
किं पुन गाढालिंगन, इयरम्मि उ निद्दओच्छुद्धे ॥

वृ- यदि तावत् प्रलम्बानां स्वहस्तेन नुन्नानां-"नुदंत् प्रेरणे" प्रेरितानामित्यर्थः ईदृशः स्पर्श, किं पुनर्गाढालिङ्गनेन 'इतरस्मिन्' अङ्गादाने पुरिषेण "निद्दओच्छुद्धे" त्ति निर्दयं यथा भवत्येवम् उत्-प्राबल्येन क्षिप्ते सति स्पर्शो भविष्यति ? इति ॥

ततश्चेत्थं विचिन्त्योदीर्णप्रबलमोहनीयकर्मा सा इदं कुर्यात्-

[भा.१०५४] पडिगमणमन्नतित्थिग, सिद्धे संजय सलिंग हत्थे य ।
वेहानस ओहाने, एमेव अभुत्तभोगी वि ॥

वृ- काचित् पार्श्वस्थादिभ्यः समागता भवेत् साऽपि तत्रैव प्रतिगच्छेत्, अन्यतीर्थिकेन वा सिद्धपुत्रेण वाऽऽत्मानं प्रतिसेवयेत्, संयतं वा उपसर्गयेत्, एतानि स्वलिङ्गे स्थिता कुर्यात् । हस्तकर्म वा भूयोभूयः कुर्यात्, यद्वा 'मया व्रतानि भग्नानि' इति कृत्वा 'कथङ्कारं वा द्राधीयः कालपरिपालितं शीलरत्नमहं भङ्क्ष्यामि ?' इति निर्वेददूनमानसा वैहायसं मरणं विदध्यात्, अथवा प्रबलमोहपरवशा अवधावनं विदध्यात् । एतानि पदानि भुक्तभोगिनी कुर्यात् । अभुक्तभोगिन्यप्येवमेव कुर्यात् ॥ शिष्यः प्रश्नयति-न जानीमहे वयं कीदृशमविधिभिन्नम् ? कीदृशं वा विधिभिन्नम् ? इति । सूरिराह-

[भा.१०५५] भिन्नस्स परूवणया, उज्जुत तह चक्कली विसमकोट्टे ।
ते चेव अविहिभिन्ने, अभिन्ने जे वन्निया दोसा ॥

वृ- असंयमदोषनिवर्त्तनार्थमविधिना विधिना च भिन्नस्य प्ररूपणा क्रियते । तत्र यत् चिर्भटादिकं विदार्य ऊर्द्धफालिरूपाः पेश्यः कृतं तद् ऋजुकभिन्नम्, यत् पुनस्तिर्यग् बृहत्यः कत्तलिकाः कृतं तत् चक्कलिकाभिन्नम्, एते द्वे अप्यविधिभिन्ने मन्तव्ये । यत् तु पेश्यः कृत्वा पुनः श्लक्ष्णश्लक्ष्णतरादिभिः खण्डैरनेकशश्छित्वा तथा कृतं यथा भूयस्तदाकारं कर्तुं न पार्यते तदेवंविधं विषमकुट्टभिन्नमुच्यते, विषमैः-पुनस्तथाकर्तुमशक्यैः कुट्टैः-श्लक्ष्णखण्डैर्भिन्नमिति व्युत्पत्तेः । एतच्च विधिभिन्नम् । अत्र चाविधिभिन्ने त एव दोषा द्रष्टव्या येऽभिन्ने देवीदृष्टान्तेन वर्णिताः ॥ कथम् ? इति चेद् उच्यते-

[भा.१०५६] कट्ठेण व सुत्तेण व, संदानिते अविहिभिन्ने ते चेव ।
सविसेसतर व्व भवे, वेउव्वियभुत्तइत्थीणं ॥

वृ- 'काष्ठेन वा' शलाकादिना 'सूत्रेण वा' दवरकादिना 'सन्दानिते' सङ्घातिते पूर्वाकारं स्थापिते इत्यर्थः, अविधिभिन्ने त एव दोषा ज्ञातव्या येऽभिन्ने भणिताः । सविशेषतरा वा भवेयुः, कथम् ? इत्याह-'विकुर्वितं' बेण्टकाद्याभरमेनालङ्क तं यदङ्गादानं तेन याः स्त्रियो भुक्तपूर्वास्तासां प्रव्रजितानां तत्र काष्ठादिसन्दानितप्रलम्बे विकुर्विताङ्गादानकल्पे दृष्टे समधिकतरा दोषा उपढौकन्ते ॥

अथार्थतः कारणिकं सूत्रमुपदर्शयन्नाह-

Jain Education International For Private & Personal Use Only www.jainelibrary.org

[भा.१०५७]विहिभिन्नं पि न कप्पइ, लहुओ मासो उ दोस आणाई ।
तं कप्पती नकप्पइ, निरत्थगं कारणं किं तं ॥

वृ- यदपि सूत्रे विधिभिन्नमनुज्ञातं तदपि न कल्पते । यदि गृह्णन्ति ततो मासलघु आज्ञादयश्च दोषाः । आह ननु सूत्रे भणितं 'तद्' विधिभिन्नं कल्पते ? गुरुराह-यद्यपि सूत्रे अनुज्ञातं तथापि न कल्पते । यद्येवं तर्हि निरर्थकं सूत्रम्, नैवम्, कारणिकं सूत्रम् । आह किं पुनः तत् कारणं यदद्यापि नाभिधीयते ? ॥ उच्यते, ब्रूमः-

[भा.१०५८] गेलन्नऽद्धाणोमे, तिविहं पुन कारणं समासेणं ।
गेलन्ने पुव्वुत्तं, अद्धानुवरिं इमं ओमे ॥

वृ- ग्लानत्वम् अध्वा अवमौदर्यम्, एतत् 'समासेन' सङ्क्षेपेण त्रिविधं कारणम् । तत्र ग्लानत्वे इहैव प्रलम्बप्रकृते "विज्जे पुच्छण जयणा" इत्यादि पूर्वोक्तं द्रष्टव्यम् । अध्वनि तु 'उपरि' अध्वसूत्रे इहैवोद्देशके भणिष्यते । 'इदम्' अनन्तरमेव वक्ष्यमाणम् अवमे द्रष्टव्यम् ॥

[भा.१०५९] निग्गंथीणं भिन्नं, निग्गंथाणं च भिन्नऽभिन्नं तु ।
जह कप्पइ दोण्हं पी, तमहं वोच्छं समासेणं ॥

वृ- निर्ग्रन्थीनां नियमाद् विधिना षष्ठे भङ्गे भिन्नम्, निर्ग्रन्थानां च चतुर्थ-तृतीययोर्भङ्ग-योर्भिन्नमभिन्नं वा, यथा द्वयोरपि वर्गयोः कल्पते तदहं वक्ष्ये समासेन ॥ यथाप्रतिज्ञातमेव निर्वाहयति-

[भा.१०६०] ओमम्मि तोसलीए, दोण्ह वि वग्गाण दोसु खेत्तेसु ।
जयणट्ठियाण गहणं, भिन्नाऽभिन्नं व जयणाए ॥

वृ- अवमकाले साधवः साध्व्यश्च तोसलिविषयं गत्वा स्थिताः । तत्र द्वावपि वर्गौ द्वयोः क्षेत्रयोः स्थितौ, एकस्मिन् क्षेत्रे संयता द्वितीयस्मिन् संयत्य इत्यर्थः । तथा यदुत्सर्गत एकत्र क्षेत्रे मिलितौ नावतिष्ठेते एषैव यतना तया स्थितौ यतनास्थितौ, यद्वा साधु-साध्वीप्रायोग्यं विधिं ग्राहयित्वा यौ स्थितौ तौ यतनास्थितौ, तयोरेवंस्थितयोः 'यतनया' वक्ष्यमाणया भिन्नस्याभिन्नस्य वा ग्रहणं कल्पते ॥ आह कोऽयं नियमो येन तोसलेरेव ग्रहणं कृतम् ? उच्यते-

[भा.१०६१]आनुग जंगल देसे, वासेण विना वि तोसलिग्गहणं ।
पायं च तत्थ वासति, पउरपलंबो उ अन्नो वि ॥

वृ- देशो द्विधा-अनूपो जङ्गलश्च । नद्यादिपानीयबहुलोऽनूपः, तद्विपरीतो जङ्गलः निर्जल इत्यर्थः । यद्वा अनूपो अजङ्गल इति पर्यायौ । तत्रायं तोसलिदेशो यतोऽनूपो यतश्चास्मिन् देशे वर्षेण विनाऽपि सारणीपानीयैः सस्यनिष्पत्तिः; अपरं च 'तत्र' तोसलिदेशे 'प्रायः' बाहुल्येन वर्षति ततोऽतिपानीयेन विनष्टेषु सस्येषु प्रलम्बोपभोगो भवति; अन्यच्च तोसलि प्रचुरप्रलम्बः, तत एतैः ,कारणैस्तोसलिग्रहणं कृतम् । अन्योऽपि य ईदृशः प्रचुरप्रलम्बस्तत्राप्येष एव विधि ॥

[भा.१०६२] पुच्छ सहु-भीयपरिसे, चउभंगे पभमए अणुन्नाओ ।
सेस तिए नाणुन्ना, गुरुगा परियट्टणे जं च ॥

वृ- "पुच्छ" त्ति शिष्यः पृच्छति-यदुक्तंभवद्भि 'द्वयोर्वर्गयोः क्षेत्रद्वये स्थितयोः' इत्यादि तत्र संयतीनां पृथक्क्षेत्रे स्थितानां व्यापारो वोढुं दुःशको भवति, दोषदर्शिनश्च यूयं पृथक्क्षेत्रे

Jain Education International For Private & Personal Use Only www.jainelibrary.org

स्थापयथ, यतश्च दोषाः समुत्पद्यन्ते तत् प्रेक्षावतां नोपादातुमुचितम्, प्रवचने च तत्र तत्र प्रदेशे संयत्यः प्रव्राजनीया उक्ता एव, अतः पर्यनुयुज्यते किं परिवर्त्तयितव्याः संयत्यः ? उत न ? इति । गुरुराह-नास्त्यत्र कोऽपि नियमो यदवश्यमेव परिवर्त्तयितव्या न वेति, यदि पुनः प्रव्राज्य न्यायतः परिवर्त्तयति ततो महतीं कर्मनिर्जरामासादयति, अथान्यायतः परिवर्त्तयति ततो महामोहमपचित्य दीर्घसंसारसम्पातभाग् भवति । तर्हि कीदृशेन परिवर्त्तयितव्या न वेति, यदि पुनः प्रव्राज्य न्यायतः परिवर्त्तयति ततो महतीं कर्मनिर्जरामासादयति, अथान्यायतः परिवर्त्तयति ततो महामोहमुपचित्य दीर्घसंसारसम्पातभाग् भवति । तर्हि कीदृशेन परिवर्त्तयितव्याः? उच्यते-"सहु-मीयपरिसे"त्ति सहिष्णुर्भीतपर्षदिति पदद्वयेन चतुर्भङ्गी, सा चेयम्-सहिष्णुरपि भीतपर्षदपि १, सहिष्णुर्न भीतपरिषत् २, असहिष्णुः परं भीतपरिषद् ३, असहिष्णुरभीतपरिषच्चेति ३ । तत्रेन्द्रियनिग्रहसमर्थ संयतीप्रायोग्यक्षेत्र-वस्त्र-पात्रादीनामुत्पादनायां प्रभविष्णुः सहिष्णुरुच्यते। यस्य तु सर्वोऽपि साधु-साध्वीवर्गो भयान्न कामप्यक्रियां करोति स भीतपरिषत् । तत्र प्रथमभङ्गे वर्त्तमानः परिवर्त्तनायामनुज्ञातः, शेषेषु त्रिषु भङ्गेषु वर्त्तमानो नानुज्ञातः, यदि परिवर्त्तयति तदा चत्वारो गुरुकाः । "जं च" त्ति द्वितीये भङ्गे आत्मना सहिष्णुः परमभीतपरिषत्तया स्वच्छन्दप्रचाराः सत्यो यत् किमपि ताः करिष्यन्ति तत् सर्वमयमेव प्राप्नोति । तृतीयभङ्गे तु स्वयमसहिष्णुतया तासामङ्गप्रत्यङ्गादीनि दृष्ट्वा यदाचरति तन्निष्पन्नम् । चतुर्थे भङ्गे द्वितीयतृतीयभङ्गदोषानवाप्नोतीति॥ प्रथमभङ्गवर्त्तिनमुद्दिश्याह-

[भा.१०६३] जइ पुन पव्वावेती, जावज्जीवाए ताउ पालेइ ।
अन्नसति कप्पे वि हु, गुरुगा जं निज्जरा विउला ॥

वृ- यदीत्यभ्युपगमे, ततश्चायमर्थ-ताः प्रथमतोऽपि यतस्ततः प्रव्राजयितुं न कल्पन्ते । यदि पुनः प्रव्राजयति ततो यथोक्तविधिना यावज्जीवं ताः पालयति, योग-क्षेमविधानेन सम्यग् निर्वाहयतीत्यर्थः । स प्रथमभङ्गवर्ती यदि जिनकल्पं प्रतिपित्सुः अपरं चाऽऽर्यिकाः परिवर्त्तयितव्याः ततः किं करोतु ? इति चिन्तायां यद्यस्ति तदीये गच्छे कोऽप्यार्यिकाणां विधिना वर्त्तापकस्ततस्तस्य समर्प्य जिनकल्पं प्रतिपद्यताम्, अथ नास्त्यन्यो वर्त्तापकस्तर्हि मा जिनकल्पप्रतिपत्तिं करोतु किन्त्वार्यिका एव परिवर्त्तयतु । कुतः ? इत्याह-अन्यस्य वर्त्तापकस्य असति-अभावे जिनकल्पेऽपि प्रतिपद्यमाने 'हुः' निश्चये चत्वारो गुरुकाः । आह सकलकर्मक्षयाक्षूणकारणे जिनकल्पेऽपि प्रतिपद्यमाने किमेव प्रायश्चित्तम् ? इत्याह-'यद्' यस्मात्कारणाद् जिनकल्पं प्रतिपन्नस्य या निर्जरा तस्याः सकाशाद् विपुला निर्जरा यथावत् संयतीः परिपालयतो भवतीति युक्तियुक्तमेव प्रायश्चित्तम्॥ अथ "जयणट्ठियाण गहणं"ति यदुक्तं तत्र यया यतनया स्थितास्तामाह-

[भा.१०६४] उभयगणी पेहेउं, जहि सुद्धं तत्थ संजती णेति ।
असती व जहिं भिन्ना, अभिन्ने अविही इमा जयणा ॥

वृ- उभयः-साधु-साध्वीवर्गद्वयरूपो गणोऽस्यास्तीत्युभयगणी, स आचार्योऽवमकाले तोसलिप्रभृतिके प्रचुरप्रलम्बे देशे गत्वा गीतार्थेनाऽऽत्मना वा क्षेत्रद्वयं प्रत्युपेक्ष्य ययोः शुद्धं भक्तं लभ्यते न प्रलम्बमिश्रितमित्यर्थः तयोः क्षेत्रयोः पृथग् द्वावपि वर्गौ स्थापयति । यदि द्वे क्षेत्रे ईदृशे न स्तस्ततो यत्र शुद्धं भक्तं प्राप्यते तत्र संयतीः 'नयति' स्थापयति, यत्र पुनः प्रलम्बमिश्रितं

Jain Education International For Private & Personal Use Only www.jainelibrary.org

भक्तं लभ्यते तत्र साध्वीः स्थापयन्ति, स्वयं तु निर्मिश्रप्रलम्बक्षेत्रे तिष्ठन्ति । अथ सर्वेष्वपि क्षेत्रेषु निर्मिश्रप्रलम्बानि प्राप्यन्ते ततः "असइ" त्ति प्रलम्बमिश्रस्याभावे यत्र विधिभिन्नानि प्राप्यन्ते तत्र संयत्यः स्थापनीयाः, स्वयं पुनरभिन्ना-ऽविधिभिन्नक्षेत्रे तिष्ठन्ति । अथ सर्वेष्वपि क्षेत्रेष्वभिन्नान्य-विधिभिन्नानि वा प्राप्यन्ते तत इयं यतना कर्त्तव्या ।। तामेवाह-

[भा.१०६५]भिन्नाणि देह भित्तूण वा वि असति पुरतो सि भिंदंति ।
ठाविंति ताहे समणी, ता चेव जयंति तेसऽसती ।।

वृ- यत्र क्षेत्रे संयतीः स्थापयितुकामास्तत् क्षेत्रं साधवः पूर्वमेवेत्थं भावयन्ति-यदा गृहस्थैः प्रलम्बान्यानीतानि भवन्ति तदा साधवो भणन्ति-यानि भिन्नानि तान्यस्मभ्यं दत्त । अथ न सन्ति भिन्नानि, सन्ति वा परं स्तोकानि, तैश्च संस्तरणं न भवतीति परिभाव्य साधवो भणन्ति- अस्मभ्यमेतानि भित्त्वा प्रयच्छत, न कल्पन्तेऽस्माकमीदृशानीति । अथ ते गृहस्थाः 'यदि रोचते तत ईदृशान्येव गृहीत' इत्युक्त्वा अभिन्नान्येव प्रयच्छन्ति ततः 'असति' अभावे "सिं" ति तेषां गृहस्थानां पुरतस्तानि प्रलम्बानि भिन्दन्ति भित्त्वा च गृह्णन्ति । एवंविधीयमाने गृहस्थानां चेतसि गाढतरं निश्चय उत्पद्यते, यथा-नूनं न कल्पन्ते अमीषामभिन्नानीति, ततस्ते भिन्नान्येव प्रयच्छन्तीति । एवं यदा तत् क्षेत्रं भावितं भवत तदा तत्र श्रमणीः स्थापयन्ति । 'तेषां' संयतानाम् 'असति' अभावे व्यापृतेषु वा तेषु कापि प्रयोजनान्तरे 'ता एव' संयत्यो यास्तत्रस्थविरास्ता एवमेव यतन्ते ।।

[भा.१०६६] भिन्नासति वेलातिक्कमे व गेण्हंति थेरिया भिन्ने ।
दारे भित्तु अतिंति व, ठाणासति भिंदती गणिणी ।।

वृ- विधिना भिन्नानामसति, यावद् वा गृहस्थैर्भेदयन्ति आत्मना वा यावत् तत्र भिन्दन्ति तावद् वेलातिक्रमो भवति, ततो याः स्थविरास्ता अभिन्नानि अविधिभिन्नानि वा यास्तु तरुण्यस्ता विधिभिन्नानि गृह्णन्ति । ततः प्रतिनिवृत्ताः स्थविरा अभिन्ना-ऽविधिभिन्नान्युपाश्रयद्वारे भित्त्वा विधिभिन्नानि कृत्वा वसतिम् 'अतियान्ति' प्रविशन्तीत्यर्थः । अथ बहि स्थानं नास्ति ततः स्थानस्य 'असति' अभावे 'गणिनी' प्रवर्त्तिनी तस्यास्तानि समर्प्यन्ते, ततः सा गणिनी तानि 'भिनत्ति' विधिभिन्नानि करोतीत्यर्थः, कृत्वा च तरुणीनां समुद्देष्टुं ददाति ।। आह किं कारणं तरुणीनां प्रतिग्रहीतुं समुद्देष्टुं वा अभिन्ना-ऽविधिभिन्नानि न दीयन्ते ? उच्यते-

[भा.१०६७] कक्खंतरुक्खवेगच्छियाइसू मा हु नूमए तरुणी ।
त भिन्नं छुभति पडग्गहेसु न य दिज्जए सयलं ।।

वृ- कक्षाया अन्तरं कक्षान्तरम्, "उक्खो" त्ति परिधास्त्रैकदेशः, आह च निशीतचूर्णिकृत्-परिधाणवत्थस्स अब्भिंतरचूलाए उवरिकण्णो नाभिहेट्ठा उक्खो भण्णइ ।। वैकक्षिकी-संयतीनामुपकरणविशेषः, एतेषु आदिशब्दादन्यस्मिन्नपि वस्त्रान्तरे तरुणी "मा नूमए" त्ति "छदेर्णेर्नुम-नूम०" इति प्राकृतलक्षणाद् मा च्छादयेत् । ततो भिक्षाग्रहणकाले तस्याः प्रतिग्रहेषु भिन्नं प्रक्षिप्यते, न च 'सकलम्' अभिन्नमविधिभिन्नं वा तस्या भोजनकाले दीयते ।।

[भा.१०६८] एवं एसा जयणा, अपरिग्गहिएसु होइ खेत्तेसु ।
तिविहेहि परिग्गहिए, इमा उ जयणा तहिं होइ ।।

वृ- एवम् 'एषा' अनन्तरोक्ता यतना अपरिगृहीतेषु क्षेत्रेषु कर्त्तव्या भवति । 'त्रिविधैः'

Jain Education International For Private & Personal Use Only www.jainelibrary.org

संयत-संयती-तदुभयैः परिगृहीते "इमा" वक्ष्यमाणा यतना तत्र क्षेत्रे भवति ॥ इदमेव स्फुटतरमाह-

[भा.१०६९]पुव्वोगहिए खेत्ते, तिविहेण गणेण जइ गणो तिविहो।
एज्जाहि तयं खेत्तं, ओमे जयणा तहिं का नू ॥

वृ- 'त्रिविधेन' संयत-संयती-तदुभयरूपेण गणेन त्रिविधस्य वाऽन्यतरेण पूर्वमवगृहीते क्षेत्रे यदि त्रिविध एव गणो अवमकाले असंस्तरन् तकं क्षेत्रम् 'एयात्' आगच्छेत्, ततस्तेषामागतानां स्थातव्ये वास्तव्यानां वा अवग्रहे दातव्ये का 'नुः' इति वितर्के यतना ? ॥ अत आह-

[भा.१०७०]आयरिय-वसभ-अभिसेग-भिक्खुणो पेल्ल लंभे न य देंति।
गुरुगा दोहि विसिट्ठा, चउगुरुगाइ व्व जा लहुगो ॥

वृ- यत् संयतपरिगृहीतं क्षेत्रं तदेषामन्यतरेण परिगृहीतं भवेत्। तद्यथा-आचार्येण वा वृषभेण वा अभिषेकेण वा भिक्षुणा वा। ये आगन्तुकास्तेऽप्येवमेव चत्वारो द्रष्टव्याः। संयत्योऽपि वास्तव्याः आगन्तुकाश्चैवमेव चतुर्विधाः। नवरमाचार्यस्थाने प्रवर्त्तिनी वृषभस्थाने गणावच्छेदिनी वक्तव्या। अत्र चाऽऽचार्य प्रसिद्धः। उपाध्यायो वृषभानुग इति कृत्वा वृषभ उच्यते। यः पुनरित्वराभिषेकेणाऽऽचार्यपदेऽभिषिक्तः स इहाभिषेकः, अथवा गणावच्छेदक इहाभिषेकः। शेषाः सामान्यसाधवो भिक्षवः। एतेषां चेय चारणिका-आचार्यपरिगृहीते क्षेत्रे यदन्य आचार्य आगतो यदि च स वास्तव्य आचार्य क्षेत्रे पूर्यमाणे भक्त-पाने वा लभ्यमाने आगन्तुकस्य स्थातुं न ददाति तदा चत्वारो गुरवः, अथ न पूर्यते क्षेत्रं स चागन्तुको बलात् प्रेर्य तिष्ठति तस्यापि चतुर्गुरुकाः, एतच्च प्रायश्चित्तं तपसा कालेन च द्वाभ्यामपि गुरुकम्; स एव वास्तव्यक आचार्यो वृषभस्यागन्तुकस्य न ददाति वृषभो वा बलात तिष्ठति उभयोरपि चत्वारो गुरुकाः तपसा गुरवः कालेन लघवः; स एव वास्तव्य आचार्योऽभिषेकस्यागतस्य स्थानं न ददाति स वा अभिषेको वास्तव्यमाचार्यमवगणय्य तिष्ठति उभयत्रापि चतुर्गुरु तपसा लघु कालेन गुरुकम्; स एळ वास्तव्य आचार्य आगन्तुकस्य भिक्षोरवस्थातुं न प्रयच्छति स वा भिक्षुर्वास्तव्यमाचार्यं बलादवज्ञाय तिष्ठति द्वयोरपि च चत्वारो गुरवस्तपसा कालेन च लघवः। एवमाचार्ये पूर्वस्थिते भणितम्।

एवं वृषभाऽभिषेक-भिक्षुभिरपि पूर्वस्थितैः प्रत्येकं चत्वारो गमाः कर्त्तव्याः, प्रायश्चित्तमप्येवमेव तपः-कालविशेषितम्। एवमेते सर्वसङ्ख्यया षोडश गमाः। अथवैतेष्वेव षोडशसु गमेषु प्रायश्चित्तप्ररूपणायामयमादेशः-"चउगुरुगादि व्व जा लहुगो" त्ति अस्य भावना-आचार्य आचार्यस्यागतस्य स्थातुं न ददाति आगन्तुको वा प्रेरयति द्वयोरपि चत्वारो गुरवः उभयगुरुकाः आचार्यो वृषभस्य न प्रयच्छति वृषभो वा बलात् तिष्ठति चतुर्लघवः तपसा गुरुकाः। आचार्य एवाभिषेकस्य न ददाति अभिषेको वा बलात् प्रेरयति मासगुरु कालेन गुरु। आचार्यः सामान्यभिक्षोरायातस्य स्थातुं नानुजानीते आगन्तुको वा भिक्षुर्बलादेवावतिष्ठते मासलघु उभयलघुकम्। एवं शेषेष्वपि द्वादशसु गमेषु चतुर्गुरुकादिकं लघुमासान्तं तपः-कालविशेषितमेवमेव प्रायश्चित्तम् ॥ तदेवं संयतानां संयतैः सह चारणिकया षोडश विकल्पा उक्ताः। अथ शेषविकल्पप्रदर्शनायाह-

[भा.१०७१]एमेव य भयणा वी, सोलसिया एक्कमेक्क पक्खम्मि।
उभयम्मि वि नायव्वा, पेल्लमदेंते व जं पावे ॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

वृ- एवमेवैकेकस्मिन् पक्षे षोडशिका 'भजना' भङ्गरचना कर्त्तव्या। यस्तदुभयरूपो गणो न भवति किन्तु केवल एव संयतपक्षः संयतीपक्षो वा स एकैकपक्षोऽभिधीयते। तत्र संयतानां संयतैः सह प्रथमा षोडशभङ्गी, सा च सप्रपञ्चं भाविता। अथ संयतीभिः परिगृहीते क्षेत्रे अपराः संयत्यः समागच्छन्ति तत्रापि प्रवर्त्तिनी-गणावच्छेदिन्यभिषेका-भिक्षुणीभिः पूर्वस्थिताभिः सह प्रत्येकमागन्तुकप्रवर्त्तिनी-गणावच्छेदिन्यभिषेका-भिक्षुणीरूपाणां चतुर्णां पदानां चारणिकां कुर्वाणैरेवमव षोडश भङ्गा रचयितव्याः, प्रायश्चित्तं चादेशद्वयेनापि तपः-कालविशेषितं तथैव वक्तव्यम्। एषा द्वितीया षोडशभङ्गी। एवं संयतानां चतुर्विधानां पूर्वस्थितानां संयतैश्चतुर्विधैरेवा-गच्छद्भिरेवमेव तुरीया षोडशभङ्गी। सर्वसङ्ख्यया जाता भङ्गानां चतुःषष्टिः। एते च केवलसंयत-संयतीपक्षचारणिकया लब्धाः। अथोभयपक्षमधिकृत्याह-"उभयम्मि वि नायव्व" त्ति उभयशब्देनो-भयगणाधिपति परिगृह्यते, तत्राप्येवमेव भङ्गरचना ज्ञातव्या। तथाहि-चतुर्विधोभयगणाधिपतिभिः परिगृहीते क्षेत्रे चतुर्विधैरेवागन्तुकसंयैरागच्छ्रिभ पूर्वोक्तनीत्यैव षोडश भङ्गाः।

तथा तैरेव परिगृहीते प्रवर्त्तिन्यादिभेदात् चतुर्विधाः संयत्यो यद्यागच्छेयुस्तदाऽपि षोडश भङ्गाः, चतुर्विधेषु तदुभयगणाधिपतिषु पूर्वस्थितेषु चतुर्विधानामेवोभयगणाधिपतीनामा-गमनेऽप्येवमपिषोडश भङ्गाः, एवं चतुर्विधसंयतीषु चतुर्विधानामेवोभयगणाधिपतीनामागमने षोडश भङ्गाः। एवमेताः पञ्च षोडशभङ्ग्यः सञ्जाताः, पञ्चभिश्च षोडशभङ्गीभिर्लब्धा भङ्गानामशीतिः। एषा चोभयगणविषया भङ्गकानामशीति पूर्वोक्तयैकैकपक्षविषयया भङ्गकचतुःषष्ट्या सह मील्यते जातं चतुश्चत्वारिंशं शतं भङ्गानाम्। प्रायश्चित्तं च सर्वत्र प्राग्वद् द्रष्टव्यम्। "पेल्लमदिंते य जं पावे" त्ति एतत् पदं सर्वभङ्गानुपाति प्रतिपत्तव्यम्। अपूर्वमाणे क्षेत्रे आगन्तुका यदि बलात् प्रेर्य तिष्ठन्ति ततो वास्तव्या निर्गच्छन्तो अवमौदर्यसमुत्थामात्म-संयमविराधनां यत् प्राप्नुवन्ति तन्निप्पन्नं प्रायश्चित्तमागन्तुकानाम्। अथ वास्तव्याः पूर्यमाणे क्षेत्रे आगन्तुकानां स्थातुं न ददति ततो यद् आगन्तुका बहिपर्यटन्तो भक्तादिकलमभाना विराधनां प्राप्नुवन्ति तन्निष्पन्नं वास्तव्यानामापद्यते।। आह यद्येवंकुर्वातामेतावत् प्रायश्चित्तकदम्बकमुपाढौकते तर्हि साम्प्रतं स्वपक्षस्य दूरं दूरेणैव स्थातुं युक्तम्, अत्रोच्यते-

[भा.१०७२]चउवग्गो वि हु अच्छउ, असंथराऽऽगंतुगा य वच्चंतु।
वत्थव्वा व असंथरे, मोत्तु गिलाणस्स संघाडं ।।

वृ- 'चतुर्वर्ग' नाम वास्तव्याः संयताः सयत्यश्च आगन्तुकाः संयताः संयत्यश्च। एते चत्वारोऽपि वर्गा एकस्मिन् क्षेत्रे यदि संस्तरति तर्हि तिष्ठन्तु न कोऽपि परस्परं मत्सरः कर्त्तव्यः। यदि संस्तरणं न भवति तत आगन्तुका व्रजन्तु। अथागन्तुकभद्रकं तत् क्षेत्रमागन्तुका वा अदेशिका अखेदज्ञा वा ततो वास्तव्या आत्मनस्तेषां वा असंस्तरणे निर्गच्छन्ति। एवमागन्तुका वास्तव्या वा ये निर्गच्छन्ति तेषां यदि कश्चिद् ग्लानो भवेत् ततो ग्लानः ससङ्घाटकस्तिष्ठति, तं मुक्त्वा शेषाः सर्वेऽपि गच्छन्ति ।।

[भा.१०७३] एमेव संजईणं, वुड्ढी-तरुणीण जुंगितकमाई।
पायादिविगल तरुणी, य अच्छए वुड्ढिओ पेसे ।।

वृ- 'एवमेव' संयतवत् संयतीनां निर्गमनविधिरभिधातव्यः, परमत्र द्विकभेदः कर्त्तव्यः।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

कथम् ? इत्याह-वृद्धानां तरुणीनां च मध्ये यदि निष्प्रत्यपायं ततस्तरुण्यो गच्छन्ति वृद्धा आसते। तथा जुङ्गितानामजुङ्गितानां च जुङ्गितास्तिष्ठन्ति अजुङ्गिता द्विविधाः-जातिजुङ्गिताः शरीरजुङ्गिताश्च। तत्र जातिजुङ्गिता गच्छन्ति शरीरजुङ्गिताः पादादिविकलास्तत्रैवाऽऽसते। तरुण्योऽपि यदि सप्रत्यपायं मार्गादौ ततस्तत्रैवाऽऽसते वृद्धास्तु प्रेषयेत् ॥

[भा.१०७४] एवं तेसि ठियाणं, पत्तेगं वा वि अहव मिस्साणं।
ओमम्मि असंथरणे, इमा उ जयणा जहिं पगयं ॥

वृ- 'एवम्' अनन्तरोक्तप्रकारेण 'तेषाम्' आचार्यादीनां तत्र क्षेत्रे 'प्रत्येकं वा' एकतरवर्गरूपेण 'मिश्राणां वा' द्विवर्ग-त्रिवर्ग-चतुर्वर्गरूपतया स्थितानां अवमकाले असंस्तरणे इयं यतना यस्यामिदं प्रलम्बसूत्रं प्रकृतम् ॥ तामेवाह-

[भा.१०७५] ओयण-मीसे-निम्मीसुवक्खडे पक्क-आम-पत्तेगे।
साधारण सग्गामे, परगामे भावओ वि भए ॥

वृ- ओदनं १ मिश्रोपस्कृतं २ निर्मिश्रोपस्कृतं ३ पक्वं ४ आमं ५ प्रत्येकं ६ साधारणं ७, एतानि सप्तापि यथाक्रमं प्रथमं स्वग्रामे ततः परग्रामे ग्रहीतव्यानि। भावतोऽपि यान्यभिन्नानि तान्यपि यतनापरिपाटिप्राप्तानि 'भजेत्' सेवेत गृह्णीयादित्यर्थः इति द्वारगाथासमासार्थः ॥

अथ प्रतिद्वारं विस्तरार्थमभिधित्सुरोदनद्वारमाह-

[भा.१०७६] बत्तीसाई जा एक्क घास खवणं व न वि य से हानी।
आवासएसु अच्छउ, जा छम्मासे न य पलंबे ॥

वृ- ओदनस्य द्वात्रिंशत् कवलाः पुरुषस्य प्रमाणप्राप्त आहारः। यदि ते एकेन कवलेन न्यूनाः प्राप्यन्ते ततस्तैरेव तिष्ठतु, यदि 'से' तस्य साधोः 'आवश्यकेषु' अवश्यकृत्ययोगेषु हानि 'नापि' नैव भवति न प्रलम्बानि गृह्णातु। एवं द्वाभ्यां कवलाभ्यां न्यूना द्वात्रिंशत् कवला लभ्यन्ते तैस्तिष्ठतु यदि तस्यावश्यकयोगा न परिहीयन्ते। एवमेकैकं कवलं परिहापयता तावद् वक्तव्यं यावद् यद्येकः 'ग्रासः' कवलः प्राप्यतेततस्तेनैवास्ताम्, यदि तस्यावश्यकयोगा न परिहीयन्ते मा च प्रलम्बानि गृह्णातु। अथैकोऽपि कवलो न प्राप्यते तत एकं दिवसं 'क्षपणम्' उपवासं कृत्वा आस्ताम्, द्वितीये दिवसे द्वात्रिंशत्कवलैः पारयतु। यदि तावन्तो न लभ्यन्ते तत एकैककवलपरिहाण्या तावद् वक्तव्यं यावद् यद्येकोऽपि कवलो न लब्धस्ततः षष्ठं कृत्वा समाधिसौदमध्यास्ताम्, षष्ठस्य च पारणके प्रमाणप्राप्तमाहारमुपाददताम्। अथ न लभ्यते ततः पूर्वोक्तयुक्त्या यावदेकोऽपि कवलो न लभ्यते ततोऽष्टमं कृत्वा तिष्ठतु मा च प्रलम्बान्याददीत। एवमनयैव दिशा दशमादिकमुत्तरोत्तरक्षपणं वर्द्धयता तावद् नेतव्यं यावत् षण्मासक्षपणम्। अथ षण्मासक्षपणे धर्मावश्यकयोगाः परिहीयन्ते तत एकदिनन्यूनं षण्मासक्षपणं करोतु। तदपि न शक्नोति निर्वोढुं तत एकैकं क्षपणं परिहापयता तावद् वक्तव्यं यावदेकमपि क्षपणं कर्त्तुं न शक्नोति ॥

ततः किं करोति ? इत्याह-

[भा.१०७७] जावइयं वा लब्भइ, सग्गामे सुद्ध सेस परगामे।
मीसं च उवक्खडियं, सुद्धज्झवपूरगं गेण्हे ॥

वृ- वाशब्दः पातनायाम्, सा च कृतैवेति। यावत् शुद्धोदनं स्वग्रामे लभ्यते यदि तावता न

Jain Education International For Private & Personal Use Only www.jainelibrary.org

संस्तरति ततो यावता न्यूनं तावत् परग्रामात् 'शेषं' शुद्धोदनमानयति । गतमोदनद्वारम् । अथ मिश्रोपस्कृतद्वारमाह-"मीसं च" इत्यादि । यदा स्वग्राम-परग्रामयोः पर्याप्तं शुद्धोदनं न प्राप्यते तदा यद् ओदनं प्रलम्बैर्मिश्रमुपस्कृतं तत् शुद्धोदनस्याध्यवपूरकं गृह्णाति ॥ इदमेव विशेषयन्नाह-

[भा.१०७८] तत्थ वि पढमं जं मीसुवक्खडं दव्व-भावतो भिन्नं ।
दव्वाभिन्नविमिस्सं, तस्सऽसति उवक्खडं ताहे ॥

वृ- 'तत्रापि' मिश्रोपस्कृते गृह्यमाणे प्रथमं यद् द्रव्यो भावतश्च भिन्नैः प्रलम्बैर्मिश्रमुपस्कृतं तत् स्वग्राम-परग्रामयोर्गृह्णाति । तस्यापि 'असति' अलाभे यद् ओदनं द्रव्यतोऽभिन्नैर्भावतो भिन्नैः प्रलम्बैर्विमिश्रमुपस्कृतं तत् तदा शुद्धोदनस्याध्यवपूरकं प्रथमं स्वग्रामे ततः परग्रामे गृह्णाति॥ गतं मिश्रोपस्कृतम् । अथ निर्मिश्रोपस्कृतमाह-

[भा.१०७९] पनगाइ मासपत्तो, ताहे निम्मीसुवक्खडं भिन्नं ।
निम्मीस उवक्खडियं, गिण्हति ताहे ततियभंगे ॥

वृ- येषु सूक्ष्मप्राभृतिकादिदोषेषु पञ्चकप्रायश्चित्तं तेषु आदिशब्दाद् दशरात्रिन्दिवादिस्थानेषु च यतित्वा यदा भिन्नमासमतिक्रान्तो लघुमासं च प्राप्तो भवति तदा यद् द्रव्यतो भावतश्च भिन्नं निर्मिश्रं प्रलम्बजातमुपस्कृतं तत् शुद्धोदनस्य मिश्रोपस्कृतस्य चाध्यवपूरकं स्वग्रामपरग्रामयोर्गृह्णाति। यदा चरमभङ्गे न लभ्यते तदा निर्मिश्रोपस्कृतमेव तृतीयभङ्गे द्रव्यतोऽभिन्नं गृह्णाति ॥ गतं निर्मिश्रोपस्कृतम् । अथ पक्वमामं च व्याख्यानयति-

[भा.१०८०] एमेव पउलियाऽपउलिए य चरिम-तइया भवे भंगा ।
ओसहि-फलमाईसुं, जं चाऽऽईन्नं तगं नेयं ॥

वृ- एवमेव पक्वा-ऽपक्वयोश्चरम-तृतीयौ भङ्गौ भवतः । पक्वं नाम यद् अग्निना संस्कृतम्, यथा इङ्गुदीबीज-बिल्वादि । अपक्वं यद् अग्निनाऽन्येन वा इन्धन-धूमादिना प्रकारेण न पक्वं परं निर्जीवावस्थम्, यथा परिपक्वकदलीफल-त्रपुषादि । तत्र निर्मिश्रोपस्कृतस्यालाभे प्रथमं पक्वं चतुर्थभङ्गे ततस्तृतीयभङ्गे, ततोऽपक्वमपि चतुर्थ-तृतीयभङ्गयोः । एवमेव अध्यवपूरकं गृह्णाति। अत्र चौषधिफलादिषु यच्च पूर्वसाधुभिरवमादिकारणं विनाऽप्याचीर्णं तद् 'नेयं' नयनीयं ग्रहीतव्यमित्यर्थः, यद्वा तद् 'ज्ञेयं' ज्ञातव्यम् । तत्रौपधयो धान्यानि, तेष्वाचीर्णं यथा चणका माषा वा, फलेषु आचीर्णं यथा त्रिफलादि, आदिशब्दाद् मूल-कन्दादिष्वपि यथायोगमाचीर्णाऽनाचीर्णव्यवस्थाऽनुसर्त्तव्या ॥ अत्रौषधिषु यद् आचीर्णं तद् व्याचष्टे-

[भा.१०८१] सगला-ऽसगलाइन्ने, मीसोवक्खडिय नत्थि हानी उ ।
जइउं अमिस्सगहणं, चरिमदुए जं अणाइन्नं ॥

वृ- चणक-माषादिषु पूर्वाचार्यैराचीर्णेषु सकलेष्वसकलेषु वा मिश्रेषु निर्मिश्रेषु वा उपस्कृतेषु नास्तिपञ्चकपरिहाणि । यच्च पूर्वाचार्यैरनाचीर्णं तत्र पञ्चकपरिहाण्या यतित्वा लघुमासं प्राप्तः 'चरमद्वये' चतुर्थ-तृतीयभङ्गयोरमिश्रस्य निर्मिश्रोपस्कृतस्य ग्रहणं कार्यं नार्वागिति ॥

आह यद् निर्जीवं तत् कथमनाचीर्णम् ? उच्यते-

[भा.१०८२] जइ ताव पिहुगमाई, सत्थोवहया वि होंतऽनाइन्ना ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

किं पुन अस्थुवहया, पेसी पव्वायसरडू य ।।

वृ-इह ये व्रीहयः परिपक्वाः सन्तो भ्राष्ट्रादौ भृज्यन्ते, ततः स्फटिता अपनीतत्वचः पृथुका इत्युच्यन्ते, आदिग्रहणेनान्यदपि यदेवं निष्पद्यते तत्परिग्रहः । यदि तावत् पृथुकादयोऽग्निशस्त्रोपहता अप्यनाचीर्णा भवनति किं पुनरशस्त्रोपहताः 'पेश्यः' प्रलम्बानामूर्द्धायताः फालयः ? तथा प्रम्लाना-नि-म्लानवृन्तानि यानि 'सरडूनि' अबद्धास्थिकफलानि ?, तान्यशस्त्रोपहतानि कथमाचीर्णानि भविष्यन्तीत्यर्थः । एतत् सर्वमपि परीत्तविषयमुक्तम् ।। गतं परीत्तद्वारम् । अथ साधारणद्वारमाह-

[भा.१०८३] साधारणे वि एवं, मीसा-ऽमीसे वि होंति भंगाओ ।
पनगादी गुरुपत्तो, सव्वविसोहीय जय ताहे ।।

वृ- साधारणम्-अनन्तं तत्रापि 'एवं' प्रत्येकवद् मिश्रोपस्कृते निर्मिश्रोपस्कृते च चतुर्थ-तृतीयौ भङ्गौ भवतः । नवरं यदा तृतीयभङ्गे प्रत्येकप्रलम्बं निर्मिश्रोपस्कृतं न लभ्यते तदा मासलघुकादुपरि यत्रोद्गमादौ लघुपञ्चरात्रिन्दिवान्यभ्यधिकान्यापद्यन्ते तत् स्वग्रामे वा परग्रामे वा गृह्णाति । एवं यदा पञ्चकादिहान्या गुरुमासं प्राप्तो भवति तदा साधारणं निर्मिश्रोपस्कृतं प्रथमं चतुर्थभङ्गे तदलाभे तृतीयभङ्गे स्वग्राम-परग्रामयोर्गृह्णाति । यदा तृतीयभङ्गेनापि न प्राप्यते तदा सर्वेषु विशोधिकोटिदोषेषु 'यतस्व' प्रयत्नं कुरु । तत्राऽऽधाकर्म-कर्मौद्देशिकत्रिक-आहारपूतिकर्म-मिश्रजातान्त्यद्विक-बादरप्राभृतिका-अध्यवपूरकचरमद्विकरूपान् अविशोधिकोटिदोषान् मुक्त्वा शेषाः सर्वेऽप्यौघोद्देशिकादय उद्गमदोषा विशोधिकोटयः । तेष्वपि गुरु-लाघवालोचनतो यद् यद् अल्पदोषतरं तत् तत् पूर्वं पूर्वं प्रतिसेवमानस्तावद् यतते यावत् चतुर्लघुस्थानानि ।। तेष्वपि यदा न लभ्यते तदा चतुर्लघुकादुपरि पञ्चकपरिहाण्या यतित्वा यदा चतुर्गुरुप्राप्तो भवति तदा किमाधाकर्म गृह्णातु ? उत प्रथमद्वितीयभङ्गौ ? इति, अत्रोच्यते-

[भा.१०८४] कम्मे आदेसदुगं, मूलुत्तरे ताहे बि कलि पत्तेगे ।
दावर कली अनंते, ताहे जयणाए जुत्तस्स ।।

वृ- अत्राधाकर्मणि प्राप्ते आदेशद्विकं वक्तव्यम् । तद्यथा-आधाकर्मणि चत्वारो गुरवः, प्रत्येकप्रथमद्वितीययोर्भङ्गयोश्चत्वारो लघवः । एवं चप्रायश्चित्तानुलोम्येनाधाकर्म गुरुकम्, व्रतानु-लोम्येन तु प्रथमद्वितीयभङ्गौ गुरुकौ, तयोः प्रतिसेव्यमानयोः प्राणातिपातव्रतस्य लोपसद्भावादिति। अथवा आधाकर्म उत्तरगुणोपघातित्वाद् लघुतरम्, प्रथम-द्वितीयभङ्गौ मूलगुणोपघातित्वाद गुरुतरौ। एवमादेशद्वये कृतेऽप्याधाकर्मैव प्रथमतो ग्रहीतव्यं न प्रथम-द्वितीयभङ्गौ । कुतः ? इति चेद् उच्यते-धाकर्मणि जीवाः परेण व्यपरोपिता इति तत्र गृह्यमाणे न तादृशी निशूकतोपजायते यादृशी प्रथम-द्वितीययोर्भङ्गयोरध्यक्षवीक्ष्यमाणानां जीवानामात्मनैव मुखे प्रक्षिप्य भक्ष्यमाणानां व्यपरोपणे भवति, अत आधाकर्मैव प्रथमतो ग्राह्यं न प्रथम-द्वितीयभङ्गाविति स्थितम् । "ताहे बि कलि पत्तेगि" त्ति यदा आधाकर्मापि न लभ्यते तदा प्रत्येकद्वितीयभङ्गे ग्रहीतव्यम्, तदभावे 'कलि' प्रथमो भङ्गः तत्रापि ग्राह्यम् । "दाव कली अनंते" त्ति यदा प्रत्येकस्यापि प्रथमो भङ्गो न प्राप्यते तदा 'द्वापरः' इति समयपरिभाषया द्वितीयः, 'कलि' इति तु प्रथम उच्यते । ततश्च प्रथममन्तकायिके द्वितीयेन भङ्गेन, तदभावे प्रथमेनापि ग्रहीतव्यम् । यदा अनन्तस्यापि प्रथमो भङ्गो न प्राप्यते तदा यतनया युक्तस्य यत्र यत्राल्पतरः कर्मबन्धो भवति तत् तद् गृह्णानस्याशठपरिणामस्य संयम एव

Jain Education International For Private & Personal Use Only www.jainelibrary.org

भवतीति वाक्यशेषः ।। एवं तावत् संयतानधिकृत्य यतनोक्ता । अथ संयतीरुद्दिश्याह-

[भा.१०८५]एमेव संजईण वि, विहि अविही नवरि तत्थ नाणत्तं ।
सव्वत्थ वि सग्गामे, परगामे भावओ वि भए ।।

वृ-यथा संयतानां स्वग्राम-परग्रामादिवभाषापुरस्सरं भिन्ना-ऽभिन्नयोर्यतना भणिता एवमेव संयतीनामपि वक्तव्या । नवरं तासां 'नानात्वं' विशेषो विधिभिन्नानि अविधिभिन्नानि च भवन्ति। विधिभिन्नानि मुख्यपदे सर्वत्रापि गृह्यन्ते स्वग्राम-परग्रामयोश्च । प्रथमं षष्ठो भङ्गः, तदभावे पञ्चमः, तस्याप्यलाभे चतुर्थ, तस्याप्यप्राप्तौ भावतोऽप्यभिन्नानि तृतीय-द्वितीय-प्रथमभङ्गवर्तीनि यथाक्रमं 'भजेत्' प्रतिसेवेत, न कश्चिद्दोषः ।।

दुर्गस्थानबहुत्वभीरुकतया मन्दाऽपि दातुं पदा-
न्येतच्चूर्णि-निशीथचूर्णिसुवचः श्रेणीसुयष्ट्या भृशम् ।
प्रेर्य प्रेर्य पदे पदे निजगवी क्षिप्रप्रचारं मया
कल्पे यत् प्रकृतं प्रलम्बविषयं तद्गोचरे चारिता ।।

मू. (६) *से गामंसि वा नगरंसि वा खेडंसि वा कब्बडंसि वा मडंबंसि वा पट्टणंसि वा आगरंसि वा दोणमुहंसि वा निगमंसि वा रायहाणिंसि वा आसमंसि वा सन्निवेसंसि वा संबाहंसि वा घोसंसि वा अंसियंसि वा पुडभेयणंसि वा सपरिक्खेवंसि अबाहिरियंसि कप्पइ निग्गंथाणं हेमंत-गिम्हासु एगं मासं वत्थए ।।*

वृ- एवमग्रेतनमपि सूत्रत्रयमुच्चारमीयम् । अथास्य सूत्रचतुष्टयस्य कः सम्बन्ध इत्याह-

[भा.१०८६] वुत्तो खलु आहारो, इयाणि वसहीविहिं तु वन्नेइ ।
सो वा कत्थुवभुज्जइ, आहारो एस संबंधो ।।

वृ-उक्तः खल्वनन्तरसूत्रे आहारः । 'इदानीं तु' अस्मिन् सूत्रेवसतेर्विधिं भगवान् भद्रबाहु-स्वामी वर्णयति । यद्वा स आहरो गृहीतः सन् क ग्रामादौ उपभुज्यते ? इति निरूपणार्थमिदमारभ्यते एष द्वितीयप्रकारेण सम्बन्धः ।। भूयोऽपि सम्बन्धमाह-

[भा.१०८७] तेसु सपरिग्गेसुं, खेत्तेसुं साहुविरहिएसुं वा ।
किच्चिरकालं कप्पइ, वसिउं अहवा विकप्पो उ ।।

वृ-तेषु क्षेत्रेषु 'सपरिग्रहेषु' साधुपरिगृहीतेषु साधुविरहितेषु वा कियन्तं कालं निर्ग्रन्थानां वा निर्ग्रन्थीनां वा वस्तु कल्पते ? इत्यस्मिन् सूत्रे चिन्त्यते, अयं सम्बन्धस्यापरो विकल्प इति ।। अमीभिः सम्बन्धैरायातस्यास्य व्याख्या-अत्र च संहितादिक्रमेण प्रतिसूत्रं व्याख्याने महद् ग्रन्थगौरवमिति कृत्वा पदार्थादिमात्रमेवाभिधास्यते, संहितदिचर्चस्तु पूर्ववद् वक्तव्य इति । सेशब्दो मागधदेशे प्रसिद्धः अथशब्दार्थे, अथशब्दश्च प्रक्रियादिष्वर्थेषु वर्त्तते । यत उक्तम्- "अथ प्रक्रिया-प्रश्ना-ऽऽनन्तर्य-मङ्गलोपन्यास-प्रतिवचन-समुच्चयेषु" इति । इहोपन्यासार्थे द्रष्टव्यः, ततश्च यथा साधूनामेकत्र क्षेत्रे वस्तुं कल्पते तथा उपन्यस्यते इत्यर्थः । ग्रामे वा नगरेवा खेटे वा कर्बटे वा मडम्बे वा पत्तने वा आकरे वा द्रोणमुखे वा निगमे वा राजधान्यां वा आश्रमे वा निवेशे वा सम्बाधे वा घोषे वा अंशिकायां वा पुटभेदने वा 'सपरिक्षेपे' वृत्यादिरूपपरिक्षेपयुक्ते 'अबाहिरिके' बहिर्भवा बाहिरिका "अध्यात्मादिभ्य इकण्" इति इकणप्रत्ययः, प्राकारबहिर्वर्त्तिनी

Jain Education International For Private & Personal Use Only www.jainelibrary.org

गृहपद्धतिरित्यर्थः, न विद्यते बाहिरिका यत्र तद् अबाहिरिकं तस्मिन् कल्पते निर्ग्रन्थानां 'हेमन्त-ग्रीष्मेषु' ऋतुबद्धकालसम्बन्धिषु अष्टसु मासेष्वित्यर्थः, एकं मासं 'वस्तुम्' अवस्थातुम्। वाशब्दाः सर्वेऽपि विकल्पार्था स्वगतानेकभेदसूचका वा द्रष्टव्या इति सूत्रसमासार्थ ॥ अथ विस्तरार्थं प्रतिपदं भाष्यकृदाह-

[भा.१०८८] आदिपदं निद्देसे, वा उ विभासा समुच्चये वा वि।
गम्मो गमणिज्जो वा, कराण गसए व बुद्धादी ॥

वृ- "से" इत्येतद् आदिपदं 'निर्देशे' उपन्यासे वर्त्तते। वाशब्दो। विभाषायां स्वगतानामनेकभेदानां समुच्चयार्थे वा। गम्यो गमनीयो वा अष्टादशानां कराणामिति व्युत्पत्त्या ग्रसेत वा बुध्यादीन् गुणानिति व्युत्पत्या वा पृषोदरादित्वाद् निरुक्तविधिना ग्राम उच्यते ॥

[भा.१०८९] नत्थेत्थ करो नगरं, केडं पुन होइ धूलिपागारं।
कब्बडगं तु कुनगरं, मडंबगं सव्वतो छिन्नं ॥

वृ- 'नास्ति' न विद्यतेऽत्राष्टादशकराणामेकोऽपि कर इति नकरम्, नखादित्वाद् नञोऽकाराभावः। खेटं पुनर्धूलीप्राकारपरिक्षिप्तम्। कर्बटं तु कुनगरमुच्यते। मडम्बं नाम यत् 'सर्वतः' सर्वासु दिक्षु 'छिन्नम्' अर्द्धतृतीयगव्यूतमर्यादायामविद्यमानग्रामादिकमिति भावः। अन्ये तु व्याचक्षते-यस्यपार्श्वतोऽर्द्धतृतीययोजनान्तर्ग्रामादिकं न प्राप्यते तद् मडम्बम् ॥ १

[भा.१०९०] जलपट्टणं च थलपट्टणं च इति पट्टणं भवे दुविहं।
अयमाइ आगरा खलु, दोणमुहं जल-थलपहेणं ॥

वृ-पत्तनं द्विधा-जलापत्तनं च स्थलपत्तनं च। यत्र जलपथेन नावादिवाहनारूढं भाण्डमुपैति तद् जलपत्तनं, यथा द्वीपम्। यत्र तु स्थलपथेन शकटादौ स्थापितं भाण्डमायाति तत् स्थलपत्तनम्, यथा आनन्दपुरम्। अयः-लोहं तदादय आकरा उच्यन्ते। यत्र पाषाणधातुधमनादिना लोहमुत्पाद्यते स अयआकरः, आदिशब्दात् ताम्र-रूप्याद्याकरपरिग्रहः। यस्य तु जलपथेन स्थलपथेन च द्वाभ्यामपि प्रकाराभ्यां भाण्डमागच्छति तद् द्वयोः पथोर्मुखमिति निरुक्त्या द्रोणमुखमुच्यते, तच्च भृगुकच्छं ताम्रलिप्ती वा ॥

[भा.१०९१] निगमं नेगमवग्गो, वसइ जहिं रायहानि जहि राया।
तावसमाई आसम, निवेसो सत्थाइजत्ता वा ॥

वृ- निगमं नाम यत्र नैगमाः-वाणिजकविशेषास्तेषां वर्ग-समूहो वसति, अत एव निगमे भवा नैगमा इति व्यपदिश्यन्ते। यत्र नागरादौ राजा परिवसति सा राजधानी। आश्रमो यः प्रथमतस्तापसादिभिरावासितः, पश्चादपरोऽपि लोकस्तत्र गत्वा वसति। निवेशो नाम यत्र सार्थ आवासितः, आदिग्रहणेन ग्रामो वा अन्यत्र प्रस्थितः सन् यत्रान्तरवासमधिवसति; यात्रायां वा गतो लोको यत्र तिष्ठति एष सर्वोऽपि निवेश उच्यते ॥

[भा.१०९२] संवाहो संवोढुं, वसति जहिं पव्वयाइविसमेसु।
घोसो उ गोउलं अंसिया उ गामद्धमाईया ॥

वृ- सम्बाधो नाम यत्र कृषीवललोकोऽन्यत्र कर्षणं कृत्वा वणिग्वर्गो वा वाणिज्यं कृत्वाऽन्यत्र पर्वतादिषु विषमेषु स्थानेषु 'संवोढुम्' इति कणादिकं समुह्य कोष्ठागारादौ च प्रक्षिप्य वसति।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

तथा 'घोषस्तु' गोकुलमभिधीयते । 'अंशिका तु' यत्र ग्रामस्यार्धम् आदिशब्दात् त्रिभागो वा चतुर्भागो वा गत्वा स्थितः सा ग्रामस्यांश एवांशिका ॥

[भा.१०९३] नाणादिसागयाणं, भिज्ञंति पुडा उ जत्थ भंडाणं ।
पुडभेयणं तगं संकरो य केसिंचि कायव्वो ॥

वृ-नानाप्रकाराभ्यो दिग्भ्य आगतानां 'भाण्डानां' कुङ्कुमादीनां पुटा यत्र विक्रयार्थं भिद्यन्ते तत् पुटभेदनमुच्यते । केषाञ्चिदाचार्याणां मतेन सङ्करश्च कर्त्तव्यः, "संकरंसिवा" इत्यधिकं पदं पठितव्यमित्यर्थः । सङ्करो नाम-किञ्चिद् ग्रामोऽपि खेटमपि आश्रमोऽपीत्यादि ॥

एष सूत्रार्थ । अथ निर्युक्ति विस्तरः । तत्र ग्रामपदनिक्षेपमाह-

[भा.१०९४] नामं ठवणागामो, दव्वग्गामो य भूतगामो य ।
आउज्झिंदियगा, पिउ-माऊ-भावगामो य ॥

वृ- नामग्रामः स्थापनाग्रामो द्रव्यग्रामश्च भूतग्रामश्च आतोद्यग्राम इन्द्रियग्रामः पितृग्रामो मातृग्रामो भावग्रामश्चेति गाथासमुदयार्थः ॥ अथावयवार्थमभिधित्सुर्नाम-स्थापने क्षुण्णत्वादनादृत्य द्रव्यग्रामं व्याचष्टे-

[भा.१०९५]जीवा-ऽजीवसमुदओ, गामो को कं नओ कहं इच्छे ।
आदिनयोऽमेगविहो,तिविकप्पो अंतिमनओ उ ॥

वृ-जीवानां-गो-महिषी-मनुष्यादीनाम अजीवानां च-गृहादीनां यः समुदयः स द्रव्यग्राम उच्यते । इह च स्वङ्गोपङ्गप्रवचने प्रायः सर्वमपि सूत्रमर्थश्च नयैर्विचार्यते । यत उक्तम्-

नत्थि नएहि विहूणं, सुत्तं अत्थो य जिनमए किंचि ।
आसज्ज उ सोयारं, नए नयविसारओ बूया ॥

अत एषोऽपि द्रव्यग्रामो नयैर्विचार्यते-को नाम नयः कं द्रव्यग्रामं कथमिच्छति ? इति, तत्र नयाः सामान्यतः सप्त नैगम-सङ्गह-व्यवहार-ऋजुसूत्र-शब्द-समभिरूढैवम्भूतभेदात्; इह तु समभिरूढैवम्भूतयोः शब्दप्राधान्यम्युपगमपरतया शब्दनय एवान्तर्भावो विवक्ष्यते । ततश्च 'आदिनयः' नैगमः सोऽविशुद्ध विशुद्ध-विशुद्धरादिभेदाद् अनेकविधः । 'अनन्तिमनयस्तु' शब्दः सः 'त्रिवक्लपः' त्रिविधः शब्द-समभिरूढैवम्भूतभेदात् ॥

तत्रानेकविधनैगमानामन्योऽन्यनिरपेक्षाणि यानि वक्तव्यानि तानि नामग्राहं सङ्ग ह्लन्नाह-

[भा.१०९६] गावो तणाति सीमा, आरामुदपाण चेडरूवाणि ।
वाडी य वाणमंतर, उग्गह तत्तो य आहिपती ॥

वृ-गावः १ "तणाइ"त्ति उपलक्षणत्वात् तृणहारकादयः २ सीमा ३ आरामः ४ 'उदपानं' कूपः ५ चेडरूपाणि ६ 'वाटि' वृति ७ 'वानमन्तरं' देवकुलं ८ अवग्रहः ९ ततश्चाधिपति १० इति निर्युक्तिगाथाक्षरार्थः ॥ अथ भावार्थ उच्यते, प्रथमनैगमः प्राह-यावन्तं भूभागं गावश्चरितुं व्रजन्ति तावान् सर्वोऽपि ग्राम इति व्यपदेशं लभते १ ॥ ततो विशुद्धनैगमः प्रतिभणति-

[भा.१०९७] गावो वयंति दूरं, पि जं तु तण-कट्ठहारगादीया ।
सूरुट्ठिए गता एंति अत्थमंते ततो गामो ॥

परिस्थूरमते ! गावः 'दूरमपि' परग्राममपि चरितुं व्रजन्ति ततः किमेवं सोऽप्येक एव

Jain Education International For Private & Personal Use Only www.jainelibrary.org

ग्रामो भवतु ?, अपि च एवंब्रुवतो भवतो भूयसामि परस्परमतिदवीयसां ग्रामाणामेकग्रामतैव प्रसजति, न चैतदुपपन्नम्, तस्माद् नैतावान् ग्रामः किन्तु 'यत्तु' यावन्मात्रं क्षेत्रं तृणहारक-काष्ठहारकादयः सूर्ये उत्थिते तृणाद्यर्थं गताः सन्तः सूर्ये अस्तमयति तृणादिभारकं बद्ध्वा पुनरायान्ति एतावत् क्षेत्रं ग्रामः २ ॥

[भा.१०९८]परसीमं पि वयंति हु, सुद्धतरो भणति जा ससीमा तु ।
उज्जाण अवत्ता वा, उक्कीलंता उ सुद्धयरो ॥

वृ- शुद्धतरो नैगमो भणति-यद्यपि गवां गोचरक्षेत्रादासन्नतरं भूभागं तृण-काष्ठहारका व्रजन्ति तथापि ते कदाचित् परसीमानमपि व्रजन्ति तस्माद् नैतावान् ग्राम उपपद्यते, अहं ब्रवीमि-यावत् स्वा-आत्मीया सीमा एतावान् ग्रामः ३ । ततोऽपि विशुद्धतरः प्राह-मैवमतिप्रचुरं क्षेत्रं ग्राम इति वोचः, किन्तु यावत् तस्यैव ग्रामस्य 'उद्यानम्' आरामस्तावद् ग्राम इति भण्यते ४ । विशुद्धतमः प्रतिभणति-एतदपि भूयस्तरं क्षेत्रम्, न ग्रामसंज्ञां लब्धुमर्हति, अहं भणामि- यावद् 'उदपानं' तस्यैव ग्रामस्य सम्बन्धी कूपः तावद् ग्राम इति ५ । ततोऽपि विशुद्धतरो ब्रूते- इदमप्यतिप्रभूतं क्षेत्रम् अतो यावत् क्षेत्रं 'अव्यक्तानि' चेटरूपाणि रममाणानि गच्छन्ति तावद् ग्रामः ६ । ततोऽपि विशुद्धतरः प्रतिवक्ति-एतदप्यतिरिक्ततया न समीचीनमाभाति ततो यावन्तं भूभागमतिलघीयांसो बालकाः 'उत्क्रीडन्तः' रिङ्गन्तः प्रयान्ति तावान् ग्राम इति ७ ॥

[भा.१०९९] एवं विसुद्धनिगमस्स वइपरिक्खेवपरिवुडो गामो ।
ववहारस्स वि एवं, संगहो जहि गामसमवाओ ॥

वृ- 'एवं' विचित्राभिप्रायाणां पूर्वनैगमाना सर्वा अपि प्रतिपत्तीर्व्यपोह्य सर्वविशुद्धनैगमस्य यावान् वृतिपरिक्षेपपरिवृतो भूभागस्तावान् ग्राम उच्यते । अथ सङ्ग्रहं व्यतिक्रम्य लाघवार्थमत्रैव व्यवहारमतमतिदिशति-"ववहारस्सवि एवं" ति यथा नैगमस्यानेकेप्रतिपत्तिप्रकाराः प्ररूपितास्तथा व्यवहारस्याप्येवमेव प्ररूपणीयाः, तस्य व्यवहाराभ्युपगमपरायणत्वात् । सङ्ग्रहस्तु सामान्यग्राहित्वाद् यत्र ग्रामस्य-ग्रावास्तव्यलोकस्य समवायः-एकत्र मीलनं भवति तद् वानमन्तदेवकुलादिकं ग्राम इति ब्रूते ॥ इदमेव प्रकारान्तरेणाह-

[भा.११००] जं वा पढमं काउं, सेसग गामो निविस्सइ स गामो ।
तं देउलं सभा वा, मज्झिम गोट्ठो पवा वा वि ॥

वृ- यद् वा प्रथमं 'कृत्वा' निवेश्य शेषः सर्वोऽपि ग्रामो निविशते स सङ्ग्रहनयाभिप्रायेण ग्रामः । तच्च देवकुलं वा भवेत् सभा वा ग्राममध्यवर्ती वा गोष्ठः प्रपा वा ॥

अथावग्रहपदं विवृण्वन् ऋजुसूत्रनयमतमाह-

[भा.११०१] उज्जुसुयस्स निओओ, पत्तेयघरं तु होए एक्केक्कं ।
उट्ठेति वसति व वसेण जस्स सद्दस्स सो गामो ॥

वृ- ऋजुसूत्रस्य स्वकीयार्थग्राहकत्वात् परकीयस्य च सतोऽप्यनभ्युपगमाद् यस्य यत् प्रत्येकमात्मीयावग्रहरूपेकैकं गृहं तद् नियोग इति प्रतिपत्तव्यम् । नियोग इति ग्राम इति चैकोऽर्थः । आह च विशेषचूर्णिकृत्- गामो त्ति वा निओउ त्ति वा एगट्ठं । "तत्तो य आहिवई" इति व्याख्यानयन् शब्दनयमतमाह-"उट्ठेति" इत्यादि । 'शब्दस्य' शब्दाख्यनयस्य यस्य कस्यापि वशेन ग्रामः

Jain Education International For Private & Personal Use Only www.jainelibrary.org

'उत्तिष्ठते' उद्वसीभवति 'वसति वा' भूयोऽप्यवस्थानं करोति स ग्रामस्याधिपतिर्ग्राम इति शब्दमुद्वोढुमर्हति, ये तु तत्र तदनुवर्त्तिनः शेषास्तेऽशेषा अप्युपसर्जनीभूतत्वान्न ग्रामसंज्ञां लभन्त इति भावः ।। चिन्तितं नयमार्गणया ग्रामस्वरूपम् ।

अथ ग्रामस्यैव नयैः संस्थानचिन्तां चिकीर्षुराह-

[भा.११०२] तस्सेव उ गामस्सा, को कं संठाणमिच्छति नओ उ ।
तत्थ इमे संठाणा, हवंति खलु मल्लगादीया ।।

वृ- तस्यैव ग्रामस्य संस्थानं को नयः किमिच्छति ? इति चिन्त्यते । तत्र तावद् इमानि मल्लकादीनि ग्रामस्य संस्थानं को नयः किमिच्छति ? इति चिन्त्यते । तत्र तावद् इमानि मल्लकादीनि ग्रामस्य संस्थानानि भवन्ति ।। तान्येवाह-

[भा.११०३] उत्तानग ओमंथिय, संपुडए खंडमल्लए तिविहे ।
भित्ती प-डालि वलभी, अक्खाडग रुयग कासवए ।।

वृ- अस्ति ग्राम उत्तानकमल्लकाकारः, अस्ति ग्रामोऽवाङ्मुखमल्लकाकारः, एवं स्मपुटकमल्लकाकारः । खण्डमल्लकमपि त्रिविधं वाच्यम् । तद्यथा-उत्तानकखण्डमल्लकसंस्थितः अवाङ्मुखखण्डमल्लकसंस्थितः सम्पुटकखण्डमल्लकसंस्थितश्च । तथा भित्तिसंस्थितः पडालिकासंस्थितः वलभीसंस्थितः अक्षपाटकसंस्थितः रुचकसंस्थितः काश्यपसंस्थितश्चेति ।। अथैषामेव संस्थानानां यथाक्रमं व्याख्यानमाह-

[भा.११०४] मज्झे गामस्सऽगडो, बुद्धिच्छेदा ततो उ रज्जूओ ।
निक्खम्म मूलपादे, गिण्हंतीओ वइ पत्ता ।।

वृ- इह यस्य ग्रामस्य मध्यभागे 'अगडः' कूपस्तस्य बुध्द्या पूर्वादिषु दिक्षु च्छेदः परिकल्प्यते, ततश्च कूपस्याधस्तनतलाद् बुद्धिच्छेदेन रज्जवो दिक्षु विदिक्षु च निष्क्राम्य गृहाणां मूलपादान् उपरि कृत्वा गृह्णत्यस्तिर्यक् तावद् विस्तार्यन्ते यावद् ग्रामपर्यन्तवर्तिनीं वृतिं प्राप्ता भवन्ति, तत उपर्यभिमुखीभूय तावद् गता यावद् उच्छ्रयेण हर्म्यतलानां समीभूताः तत्र च पटहच्छेदेनोपरताः, एष ईदृश उत्तानमल्लकसंस्थितो ग्राम उच्यते, ऊर्ध्वाभिमुखस्य शरावस्यैवमाकारत्वात् ।।

[भा.११०५] ओमंथिए वि एवं, देउल रुक्खो व जस्स मज्झम्मि ।
कूवस्सुवरिं रुक्खो, अह संपुडमल्लओ नाम ।।

वृ- अवाङ्मुखमल्लकाकारेऽप्येवमेव वाच्यम्, नवरं यस्य ग्रामस्य मध्ये देवकुलं वृक्षो वा उच्चैस्तरस्तस्य देवकुलादेः शिखराद् रज्जवोऽवतार्य तिर्यक् तावद् नीयन्ते यावद् वृतिं प्राप्ताः, ततोऽधोमुखीभूय गृहाणां मूलपादान् गृहीत्वा पटहच्छेदेनोपरताः, एषोऽवाङ्मुखमल्लकसंस्थितः। तथा यस्य ग्रामस्य मध्यभागे कूपः, तस्य चोपर्युच्चतरो वृक्षः, ततः कूपस्याधस्तलाद् रज्जवो निर्गत्य मूलपादानधोऽधस्तावद् गता यावद् वृतिं प्राप्ताः, तत ऊर्ध्वाभिमुखीभूय गत्वा हर्म्यतलानां समश्रेणीभूताः, वृक्षशिखरादप्यवतीर्य रज्जवस्तथैव तिर्यग् वृतिं प्राप्नुवन्ति, ततोऽधोमुखीभूय कूपसम्बन्धिनीनां रज्जूनामग्रभागैः समं सङ्घटन्ते, अथैष सम्पुटकमल्लकाकारो नाम ग्रामः ।।

[भा.११०६] जइ कूवाई पासम्मि होंति तो खंडमल्लओ होइ ।
पुव्वावररुक्खेहिं, समसेढीहिं भवे भित्ती ।।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

वृ- यदि 'कूपूदीनि' कूप-वृक्ष-तदुभयानि 'पार्श्वे' एकस्यां दिशि भवन्ति ततः खण्डमल्लकाकारस्त्रिविधोऽपि ग्रामो यथाक्रमं मन्तव्यः। तत्र यस्य ग्रामस्य बहिरेकस्यां दिशि कूपः तामेवैकां दिशं मुक्त्वा शेषासु दिक्षु रज्जवो निर्गत्य तिर्यग् वृतिं प्रप्योपरि हर्म्यतलान्यासाद्य पटहच्छेदेनोपरमन्ते, एष उत्तानकखण्डमल्लकाकारः। अवाङ्मुखखण्डमल्लकाकारोऽप्येवमेव, नवरं यस्यैकस्यां दिशि देवकुलमुच्चैस्तरो व वृक्षः। सम्पुटकखण्डमल्लकाकारस्तु यस्यैकस्यां दिशि कूपस्तदुपरिष्टाच्च वृक्षः, शेषं प्राग्वत्। "पुव्वावर" इत्यादि, पूर्वस्यामपरस्यां च दिशि समश्रेणिव्यवस्थितैर्वृक्षैर्भित्तिसंस्थितो ग्रामो भवेत्॥

[भा.११०७] पासड्डिए पडाली, वलभी चउकोण ईसि दीहा उ।
चउकोणेसु जइ दुमा, हवंति अक्खाडतो तम्हा॥

वृ- पडालिकासंस्थितोऽप्येवमेव, नवरमेकस्मिन् पार्श्वे वृक्षयुगलं समश्रेण्या व्यवस्थितम्। तथा यस्य ग्रामस्य चतुर्ष्वपि कोणेषु ईषद्दीर्घा वृक्षा व्यवस्थिताः स वलभीसंस्थितः। 'अक्षवाटः' मल्लानां युद्धाभ्यासस्थानम्, तद् यथा समचतुरस्र भवति एवं यदि ग्रामस्यापि चतुर्षु कोणेषु द्रुमा भवन्ति ततोऽसौ चतुर्विदिग्वर्त्तिभिर्वृक्षैः समचतुरस्रतया परिच्छिद्यमानत्वादक्षपाटकसंस्थितः॥

[भा.११०८] वट्टागारठिएहिं, रुयगो पुण वेढिओ तरुवरेहिं।
तिक्कोणो कासवओ, छुरघरगं कासवं बिंती॥

वृ- यद्यपि ग्रामः स्वयं न समस्तथापि यदि रुचकवलयशैलवद् वृत्ताकारव्यवस्थितैर्वृक्षैर्वेष्टितस्तदा रुचकसंस्थितः। यस्तु ग्राम एव त्रिकोणतया निविष्टो वृक्षा वा त्रयो यस्य बहिस्त्र्यस्रं स्थिताः, एकतो द्वान्यतस्त्वेक इत्यर्थः, एष उभयथाऽपि काश्यपसंस्थितः। काश्यपं पुनर्नापितस्य सम्बन्धि क्षुरगृहं ब्रुवते, तद् यता त्र्यस्रं भवत्येवमयमपि ग्राम इति॥ भावितानि सर्वाण्यपि संस्थानानि। अथ को नयः किं संस्थानमिच्छति? इति भाव्यते-

[भा.११०९] पढमेत्थ पडहछेदं, आ कासव कडग-कोट्टिमं तइओ।
नाणिं आहिपतिं वा, सद्दनया तिन्नि इच्छंति॥

प्रथमोऽत्र नैगमनयः, स पटहच्छेदलक्षणं संस्थानं प्रतिपद्यते। सङ्ग्रहोऽप्येवमेव मन्यत इत्यत्रैवान्तर्भाव्यते। व्यवहारस्तु भित्तिसंस्थानादारभ्य आ काश्यपसंस्थानं मन्यते। 'तृतीयः' ऋजुसूत्रः, सः कटकानां-तृणादिमयानां कुट्टिमानां वा-पाषाणादिबद्धभूमिकानां यत् संस्थानं तद् मन्यते। 'त्रयस्तु' शब्दनया ज्ञानिनमधिपतिं वा ग्रामसंस्थानस्वामित्वेनेच्छन्ति॥

एनामेव निर्युक्तिगाथां व्यक्तीकुर्वन्नाह-

[भा.१११०] संगहियमसंगहिओ, संगहिओ तिविह मल्लयं नियमा।
भित्तादी जा कासवो, असंगहो वेति संठाणं॥

वृ- नैगमो द्विधा-साङ्ग्रहिकोऽसाङ्ग्रहिकश्च। तद्विपरीतोऽसाङ्ग्रहिकः। तत्र यः साङ्ग्रहिकः स नियमात् 'त्रिविधम्' उत्तानका-ऽवाङ्मुख-सम्पुटकभेदभिन्नं सम्पूर्णं वा कण्डं वा मल्लकं तस्य यत् पटहच्छेदलक्षणं संस्थानं तद् मन्यते। असाङ्ग्रहिकस्तु भित्तिसंस्थानमादौ कृत्वा यावत् काश्यपसंस्थानम् एतानि सर्वाण्यपि 'ब्रूते' प्रतिपद्यत इत्यर्थः। सङ्ग्रह-व्यवहारौ तु साङ्ग्रहिकाऽसाङ्ग्रहिकयोरेव नैगमयोर्यथासङ्ख्यमन्तर्भावनीयाविति न पृथक् प्रपञ्च्येते इति॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

[भा.११११]निम्मा घरवइ थूभिय, तइओ दुहणा वि जाव पावंति।
नाणिस्साहिपइस्स व, जं संठाणं तु सद्दस्स॥

वृ- 'तृतीयः' सूत्रक्रमप्रामाण्येन ऋजुसूत्रः, सः "निम्म"त्ति मूलादानां "घर वइ"त्ति गृहाणां वृतेर्वा स्तूपिकानां वा उपलक्षणत्वात् कटकानां कुट्टिमानां वा यत् संस्थानं माले वा भूमिकादाढर्यसम्पादनार्थमकुट्यमाने 'द्रघणाः' मुद्गरा ऊर्ध्वमुत्क्षिप्यमाणा यावद् आकाशतलं प्राप्नुवन्ति तावन्तर्यादीकृत्य यत् संस्थानमेतत् सर्वमपि प्रत्येकं ऋजुसूत्रो मन्यते। तथा 'ज्ञानिनः' ग्रामपदार्थज्ञस्य ग्रामाधिपतेर्वा यत् संस्थानं तदेव शब्दनयस्य ग्रामसंस्थानतयाऽभिप्रेतमिति॥ गतं द्रव्यग्रामद्वारम्। अथ भूतादिग्रामभेदान् भावयति-

[भा.१११२]चउदसविहो पुन भवे, भूतग्गामो तिहा उ आतोज्जो।
सोतादिंदियगामो, तिविहा पुरिसा पिउग्गामो॥

वृ- भूताः-प्राणिनस्तेषां ग्रामः-समूहो भूतग्रामः, स चतुर्दशविधः। तथा चाह-
एगिंदिय सुहुमियरा, सन्नियर पणिंदिया य सबि-ति-चऊ।
पज्जत्ताऽपज्जत्ता, भेएणं चउदस ग्गामा॥

एकेन्द्रिया द्विविधाः-सूक्ष्मा बादराश्च।सूक्ष्मनामकर्मोदयवर्त्तिनः सूक्ष्माः। बादरनाम-कर्मोदयवर्तिनो बादराः। द्वीन्द्रियाः-कृम्यादयः। त्रीन्द्रियाः-कुन्थु-पिपीलिकादयः। चतुरिन्द्रिया भ्रमरादयः। पञ्चेन्द्रिया द्विविधाः-संज्ञिनोऽसंज्ञिनश्च। संज्ञिनः-गर्भजतिर्यङ्-मनुष्या देव-नारकाश्च। असंज्ञिनः सम्मूर्च्छिमास्तिर्यङ्-मनुष्याः। एते च स्वयोग्यपर्याप्तिभिः पर्याप्ता वा स्युरपर्याप्ता। पर्याप्तिर्नाम शक्ति, सा चाहार-शरीरेन्द्रिय-प्राणापान-भाषा-मनःपर्याप्तिभेदात् षोढा। तत्र तया शक्त्या करणभूतया भुक्तमाहारं खल-रसरूपतया करोति सा आहारपर्याप्ति। यया तु रसीभूतमाहारं धातुरूपतया परिणमयति सा शरीरपर्याप्ति। यया धातुरूपतया परिणमितादाहारादिन्द्रिय-प्रायोग्यद्रव्याण्युपादायैकद्वित्र्यादीन्द्रियरूपतया परिणमय्य स्पर्शादिविषयपरिज्ञानसमर्थो भवति सा इन्द्रियपर्याप्तिः। यया पुनरुच्छ्वास-भाषा-मनःप्रायोग्याणि दलिकान्यादाय यथाक्रममुच्छ्-वासरूपतया भाषात्वेन मनस्त्वेन वा परिणमय्याऽऽलम्ब्य च मुञ्चति सा क्रमेण प्राणापान-पर्याप्तिर्भाषापर्याप्तिर्मनः पर्याप्ति। एताश्च यथाक्रममेकेन्द्रियाणां चतस्रो, द्वीन्द्रियादीनां सम्मूर्च्छि-मतिर्यङ्-मनुष्यान्तानां पञ्च, संज्ञिपञ्चेन्द्रियाणां च षड् भवन्ति। एवं च पूर्वोक्ताः सप्तापि भेदाः पर्याप्तापर्याप्तभेदाद् द्विधा भिद्यमानाश्चतुर्दश भवन्ति। एष चतुर्दशविधो भूतग्रामः॥

आतोद्यग्रामस्तु त्रिधा-षड्जग्रामो मध्यमग्रामो गन्धारग्रामश्च। एतेषां च स्वरूपमनु-योगद्वारशास्त्राद् अवसेयम्। इन्द्रियग्रामः श्रोत्रादीनामिन्द्रियाणां समुदायः, स च पञ्चेन्द्रियाणां सम्पूर्ण, चतुस्त्रिद्व्येकेन्द्रियाणां यथाक्रममेकद्वित्रिचतुःसङ्ख्यैरिन्द्रियैर्न्यून इति। पितृग्रामस्तु त्रिविधाः पुरुषाः। तद्यथा-तिर्यग्योनिकपुरुषा मनुष्यपुरुषा देवपुरुषाश्चेति॥

[भा.१११३]तिरिया-ऽमर-नरइत्थी, माउग्गामं पि तिविहमिच्छंति।
नाणाइतिगं भावे, जओ व तेसिं समुप्पत्ती॥

वृ- तिर्यग्योनिकस्त्रियोऽमराः-देवास्तेषां स्त्रियो नराः-मनुष्यास्तिेषां च स्त्रय इति मातृग्राममपि त्रिविधमिच्छन्ति पूर्वसूरयः। आह किमेवं स्त्रि-पुरुषाणां मातृपितृग्रामसंज्ञा विधीयते?

Jain Education International For Private & Personal Use Only www.jainelibrary.org

उच्यते- संज्ञासूत्रोपयोगार्थम् । तथा चाऽऽचारप्रकल्पाध्ययने षष्ठोद्देशके सूत्रम्- "जे भिक्खू माउग्गामं मेहुणवडियाए विन्नवेइ" इत्यदि। तथा- "जा भिक्खुमी पिउग्गगामं विन्नवेइ"इत्यादि। भावग्रामस्तु नो आगमतः 'ज्ञानादित्रिकं' ज्ञान-दर्शन-चारित्रसमवायरूपम्; यतो वा 'तेषां' ज्ञानादीनामुत्पत्तिर्भवति ते भावग्रामतया ज्ञातव्याः ।। के पुनस्ते ? उच्यते-

[भा.१११४]तित्थगरा जिन चउदस, दस भिन्ने संविग्ग तह असंविग्गे।
सारूविय वय दंसण, पडिमाओ भावगामो उ।

वृ 'तीर्थकराः' अर्हन्तः, 'जिनाः' सामान्यकेवलिनः अवधि-मनःपर्यायजिना वा, चतुर्दश-पूर्विणो दशपूर्विणश्च प्रतीताः, "भिन्ने"त्ति असम्पूर्णदशपूर्वधारिणः, 'संविग्नाः' उद्यतविहारिणः, 'असंविग्नाः' तद्विपरीताः, 'सारूपिकाः नाम' श्वेतवाससः क्षुरमुण्डितशिरसो भिक्षाटनोपजीविनः पश्चात्कृतविशेषाः, "वय" त्ति प्रतिपन्नाणुव्रताः श्रावकाः, "दंसण"त्ति दर्शनश्रावकाःअविरत-सम्यग्दृष्टय इत्यर्थः, 'प्रतिमाः' अर्हद्बिम्बानि। एष सर्वोऽपि भावग्रामः, एतेषां दर्शनादिना ज्ञानादि-प्रसूतिसद्भावात् । अत्र परः प्राह-ननु युक्तं तीर्थकादीनां ज्ञानादिरत्नत्रयसम्पत्समन्वितानां भावग्रामत्वम्, ये पुनरसंविग्नादयस्तेषां कथमिव भावग्रामत्वमुपपद्यते ? नैष दोषः, तेषामपि यथावस्थितरूपणाकारिणां पार्श्वतो यथोक्तं धर्ममाकर्ण्य सम्यग्दर्शनादिलाभ उदयते, अतस्तेषामपि भावग्रामत्वमुपद्यत एवेति कृतं प्रसङ्गेन ।। तीर्थकरा इति पदं विशेषतो भावयति-

[भा.१११५] चरण-करणसंपन्ना, परीसहपरायगा महाभागा।
तित्थगरा भगवंतो, भावेण उ एस गामविही ।।

वृ-चरण-करणसम्पन्नाः परीषहपराजेतारो महाभागास्तीर्थकरा भगवन्तो दर्शनमात्रादेव भव्यानां सम्यग्दर्शनादिबोधिबीजप्रसूतिहेतवो भावग्रामतया प्रतिपत्तव्याः । एवं जिनादिष्वपि भावनीयम् । एष सर्वोऽपि भावग्रामविधिर्मन्तव्यः ।। प्रतिमा अधिकृत्य भावनामाह-

[भा.१११६]जा सम्मभावियाओष पडिमा इयरा न भावगामो उ।
भावो जइ नत्थि तहिं, ननु कारण कज्जउवयारो ।।

वृ-याः 'सम्यग्भाविताः' सम्यग्दृष्टिपरिगृहीताः प्रतिमास्ता भावग्राम उच्यते, न 'इतराः' मिथ्यादृष्टिपरिगृहीताः । आह सम्यग्भाविता अपि प्रतिमास्तावद् ज्ञानादिभावशून्याः, ततो यदि ज्ञानादिरूपो भावस्तत्र नास्ति ततस्ताः कथं भावग्रामो भवितुमर्हन्ति ? उच्यते-ता अपि दृष्ट्वा भव्यजीवस्याऽऽर्द्रककुमारादेरिव सम्यग्दर्शनाद्युदीयमानमुपलभ्यते ततो ननु कारणे कार्योपचार इति कृत्वा ता अपि भावग्रामो भण्यन्ते ।। अत्र परः प्राह-

[भा.१११७] एवं खु भावगामो, निण्हगमाई वि जह मयं तुब्भं।
एअमवच्चं को नु हु, अव्विचरीतो वदिज्जाहिं ।।

वृ- यथा सम्यग्भावितप्रतिमानां कारणे कार्योपचाराद् भावग्रामत्वं युष्माकं 'मतम्' अभिप्रेतम्, एवमे निह्नवादयोऽपि भावग्राम एव भवतां प्राप्नुवन्ति, तेषामपि दर्शनेन कस्यचित् सम्यग्दर्शनोत्पादात् । सूरिराह-'एतत्' त्वदुक्तमवाच्यवचनं भवन्तमसमञ्जनसप्रलापिनं विना को नु 'अविपरीतः' सम्यग्वस्तुतत्ववेदी वदेत् ? अपि तु नैवेत्यभिप्रायः ।। कुतः ? इत्याह-

[भा.१११८] जइ वि हु सम्पुप्पाओ, कासइ दट्ठूण निण्हए होज्जा।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

मिच्छत्तहयसईया, तहावि तेवज्जणिज्जा उ ॥

वृ-यद्यपि हि निह्नवानपि दृष्ट्वा कस्यचित् सम्यग्दर्शनोत्पादो भवेत् तथापि ते मिथ्यात्वम्-अतत्त्वे तत्त्वाभिनिवेशः तेन हता-दूषिता स्मृति-सर्वज्ञवचनसंस्कारलक्षणा दुर्वातेन सस्यवद् येषां ते मिथ्यात्वहतस्मृतिका एवंविधाश्च बह्वीभिरसद्भावोद्भावनाभिरस्तोकलोकचेतांसि विपरिणामन्यन्तः पूर्वलब्धमपि बोधिबीजमात्मनोऽपरेषां चोपघ्नन्तो दूरंदूरेण वर्जनीया इति । यश्चैवमतो नैते भावग्रामतया भवितुमर्हन्तीति प्रकृतम् ॥ अथात्र कतरेण ग्रामेणाधिकारः ? उच्यते-

[भा.१११९] आहारउवहि-सयणा-ऽऽसणोवभोगेसु जो उ पाउग्गो

एवं वयंति गामं, जेनऽहिगारो इहं सुत्ते ॥

वृ-आहारोपधी प्रतीतौ, शयनं-संस्तारकः, आसनं-पीठादि, एतेषामुपभोगेषु यः प्रायोग्यः। किमुक्तं भवति ?-एतानि यत्र कल्प्यानि प्राप्यन्ते तमेनं ग्रामं 'वदन्ति' प्ररूपयन्ति सूरयः, येन 'अत्र' सूत्रे 'अधिकारः' प्रकृतमिति ॥ व्याख्यातं ग्रामपदम् । अथ नगरादिपदान्यतिदिशन्नाह-

[भा.११२०] एमेव य नगरादी, नेयव्वा होंति आनुपुव्वीए ।

जं जं जुज्जइ जत्थ उ, जोएअव्वं तगं तत्थ ॥

वृ- यथा ग्रामपदं प्ररूपितम् एवमेव नगरादीन्यपि पदान्यानुपूर्व्या नेतव्यानि । एतदेव व्याचष्टे- यत् यद् नाम-स्थापना-द्रव्य-भावादिकं यत्र नगरादौ युज्यते तत् तत्र योजयितव्यमिति॥ अथ परिक्षेपपदं निक्षिपन्नाह-

[भा.११२१] नामं ठवणा दविए, खित्ते काले तहेव भावे य ।

एसो उ परिक्खेवे, निक्खेवो छव्विहो होइ ॥

वृ-नामपरिक्षेपः स्थापनापरिक्षेपो द्रव्यपरिक्षेपः क्षेत्रपरिक्षेपः कालपरिक्षेपो भावपरिक्षेपः। एष परिक्षेपे निक्षेपः षड्विधो भवति ॥ तत्र नाम-स्थापने गतार्थे । द्रव्यपरिक्षेपं प्रतिपादयति-

[भा.११२२] सच्चित्तादी दव्वे, सच्चित्तो दुपयमायगो तिविहो ।

मीसो देसचियादी, अच्चित्तो होइमो तत्थ ॥

वृ-द्रव्यपरिक्षेपस्त्रिविधः-'सच्चित्तादि' सच्चित्तोऽचित्तो मिश्रश्चेत्यर्थः । सच्चित्तस्त्रिविधो द्विपदचतुष्पदा-ऽपदभेदात् । तत्र ग्राम-नगरादेर्यद् मनुष्यैः परिवेष्टनं स द्विपदपरिक्षेपः, यत्तु तुरङ्गमहस्त्यादिभिः स चतुष्पदपरिक्षेपः, यत् पुनर्वृक्षैः सोऽपदपरिक्षेपः । मिश्रोऽप्येवमेव त्रिविधः, परं "देसचितादि" त्ति देशे-एकदेशे उपचितः-सचेतनः, आदिशब्दाद् देशे अपचितः-व्यपगत-चैतन्यः । किमुक्तं भवति ? -यत्रैके मनुष्या-ऽश्व-हस्त्यादयो जीवन्ति, अपरे तु मृताः परं ग्रामादिकं परिक्षिप्य व्यवस्थिताः, स मिश्रपरिक्षेपः । अचित्तपरिक्षेपस्त्वयं भवति ॥ तमेवाह-

[भा.११२३] पासाणिट्टग-मट्टिय-खोड-कडग-कंटिगा भवे दव्वे ।

खाइय-सर-नइ-गड्डा-पव्व-दुग्गाणि खेत्तम्मि ॥

वृ-पाषाणमयः प्राकारो यथा द्वारिकायाम्, इष्टकामयः प्राकारो यथा नन्दपुरे, मृत्तिकामयो यथा सुमनोमुखनगरे, "खोड" त्ति काष्ठमयः प्राकारः कस्यापि नगरादेर्भवति, कटकाः-वंश-दलादिमयाः कण्टिकाः-बुब्बूलादिसम्बन्धिन्यः तन्मयो वा परिक्षेपो ग्रामादेर्भवति, एष सर्वोऽपि द्रव्यपरिक्षेपः । क्षेत्रपरिक्षेपस्तु खातिका वा सरो वा नदी वा गर्त्ता वा पर्वतो वा दुर्गाणि वा-

Jain Education International For Private & Personal Use Only www.jainelibrary.org

जलदुर्गादीनि पर्वता एव दुर्गाणि वा, एतानि नगरादिकं परिक्षिप्य व्यवस्थितानि क्षेत्रपरिक्षेप उच्यते ।। कालपरिक्षेपमाह-

[भा.११२४] वासारत्ते अइपाणियं ति गिम्हे अपाणियं नच्चा ।
कालेन परिक्खित्तं, तेन तमन्ने परिहरंति ।।

वृ-वर्षारात्रेऽतिपानीयमिति कृत्वा 'ग्रीष्मे' उष्णकाले अपानीयमिति कृत्वा रोद्धुं न शक्यत इति ज्ञात्वा तेन कारणेन तद् नगरादिकम् 'अन्ये' परराष्ट्रराजानः परिहरन्ति तत् कालपरिक्षिप्तम्।। भावपरिक्षेपमाह-

[भा.११२५] नच्चा नरवइणो सत्त-सार-बुद्धी-परक्कमविसेसे ।
भावेन परिक्खित्तं,तेन तमन्ने परिहरंति ।।

वृ-सत्त्वं-धैर्यम्; सारो द्विधा-बाह्य आभ्यन्तरश्च, बाह्यो बल-वाहनादि, आभ्यन्तरो रत्न-सुवर्णादि; बुद्धिरौत्पत्तिक्यादिभेदाच्चतुर्विधा यथा अभयकुमारस्य; पराक्रमः-औरसबलात्मकः, एतान् सत्त्व-सार-बुद्धि-पराक्रमविशेषान् विवक्षितनरपतेः सम्बन्धिनो ज्ञात्वा 'यद्यनेन सार्द्धं विग्रहमारप्स्यामहे तत उत्खनिष्यन्ते सपुत्रगोत्राणामस्माकमनेन कन्दाः' इति परिभाव्य तदीयं नगरं यद् 'अन्ये' राजानः परिहरन्ति तत् तदीयेन सत्त्व-सारादिना भावेन परिक्षिप्तं प्रतिपत्तव्यम्।। व्याख्यातं परिक्षेपपदम् । अत्र द्रव्यपरिक्षेपेण प्रकृतम् । अथ मासपदनिक्षेपमाह-

[भा.११२६] नामं ठवणा दविए, खित्ते काले तहेव भावे य ।
मासस्स परूवणया, पगयं पुण कालमासेणं ।।

वृ-नाममासः स्थापनामासोद्रव्यमासः क्षेत्रमासः कालमासो भावमासश्चेति षड्विधा मासस्य प्ररूपणा कर्त्तव्या । प्रकृतं पुनरत्र सूत्रे कालमासेन ।।

तत्र नाम-स्थापने क्षुण्णत्वाद् व्युदस्य द्रव्यमासमाह-

[भा.११२७]दव्वे भवितो निव्वत्तिओ उ खेत्तं तु जम्मि वण्णणया ।
कालो जहि वण्णिज्जइ, नक्खत्तादी व पंचविहो ।।

वृ- द्रव्यमासः "भविउ"त्ति माषत्वेन य उत्पत्स्यते, स चैकभविको बद्धायुष्कोऽभिमुखनामगोत्रश्चेति त्रिधा, एष त्रिविधोऽपि प्राकृतशैल्या द्रव्यमासो भण्यते, एवमुत्तरत्रापि । अथवा द्रव्यमासो दविधा मूलोत्तरगुणनिर्वर्त्तितभेदात् । तत्र यो जीवविप्रमुक्तो माषः स मूलगुण-निर्वर्त्तितः, यस्तु चित्रकर्मादौ माषस्तम्ब आलिखितः स उत्तरगुणनिर्वर्त्तितः । क्षेत्रमासस्तु यस्मिन् क्षेत्रे मासकल्पस्य वर्णना क्रियते माषो वा वाप्यते । कालमासः पुनर्यस्मिन् काले माषो वाप्यते मासकल्पो वा वप्रये । अथवा कालमासः श्रावणादि । यद्वा कालमासो नक्षत्रादिकः पञ्चविधः । तद्यथा- नक्षत्रमासश्चन्द्रमासः ऋतुमासः आदित्यमासः अभिवर्द्धितमासः ।।

अमीषामेव परिमाणमाह-

[भा.११२८] नक्खत्तो खलु मासो, सत्तावीसं हवंतऽहोरत्ता ।
भागा य एक्कवीसं, सत्तट्ठिकिएण छेएणं ।।

वृ- नक्षत्रेषु भवो नाक्षत्रः, स खलु मासः सप्तविंशतिरहोरात्राणि सप्तषष्टीकृतेन छेदेन च्छिन्नस्याहोरात्रस्यैकविंशति सप्तषष्टा भागाः । तथाहि-चन्द्रस्य भरण्यार्द्रा-ऽश्लेषा-स्वाति-ज्येष्ठा-

Jain Education International For Private & Personal Use Only www.jainelibrary.org

शत-भिषगनामानि षड् नक्षत्राणि पञ्चदशमुहूर्त्तभोगीनि, तिस्रो उत्तराः पुनर्वसू रोहिणी विशाखा चेति षट् पञ्चचत्वारिंशन्मुहूर्त्तभोगीनि, शेषाणि तु पञ्चदश नक्षत्राणि त्रिंशन्मुहूर्त्तानीति जातानि सर्वसङ्ख्यया मुहूर्त्तानामष्ट शतानि दशोत्तराणि; एतेषां च त्रिंशन्मुहूर्त्तैरहोरात्रमिति कृत्वा त्रिंशता भागो ह्रियते लब्धानि सप्तविंशतिरहोरात्राणि, अभिजिद्भोगश्चैकविंशति सप्तषष्टा भागा इति तैरभ्यधिकानि सप्तविंशतिरहोरात्राणि सकलनक्षत्रमण्डलोपभोगकालो नक्षत्रमास उच्यते १ ॥

[भा.११२९] अउनत्तीसं चंदो, बिसट्ठि भागा य हुंति बत्तीसा।
कम्मो तीसइदिवसो, तीसा अद्धं च आइच्चो ॥

वृ-चन्द्रे भवश्चान्द्रः कृष्णपक्षप्रतिपद आरभ्य यावत् पौर्णमासीपरिसमाप्तिस्तावत्कालमानः; स च एकोनत्रिंशदहोरात्राणि द्वात्रिंशच्च द्वाषष्टिभागा अहोरात्रस्य २। कर्ममासः ऋतुमास इत्येकोऽर्थः, स त्रिंशद्दिवसप्रमाणः ३। आदित्यमासस्त्रिंशदहोरात्राणि रात्रिन्दिवस्य चार्द्धम्, दक्षिणायनस्योत्तरायणस्य वा षष्ठभागमान इत्यर्थः ४॥

[भा.११३०]अभिवड्ढि इक्कतीसा, चउवीसं भागसयं च तिगहीणं।
भावे मूलाइजुओ, पगयं पुन कम्ममासेणं ॥

वृ-अभिवर्द्धितो नाम मुख्यतः त्रयोदशचन्द्रमासप्रमाणः संवत्सरः, परं तद्द्वादशभागप्रमाणो मासोऽप्यवयवे समुदायोपचाराद् अभिवर्द्धितः, स चैकत्रिंशदहोरात्राणि चतुर्विंशत्युत्तरशतभागीकृतस्य चाहोरात्रस्य त्रिकहीनं चतुर्विंशं शतं भागानां भवति, एकविंशशतमिति भावः ५। एतेषां चानयनाय इयं करणगाथा-

जुगमासेहि उ भइए, जुगम्म लद्धं हविज्ज नायव्वं।
मासाणं पंचण्ह वि, एयं राइंदियपमाणं ॥

इह सूर्यस्य दक्षिणमुत्तरं वा अयनं त्र्यशीत्यधिकदिनशतात्मकम्। द्वे अयने वर्षमिति कृत्वा वर्षे षट्षष्ट्यधिकानि त्रीणि शतानि भवन्ति। पञ्च संवत्सरा युगमिति कृत्वा तानि पञ्चभिर्गुण्यन्ते जातान्यष्टादश शतानि त्रिंशानि दिवसानाम्। एतेषां नक्षत्रमासदिवसानयनाय सप्तषष्टिर्युगे नक्षत्रमासाइति सप्तषष्ट्या भागो ह्रियते, लब्धाः सप्तविंशतिरहोरात्रा एकविंशतिरहोरात्रस्य सप्तषष्टिभागाः १। तथा चन्द्रमासदिवसानयनाय द्वाषष्टिर्युगे चन्द्रमासा इति द्वाषष्ट्या तस्यैव युगदिनराशेर्भागो ह्रियते, लब्धान्येकोनत्रिंशदहोरात्राणि द्वात्रिंशच्च द्वाषष्टिभागाः २। एवं युगदिवसानामेवैकषष्टिर्युगे कर्ममासा इत्येकषष्ट्या भागे हृते लब्धानि कर्ममासस्य त्रिंशद्दिनानि ३। तथा युगे षष्टि सूर्यमासा इति षष्ट्या युगदिनानां भागे हृते लब्धाः सूर्यमासदिवसास्त्रिंशदहोरात्रस्यार्द्धं च ४। तथा युगदिवसा एव अभिवर्द्धितमासदिवसानयनाय त्रयोदशगुणाः क्रियन्ते जतानि त्रयोविंशतिसहस्राणि सप्त शतानि नवत्यधिकानि, एषां चतुश्चत्वारिंशैः सप्तभि शतैर्भागो ह्रियते लब्धा एकत्रिंशद्दिवसाः, शेषाण्यवतिष्ठन्ते षड्विंशत्यधिकानि सप्तशतानि चतुश्चत्वारिंशसप्तशतभागानाम्, तत उभयेषामप्यङ्कानां षड्भिरपवर्त्तना क्रियते जातमेकविंशं शतं चतुर्विंशत्युत्तरशतभागानामिति ५॥

उक्ताः पञ्चापि कालमासाः। भावमासो नोआगमतः 'मूलादियुतः' मूल-कन्द-स्कन्धादिरूपतया माषप्रायोग्याणि कर्माणि वेदयन् माषजीवोऽवगन्तव्यः प्रकृतं पुनरत्र

Jain Education International For Private & Personal Use Only www.jainelibrary.org

'कर्ममासेन' ऋतमासेनेत्यर्थः । ततः "अबाहिरियंसि कप्पइ निग्गंथाणं एक्कं मासं वत्थए" त्ति किमुक्तं भवति ? -त्रिंशदहोरात्रमानमेकं ऋतुमासं कल्पते वस्तुमिति ॥ प्ररूपितं मासपदम् । अथ येषां मासकल्पेन विहारो भवति तान् नामग्राहं गृहीत्वा तद्विधिमभिधित्सुराह-

[भा.११३१] जिन सुद्ध अहालंदे, गच्छे मासो तहेव अज्जाणं ।
एएसिं नाणत्तं, वोच्छामि अहानुपुव्वीए ॥

वृ- जिनकल्पिकानां शुद्धपरिहारकाणां यथालन्दकल्पिकानां 'गच्छवासिनां' स्थविर-कल्पिकानामित्यर्थः । तथैव 'आर्याणां' साध्वीनां यथा येषां मासकल्पो भवति तथैतेषां सर्वेषामपि नानात्वं वक्ष्यामि 'यथानुपूर्व्या' यथोद्दिष्टपरिपाट्या ॥ तत्रप्रथमं जिनकल्पिकानाश्रित्याह-

[भा.११३२] पव्वज्जा सिक्खापयमत्थग्गहणं च अनियओ वासो ।
निप्फत्ती य विहारो, सामायारी ठिई चेव ॥

वृ- प्रथमं प्रव्रज्या वक्तव्या, कथमसौ जिनकल्पिकः प्रव्रजितः ? इति । ततः 'शिक्षापदं' ग्रहणा-ऽऽसेवनाविषयम् । ततो ग्रहणशिक्षयाऽधीतसूत्रस्यार्थग्रहणम् । ततो नानादेशदर्शनं कुर्वतो यथा अनियतो वासो भवति । ततः शिष्याणां निष्पत्ति । तदनन्तरं विहारः । ततो जिनकल्पं प्रतिपन्नस्य सामाचारी । ततस्तस्यैव 'स्थिति' क्षेत्र-कालादिकाऽभिधातव्येति गाथासमुदायार्थः ॥ अवयवार्थं प्रतिद्वारमभिधित्सुः प्रथमतः प्रव्रज्याद्वारमाह-

[भा.११३३] सोच्चाऽभिसमेच्चावा, पव्वज्जा अभिसमागमो तत्थ ।
जाइस्सरणाईओ, सनिमित्तमनिमित्तओ वा वि ॥

वृ- 'श्रुत्वा' तीर्थकर-गणधरादीनां धर्मदेशनां निशम्य 'अभिसमेत्य वा' सह सन्मत्यादिना स्वयमेवावबुध्य प्रव्रज्या भवेत् । तत्राल्पवक्तव्यत्वात् परथममभिसमागम उच्यते-सो अभिसमागमो जातिस्मरणादिकः सनिमित्तकोऽनिमित्तको वा द्रष्टव्यः । तत्र यद् बाह्यं निमित्तमुद्दिश्य जातिस्मरण-मुपजायते तत् सनिमित्तकम्, यथा वल्कलचीरिप्रभृतीनाम् । यत् पुनरेवमेव तदावारककर्मणां क्षयोपशमेनोत्पद्यते तदनिमित्तकम्, यथा स्वयम्बुद्ध-कपिलादीनाम् । एतेन जातिस्मरणेन आदिग्रहणात् श्रावकस्य गुणप्रत्ययप्रभवेणावधिज्ञानेन अन्यतीर्थिकस्य वा विभङ्गज्ञानेन प्रव्रज्याप्रतिपत्ति सम्भवति ॥ गतमभिसमेत्यद्वारम् । अथ श्रुत्वेति द्वारं विवरीषुराह-

[भा.११३४] सोच्चा उ होइ धम्मं, स केरिसो केन वा कहेयव्वो ।
के तस्स गुणा वुत्ता, दोसा अनुवायकहणाए ॥

वृ- धर्ममाचार्यादीनामन्तिके श्रुत्वा प्रव्रज्या भवति । अत्र शिष्यः पृच्छति-स धर्म कीद्दशः ? केन वा कथयितव्यः ? के वा तस्योपायकथने गुणाः प्रोक्ताः ? के वा अनुपायकथने दोषाः ? इति ॥ तत्र कीद्दशः ? केन वा कथयितव्यः ? इति प्रश्नो निर्वचनमाह-

[भा.११३५] संसारदुक्खमहणो, विबोहओ भवियपुंडरीयाणं ।
धम्मो जिनपन्नत्तो, पगप्पजइणा कहेयव्वो ॥

वृ- संसार एव जन्म-जरा-मरणादिदुःखनिबन्धनत्वाद् दुःखं संसारस्य वा दुःखानि-शारीर-मानसिकलक्षणानि तस्य तेषां वा मथनः-विनाशकः, तथा भव्या एव विनयादिविमलगुणपरिमल-योगाद् ज्ञानादिलक्ष्मीनिवासयोग्यतया च पुण्डरीकाणि-श्वेतसोरुहाणि तेषां विशेषेण

Jain Education International For Private & Personal Use Only www.jainelibrary.org

मिथ्यात्वादिनिद्राविद्रावणलक्षणेन बोधकः-सम्यग्दर्शनादिविकाशकारी, ईदृशो जिनप्रज्ञप्तो धर्म 'प्रकल्पयतिना' निशीथाध्ययनसूत्रार्थधारिणा साधुना कथयितव्यः। स हि संविग्नगीतार्थतयोत्सर्गाऽपवादपदानि स्वस्थाने स्वस्थाने विनियुञ्जानो न विपरीतप्ररूपणयाऽऽत्मानं परं वा दीर्घभवभ्रमणभाजनमातनोतीति ।। परः प्रा-किमेवंविधोऽपि भागवतो धर्म उपदिश्यमानः केषाञ्चिद् बोधं न जनयति येनैवमभिधीयते "भव्यपुण्डरीकाणां विबोधकः" ? इति, अत्रोच्यते-

[भा.११३६] जह सूरस्स पभावं, दट्टुं वरकमलपोंडरीयाइं।
बुज्झंति उदयकाले, तत्थ उ कुमुदा न बुज्झंति ।।

वृ- यथा सूर्यस्य 'प्रभावं' प्रभापटलरूपं दृष्ट्वा सरसि स्थितानि वरकमलपुण्डरीकाणि 'उदयकाले' प्रभाते बुध्यन्ते। तत्रैव च सरसि कुमुदान्यपि सन्ति परं तानि न बुध्यन्ते ।।

[भा.११३७] एवं भवसिद्धीया, जिणवरसूरस्सुतिप्पभावेणं।
बुज्झंति भवियकमला, अभवियकुमुदा न बुज्झंति ।।

वृ- 'एवम्' अनेनैव दृष्टान्तेन जिनवरसूर्यस्य या श्रुति-आगमः प्रभापटलकल्पस्तत्प्रभावेन भव्यकमलानि 'बुध्यन्ते' सम्यक्त्वादिविकाशमासादयन्ति। तानि च- "भव्वा वि ते अनंता, जे मुत्तिसुहं न पावंति।" इति वचनादसम्भावनीयसिद्धिगमनान्यपि भवेयुरित्यत्तध्यवच्छेदार्थमाह-भवा-भाविनी सिद्धिर्येषां तानि भवसिद्धिकानि। यस्मिंश्च जीवलोकसरसि भगवतः प्रभावेन भव्यकमलानि बोधमश्नुवते तस्मिन् अभव्यकुमुदान्यपि कालसौकरिकप्रभृतीनि सन्ति परं तानि न प्रतिबुध्यन्ते, तथास्वाभाव्यात्। यदवादि वादिमुख्येन-

सद्धर्मबीजवपनानघकौशल्यस्य, यल्लोकबान्धव ! तवापि खिलान्यभूवन्।
तन्नाद्भुतं खगकुलेष्विह तामसेषु सूर्यांशवो मधुकरीचरणावदाताः

—अत्र परः प्राह—

[भा.११३८] पुव्वंत्ति होइ कहओ, पच्छा धम्मो उ उक्कमो किन्नु।
तेन वि पुव्वं धम्मो, सुओ उ तम्हा कमो एसो ।।

वृ- पूर्वं तावत् 'कथकः' धर्मोपदेष्टा भवति, पश्चात् तदुपदेशं श्रुत्वा धर्म उत्पद्यते, अतः किमेवं 'स कीदृशः' इति प्रथमं धर्मस्वरूपमुद्दिश्य 'केन वा कथयितव्यः' इति कथकस्वरूपं पश्चादुद्दिशद्भिरुत्क्रमः क्रियते ? । गुरुराह-तेनापि कथकेन पूर्वं गुरूणां समीपे धर्म श्रुत एव तस्मात् क्रम एषः नोत्क्रम इति ।। अयं च धर्म उपायेनैव कथयितव्यो नानुपायेन। आह के दोषान अनुपायकथने ? उच्यते-

[भा.११३९] जइधम्मं अकहेत्ता, अनुदिविदं सम्म मंसविरइं वा।
अनुवासए कहिंते, चउजमला कालगा चउरो।

वृ- यः खलु मिथ्यादृष्टिरनुपासकस्तत्प्रथमतया धर्मश्रवणार्थमुपतिष्ठते तस्य यतिधर्मः कथयितव्यः। यदि यतिधर्ममकथयित्वा श्रावकसम्बन्धिनमणुधर्म कथयति तदा चत्वारो गुरवः तपसा कालन च द्वाभ्यामपि गुरुकाः। यदा यतिधर्मं प्रतिपत्तुं नोत्सहते तदा मूलोत्तरगुणभेदाद् द्विविधः श्राद्धधर्म कथनीयः, सम्यक्त्वमूलानि द्वादश व्रतानीत्यर्थः। यदि शाद्धधर्मकथयित्वा सम्यग्दर्शनमात्रं कथयति तदाऽपि चत्वारो गुरवः तपसा गुरवः काले लघवः। यदा श्राद्धधर्मं

Jain Education International For Private & Personal Use Only www.jainelibrary.org

ग्रहीतुं न शक्नोति तदा यदि सम्यग्दर्शनमनुपदिश्य मद्य-मांसविरतिं कथयति तदा चत्वारो गुरवः तपसा लघवः कालेन गुरवः । यदा सम्यग्दर्शनमप्यङ्गीकर्त्तुं न शक्यते तदा यदि मद्य-मांसविरतिमप्ररूप्यैहिकमामुष्मिकं वा तद्विरतिफलं कथयति तदाऽपि चत्वारो गुरवः तपसा कालेन च लघवः । "चउजमला कालगा चउरो" त्ति चत्वारि यमलानि तपः-कालयुगललक्षणानि येषु ते चतुर्यमलाः, चत्वारः कालकाश्चत्वारश्चतुर्गुरुका इत्यर्थः, आज्ञाभङ्गादयश्च दोषाः ॥ अपि च-

[भा.११४०] जीवा अब्भुट्ठिंता, अविहीकहणाइ रंजिया संता ।
अभिसंछूढा होंती, संसारमहन्नवं तेनं ॥

वृ- ते जीवाः प्रव्रज्यायामभ्युत्तिष्ठन्तोऽपि तदीयया अविधिकथनया रञ्जिताः सन्तश्चिन्तयन्ति- यदि श्रावकधर्मेणापि कामभोगान् भुञ्जानैः सुगतिरवाप्यते ततः किमनया सिकताकवलनिरास्वादया प्रव्रज्यया ? एवं यदि सम्यगदर्शनमात्रेणापि सुगतिरासाद्यते तर्हि को नामात्मानं वितिश्र ज्वलायां प्रक्षेप्स्यति ? इत्यादि; एवं ते विपरिणामिताः प्रव्रज्यामगृह्णन्तः षट् कायान् विराधयेयुः, अतः 'तेन' कथकेन संसारमहार्णवम् अभि-आभिमुख्येन प्रक्षिप्ता भवन्ति, चिरेण मुक्तिपदप्राप्तेः ॥

[भा.११४१] एसेव य नून कमो, वेरग्गगओ न रोयए तं च ।
दुहतो य निरनुकंपा, सुणि-पयस-तरच्छअड्डवमा ॥

वृ- ते जीवा इत्थं चिन्तयेयुः-नूनमेष एवात्र 'क्रमः' परिपाटि यत् पूर्वं श्रावकधर्मं स्पृष्ट्वा पश्चाद् यतिधर्मप्रतिपद्यते, अथवा पूर्वं सम्यग्दर्शनमात्रमुररीकृत्य ततो देशविरतिरुपादीयते, यद्वा मद्य-मांसविरतिं स्पृष्टवा पश्चात् सम्यकत्वं गृह्यते इति । स चारम्भबहुलतया गृहवासस्योपरि वैराग्यमुपगतः प्रव्रज्यां प्रतिपत्तुमायातः, स च धर्मकथी श्राद्धधर्मं प्ररूपयितुं लग्नः, तं चासौ वैराग्याधिरूढमानसत्वाद् न रोचयति, ततो विपरिणम्य तच्चन्निकादिषु गच्छेत् । ते चैवमविधिना धर्मं कथयन्तः 'द्विधाऽपि निरनुकम्पाः' षण्णां कायानां तस्य चोपर्यनुकम्पारहिताः । "सुणि"त्ति वीरशुनिकादृष्टान्तः-यथा सा वीरशूनिका पूर्वमासमालैः परिखेदिता पश्चात् सद्भूतमपि नेच्छति, एवमत्रापि पूर्वं श्राद्धधर्मे कथिते पश्चाद् यत्नतोऽभिधीयमानमपि श्रमणधर्ममसौ न प्रतिपद्यते । तथा "पयस" त्ति यथा कस्यापि प्राघूर्णकस्य पूर्वं वासितभक्तं दत्तं ततः स उदरपूरं तद् भुक्तवान्, पश्चाद् घृत-मधुसंयुक्तं पायसमपि दीयमानं तस्य न रोचते । "तरच्छअड्डवम" त्ति यथा तरक्षः-व्याघ्रविशेषः स पूर्वमस्थां घ्राणः पश्चादामिषमपि न रोचयति, एवमस्यापि श्रावकधर्मघ्राणस्य यतिधर्मो न प्रतिभासते । यत एते दोषा अतो विधिनैव कथनीयम् ॥ के पुनर्विधिकथने गुणाः ? उच्यते-

[भा.११४२] तित्थानुसज्जणाए, आयहियाए परं समुद्धरति ।
मग्गप्पभावणाए, जइधम्मकहा अओ पढमं ॥

वृ- यतिधर्मकथा प्रथमतः क्रियमाणा तीर्थस्यानुसजनायै भवति, बहूनां जन्तूनां प्रव्रज्याप्रतिपत्तेः । तीर्थानुषजना च कृता आत्महिताय जायते । परं च प्रव्रज्याप्रदानेन संसारसागरादसौ समुद्धरति । अत एव मार्गस्य-सम्यग्दर्शनादेः प्रभावनायै सा प्रभवति । यत एते गुणा अतो यतिधर्मकथा प्रथमं स्वरूपतो गुणतश्च कर्त्तव्या । तत्र स्वरूपतो यथा-"खंती य मद्दवऽज्जव,

Jain Education International For Private & Personal Use Only www.jainelibrary.org

मुत्ती०" इत्यादि। गुणतो यथा-

नो दुष्कर्मप्रयासो न कुयुवति-सुत-स्वामिदुर्वाक्यदुःखं,
राजादौ न प्रणामोऽशन-वसन-धन-स्थानचिन्ता न चैव।
ज्ञानाप्तिर्लोकपूजा प्रशमसुखरसः प्रेत्य मोक्षाद्यवाप्ति,
श्रामण्येऽमी गुणाः स्युस्तदिह सुमतयः किं न यत्नं कुरुध्वम्? ॥ इत्यादि।

यदा यतिधर्मभङ्गीकर्तुं न शक्नोति तदा सम्यक्त्वमूलः श्राद्धधर्म कथयितव्यः, यदा तमपि न प्रतिपद्यते तदा सम्यग्दर्शनम्, तस्याप्यप्रतिपत्तौ मद्य-मांसविरति। एवं चानुपासकस्य पुरतो धर्मकथायां विधिः। उपासकस्य तु यथास्वरुचि धर्मकथां करोतु, न कश्चिद्दोषः॥

गतं प्रव्रज्याद्वारम्। अथ शिक्षापदद्वारमाह-

[भा.११४३] पव्वइयस्स य सिक्खा, गयण्हाय सिलीपती य दिट्ठंतो।
तइयं च आउरम्मी, चउत्थगं अंधले थेरे॥

वृ- प्रव्रजितस्य च सतोऽस्य शिक्षा दातव्या। सा च द्विधा-ग्रहणशिक्षा आसेवनशिक्षा च। तत्र ग्रहणशिक्षा सूत्राध्ययनरूपा, आसेवनाशिक्षा प्रत्युपेक्षणादिका। तत्र कोऽपि प्रव्रजितः सन् आसेवनाशिक्षां सम्यगभ्यस्यति न पुनर्ग्रहणशिक्षाम्। तत्राचार्यै स्नातेन गजेन श्लीपदिना च दृष्टान्तः क्रियते, तृतीयं चोदाहरणमातुरविषयं चतुर्थमन्धस्थविरविषयं कर्त्तव्यमिति गाथासमासार्थः॥ अथ विस्तरार्थोऽभिधीयते-तत्रासौ गुरुभिरादिष्टः-सौम्य! गृहाण त्वमेनां ग्रहणशिक्षाम्, अधीष्व विधिवद् यथाक्रममाऽऽचारादिश्रुतम्। स प्राह-

[भा.११४४] पव्वइओऽहं समणो, निक्खित्तपरिग्गहो निरारंभो।
इति दिक्खियमेकमणो, धम्मधुराए दढो होमि॥

वृ- भदन्त! परव्रजितोऽहं 'श्रमणः' तपस्वी निक्षिप्तपरिग्रहो निरारम्भश्च सञ्जात इत्यतः 'दीक्षिते' दीक्षायां मकारोऽलाक्षणिकः एकाग्रमना 'धर्मधुरायां' धर्मचिन्तायां 'दृढः' निष्कम्पो भवामि॥ किञ्च-

[भा.११४५] समितीसु भावनासु य, गुत्ती-पडिलेह-विनयमाईसु।
लोगविरुद्धेसु य बहुविहेसु लोगुत्तरेसुं च॥

[भा.११४६] जुत्त विरयस्स सययं, संजमजोगेसु उज्जयमइस्स।
किं मज्झं पढिएणं, भण्णइ सुण ता इमे नाए॥

वृ- 'समितिषु' ईर्यादिषु 'भावनासु' द्वादशसु पञ्चविंशतिसङ्ख्याकासु वा 'गुप्तिषु' मनोगुप्तयादिषु प्रत्युपेक्षणायां प्रतीतायां 'विनये' अभ्युत्थानादिरूपे आदिशब्दाद् वैयावृत्यादिषु व्यापारेषु 'युक्तस्य' प्रयत्नवतः, तथा 'लोकविरुद्धेषु' जुगुप्सितकुलभिक्षाग्रहणादिषु 'बहुविधेषु' नानाप्रकारेषु 'लोकोत्तरविरुद्धेषु' नवनीत-चलितान्नग्रहणादिषु चशब्दाद् उभयविरुद्धेषु मद्यादिषु 'विरतस्य' प्रतिनिवृत्तस्य 'संयमयोगेषु च' आवश्यकव्यापारेषु उद्यतमतेः एवंविधस्य किं मम 'पठितेन' पाठेन कार्यम्? न किञ्चिदिति भावः। भण्यते गुरुभिरत्रोत्तरम्-वत्स! यदर्थं भवान् प्रव्रजितः स एवार्थो न सेत्स्यतीति। तथा चात्र शृणु तावदम् 'ज्ञाते' द्वे निदर्शने॥ ते एव यथाक्रममाह-

Jain Education International For Private & Personal Use Only www.jainelibrary.org

[भा.११४७]जह ण्हाउत्तिण्ण गओ, बहुअतरं रेणुयं छुभइ अंगे ।।
सुट्ठु वि उज्जमाणो, तह अन्नाणी मलं चिणइ ।।

वृ- यथा गजः सरो-नद्यादौ मलापनयनार्थं स्नात्वोत्तीर्ण सन् बहुतरां रेणुं करेण गृहीत्वा स्वकीयेऽङ्गे क्षिपति, तथास्वाभाव्यात्; तथा 'सुष्ठुपि' अतिशयेनापि 'उद्यच्छमानः' उद्यमं कुर्वाणः अज्ञानीजीवः 'मलं' कर्मरजोलक्षणं चिनोति । एवं त्वमपि कर्मलनिर्घातनार्थं प्रव्रजितः परं श्रुताध्ययनमन्तरेण प्रवचनविरुद्धानि समाचरन् प्रत्युत भूयस्तरेण कर्मरजसाऽऽत्मानं गुण्डयिष्यसि ।।

[भा.११४८] जं सिलिपई निदायति, तं लाएति चलणहि भूमीए ।
एवमसंजमपंके, चरणसइं लाइ अमुणिंतो ।।

वृ- तथा श्लीपदनाम्ना रोगेण यस्य पादौ शूनौ-शिलावद् महाप्रमाणौ भवतः स एवंविधः श्लीपदी यथा क्षेत्रं 'निदायति' निद्दिणतीत्यर्थः, स च यदल्पमात्रं सस्यं निदायति तद् भूयस्तरं 'चलनाभ्यां' पादाभ्यामाक्रम्य भूमौ लगयति मर्दयति च । एळं श्रुतपाठं ना ''अमुणंतो'' अजानन् नाभ्यां' पादाभ्यामाक्रम्य भूमौ लगयति मर्दयति च । एवं श्रुतपाठं विना ''अमुणंतो'' अजानन् ''चरणसयं''ति चरणसस्यम् 'असंयमपङ्के' पृथिव्याद्युपमर्दकर्दमे लगयति, लगयित्वा च सकलमपि मर्दयति ।। एवमाचार्यैरुक्ते' शिष्य आतुरदृष्टान्तमाह-

[भा.११४९] भणइ जहा रोगत्तो, पुच्छति वेज्जं न संधियं पढइ ।
इय कम्मामयवेज्जे, पुच्छिय तुज्झे करिस्सामि ।।

वृ- स शिष्यो भणति-भगवन् ! यथा रोगार्त्तःपुरुषो वैद्यमेव पृच्छति न पुनर्वैद्यकसंहितां पठति, एवमहमपि युष्मान् 'कर्मामयवैद्यान्' कर्मरोगचिकित्सकान् पृष्ट्वा सर्वामपि क्रियां करिष्यामि, न पुनः श्रुतं पठिष्यामीति ।। गुरुराह-

[भा.११५०]भण्णइ न सो सयं चिय, करेति किरियं अपुच्छिउं रोगी ।
नायव्वो अहिगारो, तुमं पि नाउं तहा कुणसु ।।

वृ- भण्यते अत्रोत्तरम्-यद्यपि नासौ रोगी वैद्यमपृष्टवा स्वयमेव क्रियां करोति तथाऽपि तस्य 'ज्ञातव्ये' क्रियायाः परिज्ञानेऽधिकारोऽस्ति यथा स वैद्यो भूयो भूयः प्रष्टव्यो न भवति । एवं यद्यपि त्वमस्मान् पृष्ट्वा सर्वामपि क्रियां करिष्यसि तथापि सूत्रमधीत्य षट्कायरक्षणविधिं जानीहि, ज्ञात्वा च तथा कुरु यथा बहुशः प्रष्टव्यं न भवति ।। शिष्यः प्रतिभणति-

[भा.११५१] दूरे तस्स तिगिच्छी, आउरपुच्छा उ जुज्जए तेनं ।
सारेहिंति सहीणा, गुरुमादि जतो नऽहिज्जामि ।।

वृ- 'तस्य' आतुरस्य 'दूरे' दूरवर्ती सः 'चिकित्सी' वैद्यः अत आतुरस्य क्रियाया अपरिज्ञाने वैद्यान्तिके पृच्छा युज्यते, मम पुनर्गुरव आदिशब्दाद् उपाध्यायादयः स्वाधीना एव, अतो ज्ञास्यन्ति ते भगवन्तः स्वयमेव मदीयं स्खलितम्, ज्ञात्वा च सम्यग् मां सारयिष्यन्ति, यत एवमत एवाहं 'नाधीये' न पठामीति ।। सूरिराह-

[भा.११५२] आगाढकारमेहिं, गुरुमादी ते जया न होहिंति ।
तइया कहं नु काहिसि, जहा व सो अंधलो थेरो ।।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

वृ- आगाढैः कुलादिभिः कारणैर्यदा 'ते' गुर्वादयस्तव स्वाधीना न भविष्यन्ति तदा कथं नाम त्वं करिष्यसि ? यथा वाऽसावन्धः स्थविरः ।। तथाहि-

[भा.११५३] अट्ठ सुय थेर अंधल्लगत्तणं अत्थि मे बहू अच्छी ।
अप्पद्दण्ण पलित्ते, डहणं अपसत्थग पसत्थे ।।

वृ- उज्जेनी नाम नगरी । तत्थ सोमिलो नाम बंभणो परिवसइ, सो य अंधलीभूओ । तस्स य अट्ठ पुत्ता, तेसिं अट्ठ भज्जाओ । सो पुत्तेहिं भन्नति-अच्छीणं किरिया कीरउ । सो पडिभणइ-तुब्भ अट्ठण्हं पुत्ताणं सोलस अच्छीणि, सुण्हाण वि सोलस, बंभणीए दोन्नि, एते चउत्तीसं, अन्नस्स य परियणस्स जाणि अच्छीणि तानि सव्वाणि मम, एते चेव पभूया । अन्नया घरं पलित्तं। तत्थ तेहिं अप्पद्दन्नेहिं सो न चतिओ नीणिउं तत्थेव रडंतो दड्ढो । एस अपसत्थो दिट्ठंतो । मा एवं डज्झिहिसि संसारे असुभकम्मेहिं ।। इमो पसत्थो-तत्थेव अंधलयथेरो । नवरं तेन कारिया किरिया। सो मणुस्साणं भोगाणं आभागी जाओ । एवं तुमं पि पढित्ता कज्जाकज्जं वयाणित्ता संसारातो नित्थरिहिसि ।।

अथ गाथाक्षरार्थः-सोमिलस्थविरस्याष्टौ सुताः । परं तस्यान्धवं बभूव । गाथायामन्ध शब्दाद् "विद्युत्पत्रपीतान्धाल्लः" प्राकृते स्वार्थिको लप्रत्ययः । स च पुत्रैश्चक्षुश्चिकित्साकारणार्थमुक्तः सन् वक्ति-सन्ति मे पुत्रादीनां बहून्यक्षीणि, तैरेव मदीयं कार्यं सेत्स्यति । अन्यदा च गृहे प्रदीपनकं लग्नं ततस्ते पुत्रादयः "अप्पद्दन्न" त्ति आत्मरक्षणपरास्त्वरितं प्रणष्टाः । स्थविरान्धस्य प्रतीप्ते गृहे दहनम् । एषोऽप्रशस्तो दृष्टान्तः । प्रशस्तस्तु विपरीतः, स चोपदर्शित एव । उपनययोजनाऽपि कृतैवेति ।। इत्थमप्युक्तोऽसी न प्रतिपद्यते श्रुताध्ययनम्, अतो भूयोऽपि करुणापरीतचेतसः सूरयः प्राहुः-

[भा.११५४] मा एवमसग्गाहं, गिण्हसु गिण्हसु सुयं तइयचक्खुं ।
किं वा तुमेऽनिलसुतो, न स्सुयपुव्वो जवो राया ।।

वृ- सौम्य ! मैवमसद्ग्राहं गृहाण, गृहाण सूक्ष्म-व्यवहितादिष्वतीन्द्रियार्थेषु तृतीयचक्षुकल्पं श्रुतम् । किं वा त्वया न श्रुतपूर्वोऽनिलनरेन्द्रसुतो यवो राजा ? ।। कः पूनर्यवः ? इत्याह-

[भा.११५५] जव राय दीहपट्ठो, सचिवो पुत्तो य गद्दभो तस्स ।
धूता अडोलिया गद्दभेण छूढा य अगडम्मि ।।

वृ- यवो नाम राजा । तस्य दीर्घपृष्ठ सचिवः । गर्दभश्च पुत्रः । दुहिता अडोलिका । सा च गर्दभेण तीव्ररागाध्युपपन्नेन 'अगडे' भूमिगृहे विषयसेवार्थं क्षिप्ता ।। तच्च ज्ञात्वा वैराग्योत्तरङ्गितमनसो नरेन्द्रस्य प्रव्रजनम् । पुत्रस्नेहाच्च तस्योज्जयिन्यां पुनः पुनरागमनम् । अन्यदा च चेटरूपाणामडोलिकया क्रीडनं खरस्य च यवप्रार्थम् । ततश्चोपाश्रयः पुरुषः-कुम्भकारस्तस्य शालायामित्यक्षरार्थः ।। भावार्थ पुनरयम्-

[भा.११५६] पव्वयणं च नरिंदे, पुनरागमऽहोलिखेलणं चेडा ।।
जवपत्थणं खरस्सा, उवस्सओ फरुससालाए ।।

वृ- उज्जेनी नगरी । तत्थ अनिलसुओ जवो नाम राया । तस्स पुत्तो गद्दभो नाम जुवराया। तस्स धूया गद्दभस्स जुवरन्नो भइणी अडोलिया णाम, सा य अतीवरूववती । तस्स य जुवरन्नो

Jain Education International For Private & Personal Use Only www.jainelibrary.org

दीहपट्ठो अमच्चो। ताहे सो जुवराया तं अडोलियं भगिनिं पासित्ता अज्झोवन्नो दुब्बलीभवति। अमच्चेण पुच्छिओ। निब्बंधे सिट्ठं। अमच्चेण भन्नति-सागारियं भविस्सति तो एसा भूमिधरे छुब्भति, तत्थ भुंजाहि ताए समं भोए, लोगो जाणिस्सति 'सा कहिं पि विनट्ठा'। 'एवं होउ' त्ति कयं। अन्नया सो राया तं कज्जं नाउं निव्वेदेण पव्वतिओ। गद्दभो राया जातो। सो य जवो नेच्छति पढिउं, पुत्तनेहेण य पुणो पुणो उज्जेनिं एति। अन्नया सो उज्जेनीए अदूरसामंते जवखेत्तं, तस्स समीवे वीसमति। तं च जवखेत्तं एगो खेत्तपालओ रक्खति। इओ य एगो गद्दभो तं जवखेत्तं चरिउं इच्छति ताहे तेन खेत्तपालएण सो गद्दभो भन्नति-

[भा.११५७] आधावसी पधावसी, ममं वा वि निरिक्खसी।
लक्खिओ ते मया भावो, जवं पत्थेसि गद्दभा ! ॥

वृ- अयं भाष्यान्तर्गतः श्लोकः कथानकसमाप्त्यनन्तरं व्याख्यास्यते, एममुत्तरावपि श्लोकौ। तेन साहुणा सो सिलोगो गहिओ। तत्थ य चेडरूवाणि रमंति अडोलियाए, उंदोइयाए त्ति भणियं होइ। सा य तेसिं रमंताणं अडोलिया नट्ठा बिले पडिया। पच्छा ताणि चेडरूवाणि इओ इओ य मग्गंति तं अडोलियं, न पासंति। पच्छा एगेण चेडरूवेण तं बिलं पासित्ता नायं-जा एत्थ न दीसति सा नूनं एयम्मि बिलम्मि पडिया। ताहे तेनं भन्नति-

[भा.११५८] इओ गया इओ गया, मग्गज्जंती न दीसति।
अहमेयं वियाणामि, अगडे छूढा अडोलिया ॥

वृ- सो वि नेनं सिलोगो पढिओ। पच्छा तेन साहुणा उज्जेनिं पविसित्ता कुंभकारसालाए उवस्सओ गहिओ। सो य दीहपट्ठो अमच्चो तेणं जवसाहुणा रायत्ते विराहिओ। ताहे अमच्चो चिंतेति-'कहं एयस्स वेरं निज्जाएमि ?' त्ति काउं गद्दभरायं भणति-एस परीसहपरातिओ आगओ रज्जं पेल्लेउकामो, जति न पत्तियसि पेच्छह से उवस्सए आउहाणि। तेन य अमच्चेण पुव्वं चेव तानि आउहाणि तम्मि उवस्सए नूमियाणि पत्तियावणनिमित्तं। रन्ना दिट्ठाणि। पत्तिज्जिओ। तीए अ कुंभकारसालाए उंदुरो ढुक्किउं ढुक्किउं ओसरति भएणं। ताहे तेनं कुंभकारेणं भन्नति-

[भा.११५९] सुकुमालग ! भद्दलया !, रत्तिं हिंडनसीलया !।
भयं ते नत्थि मंमूला, दहपट्ठाओ ते भयं ॥

वृ- सो वि नेन सिलोगो गहिओ। ताहे सो राया तं पियरं मारेउकामो रहं मग्गइ। 'पगासे उड्डाहो होहिं' त्ति काउं अमच्चेण समं रत्तिं फरुससालं अल्लीणो अच्छति। तत्थ तेन साहुणा पढिओ पढमो सिलोगो-

आधावसी पधावसी, ममं वा वि निरिक्खसी।
लक्खिओ ते मया भावो, जवं पत्थेसि गद्दभा ! ॥

— रन्ना नायं-वेतिया मो, धुवं अतिसेसी एस साधू। तओ बितिओ पढिओ—

इओ गता इओ गता, मग्गिज्जंती दीसई।
अहमेयं विजाणामि, अगडे छूढा अडोलिया ॥

— तं पि नेनं परिगयं, जहा-नातयं एतेण। तओ ततिओ पढिओ —

सुकुमालग ! भद्दलया !, रत्तिं हिंडनसीलगा !।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

भयं ते नत्थि मंमूला, दीहपट्ठाओ ते भयं ॥

ताहे जाणति-एस अमच्चो ममं चेव मारेउकामो, कओ ममं पिता राता होउं संते भोए परिच्चइत्ता पुनो ते चेव पत्थेति ?, एस अमच्चो मं मारेउकामो एवं जत्तं करेइ। ताहे राया अमच्चस्स सीसं छेत्तुं साहुस्स उवगंतुं सव्वं कहेइ खामेइ य ॥ अथ श्लोकत्रयस्याक्षरार्थ-आ-ईषद् आभिमुख्येन वा धावसि आधावसि, प्रकर्षेण पृष्ठतो वा धावसि प्रधावसि, मामपि न निरीक्षसे, लक्षितस्ते मया 'भावः' अभिप्रायो यथा 'यवं' यवधान्यं चरितुं प्रार्थयसि भो गर्दभ ! । द्वितीयपक्षे यवनामानं राजानं मारयितुं भो गर्दभनृपते ! प्रार्थयसीति प्रथमश्लोकः ॥

इतो गता इतो गता, मृग्यमाणा न दृश्यते, अहमेतद् विजानामि 'अगडे' भूमिगृहे गर्त्तायां वा क्षिप्ता 'अडोलिका' उन्दोयिका नृपतिदुहिता वा । द्वितीयश्लोकः ॥

मूषकस्य राज्ञश्च शरीरसौकुमार्यभावात् सुकुमारक ! इत्यामन्त्रणम्, "भद्दलग" त्ति भद्राकृते !, रात्रौ हिण्डनशील ! मूषकस्य दिवा मानुषावलोकनचकिततया राज्ञस्तु वीरचर्यया रात्रौ पर्यटनशीलत्वात्, भयं 'ते' तव नास्ति 'मन्मूलात्' मन्निमित्तात् किन्तु 'दीर्घपृष्ठात्' एकत्र सर्पात् अपरत्र तु अमात्यात् 'ते' तव भयमिति तृतीयश्लोकः ॥ततः स राजर्षिश्चिन्तयति-

[भा.११६०] सिक्खियव्वं मनूसेणं, अवि जारिसतारिसं ।
पेच्छ मुद्धसिलोगेहिं, जीवियं परिरक्खियं ॥

वृ- शिक्षितव्यं मनुष्येण अपि यादृशतादृशम्, पश्य मुग्धैरपि श्लोकैर्जीवितं परिरक्षितम् ॥ तथा-

[भा.११६१] पुव्वविराहियसचिवे, सामच्छण रत्ति आगमो गुणणा ।
नाओ मि सचिवघायण, खामण गमणं गुरुसगासे ॥

वृ- पूर्वं विराधितो यः सचिवस्तस्य राज्ञा सह 'सामच्छणं' पर्यालोचनम् । ततस्तयो रात्रौ तत्रागमः । तस्य च राजर्षेस्तदानीं पूर्वपठितश्लोकत्रयस्य गुणना । ततः 'ज्ञानोऽस्म्यहम्, नूनमतिशयज्ञानी मदीयः पिता, कुतो वा एष महात्मा पटप्रान्तलग्नतृणवद् लीलयैव राज्यं परित्यज्य भूयस्तदङ्गीकारं कुरुते ? तदेष सर्वोऽप्यस्यैवाऽमात्यस्य कूटरचनाप्रपञ्चः' इति परिभाव्य सचिवघातनं कृत्वा स्वपितुः क्षामणं कृतवान् । ततस्तस्य राजर्षे 'अहो ! ते भगवन्तो मामनेकशो भणन्ति स्म-आर्य ! अधीष्वाधीष्व सूत्रम्, परमहमात्मवैरिकतया नापाठिषम्, यदि नाम ईदृशानामपि मुग्धश्लोकानां पठितानामीदृशं फलमाविरभूत् किं पुनः सर्वज्ञोपज्ञश्रुतस्य भविष्यति ?' इति विचिन्त्य गुरुसकाशे गमनम् । ततो मिथ्यादुष्कृतं दत्त्वा सम्यक् पठितुं लग्न इति ॥

किञ्च श्रुताध्ययनेऽभी अभ्यधिका गुणाः-

[भा.११६२] आयहिय परिण्णा भावसंवरो नवनवो अ संवेगो ।
निक्कंपया तवो निज्जरा य परदेसियत्तं च ॥

वृ- आत्महितं १ परिज्ञा २ भावसंवरः ३ नवनवश्च संवेगः ४ निष्कम्पता ५ तपः ६ निर्जरा च परदेशिकत्वं च ८ इति द्वारगाथासमासार्थ ॥ अथ विस्तरार्थमाह-

[भा.११६३] आयहियमजाणंतो, मुज्झति मूढो समादिअति कम्मं ।
कम्मेण तेन जंतू, परीति भवसागरमनंतं ॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

वृ-अनधीतश्रुतः सन् आत्मनो हितम्-इह-परलोकपथ्यमजानन् मुह्यति, हितेऽप्यहितबुद्धिम् अहितेऽपि हितबुद्धिं करोतीति भावः । मूढश्च 'कर्म' ज्ञानावरणीयादिकं निबिडतरं समादत्ते । तेन च कर्मणा जन्तुः 'पर्येति' परिभ्रमत भवसागरमनन्तम् ॥

अथात्महिते परिज्ञाते को गुणः ? इत्याह-

[भा.११६४]आयहियं जाणंतो, अहियनिवित्तीए हियपवित्तीए ।
हवइ जतो सो तम्हा, आयहियं आगमेयव्वं ॥

वृ- आत्महितं जानानः अहिताद्-आत्म-संयम-प्रवचनोपघातकाद् निवृत्तौ हिते-संयमाद्युपकारिणि प्रवृत्तौ यतः प्रयत्नवानसौ भवति, तस्माद् आत्महितम् 'आगमयितव्यम्' आगमनं आगमः-परिज्ञानं तद्गोचरमानेतव्यमिति ॥ गतमात्महितद्वारम् । अथ परिज्ञाद्वारमाह-

[भा.११६५] सज्झायं जाणंतो, पंचिंदियसंवुडो तिगुत्तो य ।
होइ य एक्कग्गमणो, विनएण समाहिओ साहू ॥

वृ- 'स्वाध्यायं' श्रुतं जानानः साधुः पञ्चस्विन्द्रियेषु इष्टा-ऽनिष्टविषयराग-द्वेषपरिहारेण संवृतः पञ्चेन्द्रियसंवृतः, त्रिषु-मनोवाक्काययोगेषु गुप्तस्त्रिगुप्तः, भवति च 'एकाग्रमनाः' शुभध्यानैकमानसः 'विनयेन' गुर्वादिषु शिरोनमना-ऽञ्जलिबन्धादिलक्षणेन 'समाहितः' सम्यगुपयुक्त इति । अत्र च "सज्झायं जाणंतो" इत्यनेन ज्ञपरिज्ञा "पंचिंदियसंवुडो" इत्यादिना तु प्रत्याख्यानपरिज्ञाऽभिहितेति द्रष्टव्यम् ॥ गतं परिज्ञाद्वारम् । अथ भावसंवरमाह-

[भा.११६६] नाणेण स्वभावा, नज्जंते जे जहिं जिनक्खाया ।
नाणी चरित्तगुत्तो, भावेण उ संवरो होइ ॥

वृ- ज्ञाने सर्वेऽपि-अशेषा हिता-हितरूपा भावा ज्ञायन्ते ये यत्रोपयोगिनो जिनैराख्याताः । अत एव ज्ञानी चारित्रगुप्तः 'भावेन' तत्त्ववृत्या संवरो भवति । गुण-गुणिनोरभेदविवक्षणादेवं निर्देशः ॥ अ "नवनवो य संवेगो" इति व्याख्यानयन्नाह-

[भा.११६७]जह जह सुयभोगाहइ, अइसयरसपसरसंजुयमपुव्वं ।
तह तह पल्हाइ मुणी, नवनवसंवेगसद्धाओ ॥

वृ- यथा यथा 'श्रुतम्' आगममपूर्वमवगाहते, कथम्भूतम् ? 'अतिशयरसप्रसरसंयुतम्' अतिशयाः-अर्थविशेषास्तेषु यो रसः-श्रोतृणाक्षेपकारी गुणविशेषस्तस्य यः प्रसरःअतिरेकस्तेन संयुतं-युक्तम् । यद्वा श्रवणं श्रुतम्, तत् कथम्भूतम् ? अतिशयस्य-अर्थस्य रसः-आस्वादनं तत्र यः प्रसरः-गमनं तेन संयुतम् । अपूर्वं यथा यथाऽवगाहते तथा तथा मुनि 'प्रह्लादते' शुभभावसुखासिकया मोदते । कथम्भूतः ? इत्याह-नवनवः-अपूर्वापूर्वो यः संवेगः-वैराग्यं तद्गर्भा श्रद्धा-मुक्तिमार्गाभिलाषलक्षणा यस्य स नवनसंवेगश्रद्धाक इति ॥

गतं नवनवसंवेगद्वारम् । अथ निष्कम्पताद्वारमाह-

[भा.११६८] नाणाणत्तीए पुणो, दंसणतवनियमसंजमे ठिच्चा ।
विहरइ विसुज्झमाणो, जावज्जीवं पि निक्कंपो ॥

वृ- ज्ञानस्य या आज्ञप्ति-आदेशः "जाए सद्धाए निक्खंतो तमेवमणुपालए" इत्यादिकस्तया दर्शनप्रधाने तपोनियमरूपे संयमे स्थित्वा कर्ममलेन विशुध्यमानः सन् यावज्जीवमपि 'निष्कम्पः'

Jain Education International For Private & Personal Use Only www.jainelibrary.org

स्थिरचित्तवृत्ति 'विहरति' संयमाध्वनि गच्छतीति ॥ गतं निष्कम्पताद्वारम् । अथ तपोद्वारमाह-

[भा.११६९] बारसविहम्मि वि तवे, सब्भिंतरबाहिरे कुसलदिट्ठे ।
न वि अत्थि न वि अ होही, सज्झायसमं तवोकम्मं ॥

वृ- द्वादशविधेऽपि तपसि 'साभ्यन्तरबाह्ये' सहाऽऽभ्यन्तरेण यद् बाह्यं तत् साभ्यन्तरबाह्यम्। तत्राभ्यन्तरं तपः षोढा-

प्रायश्चित्त-ध्याने, वैयावृत्य-विनयावथोत्सर्गः ।
स्वाध्याय इति तपः षट्प्रकारमाभ्यन्तरं भवति ॥

बाह्यमपि षोढा-

अनशनमूनोदरता, वृत्ते सङ्क्षपणं रसत्यागः ।
कायक्लेशः संलीनतेति बाह्यं तपः प्रोक्ताम् ॥

तथा कुशाः-द्रव्यतो दर्भादयो भावतः कर्माणि तान् कर्मरूपान् कुशान् लुनन्ति-समूलानुत्पाटयन्तीति कुशलाः, "पृषोदरादयः" इति रूपनिष्पत्ति, तीर्थकरा इत्यर्थः, तैर्दृष्टे-कर्मक्षपणकारणतया केवलदृष्ट्या वीक्षिते, परं वाचनादिरूपो यः स्वाध्यायस्तत्समं-तत्तुल्यं तपःकर्म नास्ति नापि भविष्यति चशब्दाद् न चाभूत्, प्रभूततरकर्मक्षपणहेतुत्वादिति ॥

गतं तपोद्वारम् । अथ निर्जराद्वारमाह-

[भा.११७०] जं अन्नाणी कम्मं, खवेइ बहुयाहि वासकोडीहिं ।
तं नाणी तिहि गुत्तो, खवेइ ऊसासमेत्तेण ॥

वृ-यद् अज्ञानी जीवो नैरयिकादिभवेषु वर्त्तमानो बह्वीभिर्वर्षकोटीभि कर्म क्षपयति 'तत्' कर्म ज्ञानी 'त्रिषु' मनोवाक्कायेषु गुप्तः सन् उच्छ्वासमात्रेणापि कालेन क्षपयति ॥

गतं निर्जराद्वारम् । अथ परदेशकत्वद्वारमाह-

[भा.११७१] आय-परसमुत्तारो, आणा वच्छल्ल दीवणा भत्ती ।
होति परदेसियत्ते, अव्वोच्छित्ती य तित्थस्स ॥

वृ-पठितः सन् परेषां देशकत्वं-मार्गदिशित्वं करोति, तस्मिन् आत्मनः परस्य च समुत्तारो भवति । तथाहि-स साधुरधीतश्रुतः सन् अपरान् साधून् अध्यापयन् आत्मनो ज्ञानावरणीयं कर्म उपहन्ति, ते च साधवो ज्ञानोपदेशेनाऽचिरादेवापारसंसारमहोदधेरुत्तरन्ति । एवं च कुर्वता तीर्थकृतामाज्ञा अध्याप्यमानसाधूनां च वात्सल्यं तथा दीपना-प्रभावना भक्तिश्च पारमेश्वरप्रवचनस्य एतानि कृतानि भवन्ति, तीर्थस्य चाऽव्यच्छित्तिरासूत्रिता भवति । एते गुणाः परदेशकत्वे भवन्तीति॥ गतं परदेशकत्वद्वारम् । ततश्चावसिता "आयहिय"इत्यादि द्वारगाथा ।

अथ प्रकृतयोजनां कुर्वन्नाह-

[भा.११७२]जिनकप्पिएण पगयं, जिणकाले सो उ केवलीणं वा ।
सो भणइ एव भणितो, कत्थ अहीयं भयंतेहिं ॥

वृ- अत्र जिनकल्पिकेन प्रकृतम् । 'स तु' जिनकल्पिको नियमाद् जिनस्य-तीर्थकरस्य काले वा स्याद् अपरेषां वा गणधरादीनां केवलिनां काले । ततः 'सः' शिष्यः 'एवं' हेतु-दृष्टान्तैः 'भणितः' प्रज्ञापितो भणति-भगवन्! यद्येवं ततः पठाम्यहम् परमाचक्षतां पूज्यां-कुत्र 'भदन्तैः'

Jain Education International For Private & Personal Use Only www.jainelibrary.org

भगवद्भिरधीतं यस्मादसौ शिष्यो जिनकल्पिको भविष्यति स च जिनकाले वा भवेत् केवलिकाले वा ? ॥ अतः स आचार्य प्रतिब्रूयात्-

[भा.११७३] अंतरमनंतरे वा, इति उदिए धूलिनायमाहंसु ।
चिक्खल्लेण य नायं, तम्हा उ वयामि जिनमूलं ॥

वृ- अन्तरं-परम्परकेण मयाऽधीतम् अनन्तरं वा । तत्र यदि स आचार्यो गणधरशिष्यस्त-स्याप्याराद्धा ततः 'परम्परकेणाधीतम्' इत्यभिदध्यात् । अथासौ गणधर एव ततः 'अनन्तरं जिनसकाश एव मयाऽधीतम्' इति ब्रूयात् । 'इति' एवम् 'उदिते' आचार्येणाऽभिहिते स शिष्यो धूलिज्ञातं चिक्खलज्ञातं चाख्यातवान्-यथा धूलिरेकत्र स्थापयित्वा तत उद्धृ त्यान्यत्र यत्रास्तीर्यते तत्रावश्यं किञ्चित् परिशटति, ततोऽप्यन्यत्र प्रस्तीर्यमाणा भूयस्तरा परिशटति; यथा वा प्रासादे लिप्यमाने मनुष्यपरम्परया चिक्खल्लः प्रत्यर्प्यमाणो बहुपरिशटितः स्तोकमात्रावशेष एव सर्वान्तिममनुष्यस्य हस्तं प्राप्नोति; एवमेतावपि सूत्रार्थौ परम्परया गृह्यमाणौ परिशटत-, तस्मात्तु 'जिनमूलं' तीर्थकरोपकण्ठमेव व्रजामि, तत्राविनष्टमेव सूत्रं भविष्यतीति ॥ कैः पुनस्तत् परिशटति? इत्याह-

[भा.११७४] पय-पाय-मक्खरेहिं, मत्ता-घोसेहिं वा वि परिहीनं ।
अवि य रवि-राय-हत्थी, पगास सेवा पया चेव ॥

वृ- पदैः पादैरक्षरैर्मात्रया घोषैर्वा अपिशब्दाद् बिन्दुना वा परिहीणं भवति परम्परया अधीयमानं श्रुतमिति प्रक्रमः । 'अपि च' इत्यभ्युच्चये, भगवतः समीपे अधीयमानानां कारणान्त-रमप्यस्तीति भावः । किं यादृशो रवेः-आदित्यस्य प्रकाशः ईदृशः किं स्वद्योतादीनां सम्भवी ? यादृशं वा राज्ञः सेवा विधीयमाना फलमुपढौकयति ईदृशं किममात्यादीनां सेवा सम्पादयति ? यादृशानि वा महान्ति हस्तिनः पदानि ईदृशानि किं कुन्थूनां सम्भवन्ति ? एवं यादृशानि महार्थानि भगवतस्तीर्थकृतो वचनानि ईदृशान्यपरेषां किं कदाचिद् भवन्ति ? इत्यतस्तीर्थकरोपकण्ठमेव व्रजामि ॥ इत्थं शिष्येणोक्ते सूरिराह-

[भा.११७५] कोट्ठाइबुद्धिणो अत्थिं संपयं एरिसाणि मा जंप ।
अवि य तहिं वाउलणा, विरयाण वि कोगाईहिं ॥

वृ- यथा कोष्ठके धान्यं प्रक्षिप्तं तदवस्थमेव चिरमप्यवतिष्ठते न किमपि कालान्तरेऽपि गलति, एवं येषु सूत्रा-ऽर्थौ निक्षिप्तौ दवस्थावेव चिरमप्यवतिष्ठेते ते कोष्ठबुद्धयः । आदिशब्दात् पदानुसारिबुद्धयो बीजबुद्धयश्च गृह्यन्ते । तत्र ये गुरुमुखादेकसूत्रपदमनुसृत्य शेषमश्रुतमपि भूयस्तरं पदनिकुरम्बमवगाहन्ते ते पदानुसारिबुद्धयः, ये त्वेकं बीजभूतमर्थपदमनुसृत्य शेष-मवितथमेव प्रभूततरमर्थपदनिवहमवगाहन्ते ते बीजबुद्धयः, एवंविधाः कोष्ठादिबुद्धयः साम्प्रतमपि सन्ति येषु सूत्रार्थौ न परिशटत इति भावः । तद् ईदृशानि धूलिज्ञातादीनि 'मा जल्प' मा ब्रूहि । अपि च 'तत्र' भगवतः समीपे अधीयमानानां 'विरतानामपि' साधूनामपि कौतुकादिभिः 'व्याकुलना' व्याकुलीकरणं भवति, सकलस्यापि लोकस्यकौतुकहेतुत्वात् । कौतुकं-समवसरणम्, आदिग्रहणेन भगवतो धर्मदेशनाश्रवणादिपरिग्रहः ॥ अथ किमिदं समवसरणम् ? इति तद्वक्तव्यतां प्रतिपि-पादयिषुर्द्वारगाथामाह-

Jain Education International For Private & Personal Use Only www.jainelibrary.org

[भा.११७६]समोसरणे केवइया, रूव पुच्छ वागरण सोयपरिणामे।
दानं च देवमल्ले, मल्लाणयणे उवरि तित्थं ॥

वृ-समवसरणविषयो विधिर्वक्तव्यः। "केवइय" त्ति कियतो भूभागाद् अपूर्वसमसरणे अदृष्टरूपतया भगवतः प्रयोजनम्? इति पृच्छा प्रतिवचनं च वाच्यम्। "वागरणं" ति व्याकरणं भगवतो वक्तव्यम्, यथा युगपदेव सङ्ख्यातीतानामपि पृच्छतां व्याकरोति। तथा श्रोतृषु परिणामः श्रोतृपरिणामः स वक्तव्यः, तथा भागवती वाणी सर्वेषां स्वस्वभाषया परिणमते। वृत्तिदानं प्रीतिदानं वा कियत् प्रयच्छन्ति चक्रवर्त्तादयस्तीर्थकरप्रवृत्तिनिवेदकेभ्यः?। तथा 'देवमाल्यं' बलि, देवा अपि तत्र गन्धादि प्रक्षिपन्तीति कृत्वा तत् कः कथङ्कारं करोति? इति। "मल्लाणयणे"त्ति तस्य च माल्यस्यानयने यो विधि। "उवरि तित्थं"ति उपरि प्रथमपौरुष्यां व्यतीतायां 'तीर्थं' प्रथमगणधरो धर्मदेशनां करोति। तदेतत् सर्वमभिधातव्यमिति द्वारगाथासङ्क्षेपार्थः॥

अथैनामेव प्रतिद्वारं विवरीषुराह-

[भा.११७७] जत्थ अपुव्वोसरणं, जत्थ व देसो महिड्ढिओ एइ।
वाउदय पुप्फ वद्दल, पागारतियं च अभिओगा॥

वृ-'यत्र' क्षेत्रे समवसरणम् 'अपूर्वम्'-अवृत्तपूर्वं यत्र वा भूतपूर्वसमवसरमेऽपि देवो महर्द्धिको वन्दितुम् 'एति' आगच्छति तत्र नियमतः समवसरणं भवतीति वाक्यशेषः, अर्थादापन्नम् अन्यत्र न नियम इति। तच्च कथं कुर्वन्ति? इत्याह-"वाउदय" इत्यादि। शक्रादेः सम्बन्धिन आभियोग्या देवाः स्वस्वामिनो नियोगाद् भगता समवसरिष्यमाणां भुवमागम्य योजनपरिमण्डलं संवर्त्तकवातं विकुर्वन्ति, तेन च सर्वतः प्रसर्पता रेणु-तृण-काष्ठादिकः कचवरनिकरः सर्वोऽपि बहि क्षिप्यते, ततो भाविरेणुसन्तापोपशान्तये उदकवर्दलं विकुर्व्य तेन सुरभिगन्धोदकवर्षं कुर्वन्ति, ततः पुष्पवर्दलं विकुर्व्य जानुदघ्नीमधोनिक्षिप्तवृन्तां पुष्पवृष्टिं निसृजन्ति, ततश्चामी प्राकारत्रयं कुर्वन्ति॥ कथम्? इत्याह-

[भा.११७८]अब्भिंतर-मज्झ-बहिं, विमाण-जोइ-भवणाहिवकयाओ।
पायारा तिन्नि भवे, रयणे कणगे रयए य॥

वृ-आभ्यन्तर-मध्यम-बाह्या यथाक्रमं विमान-ज्योति-र्भवनाधिपकृताः प्रकारास्त्रयो भवन्ति तत्राभ्यन्तरः प्राकारो रत्नेर्निवृत्तः 'रात्नः'-रत्नमयः, तं विमानाधिपतयः कुर्वन्ति। मध्यमः प्राकारः 'कानकः' कनकमयः, तं ज्योतिष्का देवाः कुर्वन्ति। बाह्यः प्राकारः 'राजतः' रूप्यमयः, तं भवनाधिपतयः कुर्वन्तीति॥

[भा.११७९]मणि-रयण-हेमया वि य, कविसीसा सव्वरयणिया दारा।
सव्वरयणामय च्चिय, पडाग-झय-तोरणा चित्ता॥

वृ-आभ्यन्तरप्राकारस्य मणिमयानि कपिशीर्षकाणि, मध्यमप्रकारस्य रत्नमयानि। अथ मणीनां रत्नानां च कः प्रतिविशेषः? उच्यते-चन्द्रकान्तादयो मणयः, इन्द्रनीलादीनि रत्नानि; अथवा स्थलसमुद्भवा मणयः, जलसमुद्भवानि रत्नान्युच्यन्ते। बाह्यप्राकारस्य हेममयानि-जात्यसुवर्णमयानि कपिशीर्षकाणि। एतानि च यथाक्रमं वैमानिक-ज्योतिष्क-भवनपतयः स्वस्वप्राकारेषु कुर्वन्ति। प्राकारत्रयेऽपि प्रत्येकं सर्वरत्नमयानि चत्वारि चत्वारि द्वाराणि, तथा

Jain Education International For Private & Personal Use Only www.jainelibrary.org

सर्वरत्नमयान्येव पताका-ध्वजप्रधानानि तोरणानि भवन्ति। कथम्भूतानि? 'चित्राणि' चन्दनकलश-स्वस्तिक-मुक्तादामादिभिरनेकरूपाणि आश्चर्यकारीणि वा॥ व्यन्तरकृत्यमाह-

[भा.११८०] चेइदुम पेढ छंदग, आसण छत्तं च चामराओ य।
जं चऽन्नं करणिज्जं, करिंति तं वाणमंतरिया॥

वृ- 'चैत्यद्रुमम्' अशोकवृक्षम्यन्तरप्राकारस्य बहुमध्यदेशभागे भगवतः प्रमाणाद् द्वादशगुणसमुच्छ्रयम्। तस्याधस्तात् पीठं सर्वरत्नमयम्। तस्यापि पीठस्योपरि चैत्यवृक्षस्याधस्ताद् देवच्छन्दकम्। तस्य देवच्छन्दकस्याभ्यन्तरे सिंहासनम्। तस्योपरि च्छत्रातिच्छत्रम्। 'चः' समुच्चये। उभयापार्श्वतश्चामरे यक्षहस्तगत। चशब्दाद् भगवतः पुरतो धर्मचक्रं पद्मप्रतिष्ठितम्। यच्च 'अन्यद्' वातोदकादिकं 'करणीयं' कर्त्तव्यं कुर्वन्ति तद् वानमन्तरा देवा इति॥ आह किं यद् यत् समवसरणं भवति तत्र तत्रायमित्थं नियोगः? उत न? इति, अत्रोच्यते-

[भा.११८१] साहारण ओसरणे, एवं जत्थिड्ढिमं तु ओसरई।
एक्को च्चिय तं सव्वं, करेइ भयणा उ इयरेसिं॥

वृ-साधारणं-यत्र बहवो देवेन्द्रा आगच्छन्ति तत्र समवसरणे 'एवम्' अनन्तरोक्तो नियोगः। यत्र तु 'ऋद्धिमान्' कश्चिदिन्द्रसामानिकादि 'समवसरति' आगच्छति तत्रैक एवासौ 'तत्' प्रकारादिकं सर्वमपि करोति। ''भयणा उ इयरेसिं'' ति यदीन्द्रादयो महर्द्धिका नागच्छन्ति ततः 'इतरे' भवनवास्यादयः कुर्वन्ति वा न वा समवसरममित्येवं भजना कार्येति॥ अत्रविशेषचूर्णावित्थं विशेषो दृश्यते-चाउक्कोणा तिन्नि पागारा रइज्जंति चउद्दारा। अब्भितरिल्लो लोहियक्खेहिं, मज्झिल्लो पीयएहिं, बाहिरिल्लो सेयएहिं। सव्वो समोसरणभागो जोयणं। अब्भिंतर-मज्झिमाणं पागाराणं अंतरं जोयणं। मज्झिम-बाहिराणं पागाराणं अतरं गाउअं ति॥ इत्थं देवैः समवसरणे विरचिते सति यथा भगवान् तत्र प्रविशति तथाऽभिधातुकाम आह-

[भा.११८२] सूरुदय पच्छिमाए, ओगाहिंतीए पुव्वओ एति।
दोहि पउमेहि पाया, मग्गेण य होंति सत्तऽन्ने॥

वृ- 'सूर्योदये' प्रथमायां पौरुष्याम् अपराह्णे तु पश्चिमायाम् 'अवगाहमानायाम्' आगच्छन्त्यामित्यर्थः 'पूर्वतः' पूर्वद्वारेण भगवान् 'एति' आगच्छति प्रविशतीत्यर्थः। कथम्? इत्याह-द्वयोः 'पद्मयोः' सहस्रपत्रयोर्देवपरकल्पितयोः पादौ स्थापयन्नित्युपस्कारः। ''मग्गेण य''त्ति प्राकृतत्वाद् विभक्तिव्यत्यये 'मार्गतः' पृष्ठतो भगवतः सप्ताऽन्यानि पद्मानि भवन्ति, तेषां च यद् यत् पाश्चात्यं तत् तत् पादन्यासं कुर्वतो भगवतः पुरतस्तिष्ठतीति॥

ततः प्रविश्य किं करोति? इत्याह-

[भा.११८३] आयाहिण पुव्वमुहो, तिदिसिं पडिरूवया य देवकया।
जेट्ठगणी अन्नो वा, दाहिणपुव्वे अदूरम्मि॥

वृ-''आयाहिण''त्ति भगवान् चैत्यद्रुमस्य प्रदक्षिणां विधाय पूर्वमुखः सिंहासनमध्यास्ते। यासु च दिक्षु भवतो मुखं न भवति तासु तिसृष्वपि तीर्थकराकारधारकाणि सिंहासन-चामर-च्छत्रधर्मचक्रालंकृतानि प्रतिरूपकाणि देवकृतानि भवन्ति, यथा सर्वोऽपि लोको जानीते 'भगवानस्माकं पुरतः कथयति'। भगवतश्च पादमूलं जघन्यत एकेन गणिना-गणधरेणाऽविरहितं

Jain Education International For Private & Personal Use Only www.jainelibrary.org

भवति, स च ज्येष्ठोऽन्यो वा भवेत्, प्रायो ज्येष्ठ एव। स च ज्येष्ठगणिरन्यो वा पूर्वद्वारेण प्रविश्य दक्षिणपूर्वे दिग्भागे 'अदूरे' प्रत्यासन्न एव भगवतो भगवन्तं प्रणिपत्य निषीदति। शेषा अपि गणधरा एवमेवाभिवन्द्य ज्येष्ठगणधरस्य मार्गतः पार्श्वतश्च निषीदन्तीति ॥

आह भुवनगुरुरूपस्य सकलत्रिभुवनातिशायित्वात् त्रिदशकृतानां प्रतिरूपकाणां तेन सह साम्यम्? असाम्यं वा? इत्याशङ्कानिरासार्थमाह-

[भा.११८४] जे ते देवेहि कया, तिदिसिं पडिरूवगा जिनवरस्स।
तेसिं पि तप्पभावा, तयानुरूवं हवइ रूवं ॥

वृ- यानि तानि देवैः कृतानि तिसृषु दिक्षु जिनवरस्य प्रतिरूपकाणि तेषामपि 'तत्प्रभावात्' तीर्थकरणप्रभावात् 'तदनुरूपं' तीर्थकररूपानुरूपं रूपं भवति॥ अथ ये यथा भगवतः समवसरणे निषीदन्ति तिष्ठन्ति तानभिधित्सुः सङ्ग्रहगाथामाह-

[भा.११८५] तित्थाऽइसेससंजय, देवी वेमाणियाण समणीओ।
भवणवइ-वाणमंतर-जोइसियाणं च देवीओ ॥

वृ- 'तीर्थं' गणधरस्तस्मिन् उपविष्टे सति अतिशायिनः संयता उपविशन्ति, ततो देव्यो वैमानिकानाम्, ततः श्रमण्यः, तथा भवनपति-व्यन्तर-ज्योतिष्काणां च देव्य इति ॥

अथैतदेव विवृणोति-

[भा.११८६] केवलिणो तिउण जिनं, तित्थपणामं च मग्गओ तस्स।
मणमाई वि नमंता, वयंति सट्ठाण सट्ठाणं ॥

वृ- केवलिनः पूर्वद्वारेण प्रविश्य जिनं 'त्रिगुणं' त्रिप्रदक्षिणीकृत्य 'नमस्तीर्थाय' इति वचसा तीर्थप्रमाणं च कृत्वा 'तस्य' तीर्थस्य-प्रथमगणधररूपस्य शेषगणधराणां च 'मार्गतः' पृष्ठतो दक्षिणपूर्वस्यां निषीदन्ति। तथा "मणमाई वि"त्ति मनःपर्यवज्ञानिन आदिशब्दाद् अवधिज्ञानिनः चतुर्दशपूर्विणो दशपूर्विणो नवपूर्विण आमर्षौषध्यादिविविधलब्धिमन्तश्च प्राच्यद्वारेण प्रविश्य भगवन्तं त्रिप्रदक्षिणीकृत्य नमस्कृत्य च 'नमस्तीर्थाय, नमो गणधरेभ्यः, नमः केवलिभ्यः' इत्यभिधाय केवलिनां पृष्ठत उपविशन्ति। शेषसंयता अपि प्राचीनद्वारेणैव प्रविश्य भुवनगुरुं प्रदक्षिणीकृत्य वन्दित्वा च 'नमस्तीर्थाय, नमो गणभृभ्द्यः, नमः केवलिभ्यः, नमोऽतिशयज्ञानिभ्यः' इति भणित्वा अतिशयिनां पृष्ठतो निषीदन्ति। एवं मनःपर्यायज्ञान्यादयोऽपि नमन्तः सन्तो व्रजन्ति स्वस्थानं स्वस्थानमिति। तथा वैमानिकानां देव्यः पूर्वद्वारेण प्रविश्य भुवनबान्धवं त्रिप्रदक्षिणीकृत्य नत्वा च 'नमस्तीर्थाय, नमः सर्वसाधुभ्यः' इत्यभिधाय निरतिशयसाधूनां पृष्ठतस्तिष्ठन्ति न निषीदन्ति। श्रमण्योऽपि पौरस्त्यद्वारेण प्रविश्य तीर्थकृतं प्रदक्षिणीकृत्य प्रणम्य च तीर्थस्य साधूनां च नमस्कारं विधाय वैमानिकदेवीनां पृष्ठतस्तिष्ठन्ति न निषीदन्ति। भवनपतिदेव्यो ज्योतिष्कदेव्यो व्यन्तरदेव्यश्च दाक्षिणात्यद्वारेण प्रविश्य तीर्थकरादीनभिवन्द्य दक्षिणपश्चिमदिग्भागे यथाक्रममेव तिष्ठन्ति ॥

[भा.११८७] भवणवई जोइसिया, बोधव्वा वानमंतरसुरा य।
वेमाणिया य मनुया, पयाहिणं जं च निस्साए ॥

वृ- भवनपतयो ज्योतिष्का वानमन्तरसुराश्च एते भगवन्तमभिवन्द्य यथोपन्यासमेव पृष्ठतः पृष्ठत उत्तरपश्चिमे दिग्भागे तिष्ठन्तीति बोद्धव्याः। वैमानिका देवा मनुष्याः चशब्दाद्

Jain Education International For Private & Personal Use Only www.jainelibrary.org

मनुष्यस्त्रियश्चप्रदक्षिणां कृत्वा तीर्थकरादीनभिवन्द्योत्तरपूर्वे दिग्भागे यथाक्रममेव तिष्ठन्तीति। ''जं च निस्साए'' त्ति यः परिवारः 'यं' देवं मनुजं वा 'निश्राय' निश्रां कृत्वा आगतः स तस्यैव पार्श्वे तिष्ठति ॥ अत्रान्तरे भाष्यादर्शेषु केषुचिदेता गाथा दृश्यन्ते-

अनगारा वेमाणियवरंगणा साहुणी य पुव्वेणं।
पविसंति विविहमणि-रयणकिरणनिकरेण दारेणं ॥
जोइसिय-भवन-वणयरदयिता लायन्न-रूवकलियाओ।
पविसंति दक्खिणेणं, पडाय-झयपंतिकलिएणं।
जोइसिय भवण वणयर, ससंभमा ललियकुंडलाहरणा।
पविसंति पच्छिमेणं, वि तुंगदिप्पंतसिहरेणं ॥
समहिंदा कप्पोवगदेवा राया नरा य नारीओ।
पविसंति उत्तरेणं, पवरमणिमऊहओहेणं ॥

एताश्च द्वयोरपि चूर्ण्योर्गृहीतत्वात् प्रक्षेपगाथाः सम्भाव्यन्ते। उक्तार्थाः सुगमाश्चेति ॥ अभिहितार्थोपसङ्ग्रहायाह-

[भा.११८८] एक्केक्कीए दिसाए, तिगं तिगं होइ सन्निविट्ठं तु।
आइ-चरिमे विमिस्सा, थी-पुरिसा सेस पत्तेयं ॥

वृ- एकैकस्यां दिशि त्रिकं त्रिकं 'सन्निविष्टम्' उपविष्टमूर्ध्वस्थितं वा भवति। तथाहि-दक्षिण-पूर्वस्यां दिशि संयता वैमानिकाङ्गनाः संयत्यश्चेति त्रयम्, अपरदक्षिणस्यां भवनपति-ज्योतिष्कव्यन्तरदेवीनांत्रयम्, उत्तरापरस्यां भवनपति-ज्योतिष्क-व्यन्तरदेवानां त्रयम्, उत्तरपूर्वस्यां वैमानिकदेव-मनुष्य-मनुष्यीणां त्रयमिति। अत्र चाद्ये चरमे च त्रिके विमिश्राः स्त्री-पुरुषाः, स्त्रयः पुरुषाश्चोभयेऽपि भवन्तीति भावः। 'शेषयोस्तु' मध्यमयोर्द्वयोस्त्रिकयोः स्त्रयः पुरुषाश्च 'प्रत्येकमिति' निर्मिश्रा एव भवन्तीति ॥ तेषां चेत्थं स्थितानां सुर-नराणां स्थितिमाह-

[भा.११८९] इंतं महिड्डियं पणिवयंति ठियमवि वयंति पणमंता।
न वि जंतणा न विकह, न परोप्परमच्छरो न भयं ॥

वृ- येऽल्पर्द्धयः पूर्वं भगवतः समवसरणे स्थितास्ते आगच्छन्तं महर्द्धिकं 'प्रणिपतन्ति' नमस्कुर्वन्ति। अथ महर्द्धिकः प्रथमं स्थितः ततो येऽल्पर्द्धयः पश्चादागच्छन्ति ते महर्द्धिकं पूर्वस्थितमपि प्रणमन्तो व्रजन्ति यथास्थानम्। तथा नापि तेषां तत्रस्थितानां 'यन्त्राणा' 'न गन्तव्यं भवता अतः स्थानात्' इति लक्षणा, न 'विकथा' स्त्रकथादिरूपा सामान्यतो वार्त्ता प्रबन्धात्मका वा, न परस्परं 'मत्सरः' प्रद्वेषः, न 'भयं' सन्त्रासः कुतोऽपि बलवतो वैरिणः सकाशात्, प्रत्युत भगवतः साम्यसुधासिन्धुपूरेण प्लावितमनसां षां विलीयन्ते विरोधानुबन्धविषोर्मय इति ॥

आह प्राकाराणां बाह्ययोर्द्वयोरन्तरयोः के तिष्ठन्ति ? इत्याह-

[भा.११९०] बिइयम्मि होंति तिरिया, तइए पागारमंतरे जाणा।
पागारजढे तिरिया, वि होंति पत्तेय मिस्सा वा ॥

वृ- द्वितीये प्राकारान्तरे भवन्ति 'तिर्यञ्चः' सिंह-हस्त्यादयः। तृतीये तु प्राकारान्तरे 'यानानि' वाहनानि भवन्ति। 'प्राकारजढे' प्राकाररहिते बहिरित्यर्थः तिर्यञ्चः, अपिशब्दाद् मनुष्य-देवा

Jain Education International For Private & Personal Use Only www.jainelibrary.org

अपि प्रत्येकं मिश्रा वा भवन्ति ॥ एवं समवसरणे विरचिते सति किं भवति ? इत्याह-

[भा.११९१] सव्वं व देसविरइं, सम्मं घेच्छइ व होइ कहणा उ ।
इहरा अमूढलक्खो, न कहेइ भविस्सइ न तं च ॥

वृ- सर्वविरतिं वा देशविरतिं वा सम्यग्दर्शन वा कश्चिद् ग्रहीष्यतीति ज्ञात्वा भगवतः 'कथना' धर्मदेशना भवति । 'इतरथा' सम्यक्त्वग्रहणस्याप्यभावे मूढं-विपर्ययमुपगतं लक्ष्यं-ज्ञेयवस्तु यस्य स मूढलक्ष्यो न तथा अमूढलक्ष्यो यथावस्थितवस्तुवेदीति भावः, एवंविधो भगवान् 'न कथयति' न करोति धर्मदेशनाम् । आह यद्येवं तर्हि समवसरणकरणप्रयासो विबूधानामपार्थकः प्राप्नोतीत्याह-भविष्यति न तच्च तद् भगवत्यपि धर्मकथां कुर्वाणेऽन्यतमोऽप्यन्यमत् सामायिकं न प्रतिपद्यते, भगवतः सातिशयत्वात् । भविष्यत्कालनिर्देशस्त्रिकालोपलक्षणार्थ ॥

[भा.११९२] मनुए चउमन्नयरं, तिरिए तिन्नि व दुवे व पडिवज्जे ।
जइ नत्थि नियमसो च्चिय, सुरेसु सम्मत्तपडिवत्ती ॥

वृ- मनुष्यश्चतुर्णां सामायिकानां सम्यक्त्व-श्रुत-देशविरति-सर्वविरतिरूपाणामन्यतरत् प्रतिपद्यते । तिर्यञ्चः 'त्रीणि वा' सम्यक्त्व-श्रुत-देशविरतिरूपाणि, द्वे वा सम्यक्त्व-श्रुतसामायिके प्रतिपद्यन्ते । यदि मनुष्य-तिरश्चां मध्ये कश्चित् प्रतिपत्ता नास्ति ततो नियमत एव 'सुरेषु' देवेषु कस्यापि सम्यक्त्वप्रतिपत्तिर्भवति ॥ स च भगवानित्थं धर्ममाचष्टे-

[भा.११९३] तित्थपणमं काउं, कहेइ साहारणेण सद्देणं ।
सव्वेसिं सन्नीणं, जोयणनीहारिणा भगवं ॥

वृ- 'नमस्तीर्थाय' इत्यभिधाय प्रणामं च कृत्वा सर्वेषां सुर-नरादीनां संज्ञिनां जीवानां 'साधारणेन' स्वस्वभाषापरिणमनसमर्थेन 'योजनीहारिणा' योजनव्यापिना शब्देन भगवान् धर्मं कथयति । किमुक्तं भवति ? -भगवतो दिव्यध्वनिरशेषाणामपि समवसरणवर्त्तिनां संज्ञिजन्तूनां जिज्ञासितार्थप्रतिपत्तिनिबन्धनमुपजायते ॥ आह कृतकृत्योऽपि भगवान् किमिति तीर्थप्रमाणं करोति ? इति उच्यते-

[भा.११९४] तप्पुव्विया अरहया, पूइयपूया य विनयमूलं च ।
कयकिच्चो वि जह कहं, कहइ नमए तहा तित्थं ॥

वृ- 'तीर्थं' श्रुतज्ञानं तत्पूर्विका 'अर्हत्ता' तीर्थकरता, न खलु भवान्तरेषु श्रुताभ्यासमन्तरेण भगवत एवमेवाऽऽर्हन्त्यलक्ष्मीरुपढौकते । तथा पूजितस्य पूजा पूजितपूजा, सा च तीर्थस्य कृता भवति, पूजितपूजको हि लोकः, ततो यद्यहं तीर्थं पूजयामि ततस्तीर्थकरस्यापि पूज्यमिदमिति कृत्वा लोकोऽपि पूजयिष्यति । तथा विनयमूलं धर्मं प्ररूपयिष्यामि, अतः प्रथमतो विनयं प्रयुञ्जे, येन लोकः सर्वोऽपि मद्वचनं सुतरां श्रद्दधीत । अथवा कृतकृत्योऽपि भगवान् यथा कथां कथयति तथा तीर्थमपि नमति । आह नन्वेतदप्यसमीचीनं यत् कृतकृत्यः सन् धर्मदेशनां करोति, नैवम्, अभिप्रायापरिज्ञानाद्, भगवता हि तीर्थकरनामगोत्रं कर्मावश्यवेदयितव्यम्, तस्य च वेदनेऽयमेवोपायो यद् अग्लान्या धर्मदेशनादिकरणम्, "तं च कहं वेइज्जइ ? अगिलाए धम्मदेसणाईहिं" ति वचनात् ॥ गतं समवसरणद्वारम् । अथ "केवइय" त्ति द्वारम् । कियतो भूभागादवश्यं समवसरणे आगन्तव्यम् ? इत्याह-

Jain Education International For Private & Personal Use Only www.jainelibrary.org

[भा.११९५] जत्थ अपुव्वोसरणं, न दिट्ठपुवंव व जेण समणेणं।
बारसहि जोयणेहिं, सो एइ अनागमे लहुगा ॥

वृ- यत्र नगरादौ 'अपूर्वं समवसरणं' विवक्षिततीर्थकरापेक्षया अभूतपूर्वं येन वा श्रमणेन न दृष्टपूर्वं स द्वादशभ्यो योजनेभ्यो नियमतः 'एति' आगच्छति। यदि त्ववज्ञया नागच्छति तदा चत्वारो लघवः प्रायश्चित्तम् ॥ अथ रूपद्वारमाह-

[भा.११९६] सव्वसुरा जइ रूवं, अंगुट्ठपमाणयं विउव्विज्ञा।
जिनपायंगुट्टं पइ, न सोहए तं जहिंगालो ॥

व- कीदृग् भगवतो रूपम् ? इत्याह-'सर्वसुराः' वैमानिकादयः सम्भूय यदि सारसारतरसारतमान् पुद्गलान् गृहीत्वा अङ्गुष्ठप्रमाणकं रूप विकुर्वेयुः तथापि जिनपादाङ्गुष्ठं प्रति उपमीयमानं तद् न शोभते, यथाऽङ्गार इति॥ साम्प्रतं विनेयजनानुग्रहाय प्रसङ्गतो गणधरादीनामपि रूपसम्पदभिधित्सयाऽऽह-

[भा.११९७]गणहर आहार अनुत्तरा य जाव वन-चक्कि-वासु-बला।
मंडलिया जा हीना, छट्ठाणगया भवे सेसा ॥

वृ- तीर्थकररूपसम्पदः सकाशाद् अनन्तगुणहीना गणधरा रूपतो भवन्ति। गणधररूपाद् अनन्तगुणहीनाः खल्वाहारकदेहाः। आहारकदेहरूपाद् अनन्तगुणहीना अनुत्तरोपपातिनां देहाः। ततोऽप्यनन्तगुणहीना उपरितनोपरितनग्रैवेयकदेवदेहाः। एवं यावदीशानकल्पदेवरूपाद् अनन्तगुणहीनाः सौधर्मकल्पदेवदेहाः। तोत भवनपति-ज्योतिष्क-वनचर-चक्रवर्ति-वासुदेव-बलदेव-महामण्डलिका अपि रूपतो यथाक्रममनन्तगुणहीना द्रष्टव्याः। ततः शेषराजानो जनपदलोकाश्च षट्स्थानगताः परस्परं भवन्ति। तद्यथा-अनन्तभागहीना वा १ असङ्ख्येयभागहीना वा २ सङ्ख्येयभागहीना वा ३ संख्येयगुणहीना वा ४ असङ्ख्येयगुणहीना वा ५ अनन्तगुणहीना वा ६॥ अथ भगवत एव रूपसौन्दर्यनिबन्धनं संहननादिकं वर्णयन्नाह-

[भा.११९८] संघयण-रूव-संठाण-वन्न-गइ-सत्त-सार-ऊसासा।
एमादऽनुत्तराइं, हवंति नामोदया तस्स ॥

वृ- 'संहननं' वज्रऋषभनाराचम्, 'रूपम्' अनन्तरोक्तरूपम्, 'संस्थानं' समचतुरस्रम्, 'वर्ण' देहच्छाया, 'गति' भद्रगजेन्द्रानुकारिणी सुललिता, 'सत्त्वं' धैर्यम्, सारो द्विधा-बाह्य आभ्यन्तरश्च, बाह्यो गुरुत्वम्, आभ्यन्तरो ज्ञान-दर्शन-चारित्ररूपः, "ऊसास"त्ति उच्छ्वासनिश्वाससौरभ्यम्, एवमादीनि वस्तूनि तस्य भगवतः 'अनुत्तराणि' अनन्यसामान्यानि भवन्ति, आदिशब्दाद् गोक्षीरगौरं रुधिरा-ऽऽमिषं चर्मचक्षुषामगोचरावाहार-नीहारौ इत्यादि। एतानि च 'नामोदयाद्' नामनाम्नः कर्मणः शुभरूपस्योदयात् 'तस्य' भगवतोऽनुत्तराणि भवन्ति॥ किञ्च-

[भा.११९९]पयडीणं अन्नासऽवि, पसत्थ उदया अनुत्तरा होंति।
खयउवसमे वि य तहा, खयम्मि अविगप्पमाहंसु ॥

वृ-प्रकृतीनाम् 'अन्यासामपि' नामव्यतिरिक्तानां गोत्रादीनां प्रशस्ता उदया उच्चैर्गोत्रत्वादयो भवन्ति। अपिशब्दाद् नाम्नोऽपि ये उक्तव्यतिरिक्ताः सौभाग्य-सौन्दर्य-यशःकीर्त्तिप्रभृतस्तेऽपि रिगृह्यन्ते। एते च किमितरजनस्येव प्रशस्ताः ? उत न ? इत्यत आह-'अनुत्तराः' अनन्यसदृशाः।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

"खयउवसमे वि य तह" त्ति कर्मणां क्षयोपशमेऽपि सति ये दान-लाभादयः कार्यविशेषास्तेऽपि तथैव भगवतोऽनुत्तराः । 'क्षये' त्रायिके पुनर्भावे वर्त्तमानस्य भगवतः केवलज्ञानादिकं गुणसमुदयम् 'अविकल्पं' वर्णनादिकल्पातीतं सर्वोत्तमम् "आहंसु" त्ति आख्यातवन्तः श्रुतधरा इति ॥

आह केवलिकालेऽप्यसाताद्याः प्रकृतयो नाम्नो वा या अशुभास्ताः कथं तस्य दुःखदा न भवन्ति ? इति अत्रोच्यते-

[भा.१२००]अस्सायमाइयाओ, जा वि य असुहा हवंति पगडीओ ।
निंबरसलवु व्व पए, न होंति ता असुहया तस्स ॥

वृ- 'असाताद्याः' असातवेदनीयादयो या अपि चाशुभा भवन्ति प्रकृतयस्ता अपि निम्बरसलव इव 'पयसि' दुग्धे न भवन्ति अशुभदा असुखदा वा तस्य भगवत इति ॥

अथ पृच्छाद्वारम् । आह उत्कृष्टरूपतया भगवतः किं प्रायोजनम् ? इति अत्रोच्यते-

[भा.१२०१] धम्मोदएण रूवं करेंति रूवस्सिणो वि जइ धम्मं ।
गज्झवओ य सरूवो, पसंसिमो रूवमेवं तु ॥

वृ- धर्मस्य-पुण्यप्रकृतिरूपस्योदयेन रूपं भवतीति परिभाव्य श्रोतारोऽपि धर्मे प्रवर्त्तन्ते । तथा कुर्वन्ति 'रूपस्विनोऽपि' रूपवन्तोऽपि यदि धर्मं ततः शेषैः सुतरां कर्त्तव्य इति श्रोतृबुद्धिः प्रवर्त्तते । 'ग्राह्यवाक् च' आदेयवाक्यः सुरूपः पुरुषो भवति, चशब्दस्यानुक्तसमुच्चयार्थत्वात् श्रोतृणां रूपाद्यभिमानापहारी च । अतः प्रशंसामो वयं भगवतो रूपमेवमिति ॥ गते रूप-पृच्छाद्वारे । अथ व्याकरणद्वारम् । भगवान् देव-नर-तिरश्चां प्रभूतसंशयिनां व्याकरणं कुर्वन् कथं संशयव्यवच्छित्तिं करोति ? इत्युच्यते-युगपदेकेनैव निर्वचनेन । आह यद्येकैकस्यैकैकं संशयं परिपाट्या व्यवच्छिन्द्यात् ततः को दोषः स्यात् ? इत्याह-

[भा.१२०२] कालेन असंखेण वि, संखाईयाण संसईणं तु ।
मा संसयवोच्छित्ती, न होज्जकमवागरणदोसा ॥

वृ- कालेन 'असङ्ख्येयेनापि' पल्योपमादिना सङ्ख्यातीतानां संशयिनां संशयव्यवच्छित्तः क्रमव्याकरणदोषाद् न भवेत्, अत एतद् मा भूदिति भगवान् युपगद् व्यागृणातीति ॥

अथ युगपद्याकरणे गुणानाह-

[भा.१२०३] सव्वत्थ अविसमत्त, रिद्धिविसेसो अकालहरणं च ।
सव्वन्नुपच्चओ वि य, अचिंतगुणभूइओ जुगवं ॥

वृ- 'सर्वत्र' सरवसत्त्वेषु 'अविषमत्वं' युगपन्निर्वचनेन तुल्यत्वं भगवतो भवति, राग-द्वेषरहितस्य तुल्यकालसंशयिनां युगपज्जिज्ञासतां कालभेदेन कथने राग-द्वेषगोचरचित्तवृत्ति-सम्भावनाप्रसङ्गात् । ऋद्धिविशेषश्चायं भगवतः, यद् युगपत् सर्वसंशयिनामशेषसंशयवयवच्छित्तिं करोति । तथा परिपाट्या कथने कस्यापि संशयिनोऽनिवृत्तसंशयस्यैव कालेन-मृत्युना हरणं स्यात्, अतोऽकालहरणं युगपन्निर्वचने भवति । तथा सर्वज्ञप्रत्ययोऽपि च तेषामित्थमेव भवति, क्रमव्याकरणे तु कस्यचिदनपनीतसंशयस्य सर्वज्ञप्रतीतिरपि न स्यात् । तथा अचिन्त्या-अप्रमेया गुणभूति-गुणसम्पदियं भगवतः, यदेकहेलयैव सर्वेषामपि संशयव्यपनयनम् । एतैः कारणैर्भगवान् युगपत् कथयतीति ॥ गतं व्याकरणद्वारम् । अथ श्रोतृपरिणामद्वारम् । तत्र यथा सा पारमेश्वरी

Jain Education International For Private & Personal Use Only www.jainelibrary.org

वाग् अशेषसंशयोन्मूलनेन परिणमते तथा प्रतिपादयन्नाह-

[भा.१२०४] वासोदगस्स व जहा, वन्नादी होंति भायणविसेसा।
सव्वेसिं पि सभासं, जिणभासा परणमे एवं ॥

वृ- 'वर्षोदकस्य' वृष्टिपानीयस्य वाशब्दाद् अन्यस्य यथैकरूपस्य सतः 'वर्णादयः' वर्ण-गन्धरस-स्पर्शाः 'भाजनविशेषाद्' भूमिकाद्याधारविशेषाद् विचित्रा भवन्ति। यथा कृष्ण-सुरभि-मृत्तिकायां वर्षोदकं पतितं स्वच्छं सुगन्धं सरसं च भवति, ऊषरभूमिकायां विपरीतम्; एवं सर्वेषामपि श्रोतृणां स्वस्वभाषां प्रति 'जिनभाषा' जैनी वाणी परिणमते। उक्तञ्च परमर्षिभिः-सा विय णं भगवओ अद्धमागहा भासा भासिज्जमाणी तेसिं सव्वेसिं आयरियमणायरियाणं दुपय-चउप्पय-मिय-पसु-पक्खि-सिरीसिवाणं अप्पप्पणो भासत्ताए परिणमइ ॥

भगवद्वाच एव सौभाग्यगुणप्रतिपादनायाह-

[भा.१२०५] साहारणा-ऽसवत्ते, तओवओगो उ गाहगगिराए।
न य निव्विज्जइ सोया, किढिवाणियदासिआहरणा ॥

वृ- 'साधारणा' सर्वसंज्ञिनां भाषासु सामान्या; यद्वा क्षीर-खण्डादीनि मधुरद्रव्याण्येकत्र मीलितानि यथा सुस्वादुतया साधारणानि भवन्ति एवमसावप्यतीवसुस्वादुतया साधारणा; नरकादौ पततो वा जन्तून् या सम्यग् धारयति साधारं-परित्राणं करोतिती साधारणा। 'असपत्ना' अनन्यसदृशी, यस्या वा अपरवाग्भिव्याघातो न क्रियते। ग्राहिका-अर्थपरिच्छेदकारिणी सा चासौ गीश्च ग्राहकगीः। एवंविधायां तस्यामुपयोगः-एकाग्रता तदुपयोगः, तुशब्दस्यावधारणार्थत्वात् तदुपयोग एव श्रोतुर्भवति, नानुपयोगो न चान्यत्रोपयोग इति। उपयोगे सत्यप्यन्यत्र निर्वेददर्शनात् तस्यामपि निर्वेदः स्यादित्याह-न च निर्विद्यते श्रोता भागतीं वाचं शृण्वन्। कुतः खल्वमयर्थोऽवगन्तव्यः ? इत्याह-किढिवामिजदास्युदाहरणात्- एगस्स वाणियगस्स किढी दासी किढी थेरी। सा गोसे कट्ठाणं गया। तण्हा-छुहाकिलंता मज्झण्हे आगता। 'अतिथेवा कट्ठा आणिय'त्ति पिट्टित्ता भुक्खिय-तिसिया पुणो पट्ठविया। सा य वड्डुं कट्ठभारं गहाय ओगाहंतीए पच्छिमाए पोरिसीए आगच्छइ। को कालो ? जेट्ठामूलमासो। अह ताए य थेरीए कट्ठभाराओ एगं कट्ठं पडियं। ताए ओणमित्ता तं गहियं। तंसमयं च भगवं तित्थगरो धम्मं कहियाइओ जोयणनीहारिणा सरेणं। सा थेरी तं सद्दं सुणेंती तहेव ओणया सोउमाढत्ता। उण्हं खुहं पिवासं परिस्समं च न विंदइ। सूरत्थमणे तित्थयरो धम्मं कहेउमुट्ठितो। थेरी गता ॥

[भा.१२०६]सव्वाउअं पि सोया, झविज्ज जइ हु सययं जिनो कहए।
सी-उण्ह-खु-प्पिवासा-परिस्सम-भए अविगणिंतो ॥

वृ- अनेनैव दृष्टान्तेन यदि 'हुः' निश्चितं सततं 'जिनः' तीर्थङ्करः कथयेत्, ततः श्रोता 'सीतोष्णक्षुत्पिपासापरिश्रमभयान्यविगणयन्' शीतं-हिमम् उष्णम्-आतपः क्षुत्पिपासे प्रतीते परिश्रमः-मार्गगमनादिसमुत्थः भयं-प्रतिपक्षादिजनितम् एतान्यविन्दमानो भगवतो धर्मदेशनां श्रृण्वन् सर्वायुष्कमपि क्षपयेदिति ॥ गतं श्रोतृपरिणामद्वारम्। अथ दानद्वारम्। भगवान् येषु नगरा-ऽऽकरादिषु विहरति तेभ्यो दिवसदैवसिकीं वार्तां ये खल्वानयन्ति यथा 'भगवान् अद्यामुत्र क्षेत्रे विहरति' इति तेषां यद् भगवत्किंवदन्तीनिवेदनवृत्तिकल्पं परिभाषितं संवत्सरनियतं दानं

Jain Education International For Private & Personal Use Only www.jainelibrary.org

दीयते तद् वृत्तिदानम्, यत् पुनः स्वनगरे भगवदागमननिवेदकाय नियुक्तायानियुक्ताय वा हर्षप्रकर्षाधिरूढमानसैर्दीयते तत् प्रीतिदानम्, एतद् द्वयमपि यथा चक्रवर्त्यादयः प्रयच्छन्ति तथा प्रतिपादयन्नाह-

[भा.१२०७] वित्ती उ सुवन्नस्सा, बारस अद्धं च सयसहस्साइं।
तावइयं चिय कोडी, पीईदानं तु चक्कीणं ॥

वृ- वृत्तिदानं सुवर्णस्य 'द्वादश अर्द्धं च शतसहस्राणि' अर्द्धत्रयोदश सुवर्णलक्षा इत्यर्थः। 'तावत्यं एव' अर्द्धत्रयोदशप्रमाणा एव सुवर्णस्य कोटयः प्रीतिदानम्। केषाम् ? इत्याह- चक्रवर्त्तिनाम् ॥

[भा.१२०८] एतं चेव पमाणं, नवरं रययं तु केसवा दिंति।
मंलियाण सहस्सा, वित्ती पीई सयसहस्सा ॥

वृ- एतदेव प्रमाणं वृत्ति-प्रीतिदानयोः, 'नवरं' केवलं 'रजतं' रूप्यं 'केशवाः' वासुदेवा ददति। 'मण्डलिकानां' राज्ञां सहस्राण्यर्द्धत्रयोदशप्रमाणानि रूप्यस्य वृत्तिदानम्, प्रीतिदानं पुनरर्द्धत्र-योदशशतसहस्राणि इति ॥ किमेत एव महापुरुषाः प्रयच्छन्ति ? आहोश्विदन्येऽपि ? इत्याह-

[भा.१२०९] भत्ति-विभवानुरूवं, अन्ने वि य दिंति इब्भमाईया।
सोऊण जिनागमनं, निउत्तमनिओइएसुं वा ॥

वृ- 'भक्ति-विभवानुरूपं' यावती यस्य भगवद्विषया भक्ति यावती च यस्य विभूति स तदनुमानेनेत्यर्थः, अन्येऽपि च ददति 'इभ्यादयः' इभमर्हतीति इभ्यः, यस्य सत्कसुवर्णादिद्रव्य-पुञ्जेनान्तरितो हस्त्यपि न दृश्यते सः, अभ्यधिकद्रव्यो वेत्यर्थः, आदिशब्दाद् नगर-ग्रामभोगिकादयः। कदा ? इत्याह-श्रुत्वा 'जिनस्य' तीर्थकृत आगमनं नियुक्तेभ्योऽनियुक्तेभ्यो वा ॥ आह तेषामित्थं वृत्ति-प्रीतिदाने प्रयच्छतां के गुणाः ? इति उच्यते-

[भा.१२१०] देवानुवित्ति भत्ती, पूया थिरकरण सत्तअनुकंपा।
साओदय दानगुणा, पभावणा चेव तित्थस्स ॥

वृ- चक्रवर्त्यादिभिरित्थं प्रयच्छद्भिर्देवानामनुवृत्ति कृता भवति, देवा अपि भगवतः पूजां कुर्वन्तीति कृत्वा भगवति पूज्यमाने तेषामपि महान् परितोषो भवतीत्यर्थः। तथा भक्तिर्भगवतः कृता भवति। तीर्थकरपूजायां च स्थिरीकरणमभिनवश्राद्धानां भवति। सत्वानां भगवत्प्रवृत्ति-निवेदकानामनुकम्पा विहिता भवति। 'सातोदयं' सातवेदनीयं कर्म विशिष्टदिव्य-मानुष्यसुखो-पभोगफलं बध्यते। एतेऽनन्तरोक्ता दानगुणाः। प्रभावना चैव तीर्थस्य कृता भवति-अहो ! अमीषां धर्म श्रेयान् यत्र स्वदेव-गुरुभक्तिसम्भारसुभगमीदृशमौदार्यमिति ॥ गतं दानद्वारम्। अथ देवमाल्यद्वारम्। भगवान् प्थमां सम्पूर्णपौरुषीं धर्ममाचष्टे। अत्रान्तरे देवमाल्यं प्रविशति, बलिरित्यर्थः। आह कस्तं करोति ? इत्याह-

[भा.१२११] राया व रायमच्चो, तस्सासइ पउर जनवओ वा वि।
दुब्बलिकंडिय बलिछडिय तंदुलानाढगं कलमा ॥

वृ- 'राजा वा' चक्रवर्त्ति-माण्डलिकादि, 'राजामात्यो वा' राज्ञो मन्त्री। 'तस्य' राज्ञो

Jain Education International For Private & Personal Use Only www.jainelibrary.org

राजामात्यस्य वा 'असति' अभावे 'पौरं' नगरनिवासिविशिष्टलोकसमुदायः 'जनपदो वा' ग्रामादिवास्तव्यजनसमुदायो दुर्बलिकया कण्डितानां खण्डीकर्तुमशक्तत्वाद् बलवत्या च्छटितानां निशेषतुषापनयनात् तन्दुलानाम् 'आढकम्' –

दो असईओ पसई, दो पसईओ य सेइआ होइ।
चउसेइओ उ कुडवो, चउकुडवो पत्थओ नेओ ॥

एवंविधैश्चतुर्भि प्रस्थैरेक आढको निप्पद्यते, एवंपरिमाणं "कलम"त्ति आर्षत्वाद् विभक्तिव्यत्यये 'कलमानां' शालिविशेषाणां बलिं करोति ॥ किंविशिष्टानाम् ? इत्याह-

[भा.१२१२]भाइयपुणानियाणं, अखंड-ऽफुडियाण फलगसरियाणं।
कीरइ बली सुरा वि य, तत्थेव छुहंति गंधाई ॥

वृ- भाजिताश्च ते पुनरानीताश्च बाजितपुनरानतास्तेषाम्। तत्र भाजनम्-ईश्वरादिगृहेषु वीननार्थमर्पणम्, तेभ्यः प्रत्यानयनं पुनरानयनम्। तथा 'अखण्डा-ऽस्फुटितानाम्' अखण्डाः-सम्पूर्णावयवाः अस्फुटिताः-राजीरहिताः, "फलकसरिताणं" फलकवीनितानाम्, एवम्भूतानां तन्दुलानां बलि क्रियते। सुरा अपि च 'तत्रैव' बलौ प्रक्षिपन्ति गन्धादीनिति ॥ गतं देवमाल्यद्वारम्। अथ माल्यानयनद्वारम्। तमित्थं तन्दुलाढकपरिमाणं सिद्धं बलिमुपादाय राजादिस्त्रिदशगणपरिवृत्तो महता पटुपटहादितूर्यनिनादेन सकलमपि दिङ्मण्डलमापूरयन्नागत्य पूर्वद्वारेण प्रवेशयति। आह च चूर्णिकृत्- तं आढगं तंदुलाणं सिद्धं देवमल्लं राया व रायमच्चो वा पउरं वा गामो वा जनवओ व गहाय महया तूरियरवेणं देवपरिवुडो पुरच्छिमिल्लेणं दारेणं पविसइ त्ति। तस्मिंश्च प्रवेश्यमाने भगवानपि धर्मदेशनामुपसंहरतीति। आह च-

[भा.१२१३]बलिपविसणसमकालं, पुव्वद्दारेण ठाइ परिकहणा।
तिगुणं पुरओ पाडण, तस्सद्धं अवडियं देवा ॥

वृ- पूर्वद्वारेण बलिप्रवेशनसमकालं 'तिष्ठति' उपरमते 'परिकथना' धर्मकथा। ततश्च स राजादि प्रविश्य बलिव्यग्रहस्तो भगवन्तं त्रि-प्रदक्षिणीकृत्य बलिं तत्पादान्तिके पुरतः पातयति। तस्य चार्द्धमपतितमेव देवा गृह्णन्ति ॥

[भा.१२१४] अद्धद्धं अहिवइणो, तदद्ध मो होइ पागयजणस्स।
सव्वामयप्पसमणी, कुप्पइ नऽन्नो य छम्मासे ॥

वृ- देवगृहीतोद्धरितस्यार्द्धस्यार्द्धमधिपतेर्भवति, राजादेर्बलिस्वामिन इत्यर्थः। 'तदर्द्धं' चतुर्भागलक्षणं 'मो' पादपूरणे यद् बलेरास्ते तद् भवति 'प्राकृतजनस्य' प्रकृतिषु भवः प्राकृतो जनस्तस्य, इतरलोकस्येत्यर्थः। तस्य चायं प्रभावः-यदि तत एकमपि सित्थं शिरसि प्रक्षिप्यते ततः पूर्वोत्पन्नो रोगः सपदि विलीयते, अपूर्वश्च षण्मासान् यावन्न प्रादुर्भवतीति। आह च-'सर्वामयप्रशमनः' सर्वरोगोपशमनोऽयं बलि, गाथायां प्राकृतत्वात् स्त्रीत्वम्, कुप्यति न 'अन्यश्च' अपूर्वो रोगः षण्मासान् यावदिति ॥ गतं माल्यानयनद्वारम्। अपरे त्वनन्तरोक्तं द्वारद्वयमप्येकद्वारीकृत्य व्याचक्षते तथाप्यविरोधः। इत्थं बलौ प्रक्षिप्ते भगवानुत्थाय प्रथमप्राकारान्तरादुत्तरद्वारेण निर्गत्य पूर्वस्यां दिशि स्फटिकमये देवच्छन्दके यथासुखं समाधिना व्यवतिष्ठते। अथ 'उपरि तीर्थम्' इति द्वारम्-भगवत्युत्थिते उपरि-द्वितीयपौरुष्यां तीर्थ-प्रथमगणधरोऽपरो वा धर्ममाचष्टे।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

आह भगवानेव किमिति नाचष्टे ? किं तत्कथने केऽपि गुणाः सन्ति ? उच्यते, सन्तीति ब्रूमः । के पुनस्ते ? इत्याह-

[भा.१२१५] खेयविणोओ सीसगुणदीवणा पच्चओ उभयओ वि ।
सीसा-ऽऽयरियकमो वि य, गणहरकहणे गुणा होंति ॥

वृ- भगवतः खेदविनोदो भवति, परिश्रमविश्राम इत्यर्थः । तथा 'अहो ! अस्य भगवतः शिष्या अप्येवंविधव्याख्यानलब्धिमन्तः' इति शिष्यगुणदीपना कृता भवति । प्रत्ययश्चोभयतोऽपि श्रोतृणामुपजायते, यथा भगवताऽभ्यधायि तथा गणधरोऽप्यभिधत्ते, न शिष्या-ऽऽचार्ययोः परस्परं वचनविरोध इति; गणधरे वा तदनन्तरं भगवदुक्तानुवादिनि प्रत्ययो भवति भगवद्विषयः श्रोतृणां यथा नान्यथावादीति । तथा शिष्या-ऽऽचार्यक्रमोऽपि च दर्शितो भवति, आचार्यादुपश्रुत्य योग्यशिष्येण तदुक्तार्थव्याख्यानं कर्त्तव्यम् । एते 'गणधरकथने' गणभृतो धर्मदेशनायां गुणा भवन्तीति ॥ आह स गणधरः क्व निषण्णः कथयति ? इत्युच्यते-

[भा.१२१६] राओवणीय सीहासणोवविट्ठो व पायवीढम्मि ।
जिट्ठो अन्नयरो वा, गणहारि कहेइ बीयाए ॥

वृ- राज्ञा उपनीते-ढौकिते सिंहासने वा तदभावे भगवतः पादपीठे वा उपविष्टः 'ज्येष्ठः' प्रथमो गौतमस्वाम्यादिस्तदभावेऽन्यतरो वा गणं-स्वाध्यादिसमुदायं गुणसमुदयं वा धारयितुं शीलमस्येति गणधारी कथयति द्वितीयायां पौरुष्यामिति ॥

आह स कथयन् कथं कथयति ? इत्युच्यते-

[भा.१२१७] संखाईए वि भवे, साहइ जं वा परो उ पुच्छिज्जा ।
न य णं अनाइसेसी, वियाणई एस छउमत्थो ॥

वृ- भगवान् गणधरः सङ्ख्यातीतानपि भवान् "साहइ"त्ति कथयति । इदमुक्तं भवति- असङ्ख्येयेषु भवेषु यद् बभूव भविष्यति वा तत् सर्वमपि कथयति । 'यद् वा' वस्तुजातं दुरवगममपि परः पृच्छेत् तदशेषमपि कथयतीति, अनेनाऽशेषाभिलाप्यपदार्थप्रतिपादनशक्तिमाह । किं बहुना ? 'न च' नैव "णं" इति तं गणधरम् 'अनतिशयी' अवधि-मनःपर्यायाद्यतिशयरहितो विजानाति यथा 'एषः' गणधरः छद्मस्थः, किन्तु निशेषप्रश्नोत्तरदानसमर्थतया सर्वज्ञोऽयमिति मन्यत इति भावः ॥ एवं तावत् समवसरणवक्तव्यता प्रसङ्गत उक्ता । अथ प्रकृतयोजनामाह-

[भा.१२१४] तित्थयरस्स समीवे, वक्खेवो तत्थ एवमाईहिं ।
सुत्तग्गहणं ताहे, करेइ सो बारस समाओ ॥

वृ-तीर्थकरस्य समीपे 'तत्र' समवसरणे एवमादिभि प्रकारैरध्ययनस्य व्याक्षेपो भवतीत्युक्ते स शिष्यः प्राह-'भगवन् ! सत्यमेवैतद् यद् आदिशत यूयं अत इहैव पठामि' इत्युक्त्वा सूत्रग्रहणं द्वादश 'समाः' वर्षाणि करोति, द्वादशभिर्वर्षै सकलस्यापि सूत्रस्याध्ययनं विदधातीत्यर्थः ॥

गतं शिक्षापदद्वारम् । अथार्थग्रहणद्वारं विवरीषुराह-

[भा.१२१९] सुत्तम्मि य गहियम्मी, दिट्ठंतो गोण-सालिकरणेणं ।
उवभोगफला साली, सुत्तं पुण अत्थकरणफलं ॥

वृ-सूत्रे गृहीते सति अवश्यं तस्यार्थ श्रोतव्यः । किं कारणम् ? इति चेद् उच्यते-दृष्टान्तोऽत्र

Jain Education International For Private & Personal Use Only www.jainelibrary.org

'गवा' बलीवर्दन 'शालिकरणेन च' शालिक्षेत्रेण। तत्र गोदृष्टान्तो यथा-कश्चिद् बलीर्द सकलमपि दिवसं वाहयित्वा हलाद् अरघट्टाद् वा मुक्तः सन् सुन्दरामसुन्दरां वा चारिं यां प्राप्नोति तां सर्वामनास्वादयन् चरत्येव। पश्चाद् ध्रातः सन्नुपविश्य प्राक् चीर्णं रोमन्थायते, रोमन्थायमानश्च तदा स्वादमुपलभते, ततोऽसौ नीरसं कचवरं परित्यजति। एवमयमपि गृहवासारघट्टाद् मुक्तः प्रथमं यत् किमपि सूत्रं चारिकल्पं गुरुसकाशादधिगच्छति तत् सर्वमर्थास्वादनविरहितं गृह्णाति। ततः सूत्रे गृहीतेऽर्थग्रहणं करोति। यदि पुनरर्थं न गृह्णीयात् तदा तत् सूत्रं निरास्वादमेव सञ्जायते। अर्थे तु श्रुते सम्यक् तदर्थमवबुध्यमानः सन्नसौ यथावदाचरत्युपदेशम्, परिहरति बिन्दु-मात्राभेदादिदोषदुष्टान् कचवरकल्पानभिलापानिति ॥

शालिकरणदृष्टान्तः पुनरयम्-यथा कर्षकः शालीन् महता परिश्रमेण निष्पाद्य ततो लवन-मलन-पवनादिप्रक्रियापुरस्सरं कोष्ठागारे प्रक्षिप्य यदि तैः शालिभिः खाद्य-पेयादीनामुपभोगं न करोति तत शालिसङ्ग्रहस्तस्याफलः सम्पद्यते। अथासौ करोति तैः शालिभि यथायोगमुपभोगं ततः शालिसङ्ग्रहः सफलो जायते। एवं द्वादशवार्षिके सूत्राध्ययनपरिश्रमे कृतेऽपि यदि तदीयमर्थं न शृणुयात् तदा स सर्वोऽपि परिश्रमो निष्फल एव भवेत्। अर्थे तु श्रुते समयगवधारिते च सफलः स्यात् ॥ अत एवाह-उपभोगफलाः शालयः, सूत्रं पुनः 'अर्थकरणफलं' चरण-करमादिरूपसूत्रार्थाचरणफलम्, तच्च सूत्रोक्तार्थाचरणं श्रुत एवार्थे भवति नान्यथा ॥ अतः-

[भा.१२२०] जइ बारस वासाइं, सुत्तं गहियं सुणाहि से अहुणा।
बारस चेव समाओष अत्थं नो नाहिसि न वा णं ॥

वृ- यदि द्वादश वर्षाणि त्वया सूत्रं गृहीतम्, अतः 'तस्य' सूत्रस्यार्थमधुना द्वादशैव 'समाः' वर्षाणि शृणु। ततोऽर्थं श्र ण्वन् स्वज्ञानावारककर्मत्रयोपशमानुसारेण ज्ञास्यसि वा न वा ''णं'' इति 'तं' विवक्षितमर्तम् ॥ किञ्च-

[भा.१२२१] सन्नाइसुत्त-ससमय, परसमय उस्सग्गमेव अववाए।
हीना-ऽहिय-जिन-थेरे, अज्ञा काले य वयणाई ॥

वृ- इह मौनीन्द्रप्रवचनेऽनेकधा सूत्राणि भवन्ति। तत्र किञ्चि संज्ञासूत्रम्, यथा-''जे छेए से सागारियं न सेवे।'' यः 'छेकः' पण्डितः सः 'सगारिकं' मैथुनं न सेवेत। अथवा-''सव्वामगंधं परिन्नायनिरामगंधो परिव्वए।'' आमम्-अविशोधिकोटिः, गन्धं-विशोधिकोटि। तथा-''आरं दुगुणेणं पारं एगगुणेणं।'' 'आरं' संसारस्तं 'द्विगुणेन' राग-द्वेषयुगलेन 'पारं' निर्वाणं तद् 'एकगुणेन' राग-द्वेषपरिहारलक्षणेन जीवः प्राप्नोतीति गम्यते। आदिग्रहणाद् देशीभाषानियतं सूत्रं गृह्यते, यथा-''दिगिंछापरीसहे''। 'दिगिंछा' इति बुभुक्षा ॥

स्वसमयसूत्रं यथा-''करेमि भंते! सामाइयं'' इत्यादि ॥ परसमयसूत्रं यथा- पंच खंधे वयंतेगे, बाला उ खणजोइणो। उत्सर्गसूत्रं यता-''अभिक्खणं निव्विगइं गया य'' इत्यादि। अपवादसूत्रं यथा-

तिण्हमन्नयरागस्स, निसिज्ञा जस्स कप्पई।
जराए अभिभूयस्स, वाहियस्सा तवस्सिणो ॥

'हीनम्' इति हीनाक्षरं यैरक्षरैर्विना सूत्रस्यार्थो न पूर्यते, 'अधिकम्' इत्यधिकाक्षरम्,

Jain Education International For Private & Personal Use Only www.jainelibrary.org

एवंविधं यत् पूर्वमजानता सूत्रमधीतं तस्यार्थं सम्यगवगम्य हीनं प्रतिपूरयति अधिकं परित्यजति॥ जिनकल्पिकसूत्रं यथा-

तेगिच्छं नाभिनंदिज्ञा, संचिक्खऽत्तगवेसए।
एवं खु तस्स सामन्नं, जं न कुज्ञा न कारवे ॥

स्थविरकल्पिकसूत्रं यथा-भिक्खू अ इच्छिज्ञा अन्नयरिं तेगिच्छि आउंटित्तए। अथवा जिनकल्पिक-स्थविरकल्पिकयोः सामान्यसूत्रमिदम्- "संसट्ठकप्पे चरिज्ञ भिक्खू"

आर्यासूत्रं यथा-"कप्पइ निग्गंथीणं अंतोलित्तं घडिमत्तयं धारित्तए" "कालि" त्ति कालविषयं किमपि सूत्रं भवति, यथा अनागतं कालमङ्गीकृत्य "न या लभेज्ञा निउणं सहायं, गुणाहियंवा गुणओ समं वा। इत्यादि ॥

"वयणाई" ति 'वचनम्' एक-द्वि-बहुवचनादिकं षोडशधा यथा पीठिकायाम तत्प्रतिपादकं सूत्रं यथा आचाराङ्गे भाषाध्ययने- एगवयणं वयमाणे एगवयणं वएज्ञा, दुवयणं वयमाणे दुवयणं वएज्ञा, बहुवयणं वयमाणे बहुवयणं वएज्ञा, इत्थीवयणं वयमाणे इत्थीवयणं वएज्ञा। इत्यादि ॥ आदिशब्दाद् भयसूत्रादिपरिग्रहः। इत्थमनेकधा सूत्राणां सम्भवे तदर्थश्रवणमन्तरेण न शक्यते "कीदृशम्?" इति विवेकः कर्त्तुमिति कर्त्तव्यमर्थग्रहणम् ॥ अथ ते शिष्या ब्रूयुः-'यः कण्ठतः सूत्रे निबद्धोऽर्थस्तेनैव वयं तुष्टाः किमस्माकं दुरधिगमत्वाद् बहुपरिक्लेशेन "मज्ञण निसिज्ञ अक्खा" इत्यादिप्रक्रियापुरस्सरमर्थग्रहणप्रयासेन ?' इति,ते इत्थंब्रुवाणाः प्रज्ञापयितव्याः। कथम्? इत्याह-

[भा.१२२२]जे सुत्तगुणा खलु लक्खणम्मि कहिया उ सुत्तमाईया।
अत्थग्गहणमराला, तेहिं चिय पन्नविज्ञंति ॥

वृ- पीठिकायां लक्षणद्वारे ये सूत्रस्य गुणाः "निद्दोसं सारवंतं च" इत्यादिना कथिताः, यद्वा "सुत्तमाईय" त्ति "सुत्तं तु सत्तमेव उ" इत्यादिना प्रतिपादिताः, 'तैरेव' हेतुभिरर्थग्रहणे मरालाः-अलसाः शिष्याः प्रज्ञाप्यन्ते। यथा-भो भद्राः! निर्दोष-सारवद्-विश्वतोमुखादयः सूत्रस्य गुणा भवन्ति, ते च यथाविधि गुरुमुखादर्थे श्रूयमाण एव प्रकटीभवन्ति। किञ्च यथा द्वासप्तति-कलापण्डितो मनुष्यः प्रसुप्तः सन्न किञ्चित् तासां कलानां जातीने एवं सूत्रमप्यर्थेनाऽबोधितं सुप्तमिव द्रष्टव्यम्। विचित्रार्थनिबद्धानि सोपस्काराणि च सूत्राणि भवन्ति, अतो गुरुसम्प्रदायादेव यथावदवसीयन्ते न यतस्ततः। इत्थं युक्तियुक्तैर्वचोभि प्रज्ञापितास्ते विनेयाः प्रतिपद्यन्ते गुरूणामुपदेशम्, गृह्णन्ति द्वादश वर्षाणि विधिवदर्थमिति ॥ गतमर्थग्रहणद्वारम्। अथानियत-वासद्वारम्-तत्रार्थग्रहणे समापिते सति यो विनेय आचार्यपदयोग्यः स नियमाद् द्वादश वर्षाणि देशदर्शनं कारयितव्यः। शिषयः पृच्छति-तेन द्वादश वर्षाणि सूत्रग्रहणं कृतं द्वादशभिर्वर्षैरर्थ समग्रोऽपि गृहीतः, अतो देशदर्शनेन विना किमिवास्य न सिध्यति? इति उच्यते-

[भा.१२२३]जइ वि पगासोऽहिगओ, देसीभासाजुओ तहा वि खलु।
उंदुय सिया य वीसुं, एरगमाई य पच्चक्खं ॥

वृ- यद्यपि तेन 'प्रकाशः' अर्थ सूत्रस्य 'अधिगतः' सम्यग् विज्ञातस्तथापि 'खलु' निश्चयेनासौ विनेयो देशदर्शनेन देशीभाषायुतः कर्त्तव्यः। कुतः? इत्याह-"उंदुय" इत्यादि। 'उन्दुकम्' इति

Jain Education International For Private & Personal Use Only www.jainelibrary.org

स्थानम् । ''सिय''त्ति स्याच्छब्दो भवत्यर्थे आशङ्कायां भजनायां वा । तत्र भवत्यर्थे सुप्रसिद्धः । आशङ्कायां यथा-''दव्वथओ भावथओ दव्वथओ बहुगुण त्ति बुद्धि सिया ।'' भजनायां यथा-''सिय तिभागे सिय तिभागतिभागे'' पत्र इत्यादि । ''वीसुं'' तिविष्वक् पृथगित्यर्थः । 'एरका' गुन्द्रा भद्रमुस्तक इत्यर्थः एते आदिग्रहणात् पयः पिच्चं नीरमित्यदयश्च शास्त्रप्रसिद्धाः शब्दास्तेषु तेषु देशेषु लोकेन तथातथा व्यवह्रियमाणा देशदर्शनं कुर्वता 'प्रत्यक्षम्' इति प्रत्यक्षत उपलभ्यन्ते ।। आह यद्यसौ तान् प्रत्यक्षतो नोपलभेत ततः का नाम न्यूनता भवेत् ? उच्यते-

[भा.१२२४]जो वि पगासो बहुसो, गुणिओ पच्चक्खओ न उवलद्धो ।
जच्चंधस्स व दंदो, फुडो वि संतो तहा स खलु ।।

वृ- योऽपि 'प्रकाशः' अर्थो बहुशः 'गुणितः' स्म्यस्तीकृतः परं न प्रत्यक्षत उपलब्धः स जात्यन्धस्येव चन्द्रः स्फुटोऽपि सन् 'खलुः' अवधारणे तथैवास्फट एव मन्तव्यः । इदमत्र हृदयम्-यथा चन्द्रः प्रकटोऽपि साक्षाद्दर्शनं विना जात्यन्धस्य न परिस्फुटाकारः प्रतिभासते एवमस्यापि शास्त्रानुसारतः प्रकटा अपि प्रत्यक्षदर्शनमन्तरेण न परिस्फुटा व्यवहारोपयोगिनोऽर्था प्रतिभासन्ते ।। यतश्चैवं ततः-

[भा.१२२५]आयरियत्तअभविए, भयणा भविओ परीइ नियमेणं ।
अप्पतइओ जहन्ने, उभयं किं चाऽऽरियं खेत्तं ।।

वृ- आचार्यत्वस्य-आचार्यपदस्य अभव्यः-अयोग्यस्तस्मिन् 'भजना' अर्थग्रहणानन्तरं देशदर्शनं कार्यते वा न वा, यस्तु 'भव्यः' आचार्यपदयोग्यः स नियमेन 'पर्येति' देसदर्शनाय पर्यटति । स चाऽऽत्मतृतीयो जघन्येनावश्यन्तया कृत्वा प्रेषणीयः । किञ्च 'उभयम्' इति किं ऋतुबद्धकालप्रायोग्यमिदं क्षेत्रम् ? उत वर्षावासयोग्यम् ? तथा किमेतद् 'आर्यं' सार्द्धपञ्चविंशति-जनपदमध्यवर्त्ति ? आहोश्चिदनार्यम् ? एतत् सर्वमपि देशदर्शनं विदधानो जानाति ।।

अथ देशदर्शनस्यैव गुणान्तराभिधित्सया द्वारगाथामाह-

[भा.१२२६]दंसणसोही थिरकरण देस अइसेस जनवयपरिच्छा ।
काउ सुयं दायव्वं, अविनीयाणं विवेगो य ।।

वृ-देशदर्शनं कुर्वतो दर्शनशुद्धिरात्मनः स्थिरीकरणं चान्येषां भवति, ''देस''त्ति नानादेश-भाषासु कौशलम् 'अतिशेषाः' अतिशयाः जनपदपरीक्षा च जायन्ते । तत एतानि दर्शनशुध्यादीनि कृत्वा विनीतेभ्यः श्रुतं दातव्यम्, अविनीतानां 'विवेकः' परित्यागः कर्त्तव्य इति द्वारगाथासमासार्थ।।

अथ विस्तरार्थं बिभणिषुराह-

[भा.१२२७]जम्मण-निक्खमणेसु य, तित्थयराणं महानुभावाणं ।
इत्थ किर जिनवराणं, आगाढं दंसणं होइ ।।

वृ- जन्म-निष्क्रमणशब्दाभ्यां तदाधारभूता भूमयो गृह्यन्ते । जन्मभूमिषु अयोध्यादिषु, निष्क्रमणभूमिषु उज्जयन्तादिषु, चशब्दाद् ज्ञानोत्पत्तिभूमिषु पुरिमतालादिषु, निर्वाणभूमिषु सम्मेतशैल-चम्पादिषु तीर्थकराणां 'महानुभावानां' सातिशया-ऽचिन्त्यप्रभावाणां सम्बन्धिनीषु विहरतः 'अत्र किल भगवतां जिनवराणां जन्म जज्ञे, अत्र तु भगवन्तो दीक्षां प्रतिपन्नाः, इह केवलज्ञानमासादितवन्तः, इह पुनः परिनिर्वृताः' एवं बहुजनमुखेन श्रुत्वा स्वयं च दृष्ट्वा

Jain Education International For Private & Personal Use Only www.jainelibrary.org

निशङ्कितत्वभावाद् 'आगाढम्' अतीवविशुद्धं 'दर्शनं' सम्यक्त्वं भवतीति ॥

गतं दर्शनशुद्धिद्वारम्। अथ स्थिरीकरणद्वारमाह-

[भा.१२२८] संवेगं संविग्गाण जनयए सुविहिओ सुविहियाणं।
आउत्तो जुत्ताणं, विसुद्धलेसो सुलेस्साणं ॥

वृ- 'संविग्नानां' साधूनां संवेगं जनयति, 'अहो! अयं भव्याचार्योऽवगाहितसमस्तसिद्धान्त-सिन्धुरभ्यस्तचरणकरणसामाचारीक इत्थं देशदर्शनं करोति' इति भावनया स्थिरीकरणं करोतीत्यर्थः। स्वय 'सुविहितः' शोभनविहितानुष्ठानस्तेषामपि सुविहितानाम्, स्वयम् 'आयुक्तः' विकथा-निद्रादिप्रमादैरप्रमत्तस्तेषामपि 'युक्तानाम्' अप्रमादिनाम्, स्वयं विशुद्धलेश्यः तेषामपि सुलेश्यानामिति ॥ गतं स्थिरीकरणद्वारम्। अथ देशद्वारम्। अत्र चविशेषचूर्णिकृता दर्शनशुद्धिद्वारमेव विवृण्वतेयं गाथा गृहीता, संवेगस्य सम्यग्दर्शनलक्षणत्वात् संवेगजनने दर्शनशुद्धिः कृता भवतीति कृत्वा; स्थिरीकरणद्वारं तु मूलतः एव नोपात्तम्। द्वारगाथायामपि "दंसणसोही देसप्पवेस अइसेस जणवयपरिच्छा" इत्येष एव पाठो गृहीतः, अतस्तदभिप्रायेण गतं दर्शनशुद्धिद्वारम्, अथ देशप्रवेशद्वारं व्याचष्टे-

[भा.१२२९] नाणादेसीकुसलो, नाणादेसीकयस्स सुत्तस्स।
अभिलावअत्थकुसलो, होइ तओ नेन गंतव्वं ॥

वृ- नानाप्रकारा-मगध-मालव-महाराष्ट्र-लाट-कर्णाट-द्रविड-गौड-विदर्भादिदेशभवा या देशीभाषा तस्यां कुशलः सन् 'नानादेशीकृतस्य' नानादेशभाषानिबद्धस्य सूत्रस्य अभिलापे-उच्चारणे अर्थकथने च कुशलो भवति, यत एवं ततोऽनेन देशदर्शनार्थं गन्तव्यम् ॥ तथा-

[भा.१२३०]कहयति अभासियाण वि, अभासिए आवि पव्वयावेइ।
सव्वेवि तत्थ पीइं, बंधंति सभासिओ ने त्ति ॥

वृ-नञः कुत्सार्थत्वात् कुत्सिता-अव्यक्तवर्णविभागा भाषा येषां तेऽभाषिकास्तेषामप्यसौ धर्मं कथयति, निशेषदेशभाषानिष्णातत्वात्। अभाषिकाँश्चापि तद्देशभाषया प्रतिबोध्य प्रव्राजयति। सर्वेऽपि च शिष्याः 'तत्र' आचार्ये प्रीतिं बध्नन्ति, स्वभाषिकः 'मे' अस्माकम् अयमिति कृत्वा ॥ तथा-

[भा.१२३१]पियधम्मऽवज्जभीरू, साहम्मियवच्छलो असढभावो।
संविग्गावेइ परं, परदेसपवेसणे साहू ॥

वृ- 'प्रियधर्मा' धर्मश्रद्धालुः, अवद्यं-पापकर्म तस्माद् भीरुरवद्यभीरु, साधर्मिकाः-साधवस्तेषां वत्सलो द्रव्यतो भक्त-पानादिना भावतस्तु स्खलितादिषु सारणादिना, 'अशठभावः' मातृस्थानरहितः, एवंविधोऽसौ साधुः परदेशप्रवेशने वर्त्तमानः 'परम्' अनयं संयमयोगेषु सीदन्तमपि 'संविग्नयति' सदुपदेशदानादिना संविग्नं करोतीति ॥

गतं देशद्वारं देशप्रवेशद्वारं वा। अथातिशयद्वारमाह-

[भा.१२३२] सुत्त-ऽत्थथिरीकरणं, अइसेसाणं च होइ उवलद्धी।
आयरियदंसणेणं, तम्हा सेविज्ञ आयरिए ॥

वृ- आचार्याणां दर्शनेन-सेवनेनेति यावत् सूत्रार्थस्थिरीकरणमतिशयानां च अपूर्वाणाम्

Jain Education International For Private & Personal Use Only www.jainelibrary.org

'उपलब्धिः' प्राप्तिर्भवति। यत एवं तस्मात् 'सेवेत' पर्युपासीताऽऽचार्यान् ॥

एतदेव व्याख्यानयति-

[भा.१२३३] उभए वि संकियाइं, पुव्विं जाइं सि पुच्छमाणस्स।
होइ जओ सुत्तत्थे, बहुस्सुए सेवमाणस्स ॥

वृ- 'उभये' सूत्रेऽर्थे च यानि पूर्वं 'से' तस्य शङ्कितानि पदानि तानि आचार्याणां समीपे पृच्छतो निशङ्कितानि जायन्ते। एवं च बहुश्रुतान् सेवमानस्य 'जयः' सूत्रार्थविषयोऽभ्यासातिशयो भवति, अतो बहुश्रुतपर्युपानं विधेयम् ॥ अपि च-

[भा.१२३४] भवियाइरिओ देसाण दंसणं कुणइ एस इय सोउं।
अन्ने वि उज्जमंते, विणिक्खमंते य से पासे ॥

वृ- 'भव्याचार्य एष देशानां दर्शनं करोति' इति श्रुत्वा 'अन्येऽपि' पर्युपास्यमानाचार्य-सम्बन्धिनः शिष्याः 'उद्यच्छन्ते' सूत्रार्थग्रहणादौ उद्यमं कुर्वन्ति। गृहिणोऽपि च तद्गुणग्रामरञ्जि-तमनसः 'विनिष्क्रामन्ति' दीक्षां प्रतिपद्यनते 'से' तस्य भविष्यदाचार्यस्य पार्श्वे इति ॥ अति-शयानामुपलब्धि कथं भवति ? इत्याह-

[भा.१२३५] सुत्तत्थे अइसेसा, सामायारी य विज्ज-जोगाई।
विज्ञा जोगा य सुए, विसंति दुविहा अओ होंति ॥

वृ- इहातिशयास्त्रिविधाः, तद्यथा-सूत्रार्थातिशयाः १ सामाचार्यतिशयाः २ विद्या-योगाः आदिशब्दाद् मन्त्राश्च ३ इति त्रयोऽतिशयाः। तत्र विद्या स्त्रीदेवताधिष्ठिता पूर्वसेवादिप्रक्रियासाध्या वा, योगाः पादलेपप्रभृतयो गगनगमनादिफलाः, मन्त्राः पुरुषदेवताधिष्ठिताः पठितसिद्धा वा। यद्वा विद्या योगाः चशब्दाद् मन्त्राश्च श्रुते एव 'विशन्ति' अन्तर्भवन्ति, अतो द्विविधा अतिशया भवन्ति-सूत्रार्थातिशयाः सामाचार्यतिशयाश्चेति। एषामतिशयानामुपलब्धिरपूर्वाचार्यपर्युपासनायां भवति ॥ अथ सामाचार्या अतिशयं बिभावयिषुराह-

[भा.१२३६] निक्खमणे य पवेसे, आयरियाणं महानुभावाणं।
सामायारीकुसलो, अ होइ गणसंपवेसेणं ॥

वृ- स देशदर्शनं कुर्वाणस्तेषु तेषु नगरादिषु बहुश्रुतानामाचार्याणां महानुभावानां सम्बन्धी यो गणः-गच्छस्तन्मध्ये यः सम्यग्-एकीभावेन एकत्रावस्थानलक्षणेन प्रवेशस्तेन बहुशो गणान्तरेषु निष्क्रमणे प्रवेशे च सामाचारीकुशलो भवति ॥ कथम् ? इत्याह-

[भा.१२३७] आगंतुसाहुभावम्मि अविदिए धन्नसालमाइठिया।
उप्पत्तियाउ थेरा, सामायारीउ ठाविंति ॥

वृ- आगन्तुकाः-प्राघुणका उपसम्पन्ना वा तेषां साधूनां भावे 'अविदिते' 'कीदृशेनाभि-प्रायेणाऽऽगताः ? के वाऽमी ?' इत्यपरिज्ञाते केचित् 'स्थविराः' आचार्या धान्यशालायाम् आदिशब्दाद् घृतशालादिषु च स्थिताः 'औत्पत्तिकीः' अनुत्पन्नपूर्वा सामाचारीः स्थापयन्ति ॥ कथम् ? इत्याह-

[भा.१२३८] सव्वे वि पडिग्गहए, दंसेउं नीह पिंडवायट्ठा।
अहिमरमायासंका, पडिलेहेउं व पविसंति ॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

वृ- ते आचार्या 'पिण्डपातार्थं' भिक्षानिमित्तं साधून् निर्गच्छतो भणन्ति-आर्या ! सर्वेऽपि प्रतिग्रहान् दर्शयित्वा निर्गच्छत, अदर्शितप्रतिग्रहैर्न गन्तव्यम् । कुत इत्थं कुर्वन्ति ? इत्याह- 'अभिमराद्याशङ्कया' मा कश्चिदभिमर उदायिनृपमारकवत् श्रमणवेषेणाऽऽगतो भवेत्, आदिग्रहणेन चौरो वा मा धान्यादिमोषणायाऽऽगतो भवेदित्याद्याशङ्कयाऽपूर्वां सामाचारीं स्थापन्ति। भिक्षाप्रतिनिवृत्ता अपि च गुरूणां पुरतः सर्वं प्रत्युपेक्ष्य ततः प्रविशन्ति, तैरेवाभिमरादिभि कारणैरिति ।। गतमतिशयद्वारम् । अथ जनपदरीक्षाद्वारमाह-

[भा.१२३९] अब्भे नदी तलाएषु कूवे अइपूरए य नाव वणी ।
मंस-फल-पुप्फभोगी, वित्थिन्ने खेत्त कप्प विही ।।

वृ- स देशदर्शनं कुर्वन् जनपदानां परीक्षां करोति-कस्मिन् देशे कथं धान्यनिष्पत्ति ? । तत्र कचिद् देशेऽभ्रैः सस्यं निष्पद्यते वृष्टिपानीयैरित्यर्थः, यथा लाटविषये । कापि नदीपानीयैः, यथा सिन्धुदेशे । कचित्तु तडागजलैः, यथा द्रविडविषये । कापि कूपपानीयैः, यथा उत्तरापथे । कचिदतिपूरकेण, यथा बन्नासायां पूरादवरिच्यमानायां तत्पूरपानीयभावितायां क्षेत्रभूमौ धान्यानि प्रकीर्यन्ते; यथा वा डिम्भरेलके महिरावणपूरेण धान्यानि वपन्ति । "नाव" इति यत्र नावमारोप्य धान्यमानीतमुपभुज्यते, यथा काननद्वीपे । "वणि" त्ति यत्र वाणिज्येनैव वृत्तिरुपजायते न कर्षणेन, यथा मथुरायाम् । "मंस" त्ति यत्र दुर्भिक्षे समापतिते मांसेन कालोऽतिवाह्यते । तथा यत्र पुष्पफलभोगी प्राचुर्येण लोकः, यथा कोङ्कणादिषु । तथा कानि विस्तीर्णानि क्षेत्राणि ? कानि वा सङ्क्षिप्तानि ? । "कप्पे" त्ति कस्मिन् क्षेत्रे कः कल्पः ?, यथा सिन्धुविषयेऽनिमिषाद्याहारोऽगर्हितः। "विहि" त्ति कस्मिन् देशे कीदृशः समाचारः ? यथा सिन्धुषु रजकाः सम्भोज्याः, महाराष्ट्रविषये कल्पपाला अपि सम्भोज्या इति ।। अपि च-

[भा.१२४०] सज्झाय-संजमहिए, दानाइसमाउले सुलभवित्ती ।
कालुभयहिए खेत्ते, जाणइ पडनीयरहिए य ।।

वृ- स्वाध्यायहितं-यत्राखण्डे सूत्राऽर्थपौरुष्यौ भवतः । संयमहितं-स्त्रीदोषरहितमल्पबीजहरितादि वा । "दानाइ" त्ति दानश्राद्धैः आदिग्रहणादभिगमश्राद्धैर्वा समाकुलम् । अत एव सुलभासुप्रापा वृत्तिः-प्राणवर्त्तनहेतुराहारसम्पतिर्यत्र तत् सुलभवृत्तिकम्, तथा किमिदमागन्तुकभद्रकम्? उत वास्तव्यभद्रकम् ? इत्याद्युपलक्षणाद् द्रष्टव्यम् । "कालुभयहिए खेत्ते" त्ति अमूनि वर्षावासप्रायोग्याणि अमूनि ऋतुबद्धकालयोग्यानीत्युभयकालहितानि क्षेत्राणि जानाति । तथा प्रत्यनीकः-साध्वादीनामुपद्रवकारी तद्रहितानि च क्षेत्राणि सम्यग् जानातीति ।। गतं जनपदपरीक्षाद्वारम् । यस्मादे, गुणास्तस्मादवश्यं देशदर्शनं कर्त्तव्यम् । गतं "पव्वज्जा सिक्खावय" इत्यादिमूलद्वारगाथाप्रतिबद्धमनियतवासद्वारम् । अथ निष्पत्तिद्वारम् । तच्चानन्तरोक्तेऽनियतवासद्वारे वक्ष्यमाणे विहारद्वारे च सम्भवति । तत्रानियतवासद्वारे तावद् दर्श्यते-इत्थं तेन देशदर्शनं कुर्वता शिष्याः प्रतीच्छकाश्च सामाचार्यां सूत्राऽर्थग्राहणायां च निष्पादयितव्या इत्यत्रान्तरे यदुक्तं प्रतिद्वारगाथायां "काउ सुयं दायव्वं, अविणीयाणं विवेगो य ।" तदिदानीमभिधित्सुर्द्वारगाथामाह-

[भा.१२४१] उवसंपज्ज थिरत्तं, पडिच्छणा वायणोल्लछगणे य ।
घट्टण-रुंचण-पत्ते, दुट्ठासे तहिं गए राया ।।

वृ- प्रथमं प्रतीच्छका यथा तमुपसम्पद्यन्ते तथा वक्तव्यम्। तत आत्मनः प्रतीच्छकानां च यथा स्थिरत्वं तुलनया करोति। ततस्तेषां प्रतीच्छना वाचना च यथा भवति। ततः प्रमाद्यतां आर्द्रच्छगणदृष्टान्तो घट्टना रुञ्चना पत्रद्दष्टान्ताश्च यथाऽभिधीयन्ते। दुष्टाश्वविषयं दृष्टान्तं यथा साधव आचार्यानुद्दिश्य दर्शयन्ति। "तहिं गए" त्ति यत्राऽऽचार्यास्तिष्ठन्ति तत्र गतानां यथा राजदृष्टान्तः सूरिभिरुदाह्रियते। तदेतत् सर्वं वक्तव्यमिति द्वारगाथासमासार्थः॥

अथ विस्तरार्थं बिभणिषुः प्रथमद्वारमधिकृत्याह-

[भा.१२४२] काहिइ अव्वोच्छित्तिं, सुत्त-ऽत्थाणं ति सो तदट्ठाए।
अभिगम्मइ नेगेहिं, पडिच्छएहिं विहरमाणो॥

वृ- एष महाभागः सूत्रार्थयोरव्यवच्छित्तिं करिष्यतीतिबुध्धा 'सः' भव्याचार्य 'तदर्थं' सूत्रार्थग्रहणनिमित्तमभिगम्यतेऽनेकैः प्रतिच्छकैः 'विहरमाणः' देशदर्नं कुर्वन्निति॥ आह किमसौ डिण्डिमाडम्बेण घोषयति यथा 'अहं बहुश्रुतोऽहं बहुश्रुतः' इति यदेवमनेकैः प्रतीच्चकैरभिगम्यते?, नैवम्, न खलु सद्विवेकसुधाधाराधौतचेतसः सन्तः सन्तः कदाचनापि स्वगुणविकत्थने प्रवृत्तिमातन्वते, मिथ्याभिमानाख्यप्रबलतमतमस्तिरस्कृतसज्ज्ञानलोचनप्रसराणामितरजन्तूनामेव तत्र प्रवृत्तिसम्भवात्। उक्तञ्च-

मोहस्य तदपि विलसितमभिमानो यः परप्रीणितायाः।
तत् तमसोऽपि तमिस्रं, याऽऽत्मस्तुतिरात्मना क्रियते॥

यद्येवं ततः कथमिवासावेवमेव प्रसिद्धिमारोहति? इति इत्युच्यते—

[भा.१२४३] वासावज्जविहारी, जइ वि य न विकंथए गुणे नियए।
अभणंतो वि मुणिज्जइ, पगइ च्चिय सा गुणगणाणं॥

वृ- वर्षावर्जविहारी, वर्षासु चतुरो मासानेकत्रस्थायी अन्यदा पुनरनियतविहारीत्युक्तं भवति। स एवंविधो यद्यपि न विकत्थते 'निजकान्' आत्मीयान् गुणान् तथापि 'अभणन्नपि' स्वगुणान् अकीर्त्तयन्नपि ज्ञायते। कुतः? इत्याह-प्रकृतिरेव सा 'गुणगणानां' ज्ञानादिगुणसमूहानाम्। तदुक्तम्-

अभणंता वि हु नज्जंति सुपुरिसा गुणगणेहि नियएहिं।
किं बोल्लंति मणीओ, जाओ लक्खेहि धिप्पंति॥

एतदेवान्योक्तिदृष्टान्तेन द्रढयति-

[भा.१२४४] भमरेहि महुयरीहि य, सूइज्जइ अप्पणो य गंधेणं।
पाउसकालकलंबो, जइ वि निगूढो वणनिगुंजे॥

वृ- इह किल कदम्बकवृक्षाः प्रावृषि जलधरधाराभिहताः पुष्पन्ति। ततः प्रावृट्काले यः कदम्बः स यद्यपि वननिकुञ्जे 'निगूढः' गुप्तस्तिष्ठति तथापि भ्रमरैर्मधुकरीभिश्चात्मनः सम्बन्धिना गन्धेन च प्रसरता 'सूच्यते' ज्ञाप्यते यथा 'अत्र कदम्बवृक्षस्तिष्ठति'। एवमयमपि भ्रमर-मधुकरीकल्पाभि साधु-साध्वीभिः परिमलकल्पेन च निजगुणनिकुरम्बेन प्रसर्पता कदम्बवद् उद्यानादावत्यन्तनिगूढोऽपि तिष्ठन् सूच्यते॥ यदि वा-

[भा.१२४५] कत्थ व न जलइ अग्गी, कत्थ व चंदो न पायडो होइ।
कत्थ वरलक्खणधरा, न पायडा होंति सप्पुरिसा॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

वृ- कुत्र मी वान ज्वलति' न दीप्यतेऽग्नि ? कुत्र वा चन्द्र उदयप्राप्तः प्रकटो न भवति ? कुत्र वा वराणि-उत्तमानि लक्षणानि-अभ्यन्तरतो ज्ञानादीनि बाह्यतः शरीरसौन्दर्यादीनि शङ्ख-चक्रादीनि वा धारयन्तीति वरलक्षणधराः सत्पुरुषाः प्रकटा न भवन्ति ? ॥

अत्रपरोऽनुपपत्तिमुद्भावयन्नाह-

[भा.१२४६] उदए न जलइ अग्गी, अब्भच्छन्नो न दीसई चंदो।
मुक्खेसु महाभागा, विज्ञापुरिसा न भायंति ॥

वृ- उदके न ज्वलत्यग्नि किन्तु विध्यायति, अभ्रच्छन्नश्चन्द्रो न दृश्यते, 'मूर्खेषु' मूर्खाणां पुरतो महाभागा विद्याप्रधानाः पुरुषा विद्यापुरुषास्तेऽपि 'न भान्ति' न शोभन्ते; ततः "कत्थ व न जलइ अग्गी" इत्यादि नोपपद्यते, तदयुक्तम्, अभिप्रायापरिज्ञानात्, इह हि स्वविषय एवाग्नि-चन्द्र-सत्पुरुषाणां ज्वलनादि सामर्थ्य चिन्त्यते न त्वविषये ॥ कः पुनरमीषां स्वविषयः ? इत्याह-

[भा.१२४७] सुक्किंधनम्मि दिप्पइ, अग्गी मेहरहिओ ससी भाइ।
तव्विहजने य निउणे, विज्ञापुरिसा वि भायंति ॥

वृ- 'शुष्केन्धने' शुष्ककाष्ठादौ दीप्यतेऽग्नि, 'मेघरहितः' शरदादिकालेऽभ्रैरच्छन्नः शशी 'भाति' प्रकाशते, 'तद्विधजने च' तादृशे सहृदयलोके 'निपुणे' व्याकरण-प्रमाणादिशास्त्रकुशले विद्यापुरुषा अपि 'भान्ति' शोभां लभन्ते । एष त्रयाणामप्यमीषां स्वविषयः, अत्र च सर्वत्राप्यमी दीप्यन्ते, अतो न किञ्चिदनुपपन्नम् ॥ अत्रैवापरं दृष्टान्तमाह-

[भा.१२४८] कुमुओयररसमुद्धा, किं न विबोहिंति पुंडरीयाइं।
सूरकिरणा ससिस्स व, कुमुयाणि अपंकयरसन्ना ॥

[भा.१२४९] न य अप्पगासगत्तं, चंदा-ऽऽइच्चाण सविसए होइ।
इय दिप्पंति गुणड्ढा, मुक्खेसु हसिज्जमाणा वि ॥

वृ- कुमुदानामुदराणि कुमुदोदराणि तेषु रसः-मकरन्दः तस्मिन् मुग्धाः-अनभिज्ञाः, तदानीं तेषामप्रबुद्धत्वाद् ईदृशोऽमीषां मकरन्द इति न विदन्तीत्यर्थः; एवंविधाः सूर्यकिरणा यद्यविषयत्वात् कुमुदानि न विबोधयन्ति ततः किं स्वविषयभूतानि पुण्डरीकाणि न विबोधयन्ति ? बोधयन्त्येव। शशिनो वा किरणा यदि 'अपङ्कजरसज्ञाः' पङ्कजरसास्वादमुग्धास्ततः किं स्वविषयभूतानि कुमुदानि न बोधयन्ति ? । ततश्च 'न च' नैवाऽप्रकाशकत्वं चन्द्रा-ऽऽदित्ययोः स्वविषये भवति किन्तु प्रकाशकत्वमेव, 'इति' अमुनैव प्रकारेण गुणैः-ज्ञानादिभिराढ्याः-समृद्धाः 'मूर्खेषु' पशुप्रायेषु हस्यमाना अपि 'दीप्यन्ते' सहृदयहृदयेषु प्रकाशन्ते ॥ उक्तमानुषङ्गिकम् । प्रकृतमनुसन्धीयते-

[भा.१२५०] सो चरणसुट्ठियप्पा, नाणपरो सूइओ अ साहूहिं।
उवसंपया य तेसिं, पडिच्छणा चेव साहूणं ॥

वृ- 'सः' इति भविष्यदाचार्य चरणसुस्थितात्मा तथा 'ज्ञानपरः' सूत्रा-ऽर्थपौरुषीकरणं प्रति उद्युक्तः परां निष्ठां प्राप्तो वा दर्शनाविनाभावित्वाद् ज्ञानस्य दर्शनपर इत्यपि द्रष्टव्यम्, स च साधुभि स्वपरिवारवर्त्तिभिरपरेषां साधूनां पुरतः 'सूचितः' श्लाधितः ततस्तेषां साधूनां तस्यान्तिके उपसम्पद् भवति, तेन च तेषां यथाविधि प्रतीच्छना कर्त्तव्या इति । एष एक उपसम्पदः प्रकार उक्तः ॥ अथ द्वितीयं प्रकारमाह-

Jain Education International For Private & Personal Use Only www.jainelibrary.org

[भा.१२५१] ण्हाणाइ समोसरणे, परियट्टिंतं सुणित्तु सो साहुं।
अट्ठित्ति पडिच्चोयण, उवसंप दीवणा अत्थे ॥

वृ- स्नानादौ आदिशब्दाद् रथयात्रादौ 'समवसरणे' साधुमीलके "अट्ठे लोए" इति व्यञ्जनभेददूषितं सूत्रं परिवर्त्तयन्तं साधुं कमपि श्रुत्वा स प्रतिनोदनां करोति-"अट्ठे लोए" इति पठ। स प्राह-किम्? इति। गीतार्थो ब्रूते-"अट्ठे" इति अर्थो न मिलति। इतरः प्राह-किम् अस्यारथोऽप्यस्ति?। (गीतार्थ प्राह-) बाढम् नमस्कारमादिं कृत्वा सर्वस्यापि श्रुतस्यार्थो विद्यते। स आह-यद्येवं तर्हि "अट्टि" त्ति पदस्य कोऽर्थ? उच्यते-'आर्त्तश्चतुर्द्धा नाम-स्थापना-द्रव्य-भावभेदात्, नाम-स्थापने सुगमे, द्रव्यतः सचित्तादिद्रव्यैरप्राप्तैः प्राप्तवियुक्तैर्वा य आर्त्तः स द्रव्यार्त्तः, क्रोधादिभिरभिभूतो भावार्त्तः, एवं प्रकारद्वयेनायं लोक आर्त्तो वर्त्तते।' इत्याकर्ण्य प्रमुदितः स साधुश्चिन्तयति-'अहो! अस्य सूत्रलवस्यापीदृग् हृदयङ्गमोऽर्थस्ततो यदि सर्वस्याधीतस्यार्थमवबुध्ये ततः सुन्दरं भवति' इत्यभिसन्धायाऽर्थग्रहमार्थं तस्यैव पार्श्वे उपसम्पदं प्रतिपद्यते। ततोऽसौ विधिना तस्यार्थे दीपनं करोति, अर्थं कथयतीत्यर्थः। एष द्वितीयः प्रकारः ॥ अथ तृतीयमपि प्रकारमाह-

[भा.१२५२] अहवा वि गुरुसमीवं, उवागए देसदंसणम्मि कए।
उवसंपय साहूणं, होइ कयम्मी दिसाबंधे ॥

वृ- अथवा देशदर्शने कृते सति यदाऽसौ गुरूणां समीपमुपागतो भवति तदा गुरुभिराचार्यपदे प्रतिष्ठाप्य दिग्बन्धे 'कृते' अनुज्ञाते सतिविहारं कुर्वतोऽस्य पार्श्वे प्रतीच्छकसाधूनामुपसम्पद् भवतीति ॥ व्याख्यातं त्रिभि प्रकारैरुपसम्पद्द्वारम्। अथ स्थिरत्वद्वारमभिधातुकाम आह-

[भा.१२५३] आयपरोभयतुलणा, चउव्विहा सुत्तसारणित्तरिया।
तिण्हऽट्ठा संविग्गे, इयरे चरणेहरा नेच्छे ॥

वृ- तत्रासावात्मपरोभयविषयां तुलनां करोति। सा च प्रत्येकं चतुर्विधा वक्तव्या। तथा ये केचित् तद्गुणावर्जिता अगारिणः प्रव्रजन्ति तेषामुपसम्पन्नानां चासौ सूत्रसारणां करोति, सूत्रं पाठयतीत्यर्थः; उपलक्षणं चैतत्, तेनाऽऽसेवनाशिक्षामपि ग्राहयति। तथा तेषामुभयेषामप्यसौ इत्वरां दिशं बध्नाति, यथा-यावदाचार्याणां सकाशं व्रजामस्तावदहमेवाचार्योऽहमेवोपाध्यायः, तत्रगतानामाचार्या ज्ञायका इति। "तिण्हट्ठा संविग्गि" त्ति ये संविग्नाः साधवस्ते 'त्रयाणां' ज्ञानदर्शनचारित्राणामर्थाय उपसम्पद्यमानाः प्रत्येष्टव्याः। "इयरे चरणि" त्ति 'इतरे' पार्श्वस्थादयो यदि चरणार्थमुपसम्पद्यन्ते ततस्तेऽपि सङ्ग्राह्याः, "इहरा नेच्छे" त्ति इतरथा ज्ञान-दर्शननिमित्तम्, सूत्रार्थग्रहण-दर्शनप्रभावकशास्त्राध्ययनार्थमिति भावः, यद्युपसम्पद्यन्ते ततः 'नेच्छेत्' नोपसम्पदं ग्राहयेदित्यर्थः ॥ अथ यदुक्तम् "आत्मपरोभयतुलना चतुर्विधा" इत तत्रात्मतुलनां तावद् भावयति-

[भा.१२५४] आहाराई दव्वे, उप्पाएउं सयं जइ समत्थो।
खेत्तओ विहारजोग्गा, खेत्ताविहतारणाईया ॥

वृ-इहाऽऽत्मतुलना चतुर्विधा-द्रव्यतः क्षेत्रतः कालतो भावतश्च। तत्र द्रव्यत एषामुपसम्पन्नानां यद्येषणीयान्याहारादीनि स्वयमुत्पादयितुं समर्थ, आदिग्रहणात् उपधिशय्यापरिग्रहः। क्षेत्रत ऋतुबद्धविहारयोग्यानि वर्षावासयोग्यानि वा क्षेत्राण्युत्पादयितुं शक्नोमि न वा, "विहं" इत्यध्वा

Jain Education International For Private & Personal Use Only www.jainelibrary.org

तस्मात् तारणं-पारनयनम्, आदिशब्दाद् राजद्विष्टादितारणानि कर्त्तुमहं समर्थो न वेति ।।

[भा.१२५५] कालम्मि ओममाई, भावे अतरंतमाइपाउग्गं ।
कोहाइनिग्गहं वा, जं कारण सारणा वा वि ।।

वृ- काले अवमं-दुर्भिक्षं तत्र आदिग्रहणाद् अशिव-भयादौ निर्वाहयितुं शक्नोऽस्मि न वेति । भावे "अतरंत"त्ति ग्लानीभूतानाम् आदिशब्दाद् बाल-वृद्धादीनां वा एषां प्रायोग्यमुत्पादयितुं समर्थोऽहं न वेति, अथवा शक्नोमि क्रोधनिग्रहं कर्तुं न वेति आदिग्रहणाद् मान-माया-लोभनिग्रहपरिग्रहः, यद्वा यत् 'कारणं' ज्ञानादिकं निमित्तमुद्दिश्यैते उपसम्पद्यन्ते तस्याहं सारणां कर्त्तुमीशो न वेति ।। गतमात्मतुलनाद्वारम् । अथ परतुलनाद्वारमाह-

[भा.१२५६] आहाराइ अनियओ, लंभो सो विरसमाइ निज्जूढो ।
उब्भामग खुलखेत्ता, अरिउहियाओ अ वसहीओ ।।

वृ- ते प्रतीच्छकाः प्रथममेवोच्यन्ते-द्रव्यत आहारादीनां लाभः 'अनियतः' कदाचिद् भवति कदाचिन्नेति, योऽपि भवति सोऽपि विरसः-पुराणौदनादि, आदिशब्दाद् अरसस्य हिङ्ग्वाद्य-संस्कृतस्य रूक्षस्य च वल्ल-चणकादेर्ग्रहणम्, सोऽपि 'निर्व्यूढः' उज्झितप्रायः । क्षेत्रत उद्भ्रामक-भिक्षाचर्यया गन्तव्यम्, बहिर्ग्रामेषु भिक्षार्थं यत् पर्यटनं सा उद्भ्रामकभिक्षाचर्या; तथा 'खुलक्षेत्राणि' नाम यत्राल्पो लोको भिक्षाप्रदाता, सोऽपि च स्तोकमेव ददाति तत्र विहर्त्तव्यम्; अऋतुहिताश्च प्रायो वसतयः प्राप्यन्ते, यो यदा ऋतुर्वर्त्तते तस्य तदाऽननुकूला इत्यर्थः ।।

[भा.१२५७] ऊणाइरित्त वासो, अकाल भिक्खपुरिमड्ढ ओमाई ।
भावे कसायनिग्गह, चोयण न य पोरुसी नियया ।।

वृ- कालतः कदाचिद् मासकल्पस्थाने वर्षावासस्थाने वा ऊनमतिरिक्तं वा कालं कारणे वासः-अवस्थानं भवेत्, क्वापि क्षेत्रे 'अकाले' सूत्रपौरुष्या अर्थपौरुष्या वा वेलायां भिक्षा प्राप्येत, ततः सूत्रार्थहानिरपि भाविनी, कुत्रापि पूर्वार्द्धेऽपि पूर्णे अवमं-स्वोदरपूरकाहारमात्राया न्यूनं लभ्येत, आदिग्रहणात् पानमपि सम्पद्येत । 'भावे' भावतः कषायनिग्रहः खरपरुषनोदनायामपि कर्त्तव्यः । न च 'नियता' अवश्यम्भाविनी सूत्रार्थयोः पौरुषी, कदाचिदस्माकं धर्मकथादिव्यग्रतया सूत्रार्थयोर्व्याघातोऽपि भवतां भवेदित्यर्थः । तदेतत् सर्वमपि यद्यङ्गीकर्त्तुमुत्सहध्व ततः प्रतिपद्यध्वमुपसम्पदमिति ।।

[भा.१२५८] अत्तनि य परे चेवं, तुलणा उभय थिरकारणे वुत्ता ।
पडिवज्जंते सव्वं, करिंति सुण्हाए दिट्ठंतं ।।

वृ- आत्मविषया परविषया च तुलना उभयोरपि 'स्थिरताकारणे' स्थिरीकरणार्थमेवमुक्ता । गतं स्थिरत्वद्वारम्, अथ प्रतीच्छनाद्वारमाह-"पडिवज्जंते" इत्याद्युत्तरार्द्धम् । 'सर्वम्' अनन्तरोक्तमर्थं यदि प्रतीच्छकाः प्रतिपद्यन्ते तदा 'स्नुषया' वध्वा दृष्टान्तमाचार्या कुर्वन्ति ।। तमेवाह-

[भा.१२५९] आस-रहाई ओलोयणाइ भीया-ऽऽउले अ पेहंती ।
सकुलघरपरिचिएणं, वारिज्जइ ससुरमाईहिं ।।

वृ- यथा काचिद् वधूः स्वकुलगृहस्य-स्वकीयपितृगृहस्य सम्बन्धी यः परिचयः-रमणीयवस्तुदर्शनहेवाकस्तेन अश्व-रथान् आदिग्रहणेन हस्त्यादीन्, अवलोकनं-गवाक्षस्तेन

Jain Education International For Private & Personal Use Only www.jainelibrary.org

आदिशब्दाद् अपरेण वा जालकादिना भीतान् आकुलाँश्च जनान् प्रेक्षमाणा सती 'वार्यते' 'पुत्रि! माऽवलोकिष्ठाः' इति प्रतिनिषिध्यते श्वसुरादिभि, मा भूद् अस्याः प्रसङ्गतः परपुरुषविषयोऽप्यवलोकनहेवाक इति ॥

[भा.१२६०] खिंसिज्जइ हम्मइ वा, नीणिज्जइ वा घरा अठाइंती ।
नीया पुन से दोसे, छायंति न निच्छुभंते य ॥

वृ- यदि वारिता सती नोपरमते ततः "खिंसिज्जइ"त्ति निन्द्यते 'आः कुलपांसने ! किमेवं करोषि ?' इत्यादि । तथापि यदि न निवर्त्तते ततः 'हन्यते' कशादिभिस्ताड्यते । एवमपि यदि न तिष्ठति ततोऽतिष्ठन्ती गृहान्निष्काश्यते, मा भूदपरासामपि गृहमहेलानामस्याः प्रसङ्गजनित एवंविध एव कुहेवाक इति कृत्वा । ये तु तस्याः 'निजकाः' पितृगृहसम्बद्धाः स्वजनास्ते 'से' तस्या दोषाँश्छादयन्ति, कथञ्चिदुपालम्भप्रदानादिनाऽनाच्छादयन्तोऽपि न गृहाद् निष्काशयन्ति, गौरवार्हत्वात् तत्र तस्याः ॥ एष स्नुषादृष्टान्तः । अथार्थोपनयमाह-

[भा.१२६१] मरिसिज्जइ अप्पो वा, सगणे दंडो न यावि निच्छुभणं ।
अम्हे पुन न सहामो, ससुरकुलं चेव सुण्हाए ॥

वृ- ते आचार्या भणन्ति-आर्या ! पितृगृहस्थानीयो युष्माकं स्वगच्छः, श्वसुरकुलस्थानीया वयम्, अश्व-रथाद्यवलोकनस्थानीयं प्रमादासेवनम्, गवाक्षादिस्थानीयान्यपुष्टालम्बनानि; ततो युष्माकं 'स्वगणे' स्वगच्छे प्रमादासेवनं कृतमपि 'मृष्यते' क्षम्यते, अल्पो वा 'दण्डः' प्रायश्चित्तलक्षणः प्रमादप्रत्ययो भवतां तत्र दीयते, न च महत्यप्यपराधे गच्छान्निष्कासनं गौरवार्हतया भवतां भवति; वयं पुनः स्वल्पमप्यपराधं भवतां न सहामः श्वसुरकुलमिव 'स्नुषायाः' वध्वाः सम्बन्धिनमपराधम् इत्युक्ते यदि ते प्रतीच्छका भणेयुः संविग्ना वा । तत्र ये पार्श्वस्थादयस्ते पार्श्वस्थादिमुण्डिता वा संविग्नमुण्डिता वा । येऽपि संविग्नास्तेऽपि समनोज्ञा वा अमनोज्ञा वा ॥

सर्वेषामपि एषां विधिमाह-

[भा.१२६२] पासत्थाईमुंडिए, आलोयण होइ दिक्खपभिईओ ।
संविग्गपुराणे पुन, जप्पभिइं चेव ओसन्नो ॥

वृ- यः पार्श्वस्थादि पार्श्वस्थादिभिरेव मुण्डितस्तस्य 'दीक्षाप्रभृति' दीक्षादिनादारभ्य आलोचना भवति । यस्तु संविग्नमुण्डितत्वात् पूर्वं संविग्नः पश्चाद् अवसन्नीभूतः स पुराणसंविग्न उच्यते, गाथायां प्राकृतत्वाद् व्यत्यासेन पूर्वापरनिपातः, सः 'यत्प्रभृति' यद्दिनादारभ्याऽवसन्नः सञ्जातस्तत्प्रभृत्येवालोचनां दाप्यते ॥

[भा.१२६३] समणुन्नमसमणुन्ने, जप्पभिइं चेव निग्गओ गच्छा ।
सोहिं पडिच्छिऊणं, सामायारिं पयंसंति ॥

वृ- यस्तु संविग्नः स द्विधा-'समनोज्ञः' सम्भोगिकः 'असमनोज्ञः' असाम्भोगिकः । स द्विविधोऽपि यत्प्रभृति स्वगच्छान्निर्गतस्तत एव दिनादारभ्यालोचनां दापयितव्य । ततः 'शोधिम्' आलोचनां प्रतीच्छय यो यत् तपः छेदं मूलं वा प्रायश्चित्तमापन्नस्तस्य तद् दत्त्वा स्वकीयां सामाचारीमाचार्या प्रदर्शयन्ति ॥ किं कारणम् ? इति चेदित्याह-

[भा.१२६४] अवि गीय-सुयहराणं, चोइज्जंताण मा हु अचियत्तं ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

मेरासु य पत्तेयं, माऽसंखड पुव्वकरणेणं ॥

वृ- ये गीतार्थाः श्रुतधराः, बहुश्रुता गणि-वाचकादिशब्दाभिधेया इत्यर्थः, तेषामपि, किं पुनरितरेषाम् ? इत्यपिशब्दार्थ, विततसामाचारीकरणे नोद्यमानानां 'मैवं सामाचारीमन्यथाकारं कार्षी' इत्यादिवचनैर्मा भूद् ''अचियत्तं'' अप्रीतिकम्, यतोऽन्योऽन्यं गच्छानां काश्चिदनीदृश्यः सामाचार्यस्ततः 'प्रत्येकं' पृथक् पृथग् 'मर्यादासु' सामाचारीषु वर्त्तमानासु प्रवाहतः पूर्वाभ्यस्ताया एव सामाचार्या करणेन प्रतिनोदितानां मा 'असंखडं' कलहो भवेदित्यात्मीया चक्रवालसामाचारी कथयितव्या ॥ आह कथं पुनरभिधीयमानेऽप्रीतिकं भवेद् ? उच्यते-

[भा.१२६५] गच्छि वियारभूमाइ वायओ देह कप्पियारं से ।
तम्हा उ चक्कवालं, कहिंति अनहिंडिय निसिं वा ॥

वृ- अयं वाचको विचारभूम्याम् आदिशब्दाद् भक्त-पानग्रहणादौ गच्छति अतो ददत 'कल्पितारं' कमपि कल्पिकं साधुं 'से' तस्य वाचकस्य येन स समाचारीं दर्शयति । तत एवमभिधीयमाने तस्य वाचकस्य महदप्रीतिकं भवति, यथा-अहो ! स्वगणं विमुच्य परगणमुपसम्पन्ना वयमप्येवं परिभूयामहे इति । यत एवं तस्मात् चक्रवालसामाचारीं-प्रतिदिनक्रियाकलापरूपां तेषां पुरत आचार्या कथयन्ति यथा ते कल्पिका भवन्ति । यावच्च सा तेषां प्ररूप्यते तावत् ''अनहिंडय'' त्ति ते भिक्षार्थं न हिण्डाप्यन्ते, मा भूत् तेषां सामाचारीशिक्षणव्याघातः । अथ न संस्तरति ततः 'निशि' रात्रौ ते सामाचारीं ग्राहयितव्या इति ॥ गतं प्रतीच्छनाद्वारम् । अथ वाचनाद्वारम् । तेषां गृहीतसामाचारीकाणां सूत्रार्थवाचना दातव्या । वाच्यमानानां च तेषां सामाचारीकरण प्रमाद्यतां यो विधिस्तमभिधित्सुर्द्वारश्लोकमाह-

[भा.१२६६] उवएसो सारणा चेव, तइया पडिसारणा ।
छंदे अवट्टमाणं, अप्पछंदेण वज्जेज्जा ॥

वृ- उपदेशः स्मारणा चैव तृतीया प्रतिस्मारणा, ततः 'छन्दे' उपदेशेऽवर्त्तमानं विनेयं गुरुरपि 'आत्मच्छन्देन' आत्माभिप्रायेण 'वर्जयेत्' परित्यजेदिति निर्युक्तिश्लोकसमासार्थः ॥ अथ विस्तरार्थः, तत्र गुरुभिस्तान् प्रति वक्तव्यम्-अस्माकमेषा सामाचारी यद् निद्राविकथादयः प्रमादाः परिहर्त्तव्याः, एष उपदेशः । अथ स्मारणामाह-

[भा.१२६७] निद्दापमायमाइसु, सइं तु खलियस्स सारणा होइ ।
ननु कहिय ते पमाया, मा सीयसु तेसु जाणंतो ॥

वृ- निद्रैव प्रमादो निद्राप्रमादः, आदिशब्दाद् अप्रत्युपेक्षित-दुष्प्रत्युपेक्षितादिपरिग्रहः, तेषु 'सकृद्' एकवारं स्खलितस्य स्मारणा कर्त्तव्या भवति । तथा-भो महाभाग ! नन्वेते पूर्वमेवास्माभिस्तव प्रमादाः कथिताः ततो जानन्नपि 'तेषु' प्रमादेषु मा सीदेत्येषा स्मारणा ॥ अथ प्रतिस्मारणामाह-

[भा.१२६८] फुड-रुक्खे अचियत्तं, गोणो तुदिओ व मा हु पेल्लेज्जा ।
सज्जं अओ न भन्नइ, धुव सारण तं वयं भणिमो ॥

वृ- स्फुटं नाम-यस्तेन प्रमादः कृतः स परिस्फुटं नाभिधीयते किन्त्वन्यव्यपदेशेन भणितव्यम्, रूक्षं नाम-निष्पिपासम्, यथा-'निर्धर्म ! निरक्षर ! निशुक !' इत्यादि तदपि न वक्तव्यम्, यतः स्फुट-रूक्षेऽभिधीयमानेऽप्रीतिकं भवति । अत्र च गोदृष्टान्तः-यथा 'गौः' बलीवर्दो महता भारेण

Jain Education International For Private & Personal Use Only www.jainelibrary.org

लद्दितो हलं वा वहमानः प्रतोदेनाऽतितोदितः सन् कूर्दयित्वा भारं पातयति हलं वा भनक्ति; एवमयमपि स्फुटाक्षरं रूक्षभणित्या वा भणितः कषायितत्वाद् असङ्खडं कृत्वा गच्छान्निर्गच्छेत्। अत एवाह-गौरिव, वाशब्दस्योपमानार्थस्याऽत्र सम्बन्धाद्, असावपि 'तुदितः' स्वर-परुषभणन-प्रतोदे व्यथितः सन् मा 'हुः' निश्चितं 'प्रेरयेत्' संयमभारं बलादपहस्त्य पातयेत्, अत एव च 'सद्यः' तत्कालं यदा प्रमादः कृतस्तदैव न भण्यते। ''धुव सारण''त्ति स वक्तव्यः-वत्स! ध्रुवा-अवश्यं कर्त्तव्या संयमयोगेषु सीदतां सारणा, तथा च मौनीन्द्रवचनम्-

रूसउ वा परो मा वा, विसं वा परियत्तउ।
भासियव्व हिया भासा, सपक्खगुणकारिया॥

'तत्' तस्माद् जिनाज्ञाराधनायवयं भवन्तमेवं भणामः, न पुनर्मत्सर-प्रद्वेषादिना॥

अथ ''सज्जं अतो न भन्नइ''त्ति पदव्याख्यानार्थमाह-

[भा.१२६९] तद्दिवसं बिइए वा, सीयंतो वुच्चए पुणो तइयं।
एगोऽवराहो ते सोढो, बीयं पुण ते न विसहामो॥

वृ- 'सीदन्' सामाचार्यां प्रमाद्यान् तस्मिन्नेव दिवसेऽन्यस्यां वेलायां द्वितीये वा दिवसे पुनर्भूयोऽप्युच्यते 'तृतीया' प्रतिस्मारणा, एक उपदेशो द्वितीया स्मारणा तृतीया प्रतिस्मारणेति कृत्वा। कथम्? इत्याह-एकस्ते महानपराधः 'सोढः' तितिक्षितोऽस्माभि, यदि पुनर्द्वितीयं स्वल्पमप्यपराधं करिष्यसि ततो वयं ते ''न विसहामो'' न सहिष्यामः॥

तथा चात्रार्द्रच्छगणकदृष्टान्तः क्रियते-

[भा.१२७०] गोणाइहरणगहिओष मुक्को य पुणो सहोढ गहिओ उ।
उल्लोल्लछगणहारी, न मुच्चए जायमाणो वि॥

वृ- यथा कश्चित् चौरो गवादिहरणं कुर्वन्नारक्षकैर्गृहीतः ततः, 'मुञ्चत मामेकवारम्, नाहं भूयः स्वल्पमपि चौर्यं करिष्यामि' इत्युक्ते दयालुत्वाद् अपरोपरोधाद्वा तैर्मुक्तः पुनर्द्वितीयवेलायां पूर्वाभ्यासवशाद् यद्यार्द्रार्द्रच्छघणहारी भवति, स्वल्पचौर्यकारीति भावः, तथापि 'सहोढः' सलोप्त्रो गृहीतः सन् याचमानोऽपि मोक्षणं न मुच्यते। एवं भवतोऽप्येकवारं महदपि प्रमादपदं तितिक्षितमस्माभि, इत ऊर्ध्वं तु स्तोकमपि न तितिक्षामहे। इत्थमुक्तोऽपि यदि प्रमाद्यति तदा मासलघु दण्डं दत्त्वा द्वितीयं घट्टनादृष्टान्तं कुर्वन्ति॥ तमेवाह-

[भा.१२७१] घट्टिज्जंतं वुच्छं, इति उदिए दंडना पुनो बिइयं।
पासाणो संवुत्तो, अइरुंचिय कुंकुमं तइए॥

वृ- यथा दुग्धमाद्रहितं सद् घट्यमानं चाल्यमानमपि ''वुच्छं''ति देशीपदत्वाद् अवदग्धं विनष्टमिति यावद्, एवं भवानप्यस्माभिरित्थं स्मारणादिना घट्यमानोऽपि प्रमादमेवाऽऽसेवितवान्, 'इति' एवम् 'उदिते' कथिते सति यदि भूयः प्रमाद्यति तदा पुनरपि 'दण्डना' मासलघुप्रायश्चित्तरूपा कर्त्तव्या। ''बीयं''ति एतद् द्वितीयमुदाहरणम्। इत्थं दण्डितोऽपि यदि प्रमादाद् नोपरमते तदा रुञ्चनादृष्टान्तो वक्तव्यः-''पासाणो'' इत्यादि। अति-अतीव रुञ्चितं-पिष्टं कुङ्कुमं किं पाषाणः संवृत्तः?। एवं भवानपि मता प्रयासेन प्रतिनोद्यमानः किमप्रमत्तः संवृत्तः? इति। एतत् तृतीयमुदाहरणं कृत्वा तथैव मासलघु दीयते॥ अत यदुक्तं प्राक् ''अविनीयाणं विवेगो य'' त्ति

Jain Education International For Private & Personal Use Only www.jainelibrary.org

तदिदानीं भाव्यते- अविनीता नाम ये बहुशोऽपि प्रतिनोद्यमानाः प्रमाद्यन्ति, ते च च्छन्देवर्त्तमाना भण्यन्ते, ताँश्च सूरय आत्मच्छन्देन वर्जयेयुः । कः पुनरात्मीयच्छन्दो येन ते परिह्रियन्ते ? इति उच्यते-

[भा.१२७२] तेन परं निच्छुभणा, आउट्टो पुन सयं परेहिं वा ।
तंबोलपत्तनायं, नासेहिसि मज्झ अन्ने वि ॥

वृ- 'ततः परं' वारत्रयादूर्द्ध यदि न निवर्त्तते तदा निष्काशना कर्त्तव्या, निर्गच्छ मदीयगच्छादिति। अथासौ स्वयं परेण वा प्रज्ञापितः सन् 'आवृत्तः' प्रमादात् प्रतिनिवृत्ततः प्रतिभणति 'भगवन् ! क्षमध्वं मदीयमपराधनिकुरम्बम्, न पुनरेवं करिष्यामि' इति, ततो यद् द्वारगाथायां पत्रज्ञातं सचितं तदुपवर्ण्यते-"तंबोलपत्तनायं"ति, यथा तम्बोलपत्रं कुथितं सद् यदि न परित्ययते ततः शेषाण्यपि पत्राणि कोथयति । एवं त्वमपि स्वयं विनष्टो ममाऽन्यानपि साधून् विनाशयिष्यसीति कृत्वा निष्काशितोऽस्माभिः । सम्प्रत्यप्रमत्तेन भवितव्यं मासगुरु च ते प्रायश्चित्तम् ॥

अथ निष्काशनस्यैव विधिमाह-

[भा.१२७३] सुहमेगो निच्छुब्भइ, नेगा भणिया उ जइ न वच्चंति ।
अन्नावएस उवहिं, जग्गावण सारिकह गमनं ॥

वृ- ते पुनः प्रमाद्यन्त एको वाऽनेके वा । यद्येकस्ततः सुखेनैव 'निर्गच्छ मद्गच्छात्' इत्यभिधाय निष्काश्यते । अथानेके-बहवस्ततस्ते यदि 'निर्गच्छत' इति भणिता अपि 'वयं बहवस्तिष्ठामः' इत्यवष्टम्भं कृत्वा न व्रजन्ति ततः शेषसाधून् रहस्यं ज्ञापयित्वाऽन्येन केनापि अपदेशेन-मिषेण यथा न तेषां शङ्का भवति तथोपधिं विहारयोग्यं कारयित्वा अन्यव्यपदेशेनैव ते रात्रौ चिरं जागरणं कारापणीया यथा न प्रातः शीघ्रमुत्तिष्ठन्ति । "सारिकह"त्ति सागारिकः-शय्यातरस्तस्याग्रतो रहसि कथनीयम्, यथा-वयं प्रभात एवामुकं ग्रामं व्रजिष्यामः, यदि कोऽपि महता निर्बन्धेन युष्मान् प्रश्नयेत्, यथा-आचार्या क्व गताः ? इति ततो भवद्भिस्तस्य यथावद् निवेदनीयम् । "गमनं" ति ततो गमनं कर्त्तव्यम् ॥ गतेषु चाचार्येषु यदि ते ब्रूयुः-

[भा.१२७४] मुक्का मो दंडरुइणो, भणंति इइ जे न तेसु अहिगारो ।
सेज्जायरनिब्बंधे, कहियाऽऽगय न विनए हानी ॥

वृ- 'अहो ! सुन्दरं समजनि यद् 'दण्डरुचेः' उग्रदण्डव्यसनिन आचार्याद् मुक्ता वयम्' इति ये भणन्ति न तेष्वधिकारः । ये पुनः परित्यक्ताः सन्तो गाढं परितप्यन्ते 'आः ! कष्टम्, उज्झिता वयं वराका निसम्बन्धबन्धुभिस्तैर्भगवद्भि, अतः कथमिव भविप्यामः ?' इति ते शय्यातरं महता निर्बन्धेन पृच्छन्ति-कथय कुत्रास्मान् विमुच्य गताः क्षमाश्रमणाः ? । स प्राह-अमुकं ग्रामम् । ततस्तेन कथिते त्वरितमागतानां तेषां न विनयहानि कर्त्तव्या, किन्तु प्राग्वदेवाऽभ्युत्थानं दण्डकादिग्रहणं च कर्त्तव्यम् । ततस्ते बद्धाञ्जलपुटाः पादपतिताश्छिन्नमुक्तावलिप्रकाशान्यश्रूणि विमुञ्चन्तो विज्ञपय्ति-भगवन् ! क्षमध्वमस्मदीयमपरधम्, विलोकयताऽस्मान् प्रसादमन्थरया दृशा, प्रतिपद्यध्वं भूयः स्वप्रतीच्छकतया, कुरुतानुग्रहं स्मारणादिना, प्रणिपातपर्यवसितप्रकोपा हि भवन्ति महात्मानः, इत ऊर्ध्वं वयं प्रमादं प्रयत्नतः परिहरिष्याम इति । ततो गच्छसत्काः

Jain Education International For Private & Personal Use Only www.jainelibrary.org

साधवः सूरीन् कृताञ्जलयः प्रसादयन्ति ॥ गुरवो ब्रुवते-आर्या! अलं मम दुष्टाश्वसारथित्वकल्पेनामून् प्रति आचार्यककरणेन, एवमुक्ते साधवो भणन्ति-

[भा.१२७५] को नाम सारहीणं, स होइ जो भद्दवाइणो दमए।
दुट्ठे वि उ जो आसे, दमेइ तं आसियं बिंति ॥

वृ- को नाम सारथीनां मध्ये स भवति यः 'भद्रवाजिनः विनीताश्वान् दमयेत्? न कश्चिदसौ, असारथिरेवेत्यर्थः। 'दुष्टान्' अविनीतानपि योऽश्वान् 'दमयति' शिक्षां ग्राहयति तम् 'आश्विकम्' अश्वदमं ब्रुवते लौकिकाः॥ अपि च-

[भा.१२७६] होंति हु पमाय-खलिया, पुव्वब्भासा य दुच्चया भंते!।
न चिरं च जंतणेयं, हिया य अच्चंतियं अंते ॥

वृ- 'भदन्त!' परमकल्याणयोगिन्! 'पूर्वाभ्यासाद्' अनादिभवाभ्यस्ततया दुस्त्यजानि प्रमाद-स्खलितानि भवन्ति प्रायो जन्तूनाम्। प्रमादाः-निद्रा-विकथादयः, स्खलितानि-अनुपयुक्तगमन-भाषाणादीनि। न चेयं स्मारणादिरूपा यन्त्रणा 'चिरं' चिरकालं भाविनी, सात्मीभावमुपगते ह्यमीषामप्रमादे को नाम स्मारणादिरूपा यन्त्रणा 'चिरं' चिरकालं भाविनी, सात्मीभावमुपगते ह्यमीषामप्रमादे को नाम स्मारणादिकं करिष्यति? इति भावः। न चेयमापातवत् परिणामेऽपि दुस्सहा किन्तु 'हिता च' पथ्या 'आत्यन्तिकम्' अतिशयेन 'अन्ते' अवसाने परिणामे इत्यर्थः। यच्च परिणामसुन्दरं तदापातकटुकमप्युपादेयम्॥ अत्रान्तरे सूरयस्तेषां प्रमादिसाधूनां तीव्रतरं संवेगमवगम्य तानेव स्थिरीकर्त्तुं राजदृष्टान्तं कुर्वन्ति-

[भा.१२७७] अच्छिरुयालु नरिंदो, आगंतुअविज्जगुलियसंसणया।
विसहामि त्ति य भणिए, अंजन वियणा सुहं पच्छा ॥

वृ- एगो राया। तस्स अच्छिरुया जाया। वत्थव्वविज्जेहिं न सक्किओ तिगिच्छिउं। अन्नो अ आगंतुओ विज्जो आगंतुं भणइ-मम अत्थि गुलियाओ अच्छिसूलपसमणीओ, ताहिं अंजिएसु अच्छीसु तित्थतरा दुरहियासा वेदना भवइ मुहुत्तं, जइ न वि मे मारणाए संदिसाहि तो अंजेमि ते अच्छीणि। 'न मारेमि' त्ति अब्भुवगए अंजिएसु अच्छीसु तिव्वतरा वेयणा जाया। ताहे रन्ना भणियं-अच्छीणि मे पडियाणि, मारेह तं वेज्जं। तेहिं अब्भुवगंतुं न मारिओ। मुहुत्तंतरेण उवसंता वेयणा। पोराणाणि अच्छीणि जायाणि। विज्जो पूइओ॥ अथ गाथाक्षरार्थ-अक्ष्णः-चक्षुषो या रुग्-रोगस्तद्वान् कश्चिन्नरेन्द्रः। तस्य चागन्तुकवैद्येन गुटिकानां शंसना-स्वरूपकथना। ततो राज्ञा 'विषहाम्यहं वेदनाम्' इति भणिते वैद्येन चक्षुषोर्गुटिकाभिरञ्जनम्। ततो वेदना। पश्चात् क्रमेण सुखं सञ्जातम्, प्रगुणीभूते अक्षिणी इति। एष दृष्टान्तोऽयमर्थोपनयः-यथा तस्य राज्ञस्तत्काल-दुस्सहमपि गुटिकाञ्जनं क्रमेण चक्षुषोः प्रगुणीकरणात् परिणामसुन्दरं समजनि, एवं भवतामपि स्मारणादिकं खर-पुरुषत्वाद् यद्यप्यापातकटुकं तथापि परिणामसुन्दरमेव द्रष्टव्यम्, इह परत्र च सकलकल्याणपरम्पराकारणत्वादिति॥ उक्तानुक्तविधिसङ्ग्रहमाह-

[भा.१२७८] इय अविनीयविवेगो, विगिंचियाणं च संगहो भूओ।
जे उ निसग्गविनीया, सारणया केवलं तेसिं ॥

वृ- "इय" एवमविनीतानां विवेकः-परित्यागः। "विगिंचियाणं च" त्ति परित्यक्तानां

Jain Education International For Private & Personal Use Only www.jainelibrary.org

पुनरावृत्तानां भूयः सङ्ग्रहो विधेयः । ये तु निसर्गेण-स्वभावेन विनीतास्तेषां स्मारणैव केवलं कर्त्तव्या, यथा 'इदमित्थं कर्त्तव्यम्' इति ।। उपसंहरन्नाह-

[भा.१२७९] एवं पडिच्छिऊणं, निप्फत्तिं कुणइ बारस समाओ ।
एसो चेव विहारो, सीसे निप्फाययंतस्स ।।

वृ- 'एवं' देशदर्शनं कुर्वन् शिष्य-प्रतीच्छयकान् प्रतीच्छय निष्पत्तिं सूत्रार्थग्राहणादिना द्वादश 'समाः' संवत्सराणि करोति । गतं निष्पत्तिद्वारम् । अथ विहारद्वारं व्याख्यायते-"एसो चेव" इत्यादि । एष एव विहारः शिष्यान् निष्पादयतो वेदितव्यः । इयमत्र भावना-तस्य देशदर्शनं कृत्वा गुरुपादमूलमागतस्य गुरुभिराचार्यपदमध्यारोप्य दिग्बन्धानुज्ञायां विहितायां नवकल्पविधिना विहरतो यः शिष्यनिष्पादनविधि स एवमेव द्वादश वर्षाणि यावद् विज्ञेयः, तुल्यवक्तव्यत्वादिति।। अथैतदेव विहारद्वारमावृत्या जिनकल्पिकमाश्रित्य व्याचिख्यासुर्द्वारगाथामाह-

[भा.१२८०] अव्वोच्छित्ती मन पंचतुलण उवगरणमेव परिकम्मे ।
तवसुत्तसुएगत्ते उवसग्गसहे य वडरुक्खे ।।

वृ- अव्यवच्छित्तिविषयं मनः प्रयुङ्क्ते । पञ्चानाम्-आचार्यादीनां तुलना-स्वयोग्यताविषया भवति, उपकरणं जिनकल्पोचितमेव गृह्णाति 'परिकर्म' इन्द्रियादिजयरूपं करोति । तपः-सत्त्व-श्रुतैकत्वानि उपसर्गसहश्चेति पञ्चभावना भवन्ति । 'वटवृक्षे' इति जिनकल्पं तीर्थकरादी-नामभावे वटवृक्षस्याधस्तात् प्रतिपद्यते इति द्वारगाथासमासार्थः ।। अथैनामेव विवरीषुराह-

[भा.१२८१] अनुपालिओ य दीहो, परियाओ वायणा वि मे दिन्ना ।
निप्फाइया य सीसा, सेयं खु महऽप्पणो काउं ।।

वृ- तेनाचार्येण सूत्रार्थयोरव्यवच्छित्तिं कृत्वा पर्यन्ते-पूर्वापररात्रकालसमये धर्मजागरिकां जाग्रतेत्थं चिन्तनीयम्, यथा-अनुपालितो मया दीर्घ 'पर्यायः' प्रवज्यारूपः, वाचनाऽपि मया दत्ता उचितेभ्यः प्रतीच्छकादिभ्यः, निष्पादिताश्च भूयांसः शिष्याः, तदेवं कृता तीर्थस्याव्यवच्छित्ति, तत्करणेन विहितमात्मनः ऋणमोक्षणम्, अत ऊर्द्धवं 'श्रेयः' प्रशस्यतरं ममात्मनो हितं कर्तुम् ।। किं नाम हितम् ? इति चेद् उच्यते-

[भा.१२८२] किन्नु विहारेणऽब्भुज्जएण विहरामऽनुत्तरगुणेणं ।
आओ अब्भुजजयसासणेण विहिना अनुमरामि ।।

वृ- 'किन्नु' इति वितर्के, 'अभ्युद्यतविहारेण' जिनकल्पादिना 'अनुत्तरगुणेन' अनुत्तराः-अनन्यसामान्या गुणाः-निरममत्वादयो यस्मिन् स तथा तेन अहं विहरामि ? "आउ" त्ति उताहो "अब्भुज्जसासणेणं" ति सूचकत्वात् सूत्रस्याऽभ्युद्यतमरणविषयेण शासनोक्तेन विधिना 'अनुम्रिये" अनु-पश्चात् संलेखनाद्युत्तरकालं मरणं प्रतिपद्येऽहम् ? इति ।।

अभ्युद्यतविहार-मरणयोः स्वरूपमाह-

[भा.१२८३] जिन सुद्ध अहालंदे, तिविहो अब्भुज्जओ अह विहारो ।
अब्भुज्जयमरणं पुन, पाओवग-इंगिणि-परिन्ना ।।

वृ-जिनकल्पः शुद्धपरिहारकल्पो यथालन्दकल्पश्चेति त्रिविधोऽभ्युद्यतोऽथैष विहारो मन्तव्यः। अभ्युद्यतमरमं पुनस्त्रिविधम्-पादपोपगमनम् इङ्गिनीमरणं 'परिज्ञा' इति भक्तप्रत्याख्यानम् ।।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

स्याद् बुद्धि-द्वे अप्येते अभ्युद्यतरूपतया श्रेयसी, अतः कतरदनयोः प्रतिपत्तव्यम् ? उच्यते-

[भा.१२८४] सयमेव आउकालं, नाउं पोच्छित्तु वा बहुं सेसं।
सुबहुगुणलाभकंखी, विहारमब्भुज्जयं भजइ ॥

वृ- स्वयमेवायुःकालं सातिशयश्रुतोपयोगाद् 'बहु' दीर्घं 'शेषम्' अवशिष्यमाणं ज्ञात्वा पृष्ट्वा वाऽन्यं श्रुताद्यतिशययुक्तमाचार्यं बहुशेषमवबुध्य ततः सुबहुगुणलाभकाङ्क्ष सन् विहारमभ्युद्यतं 'भजति' प्रतिपद्यत इत्यर्थः। इह चायं विधि-र्यदि स्तोकमेवायुरवशिष्यते ततः पादपोपगमादीनामेकतरमभ्युद्यतमरणं प्रतिपद्यते, अथ प्रचुरमायुः परं जङ्घाबलपरिक्षीणस्ततो वृद्धावासमध्यास्ते, अथाऽऽयुदीर्घं न च जङ्घाबलपरिक्षीणस्तदाऽभ्युद्यतविहारं प्रतिपद्यत इति ॥ गतमवयवच्छित्तिमनोद्वारम्। अथ पञ्चतुलनेति द्वारम्-पञ्चानाम्-आचार्योपाध्याय-प्रवर्तकस्थविर-गणावच्छेदकानां तुलना भति, यथा-त्रयाणामभ्युद्यत (मरण-वृद्धावासा-ऽभ्युद्यत) विहाराणां कतरं प्रतिपद्यामहे ? । इह चैत एव प्रायोऽभ्युद्यतविहारस्याधिकारिण इत्थं विधिं करोति-

[भा.१२८५] गणनिक्खेवित्तरिओ, गणिस्स जो व ठविओ जहिं ठाणे।
उवहिं च अहागडयं, गिण्हइ जावऽन्न नुप्पाए ॥

वृ- 'गणिनः' आचार्यस्य गणनिक्षेपः 'इत्वरः' परिमितकालीनो भवति, यो वा उपाध्यायादिर्यत्र 'स्थाने' पदे स्थापितः स तत्पदमात्मतुल्यगुणे साधावित्वरनिक्षेपेण निक्षिपति। आह किमर्थमसावित्वरं गणादिनिक्षेपं विदधाति ? न यावज्जीविकम् ? उच्यते-इह चक्राष्टकविवरगामिना शिलीमुखेन वामलोचने पुत्रिकाया वेधनमिव दुष्करं गणाद्यनुपालनम्, अतः पश्यामस्तावत्- 'एतेऽभिनवाचार्यप्रभृतयः किमस्य गणादेरनुपालनं कर्तुं यथावदीशते वा ? न वा ?, यदि नेशते ततो मया न प्रतिपत्तव्यो जिनकल्पः, यतो जिनकल्पानुपालनादपि श्रेष्ठतरमितरस्य तथाविधस्याभावे सूत्रोक्तनीत्या गणाद्यनुपालनम्, बहुतरनिर्जरालाभकारणत्वात्, न च बहुगुणपरित्यागेन स्वल्पगुणोपादानं विदुषां कर्तुमुचितम्, सुप्रतिष्ठितकार्यारम्भकत्वात् तेषाम्' इत्यभिसन्धाय स भगवानित्वरं गणादिनिक्षेपं विदधातीति। उक्तञ्च पञ्चवस्तुकशास्त्रे इहैव प्रक्रमे श्रीहरिभद्रसूरिपूज्यैः-

पिच्छामु ताव एए, केरिसगा होंति अस्स ठाणस्स ? ।
जोगाण वि पाएणं, निव्वहणं दुक्करं होइ ॥
न य बुहगुणचाएणं, थेवगुणपसाहणं बुहजणाणं ।
इट्ठं कयाइ कज्जं, कुसला सुपइट्ठियारंभा ॥

अथोपकरणद्वारमाह-''उवहिं च'' इत्यादि। यावद् 'अन्यं' जिनकल्पप्रायोग्यं शुद्धैषणायुक्तं प्रमाणोपेतं च 'उपधिं' वस्त्रादि नोत्पादयति तावद् यथाकृतमेव गृह्णाति। ततः स्वकल्पप्रायोग्ये उपकरणे लब्धे सति प्राक्तनमुपकरणं व्युत्सृजतीति ॥ गतमुपकरणद्वारम्। अथ परिकर्मद्वारम्-परिकर्मेति वा भावनेति वा एकार्थम्। ततोऽयमात्मानं भावनाभि सम्यग् भावयति। आह सर्वेऽपि साधवस्तावद् भावितान्तरात्मानो भवन्ति अतः किं पुनर्भावयितव्यम् ? उच्यते-

[भा.१२८६] इंदिय-कसाय-जोगा, विनियमिया जइ वि सव्वसाहूहिं।
तह वि जओ कायव्वो, तज्जयसिद्धिं गणिंतेनं ॥

वृ- यद्यपि सर्वसाधुभिरिन्द्रिय-कषाय-योगा विविधैः प्रकारैर्नियमिताः-जितास्तथापि जिनकल्पं

Jain Education International For Private & Personal Use Only www.jainelibrary.org

प्रतिपत्तुकामेन पुनरेतेषां जयः कर्त्तव्यः । तत्रैहिका-ऽऽमुष्मिकापायपरिभावनादिना इन्द्रियाणां जयस्तथा कर्त्तव्यो यथेष्टा-ऽनिष्टविषयेषु गोचरमुपागतेषु राग-द्वेषयोरुत्पत्तिरेव न भवति । कषायाणामपि जये तथा य्न आस्थेयो यथा दुर्वचनश्रवणादि बाह्यं कारणमवाप्यापि तेषामुदय एव नाविर्भवति । योगानामपि मनःप्रभृतीनां जये तथा यतितव्यं यथा तेषामार्त्तध्यानदिकं दुष्प्रणिधानमेवनोदयमासादयति । अथ किमर्थमित्थमिन्द्रिय-कषाय-योगानां जयः कर्त्तव्यः ? इत्याह-तेषाम्-इन्द्रियादीनां जयस्तज्जयः तज्जयेन सिद्धि-जिनकल्पपारप्राप्तिस्तां 'गणयता' मन्यमानेनेन्द्रियादीनां जयः करणीयः ॥ अत्रैव विशेषमाह-

[भा.१२८७] जोगिंदिएहिं न तहा, अहिगारो निज्जिएहिं न हु ताइं ।
कलुसेहि विरहियाइं, दुक्खसईबीयभूयाइं ॥

वृ- योगैरिन्द्रियैश्च निर्जितैर्न तथा 'अधिकारः' प्रयोजनम्, यतो नैव 'तानि' योगेन्द्रियाणि 'कलुषैः' कषायैर्विरहितानि दुःखसस्यबीजभूतानि भवन्ति किन्तु कषाया एव दुःखपरम्पराया मूलबीजमिति भावः ॥ आह यद्येवं योगा इन्द्रियाणि च न जेतव्यानि, तेषां कषायविरहितानां दुःखहेतुत्वायोगात्, उच्यते-

[भा.१२८८] जेन उ आयाणेहिं, न विना कलुसाण होइ उप्पत्ती ।
तो तज्जयं ववसिमो, कलुसजयं चेव इच्छंता ॥

वृ- आदीयन्ते-गृह्यन्ते शब्दादयोऽर्था एभिरित्यादानानि-इन्द्रियाण्युच्यन्ते तैः, उपलक्षणत्वाद् योगैश्च विना येन हेतुना 'कलुषाणां' कषायाणामुत्पत्तिर्न भवति । कथम् ? इति चेद् उच्यते-इह माया-लोभौ रागः क्रोध-मानौ तु द्वेष इत्यभिधीयते, तौ च राग-द्वेषाविष्टा-ऽनिष्टविषयान् प्राप्य सञ्जायेते, ते च विषया इन्द्रियगोचरा इति कृत्वा इन्द्रियैर्विना न कषायाणामुत्पत्तिराविरस्ति । योगानपि मनोवाक्कायरूपानन्तरेण न कापि कषाया उदीयमाना दृश्यन्त इति तैरपि सह कषायाणामविनाभावो द्रष्टव्यः । यतश्चैवमतः 'तज्जयम्' इन्द्रिय-योगजयं 'व्यव्यामः' इच्छामः 'कलुषजयं' कषायजयमेव इच्छन्त इति ॥

आह के पुनर्गुणा भावनाभावितान्तरात्मनो भवन्ति ? इति उच्यते-

[भा.१२८९] खेयविणोओ साहसजओ य लहुया तवो असंगो अ ।
सद्धाजननं च परे, कालन्नाणं च नऽन्नत्तो ॥

वृ- तपोभावनाभावितस्य 'खेदविनोदः' परिश्रमजयो भवति, चतुर्थादिपसा न परिश्राम्यतीत्यर्थः । सत्त्वभावनाभावितस्य साध्वसं-भयं तस्य जयोभवति । एकत्वभावनाभावितस्य 'लघुता' 'एक एवाहम्' इतिबुध्या लघुभावो भवति । श्रुतभावनाभावितस्य तपो भवति, ''न वि अत्थि न वि य होही, सज्झायसमं तवोकम्मं ।'' इति वचनात् । धृतिभावनाभावितस्य स्वजनादिषु 'असङ्गः' निर्ममत्वं भवति । अन्यच्च श्रुतभावनां भावयन् अन्येषामपि श्रद्धाजननं करोति, यथा-वयमप्येवं कदा विधास्यामः ? इति । कालज्ञानं च पौरुष्यादिषु नान्यतः सकाशादवगन्तव्यं भवति किन्तु श्रुतपरावर्त्तनानुसारेण स्वयमेवोच्छ्वासादिकालकलाकलनतः पौरुष्यादिमानं जानाति । यत एते गुणास्ततो भावनीय आत्मा भावनया ॥ सा च द्विधा-द्रव्यतो भावतश्च । तत्र द्रव्यतस्तावदाह-

[भा.१२९०] सरवेह-आस-हत्थी-पवगाईया उ भावना दव्वे ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

अब्भास भावन त्ति य, एगट्ठं तत्थिमा भावे ॥

वृ- इह धानुष्को यद् अभ्यासविशेषात् प्रथमं स्थूलद्रव्यं ततो वालबद्धां कपर्दिकां ततः सुनिर्मातः स्वरेणापि लक्ष्यस्य वेधं करोति, यद्वाऽश्वः शीघ्रं शीघ्रतरं धावमानः शिक्षाविशेषाद् महदपि गर्त्तादिकं लङ्घयति, हस्ती वा शिष्यमाणः प्रथमं काष्ठानि ततः क्षुल्लकान् पाषाणान् ततो गोलिका तदनु बदराणि तदनन्तरं सिद्धार्थानप्यभ्यासातिशयाद् गृह्णाति, प्लवको वा प्रथमं वंशे विलग्नः सन् प्लवते ततः पश्चादभ्यस्यन् आकाशेऽपि तानि तानि करणानि करोति, आदिशब्दाच्चित्रकरादिपरिग्रहः । एताः सर्वा अपि द्रव्यभावनाः । अभ्यास इति वा भावनेति वा एकार्थम् । तत्रैता वक्ष्यमाणलक्षणाः 'भावे' भावतो भावना मन्तव्याः ॥ ता एवाह-

[भा.१२९१] दुविहाओ भावनाओ, असंकिलिट्ठा य संकिलिट्ठा य ।
मुत्तूण संकिलिट्ठा, असंकिलिट्ठाहि भावंति ॥

वृ- द्विविधाश्च भावतो भावनाः । 'असंक्लिष्टाः' शुभाः 'संक्लिष्टाश्च' अशुभाः । तत्र मुक्त्वा संक्लिष्टभावना असंक्लिष्टाभिर्भावनाभिर्भावयन्ति जिनकल्पं प्रतिपित्सव इति ॥

अथ कास्ताः संक्लिष्टभावनाः ? इत्याशङ्कापनोदाय तत्स्वरूपमभिधित्सुराह-

[भा.१२९२] संखा य परूवणया, होइ विवेगो य अप्पसत्थासु ।
एमेव पसत्थासु वि, जत्थ विवेगो गुणा तत्थ ॥

वृ- अप्रशस्तभावनानां सङ्ख्या पञ्चेति लक्षणा निरूपणीया । प्ररूपणा च तासां कर्त्तव्या । तासां चाप्रशस्तानां 'विवेकः' परिहारो भवति । एवमेव 'प्रशस्तास्वपि' तपःप्रभृतिभावनासु सङ्ख्या प्ररूपणा च वक्तव्या । नवरं "जत्थ विवेगो"त्ति यत्र विवेक इति पदं तत्राप्रशस्ता एव भावना द्रष्टव्याः; ता विवेक्तव्याः- परित्याज्या इति भावः । "गुणा तत्थ" त्ति यास्तु प्रशस्ता भावनाः तासु भाव्यमानासु गुणाः-खेद-विनोदादयः प्रागुक्ता भवन्तीति चूर्ण्यभिप्रायेण व्याख्यानम्। विशेषचूर्ण्यभिप्रायः पुनरयम्-यत्र च प्रशस्तेऽपि वस्तुनि विवेकः-परित्यागोऽस्य घटते तत्र गुणा एव भवन्ति । यथा-आचार्यादीनामवर्णभाषण-श्रवणे औदासीन्यमवलम्बमानस्याप्यस्य गुण एव भवति, न पुनः स्थविरकल्पिकस्येव यथाशक्ति तन्निवारणमकुर्वतो दोष इति ॥

अथाप्रशस्तभावनानां नामग्राहं गृहीत्वा सङ्ख्यामाह-

[भा.१२९३] कंदप्प देवकिब्विस, अभिओगा आसुरा य सम्मोहा ।
एसा य संकिलिट्ठा, पंचविहा भावना भणिया ॥

वृ- कन्दर्पः-कामस्तत्प्रधानाः षिङ्गप्राया देवविशेषाः कन्दर्पा उचयन्ते तेषामियं कान्दर्पी । एवं देवानां मध्ये किल्बिषाः-पापा अत एवास्पृश्यादिधर्माणश्चण्डालप्रायास्तेषामियं दैवकिल्बिषी । आ-समन्ताद् आभिमुख्येन (वा) युज्यन्ते-प्रेष्यकर्मणि व्यापार्यन्त इत्याभियोग्याः-किङ्करस्थानीया देवविशेषास्तेषामियमाभियोगी । असुराः-भवनपतिदेवविशेषास्तेषामियमासुरी । सम्मुह्यन्तीति सम्मोहाः-मूढात्मानो देवविशेषास्तेषामियं साम्मोही । गाथायां प्राकृतत्वाद् आपप्रत्ययः । एषा अप्रशस्ता पञ्चविधा भावना तत्तत्स्वभावाभ्यासरूपा भणिता ॥ अथासामेव फलमाह-

[भा.१२९४] जो संजओ वि एआसु अप्पसत्थासु भावनं कुणइ ।
सो तव्विहेसु गच्छइ, सुरेसु भइओ चरणहीनो ॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

वृ- यः 'संयतोऽपि' व्यवहारतः साधुरप्येताभिरप्रशस्ताभिर्भावनाभिः, गाथायां तृतीयार्थे सप्तमी, 'भावनम्' आत्मनो वासनं करोति सः 'तद्विधेषु' तादृशेषु कान्दर्पिकादिषु सुरेषु गच्छति। यस्तु 'चरणरहितः' सर्वथा चारित्रसत्ताविकलो द्रव्यचरणहीनो वा सः 'भाज्यः' तद्विधेषु वा देवेषूत्पद्यते नरक-तिर्यङ्-मनुष्येषु वा ॥ अथासामेव प्ररूपणां चिकीर्षु प्रथमतः कन्दर्पभावनां प्ररूपयति-

[भा.१२९५] कंदप्पे कुक्कुइए,दवसीले यावि हासणकरे य।
विम्हाविंतो य परं, कंदप्पं भावनं कुणइ ॥

वृ- इह कन्दर्पशब्देन कन्दर्पवानुच्यते, एवं कौत्कुच्यवान् द्रवशीलश्चापि हासनकरश्च विस्मापयँश्च परं कान्दर्पी भावनां करोतीति सङ्ग्रहगाथासमासार्थः ॥ अथ विस्तरार्थमाह-

[भा.१२९६] कहकहकहस्स हसणं, कंदप्पो अनिहुया य संलावा।
कंदप्पकहाकहणं, कंदप्पुवएस संसा य ॥

वृ- ''कहकहकहस्स''त्ति तृतीयार्थे षष्ठी, 'कहकहकहेन' उच्चैःस्वरेण विवृतवदनस्य यद् हसनम्-अट्टट्टहास इत्यर्थः, यश्च 'कन्दर्प' स्वानुरूपेण सह परिहासः, ये च 'अनिभृताः' निष्ठुरवक्रोक्त्यादिरूपा गुर्वादिनाऽपि समं संलापाः, यच्च कन्दर्पकथायाः-कामसम्बद्धायाः कथायाः कथनम्, यश्च कन्दर्पस्योपदेशः-'इत्थमित्तं कुरु' इति विधानद्वारेण कामोपदेशः, या च 'शंसा' प्रशंसा कामविषया, एष सर्वोऽपि कन्दर्प उच्यते ॥ गतं कन्दर्पद्वारम् । अथ कौत्कुच्यद्वारमाह-

[भा.१२९७] भुम-नयण-वयण-दसणच्छदेहि कर-पाद-कन्नमाईहिं।
तं तं करेइ जह हस्सए परो अत्तणा अहसं ॥

वृ- कुत्कुचः-भण्डचेष्टः तस्य भावः कौत्कुच्यं तद् विद्यते यस्य स कौत्कुच्यवान् । स च द्वेधा-कायेन वाचा च । तत्र भ्रू-नयन-वदन-दशनच्छदैः कर-चरण-कर्णादिभिश्च देहावयवैस्तां तां चेष्टामात्मना अहसन्नेव करोति यथा परो हसति एष कायकौत्कुच्यवानुच्यते ॥

[भा.१२९८] वायाकोक्कुइओ पुण, तं जंपइ जेण हस्सए अन्नो।
नाणाविहजीवरुए, कुव्वइ मुहतूरए चेव ॥

वृ- वाचा कौत्कुच्यवान् पुनस्तत् किमपि परिहासप्रधानं वचनं जल्पति येनाऽन्यो हसति, नानाविधानां वा मयूर-मार्जार-कोकिलादीनां जीवानां रुतानि-कूजितानि 'मुखतूर्याणि वा' मुखेनातोद्यवादनलक्षणानि तथा करोति यथा परस्य हास्यमायाति ॥ अथ द्रवशीलमाह-

[भा.१२९९] भासइ दुयं दुयं गच्छए अ दरिउ व्व गोविसो सरए।
सव्वदुयदुयकारी, फुट्टइ व ठिओ वि दप्पेणं ॥

वृ- 'द्रुतं द्रुतम्' असमीक्ष्य सम्भ्रमावेशवशाद् यो भाषते । यश्च द्रुतं गच्छति, क इव ? इत्याह-शरदि 'दर्पित इव' दर्पोद्धुर इव 'गोवृषः' बलीवर्दविशेषः । शरदि हि प्रचुरचारिध्राणतया मक्षिकाद्युपद्रवरहिततया च गोवृषो मदोद्रेकादुच्छृङ्खलः पर्यटतीति, एवमसावपि निरङ्कुशस्त्वरितं त्वरितं गच्छति। यश्च 'सर्वद्रुतद्रुतकारी' प्रत्युपेक्षणादीनां सर्वासामपि क्रियाणामतित्वरितकारी । यश्च दर्पेण तीव्रोद्रेकवशात् स्फुटतीव 'स्थितोऽपि' स्वभावस्थोऽपि सन्, गमनादिक्रियामकुर्वन्नपीत्यर्थः । एष द्रवशील उच्यते ॥ अथ हासकरमाह-

Jain Education International For Private & Personal Use Only www.jainelibrary.org

[भा.१३००] वेस-वयणेहि हासं, जनयंतो अप्पणो परेसिं च।
अह हासणो त्ति भन्नइ, घयणो व्व छले नियच्छंतो ॥

वृ- "घयणो व्व" भाण्ड इव परेषां 'छिद्राणि' विरूपवेष-भाषाविपर्ययाणि "नियच्छंतो"त्ति निरन्तरमन्वेषयन् तादृशैरेव वेष-वचनैर्विचित्रैरात्मनः 'परेषां च' प्रेक्षकाणां हास्यं 'जनयन्' उत्पादयन् अथैषः 'हासनः' हास्यकर इति भण्यते ॥ अथ परविस्मापकमाह-

[भा.१३०१] सुरजालमाइएहिं, तु विम्हयं कुणइ तव्विहजणस्स।
तेसु न विम्हयइ सयं, आहट्ट-कुहेडएहिं च ॥

वृ- सुरजालम्-इन्द्रजालम् आदिशब्दाद् अपरकौतुकपरिग्रहः तैः, तथा आहर्त्ताः-प्रहेलिकाः कुहेटकाः-वक्रोक्तिविशेषरूपास्तैश्च तथाविधग्राम्यलोकप्रसिद्धैर्यत् 'तद्विधजनस्य' तादृशस्य बालिशप्रायलोकस्य 'विस्मयं' चित्तभ्रमं करोति स्वयं पुनस्तेषु न विस्मयते एष परविस्मापकः ॥ उक्ता कान्दर्पी भावना। अथ दैवकिल्विषिकीं बिभावयिषुराह-

[भा.१३०२] नाणस्स केवलीणं, धम्मायरियाण सव्वसाहूणं।
माई अवन्नावाई, किव्विसियं भावणं कुणइ ॥

वृ- ज्ञानस्य केवलिनां धर्माचार्याणां सर्वसाधूनाम् एतेषामवर्णवादी, तथा 'मायी' स्वभावनिगूहनादिना मायावान् एष किल्विषिकीं भावनां करोतीति निर्युक्तिगाथासमासार्थः ॥ अथ व्यासार्थमाह-

[भा.१३०३] काया वया य ते च्चिय, ते चेवपमाय अप्पमाया य।
मोक्खाहिगारिगाणं, जोइसजोणीहि किं च पुणो ॥

वृ- इह केचिद् दुर्विदग्धाः प्रवचनाशातनापातकमगणयन्त इत्थं श्रुतस्यावर्णं ब्रुवते, यथा-षड्जीवनिकयामपि षट् कायाः प्ररूप्यन्ते, शस्त्रपरिज्ञायामपि त एव, अन्येष्वप्यध्ययनेषु बहुशस्त एवोपवर्ण्यन्ते; एवं व्रतान्यपि पुनः पुनस्तान्येव प्रतिपाद्यन्ते; तथा त एव प्रमादा-ऽप्रमादाः पुनः पुनर्वर्ण्यन्ते, यथा-उत्तराध्ययनेषु आचाराङ्गे वा; एवं च पुनरुक्तदोषः। किञ्च यदि केवलस्यैव मोक्षस्य साधनार्थमयं प्रयासस्तर्हि 'मोक्षाधिकारिणां' साधूनां सूर्यप्रज्ञप्त्यादिना ज्योतिषशास्त्रेण योनिप्राभृतेन वा किं पुनः कार्यम् ? न किञ्चिदित्यर्थः। तेषामित्थं ब्रुवाणानामिदमुत्तरम्-इह प्रवचने यत एव कायादयो भूयो भूयः प्ररूप्यन्ते तद् महता यत्नेनाऽमी परिपालनीयाः, इदमेव धर्मरहस्यमित्यादरातिशयख्यापनार्थत्वाद् न पुनरुक्तम्। यत उक्तम्-

अनुवादा-ऽऽदर-वीप्सा-भृशार्थ-विनियोग-हेत्वसूयासु।
ईषत्सम्भ्रम-विस्म-गणा-स्मरणेष्वपुनरुक्तम् ॥

ज्योतिशास्त्रादि च शिष्यप्रव्राजनादिशुभकार्योपयगोफलत्वात् परम्परया मुक्तिफलमेवेति न कश्चिद् दोषः ॥ गतो ज्ञानावर्णवादः। अथ केवल्यवर्णवादमाह-

[भा.१३०४] एगतरमुप्पाए, अन्नोन्नावरणया दुवेण्हं पि।
केवलदंसण-नाणाणमेगकाले व एगत्तं ॥

वृ- इह केवलिनामवर्णवादो यथा-किमेषां ज्ञान-दर्शनोपयोगौ क्रमेण भवतः ? उत युगपत्? यद्याद्यः पक्षस्ततो यं समयं जानाति तं समयं न पश्यति यं समयं पश्यति तं समयं न जानातीत्येव-

Jain Education International For Private & Personal Use Only www.jainelibrary.org

मेकान्तरिते उत्पादे 'द्वयोरपि' केवलज्ञान-दर्शनयोरन्योन्यावरणता भवेत्, ज्ञानावरण-दर्शनावरणयोः समूलकाषं कषितत्वाद् अपरस्य चाऽऽवारकस्याऽभावात् परस्परावारकतैवानयोः प्राप्नोतीति भावः। अथ युगपदिति द्वितीयः पक्षः कक्षीक्रियते सोऽपि न क्षोदक्षमः, कुतः ? इत्याह-'एककाल' युगपद् उपयोगद्वयेऽङ्गीक्रियमाणे वाशब्दः पक्षान्तरद्योतनार्थ 'द्वयोरपि' साकारा-ऽनाकारोपयोगयोरेकत्वं प्राप्नोति, तुल्यकालभावित्वादिति। अत्रोत्तरम्-इह तथाजीवस्वाभाव्यादेव सर्वस्यापि केवलिन एकस्मिन् समये एकतर एवोपयोगो भवति न द्वौ, "सव्वस्स केवलिस्सा, जुगवं दो नतथि उवओगा" इति वचनात्। यथा चायमेक एवैकसमये उपयोग उपपद्यते तथा विशेषावश्यकादिषु श्रीजिनभद्रक्षमाश्रमणादिभि पूर्वसूरिभिः सप्रपञ्चमुपदर्शित इति नेहोपदर्श्यते, ग्रन्थगौरवभयात्। द्वितीयपक्षानुपपत्तिनोदना त्वनभ्युपगतोपालम्भत्वादाकाशरोमन्तनमिव केवलं भवतः प्रयासकारिणीति ॥ अथ धर्माचार्यावर्णवादमाह-

[भा.१३०५] जच्चाईहि अवन्नं, भासइ वट्टइ न यावि उववाए।
अहितो छिद्दप्पेही, पगासवादी अननुकूलो ॥

वृ- जात्या आदिशब्दात् कुलादिभिश्च सद्भिरसद्भिर्वा दोषैरवर्णं भाषते, यथा-नैते विशुद्धजाति-कुलोत्पन्नाः, न वा लोकव्यवहारकुशलाः, नाप्येते औचित्यं विदन्तीत्यादि। न चापि वर्त्तते 'उपपाते' गुरूणां सेवावृत्तौ, 'अहितः' अनुचितविधायी, 'छिद्रप्रेक्षी' मत्सरितया गुरोर्दोषस्थाननिरीक्षणशीलः, 'प्रकाशवादी' सर्वसमं गुरुदोषभाषी, 'अननुकूलः' गुरूणामेव प्रत्यनीकः कूलवालकवत्, एष धर्माचार्यावर्णवादः ॥ अथ सर्वसाधूनामवर्णवादमाह-

[भा.१३०६] अविसहणाऽतुरियगई, अनानुवत्ती य अवि गुरूणं पि।
खणमित्तपीइ-रोसा, गिहिवच्छलकाऽइसंचइआ ॥

वृ- अहो! अमी साधवः 'अविषहणाः' न कस्यापि पराभवं सहन्ते, अपि तु स्वपक्ष-परपक्षापमाने सञ्जाते सति देशान्तरं गच्छन्ति, "तुरियगइ"त्ति अकारप्रश्लेषाद् 'अत्वरितगतयः' मायया लोकावर्जनाय मन्दगामिनः 'अननुवर्त्तिनः' प्रकृत्यैव निष्ठुराः 'गरूणामपि' महतामपि, आस्तां सामान्यलोकस्येत्यपिशब्दार्थः, द्वितीयोऽपिशब्दः सम्भावनायाम्, सम्भाव्यन्त एवंविधा अपि साधव इति, 'क्षणमात्रप्रीति-रोषाः' तदैव रुष्टास्तदैव च तुष्टा अनवस्थितचित्ता इत्यर्थः, 'गृहिवत्सलाः' तैस्तैश्चाटुवचनैरात्मानं गृहस्थस्य रोयन्ति, 'अतिसञ्चयिनः' सुबहुवस्त्र-कम्बल्यादिसङ्ग्रहशीलाः लोभबहुला इति भावः। अत्र निर्वचनानि-इह साधवः स्वपक्षाद्यपमाने यद् देशान्तरं गच्छन्ति तद् अप्रीतिक-परोपतापादिभीरुतया न पराभवासहिष्णुतया, अत्वरितगतयोऽपि स्थावरत्रसजन्तुपीडापरिहारार्थं न तु लोकरञ्जनार्थम्, अननुवर्त्तिनोऽपि संयमबाधाविधायिन्या अनुवर्त्तनाया अकरणात् न प्रकृतिनिष्ठुरतया, क्षणमात्रप्रीति-रोषा अपि प्रतनुकषायतया नानवस्थितचित्ततया, गृहिवत्सला अपि 'कथं नु नामामी धर्मदेशनादिना यथाऽनुरूपोपायेन धर्मं प्रतिपद्येरन् ?' इति बुध्या न पुनश्चाटुकारितया, सञ्चयवन्तोऽपि 'मा भूद् उपकरणाभावे संयम-प्रवचना-ऽऽत्मविराधना' इति बुध्या न तु लोभबहुलतयेति ॥

अथ मायिद्वारमाह-

[भा.१३०७] गूहइ आयसभावं, घाएइ गुणे परस्स संते वि।
चोरो व्व सव्वसंकी, गूढायारो वितहभासी ॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

वृ- 'गूहति' संवृणोति 'आत्मस्वभावम्' आत्मनः सम्बन्धिनं दुष्टपरिणामं बहिर्बकवृत्या, तथा परस्य सम्बन्धिनः 'गुणान्' ज्ञानादीन् सतोऽप्यभिनिवेशादिना घातयति, चौर इव 'सर्वशङ्की' प्रच्छन्नपापकारितया 'अमुकोऽमुकश्च मत्समक्षमित्थं भणिष्यति' इति सर्वस्यापि शङ्कां करोति, गूढः-मायाग्रन्थिगुपिल आचारः-प्रवृत्तिर्यस्य स गूढाचारः, 'वितथभाषी' मृषाभाषणशीलः, एष मायी द्रष्टव्य इति ।। उक्ता कैल्विषी भावना । अथाभियोगीमाह-

[भा.१३०८] कोउअ भूई पसिणे, पसिणापसिणे निमित्तमाजीवी ।
इड्ढि-रस-सायगुरुतो, अभिओगं भावनं कुणइ ।।

वृ- ऋद्धि-रस-सातगुरुकः सन् यः कौतुकाजीवी भूतिकर्माजीवी प्रश्नाजीवी प्रश्नप्रश्नाजीवी निमित्ताजीवी च भवति स एवंविध आभियोगीं भावनां करोतीति ।।

कौतुकादिपदव्याख्यानार्थमाह-

[भा.१३०९] विण्हवण-होम-सिरपरिरयाइ खारदहणाइँ धूवे य ।
असरिसवेसग्गहणं, अवयासण-उत्थुभण-बंधा ।।

वृ- बालादीनां रक्षादिनिमित्तं स्त्रिया वा सौभाग्यादिसम्पादनाय विशेषेण स्नपनं तद् विस्नपनम्, होमः-शान्तिकादिहेतोरग्निहवनम्, सिरःपरिरयः-करभ्रमणाभिमन्त्रणम्, आदिशब्दः स्वगतानेकभेदसूचकः, 'क्षारदहनानि तथाविधव्याधिशमनायाग्नौ लवणप्रक्षेपरूपाणि, "धूवे अ"त्ति तथाविधद्रव्ययोगगर्भस्य धूपस्य सन्तर्पणम्, 'असदृशवेषग्रहणं' नाम स्वयमार्य सन्ननार्यवेषं करोति पुरुषो वा स्वं रूपमन्तर्हित्य स्त्रीवेषं विदधातीत्यादि, "अवयासणं" वृक्षादीनामालिङ्गापनम्, अवस्तोभनम्-अनिष्टोपशान्तये निष्ठीवनेन थुथुकरणम्, बन्धः-कण्डकादिबन्धनम्, एतत् सर्वमपि कौतुकमुच्यते ।। अथ भूतिकर्म व्याचष्टे-

[भा.१३१०] भूईए मट्टियाए व, सुत्तेण व होइ भूइकम्मं तु ।
वसही-सरीर-भंडगरक्खाअभियोगमाईया ।।

वृ- 'भूत्या' भस्मरूपया विद्याभिमन्त्रितया 'मृदा वा' ,आर्द्रपांशुलक्षणया 'सूत्रेण वा' तन्तुना यत् परिरयवेष्टनं तद् भूतिकर्मोच्यते । किमर्थमेवं करोति ? इत्याह-वसति-शरीर-भाण्डकानां या स्तेनाद्युपद्रवेभ्यो रक्षा तन्निमित्तमभियोगः-वशीकरणम्, आदिशब्दाद् ज्वरादिस्तम्भनपरिग्रहः।।

अथ प्रश्नमाह-

[भा.१३११] पण्हो उ होइ पसिणं, जं पासइ वा सयं तु तं पसिणं ।
अंगुट्ठुच्चिट्ठ-पडे, दप्पण-असि-तोय-कुड्डाई ।।

वृ- 'प्रश्नस्तु' देवतादिपृच्छारूपः पसिणं भण्यते; यद्वा यत् 'स्वयम्' आत्मना तुशब्दादन्येऽपि तत्रस्थाः पश्यन्ति तत् पसिणं प्राकृतशैल्याऽभिधीयते । किं तत् ? इत्याह-अङ्गुष्ठे "उच्चिट्ठ" त्ति कंसारादिभक्षणेनोच्छिष्टे पटे-प्रतीते दर्पणे-आदर्शे असौ-खड्गे तोये-उदके कुड्ये-भित्तौ आदिशब्दाद् बाह्वादौ वा यद् देवतादिकमवतीर्णं पृच्छति पश्यति वा स प्रश्नः । यदि वा "कुड्डाइ"त्ति पाठः, तत्र च क्रुद्धः प्रशान्तो वा यत् तथाविधकल्पविशेषात् पश्यति स प्रश्न इति ।। प्रश्नप्रश्नमाह-

[भा.१३१२] पसिणापसिणं सुमिणे, विज्जासिट्ठं कहेइ अन्नस्स ।
अहवा आइंखिणिया, घंटियसिट्ठं परिकहेइ ।।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

वृ-यत् स्वप्नेऽवतीर्णया विद्यया-विद्याधिष्ठात्र्या देवतया शिष्टं-कथितं सद् 'अन्यस्मै' पृच्छकाय कथयति; अथवा "आइंखिणिया" डोम्बी तस्याः कुलदैवतं घण्टिकयक्षो नाम स पृष्टः सन् कर्णे कथयति, सा च तेन शिष्टं-कथितं सदन्यस्मै पृच्छकाय शुभा-ऽशुभादि यत् परिकथयति एष प्रश्नप्रश्नः ।। निमित्तमाह-

[भा.१३१३] तिविहं होइ निमित्तं,तीय-पडुप्पन्न-ऽनागयं चेव ।
तेन न विना उ नेयं, नज्जइ तेनं निमित्तं तु ।।

वृ-त्रिविधं भवति निमित्तम् । तद्यथा-अतीतं प्रत्युत्पन्नमनागतं च । कालत्रयवर्त्तिलाभाऽलाभादि-परिज्ञानहेतुश्चूडामणिप्रभृतिकः शास्त्रविशेष इत्यर्थः । कुतः ? इत्याह-'तेन' विवक्षितशास्त्रविशेषेण विना 'ज्ञेयं' लाभा-ऽलाभादिकं न ज्ञायत इति लाभा-ऽलाभादिज्ञाननिमित्तत्वाद् निमित्तमुच्यते। एतानि कौतुकादीनि य आजीवति स तत्तदाजीवको मन्तव्य इति ।। अथ 'ऋद्धि-रस-सातगुरुकः' इतिपदव्याख्यानार्थमाह-

[भा.१३१४] एयाणि गारवट्ठा, गुणमाणो आभिओगियं बंधे ।
बीयं गारवरहिओ, कुव्वं आराहगुच्चं च ।।

'एतानि' कौतुकादीनि ऋद्धि-रससातगौरवार्थं 'कुर्वाणः' प्रयुञ्जानः सन् 'आभियोगिकं' देवादिप्रेष्यकर्मव्यापारफलं कर्म बध्नाति । 'द्वितीयम्' अपवादपदमत्र भवति-गौरवरहितः सन्नतिशयज्ञाने सति निस्पृहवृत्त्या प्रवचनप्रभावनार्थमेतानि कौतुकादीनि कुर्वन्नाराधको भवति उच्चैर्गोत्रं च कर्म बध्नाति, तीर्थोन्नतिकरणादिति ।। गता आभियोगिकी भावना । अथाऽऽसुरीमाह-

[भा.१३१५] अनुबद्धविग्गहो चिय, संसत्ततवो निमित्तमाएसी ।
निक्किव निरानुकंपो, आसुरियं भावनं कुणइ ।।

वृ-अनुबद्धविग्रहः संसक्ततपा निमित्तादेशी निष्कृपो निरनुकम्पः सन् आसुरीं भावनां करोतीति निर्युक्तिगाथासमासार्थः ।। विस्तरार्थमाह-

[भा.१३१६] निच्चं वुग्गहसीलो, काऊण य नाणुतप्पए पच्छा ।
न य खामिओ पसीयइ, सपक्ख-परपक्खओ आवि ।।

वृ- 'नित्यं' सततं 'विग्रहशीलः' कलहकरणस्वभावः । कृत्वा च कलहं नानुतप्यते पश्चात्, यथा-हा ! किं कृतं मया पापेन ? इति । तथा 'क्षामितोऽपि' 'क्षम्यता ममायमपराधः' इति भणितोऽपि स्वपक्ष-परपक्षयोरपि 'न च' नैव 'प्रसीदति' प्रसन्नतां भजते तीव्रकषायोदयत्वात् । अत्र च स्वपक्षः साधु-साध्वीवर्ग, परपक्षो गृहस्थवर्गः । एषोऽनुबद्धविग्रह उच्यते ।। अथ संसक्त-तपसमाह-

[भा.१३१७] आहार-उवहि-पूयासु जस्स भावो उ निच्चसंसत्तो ।
भावोवहतो कुणइ अ, तवोवहाणं तदट्ठाए ।।

वृ- आहारोपधि-पूजासु यस्य 'भावः' परिणामः 'नित्यसंसक्तः' सदाप्रतिबद्धः स एवं रसगौरवादिना भावेनोपहतः करोति 'तपउपधानम्' अनशनादिकं 'तदर्थम्' आहाराद्यर्थं यः संसक्ततपा इति ।। निमित्तादेशिनमाह-

[भा.१३१८] तिविह निमित्तं एक्केक्क छव्विहं जं तु वन्नियं पुव्विं

Jain Education International For Private & Personal Use Only www.jainelibrary.org

अभिमानाभिनिवेसा, वागरियं आसुरं कुणइ ॥

वृ- 'त्रिविधम्' अतीतादिकालत्रयविषयं यत् पूर्वमिहैवाभियोगिकभावनायां वर्णितं तद् एकैकं 'षड्विधं' लाभा-ऽलाभ-सुख-दुःख-जीवित-मरणविषयभेदात् षटप्रकारम् । आह आभियोगिक-भवनानिबन्धनतया पूर्वमिदमुक्तम् अतः कथमिदमिहाभिधीयते ? इत्याह-'अभिमानाभिनिवेशाद्' अहङ्कारतीव्रतया 'व्याकृतं' प्रकटितमेतद् निमित्तमासुरीं भावनां करोति, अन्यथा त्वाभियोगिकी-मिति ॥ निष्कृपमाह-

[भा.१३१९] चंकमणाई सत्तोस सुनिक्किवो थावराइसत्तेसु ।
काउं च नाणुतप्पइ, एरिसओ निक्किवो होइ ॥

वृ- स्थावरादिसत्त्वेषु चङ्क्रमणं-गमनं आदिशब्दात् स्थान-शयना-ऽऽसनादिकं 'सक्तः' क्वचित् कार्यान्तरे व्यासक्तः सन् 'सुनिष्कृपः' सुष्ठुगतघृणो निशूकः करोतिती शेषः । कृत्वा च तेषु चङ्क्रमणादिकं नानुतप्यते, केनचिद् नोदितः सन् पश्चात्तपपुरस्सरं मिथ्यादुष्कृतं न ददातीत्यर्थः। ईदृशो निष्कृपो भवति, इदं निष्कृपस्य लक्षणमिति भावः ॥

निरनुकम्पमाह-

[भा.१३२०] जो उ परं कंपंतं, दद्धूण न कंपए कढिनभावो ।
एसो उ निरनुकंपो, अणु पच्छाभावजोएणं ॥

वृ- यस्तु 'परं' कृपास्पदं कुतश्चिद् भयात् कम्पमानमपिदृष्ट्वा कठिनभावः सन् न कम्पते एष निरनुकम्पः । कुतः ? इत्याह-अनुशब्देन पश्चाद्भाववाचकेन यो योगः-समबन्धस्तेन, किमुक्तं भवति ? -अनु-पश्चाद् दुःखितसत्त्वकम्पनादनन्तरं यत् कम्पनं सा अनुकम्पा, निर्गता अनुकम्पा अस्मादिति निरनुकम्प उच्यते ॥ उक्ता आसुरी भावना । सम्प्रति साम्मोहीमाह-

[भा.१३२१] उम्मग्गदेसणा १ मग्गदूसणा २ मग्गविप्पडीवत्ती ३ ।
मोहेण य ४ मोहित्ता ५, सम्मोहं भावनं कुणइ ॥

वृ- उन्मार्गदिशना १ मार्गदूषणा २ मार्गविप्रतिपत्तिश्च ३ यस्य भवतीति वाक्यशेषः, मोहेन च यः स्वयं मुह्यति ४, एवं कृत्वा परं च मोहयित्वा ५ साम्मोहीं भावनां करोतीति निर्युक्तिगाथासमा-सार्थः ॥

अथैनामेव विवरीषुराह-

[भा.१३२२] नाणाइ अदूसिंतो, तव्विवरीयं तु उवदिसइ मग्गं ।
उम्मग्गदेसओ एस आय अहिओ परेसिं च ॥

वृ- 'ज्ञानादीनि' पारमार्थिकमार्गरूपाण्यदूषयन् 'तद्विपरीतं' ज्ञानादिविपरीतमेवोपदिशति 'मार्गं' धर्मसम्बन्धिनम्, एष उन्मार्गदिशकः । अयं चात्मनः परेषां च बोधिबीजोपघातादिना 'अहितः' प्रतिकूल इत्येषा उन्मार्गदिशना ॥ अथ मार्गदूषणामाह-

[भा.१३२३] नाणादि तिहा मग्गं, दूसयए जे य मग्गपडिवन्ना ।
अबुहो पंडियमाणी, समुट्ठितो तस्स घायाए ॥

वृ- ज्ञानादिकं 'त्रिधा' त्रिविधं पारमार्थिकं मार्गं स्वमनीषिकाकल्पितैर्जातिदूषणैर्दूषयति, ये च तस्मिन् मार्गेप्रतिपन्नाः साध्व्यादयस्तानपि दूषयति, 'अबुधः' तत्त्वपरिज्ञानविकलः, 'पण्डितमानी'

Jain Education International For Private & Personal Use Only www.jainelibrary.org

दुर्विदग्धः, 'समुत्थितः' उद्यतः 'तस्य' पारमार्थिकमार्गस्य 'घाताय' निर्लोठनायेति, एषा मार्गदूषणा॥ मार्गविप्रतिपत्तिमाह-

[भा.१३२४] जो पुन तमेव मग्गं, दूसेउमपंडिओ सतक्काए।
उम्मग्गं पडिवज्जइ, अकोविअप्पा जमालीव ॥

वृ-यः पुनः 'तमेव' परमार्थिकं मार्गमसद्भिर्दूषयित्वा 'अपण्डितः' सद्बुद्धिरहितः सन् 'स्वतर्कया' स्वकीयमिथ्याविकल्पेन देशत उन्मार्गं प्रतिपद्यते 'अकोविदात्मा' सम्यक् शास्त्रार्थपरिज्ञानविकलो जमालिवत्, यथाऽसौ भगवद्वचनं "क्रियमाणं कृतम्" इति दूषयित्वा "कृतमेव कृतम्" इति प्रतिपन्नवान्। एषा मार्गविप्रतिपत्तिः ॥ अथ मोहद्वारमाह-

[भा.१३२५] भावोवहयमईओ, मुज्झइ नाण-चरणंतराईसु।
इड्ढीओ अ बहुविहा, दट्ठुं परतित्थियाणं तु ॥

वृ-भावेन-शङ्कादिपरिणामेनोपहता-दूषिता मतिर्यस्य स भावोपहतमतिकः एवंविधः 'मुह्यति' वैचित्यमुपयाति ज्ञान-चरणान्तरादिषु। ज्ञानान्तराणि नाम ज्ञानविशेषाः, तद्विषयो व्यामोहो यथा-यदि नाम परमाण्वादिसकलरूपिद्रव्यावसानविषयग्राहकत्वेन सङ्ख्यातीतरूपाण्यवधिज्ञानानि सन्ति त्त किमपरेण मनःपर्यवज्ञानेन ? इति । चरणान्तरव्यामोहो यथा-यदि सामायिकं सर्वसावद्यविरतिरूपं छेदोपस्थापनीयमप्येवंविधमेव तत् क नामानयोर्विशेषः ? आदिशब्दाद् दर्शनान्तर-मतान्तर-वाचनान्तरादिपरिग्रहः । 'ऋद्धीश्च बहुविधाः' अनेकप्रकाराः समृद्धीः परतीर्थिकानां दृष्ट्वा यद् मुह्यति स मोह उच्यते ॥ अथ परं मोहयित्वेति व्याचष्टे-

भ. (१३२६] जो पुन मोहेइ परं, सब्भावेणं व कइअवेणं वा।
सम्मोहभावणं सो, पकरेइ अबोहिलाभाय ॥

वृ-पुनःशब्दो विशेषणे, यः पुः सन्मार्गात् 'परम्' अन्यं प्राणिन 'मोहयति' चित्तविभ्रमं नयति 'सद्भावेन वा' सत्येनैव 'कैतवेन वा' परिकल्पनया स सम्भोहभावनां प्रकरोति, 'अबोधिलाभाय' अबोधिफलादायिनीमित्यर्थः ॥ उक्ता साम्मोही भावन । अताऽऽसां भावनानां सामान्यतः फलमाह-

[भा.१३२७] एआओ भावनाओ, भावित्ता देवदुग्गइं जंति।
तत्तो वि चुया संता, परिंति भवसागरमनंतं ॥

वृ-एता भावनाः 'भावयित्वा' अभ्यस्य 'देवदुर्गतिं' कान्दर्पिकादिदेवगतिरूपां यान्ति संयता अपि। 'ततोऽपि' देवदुर्गतिश्च्युताः सन्तः पर्यटन्ति 'भसागरं' संसारसमुद्रमनन्तमिति ॥

उक्ता अप्रशस्ता भावनाः। सम्प्रति प्रशस्तभावना अभिधित्सुराह-

[भा.१३२८] तवेण सत्तेण सुत्तेण, एगत्तेण बलेण य।
तुलना पंचहा वुत्ता, जिनकप्पं पडिवज्जओ ॥

तपसा सत्त्वेन सूत्रेण एकत्वेन बलेन च एवं 'तुलना' भावना पञ्चधा प्रोक्ता जिनकल्पं प्रतिपद्यमानस्येति निर्युक्तिगाथासमासार्थः ॥ अथ विस्तरार्थमभिधित्सुराह-

[भा.१३२९] जो जे अणब्भत्थो, पोरिसिमाई तवो उ तं तिगुणं।
कुणइ छुहाविजयट्ठा, गिरिनइसीहेण दिट्ठंतो ॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

वृ- यद् येन पौरुष्यादिकं तपः 'अनभ्यस्तं' सात्मीभावमनानीतं तत् 'त्रिगुणं' त्रीन् वारान् करोति । यथा-प्रथमं पौरुषीं वारत्रयासेवनेन सात्मीभावमानीय ततः पूर्वार्द्धं तथैवासेव्य सात्मीभावमानयति; एवं निर्विकृतिकादिष्वपि द्रष्टव्यम् । किमर्थम् ? इत्याह-क्षुद्विजयार्थम्, यथा क्षुत्परीषहसहने सात्म्यं भवतीत्यर्थः । अत्र च गिरिनदीसिंहेन दृष्टान्तः-यथाऽसौ पूर्णां गिरिनदीं तरन् परतटे चिह्नं करोति, यथा-अमुकप्रदेशे वृक्षाद्युपलक्षिते मया गन्तव्यमिति, स च तरन् तीक्ष्णेनोदकवेगेनापह्रियते ततो व्यावृत्य भूयः प्रगुणमेवोत्तरति, यदि ह्रियते ततो भूयस्तथैवोत्तरति, एवं यावत् सकलामपि गिरिनदीं प्रगुणमेवोत्तरीतुं न शक्नोति तावत् तदुत्तरणाभ्यासं न मुञ्चति। एवमयमपि यावद् विवक्षितं तपः सात्मीभावं न याति तावत् तदभ्यासं न मुञ्चति ।। एतदेवाह-

[भा.१३३०] एक्केक्कं ताव तवं, करेइ जह तेन कीरमाणेणं ।
हानी न होइ जइआ, वि होज्ज छम्मासुवस्सग्गो ।।

वृ- एकैकं तपस्तावत् करोति यथा 'तेन' तपसा क्रियमाणेनापि विहितानुष्ठानस्य हानिर्न भवति । यदाऽपि कथञ्चिद् भवेत् षण्मासान् यावद् 'उपसर्गः' देवादिकृतोऽनेषणीय-करणादिरूपस्तदाऽपि षण्मासान् यावदुषित आस्ते न पुनरनेषणीयमाहारं गृह्णाति ।। तपस एव गुणान्तरमाह-

[भा.१३३१] अप्पाहारस्स न इंदियाइँ विसएसु संपवत्तंति ।
नेव किलम्मइ तवसा, रसिएसु न सज्जए यावि ।।

वृ- तपसा क्रियमाणेनाल्पाहारस्य सतो नेन्द्रियाणि 'विषयेषु' स्पर्शादिषु सम्प्रवर्त्तन्ते, न च 'क्लाम्यति' बाधामनुभवति तपसा, नैव च 'रसिकेषु' स्निग्ध-मधरेष्वशनादिषु 'सजति' सङ्गंकरोति, तेषु परिभोगाभावेनादराभावात् ।। अपि च-

[भा.१३३२] तवभावणाइ पंचिंदियाणि दंताणि जस्स वसमिंति ।
इंदियजोग्गा(गा)यरिओ, समाहिकरणाइँ कारयए ।।

वृ-तपोभावनया हेतुभूतया 'पञ्च' इति पञ्चसङ्ख्याकानीन्द्रियाणि दान्तानि सन्ति यस्य 'वशम्' आयत्ततामागच्छन्ति सः 'इन्द्रिययोग्या(गा)चार्य' इन्द्रियप्रगुणनक्रियागुरु 'समाधिकरणानि' समाधिव्यापारान् काश्यति इन्द्रियाणि, यथा यथा ज्ञानादिषु समाधिरुत्पद्यते तथा तथा तानि कारयतीत्यर्थः ।। उक्ता तपोभावना । अथ सत्त्वभावनामाह-

[भा.१३३३]जे वि य पुव्विं निसि निग्गमेसु विसहिंसु विसहिंसु साहस-भयाइं ।
अहि-तक्कर-गोवाई, विसिंसु घोरे य संगामे ।।

वृ- येऽपि च राजप्रव्रजितादयः पूर्वं गृहवासे 'निशि' रात्रौ वीरचर्यादिना निर्गमेषु साध्वसम्-अहतुकभयरूपं भयं-सहेतुकं ते अहि-तस्कर-गोपादिसम्बन्धिनी 'व्यषहन्' विषोढवन्तः, घोरे च सङ्ग्रामे सात्त्विकतया ''विसिंसु''त्ति प्राविशन् तेऽपि जिनकल्पं प्रतिपित्सवः सत्त्वभावनामवश्यं भावयन्ति ।। कथम् ? इति चेद् उच्यते-

[भा.१३३४] पासुत्ताण तुयट्टं, सोयव्वं जं च तीसु जामेसु ।
थोवं थोवं जिणइ उ, भयं च जं संभवइ जत्थ ।।

वृ- यत् स्थविरकल्पिकानां पार्श्वत उत्तानकं वा तुवग्वर्त्तनम्, यच्च कारणे त्रिषु 'यामेषु'

Jain Education International		For Private & Personal Use Only		www.jainelibrary.org

प्रहरेषु 'सुप्तव्यं' शयनम्, कारणाभावे तु यत् तृतीयप्रहरे सुप्तव्यं तत् सर्वमपि स्तोकं स्तोकं जयति शनैः शनैरित्यर्थः, 'भयं च' मूषिकादिजनितं यद् 'यत्र' उपाश्रयादिषु सम्भवति तत् तत्र जयति ।। अत्र च सत्त्वभावनायां पञ्च प्रतिमा भवन्ति । ता एवाह-

[भा.१३३५] पढमा उवस्सयम्मी, बिइया बाहिं तइया चउक्कम्मि ।
सुन्नघरम्मि चउत्थी, तह पंचमिया सुसाणम्मि ।।

वृ- प्रथमा प्रतिमा उपाश्रये १ द्वितीया उपाश्रयाद् बहि २ तृतीया 'चतुष्के' चत्वरे ३ चतुर्थी शून्यगृहे ४ पञ्चमी श्मशाने ५ ।। तत्र प्रथमां तावदाह-

[भा.१३३६] भोगजढे गंभीरे, उव्वरए कोट्ठए अलिंद वा ।
तनुसाइ जागरो वा, झाणट्ठाए भयं जिणइ ।।

वृ- "भोगजढे" अपरिभोग्ये 'गम्भीरे' सान्धकारे उपाश्रयसत्केऽपवरके वा कोष्ठके वा अलिन्दके वा 'तनुशायी' स्तोकनिद्रावान् 'जाग्रद् वा' निद्रामकुर्वन् 'ध्यानार्थं' शुभाध्यवसायस्थैर्यहितोः प्रसुप्तेषु शेषसाधुषु कायोत्सर्गस्थितो भयं जयति ।। कथम् ? इत्याह-

[भा.१३३७] छिक्कस्स व खइयस्स व, मूसिगमाईहि वा निसिचरेहिं ।
जह सहसा न वि जायइ, रोमंचुब्भेय चाडो वा ।।

वृ- स्पृष्टस्य वा खादितस्य वा मूषकैः आदिग्रहणाद् मार्जारादिभिः 'निशाचरैः' रात्रिपरिभ्रमणशीलैः यथा सहसा नापि जायते 'रोमाञ्चोद्भेदः' भयोद्रेकजिनितो रोमोद्धर्ष 'चाडो' वा पलायनं तथा सत्त्वभावनयाऽऽत्मा भावयितव्यः ।।

उक्ता प्रथमा प्रतिमा । अथ द्वितीयादिकाश्चतोऽप्यतिदिशन्नाह-

[भा.१३३८] सविसेसतरा बाहिं, तक्कर-आरक्खि-सावयाईया ।
सुन्नघर-सुसाणेसु य, सविसेसतरा भवे तिविहा ।।

वृ- यान्युपाश्रयप्रतिमायां भयान्युक्तानि तान्युपाश्रयाद् बहि प्रतिमायां सविशेषतराणि तस्कराऽऽरक्षिक-श्वापदादिभयसहितानि मन्तव्यानि । शून्यगृह-श्मशानयोः चशब्दात् चतुष्के च सविशेषतराणि 'त्रिविधानि' दिव्य-मानुष्य-तैरश्चोपसर्गरूपाणि भयानि भवन्ति, तान्यपि सम्यग् जयतीति प्रक्रमः ।। अस्या एव भावनायाः फलमाह-

[भा.१३३९] देवेहि भेसिओ वि य, दिया व रातो व भीमरूवेहिं ।
तो सत्तभावना, वहइ भरं निब्भओ सयलं ।।

वृ- तत एवं सत्त्वभावनया स्वभ्यस्तया दिवा वा रात्रौ वा भीमरूपैर्देवैर्भेषितोऽपि 'भरं' जिनकल्पभारं सकलमपि निर्भयः सन् वहतीति ।। गता सत्त्वभावना । अथ सूत्रभावनामाह-

[भा.१३४०] जइ वि य सनाममिव परिचियं सुअं अणहिय-अहीणवन्नाई ।
कालपरिमाणहेउं, तहा वि खलु तज्जयं कुणइ ।।

वृ- यद्यपि स्वनामेव तस्य श्रुतं परिचितम् 'अनधिका-ऽहीनवर्णादि' अनत्यक्षरं अहीनाक्षरम् आदिशब्दाद् अवायविद्धाक्षरादिगुणोपेतं च तथापि कालपरिमाणहेतोः 'तज्जयं' श्रुताभ्यासं करोति।। कथम् ? इति चेद् उच्यते-

[भा.१३४१] उस्सासाओ पाणू, तओ य थोवो तओ वि य मुहुत्तो ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

मुहुत्तेहि पोरिसीओ, जाणेइ निसा य दिवसा य ॥

वृ- श्रुतपरावर्त्तनानुसारेणैव सम्यगुच्छ्वासमानं कलयति, तत उच्छ्वासात् 'प्राणः' उच्छ्वासनिश्वासात्मकः, ततस्च प्राणात् 'स्तोकः' सप्तप्राणमानः, ततोऽपि च स्तोकाद् 'मुहूर्त्तं' घटिकाद्वयमानः, मुहूर्त्तैश्च पौरुष्यस्तेन भगवता ज्ञायन्ते, ताभिश्च पौरुषीभिर्निशाश्च दिवसांश्च जानाति ॥ तथा-

[भा.१३४२] मेहाईछन्नेसुवि, उभओकालमहवा उवसग्गे ।
पेहाइ भिक्ख पंथे, नाहिइ कालं विना छायं ॥

वृ- मेघादिना च्छन्नेष्वपि-अनुपलक्ष्येषु विभागेषु 'उभयकालं' क्रियाणां प्रारम्भ-परिसमाप्तिरूपम्, अथवा 'उपसर्गे' दिव्यादौ दिवस-रजन्यादिव्यत्ययकरणलक्षणे प्रेक्षादेः-उपकरणप्रत्युपेक्षाया आदिशब्दादावश्यकरणादेः "भिक्ख"त्ति भिक्षायाः "पंथि" त्ति मार्गस्य विहारस्येत्यर्थः, एतेषां सर्वेषामपि यः कालस्तं छायां विना स्वयमेव ज्ञास्यति ॥ अथ सूत्रभावनाया एव गुणानाह-

[भा.१३४३] एगग्गया सुमह निज्जरा य नेव भिननम्मि पलिमंथो ।
न पराहीणं नाणं, काले जह मंसचक्खूणं ॥

वृ- श्रुतपरावर्त्तनया चित्तस्यैकाग्रता भवति, सुमहती च निर्जरा भवति स्वाध्यायविधानप्रत्यया, नैवच्छायामापने 'पलिमन्थः' सूत्रार्थव्याघातलक्षणः, न च 'काले' पौरुष्यादिकालविषयं 'पराधीनं' सूर्यच्छायायत्तं ज्ञानम् यथा अन्येषां 'मांसचक्षुषां' छद्मस्थानां साधूनाम् ॥ उपसंहरन्नाह-

[भा.१३४४] सुयभावनाए नाणं, दंसण तवसंजमं च परिणमइ ।
तो उवओगपरिन्नो, सुयमव्वहितो समाणेइ ॥

वृ- श्रुतभावनया आत्मानं भावयन् ज्ञानं दर्शनं तपःप्रधानं च संयमं सम्यक् परिणमयति । ततः 'उपयोगपरिज्ञः' श्रुतोपयोगमात्रेणैव कालपरिज्ञाता "सुतं"ति श्रुतभावनामव्यथितः सन् समापयतीति ॥ गता सूत्रभावना । अथैकत्वभावनामाह-

[भा.१३४५] जइ वि य पुव्वममत्तं, छिन्नं साहूहि दारमाईसु ।
आयरियाइममत्तं, तहा वि संजायए पच्छा ॥

वृ- यद्यपि च पूर्वं-गृहवासकालभावि ममत्वं साधुभि दाराः-कलत्रं तेषु आदिग्रहणांत् पुत्रादिषु च्छिन्नमेव तथाप्याचार्यादिविषयं ममत्वं 'पश्चात्' प्रव्रज्यापर्यायकाले सञ्जायते ॥

तच्च कथं परिहापयितव्यम्? उच्यते-

[भा.१३४६] दिट्ठिनिवायाऽऽलावे, अवरोप्परकारियं सपडिपुच्छं ॥
परिहास मिहो य कहा, पुव्वपवत्ता परिहवेइ ॥

वृ- गुर्वादिषु ये पूर्वं दृष्टिनिपाताः-सन्निग्धावलोकनानि ये च तैः सहाऽऽलापास्तान्, तथा 'परस्परोपकारितां' मिथो भक्त-पानदान-ग्रहणाद्युपकारम्, 'सप्रतिपृच्छं' सूत्रार्थादिप्रतिपृच्छया सहितं 'परिहासं' हास्यं 'मिथः कथाश्च' परस्परवार्त्ताः पूर्वप्रवृत्ताः सर्वा अपि परिहापयति ॥ ततश्च-

[भा.१३४७] तनुईकयम्मि पुव्वं, बाहिरपेम्मे सहायमाईसु ।
आहारे उवहिम्मि य, देहे य न सज्जए पच्छा ॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

वृ-सायः-सङ्घाटिकसाधुस्तद्विषये आदिशब्दादाचार्यादिविषये च बाह्यप्रेमणि पूर्वं 'तनुकीकृते' परिहापिते सति ततः पश्चादाहारे उपधौ देहे च 'न सजति' न ममत्वं करोति ॥

ततः किं भवति ? इत्याह-

[भा.१३४८] पुव्विं छिन्नममत्तो, उत्तरकालं ववविज्ञमाणे वि ।
साभाविय इअरे वा, खुब्भइ दट्ठुं न संगइए ॥

वृ-पूर्वं 'छिन्ममत्वः' 'सर्वेऽप जीवा असकृद् अनन्तशो वा सर्वजन्तूनां स्वजनभावेन शत्रुभावेन च सञ्जाताः, अतः कोऽत्र स्वजनः ? को वा परः ?' इतिभावनया त्रुटितप्रेमबन्धः सन् 'उत्तरकालं' जिनकल्पप्रतिपत्त्यनन्तरं व्यापाद्यमानानपि 'सङ्गतिकान्' स्वजनान् स्वाभाविकान् 'इतरान् वा' वैक्रियशक्त्या देवादिनिर्मितान् दृष्ट्वा 'न क्षुभ्यति' ध्यानान्न चलति ॥ अत्र दृष्टान्तमाह-

[भा.१३४९] पुप्फपुर पुप्फकेऊ, पुप्फवई देवि जुयलयं पसवे ।
पुत्तं च पुप्फचूलं, धूअं च सनामिअं तस्स ॥

[भा.१३५०] सहवड्ढियाऽनुरागो, रायत्तं चेव पुप्फचूलस्स ।
घरजामाउगदाणं, मिलइ निसिं केवलं तेनं ॥

[भा.१३५१] पव्वज्ञा य नरिंदे, अनुपव्वयणं च भावनेगत्ते ।
वीमंसा उवसग्गे, विडेहि समुहिं च कंदनया ॥

वृ-पुप्फपुरं नयरं । तत्थ पुप्फकेऊ राया, पुप्फवई देवी । सा अन्नया जुगलयं पसूया- पुप्फचूलो दारओ पुप्फचूला दारिया । तानि दो वि सहवड्ढियाणि परोप्परं अईव अनुरत्ताणि । अन्नया पुप्फचूलो राया जाओ । पुप्फचूला राइणा घर जामाउगस्स दिन्ना । सा य दिवसं सव्वं भाउणा समं अच्छइ । अन्नया पुप्फचूलो राया पव्वइओ । अणुरागेणं पुप्फचूला वि भगिनी पव्विया । सो य पुप्फचूलो अन्नया जिनकप्पं पडिवज्जिउकामो एगत्तभावमाए अप्पाणं भावेइ । इओ य एगेणं देवेणं वीमंसणानिमित्तं पुप्फचूलाए अज्ञाए रूवं विउव्विऊणंतं धुत्ता धरिसिउं पवत्ता । पुप्फचूलो य अनगारो तेनं ओगासेणं वोलेइ । ताहे सा पुप्फचूला अज्ञा 'जेट्ठज्ज ! सरणं भवाहि' त्ति वाहरइ । सो य भगवं वुच्छिन्नपेमबंधणो "एगो हं नत्थि मे को वि, नाहमन्नस्स कस्सइ ।" इच्चाइ एगत्तभावनं भाविंतो गओ सट्ठाणं । एवं एगत्तभावनाए अप्पा भावेयव्वो त्ति ॥

गाथाक्षरयोजना त्वेवम्-पुष्पपुरे पुष्पकेतू राजा । पुष्पवती देवी युगलं प्रसूते । वर्त्तमान-निर्देशस्तत्कालविवक्षया । पुत्रं च पुष्पचूलं दुहितां च तस्य 'सनामिकां' समानाभिधानाम् । तयोश्च सहवर्द्धितयोरनुरागः । राजत्वं चैव पुष्पचूलस्य । पुष्पचूलायाश्च गृहजामात्रे दानम् । सा च 'तेन' भत्री समं केवलं 'निशि' रात्रौ मिलति ॥ प्रव्रज्या च 'नरेन्द्रे' पुष्पचूलाख्ये । तदनुप्रव्रजनं च पुष्पचूलायाः । ततो जिनकल्पं प्रतिपित्सुरेकत्वभावनां भावयितुं लग्नः । 'विमर्श' परीक्षा । तदर्थं देवेनोपसर्गे क्रियमाणे विटैः सम्मुखीं पुष्पचूलां कृत्वा घर्षणं कर्त्तुमारब्धम् । ततः 'क्रन्दना' आर्य ! शरमं शरणमिति ॥अथोपसंहारमाह-

[भा.१३५२] एगत्तभावनाए, न कामभोगे गणे सरीरे वा ।
सज्जइ वेरग्गगओ, फासेइ अनुत्तरं करणं ॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

वृ- एकत्वभावनया भाव्यमानया 'कामभोगेषु' शब्दादिषु 'गणे' गच्छे शरीरे वा 'न सजति' न सङ्गं करोति, किन्तु वैराग्यगतः सन् 'स्पृशति' आराधयति 'अनुत्तरं करणं' प्रधानयोगसाधनं जिनकल्पपरिकर्मेति ।। गता एकत्वभावना। अथ बलभावना। तत्र बलं द्विधा-शारीरबलं भावबलं च। तत्र भावबलमाह-

[भा.१३५३] भावो उ अभिस्संगो, सो उ पसत्थो व अप्पसत्थो वा।
नेह-गुणओ उ रागो, अपसत्थ पसत्थओ चेव ।।

वृ- भावो नाम अभिष्वङ्गः। 'स तु' स पुनरभिष्वङ्गो द्विधा-प्रशस्तोऽप्रशस्तश्च। तत्रापत्य-कलत्रादिषु स्नेहजनितो यो रागः सोऽप्रशस्तः, यः पुनराचार्योपाध्यायादिषु गुणभहुमानप्रत्ययो रागः स प्रशस्तः। तस्य द्विविधस्यापि भावस्य येन मानसावष्टम्भेनासौ व्युत्सर्गं करोति तद् भावबलं मन्तव्यम्। शारीरमपि बलं शेषजनापेक्षया जिनकल्पार्हस्यातिशायिकमिष्यते ।।

आह तपो-ज्ञानप्रभृतिभिर्भावनाभिर्भावयतः कृशतरं शरीरं भवति ततः कुतोऽस्य शारीरबलं भवति ? इति, उच्यते-

[भा.१३५४] कामं तु सरीरबलं, हायइ तव-नाणभावनजुअस्स।
देहावचए वि सती, जह होइ धिई तहा जयइ ।।

वृ- 'कामम्' अनुमतं 'तुः' अवधारणे अनुमतमेवास्माकं यत् तपो-ज्ञानभानायुक्तस्य शरीरबलं हीयते, परं देहापचयेऽपि सति यथा 'धृतिः' मानसावष्टभलक्षणा निश्चला भवति तथाऽसौ यतते, धृतिबलेन सम्यगात्मानं भावयतीत्यर्थः ।। आह इत्थं धृतिबलेन भावयतः को नाम गुणः स्यात् ? उच्यते-

[भा.१३५५] कसिणा परीसहचमू, जइ उट्ठिज्जाहि सोवसग्गा वि।
दुद्धरपहकरवेगा, भयजणणी अप्पसत्ताणं ।।

वृ- 'कृत्स्ना' सम्पूर्णा 'परीषहचमूः' मार्गाच्यवन-निर्जरार्थं परिषोढव्याः परीषहाः-क्षुधादयस्त एव तेषां वा चमूः-सेना सा यदि 'उत्तिष्ठेत' सम्मुखीभूय परिभवनाय प्रगुणीभवेत् 'सोपसर्गाऽपि' दिव्याद्युपसर्गैकृतसहायकाऽपि, तथा "दुद्धरपहकरवेग" त्ति दुर्द्धरं-दुर्वहं पन्थानं-सम्यग्दर्शनादिरूपं मोक्षमार्गं करोतीति दुर्द्धरपथकरस्तथाविधो वेगः-प्रसरो यस्याः सा दुर्द्धरपथकरवेगा, 'भयजननी' संत्रासकरी 'अल्पसत्त्वानां' कापुरुषाणाम् ।।

[भा.१३५६] धिइधणियबद्धकच्छो, जोहेइ अनाउलो तमव्वहिओ।
बलभावणाए धीरो, संपुन्नमणोरहो होइ ।।

वृ- तामेवंविधामपि स जिनकल्पं प्रतिपत्तुकामो योधयति। कथम्भूतः ? धृतिरेव धणियम्-अत्यर्थं बद्धा कक्षा येन स तथा 'अनुकुलः' औत्सुक्यरहितः 'अव्यथितः' निष्प्रकम्पमनाः स बलभावनया तां योधयित्वा 'धीरः' सत्त्वसम्पन्नः सन् सम्पूर्णमनोरथो भवति, परीषहोपसर्गान् पराजित्य स्वप्रतिज्ञां पूरयतीत्यर्थः ।। अपि च-

[भा.१३५७] धिइ-बलपुरस्सराओ, हवंति सव्वा वि भावना एता।
तं तु न विज्जइ सज्झं, जं धिइमंतो न साहेइ ।।

वृ- सर्वा अप्येतास्तपःप्रभृतयो भावना धृति-बलपुरस्सरा भवन्ति, नहि धृति-बलमन्तरेण

Jain Education International For Private & Personal Use Only www.jainelibrary.org

षाण्मासिकतपःकरणाद्यनुगुणास्ताः तथा भावयितुं शक्यन्ते । किञ्च 'तत् तु' तत् पुनः 'साध्यं' कार्यं जगति न विद्यते यद् 'धृतिमान् सात्त्विकः पुरुषो न साधयति "सर्वं सत्त्वे प्रतिष्ठितम्" इति वचनात् । एतेन "अव्वोच्छित्ती मण" इत्यादिद्वारगाथायाः "उवसग्गसहे" इति यत् पदं तद् भावितं मन्तव्यम्, बलभावनया उपसर्गसहत्वभावादिति ॥ गता बलभावना । अथ "उवसग्गसहे य"त्ति इत्यत्र यः चशब्दः सोऽनुक्तसमुच्चये वर्त्तते, अतस्तदर्थलब्धं विधिशेषमाह-

[भा.१३५८] जिनकप्पियपडिरूवी, गच्छे वसमाण दुविह परिकम्मं ।
तितियं भिक्खायरिया, पंतं लूहं अभिगहीया ॥

वृ-एवमसौ पञ्चभिर्भावनाभिर्भावितान्तरात्मा जिनकल्पिकस्य प्रतिरूपी-तदनुरूपो भूत्वा गच्छ एव वसन् द्विविधं परिकर्म वक्ष्यमाणनीत्या करोति । तथा तृतीयस्यां पौरुष्यां भिक्षाचर्या, तत्रापि प्रान्तं रूक्षमाहारं गृह्णाति, एषणा च 'अभिगृहीता' अभिग्रहयुक्त ॥ तथा-

[भा.१३५९] परिणाम-जोगसोही, उवहिविवेगो य गणविवेगो य ।
सिज्ञा-संथारविसोहणं च विगईविवेगो य ॥

वृ- परिणामस्य गुर्वादिममत्वविच्छेदेन योगानां चावश्यकव्यापाराणं यथाकालमेव करणेन शुद्धि तथा प्राक्तनस्योपधेर्विवेको गणविवेकश्च शय्या-संस्तारस्य विशोधनं च विकृतिविवेकश्च तदा तेन कर्त्तव्यः ॥

[भा.१३६०] तो पच्छिमम्मि काले, सप्पुरिसनिसेवियं परमघोरं ।
पच्छा निच्छयपत्थं, उवेइ जिनकप्पियविहारं ॥

वृ- ततः 'पश्चिमे काले' तीर्थाव्यवच्छित्तिकरणानन्तरं 'सत्पुरुनिषेवितं' धीरपुरुषाराधितं 'परमघोरं' अत्यन्तदुरनुचरं 'पश्चाद्' आयतौ 'निश्चयपथ्यम्' एकान्तहितं जिनकल्पिकविहारमुपैति॥

अथ द्विविधं परिकर्म व्याख्यानयति-

[भा.१३६१] पाणी पडिग्गहेण व, सचेल निचेलओ जहा भविया ।
सो तेन पगारेणं, भावेइ अनागयं चेव ॥

वृ- द्विविधं परिकर्म, तद्यथा-पाणिपरिकर्म प्रतिग्रहपरिकर्म च; अथवा सचेलपरिकर्म अचेलपरिकर्म च । तत्र यो यथा पाणिपात्रधारकः प्रतिग्रहधारको वा सचेलको अचेलको वा भविता स तेनैव प्रकारेण पाणिपात्रभोजित्वादिना अनागतमेवाऽऽत्मानं भावयति ॥

प्रकारान्तरमाह-

[भा.१३६२] आहारे उवहिम्मि य, अहवा दुविहं तु होइ परिकम्मं ।
पंचसु अ दोसु अग्गह, अभिग्गहो अन्नयरियाए ॥

वृ-अथवा द्विविधं परिकर्म आहारे उपधौ च । तत्राहारं तावदसौ तृतीयपौरुष्यामवगाढायां गृह्णाति, तं चालेपकृतमेव । तत्राप्यसंसृष्टादीनां सप्तानां पिण्डैषणानां मध्याद् 'द्वयोः' आद्ययोरेषणयोः 'अग्रहः' सर्वथैवास्वीकारः, उपरितनीषु 'पञ्चसु' उद्धृता-ऽल्पलेपा-ऽवगृहीता-प्रगृहीतोज्झितधर्मिकासु ग्रहणम् । तत्राप्यभिग्रहोऽन्यतरस्यामेषणायाम्, एकया भक्तमपरया पानकमिति नियन्त्रय शेषाभिस्तिसृभिस्तिसृभिस्तद्दिवसमग्रहणमित्यर्थः । उपधौ तु वस्त्र-पात्रयोः प्रतिमाचतुष्टयं यत् पीठिकायामुक्तं तत्राद्यद्वयवर्जमुत्तरयोरेव ग्रहणम् । तत्राप्यपरस्यामभिग्रहः ॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

अथ "पंतं लूहं"ति व्याचष्टे-

[भा.१३६३] निप्फाव-चणकमाई, अंतं पंत तु होइ वावन्नं।
नेहरहियं तु लूहं, जं वा अबलं सभावेणं ॥

वृ-निष्पावाः-वल्लाश्चणकाःप्रतीता आदिशब्दात् कुल्माषादिकं च आन्तमित्युच्ये। प्रान्तं पुनस्तदेव 'व्यापन्नं' विनष्टं कुथितमित्यर्थः। यत् पुनः स्नेहरहितं तद् रूक्षम्, यद्वा स्वभावेन 'अबलं' रब्बादिकं तदपि रूक्षं मन्तव्यम् ॥ अत्रैव विधिविशेषमाह-

[भा.१३६४] उक्कुडयासनसमुइं, करेइ पुढवीसिलाइसुववेसे।
पडिवन्नो पुन नियमा, उक्कुडुओ केइ उ भयंति ॥

[भा.१३६५] तं तु न जुज्जइ जम्हा, अनंतरो नत्ति बूमिपरिभोगो।
तम्मि य हु तस्स काले, ओवग्गहितोवही नत्थि ॥

वृ- उत्कुटुकासनस्य "समुइं" ति देशीवचनत्वाद् अभ्यासं करोति, 'पृथिवीशिलादिषु वा' पृथ्वीशिलापट्टके आदिशब्दाद् अपरेष्वपि तथाविधयथासंस्तृतेषु उपविशेद्वा। जिनकल्प प्रतिपन्नः पुनर्नियमादुत्कुटुक एव। केचिद् 'भजन्ति' विकल्पं कुर्वन्ति-उत्कुटको वा तिष्ठेदुपविशेद्वा, तत्तु न युज्यते, यस्माद् 'अनन्तरः' अव्यवहितो नास्ति साधूनां तावद् भूमिपरिभोगः, "सुद्धपुढवीए न निसिए" त्ति वचनात्; तस्मिंश्च जिनकल्पकाले औपग्रहिकोपधिर्नास्ति, तदभावाच्च निषद्याऽपि नास्तीति गम्यते, ततश्चार्थादापन्नं उत्कुटक एव तिष्ठति ॥

उक्तश्चशब्दसूचिको विधिशेषः। अथ वटवृक्षद्वारमाह-

[भा.१३६६] दव्वाई अनुकूले, संघं असती गणं समाहूय।
जिन गणहरे य चउदस, अभिन्न असती य वडमाई ॥

वृ-इत्थमात्मानं परिकर्म्य द्रव्ये आदिशब्दात् क्षेत्रे काले भावे च 'अनुकूले' प्रशस्ते सङ्घं मीलयित्वा सङ्घस्य 'असति' अभावे गणं स्वकीयमवश्यमेव समाहूय ततः प्रथमं जिनः-तीर्थकरस्तस्यान्तिके तदभावे गणधरसन्निधाने तदलाभे चतुर्दशपूर्वधरान्तिके तदसम्भवेऽभिन्नदशपूर्वधरपार्श्वे तस्याप्यसति वटवृक्षस्याध आदिग्रहणात् तदप्राप्तावशोका-ऽश्वत्थवृक्षादीनामधस्ताद् जिनकल्पं प्रतिपद्यते ॥ केन विधिना ? इत्याह-

[भा.१३६७] गणि गणहरं ठवित्ता, खामे अगनी उ केवलं खामे।
सव्वं च बाल-वुड्ढं, पुव्वविरुद्धे विसेसेणं ॥

वृ- 'गणी' गच्छाधिपाचार्य स पूर्वमित्वरानिक्षिप्तगणं स्वशिष्यं गणधरं स्थापयित्वा श्रमणसङ्घं क्षमयति। "अगनि"त्ति यस्तु गणी न भवति किन्तु सामान्यसाधुः स केवलं क्षमयति न तु कमपि स्थापयति। किं पुनः क्षमयति ? इत्याह-'सर्वं' सकलमपि सङ्घं चशब्दात् तदभावे स्वगच्छं बाल वृद्धाकुलम्। ये च 'पूर्वविरुद्धाः' प्राग्विराधितास्तान् विशेषेण क्षमयति ॥ कथं पुनः ? इत्याह-

[भा.१३६८] जइ किंचि पमाएणं, न सुट्ठु भे वट्टियं मए पुव्विं।
तं भे खामेमि अहं, निस्सल्लो निक्कसाओ अ ॥

वृ- यदि किञ्चत् 'प्रमादेन' अनाभोगादिना न सुष्ठु 'भे' भवतां मया वर्त्तितं पूर्वं तद् "भे" युष्मान् क्षमयाम्यहं निशल्यो निष्कषायश्च ॥ इत्थं तेन क्षमिते सति शेषसाधवः किं कुर्वन्ति ?

Jain Education International For Private & Personal Use Only www.jainelibrary.org

इत्याह-

[भा.१३६९] आनंदअंसुपायं, कुणमाणा ते वि भूमिगयसीसा ।
खामिंति जहरिहं खलु, जहारिं खामिता तेनं ॥

वृ- 'तेऽपि' साधव आनन्दाश्रुपातं कुर्वाणाः 'भूमिगतशीर्षा' क्षितिनिहितशिरसः सन्तः क्षमयन्ति 'यथार्हं' यो यो रत्नाधिकः स स प्रथममित्यर्थः, तेनाचार्येण 'यथार्हं' यथापर्यायज्येष्ठं क्षामिताः सन्त इति ॥ अथेत्थं क्षाम्णायां के गुणाः ? इत्याह-

[भा.१३७०] खामिंतस्स गुणा खलु, निस्सल्लय विनय दीवणा मग्गे ।
लाधवियं एगत्तं, अप्पडिबंधो अ जिनकप्पे ॥

वृ- जिनकल्पे प्रतिपद्यमाने साधून् क्षमयतः खल्वेते गुणाः । तद्यथा-'निशल्यता' मायादिशल्याभावो भवति । विनयश्च प्रयुक्तो भवति । मार्गस्य दीपना कृता भवति, इत्थमन्यैरपि क्षाममकपुरस्सरं सर्वं कर्त्तव्यमिति । 'लाघवम्' अपराधभारापगमतो लघुभाव उपजायते । 'एकत्वं' 'क्षामिता मयाऽमी साधवः, इत ऊर्द्धमेक एवास्मि' इत्यनुध्यानं भवति । 'अप्रतिबन्धश्च' ममत्वस्य च्छिन्नत्वाद् भूयः शिष्येषु प्रतिबन्धो न भवति ॥ अथ निजपदस्थापितस्य सूरेरनुशिष्टिमाह-

[भा.१३७१] अह ते सबाल-वुड्ढो, गच्छो साइज्ज नं अपरितंतो ।
एसो हु परंपरतो, तुमं पि अंते कुणसु एवं ॥

वृ- अऐषः 'ते' तव सबाल-वृद्धो गच्छो निसृष्ट इति शेषः, अतः 'अपरितान्तः' अनिर्विन्नः "णं" एनं गच्छं 'सातयेः' सङ्गोपायेः, स्मारणा-वारणादिना सम्यक् पालयेरित्यर्थः । न च 'परित्यक्तोऽहममीभि' इत्यादि परिभाव्यम्, यत एष एव 'परम्परकः' शिष्या-ऽऽचार्यक्रमो यद् अव्यवच्छित्तिकारकं शिष्यं निष्पाद्य शक्तौ सत्यामभ्युद्यतविहारः प्रतिपत्तव्यः । त्वमपि 'अन्ते' शिष्यनिष्पादनादिकार्यपर्यवसाने एवमेव कुर्याः ॥

[भा.१३७२] पुव्वपवित्तं विनयं, मा हु पमाएहि विनयजोगेसु ।
जो जेन पगारेणं, उववज्जइ तं च जाणाहिं ॥

वृ- ये च तव बहुश्रुत-पर्यायज्येष्ठादयो विनययोग्याः-गौरवार्हास्तेषु 'पूर्वप्रवृत्तं' यथोचितं विनयं 'मा प्रमादयेः' मा प्रमादेन परिहापयेः । यश्च साधुर्येन तपःस्वाध्याय-वैयावृत्त्यादिना प्रकारेण 'उपयुज्यते' निर्जराप्रत्युपयोगमुपयाति 'तं च जानीहि' तं तथैव प्रवर्त्तयेत्यर्थः, ॥

अथ साधूनामनुशिष्टिं प्रयच्छति-

[भा.१३७३] ओमो समराइणिओ, अप्पतरसुओ अ मा य नं तुब्भे ।
परिभवह तुम्ह एसो, विसेसओ संपयं पुज्जो ॥

वृ- 'अवमोऽयं समरान्तिकोऽयं अल्पतरश्रुतो वाऽयमस्मदपेक्षया, अतः किमर्थमस्य आज्ञानिर्देशं वयं कुर्महे ?' इति मा यूयममुं परिभवत । यत एष युष्माकं साम्प्रतमस्मत्स्थानीयत्वाद् गुरुतरगुणाधिकत्वाच्च विशेषतः पूज्यः, न पुनरवज्ञातुमुचित इति भावः ॥

इत्थमुभयेषामप्यनुशिष्टिं प्रदाय किं करोति ? इत्याह-

[भा.१३७४] पक्खीव पत्तसहिओ, सभंडगो वच्चए निरवयक्खो ।
एगंतं जा तइया, तीए विहारो से नऽन्नासु ॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

वृ- यथा पक्षी पत्राभ्यां-पक्षाभ्यां सहितः प्राक्तनस्थाननिरपेक्षः स्थानान्तरं व्रजति, एवमयमपि भगवान् 'सभाण्डकः' पात्रसहितः 'निरपेक्षः' गच्छसत्कापेक्षया रहितः 'एकान्तं' मासकल्पप्रायोग्यं क्षेत्रं व्रजति । अयं च यावत् तृतीयपौरुषी तावद् गच्छति, यतस्तस्यामेव "से" तस्य विहारो नान्यासु पौरुषीषु, यत्र तु चतुर्थी पौरुषी भवति तत्र नियमात् तिष्ठतीति ॥

तस्मिन् निर्गते सति शेषसाधवः किं कुर्वन्ति ? इत्याह-

[भा.१३७५] सीहम्मि व मंदरकंदराओ नीहम्मिए तओ तम्मि ।
चक्खुविसयं अइगए, अइंति आनंदिया साहू ॥

वृ- सिंहे इव मन्दरकन्दरायास्तस्मिन्नगारसिंहे गच्छाद् "नीहम्मिए" निर्गते सति कियन्तमपि भूभागमनुगमनं विधाय ततश्चक्षुर्विषयम् 'अतिक्रान्ते' अदर्शनीभूते आयान्ति स्ववसतिम् 'आनन्दिताः' 'अहो ! अयं भगवान् सुखसेवनीयं स्थविरकल्पविहारं विहायातिदुष्करमभ्युद्यत-विहारमभ्युपैति' इति परिभावनया हृष्टाः सन्तः साधव इति ॥ इदमेव सविशेषमाह-

[भा.१३७६] निच्चेल सचेले वा, गच्छारामा विनिग्गए तम्मि ।
चक्खुविसयं अईए, अयंति आनंदिया साहू ॥

वृ- निश्चेले वा सचेले वा गच्छारामात् सुखसेवनीयाद् विनिर्गते तस्मिंश्चक्षुर्विषयमतीते आयान्त्यानन्दिताः साधव इति ॥ अथासौ विवक्षितं क्षेत्रं गत्वा किं करोति ? इत्याह-

[भा.१३७७] आभोएउं खेत्तं, निव्वाघाएण मासनिव्वाहिं ।
गंतूण तत्थ विहरइ, एस विहारो समासेणं ॥

वृ- 'आभोग्य' विज्ञाय क्षेत्रं 'निव्याघतेन' विघ्नाभावेन 'मासनिर्वाहि' मासनिर्वहणसमर्थं गत्वा 'तत्र' क्षेत्रे 'विहरति' स्वनीतिं परिपालयति । एष विहारो विशेषानुष्ठानरूपोऽस्य भगवतः समासेन प्रतिपादित इति ॥ उक्तं विहारद्वारम् । अथ सामाचारीद्वारमाह-

[भा.१३७८] इच्छा-मिच्छा-तहक्कारो, आवस्सि निसीहिया य आपुच्छा ।
पडिपुच्छ छंदण निमंतणा य उवसंपया चेव ॥

वृ- 'इदं मदीयं कार्यमिच्छया कुरुत, न बलाभियोगेन' इत्येवमिच्छायाः करणमिच्छाकारः । कथञ्चित् स्खलितस्य 'मिथ्या मदीयं दुष्कृतम्' इति भणनं मिथ्याकारः । गुर्वादिषु ब्रुवाणेषु 'यथाऽऽदिशत यूयं तथैव" इति भणनं तथाकारः । कचिद् बहिर्गमनकार्ये समुतपन्ने 'अवश्यं गन्तव्यम्' इति भणनं आवश्यिकी । वसतिप्रवेशे 'निषिद्धोऽहं गमनक्रियायाः' इति भणनं नैषेधिकी । स्वकार्यप्रवृत्तावाप्रच्छनमापृच्छा । आदिष्टस्य कार्यस्य करणकाले पुनः प्रच्छनं प्रतिपृच्छा। पूर्वगृहीतेनाशनादिना साधूनामभ्यर्थना च्छन्दना । तेनैवागृहीतेन 'यथालाभं युष्मद्योग्यममुकमानेष्ये' इति प्रार्थना निमन्त्रणा । उपसम्पद् द्विधा-साधुविषया गृहस्थविषया च । ज्ञानादिहेतोर्यदपरं गणं गत्वोपसम्पद्यते सा साधुविषया । यत् पुनरवस्थाननिमित्तं गृहिणामनुज्ञापनं सा गृहस्थविषया ॥ अथैतासां मध्याद् जिनकल्पिकस्य काः सामाचार्यो भवन्ति ? इत्युच्यते-

[भा.१३७९] आवसि निसीहि मिच्छा, आपुच्छुवसंपदं च गिहिएसु ।
अन्ना सामायारी, न होंति से सेसिया पंच ॥

वृ- आवश्यिकीं नैषेधिकीं मिथायाकारमापृच्छां उपसम्पदं च 'गृहिषु' गृहस्थविषया एताः

Jain Education International For Private & Personal Use Only www.jainelibrary.org

पञ्च सामाचारीर्जिनकल्पिकः प्रयुङ्क्ते। अन्याः सामाचार्यो न भवन्ति 'से' तस्य 'शेषाः पञ्च' इच्छा काराद्याः, प्रयोजनाभावात्॥ आदेशान्तरमाह-

[भा.१३८०] आवासियं निसीहियं, मोत्तुं उवसंपयं च गिहिएसु।
सेसा सामायारी, न होंति जिणकप्पिए सत्त॥

आवश्यिकीं नैषैधिकीं मुक्त्वा उपसंम्पदं च 'गृहिषु' गृहस्थिविषया जिनकल्पिकस्य 'शेषाः सामाचार्य' मिथ्याकारद्याः सप्त न भवन्ति, तद्विषयस्य स्खलितादेरभावात्॥

[भा.१३८१] अहवा वि चक्कवाले, सामायारी उ जस्स जा जोग्गा।
सा सव्वा वत्तव्वा, सुयमाई वा इमा मेरा॥

अथवाऽपि 'चक्तवाले' प्रत्युपेक्षळादौ नित्यकर्मणि यस्य जिनकल्पिकादेर्या सामाचारी योग्या सा सर्वा अत्र सामाचारीद्वारे वक्तव्या। श्रुतादिका वा 'इयं' वक्ष्यमाणा 'मेरा' मर्यादा सामाचारी॥ तामेवाभिधित्सुर्द्वारगाथात्रयमाह-

[भा.१३८२] सुय संघयनुवसग्गे, आतंके वेदना कइ जना य।
थंडिल्ल वसहि केच्चिर, उच्चारे चेव पासवणे॥

[भा.१३८३] ओवासे तणफलए, सारक्खणया य संठवणया य।
पाहुडि अग्गी दीवे, ओहाण वसे कइ जना य॥

[भा.१३८४] भिक्खायरिया पानग, लेवालेवे तहा अलेवे य।
आयंबिल पडिमाओ, जिणकप्पे मासकप्पो य॥

वृ- श्रुतं ? संहननं २ उपसर्गा ३ आतङ्कः ४ वेदनाः ५ कतिजनाश्रच ६ स्थण्डिलं ७ वसति ८ कियच्चिरं ९ उच्चारश्चैव १० प्रश्रवणं ११ अवकाशः १२ तृणफलकं १३ संरक्षणता च १४ संस्थापनता च १५ प्राभृतिका १६ अग्नि १७ दीपः १८ अवधानं १९ वत्स्यथ कति जनाश्च २० भिक्षाचर्या २१ पानकं २२ लेपालेपः २३ तथा अलेपश्रच २४ आचाम्लं २५ प्रतिमाः २६ मासकल्पश्रच २७ "जिनकप्पे" त्ति एतानि सप्तविंशतिद्वाराणि जिनकल्पविषयाणि वक्तव्यानीति द्वारगाथात्रयसमुदायार्थः॥ अथावयवार्थं प्रतिद्वारं प्रतिपिपादयिषुः "यथोद्देशं निर्देशः" इति न्यायत् प्रथमतः श्रुतद्वारमाह-

[भा.१३८५] आयारवत्थुतइयं, जहन्नयं होइ नवमपुव्वस्स।
तहियं कालन्नाणं, दस उक्कोसेण भिन्नाइं॥

वृ- जिनकल्पिकस्य जघन्यकं श्रुतं 'नवमपूर्वस्य' प्रत्याख्याननामकस्याचाराख्यं तृतीयं वस्तु तस्मिन्नधीते सति कालज्ञानं भवतीत्यतस्तदर्वाक्छ्रुतपर्याये वर्त्तमानस्य न जिनकल्पप्रतिपत्ति। उत्कर्षतो दश पूर्वाणि भिन्नानि श्रुतपर्यायः। सम्पूर्णदशपूर्वधरः पुनरमोधवचनतया प्रवचन-प्रभावनापरोपकारादिद्वारेणैव वहुतरं निर्जरालाभमासादयति अतो नासौ जिनकल्पं प्रतिपद्यते॥ उक्तं श्रुतद्वारम् १। अथ संहननद्वारमाह-

[भा.१३८६] पढमिल्लुगसंधयणा, धिईए पुन वज्ञकुड्डसामाणा।
उप्पज्ञंति न वा सिं, उवसग्गा एस पुच्छा उ॥

वृ- जिनकल्पिकाः 'प्रथमिल्लुकसंहननाः' वज्रर्षभनाराचसंहननोपेताः 'धृत्या' अङ्गीकृत-

Jain Education International For Private & Personal Use Only www.jainelibrary.org

निर्वाहक्षममनःप्रणिधानरूपया वज्रकुड्यसमानाः २ । अथोपसर्गद्वारम्-उत्पद्यन्ते न वा अमीषामुपसर्गा दिव्यादयः ? इत्येषा पृच्छा ।। अत्रोत्तरमाह-

[भा.१३८७] जइ वि य उप्पज्जंते, सम्मं विसहंति ते उ उवसग्गे ।
रोगातंका चेवं, भइआ जइ होंति विसहंति ।।

वृ-नायमेकान्तो यदवश्यमेतेषामुपसर्गा उत्पद्यान्ते, परं यद्युतपद्यन्त तथापि सम्यगदीनमनसो विषहन्ते तानुपसर्गान् ३ । आतङ्कद्वारमतिदिशति-रोगाश्रच-कालसहाः आतङ्काश्रच-सद्योघातिनः एवमेव 'भाज्याः' उत्पद्यन्ते वा न वा । यदि 'भवन्ति उत्पद्यन्ते ततो नियमाद् विषहन्ते ४ ।।

वेदनाद्वारमाह-

[भा.१३८८] अब्भोवगमा ओवक्कमा य तेसि वियणा भवे दुविहा ।
धुवलोआई पढमा, जरा-विवागाइ बिइएक्को ।।

वृ- आभ्युपगमिकी औपक्तमिक्की च 'तेषां ' जिनकल्पिकानां द्विविधा वेदना भवति । तत्र प्रथमा 'ध्रुवलोचादि' ध्रुवः-प्रतिदिनभावी लोचः, आदिशव्दादातापना-तपःप्रभृतिपरिग्रहः । 'द्वितीया तु' औपक्तमिकी 'जरा-विपाकादि' जर-प्रतीता विपाकः- कर्मणामुदयस्तत्समुत्था ५ । अथ कियन्तो जनाः ? इति द्वारम् - "एक्को" त्ति एक एवायं भगवान् भवति ६ । यदि वा ईदं द्वारमुपरिष्टाद् व्याख्यास्यते ।। अथ स्थण्डिलद्वारमाह-

[भा.१३८९] उच्चारे पासवणे, उस्सग्गं कुणइ थंडिले पढमे ।
तत्थेव य परिजुन्ने, कयकिच्चो उज्झई वत्थे ।।

वृ- उच्चारस्य प्रश्रवणस्य च 'उत्सर्गं' परित्यागं 'प्रथमे' अनापाते असंलोके स्थण्डिले करोति। 'तत्रैव' प्रथमस्थण्डिले 'कृतकार्य' विहितशीतत्राणादिवस्त्रकार्य उज्झति वस्त्राणि ।।

अयं च संज्ञां व्युत्सृज्य न निर्लेपयति, कुतः ? इति चेद् उच्यते-

[भा.१३९०] अप्पसभिन्नं वच्चं, अप्पं लूहं च भोयणं भणियं ।
दीहे वि उ उवसग्गे, उभयभवि अथंडिले न करे ।।

वृ- अल्पमभिन्नं च 'वर्च' पुरीषमस्य भवति, कुतः ? इत्याह-यतोऽल्पं रूक्षं च भोजनमस्य भणितं भगवद्भिः । अल्पा-ऽभिन्नवर्चस्कतया तथाकल्पत्वाच्चासौ न निर्लेपयति । न चासौ 'दीर्घेऽपि' बहुदैवसिके उपसर्गे 'उभयमपि' संज्ञां कायिकीं च 'अस्थण्डिले' आपातादिदोषयुक्ते भूभागे करोति ७ ।। वसतिद्वारमाह-

[भा.१३९१] अममत्त अपरिकम्मा, नियमा जिनकप्पियाण वसहीओ ।
एमेव य थेराणं, मुत्तुण पमज्जणं एक्कं ।।

वृ- 'अममत्वा' ममेयिमत्यभिष्वङ्गरहिता 'अपरिकर्मा' साध्वर्थमुपलेपनादिपरिकर्मवर्जिता नियमाद् जिनकल्पिकानां वसति । स्थविरकल्पिकानामप्येवमेव वसतिरममत्वा अपरिकर्मा च द्रष्टव्या, मुक्त्वा प्रमार्जनामेकामन्यत् परिकर्म तेऽपि न कुर्वन्तीत्यर्थः ।। एतदेव स्पष्टयति-

[भा.१३९२] विले ने ढक्कंति न खज्जमाणिं, गोणाई वारिंति न भज्जमाणिं ।
दारे न ढक्कंति न वऽग्गलिंति, दप्पेण थेरा भइआ उ कज्जे ।।

वृ- एते भगवन्तो बिलानि धूल्यादिना न स्थगयन्ति, न वा गवादिभि खाद्यमानां भज्यमानां

Jain Education International For Private & Personal Use Only www.jainelibrary.org

वा वसतिं निवारयन्ति, द्वारे ''न ढक्कंति'' कपाटाभ्यां न संयोजयन्ति, न वा 'अर्गलयन्ति' नार्गलया नियन्त्रयन्ति। स्थविरकल्पिका अपि 'दर्पेण' कार्याभावे एवमेव न वसतेः परिकर्म कुर्वन्ति, 'कार्ये तु' पुष्टालम्बने 'भाज्याः' परिकर्म कुर्वन्त्यपीति भावः ८ ॥ कियच्चिरोच्चारप्रश्रवणा-ऽवकाश-तृणफलक-संरक्षण-संस्थापनाद्वाराणि गाथाद्वयेन भावयति-

[भा.१३९३] किच्चिरकालं वसिहिह, इत्थ य उच्चारमाइए कुणसु।
इह अच्छसु मा य इहं, तण-फलए गिण्हिमे मा य ॥

[भा.१३९४] सारक्खह गोणाई, मा य पडिंतिं उविक्खहउ भंते ! ।
अन्नं वा अभिओगं, नेच्छंतऽचियत्तपरिहारी ॥

वृ- यस्यां वसतौ याच्यमानायां तदीयस्वाभिन इत्थं भणन्ति-कियच्चिरं कालं वत्स्यथ यूयम् ? ९, यद्वा 'अत्र' प्रदेशे 'उच्चारादीनि' पुरीष-प्रश्रवणादीनि कुरु, अत्र तु मा कुरु १०-११, 'इह' अस्मिन्नवकाशे आसीथाः, इह, भेति १२, 'एतानि वा' हस्तसंज्ञया निर्दिश्यमानानि तृण-फलकानि गृहीयाः मा एतानीति १३, संरक्षत वा गवादीन् बहिर्निर्गच्छतो यूयमस्माकं क्षेत्रादौ गतानां व्याकुलानां वा १४, मा च पतन्तीं वसतिमुपेक्षध्वं किन्तु 'संस्थापना' पुनःसंस्काररूपा विधेया १५। ''संठवणया य'' त्ति द्वारगाथायां यश्चचशब्दस्तेन सूचितमन्यं वा स्वाध्यायनिषेधादिरूपं यत्र वसतिस्वामी 'अभियोग' नियन्त्रणां करोति तं मनसाऽपि नेच्छन्ति, सूक्ष्मस्याप्यप्रीतिकस्य परिहारिमणोऽमी भगवन्त इति ॥ प्राभृतिका-ऽग्नि-दीपा-ऽवधानद्वाराणि व्याचष्टे-

[भा.१३९५] पाहुडिय दीवओ वा, अग्नि पगासो व जत्थ न वसन्ति।
जत्थ य भणंति ठंते, ओहाणं देह गेहे वि ॥

वृ- यस्यां वसतौ 'प्राभृतिका' बलि क्तियते १६ दीपको वा यस्यां विधीयते १८ 'अग्नि' अङ्गार-ज्वालादिकस्तस्य प्रकाशो वा यत्र भवति तत्र न वसन्ति १७। यत्र च तिष्ठति सत्यगारिणा भणन्ति अस्माकपि गेहे 'अवधानम्' उपयोगं तत्रापि नावतिष्ठन्ते १९ ॥

वत्स्यथ कति जनाः इति द्वारमाह-

[भा.१३९६] वसहिं अनुन्नविंतो, जइ भन्नइ कइ जण त्थ तो न वसे।
सुहुमं पि न सो इच्छइ, परस्स अप्पत्तियं भगवं ॥

वृ- वसतिमनुज्ञापयन् यद्यसौ भण्यते 'कति जना यूयं वत्स्यथ ?' इति तत्रापि न वसति, कुतः ? इत्याह-सूक्ष्ममपि नासाविच्छति परस्याप्रीतिकं भगवान्। ''कइ जना उ'' त्ति अत्र यस्तुशब्दस्तेनान्यामपीषदप्रीतिकजननी वसतिमसौ परिहरतीति गम्यते २०। उक्तपञ्चवस्तुके-

सुहुमं पि हु अचियत्तं, परिहरए सो परस्स नियमेणं।
जं तेन तुसद्दाओ, वज्जइ अन्नं पि तज्जणणिं ॥

–भिक्षाचर्या-पानक-लेपालेप-अलेप द्वाराणि विवृणोति-

[भा.१३९७] तइयाइ भिक्खचरिया, पग्गहिया एसणा य पुव्वुत्ता।
एमेव पानगस्स वि, गिण्हइ अ अलेवडे दो वि ॥

वृ- तृतीयस्यां पौरुष्यां भिक्षाचर्या, एषणा च 'प्रगृहीता' अभिग्रहयुक्ता, सा च ''पंचसु गह दोसऽग्गहु'' इत्यादिना पूर्वमेवोक्ता २१। एवमेव पानकस्यापि तृतीयपोरूष्यां प्रगृहीतया चैषणया

Jain Education International For Private & Personal Use Only www.jainelibrary.org

ग्रहणं करोति २२ । अत्र शिष्यः पृच्छति- "लेवालेवे" त्ति किमसौ जिनकल्पिको लेपकृतं गृहणं गृह्णाति ? उतालेपकृतम् ? २३ । अत्र सूरि-"अलेवे" त्ति पदं विवृण्वन्नुत्तरमाह- 'द्वे अपि' भक्त-पाने 'अलेपकृते' वल्ल-चणक-सौवीरादिरूपे गृह्णाति न लेपकृते २४ ॥

आयामाम्ल-प्रतिमाद्वारद्वयमाह-

[भा.१३९८] आयंबिलं न गिण्हइ, जं च अणायंबिलं पि लेवाडं ।
न य पडिमा पडिवज्जइ, मासाई जा य सेसाओ ॥

वृ- आयामाम्लमसौ न गृह्णाति, पुरीषभेदादिदोषसम्भवात् ; अनायामाम्लमपि यद् लेपकृतं तन्न गृह्णाति २५ । न च प्रतिमा मासिक्यादिका असौ प्रतिपद्यते । याश्च 'शेषाः' भद्र-महाभद्रादिकाः प्रतिमास्ता अपि न प्रतिपद्यते, स्वकल्पस्थितिप्रतिपालनमेव तस्य विशेषाभिग्रह इति भावः २६ ॥ अथ मासकल्प इति द्वारमभिधित्सुराह-

[भा.१३९९] कप्पे सुत्त-ऽत्थविसारयस्स संघयण-विरियजुत्तस्स ।
जिनकप्पियस्स कप्पइ, अभिगहिया एसणा निच्चं ॥

वृ- कल्पे जिनकल्पविषयौ यौ सूत्रार्थौ तत्र विशारदस्य-निपुणस्य संहननं-शारीरबलं वीर्यधृतिस्ताभ्यां युक्तस्य जिनकल्पिकस्य कल्पते 'अभिगृहीता' साभिग्रहा एषणा ॥

सा च मासकल्पस्थितिमनुपालयतो भवतीत्यतस्तस्यैव विधिमाह-

[भा.१४००] छव्वीहीओ गामं, काउं एक्किक्कियं तु सो अडइ ।
वज्जेउं होइ सुहं, अनिययवित्तिस्स कम्माई ॥

वृ-यत्रासौ मासकल्पं करोति तं ग्रामं 'षड् वीथीः' गृहपङ्क्तिरूपाः कृत्वा ततः प्रतिदिनमेकैकां वीथीमटति यावत् षष्ठे दिवसे षष्ठीम् । कुतः ? इत्याह-अनियतवृत्तेरपरापरवीथीषु पर्यटतः 'कर्मादि' आधाकर्म-पूतिकर्मादिकं 'सुखं वर्जयितुं भवति' सुखेनैव परिहर्तुं शक्यत इति भावः॥ कथं पुनराधाकर्मादिसम्भवो भवति ? इत्याशङ्क्य तत्सम्भवं दिदर्शयिषुराह-

[भा.१४०१] अभिग्गहे दट्ठुं करणं, भत्तोगाहिमग तिन्नि पूईयं ।
चोदग ! एगमनेगे, कप्पो त्ति य सत्तमे सत्त ॥

वृ-तस्य भगवतः प्रथमवीथीमटतः कयाचिदगार्या श्रद्धातिरेकाद् धृत-मधुसंयुक्तं भैक्षमुपनीतम्, तेन च 'न कल्पते मे लेपकृता भिक्षा' इति न गृहीतम्, तत एवमादीनभिग्रहान् दृष्ट्वा आधाकर्मणः करणं भवति । तच्च भक्तमवगाहिमं वा भवेत् । त्रीणि च दिवसानि तत् पूतिकम् । नोदकः प्रश्नयति-एकं ग्रामं किमनेकान् भागान् षड्वीथीरूपान् करोति ? । सूरिराह-कल्प एषोऽमीषां यत् षड् वीथीः कृत्वा सप्तमे दिवसे पर्यटन्ति, सप्त च जना एकस्यां वसतौ सम्भवन्तीति समासार्थः॥ अथ विस्तरार्थमाह-

[भा.१४०२] दट्ठूण य अनगारं, सड्ढी संवेगमागया काइ ।
नत्थि महं तारिसयं, अन्नं जमलज्जिया दाहं ॥

वृ- तमनगारं तपःशोषितमलपटलजटिलवपुषं दृष्ट्वा काचित् श्राद्धिका परमसंवेगमागता सती चिन्तयति-किं मे जीवितेन यद् ईदृशस्य महात्मनो भिक्षा न दीयते ?, नास्ति मम तादृशं शोभनमन्नं यद् अहमलज्जिता सती दास्यामि ॥ ततः-

Jain Education International For Private & Personal Use Only www.jainelibrary.org

[भा.१४०३] सव्वपयत्तेण अहं, कल्लं काऊण भोअणं विउलं ।
दाहामि तुट्ठमनसा, होहिइ मे पुन्नलाभो त्ति ॥

वृ- सर्वप्रयत्नेनाहं 'कल्पे' द्वितीयेऽहनि भोजनं विपुलं कृत्वा दास्यामि 'तुष्टमनसा' प्रहृष्टेन चेतसा, ततो भविष्यति मे महान् पुण्यलाभः । इत्थं विचिन्त्य द्वितीये दिवसे विपुलमशनादि भक्तमवगाहिमं वा उपस्कृत्य तं भगवन्तं प्रतीक्षमाणा तिष्ठति ॥ ततः किमभूत् ? इत्याह-

[भा.१४०४] फेडित वीही तेहिं, अनंतवरनाण-दंसणधरेहिं ।
अद्दीन अपरितंता, बिइयं च पहिंडिया तहियं ॥

वृ- स्फेटिता-परिहृता वीथी 'तैः' जिनकल्पिकैः, कथम्भूतैः ? 'अनन्तवरज्ञान-दर्शनधरैः' इहानन्तज्ञानमयत्वादनन्ताः-तीर्थकरास्तैरुपदिष्टे वरे-उत्तमे जिनकल्पिकानां ये ज्ञान-दर्शने उपलक्षणत्वात् चारित्रं च तानि धारयन्तीत्यनन्तवरज्ञान-दर्शनधरास्तैः । आह च चूर्णिकृत- अनंतं नाणं जेसिं ते अनंता-तित्थकरा, तेहिं जिनकप्पियाणं वरं नाणं दंसणं चरितं च जं भणियं तद्धरेहिं ति ॥ ततस्ते 'अदीनाः' मनसा अविषन्नाः 'अपरितान्ताः' कायेनानिर्विन्ना द्वितीयां वीथीं क्तमागतां पर्यटितास्तत्र क्षेत्रे । एकवचनप्रक्तमेऽपि बहुवचनाभिधानमन्येषामपि जिनकल्पिकानामेवं-विधवृत्तान्तसम्भवख्यापनार्थम् ॥ अत्र चेयं व्यवस्था-

[भा.१४०५] पढमदिवसम्मि कम्मं, तिन्नि उ दिवसाइँ पूइयं होइ ।
पूतीसु तिसु न कप्पइ, कप्पइ तइओ जया कप्पो ॥

वृ- प्रथमे दिवसे तद् भक्तमुपस्कृतमाधाकर्म । त्रीणि दिवसानि यावद् तद् गृहं पूतिर्भवति, तेषु च त्रिषु पूतिदिनेषु तस्मिन् गृहेऽन्यदपि किञ्चिन्न कल्पते । यदा तु तृतीयः कल्पो गतो भवति तदा कल्पते । कल्पशब्देनेह दिवस उच्यते । उक्तञ्च पञ्चवस्तुकटीकायाम्- कल्पते तृतीये 'कल्पे' दिवसे गतेऽपरस्मिन्नहनीति इदमेव स्पष्टयन्नाह-

[भा.१४०६] बिइयदिवसम्मि कम्मं, तिन्नि उ दिवसाइँ पूइयं होइ ।
तिसु कप्पेसु न कप्पइ, कप्पइ तं छट्ठदिवसम्मि ॥

वृ-यस्मिन् दिवसे स जिनकल्पिकः प्रथमवीथ्यामटन् तया दृष्टस्तदपेक्षया द्वितीये दिवसे तद् भक्तमाधाकर्म, तदनन्तरं त्रीणि दिवसानि पूतिकं भवति, तेषु त्रिषु 'कल्पेषु' दिवसेषु न कल्पते, किन्तु कल्पते तत् षष्ठे दिवसे ॥ अथवगाहिमविषयं विधिमाह-

[भा.१४०७] कल्लं से दाहामी, ओगाहिमगं न आगतो अज्ज ।
तइयदिवसाइतं होइ पूइयं कप्पए छट्ठे ॥

वृ-अवगाहिमं दिनद्वयमपि क्षमत इति कृत्वा सा श्राद्धा चिन्तयति-यदर्थमयमवगाहिमपाको मया कृतः स मुनिरद्य मम गृहाङ्गणं नागतः, अतः कल्ये "से" तस्याहं दास्यामीदमवगाहिममिति विचिन्त्य तद्दानार्थं यदि स्थापयति तदा तत् तृतीयेऽपि दिवसे कर्मैव भवति । य् पुनस्तस्मिन्नैव पाकदिवसे व्यवच्छिन्नभावा सा आत्मार्थितं करोति तदवगाहिममपि भक्तवद् मौलदिवसापेक्षया द्वितीये दिवसे कर्म, तृतीयादिषु तद् गृहं पूतिकम्, षष्ठे तु दिवसे कल्पते ॥ एतदेव स्पष्टयति-

[भा.१४०८] एमेवोगाहिमगं, नवरं तइयदिवसे वि तं कम्मं ।
तिसु पूइयं न कप्पइ, कप्पइ तं सत्तमे दिवसे ॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

वृ- 'एवमेव' भक्तवद् अवगाहिममपि यत् तद्दिवस एवात्मार्थीकृतं द् द्वितीये दिवसे कर्म, तृतीयादिषु त्रिषु पूति, षष्ठे तु कल्पते। नवरं यत् तद्दिवसे नाऽऽत्मार्थयति तत् तृतीयेऽपि दिवसे कर्म, ततस्त्रिषु दिवसेषु तत् पूतिकं गृहमिति कृत्वा न कल्पते, किन्तु कल्पते तद् गृहं सप्तमे दिवसे, अत एव चासौ भूयः सप्तमे दिने तस्या वीथ्यां पर्यटति ।। आह यद्येवं तर्हि यदि तस्मिन्नेव दिवसे तं प्रथमवीथीमटन्तं दृष्ट्वा कश्चिदाधाकर्मादि कुर्याद् मोदकादिकं वा तदर्थं कृत्वा सप्तमदिवसं यावदव्यवच्छिन्नभावः स्थापयेत् तदानीमसौ कथं जानाति ? कथं वा परिहरति ? इति, उच्यते-

[भा.१४०९] चोयग ! तं चेव दिनं, जइ वि करिज्जाहि कोइ कम्माई ।
न हु सो तं न वियाणइ, एसो पुन सिं अहाकप्पो ।।

वृ- हे नोदक ! तस्मिन्नेव दिने यद्यपि कुर्यात् कश्चित् किञ्चिदाधाकर्मादि 'न हि' नैव स तत्र विजानाति, "द्वौ नञौ प्रकृत्यर्थं गमयतः" इति वचनाद् जानात्येवासौ श्रुतोपयोगबलेन। आह यद्यसौ श्रुतोपयोगप्राणाण्यादेव जानीते ततः कमर्थमेकं ग्रामनेकभागान् परिकल्प्य पर्यटति ?, उच्यते-कल्प एषः "सिं" अमीषां भगवतां यत् सप्तमे दिवसे भूयः प्रथमवीथीं पर्यटन्ति ।। ततश्च तं सप्तमे दिवसे प्रथमवीथीमटन्तं दृष्ट्वा सा श्राद्धिका ब्रूयात्-

भा.(१४१०] किं नागय त्थ तइया, असव्वओ मे कओ तुह निमित्तं ।
इइ पुट्ठो सो भगवं, विइयाएसे इमं भणइ ।।

वृ- 'तदानीं यूयं किं नागताः ?, "थ" इति निपातः पूरणार्थ, मया हि त्वन्निमित्तं विपुलं भक्तादिकमुपस्कुर्वन्त्या युष्मदनुपयोगादसद्व्ययः कृतः' इति पृष्टोऽसौ भगवाँस्तूष्णीक आस्ते इति शेषः । 'द्वितीयादेशे' आदेशान्तरे पुनरिदं भणति ।। किं तत् ? इत्याह-

[भा.१४११] अनियताओ वसहीओ, भमरकुलाणं च गोकुलाणं च ।
समणाणं सउणाणं, सारइआणं च मेहाणं ।।

वृ- अनियताः 'वसतयः' अवस्थानानि उपलक्षणत्वात् परिभ्रमणानि च । केषाम् ? इत्याह- भ्रमरकुलानां च गोकुलानां च श्रमणानां शकुनानां शारदानां च मेघानाम् । इत्थमनियतचर्यया भिक्षाटने श्रद्धावतामपि प्राणिनां नाधाकर्मादिकरणे भूयः प्रवृत्तिरुपजायत इति ।। अथ "सत्त" त्ति पदं विवृणोति-

[भा.१४१२] एक्काए वसहीए, उक्कोसेणं वसंति सत्त जणा ।
अवरोप्परसंभासं, चयंति अन्नोन्नवीहिं च ।।

वृ- एकस्यां वसतावुत्कर्षतः सप्त 'जनाः' जिनकल्पिका वसन्ति । ते चैकत्र वसन्तोऽपि परस्परसम्भाषणं 'त्यजन्ति' न कुर्वन्तीत्यर्थः; अन्योन्यवीथीं च त्यजन्ति, यस्मिन् दिने यस्यां वीथ्यामेकः पर्यटति न तस्मिन्नेव तस्यामपर इत्यर्थः ।।

गतं सामाचारीद्वारम् । अथ स्थितिद्वारमभिधित्सुराह-

[भा.१४१३] खेत्ते काल चरित्ते, तित्थे परियाय आगमे वेए ।
कप्पे लिंगे लेसा, झाणे गणना अभिग्गहा य ।।

[भा.१४१४] पव्वावण मुंडावण, मणसाऽऽवन्ने वि से अनुग्घाया ।
कारण निप्पडिकम्मे भत्तं पंथो य तइयाए ।।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

वृ- कस्मिन् क्षेत्रेऽमी भगवन्तो भवन्ति ? १ एवं काले २ चारित्रे ३ तीर्थे ४ पर्याये ५ आगमे ६ वेदे ७ कल्पे ८ लिङ्गे ९ लेश्यायां १० ध्याने ११ गणनायां १२ अभिग्रहाश्चामीषां भवन्ति न वा ? १३ प्रव्राजनायां १४ मुण्डापनायां च कीदृशी स्थिति १५ मनसा आपन्ने अपराधे "से" तस्य 'अनुद्धाताः' चतुर्गुरवः प्रायश्चित्तं १६ कारणं १७ निष्प्रतिकर्म १८ भक्तं पन्थाश्च तृतीयस्यां पौरुष्याम् १९ इति चतुर्गुरवः प्रायश्चित्तं १६ कारणं १७ निष्प्रतिकर्म १८ भक्तं पन्थाश्च तृतीयस्यां पौरुष्याम् १९ इति द्वारगाथाद्वयसमासार्थः ॥

व्यासार्थं प्रतिद्वारमभिधित्सुः प्रथमतः क्षेत्रद्वारमङ्गीकृत्याह-

[भा.१४१५] जम्मण-संतीभावेसु होज्ज सव्वासु कम्मभूमीसु ।
साहरणे पुन भइयं, कम्मे व अकम्मभूमे वा ॥

वृ- क्षेत्रविषया द्विधा मार्गणा-जन्मतः सद्भावतश्च । जन्मतो यत्र क्षेत्रेऽयं प्रथमत उत्पद्यते, सद्भावतस्तु यत्र जिनकल्पं प्रतिपद्यते प्रतिपन्नो वाऽस्ति, तत्र जन्म-सद्भावयोरुभयोरप्ययं 'सर्वासु कर्मभूमीषु' भरतपञ्चकैरावतपञ्चक-विदेहपञ्चकलक्षणासु भवेत् । 'संहरणे' देवादिना अन्यत्र नयने पुनः 'भाज्यं' भजनीयम्, कर्मभूमौ वा भवेद् अकर्मभूमौ वा । एतच्च सद्भावमाश्रित्योक्तम् । जन्मतस्तु कर्मभूमावेवायं भवतीति १ ॥

उक्तं क्षेत्रद्वारम् । अथ कालद्वारमाह-

[भा.१४१६] ओसप्पिणीइ दोसुं, जम्मणतो तीसु संतिभावेणं ।
उस्सप्पिणि विवरीया, जम्मणतो संतिभावे य ॥

वृ- अवसर्पिण्यां जन्मतः 'द्वयोः' सुषमदुःषमा-दुःषमसुषमयोस्तृतीयचतुर्थारकयोर्भवेत्; सद्भावस्तु 'त्रिषु' तृतीय-चतुर्थ-पञ्चमारकेषु, दुःषमसुषमाया अन्ते जातो दुःषमायां जिनकल्पं प्रतिपद्यते इति कृत्वा । उत्सर्पिणी विरीता जन्मतः सद्भावतश्च । इदमुक्तं भवति-उत्सर्पिण्यां दुःषमा-दुःषमसुषमा-सुषमदुःषमासु तिसृषु समासु जन्माऽश्नुते, दुःषमसुषमा-सुषमदुःषमयोस्तु द्वयोरमुं कल्पं प्रतिपद्यते, दुःषमायां तीर्थं नास्तीति कृत्वा तस्यां जातस्यापि दुःषसुषमायामेव कल्पप्रतिपत्तिरिति ॥

[भा.१४१७] नोसप्पिणिउस्सप्पे, भवंति पलिभागतो चउत्थम्मि ।
काले पलिभागेसु य, साहरणे होंति सव्वेसु ॥

वृ-नोअवसर्पिण्युत्सर्पिणीरूपे अवस्थितकाले चत्वारः प्रतिभागाः, तद्यथा-सुषमसुषमाप्रतिभागः सुषमाप्रतिभागः सुषमदुःषमाप्रतिभागः दुषमसुषमाप्रतिभागश्चेति । तत्राद्यो देवकुरूत्रकुरुषु, द्वितीयो हरिवर्ष-रम्यकवर्षो, तृतीयौ हैमवतैरण्यवतयोः, चतुर्थस्तु महाविदेहेषु । तत्र चतुर्थे प्रतिभागे जन्मत सद्भावतश्चामी भवन्ति, नाद्येषु त्रिषु प्रतिभागेषु । "काले" त्ति यो महाविदेहजो जिनकल्पिकः स सुषमसुषमादिषु षट्स्वपि कालेषु संहरणतो भवेत् । "पलिभागेसु अ" त्ति भरतैरावत-महाविदेहेषु सम्भूताः संहरणतः सर्वेष्वपि प्रतिभागेषु देवकुर्वादिसम्बन्धिषु सम्भवन्तीति २ ॥ चारित्रद्वारमाह-

[भा.१४१८] पढम वा बीये वा, पडिवज्जइ संजमम्मि जिनकप्पं ।
पुव्वपडिवन्नओ पुन, अन्नयरे संजमे होज्जा ॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

वृ- 'प्रथमे वा' सामायिकाख्ये 'द्वितीये वा' छेदोपस्थापनीयनाम्नि संयमे वर्त्तमानो जिनकल्पं प्रतिपद्यते। तत्र मध्यमतीर्थकर-विदेहतीर्थकृत्तीर्थवर्त्ती प्रथमे संयमे, पूर्व-पश्चिमतीर्थकरतीर्थवर्ती तु द्वितीये इति मन्तव्यम्। पूर्वप्रतिपन्नः पुनरसौ जिनकल्पिकः 'अन्यतरस्मिन्' सूक्ष्मसम्परायादावपि संयमे उपशमश्रेण्यां वर्त्तमानो भवेत् ३ ।। तीर्थ-पर्यायद्वारद्वयमाह-

[भा.१४१९] नियमा होइ सतित्थे, गिहिपरियाए जहन्न गुणतीसा।
जइपरियाए वीसा, दोसु वि उक्कोस देसूना ।।

वृ- स जिनकल्पिको नियमात् तीर्थे भवति, न पुनर्व्यवच्छिन्नेऽनुत्पन्ने वा तीर्थे ४। पर्यायो द्विधा-गृहिपर्यायो यतिपर्यायश्च। तत्र गृहिपर्यायो जन्मपर्याय इत्येकोऽर्थ, तत्र जघन्यत एकोनत्रिंशद् वर्षाणि। यतिपर्याये तु जघन्यतो विंशतिवर्षाणि। उत्कर्षतस्तु 'द्वयोरपि' गृहिपर्याययतिपर्याययो-र्देशोनां पूर्वकोटीं यदा प्राप्तो भवति तदा जिनकल्पं प्रतिपद्यते ५ ।।

अथाऽऽगम-वेदद्वारे आह-

[भा.१४२०] न करिंति आगमं ते, इत्थीवज्जो उ वेदो इक्कतरो।
पुव्वपडिवन्नओ पुण, होज्ज सवेओ अवेओ वा ।।

वृ- न कुर्वन्ति 'ते' जिनकल्पिकाः 'आगमम्' अपूर्वश्रुताध्ययनम्, पूर्वाधीतं तु श्रुतं विश्रोतसिकाक्षयहेतोरेकाग्रमनाः सम्यगनुस्मरति ६। वेदमङ्गीकृत्य-प्रतिपत्तिकाले 'स्त्रीवर्ज एकतरः' पुरुषवेदो नपुंसकवेदो वा असंक्लिष्टस्तस्य भवेत । पूर्वप्रतिपन्नः पुनः सवेदोऽवेदो वा भवेत्। तत्र जिनकल्पिकल्पिकस्य तद्भवे केवलोत्पत्तिप्रतिषेधादुपशमश्रेण्यां वेदे उपशमिते सत्यवेदत्वम्। तदुक्तम्-

उवसमसेढीए खलु, वेदे उवसामियम्मि उ अवेदो।
न उ खविए तज्जम्मे, केवलपडिसेहभावाओ ।।

शेषकालं तु सवेद इति ७।। अथ कल्प-लिङ्ग-लेश्याद्वाराण्याह-

[भा.१४२१] ठियमट्ठियम्मि कप्पे, लिंगे भयणा उ दव्वलिंगेणं।
तिहि सुद्धाहि पढमया, अपढमया होज्ज सव्वासु ।।

वृ- स्थितकल्पे-प्रथमा-ऽन्तिमजिनसत्के अस्थितकल्पे च-मध्यमजिन-महाविदेहजिनसत्के अमी भवेयुः ८। लिङ्गे चिन्त्यमाने भजना तु द्रव्यलिङ्गेन कार्या। तुशब्दो विशेषणे। किं विशिनष्टि? प्रथमतः प्रतिपद्यमानो द्रव्य-भावलिङ्गयुक्त एव भवति। ऊर्द्धवमपि भावलिङ्गं नियमाद् भवति, द्रव्यलिङ्गं तु जीर्णत्वात् चौरादिभिरपहृतत्वाद्वा कदाचिन्न भवत्यपि। उक्तञ्च-

इयरं तु जिन्नभावाइएहि सययं न होइ वि कयाइ।
न य तेन विना वि तहा, जायइ से भावपरिहाणी ।।

'इतरद्' इति द्रव्यलिङ्गम् ९ । लेश्या अङ्गीकृत्य 'तिसृषु प्रशस्तलेश्यासु' तैजस्यादिकासु 'प्रथमकाः' प्रतिपद्यमानका भवन्ति। 'अप्रथमकास्तु' पूर्वप्रतिपन्नाः 'सर्वास्वपि' शुद्धा-ऽशुद्धासु लेश्यासु भवेयुः, केवलमशुद्धासु वर्त्तमानो नात्यन्तसंक्लिष्टासु वर्त्तते न च भूयांसं कालमिति १० ।। ध्यान-गणनाद्वारद्वयमाह-

[भा.१४२२] धम्मेण उ पडिवज्जइ, इअरेसु वि होज्ज इत्थ झाणेसु।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

पडिवत्ति सयपुहुत्तं, सहसपुहुत्तं च पडिवन्ने ॥

वृ- धर्म्येर्ण ध्यानेन तुशब्दस्य विशेषणार्थत्वात् प्रवर्द्धमानेन सता कल्पं प्रतिपद्यते। पूर्वप्रतिपन्नस्तु 'इतरेष्वपि' आर्त्तादिषु ध्यानेषु कर्मवैचित्र्यबलाद् भवेदपि, केलं कुशलपरिणामस्योद्दामत्वात् तीर्वकर्मपरिणतिजनितः सोऽपि रौद्रा-ऽऽर्त्तभावोऽस्य प्रायो निरनुबन्धो भवति। तदुक्तम्-

एवं च कुसलजोगे, उद्दामे तिव्वकम्मपरिणामा।
रुद्द-ऽट्टेसु वि भावो, इमस्स पायं निरनुबंधो ॥

गणनाद्वारे-'प्रतिपत्तिं' प्रतिपद्यमानतामङ्गीकृत्योत्कर्षतः शतपृथक्त्वमेकस्मिन् समयेऽमीषां भगवतां प्राप्यते। पूर्वप्रतिपन्नकानां पुनरुत्कर्षतः सहपृथक्त्वम्, कर्मभूमिपञ्चदशकेऽप्येतावता-मेवोत्कर्षतः प्राप्यमाणत्वात्। जघन्यतस्तु प्रतिपद्यमानका एको द्वौ त्रयो वेत्यादि। पूर्वप्रतिपन्नास्तु जघन्यतोऽपि सहपृथक्त्वमेव, महाविदेहपञ्चके सर्वदैवैतावतामवाप्यमानत्वात्। नवरमुत्कृष्ट-पदाज्जघन्यपदं लघुतरमिति १२ ॥ अभिग्रह-प्रव्राजना-मुण्डापनाद्वाराणि व्याचष्टे-

[भा.१४२३] भिक्खायरियाईया, अभिग्गहा नेव सो उ पव्वावे।
उवदेसं पुण कुणती, धुवपव्वाविं वियाणित्ता ॥

वृ- भिक्षाचर्या-ऋज्वी-गत्वाप्रत्यागतिकादये गोचरचर्याविशेषास्तदादयोऽभिग्रहा इत्वरत्वादस्य न भवन्ति, जिनकल्प एव हि यावत्कथिकस्तस्याभिग्रहः, तत्र च प्रतिनियता निरपवादाश्च गोचरादयः, अतस्तत्पालनमेवास्य परमं विशुद्धिस्थानम्। यदाह-

एयम्मि गोयराई, नियया नियमेन निरववादा य।
तप्पालनं चिय परं, एयस्स विसुद्धिठाणं तु ॥

तथा नैवासावन्यं प्रव्राजयति, उपलक्षणत्वाद् न च मुण्डापयति, कल्पस्थितिरियमिति कृत्वा उपदेशं पुनः 'करोति' प्रयच्छति 'ध्रुवप्रव्राजिनम्' अवश्यप्रव्रजनशीलं विज्ञाय कञ्चन सत्त्वम्। तं च संविग्नगीतार्थसाधूनां समीपे प्रहिणोति १४-१५ ॥ अथ "मनसाऽऽवन्ने वि से अनुग्घाय" त्ति द्वारम्-मनसाऽपि सूक्ष्ममतीचारमापन्नस्यास्य सर्वजघन्यं चतुर्गुरुकं प्रायश्चित्तम् १६। अथ कारण-निष्प्रतिकर्मद्वारे आह-

[भा.१४२४] निप्पडिकम्मसरीरा, न कारणं अत्थि किंचि नाणाई।
जंघाबलम्मि खीणे, अविहरमाणो वि नाऽऽवज्जे ॥

वृ- निष्प्रतिकर्मशरीरा अमी भगवन्तो नाक्षिमलादिकमप्यपनयन्ति, न वा चिकित्सादिकं कारयन्ति १७। न च तेषां 'कारणम्' आलम्बनं ज्ञानादिकं किञ्चिद् विद्यते यद्बलात् ते द्वितीयपदासेवनं विदध्यु १८। 'भक्तं पन्थाश्च तृतीयस्याम्' इति द्वारम्-तृतीयस्यां पौरुष्यां भिक्षकालो विहारकालश्चास्य भवति, शेषासु तु पौरुषीषु प्रायः कायोत्सर्गेणाऽऽस्ते। जङ्घाबले परिक्षीणे पुनः 'अविहरन्नपि' विहारमकुर्वन्नपि नापद्यते कमपि दोषम्, किन्त्वेकत्रैव क्षेत्रे स्वकल्पस्थिति-मनुपालयतीति १९ ॥ व्याख्यातं स्थितिद्वारम्। तद्व्याख्याने चाभिहितो जिनकल्पविहारः। अथ शुद्धपरिहारिक-यथाकलन्दिकविहारविषयंविधिमतिदिशन् विशेषं च बिभणिषुराह-

[भा.१४२५] एसेव कमो नियमा, सुद्धे परिहारिए अहालंदे।
नाणत्ती य जिनेहिं, पडिवज्जइ गच्छ गच्छो य ॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

वृ- ष एव "पव्वज्ञा सिक्खावय" इत्यादिकः क्रमः शुद्धपरिहारिके यथालन्दिके च मन्तव्यः। नवरं परिहारकल्पविषयं नानात्वं 'जिनेभ्यः' जिनकल्पिकेभ्यः सकाशात्, किम्? इत्याह-प्रतिपद्यते "गच्छ गच्छो य" त्ति गच्छद्वयं चशब्दात् तृतीयश्च गच्छः, त्रयो गच्छा जघन्यतोऽप्यमुं कल्पं प्रतिपद्यन्त इत्यर्थः ॥

[भा.१४२६] तवभावननाणत्तं, करंति आयंबिलेण परिकम्मं।
इत्तिरिय थेरकप्पे, जिनकप्पे आवकहियाओ ॥

वृ- तपोभावनायां नानात्वं-विशेषः, किम्? इत्याह-कुर्वन्त्यायामाम्लेन ते भगवन्तः 'परिकर्म' अभ्यासम्। ते च द्विविधाः-इत्वरा यावत्कथिकाश्च। प्रस्तुतकल्पपरिसमाप्तौ ये भूयः स्थविरकल्पं प्रतिपद्यन्ते ते इत्वराः, ये तु जिनकल्पं ते यावत्कथिकाः ॥

[भा.१४२७] पुन्ने जिनकप्पं वा, अइंति तं चेव वा पुनो कप्पं।
गच्छं वा इंति पुनो, तिन्नि विहाणा सिं अविरुद्धा ॥

वृ- 'पूर्णे' शुद्धपरिहारकल्पे जिनकल्पं वा आयान्ति, तमेव वा परिहारविशुद्धिकं कल्पं पालयन्ति, गच्छं वा आगच्छन्ति पुनः। एवं त्रीण्यपि 'विधानानि' प्रकाराः "सिं" तेषां परिहारविशुद्धिकानामविरुद्धानि ॥

[भा.१४२८] इत्तरियानुवसग्गा, आतंका वेदना य न भवंति।
आवकहियाण भइया, तहेव च ग्गामभागा उ ॥

वृ- इत्वराणां शुद्धपरिहारकाणामुपसर्गा आतङ्का वेदनाश्च न भवन्ति, तत्कल्पप्रभावादेव जीतमेतत्। यावत्कथिकानां तु भाज्या उपसर्गादयः, जिनकल्पस्थितानां तेषां तत्सम्भवात्। यथा च जिनकल्पिकानां षड् ग्रामभागा भिक्षाटनविषया उक्तास्तथैवामीषामपि। एवं सर्वाऽपि सामाचारी तथैव द्रष्टव्या। विशेषः पुनरयम्-नवपुरुषप्रमाणो गणस्तावदमुं कल्पं प्रतिपद्यते, तत्र चत्वारः परिहारिकाः, चत्वारः पुनरनुपरिहारिकाः, एकस्तु तेषां कल्पस्थितः, अनुपरिहारिकाणां कल्पस्थितस्य चैकः सम्भोगः, परिहारिकाणां पृथक् पृथगित्यादिका प्रक्रिया तावन्नेया यावत् षण्मासाः। ततः परिहारिका अनुपरिहारिकीभवन्ति, अनुपरिहारिकाः परिहारिकत्वं प्रतिपद्यन्ते, कल्पस्थितस्तु प्राक्तन एवेत्येवमपि षण्मासाः। ततः कल्पस्थितोऽपि षण्मासान् यावत् परिहारिकत्वं प्रतिपद्यते, शेषास्तु यथायोगमनुपारिहारिकत्वं कल्पस्थितत्वं चेत्यष्टादशभिर्मासैरयं कल्पः समाप्यत इत्यलं प्रसङ्गेन। एतेषां हि स्वरूपमिहैव षष्ठोद्देशके भाष्यकृतैव न्यक्षेण वक्ष्यते ॥ अमीषामेव स्थितिनानात्वमभिधित्सुः प्राक्तनमेव द्वारगाथाद्वयमाह-

[भा.१४२९] खेत्ते काल चरित्ते, तित्थे परियाय आगमे वेए।
कप्पे लिंगे लेसा, झाणे गणना अभिगहा य ॥

[भा.१४३०] पव्वावण मुंडावण, मनसाऽऽवन्ने वि से अनुग्घाया।
कारण निप्पडिकम्मा, भत्तं पंथो य तइयाए ॥

वृ- अस्य समासार्थो व्यासार्थश्च जिनकल्पिकद्वार इवावगन्तव्यः ॥

– यस्तु यत्र विशेषस्तत्र तमुपदर्शयति-

[भा.१४३१] खेत्ते भरहेरवएसु होंति साहरणवज्जिया नियमा।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

ठियकप्पम्मि उ नियमा, एमेव य दुविह लिंगे वि ॥

वृ- क्षेत्रद्वारे पारिहारिका भरतैरावतयोरेव भवन्ति, न विदेहेषु। तत्रापि 'संहरणवर्जिताः' अमी न केनापि देवादिनाऽन्यत्र संह्रियन्ते। एतेन कालद्वारनानात्वमप्युक्तं मन्तव्यम्। तच्चेदम्-काले उत्सर्पिण्यामवसर्पिण्या वा भवेयुः, न नोअवसर्पिण्युत्सर्पिण्यां सुषमसुष्षमादिषु वा प्रतिभागेषु। कल्पद्वारे-नियमादमी स्थितकल्पे भवन्ति, प्रथम-चरमतीर्थकरतीर्थव्यतिरेकेणामीषामभावात्। लिङ्गद्वारे-एवमेव 'द्विविधेऽपि' द्रव्य-भावरूपे लिङ्गे नियमादमी भवन्ति ॥

चारित्रद्वारनानात्वमाह-

[भा.१४३२] तुल्ल जहन्ना ठाणा संजमठाणाण पढम-बितियाणं।
तत्तो असंख लोए, गंतुं परिहारियट्ठाणा ॥

[भा.१४३३] ते असंखा लोगा, अविरुद्धा ते वि पढम-बिइयाणं।
उवरिं पि ततो असंखा, संजमठाणा उ दोण्हं पि ॥

वृ- 'प्रथम-द्वितीययोः' सामायिक-च्छेदोपस्थापनीयरूपयोः संयमस्थानयोः सम्बन्धीनि यानि जघन्यस्थानानि तानि परस्परं तुल्यानि, विशुद्धिसाम्यात्। 'ततः' जघन्यसंयमस्थानेभ्यः परतः 'असङ्ख्येयान् लोकान् गत्वा' असङ्ख्येयलोकाकाशप्रदेशप्रमाणेषु संयमस्थानेषु व्यतीतेष्वित्यर्थः परिहारिकस्य-परिहारविशुद्धिकस्य संयमस्थानानि भवन्ति, तान्यपि 'असङ्ख्येया लोकाः' असङ्ख्येयलोकाकाशप्रदेशप्रमाणानि। एतानि च 'प्रथम-द्वितीययोरपि' सामायिक-च्छेदोपस्थापनीययोर्विशुद्धिविशेषसाम्यादविरुद्धानि, तयोरपि सम्बन्धीनि भवन्तीत्यर्थः। 'ततः' परिहारिकसंयमस्थानेभ्य उपर्यपि असङ्ख्येयानि संयमस्थानानि 'द्वयोरपि' सामायिक-च्छेदोपस्तापनीययोर्भवन्ति, ततः सामायिक-च्छेदोपस्थापनीये व्यवच्छिद्येते। ततः परं सूक्ष्म-सम्परायस्यान्तर्मुहूर्त्तसमयप्रमाणान्यसङ्ख्येयानि संयमस्थानानि भवन्ति। तत ऊर्ध्वमनन्तगुणमेकं यथाख्यातचारित्रस्य संयमस्थानमिति ॥

अथ प्रकृतयोजनामाह-

[भा.१४३४] सट्ठाणे पडिवत्ती, अन्नेसु वि होज्ज पुव्वपडिवन्नो।
अन्नेसु वि वट्टंतो, तीयनयं वुच्चई पप्प ॥

वृ- 'स्वस्थाने' स्वेषु-परिहारविशुद्धिकचारित्रसत्केषु संयमस्थानेषु वर्त्तमानः परिहारकल्पस्य प्रतिपत्तिं करोति। पूर्वप्रतिपन्नः 'अन्येष्वपि' सामायिकादिसंयमस्थानेषु स्वसंयमस्थानापेक्षया विशुद्धतरेष्वध्यवसायविशेषाद् भवेत्। तेषु चान्येष्वपि संयमस्थानेषु वर्त्तमानोऽसावनुभूतपूर्वपरि-हारविशुद्धिकसंयमस्थानत्वाद् 'अतीतनयम्' अतीतार्थाभ्युपगमपरं व्यवहारनयं 'प्राप्य' अङ्गीकृत्य परिहारविशुद्धिक इति प्रोच्यते, निश्चयन्यमङ्गीकृत्य पुनर्नोच्यते, संयमस्थानान्तराध्यासनादिति॥

गणनाद्वारे नानात्वमाह-

[भा.१४३५] गणओ तिन्नेव गणा, जहन्न पडिवत्ति सयसो उक्कोसा।
उक्कोस-जहन्नेणं, सतसो च्चिय पुव्वपडिवन्ना ॥

वृ- इह गणना द्विधा-गणप्रमाणतः पुरुषप्रमाणतश्च। तत्र यदा किलप्रस्तुतकल्पस्य प्रतिपत्तिः

Jain Education International For Private & Personal Use Only www.jainelibrary.org

प्राप्यते तदा 'गणतः' गणप्रमाणमाश्रित्य त्रय एव गणा जघन्यतः प्रतिपत्तिमङ्गीकृत्य ज्ञातव्याः। उत्कर्षतः 'शतशः' शतपृथक्त्वसङ्ख्याका गणा अमुं कल्पं युगपत् प्रतिपद्यन्ते। ये तु पूर्वप्रतिपन्नास्ते उत्कर्षतो जघन्यतश्च 'शतश एव' शतपृथक्त्वसङ्ख्याका एव। नवरं जघन्यपदादुत्कृष्टपद-मधिकतरम्॥

[भा.१४३६] सत्तावीस जहन्ना, सहस्स उक्कोसतो उ पडिवत्ती।
सयसो सहस्ससो वा, पडिवन्ना जहन्न उक्कोसा॥

वृ-विंशति पुरुषा जघन्यतोऽस्य कल्पस्य प्रतिपत्तिं कुर्वन्ति, त्रिषु नवकगणेषु, सप्तविंशतेर्जनानां भावात्। उत्कर्षतः सहपृथक्त्वम्। पूर्वप्रतिपन्नास्तु जघन्यतः 'शतशः' शतपृथक्त्वम्, उत्कर्षतः 'सहशः' सहपृथक्त्वम्॥ पुरुषप्रमाणत एव विशेषमाह-

[भा.१४३७] पडिवज्जमाण भइया, इक्को वि उ होज्ज ऊनपक्खेवे।
पुव्वपडिवन्नया वि उ, भइया इक्को पुहुत्तं वा॥

वृ-प्रतिपद्यमानकाः पुरुषाः 'भक्ताः' विकल्पिताः। कथम्? इत्याह-एकोऽपि भवेदूनप्रक्षेपे, अपिशब्दाद् व्यादयोऽपि। इदमुक्तं भवति-पूर्णायामष्टादशमास्यां यदि केचित् परिहारिकाः कालगता जिनकल्पं वा प्रतिपन्ना गच्छं वा प्रत्यागताः, ये शेषास्ते तमेव परिहारकल्प-मनुपालयितुकामाः, ततो यावद्भि प्रविष्टैर्नवको गणः पूर्यते तावन्तोऽपेर प्रवेशनीया इति कृत्वा प्रतिपद्यमानका एक-व्यादिसङ्ख्याका अपि भवेयुः। पूर्वप्रतिपन्नका अपि भाज्याः। कथम्? इत्याह-एको वा भवेत् पृथक्त्वं वा। इयमत्र भावना-यदि पूर्णेष्वष्टादशसु मासेष्वष्टौ परिहारविशुद्धिकाः कल्पान्तरं प्रतिपद्यन्ते तत एकः पूर्वप्रतिपन्नः; यदा तु केचित् कल्पान्तरं प्रतिपद्यन्ते केचितु द्व्यादिसङ्ख्याकास्तमेव कल्पमनुपालन्यित तदा पृथक्त्वं पूर्वप्रतिपन्नकानां भवतीति॥ गतं गणनाद्वारम्। शेषद्वाराणि तु सर्वाण्यपि जिनकल्पतुल्यवक्तव्यान्येवेत्युक्तं शुद्धपरिहारनानात्वम्। सम्प्रति यथालन्दकल्पनानात्वमाह-

[भा.१४३८] लंदो उ होइ कालो, उक्कोसगलंदचारिणो जम्हा।
तं चिय मज्झ पमाणं, गणाण उक्कोस पुरिसाणं॥

वृ- लन्दस्तु भवति कालः, लन्दशब्देन काल उच्यते इत्यर्थः। स पुनस्त्रिधा-जघन्य उत्कृष्टो मध्यमश्च। यावता कालेनोदकार्द्रः करः शुष्यति तावान् जघन्यः, उत्कृष्टः पञ्च रात्रिन्दिवानि, जघन्यादूर्द्धवमुत्कृष्टादर्वाक् सर्वोऽपि मध्यमः। इह चोत्कृष्टलन्देनाधिकारः। तथा चाह-'उत्कृष्टलन्दचारिणः' उत्कृष्ट लन्दं-पञ्चरात्ररूपमेकसयां वीथ्यां चरणशीला यस्मात्, ततोऽमी 'उत्कृष्टलन्दानतिक्रमो यथालन्दम्, तदस्त्येषाम्' इति व्युत्पत्त्या यथालन्दिका उच्यन्ते। 'तदेव च' लन्दमानं 'मध्यमं' त्रिकलक्षणममीषां गणप्रमाणम्, त्रयो गणा अमुं कल्पं प्रतिपद्यन्त इत्यर्थः। 'तदेव च' लन्दमानमुत्कृष्टं पञ्चकात्मकमेकैकस्य गणस्य पुरुषाणां प्रमाणं द्रष्टव्यम्, एकैकस्मिन् गणे पञ्च पञ्च पुरुषा भवन्तीति भावः॥

[भा.१४३९] ज च्चेव य जिनकप्पे, मेरा सा चेव लंदियाणं पि।
नाणत्तं पुण सुत्ते, भिक्खायरि मासकप्पे य॥

वृ-यैव च जिनकल्पे 'मर्यादा' सामाचारी भणिता तुलनादिका सैव यथालन्दिकानामपि मन्तव्या।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

नानात्वं पुनः सूत्रे भिक्षाचर्यायां मासकल्पे चशब्दात् प्रमाणे चेति ॥

तत्र सूत्रे तावद् नानात्वमभिधातुमाह-

[भा.१४४०] पडिबद्धा इअरे वि य, इक्किक्का ते जिना य थेरा य।
अत्थस्स उ देसम्मी, असमत्ते तेसि पडिबंधो ॥

वृ- यथालन्दिका द्विधा-गच्छप्रतिबद्धा इतरे च । पुनरेकैके द्विविधाः-जिनाश्च स्थविराश्च । तत्रे ये प्रस्तुतकल्पपरिसमाप्तौ जिनकल्पं प्रतिपत्स्यन्ते ते जिनाः, ये तु स्थविरकल्पं भूयः समाश्रयिष्यन्ते ते स्थविराः । अथ कुतोऽमीषां गच्छविषयः प्रतिबन्धः ? इत्याह-'अर्थस्य तु' तुशब्दस्यावधारणार्थत्वादर्थस्यैव न सूत्रस्य देशः-एकदेशोऽद्याप्यसमाप्तः-न गुरुसमीपे गृहीत इति तस्मिन् ग्रहीतव्ये सति तेषां गच्छे प्रतिबन्धः । आह तमर्थदेशं समाप्यामी विवक्षितकल्पं किं न प्रतिपद्यन्ते ? उच्यते-तदानीं हि लग्न-योग-चन्द्रबलादीनि प्रशस्तानि वर्त्तन्ते, अन्यानि च प्रशस्तलग्नादीनि दूरकालवर्तीनि, न वा तथाभव्यानि, ततोऽमी अगृहीतेऽप्यर्थदेशे तं कल्पं प्रतिपद्य गुर्वधिष्ठितक्षेत्राद् बहिर्व्यवस्थिता विशिष्टतरानुष्ठाननिरता अगृहीतमर्थशेषं गृह्णन्ति । अथ भिक्षाचर्यायां नानात्वम्-ग्रामं षड्वीथीः परिकल्प्यैकैस्यां वीथ्यां पञ्चरात्रिन्दिवानि पर्यटन्ति, एवं षड्भिर्वीथीभिः पर्यटिताभिर्मासकल्पः समाप्यते । मासकल्पविषयं तु नानात्वमेषामुत्तरत्र भणिष्यते ॥ अत स्थविराणां जिनानां च यथालन्दिकानां परस्परं कः प्रतिविशेषः ? उच्यते-

[भा.१४४१] थेराणं नाणत्तं, अतरंतं अप्पिणंति गच्छस्स।
ते वि य से फासुएणं, करिंतिसव्वं तु पडिकम्मं ॥

[भा.१४४२] एक्केक्कपडिग्गहगा, सप्पाउरणा हवंति थेराओ।
जे पुन सिं जिनकप्पे, भय तेसिं वत्थ-पायाणि ॥

वृ-स्थविरकलपयथालन्दिकानां 'नानात्वं' विशेषोऽयम्-'अतरन्तं' ग्लान्या अशक्नुवन्तं निजं साधुं गच्छस्यार्पयन्ति । 'तेऽपि च' गच्छवासिनः ''से'' तस्य यथालन्दिकग्लानस्य प्राशुकेनान्नादिना सर्वमेव प्रतिकर्म कुर्वन्ति । जिनकल्पयथालन्दिकास्तु निष्प्रतिकर्माणः, ततो ग्लानीभूता अपि न चिकित्सादि कारयन्ति । तथा ये स्थविरा यथालन्दिकास्ते 'एकैकप्रतिग्रहकाः' प्रत्येकमेकप्रतिग्रहोपेताः 'सप्रावरणाः' सवाश्च भवन्ति । ये पुनरमीषां मध्ये जिनकल्पे भविष्यन्ति तेषां 'भाज्ये' विकल्पनीये वस्त्र-पात्रे, यदि पाणिपात्रभोजिनः प्रावरणरहिताश्च जिनकल्पिका भविष्यन्ति तदा वस्त्र-पात्रे न गृह्णन्ति, शेषास्तु यथोचितं गृह्णन्ति ॥

अथ प्रमाणनानात्वं भावयति-

[भा.१४४३] गणमाणओ जहन्ना, तिन्नि गण सयग्गसो य उक्कोसा।
पुरिसपमाणे पनरस, सहस्ससो चेव उक्कोसा ॥

वृ- 'गणमानतः' गणमानमाश्रित्य जघन्यतस्त्रयो गणाः, उत्कर्षतस्तु 'शताग्रशः' शतपृथक्त्वं। गणा अमुंकलपंप्रतिपद्यन्ते। पुरुषप्रमाणे तु जघन्यतः पञ्चदश पुरुषा अस्य कल्पस्य प्रतिपद्यमानकाः, त्रिषु पञ्चकगणेषु जघन्यतः प्रतिपद्यमानेषु पञ्चदशजनानां भावात् । उत्कर्षतः पुरुषप्रमाणं 'सहशः' सहपृथक्त्वम् ॥ अत्रैव विशेषमाह-

[भा.१४४४] पडिवज्जमाणगा वा, एक्कादि हवेज्ज ऊनपक्खेवे ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

होंति जहन्ना एए, सयग्गसो चेव उक्कोसा ॥

वृ- प्रतिपद्यमानका एते जघन्या एकादयो वा भवेयुर्न्यूनप्रक्षेपे सति, यदा ग्लानत्वादिवशतो गच्छस्य स्वसाधुसमर्पणादिना तेषां न्यूनता भवति तदैकादयः साधवस्तत्र प्रवेश्यन्ते येन पञ्चको गच्छः पूर्यत इत्यर्थः । तथा 'शताग्रशः' शतसङ्ख्याः पुरुषा न्यूनप्रक्षेपे उत्कर्षतः प्रतिपद्यमानका भवन्ति ॥ पूर्वप्रतिपन्नानां मानमाह-

[भा.१४४५] पुव्वपडिवन्नगाण वि, उक्कोस-जहन्नसो परीमाणं ।

कोडिपुहुत्तं भणियं, होइ अहालंदियाणं तु ॥

वृ- पूर्वप्रतिपन्नानामप्युत्कर्षतो जघन्यतश्च परिमाणं कोटिपृथक्त्वं यथालन्दिकानां भवति, महाविदेहपञ्चके जघन्यपदवर्त्तिनः कर्मभूमिपञ्चदशके चोत्कर्षपदवर्त्तिनः कोटिपृथक्त्वस्यामीषां प्राप्यमाणत्वात् । भणितमेतद् भगवद्भिरिति ॥ गतो यथालन्दकल्पविहारः । अथ गच्छवासिनां मासकल्पविधिमभिधित्सुः प्रस्तावनार्थं प्राक्तनीमेव मूलद्वारगाथामाह-

[भा.१४४६] पव्वज्जा सिक्खापय, अत्थग्गहणं च अनियओ वासो ।

निप्फत्ती य विहारो, सामायारी ठिई चेव ॥

वृ- अत्र प्रव्रज्यादीनि पञ्च द्वाराणि यथा जिनकल्पद्वारे तथाऽत्रापि मन्तव्यानि ॥

अथ विहारद्वारविषयं विधिमभिधित्सुराह-

[भा.१४४७] निप्फत्तिं कुणमाणा, थेरा विहरंति तेसिमा मेरा ।

आयरिय उवज्झाया, भिक्खू थेरा य खुड्डा य ॥

वृ- शिष्याणां निष्पत्तिं कुर्वन्तः 'स्थविराः' गच्छवासिनः साधवः 'विहरन्ति' अप्रतिबद्धं विहारं विदधति । तेषां चेत्थं विहरतामियं 'मर्यादा' सामाचारी । तत्र गच्छवासिनस्तावत् पञ्चविधाः, तद्यथा-आचार्या उपाध्याया भिक्षवः स्थविराः क्षुल्लकाश्चेति ॥

[भा.१४४८] धीरपुरिसपन्नत्तो, सप्पुरिसनिसेविओ अ मासविही ।

तस्स पडिलेहगा पुण, सुत्तत्थविसारगा भणिया ॥

वृ- धीरपुरुषैः-तीर्थकर-गणधरैः प्रज्ञप्तः, सत्पुरुषैश्च-जम्बू-प्रभवादिभिर्निषेवितः-अनुष्ठितो मासकल्पविधिः । 'तस्य पुनः' मासकल्पविधेः प्रत्युपेक्षकाः सूत्रार्तविशारदाः साधवो भणिता भगवद्भिः । स पुनर्विहारः शरदादिर्भवति ॥ कथम् ? इति चेद् उच्यते-

[भा.१४४९] वासावासातीए, अट्ठसु चारो अतो उ सरदाई ।

पडिलेह-संकमविही, ठिए अ मेरं परिकहेहं ॥

वृ- वर्षावासेऽतीते-अतिक्रान्ते 'अष्टसु' ऋतुबद्धमासेषु 'चारः' मासे मासे क्षेत्रान्तरगमनलक्षणो विहारो भवति, अतः शरदादिरयं मन्तव्यः । तत्र च क्षेत्रप्रत्युपेक्षणविधिं क्षेत्रान्तरसङ्क्रमणविधिं प्रत्युपेक्षिते च क्षेत्रे ''ठिए''त्ति स्थिताना सतां या काचिद् मर्यादा तामहं परिकथयिष्यामि ॥ प्रतिज्ञातमेव यथाक्रमं व्याचिख्यासुराह-

[भा.१४५०] निग्गमणम्मि उ पुच्छा, पत्तमपत्ते अइच्छिए वा वि ।

वाघायम्मि अपत्ते, अइच्छिए तस्स असतीए ॥

वृ- यत्र वर्षावासः कृतस्ततः क्षेत्राद् निर्गमने 'पृच्छा' किं कार्त्तिकचतुर्मासे प्राप्ते निर्गन्तव्यम्?

Jain Education International For Private & Personal Use Only www.jainelibrary.org

उताप्राप्ते ? आहोश्विदतिक्रान्ते ? उच्यते-यदि कोऽपि व्याघातस्तदा अप्राप्ते वा अतिक्रान्ते वा निर्गच्छन्ति। 'तस्य' व्याघातस्य 'असति' अभावे प्राप्ते चातुर्मासिकदिने मार्गशीर्षप्रतिपदि निर्गत्य बहिर्गत्वा पारयन्ति ॥ कः पुनर्व्याघातः ? इत्याह-

[भा.१४५१] पत्तमपत्ते रिक्खं, असाहगं पुन्नमासिणिमहो वा।
पडिकूल त्ति य लोगो, मा वोच्छिइ तो अईयम्मि ॥

वृ- प्राप्ते चातुर्मासिकदिवसे अप्राप्ते वा यद्याचार्याणाम् 'ऋक्षं' नक्षत्रम् 'असाधकम् अननुकूलं पौर्णमासीमहो वा तदा भवेत् कार्त्तिकीमहोत्सव इत्यर्थः, तत्र च लोको निर्गच्छतः साधून् दृष्ट्वा अमङ्गलं मन्यमानः 'प्रतिकूलाः' अस्मन्महोत्सवप्रतिपन्थिनोऽमी मुण्डा येऽस्मिन्नेवंविधे महोत्सवे स्वमुखमस्माकं दर्शयन्ति' इत्येवं 'या वक्ष्यति' मा भणिष्यति, ततोऽतीते निर्गन्तव्यम् ॥

[भा.१४५२] पत्ते अइच्छिए वा, असाहगं तेन निंति अप्पत्ते।
नाउं निग्गमकालं, पडिचरए पेसविंति तहा ॥

वृ- अथ प्राप्ते अतिक्रान्ते वा निर्गमनकाले नक्षत्रमसाधकम्, उपलक्षणत्वाद् मेघो वा वर्षणाद् नोपरंस्यते पन्थानः कर्दमदुर्गमाश्च भविष्यन्तीत्यतिशयज्ञानवशेन परिज्ञाय 'तेन' कारणेन 'अप्राप्ते' चातुर्मासिके निर्गच्छन्ति। निर्गमनकालं च ज्ञात्वा 'प्रतिचरकान्' क्षेत्रप्रत्युपेक्षकान् तथा प्रेषयन्ति यथा तेष्वायातेषु सत्सु निर्गमनकाल उपढौकते ॥ तच्च क्षेत्रं द्विधा- दृष्टपूर्वमदृष्टपूर्वं च, उभयमपि नियमात् प्रत्युपेक्षणीयम्, कुतः ? इति चेद् उच्यते-

[भा.१४५३] अप्पडिलेहियदोसा, वसही भिक्खं व दुलहं होज्जा।
बालाइ-गिलाणाण य, पाउग्गं अहव सज्झाओ ॥

वृ- अप्रत्युपेक्षिते क्षेत्रे गच्छतामेते दोषाः-सा पूर्वदृष्टा वसतिः स्फेटिता तिता वा भवेत्, अन्ये वा साधवस्तस्यां स्थिता भवेयुः, भैक्षं वा दुर्लभं भवेत्, दुर्भिक्षादिभावाद् बालादीनां ग्लानानां वा प्रयोग्यं दुर्लभं भवेत्, स्वाध्यायो वा दुर्लभः स्यात्, मांस-शोणितादिभिरस्वाध्यायिकैराकीर्णत्वात्॥ यतश्चैवमतः किं विधेयम् ? इत्याह-

[भा.१४५४] तम्हा पुव्विं पडिलेहिऊण पच्छा विहीए संकमणं।
पेसेइ जइ अनापुच्छिउं गणं तत्थिमे दोसा ॥

वृ- तस्मात् पूर्वं प्रत्युपेक्ष्य क्षेत्रं पश्चाद् विधिना सङ्क्रमणं तत्र कर्त्तव्यम्। अथाप्रत्युपेक्षिते व्रजन्ति ततश्चतुर्लघु, आज्ञाभङ्गे चतुर्गुरु, अनवस्थायां चतुर्लघु, मिथ्यात्वे चतुर्लघु, यद् वा संयमविराधनादिकं प्राप्नुवन्ति तन्निष्पन्नं प्रायश्चित्तम्। यदि पुनराचार्य 'गणं' गच्छमनापृच्छय क्षेत्रप्रत्युपेक्षकान् प्रेषयति तदा मासलघु। 'तत्र' गणमनापृच्छय प्रेषणे इमे दोषाः ॥

[भा.१४५५] तेना सावय मसगा, ओमऽसिवे सेहइत्थि पडिनीए।
थंडिल्ल वसहि उट्ठाण एवमाई भवे दोसा ॥

वृ- स्तेना द्विविधाः-शरीरस्तेना उपधिस्तेनाश्च, 'श्वापदाः' सिंह-व्याघ्रादयः 'मशकाः' प्रतीताः 'अवमं' दुर्भिक्षं 'अशिवं' व्यन्तरकृत उपद्रवः, शैक्षस्य वा तत्र सागारिकः स्त्रियो वा महोद्रेकबहुलाः साधूनुपसर्गयन्ति, प्रत्यनीको वा कोऽप्युपद्रवति, स्थण्डिलानि वा तत्र न विद्यन्ते, वसतिर्वा नास्ति, ''उद्वाणे''त्ति उत्थितः-उद्वसितः स देशः, एवमादयस्तत्रापान्तराले पथि गच्छतां दोषा

Jain Education International For Private & Personal Use Only www.jainelibrary.org

भवन्ति ॥ तत्र स्थाने प्राप्तानां पुनरिमे दोषाः-

[भा.१४५६] पच्चंत तावसीओ, सावय दुब्भिक्ख तेनपउराइं ।
नियग पउट्ठुट्ठाणे, फेणया हरियपत्ती य ॥

वृ- स ग्रामः 'प्रत्यन्तः' म्लेच्छाद्युपद्रवोपेतः, तापस्यो वा तत्रप्रचुरमोहाः संयमात् परिभ्रंशयन्ति, श्वापदभयं दुर्भिक्षभयं स्तेनप्रचुराणि, च तानि क्षेत्राणि, शैक्षस्यान्यस्य वा कस्यापि साधोस्तत्र 'निजकाः' स्वजनास्ते तमुत्प्रव्राजयन्ति, 'प्रद्विष्टो वा' प्रत्यनीकस्तत्र साधूनुपद्रवति, उत्थितो वा स ग्रामः, स्फेटिता वा सा वसति, 'स्फेटितानि वा' विपरिणामितानि तानि कुलानि येषां निश्रया तत्र गम्यते । आह च चूर्णिकृत्- फेडियाणि वा ताणि कुलाणि जेसिं निस्साए गम्मइ त्ति । "हरियपत्ती य" त्ति हरितपत्रशाकं बाहुल्येन तत्र भक्ष्यते । अथवा तत्र देशे केषुचिद् गृहेषु राज्ञो दण्डं दत्त्वा देवतोपहारार्थमागन्तुकः पुरुषो मार्यते, गृहस्य चोपरिष्टादार्द्रा वृक्षशाखा चिह्नं क्रियते,

एतेन चिह्नेनास्माभिराख्यातमेव भवति, अतो मारणेऽप्यस्माकं न दोष इति । यत एते दोषा अतः सर्वमपि गणमामन्त्रय क्षेत्रप्रत्युपेक्षकाः प्रेषणीयाः ॥ यदि पुनर्न सर्वमपि गणमामन्त्रयते तत एते दोषाः-

[भा.१४५७] सीसे जइ आमंते, पडिच्छगा तेन बाहिरं भावं ।
जइ इअरे तो सीसा, ते वि समत्तम्मि गच्छंति ॥

वृ- यद्याचार्य शिष्यान् केवलानामन्त्रयति 'कस्यां दिशि क्षेत्रप्रत्युपेक्षकाः प्रेषयितुमुचिताः ?' इति ततो मासलघु, आज्ञादयश्च दोषाः । प्रतीच्छकाश्च 'तेन' कारणेन बाह्यं भावं गच्छेयुः- अहो! स्वशिष्या एवामीषां सर्वकार्येषु प्रमाणं न वयमिति, अतो राग-द्वेषदूषितत्वात् को नामामीषामुपकण्ठे स्थास्यति ? इति । यदि 'इतरान्' प्रतीच्छकानामन्त्रयते ततः शिष्या बहिर्भावं गच्छेयुः-प्रतीच्छका एव तावदमीषां प्रसादपात्रम्, अतः किमर्थं वयमेव वैयावृत्त्यादिप्रयासं कुर्मः ? इति । 'तेऽपि' प्रतीच्छकाः समाप्ते सूत्रार्थग्रहणे स्वगच्छं गच्छन्ति । ततश्चाचार्य उभयैरपि प्रतीच्छक-शिष्यैः परित्यक्तः सन्नेकाकी सञ्जायेत ॥

[भा.१४५८] तरुणा बाहिरभावं, न य पडिलेहोवहिं न किइकम्मं ।
मूलगपत्तसरिसगा, परिभूया वच्चिमो थेरा ॥

वृ- अथ वृद्धानामन्त्रयते ततस्तरुणा बहिर्भावं मन्यन्ते, 'न च' नैव गुरूणां क्षेत्रप्रत्युपेक्षकाणां वा उपकरणं प्रत्युपेक्षन्ते, न वा स्थविरादीनामुपधिं वहन्ति, न च कृतिकर्म-भक्तपानानयनविश्रामणादिकं कुर्वते, 'वृद्धा एव सर्वमपि विधास्यन्ति, केऽत्र वयमस्थापितमहत्तराः ?' इति । अथैतद्दोषभयात् तरुणानेव पृच्छति ततः स्थविराश्चिन्तयेयुः-'मौलकपत्रसदृशाः' मौलम्-आद्यं यत् पर्णं परिपक्वप्रायं यदि वा मूलकः-कन्दविशेषस्तस्य तु पत्रं निस्सारं तत्सदृशा वयम् अत एव च 'परिभूताः' परिभवपदमायाता इत्यतो व्रजामो वयं गणान्तरमिति ॥ अथाकिञ्चित्करत्वात् स्थविराणामनामन्त्रणेऽपि का नाम हानि सम्पद्यते ? उच्यते-

[भा.१४५९] जुन्नमएहि विहूणं, जं जूहं होइ सुट्ठु वि महल्लं ।
तं तरुणरहसपोइअ, मयगुम्मइअं सुहं हंतुं ॥

वृ- जीर्णा-परिणतवयसो ये मृगास्तैर्विहीनं यद् यूथं भवति 'सुष्ठ्वपि' अतिशयेन 'महत्'

Jain Education International For Private & Personal Use Only www.jainelibrary.org

महासमूहात्मकं तद् यूथं "तरुण"त्ति भावप्रधानत्वाद् निर्देशस्य तारुण्येन-यौवनवशेन यो रभसः-चापलं गौरिगीतश्रवणादिविषयं तेन "पोतितं"ति देशीवचनत्वादितस्ततः स्पन्दितं 'मदगुल्मितं मदेन घूर्णितचेतनं सत् सुखं 'हन्तुं' विनाशयितुम्, सुखेन तद् व्यापाद्यत इति भावः । उक्तञ्च-

अतिरागप्रणीतान्यतिरभसकृतानि च ।
तापयन्ति नरं पश्चात्, क्रोधाध्यवसितानि च ॥

यतश्चैवमतः सर्व एव मिलिताः सन्तः प्रष्टव्याः ॥ अत्रैव प्रायश्चित्तमाह-

[भा.१४६०] आयरियअवाहरणे, मासो वाहित्तऽनागमे लहुओ ।
वाहित्ताण य पुच्छा, जाणगसिट्ठे तओ गमनं ॥

वृ- आचार्या गणं न व्याहरन्ति-नामन्त्रयन्ते मासलघु । शिष्य-प्रतीच्छक-तरुण-स्थविराणामन्यतमान् विशेष्यामन्त्रयन्ते तदाऽपि मासलघु । तेऽपि च व्याहृताः सन्तो यदि नागच्छन्ति तदाऽपि मासलघु । व्याहृत्य च सर्वमपि गणं पृच्छा कर्त्तव्या, यथा-तरत् क्षेत्रं प्रत्युपेक्षणीयम् ? । ततो ज्ञायकेन-क्षेत्रस्वरूपेज्ञेन शिष्टे-कथिते सति गमनं क्षेत्रप्रत्युपेक्षक कर्त्तव्यम् ॥

आमन्त्रणस्यैव विधिमाह-

[भा.१४६१] थुइमंगलमामंतण, नागच्छइ जो व पुच्छिओ न कहे ।
तस्सुवरिं ते दोसा, तम्हा मिलिएसु पुच्छिज्जा ॥

वृ- आवश्यके समापिते 'स्तुतिमङ्गलं कृत्वा' तिः स्तुतीर्दत्त्वेति भावः । सर्वेषामपि साधूनामामन्त्रणं कर्त्तव्यम् । कृते चामन्त्रणे यः कश्चिद् नाऽऽगच्छति आगतो वा क्षेत्रस्वरूपं पृष्टः सन् न कथयति तदा मासलघु, तथा तस्योपरि 'ते दोषाः' स्तेन-श्वापदादयो भवन्ति ये तत्र गतानां भविष्यन्ति । तस्माद् मिलितेषु सर्वेष्वपि पृच्छेत्, उपलक्षणत्वात् सर्वेऽपि च कथयेयुः ॥

अत्रैव मतान्तरमुपन्यस्य दूषयन्नाह-

[भा.१४६२] केई भणंति पुव्विं, पडिलेहिय एवमेव गंतव्वं ।
तं तु न जुज्इ वसहीफेडण आगंतु पडिनीए ॥

वृ- केचिद् भणन्ति-'पूर्वं' प्राक् प्रत्युपेक्षिते क्षेत्रे एवमेव गन्तव्यम् न पुनस्तत्र क्षेत्रप्रत्युपेक्षकाः प्रेषणीया इति, तत तु 'न युज्यते' न घटते । कुतः ? इत्याह-वसतेः कदाचित् स्फेटनं कृतं भवेत्, आगन्तुको वा प्रत्यनीकस्तत्र सम्भवेत्, अः पूर्वदृष्टमपि क्षेत्रं प्रत्युपेक्षणीयम् ॥

अथ कथं प्रष्टव्यम् ? इत्याह-

[भा.१४६३] कयरी दिसा पसत्था, अमुगी सव्वेसि अनुमए गमनं ।
चउदिसि ति दु एक्कं वा, सत्तग पनगे तिग जहन्ने ॥

वृ- यदा सर्वेऽपि साधवो मिलिता भवन्ति तदा गुरवो ब्रुवते-आर्या ! पूर्णोऽयमस्माकं मासकल्पः, क्षेत्रान्तरं सम्प्रति प्रत्युपेक्षणीयम्, अतः कतरा दिक् साम्प्रतं प्रशस्ता ? । ते ब्रुवते- 'अमुका' पूर्वादीनामन्यतमा । एवं सर्वेषां यद्यसौ 'अनुमता' अभिरुचिता तदा गमनं कर्त्तव्यम् । प्रथमं चतसृष्वपि दिक्षु, अथ चतुर्थ्यां कोऽप्यशिवाद्युपद्रवस्ततस्तिसृषु दिक्षु, तदभावे द्वयोर्दिशोः, तदसत्येकस्यां दिशि गच्छन्ति । ते चैकैकस्यां दिश्युत्कर्षतः सप्त व्रजन्ति, सप्तानामभावे पञ्च, जघन्येन तु त्रयः साधवो नियमाद् गच्छन्ति ॥ तत्र च ये आभिग्रहिकाः-क्षेत्रप्रत्युपेक्षणार्थं प्रतिपन्ना-

Jain Education International For Private & Personal Use Only www.jainelibrary.org

भिग्रहास्ते स्वयमेव गुरूनापृच्छ्य गच्छन्ति। अथ न सन्त्याभिग्रहिकास्ततः को विधिः? इत्याह-

[भा.१४६४] वेयावच्चगरं बाल वुड्ढ खमयं वहंतऽगीयत्थं।
गणवच्छेइअगमनं, तस्स व असती य पडिलोमं॥

वृ- वैयावृत्यकरं १ बालं २ वृद्धं ३ क्षपकं ४ 'वहन्तं' योगवाहिनं ५ अगीतार्थं ६ एतान् न क्षेत्रप्रत्युपेक्षणाय व्यापारयेत्, किन्तु गणावच्छेदकस्य गमनं भवति। तस्य वाशब्दादपरस्य वा गीतार्थस्य 'असति' अभावे 'प्रतिलोमं' प्रतीपक्रमेण पश्चानुपूर्व्येत्यर्थः, एतानेवागीतार्थमादिं कृत्वा व्यापारयेदिति सङ्ग्रहगाथासमासार्थ॥ अथैनामेव विवरीषुः प्रथमतः प्रायश्चित्तमाह-

[भा.१४६५] आइतिए चउगुरुगा, लहुओ मासो उ होइ चरिमतिए।
आणाइणो विराधन, आयरियाई मुनेयव्वा॥

वृ- 'आदित्रिके' वैयावृत्यकर-बाल-वृद्धलक्षणे व्यापार्यमाणे चत्वारो गुरुकाः। 'चरमत्रिके तु' क्षपक-योगवाहि-अगीतार्लक्षणे लघुको मासः। आज्ञादयश्च दोषाः, विराधना चाऽऽचार्यादीनां ज्ञातव्या॥ तामेव भावयति-

[भा.१४६६] ठवणकुले व न साहइ, सिट्ठा व न दिंति जा विरादानया।
परितावनमनुकंपन, तिण्हऽसमत्थो भवे खमओ॥

वृ- वैयावृत्यकरः प्रेष्यमाणो रुष्यति। रुषितश्च यान्याचार्यादिप्रायोग्यदायकानि स्थापनाकुलानि तानि न कथयति। 'शिष्टानि वा' कथितानि परं तानि तस्यैव ददति नान्यस्य, तेन भावितत्वात् तेषाम्। ततोऽलभ्यमाने प्रायोग्ये या काचिदात्मनो ग्लानादीनां वा विराधना तन्निष्पन्नमाचार्यस्य प्रायश्चित्तम्। अथ क्षपकं प्रेषयति ततो यदसौ शीता-ऽऽतपादिना परिताप्यते तन्निष्पन्नम्, देवता वा काचित् क्षपकमनुकम्पमाना खलु क्षेत्रेऽपि भक्त-पानमुत्पादयति, लोको वा क्षपक इति कृत्वा तस्यानुकम्पया सवर्मपि ददाति नान्यस्य, तपःक्षामकुक्षिश्वासौ तिसृणां गोचरचर्याणामसमर्थः इति॥ बालद्वारमाह-

[भा.१४६७] हीरेज्ज व खेलेज्ज व, कज्जा-ऽकज्जं न याणई बालो।
सो व अनुकंपणिज्जो, न दिंति वा किंचि बालस्स॥

वृ- ह्रियेत वा म्लेच्छादिना, खेलयेद् वा चेटरूपैः सार्द्धम्, 'कार्या-ऽकार्यं च' कर्त्तव्या-ऽकर्त्तव्यं न जानाति बालः। 'स वा' बालः स्वभावत एवानुकम्पनीयो भवति ततः सर्वोऽपि लोकस्तस्य भक्त-पानं प्रयच्छति। स चागत्याचार्याय कथयति-यथा सर्वमपि प्रायोग्यं तत्र प्राप्यते। ततस्तद्वचनादागतस्तत्र गच्छः, यावन्न किञ्चिद् लभ्यते। न ददति वा किञ्चिद् बालाय लोकाः, पराभवनीयतया दर्शनात्॥ वृद्धद्वारमाह-

[भा.१४६८] वुड्ढोऽनुकंपणिज्जो, चिरेण न य मग्ग थंडिले पेहे।
अहवा वि बाल-वुड्ढा, ,असमत्था गोयरतियस्स॥

वृ- 'वृद्धः' परिनतवया अनुकम्पनीयो लोकस्य भवति, ततश्चायं सर्वत्रापि लभते नापरः। तथा स मन्दं मन्दं गच्छन् चिरकालेनोपैति, न च 'मार्गं' पन्थानं स्थण्डिलानि च प्रत्युपेक्षते। अथवा बाल-वृद्धावसमर्थौ 'गोचरत्रिकस्य' त्रिकालभिक्षाटनस्येति॥ योगवाहिद्वारमाह-

[भा.१४६९] तूरंतो व न पेहे, गुणणालोभन न य चिरं हिंडे।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

विगइं पडिसेहेई, तम्हा जोगिं न पेसिज्जा ॥

वृ- योगवाही 'श्रुतं मम पठितव्यं वर्त्तते' इति त्वरमाणः सन्नपान्तराले पन्थानं न प्रत्युपेक्षते। गुणना-परावर्त्तना तस्या लोभेन चिरमसौ भिक्षां न हिण्डते। लभ्यमानामपि 'विकृतिं' घृतादिकामसौ प्रतिषेधयति। तस्माद् योगिनं न प्रेषयेत् ॥ अगीतार्थद्वारमाह-

[भा.१४७०] पंथं च मास वासं उवस्सयं एच्चिरेण कालेण।
एहामो त्ति न याणइ, अगीतो पडिलोम असतीए ॥

वृ- अगीतार्थ 'पन्थानं' मार्गं 'मासं' मासकल्पविधिं 'वासं' वर्षावासविधिं 'उपाश्रयं' वसतिमेतानि परीक्षितुं न जानाति। तथा शय्यातरेण पृष्टः 'कदा यूयमागमिष्यथ ?' ततोऽसौ ब्रवीति- 'इयता कालेन' अर्द्धमासादिना वयमेष्याम इत्येवं वदतो यः स्वल्पविधिभाषणजनितो दोषस्तमगीतार्थो न जानाति। यत एवमतः प्रथमतो गणावच्छेदकेन गन्तव्यम्। तस्याभावेऽपरोऽपि योगीतार्थः स व्यापारणीयः। तस्यापि 'असति' अभावे 'प्रतिलोमं' पश्चानुपूर्व्या एतानेवागीतार्थमादिं कृत्वा प्रेषयेत् ॥ केन विधिना ? इति चेद् उच्यते-

[भा.१४७१] सामायारिमगीए, जोगिमनागाढ खमग पारावे।
वेयावच्चे दायण, जुयल समत्थं व सहियं वा ॥

वृ- अगीतार्थः ओधनिर्युक्तिसामाचारीं कथयित्वा प्रेषणीयः। तदभावे 'अनागाढयोगी' बाह्ययोगवाही योगं निक्षिप्य प्रेष्यते। तस्याप्यभावे क्षपकः, तं च प्रथमं 'पारयेत्' पारणं कारयेत्, ततो 'मा क्षपणं कार्षीः' इति शिक्षां दत्त्वा प्रहिणुयात्। तस्याप्यभावे वैयावृत्त्यकरः प्रेष्यते। "दायण"त्ति स वैयावृत्त्यकरो वास्तव्यसाधूनां स्थापनाकुलानि दर्शयति। ततो बालवृद्धयुगलम्, कथम्भूतम् ? 'समर्थं' दृढशरीरम्, वा शब्दो विकल्पार्थः, 'सहितं वा' वृषभसाधुसमन्वितम्। इत्थमादिष्टेस्तैः शेषसाधूनां स्वमुपधिं समर्प्य परस्परं क्षामणां कृत्वा गमनकाले भूयोऽपि गुरूनापृच्छय गन्तव्यम्। यदि नापृच्छन्ति तदा मासलघु। ते चावश्यिकीं कृत्वा निर्गच्छन्ति ॥ कियन्तः ? कथं च ? इत्याह-

[भा.१४७२] तिन्नेव गच्छवासी, हवंतऽहालंदियाण दोन्नि जना।
गमने चोदगपुच्छा, थंडिलपडिलेहऽहालंदे ॥

वृ- जघन्यतस्त्रयो गच्छवासिनो जना एकैकस्यां दिशि व्रजन्ति। यथालन्दिकानां तु गच्छप्रतिबद्धानां द्वौ जनावेकस्यां दिशि क्षेत्रप्रत्युपेक्षकौ गच्छतः। शेषासु तिसृषु दिक्षु गच्छवासिनामाचार्या आदिशन्ति, यथा-यथालन्दिकानामपि योग्यं क्षेत्रं प्रत्युपेक्षणीयम्। तेषां च गमने प्ररूपिते नोदकपृच्छा वक्तव्या। स्थण्डिलप्रत्युपेक्षणं यथालन्दिकानां वाच्यम् ॥

तत्र गमनद्वारं विवृणोति-

[भा.१४७३] पंथुच्चारे उदए, ठाणे भिक्खंतरा य वसहीओ।
तेना सावय वाला, पच्चावाया य जाणविही ॥

वृ- 'पन्थानं' मार्गं "उच्चारे"त्ति उच्चार-प्रश्रवणभूमिके, "उदए"त्ति पानकस्थानानि येषु बालादियोग्यं प्राशुकैषणीयं पानकं लभ्यते, "ठाणे"त्ति विश्रामस्थानानि, "भिक्ख"त्ति येषु येषु प्रदेशेषु भिक्षा प्राप्यते न वा, अन्तरा-अन्तराले वसतयः-प्रतिश्रयाः सुलभा दुर्लभा वा, स्तेनाः

Jain Education International For Private & Personal Use Only www.jainelibrary.org

श्वापदा व्यालाश्च यत्र सन्ति न वा, प्रत्यपायाश्च यत्र दिवा रात्रौ वा भवन्ति, तदेतत् सर्वं सम्यग् निरूपयद्भिर्गन्तव्यम् । यानं-गमनं तस्य विधिरयं द्रष्टव्य इति ॥ इदमेव व्याचिख्यासुराह-

[भा.१४७४] वावारिय सच्छंदाण वा वि तेसिं इमो विही गमने ।
दव्वे खेत्ते काले, भावे पंथं तु पडिलेहे ॥

वृ- 'व्यापारिताः' आचार्येण नियुक्ताः 'स्वच्छन्दाः' नाम ये आभिग्रहिकाः, तेषामुभयेषामप्ययं गमने विधिः । तद्यथा-द्रव्यतः क्षेत्रतः कालतो भावतश्च पन्थानं प्रत्युपेक्षन्ते ॥ कथम् ? इत्याह-

[भा.१४७५] कंटग तेना वाला, पडिनीया सावया य दव्वम्मि ।
सम विसम उदय थंडिल, भिक्खायरियंतरा खेत्ते ॥

वृ- द्रव्यतः कण्टकाः स्तेना व्यालाः प्रत्यनीका श्वापदाश्च पथि प्रत्युपेक्षणीयाः । क्षेत्रतः 'समः' गिरिकन्दरा-प्रपात-निम्नोन्नतरहितः पन्थाः, 'विषमः' तद्विपरीतः, "उदग" त्ति पानीयबहुलो मार्गः, स्थण्डिलानि भिक्षाचर्या तथा 'अन्तरा' अपान्तराले वसतयः ॥

[भा.१४७६] दिय राओ पच्चवाए, य जाणई सुगम-दुग्गमे काले ।
भावे सपक्ख-परपक्खपेल्लणा निण्हगाईया ॥

वृ- कालतो दिवा रात्रौ वा प्रत्यपायान् जानाति, यथा-अत्र दिवा प्रत्यापाया न रात्रौ, अत्र तु रात्रौ न दिवेति; यद्वा दिवा रात्रौ वाऽयं पन्थाः सुगमो दुर्गमो वा । भावतः स्वपक्षेण परपक्षेण वा प्रेरितः-आक्रान्तोऽयं ग्रामः पन्था वा न चेति । अथ कः पुनः स्वपक्षः को वा परपक्षः ? इत्याह- "निण्हगाईय" त्ति निह्नव-पार्श्वस्थादयः साधुलिङ्गधारिणः स्वपक्षः, आदिग्रहणात् चरक-परिव्राजकादयः परपक्षः । एवं प्रत्युपेक्षमाणास्तावद् व्रजन्ति यावद् विवक्षितक्षेत्रं प्राप्ताः ॥

उक्तं गमनद्वारम् । अथ नोदकपृच्छाद्वारमाह–

[भा.१४७७] सुत्तत्थाणि करिंते, न व त्ति वत्तंतगाउ चोएइ ।
न करिंति मा हु चोयग !, गुरूण निइआइआ दोसा ॥

वृ- परो नोदयति-क्षेत्रप्रत्युपेक्षका व्रजन्तः किं सूत्रार्थौ कुर्वते न वा ? । गुरुराह-न कुर्वन्ति, मा भूवन् गुरूणां नित्यवासादयो दोषाः । अतो यदि सूत्रपौरुषीं कुर्वन्ति तदा मासलघु, अर्थपौरुष्यां मासगुरु ॥ "थंडिलपडिलेहऽहालंदे" त्ति पदं व्याख्यानयति-

[भा.१४७८] सुत्तत्थपोरिसीओ, अपरिहवंता वयंतऽहालंदी ।
थंडिल्ले उवओगं, करिंति रत्तिं वसंति जहिं ॥

वृ- यथालन्दिकाः सूत्रार्थपौरुष्यावपरिपयन्तो विहारं भिक्षाचर्यां च तृतीयस्यां पौरुष्यां कुर्वाणा व्रजन्ति । यत्र च रात्रौ वसन्ति तत्र 'स्थण्डिले' कालग्रहणादियोग्ये उपयोगं कुर्वन्ति ॥

केन विधिना गच्छवासिनस्तत्र क्षेत्रे प्रविशन्ति ? इत्याह-

[भा.१४७९] सुत्तत्थे अकरिंता, भिक्खं काउं अइंति अवरण्हे ।
बीयदिणे सज्झाओ, पोरिसि अद्धाए संघाडो ॥

वृ- सूत्रार्थावकुर्वन्तः प्रस्तुतक्षेत्रासन्ने ग्रामे भिक्षां कृत्वा समुद्दिश्य अपराह्ने विचारभूमिस्थण्डिलानि प्रत्युपेक्षमाणा विवक्षितं क्षेत्रं "अइंति" त्ति प्रविशन्ति । ततो वसतिं गृहीत्वा तत्रावश्यकं कृत्वा कालं प्रत्युपेक्ष्य प्रादोषिकं स्वाध्यायं कृत्वा प्रहरद्वयं शेरते । ये तु न शेरते तेऽर्द्धरात्रिक-

Jain Education International For Private & Personal Use Only www.jainelibrary.org

वैरात्रिककालद्वयमपि गृह्णन्ति । ततः प्राभातिकं कालं गृहीत्वा द्वितीयदिने स्वाध्यायः कर्त्तव्यः । ततोऽर्द्धायां पौरुष्यामतिक्रान्तायां सङ्घाटको भिक्षामटति ॥ एतदेवाह-

[भा.१४८०] वीयार भिक्खचरिया, वुच्छाणऽचिरुग्गयम्मि पडिलेहा ।
चोयग भिक्खायरिया, कुलाइँ तहुवस्सयं चेव ॥

वृ- विचारभूमी प्रथममेवाऽपराह्णे प्रत्युपेक्षणीया । ततो रात्रावुषितानामचिरोद्गते सूर्ये अर्द्धपौरुष्यां भिक्षाचरयायाः प्रत्युपक्षणा भवति । अत्र नोदकः प्रश्नयति-किमिति प्रातरारभ्य भिक्षाचर्या विधीयते ? । सूरिरभिदधाति-एवं भिक्षाचर्यां कुर्वाणाः 'कुलानि' दानकुलादीनि तथोपाश्रयं च ज्ञास्यन्तीति समासार्थः ।। अथैतदेव व्याचष्टे-

[भा.१४८१] बाले वुड्ढे सेहे, आयरिय गिलाण खमग पाहुणए ।
तिन्नि य काले जहियं, भिक्खायरिया उ पाउग्गा ।।

वृ- षष्ठी-सप्तम्योरर्थं प्रति अभेदाद् बालस्य वृद्धस्य शैक्षस्य आचार्यस्य ग्लानस्य क्षपकस्य प्राघूर्णकस्य च 'प्रायोग्या' तदनुकूलप्राप्यमाणभक्त-पाना 'त्रीनपि' पूर्वाह्ण-मध्याह्न-सायाह्नलक्षणान् कालान् यत्र भिक्षाचर्या भवति तत् क्षेत्रं गच्छस्य योग्यमिति गम्यते ।।

कथं पुनस्तत् प्रत्युपेक्ष्यते ? इत्याह-

[भा.१४८२] खेत्तं तिहा करित्ता, दोसीणे नीणितम्मि उ वयंति ।
अन्नोन्ने बहुलद्धे, थोवं दल मा य रूसिज्जा ।।

वृ- क्षेत्रं 'त्रिधा' त्रीन् भागान् कृत्वा एकं विभागं प्रत्युषसि पर्यटन्ति, द्वितीयं मध्याह्ने, तृतीयं सायाह्ने । तत्र यत्र प्रातरेव भोजनस्य देशकालस्तत्र प्रथमं पर्यटन्ति । अथ नास्ति प्रातःक्वापि देशकालस्ततः ''दोसीणे'' पर्युषिते आहारे निस्सारिते वदन्ति, यथा-अन्यान्येषु गृहेषु पर्यटद्भिः बहुः-प्रचुर आहारो लब्धस्तेन च भृतमिदं भाजनम् अतः स्तोकं देहि, 'मा च रुषः' मा रोषं कार्षी 'यदेते न गृह्णन्ति' इति । एतद्यामी परीक्षार्थं कुर्वन्ति 'किमयं दानशीलो न वा ?' इति ।।

[भा.१४८३] अहव न दोसीणं चिय, जायामो देहि ने दहिं खीरं ।
खीरे घय गुल गोरस, थोवं थोवं च सव्वत्थ ।।

वृ- अथवा न वयं दोसीणमेव याचामः किन्तु देहि ''ने'' अस्मभ्यं दधि क्षीरं च । क्षीरे लब्धे सति घृतं गुडं गोरसं च याचित्वा सर्वत्र स्तोकं स्तोकमेव गृह्णन्ति । एवं तावत् प्रत्युषसि येषु भिक्षाया देशकालो यानि च भद्रककुलानि तानि सम्यगवधारयन्ति यथा बाल-वृद्ध-क्षपकादीनां प्रथम-द्वितीयपरिषहार्दितानां समाधिसन्धारणार्थं प्रातरेव तेषु पेयादीनि याचित्वोपनीयन्ते । एवमेकस्य पर्याप्तं गृहीत्वा वसतिमागम्यालोचनादिविधिपुरस्सरं समुद्दिश्य मध्याह्ने द्वितीये विभागे भिक्षां पर्यटन्ति ।। कथम् ? इत्याह-

[भा.१४८४] मज्झण्हे पउर भिक्खं, परिताविय पेज्ज जूस पय कढियं ।
ओभट्ठमनोभट्ठं, लब्भइ जं जत्थ पाउग्गं ।।

वृ-मध्याह्ने प्रचुरं भैक्षं तथा 'परितापितं' परितलितं सुकुमारिकादि पक्वान्नं यद्वा 'परितापितं' क्वथितं कट्टरादिकमित्यर्थः 'पेया' यवागूः 'यूषः' मुद्गरसः तथा 'पयः' दुग्धं 'क्वथितं' तापितम्। एवमेव भाषितमनवभाषितं वा यद् यत्र प्रायोग्यमन्विष्यते तत् तत्र यदि लभ्यते तदा प्रशस्तं तत्

Jain Education International For Private & Personal Use Only www.jainelibrary.org

क्षेत्रम् । अत्राप्येकस्य पर्याप्तं गृहीत्वा प्रतिनिवृत्त्य समुद्दिश्य संज्ञाभूमीं गत्वा वैकालिकीं पात्रादिप्रत्युपेक्षणां कृत्वा सायाह्ने तृतीये विभागे भिक्षामटन्ति ।। कथम् ? इत्याह-

[भा.१४८५] चरिमे परितावियि पेज्ज खीर आएस-अतरणट्ठाए ।
एक्केक्क गसंजुत्तं, भत्तट्ठं एक्कमेक्कस्स ।।

वृ- चरिमे भइक्षाकाले परितापितं पेया क्षीरं च येषु प्राप्यते तानि कुलानि सम्यगवधारयन्ति । किमर्थम् ? इत्याह-आदेशाः-प्राधूर्णकास्तदा समागच्छेयुः, अतरणः-ग्लानस्तदानीं पथ्यमुपयुञ्जीत तदर्थम्, उपलक्षणत्वाद् बालाद्यर्थं च । अत्राप्येकस्य पर्याप्तं गृहीत्वा प्रतिनिवर्त्तन्ते । यत आह- "एक्केक्क ग" इत्यादि । एकैकः साधुरन्यसाधुना संयुक्तो यस्मिन्नानयने तदेकैकसंयुक्तं 'भक्तार्थम्' उदरपूरमाहारमेकैकस्य साधोरर्थायानयन्ति । इदमुक्तं भवति-प्रातर्द्वौ साधू सङ्घाटकेन पर्यटतः, तृतीयो रक्षपाल आस्ते; द्वितीयस्यां वेलायां तयोर्मध्यादेक आस्ते, अपरः प्रथमव्यवस्थितं गृहीत्वा प्रयाति; तृतीयस्यां तु द्वितीयवेलारक्षपालः प्रथमव्यवस्थितरक्षपालेन सह पर्यटति, यस्तु वारद्वयं पर्यटितः स तिष्ठति; एवं त्रयाणां जनानां द्वौ द्वौ वारौ पर्यटनं योजनीयम् ।। किञ्च-

[भा.१४८६] ओसह भेसज्जाणि य, काले च कुले अ दानसड्ढाई ।
सग्गामे पेहित्ता, पेहंति तओ परग्गामे ।।

'औषधानि' हरीतक्यादीनि 'भैषजानि' पेयादीनि तरिफलादीनि वा चशब्दात् पिप्पल-कसूच्यादीनि च "काले य"त्ति येषु कुलेषु यत्र काले वेला यानि वा दानश्राद्धादीनि कुलानि एतानि स्वग्रामे प्रत्युपेक्ष्य ततः परग्रामे प्रत्युपेक्षन्ते ।। अत्र च चालनां कारयति-

[भा.१४८७] चोयगवयणं दीहं, पनीयगहणे य ननु भवे दोसा ।
जुज्जइ तं गुरु-पाहुण-गिलाणगट्ठा न दप्पट्ठा ।।

वृ- नोदकः-प्रेरकस्तस्य वचनं-चालनारूपम्-ननु तेषामित्थं दीर्घां भिक्षाचर्यां कुर्वतां प्रणीतस्य च-दधि-दुग्धादेर्ग्रहणे 'दोषाः' सूत्रार्थपरिमन्थ-मोहोद्भवादयो भवेयुः । सूरिराह-भद्र ! युज्यते 'तत्' प्रणीतग्रहणं दीर्घभिक्षाटनं च गुरु-प्राधूर्णक-ग्लानार्थम्, न 'दर्पार्थं' नात्मनो बलवर्णादिहेतोः।।

[भा.१४८८] जइ पुण खद्ध-पणीए, अकारणे एक्कसिं पि गिण्हिज्जा ।
तहियं दोसा तेन उ, अकारमे खद्ध-निद्धाइं ।।

वृ- यदि पुनः खद्धं-प्रचुरं प्रणीतं-स्निग्ध-मधुरं ते 'अकारणे' गुर्वादिकारणाभावे एकशोऽपि गृह्णीयुः ततः 'तस्मिन्' खद्ध-प्रणीतग्रहणे भवेयुर्दोषाः । कुतः ? इत्याह-अकारणे आत्मार्थं यस्मात् तेन "खद्ध-निद्धाइं" ति प्रचुर-स्निग्धानि भक्ष्यन्त इति वाक्यशेषः । अतो गुरु-ग्लानादिहेतोः क्षेत्रप्रत्युपेक्षणाकाले प्रणीतं गृह्णतां चिरं च पर्यटतां न कश्चिद् दोष इति ।। अथ "कुलाइँ तहुवस्सयं चेव" त्ति पदं व्याख्यायते-भिक्षामटन्तः कुलानि जानन्ति । कथम् ? इत्याह-

[भा.१४८९] दाने अभिगम सड्ढे, सम्मत्ते खलु तहेव मिच्छत्ते ।
मामाए अचित्ते, कुलाइँ जाणंति गीयत्था ।।

वृ- 'दानश्राद्धानि' प्रकृत्यैव दानरुचीनि, 'अभिगमश्राद्धानि' प्रतिपन्नाणुव्रतानि श्रावककुलानि, 'सम्यक्त्वश्राद्धानि' अविरतसम्यग्दृष्टीनि, तथैव 'मिथ्यात्वे' मिथ्यादृष्टिकुलानि, 'मामाकानि' 'मा मदीयं गृहं श्रमणाः प्रविशन्तु' इति प्रतिषेधकारीणि, "अचियत्ते" त्ति नास्ति प्रीति साधुषु

Jain Education International For Private & Personal Use Only www.jainelibrary.org

गृहमुपागतेषु येषां तान्यप्रीतिकानि, एतानि कुलानि गीतार्था पर्यटन्तः सम्यग् जानन्ति ॥

उपाश्रयाँश्च जानन्ति । कथम् ? इत्याह-

[भा.१४९०] जेहि कया उ उवस्सय, समणाणं कारणा वसहिहेउं ।
परिपुच्छिया सदोसा, परिहरियव्वा पयत्तेणं ॥

वृ- इह मनाः पञ्चधा-तापसाः शाक्याः परिव्राजका आजीवका निर्ग्रन्थाश्च । तेषां पञ्चानां निर्ग्रन्थामेव वा 'कारणात्' कारणमुद्दिस्येत्यर्थः, कारणमेव व्यनक्ति-वसति-अवस्थानं तद्धेतोः-तन्निमित्तम्, यैर्गृहिभिः कृता उपाश्रयास्तेषां समीपे भिक्षामटद्भिः 'परिपृच्छय' उपाश्रयमूलोत्पत्तिं पर्यनुयुज्य 'सदोषाः' सावद्यदोषदुष्टास्ते उपाश्रयाः प्रयत्नेन परिहर्त्तव्याः ॥ तथा-

[भा.१४९१] जेहि कया उ उवस्सय, समणाणं कारणा वसहिहेउं ।
परिपुच्छिय निद्दोसा, परिभोत्तुं जे सुहं होइ (होंति) ॥

वृ- यैः कृता उपाश्रयाः 'श्रमणानां' निर्ग्रन्थवर्जानां शाक्यादीनां कारणाद् वसतिहेतोस्तान् परिपृच्छय 'निर्दोषाः' निरवद्यास्ते उपाश्रयाः परिभोक्तुं "जे" इति निपातः पादपूरणे 'सुखं भवन्ति' सुखेनैव संयमबाधामन्तरेण ते परिभुज्यन्त इत्यर्थः ॥

[भा.१४९८] जेहि कया पाहुडिया, समणाणं कारणा वसहिहेउं ।
परिपुच्छिया सदोसा, परिहरियव्वा पयत्तेणं ॥

वृ-यैः कृता 'प्राभृतिका' उपाश्रयेषु उपलेपन-धवलनादिका 'श्रमणानां' पञ्चानामपि साधूनामेव वा कारणाद् वसतिहेतोः तान् परिपृच्छय 'सदोषाः' उत्तरगुणैरशुद्धत्वात् सावद्यास्ते उपाश्रयाः प्रयत्नेन परिहर्त्तव्याः ॥

[भा.१४९३] जेहि कया पाहुडिया, समणाणं कारणा वसहिहेउं ।
परिपुच्छिय निद्दोसा, परिभोत्तुं जे सुहं होइ (होंति) ॥

वृ- यैः कृता प्राभृतिका 'श्रमणानां' साधुवर्जितानां तापसादीनां कारणाद् वसतिहेतोस्तान् परिपृच्छय निर्दोषा इति मत्वा परिभोक्तुं "जे" इति प्राग्वत् 'सुखं भवन्ति' सुखेनैव परिभुज्यन्त इत्यर्थः ॥ अथ कीदृशे स्थाने वसतिरन्वेषणीया ? उच्यते-यावन्मात्रं क्षेत्रं वसिमाक्रान्तं भवति तावन्मात्रं पूर्वाभिमुखवामपार्श्वोपविष्टवृषभाकारं बुध्धा परिकल्प्य प्रशस्तेषु स्थानेषु वसतिर्गृह्यते। अथ कुत्रावयवस्थाने गृह्यमाणा वसति किंफला भवति ? इत्युच्यते –

[भा.१४९४] सिंगक्खोडे कलहो, ठाणं पुण नत्थि होइ चलणेसु ।
अहिठाणे पुट्टरोगो, पुच्छम्मि य फेडणं जाणे ॥

वृ- 'शृङ्गखोडे' शृङ्गप्रदेशे यदि वसतिं करोति तदा निरन्तरं साधूनां कलहो भवति । 'स्थानम्' अवस्थिति पुनर्नास्ति 'चरणेषु' पादप्रदेशेषु । 'अधिष्ठाने' अपानप्रदेशेषु "पुट्टं" ति उदरं तस्य रोगो भवति । 'पुच्छे' पुच्छप्रदेशे 'स्फेटनम्' अपनयनं वसतेर्जानीहि ॥

[भा.१४९५] मुहमूलम्मि उ चारी, सिरे अ कउहे अ पूअ सक्कारो ।
खंधे पट्ठीइ भरो, पुट्ठम्मि उ धायओ वसहो ॥

वृ- मुखमूले यदि वसति तदा 'चारी' भोजनसम्पत्ति प्रशस्ता । 'शिरसि' शृङ्गयोर्मध्ये ककुदि च वसतिकरणे पूजा च वस्त्र-पात्रादिभि सत्कारश्चाभ्युत्थानादिना साधूनां भवति । स्कन्धप्रदेशे

Jain Education International For Private & Personal Use Only www.jainelibrary.org

पृष्ठप्रदेशे च वसत सत्यां साधुभिरितस्तत आगच्छद्भिर्भरो भवति । 'पोट्टे' उदरप्रदेशे वसतौ गृह्यमाणायां 'ध्रातः' नित्यतृप्तः 'वृषभः' वृषभपरिकल्पनागृहीतवसतिनिवासी साधुजनो भवतीति। एवं परीक्ष्याऽप्रशस्तस्थानव्युदासेन प्रशस्तेषु स्थानेषु स्त्री-पशु-पण्डकवर्जिता वसतिरन्वेषणीया।। तदन्वेषणे चायं विधिः-

[भा.१४९६] देउलियअणुन्नवणा, अणुन्नविए तम्मि जं च पाउग्गं ।
भोयण काले किच्चिर, सागरसरिसा उ आयरिया ।।

वृ- देवकुलिका-यक्षादीनामायतनं तत्पार्श्ववर्तिनो वा मठाः । आह किमर्थं देवकुलिकाया निबन्धः ? उच्यते-सा प्रायेण ग्रामादीनां बहिर्भवति, साधुभिश्चोत्सर्गतो बहि स्थातव्यम्, देवकुलिका च विविक्तावकाशा भवति, अतः प्रथमतस्तस्या अनुज्ञापना कर्त्तव्या । अथ नास्ति देवकुलिका बहिर्वा सप्रत्यपायं ततो ग्रामादेरन्तः प्रतिश्रयोऽन्विष्यते । यस्तत्र प्रभुः प्रभुसन्दिष्टो वा सः 'प्रायोग्यं' वक्ष्यमाणमनुज्ञाप्यते । अनुज्ञापिते सति तस्मिन् यच्च तेन प्रायोग्यमनुज्ञातं तस्य परिभोगः कार्यः। अथासौ नानुजानीते प्रायोग्य ततो भोजनदृष्टान्तः कर्त्तव्यः । तथा कियच्चिरं कालं भवन्तः स्थास्यन्ति ? इति पृष्टे अभिधातव्यम्-यावद् भवतां गुरूणां च प्रतिभासते । कियन्तो भवन्ति इहावस्थास्यन्ते ? इति पृष्टे वक्तव्यम्-सागरः-समुद्रस्तत्सदृशा आचार्या भवन्तीति सङ्ग्रहगाथासमासार्थ ।। अथैनामेव व्याचिख्यासुः "अणुन्नविए तम्मि" इति पदं विवृणोति-

[भा.१४९७] जं जं तु अणुन्नायं, परिभोगं तस्स तस्स काहिंति ।
अविदिन्ने परिभोगं, जइ काहिइ तत्थिमा सोही ।।

वृ- 'यद् यत्' तृण-डगलादिकं शय्यातरेणानुज्ञातं तस्य तस्य परिभोगमभिरुचिते क्षेत्रे समायाताः सन्तः करिष्यन्ति तत्र 'इयं' वक्ष्यमाणा शोधि ।। तामेवाह-

[भा.१४९८] इक्कड-कढिमे मासो, चाउम्मासो अ पीढ-फलएसु ।
कट्ठ-कलिंचे पनगं, छारे तह मल्लगाईसु ।।

वृ- इक्कडमये कठिनमये च संस्तारकेऽदत्ते गृह्यमाणे लघुमासः । चत्वारो मासा लधवः पीठफलकेषु । तथा काष्ठा-कलिञ्चियोः क्षारे मल्लक-तृण-डगलादिषु च पञ्चकम् । अतः प्रायोग्यमनुज्ञापनीयम् ।। अथास ब्रूयात् 'किं तत् प्रायोग्यम् ?' ततो वक्तव्यम्-

[भा.१४९९] दव्वे तण-डगलाई, अच्छण-भाणाइधोवणा खित्ते ।
काले उच्चाराई, भावि गिलाणाइ कूरुवमा ।।

वृ- प्रायोग्यं चतुर्द्धा-द्रव्यतः क्षेत्रतः कालतो भावतश्च । तत्र 'द्रव्ये' द्रव्यतस्तृण-डगलानि, आदिशब्दात् क्षार-मल्लकादीनि च । क्षेत्रतः "अच्छणं"ति स्वाध्यायादिहेतोः प्राङ्गणादिप्रदेशेऽवस्थानम्, तथा भाजनानाम् आदिग्रहणादाचार्यादिसत्कमलिनवस्त्राणां धावनं-प्रक्षालनं च प्रतिश्रयाद् बहिर्विधीयते । कालतो रात्रौ दिवा वा अवेलायामुच्चारस्य प्रश्रवणस्य वा व्युत्सर्जनम्। भावतो ग्लानस्यापरस्य वा प्रधूर्णकादेर्निवात-प्रवाताद्यवकाशस्थापनेन समाधिसम्पादनम् इत्युक्ते यद्यनुजानाति ततः सुन्दरम् । अथ ब्रूयात्-'मया युष्मभ्यं वसतिरेव दत्ता, अहमन्यद् युष्मदीयं प्रायोग्यं न जानामि' ततो यः प्राग् भोजनदृष्टान्त उद्दिष्टः स उपदर्श्यते-"कूरुवमे"ति कूरः-भक्तं तस्योपमा । यथा केनचित् कस्यापि पार्श्वे कूरः प्रार्थितः, तेन च दत्तः, ततस्तस्य स्नाना-ऽऽसन-

Jain Education International For Private & Personal Use Only www.jainelibrary.org

भाजनोपढौकना-ऽवगाहिम-सूप-नानाविधव्यञ्जनादीन्यपि दीयन्ते; एवं भवताऽपि वसतिं प्रयच्छता सर्वमपि प्रायोग्यं दत्तमेव भवति, परं तथापि वयं भवन्तं भूयोऽपि तृतीयव्रतभावनामनुवर्त्तयन्तोऽनुज्ञापयामः । एवमुक्ते स सर्वमपि प्रायोग्यमनुजानीयात् ततो यत्र यद् उच्चारादिव्युत्सर्जनमनुज्ञातं तत् तत्र विधेयम् ॥ यत आह-

[भा.१५००] उच्चारे पासवणे, लाउअनिल्लेवणे य अच्छणेए ।
करणं तु अणुन्नाए, अणनुन्नाए भवे लहुओ ॥

वृ- उच्चारस्य प्रश्रवणस्य 'अलाबुनिर्लेपनस्य' पात्रप्रक्षालनस्य "अच्छणए"त्ति स्वाध्यायाद्यर्थमवस्थानस्य गाथायां षष्ठ्यर्थे सप्तमी 'करणं' समाचरणं शय्यातरेणानुज्ञाते प्रदेशे कर्त्तव्यम् । अथाननुज्ञाते अवकाशे उच्चारादिकं करोति तदा लघुको मास इति ॥ गतं भोजनद्वारम् । अथ कियच्चिरं कालमिति द्वारम्-यदि शय्यातरः प्रश्नयति 'कियन्तं कालं यूयं स्थासयथ ?' ततो वक्तव्यम्-

[भा.१५०१] जाव गुरूण य तुब्भ य, केवइया तत्थ सागरेनुवमा ।
केवइ कालेनेहिह, सागार ठवंति अन्ने वि ॥

वृ- यावद् गुरूणां युष्माकं च प्रतिभाति तावदवस्थास्यामः, परं निव्याघाते मासमेकं व्याघाते तु हीनमधिकं वा वयमेकत्र तिष्ठामः । अथ 'मासमेव स्थास्यामः' इति निर्द्धारितं भणति ततो मासलघु । अथासौ प्रश्नयेत् 'कियन्तो यूयं तिष्ठथ ?' ततो वक्तव्यम्-"सागरेनुवम"त्ति सागरःसमुद्रस्तेनोपमा-यथा समुद्रः कदाचित प्रसरति कदाचिच्चापसरति, एवमाचार्या अपि कदाचिद् दीक्षामुपसम्पदं वा प्रतिपद्यमानैः साधुभि परिवारतः प्रसर्पन्ति कदाचित् तेष्वेवान्यत्र गतेष्वपसर्पन्ति, अत इयन्त इति सङ्ख्यानं कर्त्तुं न शक्यते । यस्तु 'एतावन्तो वयम्' इति निश्चितं ब्रूते तस्य मासलघु । अथासौ पृच्छति कियता कालेन 'एष्यथ' आगमिष्यथ ? ततः 'साकारं' सविकल्पं वचनं 'स्थापयन्ति' ब्रुवते इत्यर्थः । यथा-अन्येऽपि क्षेत्रप्रत्युपेक्षका अपरासु दिक्षु गताः सन्ति ततस्तैर्विवेदिते यदा गुरूणां विचारे समेष्यति तदा व्याघातभावे इयत्सु दिवसेषु गतेषु व्याघाते तु हीने अधिके वा काले वयमेष्याम इति । यः पुनः 'इयता कालेनागमिष्यामः' इति ब्रवीति तस्य मासलघु ॥

[भा.१५०२] पुव्वद्दिट्ठेविच्छइ, अहव भणिज्ञा हवंतु एवइआ ।
तत्थ न कप्पइ वासो, असई खेत्तस्सऽणुन्नाओ ॥

वृ- अथासौ 'पूर्वदृष्टान्' यैः प्राग् मासकल्पो वर्षावासो वा कृत आसीत् तानेवेच्छति नान्यान्, भणति च-ये साधवो मया दृष्टपूर्वास्तेषामहं शीलसमाचारं सर्वमपि जानामि अतस्त एवेह समानेतव्या न शेषाः; अथवा भणेत्-ये वा ते वा साधवो भवन्तु परमेतावन्त एवात्र तिष्ठन्तु तत्र किं कर्त्तव्यम्? इत्याह-'तत्र' एवं शय्यातरेण निर्द्धारिते सति 'न कल्पते वासः' न युज्यते तस्यां वसतावस्थातुमिति भावः । अथ नास्त्यपरं मासकल्पप्रायोग्यं क्षेत्रं तत इतरस्या वसतेरलाभे तस्यामेव वसतौ वासोऽनुज्ञातः ॥

तत्र च वसतां यदि प्राधूर्णकः समागच्छति ततः को विधि ? इत्याह-

[भा.१५०३] सक्कारो सम्माणो, भिक्खग्गहणं च होइ पाहुणए ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

जइ वसइ जाणओ तहि, आवज्जइ मासियं लहुगं ॥

वृ- 'सत्कारः' वन्दना-ऽभ्युत्थानादि 'सम्मानः' विश्रामणादि 'भिक्षाग्रहणम्' उपविष्टस्य भिक्षाया आनयनम्, एतत् सर्वमपि प्राघूर्णके आगते सति कर्त्तव्यम्। यदि वसतिर्येषां तेषां वा परिमितानां साधूनां दत्ता तदा यावन्तः प्राघुणकाः समायातास्तावतो वास्तव्यानन्यत्र विसर्ज्यप्राधुणकाः स्थाप्यन्ते। अथ नामग्राहं गृहीत्वा नियमितानामेव साधूनां सा दत्ता ततः प्राधुणकस्य वसतिस्वरूपं निवेद्यते। निवेदिते च यदि 'ज्ञोऽपि वसतिस्वरूपं जानानोऽपि तत्र वसति तदा आपद्यते मासिकं लघुकम् ॥ ततः-

[भा.१५०४] किइकम्म भिक्खगहणे, कयम्मि जाणाविओ बहि वसइ।

हिय-नट्ठेसुं संका, सुण्हा उब्भाम वोच्छेदो ॥

वृ- 'कृतिकर्मणि' विश्रामणादौ भिक्षाग्रहणे च कृते सति वसतिस्वरूपं ज्ञापितः सन् रात्रौ बहिर्वसति। यदि ज्ञापितोऽपि सन् बहिर्न व्रजति तदा सागारिकस्य केनचिच्चौरादिना हृते नष्टे न एवमेवादृश्यमाने कस्मिंश्चिद् वस्तुनि शङ्का भवेत्-नूनं यदद्यामुकं वस्तु न दृश्यते तदेतेषां यः प्राधुणको रात्रावुषित्वा प्रतिगतः तेन हृतं भविष्यति। 'स्नुषा वा' वधू रात्रावुद्भ्रामकेण सह गता भवेत् तत्रापि यदि प्राधुणकस्य शङ्का सागारिकः करोति तदा तद्रव्या-ऽन्यद्रव्याणां व्यवच्छेदो भवेत् ॥ एवं वसतौ लब्धायां किं विधियम् ? इत्याह-

[भा.१५०५] पडिलेहियं च खेत्तं, थंडिलपडिलेहऽमंगले पुच्छा।

गामस्स व नगरस्स व, सियाणकरणं पढम वत्थुं ॥

वृ- यदा क्षेत्रं सम्यक् प्रत्युपेक्षितं भवति तदा 'महास्थण्डिलं' शबपरिष्ठापनभूमिलक्षणं प्रत्युपेक्षणीयम्। "अमंगले च्छ"त्ति नोदकः पृच्छति-भगवन्! यूयं तिष्ठन्त एव किमेवममङ्गलं कुरुथ ? । सूरिराह-ग्रामस्य वा नगरस्य वा "सियाणकरणं" स्मशानस्थापनायोग्यं 'प्रथमम्' आद्यं वास्तु प्रत्युपेक्ष्यत इति वाक्यशेषः। इयमत्र भावना-ग्राम-नगरादीनां तत्प्रथमतया निवेश्यमानानां वास्तुविद्यानुसारेण प्रथमं स्मशानवास्तु निरूप्य ततः शेषाणि देवकुल-सभासौधादिवास्तूनि निरूप्यन्ते, लोके तथादृष्टत्वात्, न च तदमाङ्गलिकम्, एवमत्रापि महास्थण्डिलं प्रथमं प्रत्युपेक्ष्यमाणमस्माकं नामाङ्गलिकं भवतीति ॥ तच्च कस्यां दिशि प्रत्युपेक्षणीयम् ? उच्यते-

[भा.१५०६] दिस अवरदक्खिणा दक्खिणा य अवरा य दक्खिणापुव्वा।

अवरुत्तरा य पुव्वा, उत्तर पुव्वुत्तरा चेव ॥

वृ- प्रथमतो महास्थण्डिलप्रत्युपेक्षणविषया अपरदक्षिणा दिक्। अथ तस्यां नदी-क्षेत्रा-ऽऽरामादिव्याघातः ततो दक्षिणा। तस्या अभावे अपरा। तदलाभे दक्षिणपूर्वा। तदसत्त्वे अपरोत्तरा। तस्या अप्यप्राप्तौ पूर्वा। तस्या असम्भवे उत्तरा। उत्तरस्या अभावे पूर्वोत्तरा दिग् मन्तव्या ॥ अथासामेव गुण-दोषविचारणामाह-

[भा.१५०७] पउरन्न-पान पढमा, बीयाए भत्त-पान न लहंति।

तइयाइ उवहिमाई, चउत्थी सज्झाय न करिंति ॥

वृ- 'प्रथमा' अपरदक्षिणा दिक् प्रचुरान्न-पाना भवति, तस्यां प्रत्युपेक्ष्यमाणायां प्रचुरमन्न-पानं प्राप्यत इत्यर्थः। यदि तस्यां सत्यां 'द्वितीयां' दक्षिणां प्रत्युपेक्षन्ते ततो भक्त-पानं न लभन्ते। अथ

Jain Education International For Private & Personal Use Only www.jainelibrary.org

प्रथमायां कोऽपि व्याघातस्ततो द्वितीयामपि प्रत्युपेक्षमाणाः शुद्धाः। एवमुत्तरास्वपि दिक्षु भावनीयम्। तथा तृतीयस्यां "उवहिमाइ" त्ति उपधि-वस्त्र-पात्रादिकः स्तेनैरपह्रियते, तस्मिंश्चापहृते तृणग्रहणा-ऽग्निसेवनादयो दोषाः। चतुर्थ्यां 'स्वाध्यायं न कुर्वन्ति' कर्त्तव्यो न भवतीत्यर्थः ॥

[भा.१५०८] पंचमियाए असंखड, छट्ठीए गणस्स भेयणं जाण।
सत्तमिया गेलन्नं, मरणं पुण अट्ठमीए उ ॥

वृ-पञ्चम्याम् 'असङ्खडं' कलहः साधूनां भवति। षष्ठयां 'गणस्य' गच्छस्य 'भेदनं' द्वैधीभवनं जानीहि। सप्तमी 'ग्लान्यं' ग्लानत्वं साधूनां जनयति। अष्टम्यां पुनर्मरणमपरस्य साधोरुपजायते॥ अमुमेव गाथाद्वयोक्तमर्थमेकगाथया प्रतिपादयति-

[भा.१५०९] समाही य भत्त-पाने, उवगरणे तुमंतुमा य कलहो उ।
भेदो गेलन्नं वा, चरिमा पुन कड्ढए अन्नं ॥

वृ-प्रतमायां भक्त-पानलाभेन साधूनां समाधिराविर्भवति। द्वितीयायां भक्त-पानं न लभन्ते। तृतीयायामुपकरणमपह्रियते । चतुथ्यामेकः साधुरपरं भणति-त्वमेवमपराधं कृतवान्, अपरो ब्रूते-न मया अपराद्धं त्वमेवेदं विनाशितवानित्येवं तुमंतुमा भवति, तस्याः करणेन स्वाध्यायो न भवतीति भावः। पञ्चम्यां 'कलहः' मण्डनम्। षष्ठयां 'भेदः' गच्छस्य द्वैधीभावः। सप्तम्यां ग्लानत्वम्। 'चरमा' अष्टमी पुनरन्यं साधुं 'कर्षति' पञ्चत्वं प्रापयतीत्यर्थः ॥

[भा.१५१०] एक्केक्कम्मि उ ठाणे, चउरो मासा हवंतऽनुग्घाया।
आणाइणो अ दोसा, विराधना जा जहिं भणिया ॥

वृ- एकैकस्मिन् स्थाने यथोक्तक्रममन्तरेण दक्षिणादीनां दिशां प्रत्युपेक्षणे चत्वारो मासा अनुद्घाताः प्रायश्चित्तं भवन्ति, आज्ञादयश्च दोषाः, 'विराधना' भक्त-पानालाभोपधिहरणादिका या यत्र भणिता सा तत्र द्रष्टव्या ॥ एतेन विधिना यदा क्षेत्रं प्रत्युपेक्षितं भवति तदा किमपरं भवति? इत्याह-

[भा.१५११] पडिलेहियं च खेत्तं, अह य अहालंदियाण आगमनं।
नत्थि उवस्सयवालो, सव्वेहि वि होइ गंतव्वं ॥

वृ-एकतो गच्छवासिभि क्षेत्रं प्रत्युपेक्षितं भवति, अथात्रान्तरे यथालन्दिकानामागमनं भवति, ते हि सूत्रार्थपौरुष्यावहापयन्तस्तृतीयपौरुष्यां विहारं कुर्वन्तो गच्छवासिभि क्षेत्रे प्रत्युपेक्षिते समायान्ति, तेषां च नास्ति तत्र क्षेत्रे स्थापनयोग्य उपाश्रयपालः, जनद्वयस्यैवागमनादिति कृत्वा सर्वैरपि भवति गन्तव्यम् ॥ अथ ते यथालन्दिकाः कथं क्षेत्रं प्रत्युपेक्षन्ते? उच्यते-

[भा.१५१२] पुच्छिय रुइयं खेत्तं, गच्छे पडिबद्ध बाहि पेहिंति।
जं तेसिं पाउग्गं, खेत्तविभागे य पूरिंति ॥

वृ-ये गच्छप्रतिबद्धा यथालन्दिकास्तैर्गच्छवासिनः पृष्टाः-आर्या! अभिरुचितं क्षेत्रं न वा? इति। ततो गच्छवासिनः प्राहुः-अभिरुचितम्। ततो यथालन्दिका गच्छवासिप्रत्युपेक्षितस्य क्षेत्रस्य "बाहिं" ति सक्रोशयोजनाद् बहिः क्षेत्रं प्रत्युपेक्षन्ते। कथम्? इत्याह-यत् 'तेषां' यथालन्दिकानां 'प्रायोग्यं' कल्पनीयमलेपकृतं भक्त-पानं परिकर्मरहिता च वसतिस्तदेव गृह्णन्ति, 'क्षेत्रविभागाश्च'

Jain Education International For Private & Personal Use Only www.jainelibrary.org

षड्वीथीरूपास्तानपि पूरयन्ति ॥

[भा.१५१३] जं पि न वच्चंति दिसिं, तत्थ वि गच्छेल्लगा सिं पेहंति ।
पग्गहियएसणाए, विगई-लेवाडवज्जाइं ॥

वृ- यामपि दिशं यथालन्दिकान व्रजन्ति 'तत्रापि' तस्यामपि दिशि गच्छवासिनः क्षेत्रप्रत्युपेक्षकाः 'तेषां' यथालन्दिकानां योग्यं स्वप्रत्युपेक्षितक्षेत्रस्य सक्रोशयोजनाद् बहि क्षेत्रं प्रत्युपेक्षन्ते कथम्? इत्याह-प्रगृहीतया-साभिग्रहया तृतीयपौरुष्यामुपरितनैषणापञ्चकस्यान्यतरयैषणया विकृति-लेपकृतवर्जे भक्त-पाने गृह्णन्ति, घृतादिका विकृतीस्तक्र-तीमनादिकं द्राक्षापानादिकं च लेपकृतं वर्जयन्तीत्यर्थः ॥

[भा.१५१४] जइ तिन्नि सव्वगमणं, एहामु त्ति लहुओ य आणाई ।
परिकम्म कुड्डकरणं, नीहरणं कट्ठमाईणं ॥

वृ- यदि ते गच्छवासिनस्त्रयो जनास्ततः सर्वेषामपि गुरुसकाशे गमनम् । ते च गच्छन्तो यदि सागारिकेण पृच्छयन्ते 'किं यूयमागमिष्यथ न वा ?' ततो यदि 'एष्यामः' आगमिष्याम इति निर्वचनमर्पयन्ति ततो लघुको मासः आज्ञादयश्च दोषाः । शय्यातरश्चिन्तयति-'यदेते एष्याम इत्युक्त्वा प्रतिगतास्तद् नूनमागमिष्यन्ति' इति परिभाव्य 'परिकर्म' उपलेपनादिकं वसतेः कुर्यात्, कुड्यस्य वा जीर्णस्योपलक्षणत्वात् कपाटस्य वा करणं-संस्थापनं विदध्यात्, काष्ठानाम् आदिग्रहणात् तृणानां धान्यस्य वा 'नीर्हरणं' निष्काशनं कुर्यात् ॥ यद्वा तेषामाचार्याणामपरं किमपि क्षेत्रमभिरुचितं ततस्तत्रः गताः, तत्र च क्षेत्रेऽपरे साधवः सामायाताः ततः किम् ? इत्याह-

[भा.१५१५] अद्धाणनिग्गयाई, असिवाइ गिलाणओ अ जो जत्थ ।
नेहामो त्ति य लहुओ, तत्थ वि आणाइणो दोसा ॥

वृ- अध्वा-विप्रकृष्टे मार्गस्ततो निर्गताः-निष्क्रान्ता अशिवादिभिर्वा कारणैः प्रेरिताः परिश्रान्तास्ते साधवस्तत्रायाताः । तत्र चान्या वसतिर्नास्ति, सैव प्राचीनसाधुप्रत्युपेक्षिता वसतिस्तैर्याचिता । सागारिको ब्रूते-मयेयमन्येषां साधूनां दत्ताऽस्ति, तेऽप्येष्याम इति भणित्वा गताः सन्ति, अतो नाहं दातुमुत्सहे । एवं ते वसतिमलभमानाः श्वापद-स्तेन-कण्टकैः शीतेन वा प्रारभ्यमाणाः प्रतिगमनादीनि कुर्यु, ग्लानो वा यस्तेषां सह विहारं कार्यमाणो यत्र यत् परितापनादिकं प्राप्नोति तन्निष्पन्नं प्रायश्चित्तम् । यतश्चैवमतः 'एष्यामः' इति न वक्तव्यम् । 'न एष्यामः इत्यपि वदतां मासलघु, तत्राप्याज्ञादयो दोषाः ॥ अपरे चेमे-

[भा.१५१६] वक्कइअ विक्कएण व, फेडन धन्नाइछुभणभावासे ।
नीणिंते अहिकरणं, विराधना हाणि हिंडंते ॥

वृ- 'नागमिष्यन्ति साधवः' इति कृत्वा 'वक्रयिता' वक्रयेण-भाटकेन दत्ता सा वसति, विक्रयेण वा दत्ता विक्रीतेत्यर्थः; स्फेटनं वा वसतेः कृतम्, धान्यस्य आदिशब्दाद् भाण्डस्यान्यस्य वा उपकरणजातस्य क्षेपणं तस्यां कृतम्, बटुक-चारणादयो वा तत्र शय्यातरेणावासिताः, तेषां चाचार्याणां तदेव क्षेत्रमभिरुचितं ततस्तत्रैव समागताः । स प्राह-युष्माकं साधुभिरिति कथितं 'वयं नेष्यामः' ततो मयेयमन्येषां दत्ता धान्यादीनां वा भृता । ततो यथाभद्रकोऽसौ सागारिकस्तान् बटुकादीन् निष्काशयति, ततस्तेषु निष्काश्यमानेषु 'अधिकरणं' पृथिव्याद्युपमर्दशनम् । यच्च ते

Jain Education International For Private & Personal Use Only www.jainelibrary.org

प्रद्विष्टः पर्यटतां या संयमादिविराधना या च सूत्रार्थयोः परिहाणिस्तन्निष्पन्नमपि प्रायश्चित्तम्। तस्मान्न वक्तव्यं 'नेष्यामः' इति ॥ किं पुनस्तर्हि वक्तव्यम्? उच्यते-

[भा.१५१७] जह अम्हे तह अन्ने, गुरु-जेट्ठमहाजनस्स अम्हे मो।
पुव्वभणिया उ दोसा, परिहरिया कुड्डमाईया ॥

वृ- यथा वयमत्रागतास्तथा अन्येऽपि साधवस्तिसृषु दिक्षु गताः सन्ति ततो न जानीमः कीदृशं क्षेत्रं तैः प्रत्युपेक्षितमस्ति ?। अस्माकं तावदिदं क्षेत्रमभिरुचितम्, परं गुरवश्च-आचार्या ज्येष्ठमहाजनश्च-ज्येष्ठार्साधुसमुदायो गुरु-ज्येष्ठमहाजनं तस्य वयम् 'मो' इति पादपूरणे परतन्त्रावर्त्तामहे इतिवाक्यशेषः। ततस्तत्रगतानां गुरूणां ज्येष्ठार्याणां वा यद् विचारे समेष्यति तद् विधास्यामः। एवंब्रुवाणैः 'पूर्वभणिताः' कुड्यकरणादयो दोषाः परिहृताः॥ इत्थमुक्त्वा सागारिकमापृच्छ्य ते किं कुर्वन्ति? इत्याह-

[भा.१५१८] जइ पंच तिन्नि चत्तारि छसु सत्तसु य पंच अच्छंति।
चोयगपुच्छा सज्झायकरण वच्चंत-अच्छंते ॥

वृ- यदि ते पञ्च जनास्ततस्त्रयस्तत्रैवासते द्वौ गुरुसकासं गच्छतः। अथ षड् जनास्ततश्चत्वारस्तिष्ठन्ति द्वौ गुरूणामभ्यर्णे व्रजतः। अथ सप्त जनाः ततः पञ्च तत्रैवासते द्वौ गुरूणामुपकण्ठे गच्छतः। यदि च ऋजुः पन्थाः सव्याघातस्ततोऽपरं पन्थानं प्रत्युपेक्षन्ते। नोदकः पृच्छति- ये ते गुरुसकाशं व्रजन्ति ये च ते उपाश्रये आसते ते उभयेऽपि किं स्वाध्यायं कुर्वते वा न वा? ॥ उच्यते-

[भा.१५१९] वच्चंतकरण अच्चंतअकरणे लहुओ मासो गुरुओ उ।
जावइकालं गुरुणो, न इंति सव्वं अकरणाए ॥

वृ-ये ताव् व्रजन्ति ते यदि सूत्रपौरुषीं कुर्वन्ति ततो मासलघु, अर्थपौरुषीं कुर्वन्ति मासगुरु। ये तूपाश्रये तिष्ठन्ति तेषां सूत्रपौरुष्या अकरणे लघुको मासः, अर्थपौरुष्या अकरणे गरुको मासः। यावत्कालं गुरूणां समीपे 'नायान्ति' न प्राप्नुवन्ति तावत् "सव्वं अकरणाए"त्ति सर्व मपि-सूत्रमर्थं च न कुर्वन्ति॥ इदमेव सविशेषमाह-

[भा.१५२०] जइ वि अनंतर खेत्तं, गयाओ तह वि अगुनंतगा एंति।
निययाई मा गच्छे, इतरत्थ य सिज्जवाधाओ ॥

वृ- यद्यपि 'अनन्तरम्' अव्यवहितमेव क्षेत्रं गतास्तथापि 'अगुणयन्तः' सूत्रार्थाविकुर्वन्त आयान्ति। कुतः? इत्याह-नित्यवासादयो दोषा गच्छस्य मा भूवन्, 'इतरत्र च' प्रत्युपेक्षिते क्त्तेर चिरकालं विलम्ब्यागच्छतां शय्यायाः-उपाश्रयस्य व्याघातो मा भूत्॥

यत एवमतोऽगुणयन्तः समागम्य ते इदं कुर्वन्ति-

[भा.१५२१] ते पत्त गुरुसगासं, आलोएंती जहक्कमं सव्वे।
चिंता वीमंसा या, आयरियाणं समुप्पन्ना ॥

वृ- 'ते' क्षेत्रप्रत्युपेक्षकाः प्राप्ताः सन्तो गुरुसकाशमालोचयन्ति यथाक्रमं सर्वेऽपि क्षेत्रस्वरूपम्। ततस्तेषामालोचनां श्रुत्वा 'चिन्ता' 'कस्यां दिशि व्रजामः?' इत्येवंलक्षणा 'मीमांसा च' शिष्याभिप्रायविचारणा आचार्याणां समुत्पन्ना॥ अथैनामेव गाथां भावयति-

Jain Education International For Private & Personal Use Only www.jainelibrary.org

[भा.१५२२] गंतूण गुरुसगासं, आलोएत्ता कहिंति खेत्तगुणे।
न य सेसकहण मा होज्ज़ऽसंखडं रत्ति साहंति ॥

वृ- गत्वा गुरूणां सकाशमालोच्य गमनागमनातिचारं कथयन्ति क्षेत्रगुणान्। ते चाचार्यान् विमुच्य 'न च' नैव शेषाणां साधूनां कथयन्ति। कुतः ? इत्याह-मा भूद् असङ्खडं स्वस्वक्षेत्र-पक्षपातसमुत्थम्। यद्यन्येषां कथयन्ति तदा मासलघु। तस्माद् रात्रौ "साहंति"त्ति कथयन्ति॥ कथम् ? इति चेद् उच्यते-आचार्या आवश्यकं समाप्य मिलितेषु सर्वेष्वपि साधुषु पृच्छन्ति-आर्या! आलोचयत कीदृशानि क्षेत्राणि ?। तत उत्थाय गुरूनभिवन्द्य बद्धाञ्जलयो यथाज्येष्ठ-मालोचयन्ति-

[भा.१५२३] पढमाए नत्थि पढमा, तत्थ य घय-खीर-कूर-दधिमाई।
बिइयाए बीय तइयाए दो वि तेसिं च धुवं लंभो ॥

वृ- 'प्रथमायां' पूर्वस्यां दिशि यद् अस्माभि क्षेत्रं प्रत्युपेक्षितं त्र 'प्रथमा' सूत्रपौरुषी नास्ति, तस्यामेव भिक्षाटनवेलासम्भवात्, परं तत्र क्षेत्रे घृत-क्षीर-कूर-दध्यादीन प्रकामं प्राप्यन्ते। द्वितीयाः क्षेत्रप्रत्युपेक्षका ब्रुवते-द्वितीयस्यां दिशि 'द्वितीया' अर्थपौरुषी नास्ति, तस्यामेव भिक्षाटनवेलाभावात्, घृत-दुग्ध-दध्यादीनि तु तथैव लभ्यन्ते। तृतीया ब्रुवते-तृतीयस्यां दिशि 'द्वे अपि' सूत्रार्थपौरुष्यौ विद्येते, मध्याह्ने भिक्षालाभसद्भावात्, तेषां च घृत-दुग्धादीनां 'ध्रुवः' निश्चितो लाभ इति ॥ तथा-

[भा.१५२४] ओभासिय धुव लंभो, पाउग्गाणं चउत्थिए नियमा।
इहरा वि जहिच्छाए, तिकाल जोगं च सव्वेसिं ॥

वृ- चतुर्था पुनरित्थमाहुः-अस्मत्प्रत्युपेक्षितायां चतुर्थ्यां दिशि प्रायोग्याणामवभाषितानां 'ध्रुवः' अवश्यम्भावी लाभः। 'इतरथाऽपि' अवभाषणमन्तरेणापि 'यदृच्छया' प्रकामं 'त्रिकालं' पूर्वाह्ण-मध्याह्ना-ऽपराह्णलक्षणे कालत्रये 'सर्वेषामपि' बाल-वृद्धादीनां 'योग्यं' सामान्यं भक्त-पानं प्राप्यते॥ इत्थं सर्वैरपि स्वस्वक्षेत्रस्वरूपे निवेदिते सत्याचार्याश्चिन्त्यन्ति-कस्यां दिशि गन्तुं युज्यते ?। ततः स्वयमेवाद्यानां तिसृणां दिशां सूत्रार्थहान्यादिदोषजालं परिभाव्य चतुर्थीं दिशमनन्तरोक्त-दोषरहितत्वेन गन्तव्यतया विनिश्चित्य किं कुर्वन्ति ? इत्याह-

[भा.१५२५] इच्छागहणं गुरुणो, कत्थवयामो त्ति तत्थ ओअरिया।
खुहिया भणंति पढमं, तं चिय अनुओगतत्तिल्ला ॥

वृ- 'गुरोः' आचार्यस्य 'इच्छाग्रहणं' शिष्याणामभिप्रायपरीक्षणं भवति-आर्या! कथयत 'कुत्र' कस्यां दिशि व्रजामः ? इति। ततो ये 'औदरिकाः' स्वोदरभरणैकचित्तास्ते 'क्षुभिताः' सम्भ्रान्ताः सन्तो भणन्ति-प्रथमां दिशं व्रजामो यत्र प्रथमपौरुष्यामेव प्रकामं भोजनमवाप्यते। तामेव दिशं "अनुओगतत्तिल्ल" त्ति अनुयोगग्रहणैकनिष्ठाः शिष्या गन्तुमिच्छन्ति, येन द्वितीयपरुष्यां निर्व्याघातमर्थग्रहणं भवति ॥

[भा.१५२६] बिइयं सुत्तग्गाही, उभयग्गाही य तइयगं खेत्तं।
आयरिओ उ चउत्थं, सो उ पमाणं हवइ तत्थ ॥

वृ- ये तु सूत्रग्राहिणस्ते भणन्ति-द्वितीयां दिशं गच्छामः यत्र न सूत्रपौरुषीव्याघात इति। ये

Jain Education International For Private & Personal Use Only www.jainelibrary.org

तूभयग्राहिणस्ते 'तृतीयं' तृतीयदिग्वर्त्ति क्षेत्रमिच्छन्ति, तत्र हि द्वयोरप्याद्यपौरुष्यर्निर्व्याघातं सूत्रार्थग्रहणे भवतः। आचार्यास्तु चतुर्थं क्षेत्र गन्तुमिच्छन्ति, यतस्तत्र त्रिष्वपि कालेषु बालवृद्धाद्यर्थं सामान्यक्तं प्राघूरणकाद्यर्थं पुनरवभाषितं दुग्धादिकं प्रायोग्यं प्राप्यते, न च कोऽपि सूत्रार्थयोर्व्याघात इति। 'स एव च' आचार्य 'तत्र' तेषां मध्ये प्रमाणं भवति ॥ आह किं पुनः कारणं येनाचार्याश्चतुर्थक्षेत्रमिच्छन्ति ? इति अत आह-

[भा.१५२७] मोहुब्भवो उ बलिए, दुब्बलदेहो न साहए अत्थं।
तो मज्झबला साहू, दुड्डस्से होइ दिट्ठंतो ॥

वृ- प्रथम-द्वितीय-तृतीयेषु क्षेत्रेषु प्रचुरस्निग्ध-मधुराहारप्राप्तेः शरीरेण बलवान् भवति, बलवतश्चावश्यम्भावी मोहोद्भवः। एवं तर्हि यत्र भिक्षा न लभ्यते तत्रगत्वा बुभुक्षाक्षामकुक्षयस्तिष्ठन्तु, नैवम्, दुर्बलदेहः साधुर्न साधयति 'अर्थं' ज्ञान-दर्शन-चारित्ररूपम्। यत एवं ततः 'मध्यबलाः' नातिबवन्तो न वाऽतिदुर्बलाः साधव इप्यन्ते। दुष्टाश्वश्च भवत्यत्र दृष्टान्तः- 'दुष्टाश्वः' गर्दभः, स यथा प्रचुरभक्षणादुद्दर्पितः सन् उत्लुत्य कुमभकारारोपितानि भाण्डानि भिनत्ति, भूयस्तेनैव कुम्भकारेण निरुद्धाहारः सन् भाण्डानि वोढुं न शक्नोति; स एव च गर्दभो विमध्यमाहारक्रियया प्रतिचर्यमाणः सम्यग् भाण्डानि वहति। एवं साधवोऽपि यदि स्निग्धःमधुराभ्यवहारतः शरीरोपचयभाजो भवन्ति, तत उत्पन्नदुर्निवारमोहोद्रेकतया संयमयोगान् बलादुपमृद्नु(द्नी)युः, आहाराभावे त्वतिक्षामवपुषः सन्तः संयमयोगान् वोढुं न शक्नुयुः; मध्यमबलोपेतास्तु व्यपगतौत्सुक्या अनुद्विग्नपरिणामाः सुखेनैव संयमयोगान् वहन्तीति मत्वा क्षेत्रत्रयं परिहृत्याचार्याश्चतुर्थं क्षेत्रं व्रजन्ति ॥ किञ्च-

[भा.१५२८] पनपन्नगस्स हानी, आरेणं जेन तेन वा धरइ।
जइ तरुणा नीरोगा, वच्चंति चउत्थगं ताहे ॥

वृ- पञ्चपञ्चाशद्वार्षिकस्य विशिष्टाहारमन्तरेण 'हानि' बलपरिहाणिर्भवति। "आरेणं"ति पञ्चपञ्चाशतो वर्षेभ्य आराद् वर्त्तमानो येन वा तेन वा आहारेण 'ध्रियते' निर्वहति। ततो यदि तेसाधवस्तरुणास्तथा नीरोगास्ततश्चतुर्थमेव क्षेत्रं व्रजन्ति न शेषाणि ॥

[भा.१५२९] जइ पुन जुन्ना थेरा, रोगविमुक्का व असहुणो तरुणा ॥
ते अनुकूलं खेत्तं, पेसिंति न यावि खग्गूडे ॥

वृ- यदि पुनः 'जीर्णाः' पञ्चपञ्चाशद्वार्षिकादय इति भावः, के ते ? 'स्थविराः' वृद्धाः, तथा तरुणा अपि ये रोगेण-ज्वरादिना मुक्तमात्रा अत एव च 'असहिष्णवः' न यदपि तदप्याहारजातं परिणमयितुं समर्था 'तान्' एवंविधान् स्थविर-तरुणान् 'अनुकूलं' प्रायोग्यलाभसम्भवेन हितं 'क्षेत्रं' प्रथमक्षेत्रादिकं गीतार्थमेकं सहायं समर्प्य प्रेषयन्ति सूरयः, 'न चापि' नैव स्वग्गूडान्। इहालसाः स्निग्धःमधुराद्याहारलम्पटाः खग्गूडा उच्यन्ते ॥ आह कियता पुनः कालेन ते वृद्धादयः पुष्टिं गृह्णन्ति ? उच्यते-पञ्चभिर्दिवसैः। तथा च वैद्यकशास्त्रार्थसूचिकामेतदर्थविषयामेव गाथामाह-

[भा.१५३०] एग पनगऽद्धमासं, सट्ठी सुण-मनुय-गोण-हत्थीणं।
राइंदिएहि उ बलं, पनगं तो एक्क दो तिन्नि ॥

वृ- क्षीणशरीरस्य शुनः पोष्यमाणस्यैकेन रात्रिन्दिवेन बलमुपजायते। एवं मनुष्यस्य

Jain Education International For Private & Personal Use Only www.jainelibrary.org

रात्रिन्दिवपञ्चकेन, गो-बलीवरदस्यार्द्धमासेन, हस्तिनस्तु क्षीणवपुषः पुष्टिमारोप्यमाणस्य षष्ट्या दिवसैर्बलमुद्भवति । तत एते वृद्धादयः प्रथमक्षेत्रे पोष्यमाणाः पञ्चकमेकं रात्रिन्दिवानां व्यवस्थाप्यन्ते, ततश्चतुर्थक्षेत्रे नीयन्ते । अथ पञ्चकेनामी न बलं गृहीतवन्तः ततो द्वे पञ्चके, तथापि बलमगृह्णानास्त्रीणि पञ्चकानि व्यवस्थाप्य चतुर्थक्षेत्रे नेतव्याः ।। एवं ते चतुर्थक्षेत्रगमनं निर्णीय शय्यातरमापृच्छ्य क्षेत्रान्तरं सङ्क्रामन्ति तद्विषयं विधिमभिधित्सुराह-

[भा.१५३१] सागारिय आपुच्छण, पाहुडिया जह य वज्जिया होइ ।
के वच्चंते पुरओ, उ भिक्खुणो उदाहु आयरिया ।।

वृ- क्षेत्रान्तरं सङ्क्रामद्भिः सागारिकस्याऽऽप्रच्छनं कर्त्तव्यम् । यथा च 'प्राभृतिका' हरितच्छेदनाद्यधिकरणरूपा वर्जिता भवति तथा विधिना आप्रच्छनीयम् । तथा गच्छतां के पुरतो व्रजन्ति ? किं भिक्षवः ? उताहो आचार्या ? इति निर्वचनीयम् । एष द्वारगाथासमासार्थः ।। अथैनामेव विवरीषुराह-

[भा.१५३२] सागारिअनापुच्छण, लहुओ मासो उ होइ नायव्वो ।
आणाइणो य दोसा, विराधन इमेहि ठाणेहिं ।।

वृ-सागारिकमनापृच्छ्य यदि गच्छन्ति तदा लघुको मासः प्रायश्चित्तं भवति ज्ञातव्यः, आज्ञादयश्च दोषाः । विराधना चामीभि स्थानैः प्रवचनादेर्भवति ।। तान्येवाह-

[भा.१५३३] सागारिअपुच्छगमणम्मि बाहिरा मिच्छगमन कयनासी ।
अन्नस्स वि हिय-नट्ठे, तेनगसंका य जं चऽन्नं ।।

वृ- सागारिकमनापृच्छय यदि गच्छन्ति ततः सागारिकश्चिन्तयेत्-"बाहिरि"त्ति बाह्या लोकधर्मस्यामी भिक्षवः, यतः-

आपुच्छिऊण गम्मइ, कुलं च सीलं च माणिअं होइ ।
अभिजाओ त्ति अ भन्नइ, सो वि जणो माणिओ होइ ।।

एष लोकधर्म । तथा "मिच्छगमन"त्ति 'ये लोकधर्ममपि प्रत्यक्षदृष्टं नावबुध्यन्ते ते कथमतीन्द्रियमदृष्टं धर्ममवभोत्स्यन्ते ?' इति सागारिको मिथ्यात् गच्छेत् । तथा 'कृतनाशिनः' कृतघ्ना एते, एकरात्रमपि हि यस्य गेहे स्थीयते तमनापृच्छय गच्छतां भवत्यौचित्यपरिहाणि, किं पुनरमीषामियन्ति दिनानि मम गृहे स्थित्वा युक्तं मामनापृच्छय गन्तुम् ? इति । तथा 'अन्यस्य' प्रातिवेश्मिकस्य अपिशब्दात् सागारिकस्य वा हृते नष्टे वा कस्मिंश्चिद् वस्तुनि स्तेनकशङ्का भवेत्-यदमी साधवोऽनापृच्छ्य गतास्तद् नूनमेभिरेव स्तेनितं तद् द्रव्यमिति । "जं चऽन्नं"ति यच्च 'अन्यद्' वसतिव्यवच्छेदादि भवति तदपि द्रष्टव्यम् ।। तदेवाह

[भा.१५३४] वसहीए वोच्छेदो, अभिधारिंताण वा वि साहूणं ।
पव्वज्जाभिमुहाणं, तेनेहि व संकणा होज्जा ।।

वृ- 'विप्रलम्भितास्तावदमीभिरेकवारम्, अत ऊर्द्ध ये केचन संयता इति नाम उद्वहन्ते तेभ्यो वसतिं नप्रदास्यामि' इत्येवं वसतेर्व्यवच्छेदो भवेत् । तथा 'अभिधारयन्तो नाम' ये साधवस्तमाचार्यं मनसिकृत्योपसम्पदः प्रतिपत्त्यर्थं समायातास्ते सागारिकं प्रश्नयन्ति-आचार्या कस्मिन् क्षेत्रे विहृतवन्तः ?; सागारिकः प्राह-यः कथयित्वा व्रजति स ज्ञायते यथा अमुकत्र गत इति, ये तु

Jain Education International For Private & Personal Use Only www.jainelibrary.org

प्रथमत एव नापृच्छन्ति ते कथं ज्ञायन्ते ?; ततस्तेषामभिधारयतां साधूनाम् 'अहो ! लोकव्यवहारबहिर्मुखा अमी आचार्या, ततः को नामामीषामुपकण्ठे उपसम्पत्स्यते ?' इति विचिन्त्य स्वगच्छे गणान्तरे वा गमनं भवेदिति वाक्याध्याहारः। स चाचार्यस्तेषां श्रुतवाचनाप्रदानादिजन्याया निर्जराया अनाभागी भवति। प्रव्रज्याभिमुखानां वा "तेनेहि"त्ति स्तेनविषया शङ्का भवेत्। किमुक्तं भवति ?-केचिदगारिणः संसारप्रपञ्चविरक्तचेतसस्तदन्तिके प्रव्रज्यां लिपित्सवः सामायाताः सागारिकं पृच्छन्ति-क्व गता आचार्या स प्राह-वयं न जानीमः तत्स्वरूपमिति, ततस्तेषामगारिणां शङ्का समुपजायते, यथा-नूनं किमप्यस्यसागारिकस्य चोरयित्वा गतास्ते, अन्यथा किमर्थमेष परिस्फुटमाचार्याणां गमनवृत्तान्तं न निवेदयति ? इति। ततश्च ते प्रव्रज्यामप्रतिपद्यमाना यत् षन्नं जीवनिकायानां विराधनां कुर्वन्ति यच्च बोटिक-निह्नवादिषु व्रजन्ति अपरान् वा प्रव्रजतो विपरिणामयन्ति तन्निष्पन्नमाचार्याणां प्रायश्चित्तम्। यत एवमतः सागारिकमापृच्छय गन्तव्यम्॥ सा च पृच्छा द्विविधा-विधिपृच्छा अविधिपृच्छा च। तत्रिविधिपृच्छामभिधित्सुः प्रायश्चित्तं तावदाह-

[भा.१५३५] अविहीपुच्छणे लहु, तेसिं मासो उ दोस आणाई।
मिच्छत्त पुव्वभणियं, विराधन इमेहि ठाणेहिं॥

वृ- अविधिप्रच्छने 'तेषाम्' आचार्याणां लघुको मासः, दोषाश्चाज्ञादयः, तता मिथ्यात्वं 'पूर्वभणितं' प्रागुक्तमेव मन्तव्यम्। विराधना एभिः स्थानैर्भवति॥ तान्येवाह-

[भा.१५३६] सहसा दट्ठुं उग्गाहिएण सिज्जायरी उ रोविज्जा।
सागारियस्स संका, कलहे य सएज्झिखिंसणया॥

वृ- अविधिपृच्छा नाम वस्त्र-पात्राद्युपकरणं विहारार्थमुद्ग्राह्य पृच्छन्ति 'वयमिदानीं विहारं कुर्महे' ततः 'सहसा' अकस्माद् उद्ग्राहितेन उपकरणेन प्रस्थितान् दृष्ट्वा शय्यातरी रुदियात्। तद् दृष्ट्वा सागारिकस्य शङ्का भवेत्-मयि प्रवसति कदाचिदप्यस्या अक्षिणी अश्रुपातं न कुरुतः, अमीषु तु प्रस्थितेष्वित्थमश्रूणि मुञ्चतः, ततो भवितव्यं कारणेनेति। मिथ्यात्वं गच्छेत्, तद्व्याऽन्यद्रव्यव्यवच्छेदादयश्च दोषाः। तथा "सइज्झिय"त्तिप्रातिवेश्मिकी रुदन्तीं शय्यातरीं दृष्ट्वा पश्चात् कलहे समुत्पन्ने खिंसनां कुर्यात्-किमन्यद् भवदीयं दुश्चरीतमुद्गीर्यते येन तदानीमाचार्येषु विहारं कर्त्तुमुद्यतेषु भवत्यारुदितम्, किं वा स आचार्यस्ते पिता भवति येन रोदिषि ? इति॥ अतानागतमेव पृच्छन्ति 'वयममुकदिवसे गमिष्यामः' तत्राप्यमी दोषाः-

[भा.१५३७] हरियच्छेअण छप्पईअथिच्चणं किच्चणं च पुत्ताणं।
गमनं च अमुगदिवसे, संखडिकरणं विरूवं वा॥

वृ- तानि शय्यातरमानुषाणि 'अद्य साधवो गमिष्यन्ति' इति कृत्वा क्षेत्रादौ न गच्छन्ति। ततो यानि तत्र महान्ति तानि धर्मं शृणुयुः। चेटरूपाणि स्नुषाश्च पुरोहडादिषु हरितच्छेदनं यद्वा परस्परं षटपदिकानां "थेच्चणं" उपमर्दनं "किच्चणं" ति कर्त्तनं वा विदध्यु, पोतानि-वस्त्राणि तेषां प्रक्षालनं कुर्वीरन्। यद्वा 'अमुकदिवसे गमनं करिष्यामः' इत्युक्ते संयतार्थं सङ्खड्याः करणं भवेत्। तत्र यदि गृह्णन्ति तदाऽऽधाकर्मादयो दोषाः, अगृह्णतां तु प्रद्वेषगमनादयः। "विरूवं"ति 'विरूपम्' अनेकप्रकारं कुडयधवलनादिकमपरमप्यधिकरणं कुर्यु। यत एते दोषा अतोऽविधिपृच्छा

Jain Education International For Private & Personal Use Only www.jainelibrary.org

न विधेया ।। कः पुनः पृच्छायां विधि ? इत्याह-

[भा.१५३८] जत्तो पाए खेत्तं, गया उ पडिलेहगा ततो पाए ।
सागारियस्स भावं, तनुइंति गुरू इमेहिं तु ।।

वृ- 'यतः प्रगे' यतो दिनादारभ्य क्षेत्रप्रत्युपेक्षका गताः 'ततः प्रग' ततः प्रभृति सागारिकस्य 'भावं' प्रतिबन्धं 'तनूकुर्वन्ति' हानिं प्रापयन्ति 'गुरवः' आचार्या एभिर्वचनैः ।। तान्येवाह-

[भा.१५३९] उच्छू वोलिंति वइं, तुंबीओ जायपुत्तभंडाओ ।
वसहा जायत्थामा, गामा पव्वायचिक्खल्ला ।।

[भा.१५४०] अप्पोदगा य मग्गा, वसुहा वि य पक्कमट्टिया जाया ।
अन्नोक्कंता पंथा, विहरणकालो सुविहियाणं ।।

वृ- इह पूर्वं शरदादिर्विहारो भवतीत्युक्तम्, अत- शरत्कालमेवाङ्गीकृत्याभिधीयते-इक्षवः 'वोलयन्ति' व्यतिक्रामन्ति 'वृतिं' स्वपरिक्षेपरूपाम्, तुम्ब्यश्च 'जातपुत्रभाण्डाः' समुत्पन्नतुम्बकाः, तथा वृषभा जातस्थामानः, ग्रामाः प्रम्लानचिक्खल्लाः, अल्पोदकाश्च मार्गा, वसुधाऽपि च पक्वमृत्तिका जाता, अन्यैः-पथिकादिभिरुत्क्रान्ताः-क्षुन्नाः पन्थानः सम्प्रति वर्त्तन्ते, अतो विहरण-कालः सुविहितानाम् । एतद् गाथाद्वयं शय्यातरस्य शृण्वतोगुरवश्चङ्क्रमणं कुर्वन्तः पठन्ति । ततः शय्यातरो ब्रूयात्-भगवन्! किमिदानीं यूयं गमनोत्सुकाः ? । गुरवः प्राहुः-बाढम्, गन्तुकामा वयम्, प्रेषिताश्वास्माभि क्षेत्रान्तरं प्रत्युपेक्षितुं साधवः । इत्थमन्तराऽन्तरा प्रज्ञाप्यमानानां शय्यातरमानुषाणां व्यवच्छिद्यते स्नेहानुबन्धः ।। ततः-

[भा.१५४१] आवासगकयनियमा, कल्लं गच्छामु तो उ आयरिया ।
सपरजनं सागरियं, वाहेउं दिंति अनुसट्ठिं ।।

वृ-आवश्यकं-प्रतिक्रमणं तदेवावश्यमनुष्ठेत्वाद् नियमः स कृतो यैस्ते कृतावश्यकनियमाः । गाथायां प्राकृतत्वादावश्यकशब्दस्य पूर्वनिपातः । "कल्लं गच्छामु" त्ति "वर्त्तमानासन्ने वर्त्तमाना" इतिवचनात् 'कल्ये' प्रभाते गमिष्याम इति मत्वा तत आचार्या 'सपरिजनं' सकुटुम्बं सागारिकं व्याहृत्य ददति 'अनुशिष्टिं' धर्मकथां कुर्वन्तीत्यर्थः ।। ततः-

[भा.१५४२] पव्वज्ज सावओ वा, दंसणसड्ढो जहन्नओ वसहिं ।
जोगम्मि वट्टमाणे, अमुगं वेलं गमिस्सामो ।।

वृ-स शय्यातरो धर्मकथां श्रुत्वा कदाचित् प्रव्रज्यां प्रतिपद्यते । अथ प्रव्रज्यां प्रतिपत्तुमशक्तस्ततः 'श्रावको भवति' देशविरतिं प्रतिपद्यते । अथ तामप्यङ्गीकर्तुमक्षमस्ततः 'दर्शनश्राद्धः' अविरतसम्यग्दृष्टिर्भवति । अथ दर्शनमप्युररीकर्त्तुं नोत्सहते ततो जघन्यतोऽवश्यन्तया वसतिं साधूनां यथा ददाति तथा प्रज्ञाप्यते । भूयोऽपि धर्मकथां समाप्याचार्या ब्रुवते-योऽसौ योगोगमनायास्मान् प्रेरयति तस्मिन् वर्त्तमाने सति "अमुगं वेलं" ति सप्तम्यर्थे द्वितीया अमुकस्यां वेलायां गमिष्यामः । इत्थं विकालवेलायां कथयित्वा प्रत्युषसि व्रजन्ति ।। कथम् ? इत्याह-

[भा.१५४३] तदुभय सुत्तं पडिलेहणा य उग्गयमणुग्गए वा वि ।
पडिच्छाहिगरण तेने, नट्ठे खग्गूड संगारो ।।

वृ- 'तदुभयं' सूत्रपौरुषीमर्थपौरुषीं च कृत्वा व्रजन्ति । अथ दूरं क्षेत्रं गन्तव्यं ततः सूत्रपौरुषीं

Jain Education International For Private & Personal Use Only www.jainelibrary.org

कृत्वा । अथ दूरतरं ततः पादोनप्रहरे पात्रप्रत्युपेक्षणां कृत्वा । अथ दूरतमं तत उद्गतमात्रे सूर्ये । अथातिदवीयान् मार्गो गन्तव्यः गच्छश्च तृषादिभिराक्रान्त उत्सूरे न शक्नोति गन्तुं ततोऽनुद्गते सूर्ये प्रचलन्ति । "पडिच्छ" त्ति निशि निर्गता उपाश्रयाद् बहि परस्परं प्रतीक्षन्ते । अन्यथा ये पश्चान्निर्गच्छन्ति ते न जानन्ति 'केनापि मार्गेण गताः साधवः ?' ततो महता शब्देनाग्रेतनान् साधून् व्याहरेयुः, ततश्च 'अधिकरणम्' अप्काययन्त्रवाहन-वणिग्ग्रामान्तरगमनादि भवति । "तेने नट्ठे" त्ति ते पाश्चात्यसाधवोऽग्रेतनानां 'नष्टाः' स्फिटिताः सन्तः स्तेनकैरुपद्रूयेरन् अतः प्रतीक्षमीयम् । "खग्गूड" त्ति कश्चित् खग्गूडः-निद्रालुः उपलक्षणत्वात् कश्चिद्वा धर्मशर्द्धालुरिदं ब्रूते-'न कल्पते साधूनां रात्रौ विहर्तुम्' इति तस्य "संगारो" त्ति सङ्केतः क्रियते-त्वयाऽमुकत्रागन्तव्यमिति ।। अथास्या एव गाथायाः कानिचित् पदानि विवृणोति-

[भा.१५४४] पडिलेहंत च्चिय वेंटियाउ काउं कुणंति सज्झायं ।
चरिमा उग्गाहेउं, सोच्चा मज्झण्हि वच्चंति ।।

वृ- ते साधवः प्रभाते प्रत्युपेक्षमाणा एव वस्त्राणि विण्टिकाः कुर्वन्ति । ततो विण्टिकाः कृत्वा स्वाध्यायं कुर्वन्ति तावद् यावत् 'चरमा' पादोनपौरुषी । ततः पात्रकाणि प्रत्युपेक्षणापूर्वं 'उद्ग्राह्य' ग्रन्थिदानादिना सज्जीकृत्य ततोऽर्थं श्रुत्वा 'मध्याह्ने' प्रहरद्वयसमये व्रजन्ति ।। कथम् ? इत्याह-

[भा.१५४५] तिहि-करणम्मि पसत्थे, नक्खत्ते अहिवईण अनुकूले ।
घेत्तूण निंति वसभा, अक्खे सउणे परिक्खंता ।।

वृ- तिथिश्च-नन्दा-भद्रादिका करणं च-बव-बालवादिकं तिथि-करणं तस्मिन् उपलक्षणत्वाद् वार-योग-मुहूर्तादिषु प्रशस्तेषु नक्षत्रे च 'अधिपतीनाम्' आचार्याणामनुकूले वहमाने सति, किम्? इत्याह-'अक्षान्' गुरूणामुत्कृष्टोपधिरूपान् गृहीत्वा 'वृषभाः' गीतार्थसाधवः शकुनान् परीक्षमाणाः "निंति" निर्गच्छन्ति ।। आह किमर्थं प्रथममाचार्या न निर्गच्छन्ति ? उच्यते-

[भा.१५४६] वासस्स य आगमनं, अवसउणे पट्ठिया नियत्ता य ।
ओभावणा उ एवं, आयरिया मग्गओ तम्हा ।।

वृ- वर्षणं वर्ष-वृष्टिस्तस्यागमनं दृष्ट्वा अपशकुने वा दृष्टे वृषभाः प्रस्थिताः सन्तो निवृत्ता अपि न लोकापवादमासादयन्ति, सामान्यसाधुत्वात् । यदि पुनराचार्या वृष्टिमपशकुनान् वा विज्ञाय निवर्त्तन्ते तत एवमपभ्राजना भवति, यथा-यदेव ज्योतिषिकाणां विज्ञानं तदप्यमी आचार्याः न बुध्यन्ते अपरं किमवभोत्स्यन्ते ? । तस्मादाचार्या 'मार्गतः' पृष्ठतो निर्गच्छन्ति न पुनरग्रतः । अथपुरतो गच्छन्ति ततो मासलघु । एतेन "के वच्चंते पुरओ उ भिक्खुणो उदाहु आयरिय" त्ति पदं भावितम् ।। आह 'अपशकुने दृष्टे सति निवर्त्तन्ते' इत्युक्तं तत्र के शकुनाः ? के वा अपशकुनाः? इति अत्रोच्यते-

[भा.१५४७] मइल कुचेले अब्भंगियल्लए साण खुज्ज वडभे या ।
एए तु अप्पसत्था, हवंति खित्ताउ निंतस्स ।।

वृ- 'मलिनः' शरीरेण वस्त्रैर्वा मलीमसः 'कुचेलः' जीर्णवस्त्रपरिधानः 'अभ्यङ्गितः' स्नेहाभ्यक्तशरीरः श्वा वामपार्श्वाद् दक्षिणपार्श्वगामी 'कुब्जः' वक्रशरीरः 'वडभः' वामनः । 'एते' मलिनादयोऽप्रशस्ता भवन्ति क्षेत्रान्निर्गच्छतः ।। तथा-

Jain Education International For Private & Personal Use Only www.jainelibrary.org

[भा.१५४८] रत्तपड चरग तावस, रोगिय विगला य आउरा वेज्जा।
कासायवत्थ उद्धूलिया य जत्तं न साहंति ॥

वृ- 'रक्तपटाः' सौगताः, 'चरकाः' क(का)णादा धाटीवाहका वा, 'तापसाः' सरजस्काः, 'रोगिणः' कुष्ठादिरोगाक्रान्ताः, 'विकलाः' पाणि-पादाद्यवयवव्यङ्गिताः, 'आतुराः' विविधदुःखोपद्रुताः, 'वैद्याः' प्रसिद्धाः, 'काषायवस्त्राः' कष्यावस्त्रपरिधानाः, 'उद्धूलिताः' भस्मोद्धूलितगात्रा धूलीधूसरा वा। एते क्षेत्रान्निर्गच्छद्भिर्दृष्टाः सन्तो यात्रा-गमनं तत्प्रवर्त्तकं कार्यमप्युपचाराद् यात्रा तां न साधयन्ति ॥ उक्ता अपशकुनाः। अथ शकुनानाह-

[भा.१५४९] नंदीतूरं पुन्नस्स दंसनं संख-पडहसद्दो य।
भिंगार-छत्त-चामर-वाहण-जाणा पसत्थाइं ॥

वृ- 'नन्दीतूर्यं' द्वादशविधतूर्यसमुदायो युगपद् वाद्यमानः, 'पूर्णस्य' पूर्णकलशस्य दर्शनम्, शङ्ख-पटहयोः शब्दश्च श्रूयमाणः, भृङ्गार-च्छत्र-चामराणि प्रतीतानि, 'वाहन-यानानि' वाहनानि-हस्ति-तुरङ्गमादीनि यानानि-शिबिकादीनि, एतानि 'प्रशस्तानि' शुभावहानि ॥

[भा.१५५०] समणं संजयं दंतं, सुमनं मोयगा दधिं।
मीणं घंटं पडागं च, सिद्धमत्थं वियागरे ॥

वृ- 'श्रमणं' लिङ्गमात्रधारिणम्, 'संयतं' षट्कायरक्षणे सम्यग्यतम्, 'दान्तम्' इन्द्रिय-नोइन्द्रियदमनेन, 'सुमनसः' पुष्पाणि, मोदका दधि च प्रतीतम्, 'मीनं' मत्स्यम्, घण्टां पताकां च दृष्ट्वा श्रुत्वा वा 'सिद्धं' निष्पन्नम् 'अर्थं' प्रयोजनं व्यागृणीयादिति ॥

अथ प्रशस्तेषु शकुनेषु सञ्जातेषु गुरवः किं कुर्वन्ति ? इत्याह-

[भा.१५५१] सिज्जायरेऽनुसासइ, आयरिओ सेसगा चिलिमिलिं तु।
काउं गिण्हंतुवहिं, सारवियपडिस्सया पुव्विं ॥

वृ-शय्यातराननुशास्ते आचार्य, यथा-व्रजामो वयम्, भवद्भिर्धर्मकर्मण्यप्रमत्तैर्भवितव्यमिति। शेषास्तु साधवः चिलिमिलीं 'कृत्वा' बद्धवा तदन्तरिताः सन्त उपधिं 'गृह्णन्ति' संयन्त्रयन्तीत्यर्थः, कथम्भूताः ? सारविताः-सम्मार्जितः प्रतिश्रयो यैस्ते सारवितप्रतिश्रयाः 'पूर्वं' प्रथमम् ॥

अथ कः कियदुपकरणं गृह्णाति ? इत्युच्यते-

[भा.१५५२] बालाईया उवहिं, जं वोढु वरंति तत्तियं गिण्हे।
जहन्नेण अहाजायं, सेसं तरुणा विरिंचंति ॥

वृ- बाल-वृद्ध-राजप्रव्रजितादयो यावन्मात्रमुपधिं वोढुं शक्नुवन्ति तावन्मात्रमेव गृह्णन्ति। यदि च सर्वथैव न शक्नुवन्ति तदा 'जघन्येन' सर्वस्तोकतया यथाजातमुपधिं गृह्णन्ति। 'शेषं' बालादिसत्कमुपकरणं तरुणाः साधवः 'विरिञ्चन्ति' विभज्य गृह्णन्ति ॥ तत्र च यदि 'आभिग्रहिकाः' 'बाल-वृद्धादीनामुपधिरस्माभिर्वोढव्यः' इत्येवं प्रतिपन्नाभिग्रहाः सन्ति ततस्ते परस्परं विभज्य गृह्णन्ति। अथ न सन्त्याभिग्रहिकास्ततः को विधि ? इत्याह-

[भा.१५५३] आयरिओवहि बालाइयाण गिण्हंति संघयणजुत्ता।
दो सोत्ति उन्नि संथारए य गहणेक्क पासेणं ॥

वृ- आचार्योपधिं बालादीनां चोपधिं गृह्णन्ति 'संहननयुक्ताः' अनाभिग्रहिका अपि सन्तो ये

Jain Education International For Private & Personal Use Only www.jainelibrary.org

समर्थसाधवः । कथम् ? इत्याह-द्वौ सौत्रिकौ कल्पौ एक और्णिकः कल्पः संस्तारकः चश्चादुत्तरपट्टकश्च । एतेषामाचार्यादिसम्बन्धिनां "गहणेक्कपासेणं" ति सप्तम्यर्थे तृतीया 'एकस्मिन् पार्श्वे' एकत्र स्कन्धे ग्रहणं कुर्वन्ति । द्वितीये तु पार्श्वे आत्मीयमुपधिं स्थापयन्ति ॥ अथ "खग्गूड" त्ति पदं विवृणोति-

[भा.१५५४] रत्तिं न चे कप्पइ, नीयदुवारे विराहणा दुविहा ।
पन्नवण बहुतर गुणा, अणिच्छ बीओ व उवही वा ॥

वृ- कश्चिद् धर्मश्रद्धालुतया खग्गूडतया वा प्राह-रात्रौ न चैव कल्पते विहर्तुम्, यतः "नीयदुवारं तमसं, कोट्ठगं परिवज्जए ।" त्ति वचनाद् दिवाऽपि तावद् नीचद्वारे कोष्ठके प्राणिनां कण्टकादीनां चानुपलभ्यमानतया 'द्विविधा' संयमा-ऽऽत्मविराधना भवति इति कृत्वा प्रवेष्टुं न कल्पते, किं पुना रात्रौ विहर्त्तुं कल्पिष्यते ? । इत्थं ब्रुवाणस्य तस्य प्रज्ञापना कर्त्तव्या, यथा-वत्स ! दूरतमक्षेत्रस्य गन्तव्यतया बहुतरा गुणाः सबाल-वृद्धस्य गच्छस्य साम्प्रतं रात्रौ गमने भवन्ति । इत्थमपि प्रज्ञापितोयदि नेच्छति ततोऽस्य 'द्वितीयः' सहायो दीयते उपधिर्वा तस्य जीर्ण उपहतश्च समर्प्यते, मा सारतरस्तदीयोपधि स्तेनैर्गृह्येत मा वा रात्रौ सुप्तस्योपहन्येतेति ॥ तदेवमुक्तविधिना ततः क्षेत्राद् निर्गत्य सूत्रोक्तनीत्या गच्छन्ति । ग्रामं च प्राप्तानां क्षेत्रप्रत्युपेक्षका यत्र पूर्वं वसतिं प्रत्युपेक्षिता आसीत् तत्र प्रथमं स्वयं गत्वा वसतिं निरूप्य ततो गच्छं तत्र प्रवेशयन्ति । तत्र रात्रावुषित्वा प्रभाते ग्रामान्तरं गच्छन्ति । एवं च-

[भा.१५५५] वच्चंतेहि य दिट्ठो, गामो रमणिज्जभिक्ख-सज्झाओ ।
जं कालमणुन्नाओ, अननुन्नाए भवे लहुओ ॥

वृ- व्रजद्भिस्तैः साधुभिः कश्चिद् ग्रामो दृष्टः, कथम्भूतः ? रमणीयं-सुखप्राप्यत्वेन मनोज्ञभक्तपानलाभेन च भैक्षं अत एव रमणीयः स्वाध्यायश्च यत्र स रमणीयभैक्ष-स्वाध्यायः । एवंविधो ग्रामः 'यं' यावन्तं 'कालम्' एकदिवसलक्षणं स्थातव्यत्वेनानुज्ञातः तावन्तं कालं वसन्तो न प्रायश्चित्तभाजो भवन्ति । 'अननुज्ञाते' द्वितीयादिषु दिवसेषु वसतां लघुको मासो भवेत् ॥ अथवा-

[भा.१५५६] तवसोसिय उव्वाया, खुल लुक्खाहारदुब्बला वा वि ।
एग दुग तिन्नि दिवसे, वयंति अप्पाइया वसिउं ॥

वृ- तपसा-षष्ठा-ऽष्टमादिना ये शोषिता ये वा उद्वाताः-अतीवपरिश्रान्ताः ये च "खुल" त्ति कर्कशक्षेत्रादायाताः ये वा रूक्षाहारभोजित्वाद् दुर्बलाः, एते एकं वा द्वौ वा त्रीन् वा दिवसान् तस्मिन् ग्रामे 'उषित्वा' स्थित्वा 'आप्यायिताः' मनोज्ञाहारैः स्वस्थीभूताः अपरं ग्रामं व्रजति ॥ इदमेव भावयति-

[भा.१५५७] पढमदिने समणुन्ना, सोहीवुड्ढी अकारणे परतो ।
तिन्नि व (वि) समणुन्नाया, तओ परेमं भवे सोही ॥

वृ- प्रथमदिने तत्र ग्रामे वसतां समनुज्ञा, प्रथमो दिवसस्तत्रानुज्ञात इति भावः । ततः 'परतः' द्वितीयादिदिवसेष्वकारणे वसतां शोधि-प्रायश्चित्तं तस्या वृद्धिर्भवति । सा चानन्तरगाथायां वक्ष्यते । अथ तपःशोषितत्वादिकमनन्तरगाथोक्तं कारणं वर्त्तते तत्र त्रीण्यपि दिनानि समनुज्ञातानि ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

'ततः' दिवसत्रयात् परतः 'शोधि' प्रायश्चित्तं भवेत् ॥ तामेवाह-

[भा.१५५८] सत्तरत्तं तवो होइ, तओ छेओ पहावई।
छेएणऽच्छिन्नपरियाए, तओ मूलं तओ दुगं ॥

वृ- सप्तरात्रं यावत् तपो भवति। 'ततः' सप्तरात्रानन्तरं छेदः प्रधावति। छेदेनाप्यच्छिन्नपर्याये साधौ ततो मूलम्। ततः 'द्विकम्' अनवस्थाप्य-पाराञ्चिकद्वयम् ॥ इदमेव व्याख्यानयति-

[भा.१५५९] मासो लहुओ गुरुओ, चउरो लहुया य होंति गुरुगा य।
छम्मासा लहु गुरुगा, छेओ मूलं तह दुगं च ॥

वृ- इह प्रथमदिवसे वसन्तोऽनुज्ञाता एव, "पढमदिने समणुन्न" त्ति वचनात्। द्वितीये दिवसे यदि मनोज्ञाहारलम्पटतया तत्र ग्रामे वसन्ति तदा लघुको मासः, तृतीये गुरुकाः चतुर्थे चत्वारो लघवः, पञ्चमे चतुर्गुरवः, षष्ठे षण्मासा लघवः, सप्तमे षण्मासा गुरवः, ततः सप्तरात्रानन्तरमष्टमे दिवसे च्छेदः, नवमे मूलम्, दशमेऽनवस्थाप्यम्, एकादशे पाराञ्चिकमिति। अथ तपःशोषित-शरीरादयस्ते ततस्त्रीणि दिवसानि वसन्तः प्रायश्चित्तं नापद्यन्ते, "तिन्नि व (वि) समणुन्नाय" त्ति वचनात्। चतुर्थे दिवसे वसतां लघुमासः, पञ्चमे गुरुमासः, षष्ठे चतुर्लघवः, सप्तमे चतुर्गुरवः, अष्टमे षड्लघवः, नवमे षड्गुरवः, दशमे च्छेदः, एकादशे मूलम्, द्वादशेऽनवस्थाप्यम्, त्रयोदशे पाराञ्चिकमिति विशेषचूर्ण्यभिप्रायः। बृहद्भाष्ये पुनरित्थमुक्तम्-

एक्केक्क सत्तवारा, मासाईयं तवं तु दाऊण।
छेओ वि सत्तसत्तओ, तिन्नि गमा तस्स पुव्वुत्ता ॥

'पूर्वं' पीठिकायां 'तस्य' च्छेदस्य ये त्रयो गमा उक्तास्तेऽत्रापि द्रष्टव्याः। तत्र यतः स्थानात् तपः प्रारब्धं तत आरभ्य च्छेदोऽपि दीयते, लघुमासादारभ्येत्यर्थः इत्येको गमः। लघुपञ्चकादारभ्येति द्वितीयः। गुरुपञ्चकादारभ्येति तृतीयः ॥ इदं सामान्यतः प्रायश्चित्तम्। अथ विशेषत आह-

[भा.१५६०] अणणुन्नाए निक्कारणे व गुरुमाइणं चउण्हं पि।
गुरुगा लहुगा गुरुगो, लहुओ मासो य अच्छंते ॥

वृ- अननुज्ञाते दिवसत्रयादूर्ध्वं 'निष्कारणे वा' कारणं विना प्रथमदिवसादूर्द्ध गुर्वादीनां चतुर्णामपि तिष्ठतां यथाक्रमं गुरुका लघुका गुरुको लघुकश्च मासः। इयमत्र भावना-आचार्यस्यान-नुज्ञाते निष्कारणे वा तिष्ठतश्चत्वारो गुरवः, वृषभस्य चत्वारो लघवः, अभिषेकस्य गुरुमासः, भिक्षोर्लघुमासः ॥ आह किंनिमित्तमित्थं प्रायश्चितमापद्यते? उच्यते-

[भा.१५६१] नेहामु त्ति य दोसा, जे पुव्वं वन्निया कइयमादी।
ते चेव अणट्ठाए, अच्छंते कारणे जयणा ॥

वृ- 'नैष्यामः' नागमिष्याम इत्युक्ते ये पूर्वं 'क्रयितादयः' वसतेर्भाटकसमर्पण-विक्रयणादयो दोषा वर्णितास्ते चैव अर्थ-प्रयोजनं तदभावोऽनर्थं तेन प्रयोजनमन्तरेणेत्यर्थः, तत्र ग्रामे तिष्ठतां दोषाः। किमुक्तं भवति?- तत्र ग्रामे रसगौरवबहुलतया तेषां तिष्ठतां कालविलम्बलगनात् चिकीर्षितमासकल्पे क्षेत्रे वसतिं शय्यातरो भाटकेन समर्पयेत् विक्रीणीत वा धान्यादिना वा म्रियेत बटुकादीनां वा दद्यात् ततस्त एवात्मविराधनादयो दोषाः। कारणे तु तिष्ठतां यतना, एकं द्वौ त्रीन् वा दिवसान् स्थित्वा तथा गन्तव्यं यथा विलम्बमन्तरेण तत् क्षेत्रं प्राप्यत इति भावः।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

एवमेतेन विधिना व्रजन्तस्तावद् गता यावद् मूलक्षेत्रम् ॥ ततः किम् ? इत्याह-

[भा.१५६२] भत्तट्ठिया व खमगा, पुव्विं पविसंतु ताव गीयत्था।
परिपुच्छिय निद्दोसे, पविसंति गुरू गुणसमिद्धा ॥

वृ- ते हि भक्तार्थिनः क्षपका वा सन्तस्तत्र क्षेत्रे प्रविशन्ति। 'भक्तार्थिनः' भोक्तुकामाः, 'क्षपकाः' उपोषिताः। तत्र च पूर्वं तावद् गीतार्था प्रविशन्ति। ततस्तैः गीतार्थै 'परिपृच्छय' शय्यातरं पृष्ट्वा निर्दोषे उपाश्रये सुनिश्चिते सति प्रविशन्ति गुरवो गुणसमृद्धाः। साभिप्रायकमिदं विशेषणम्। ते हि भगवन्तो गुरवो गुणैः समृद्धाः, अतो यदि प्रथमं प्रविश्य सव्याघातां वसतिं मत्वा प्रतिनिवर्त्तन्ते ततो भवति महानवर्णवादः, यथा-एतेषामेतदपि ज्ञानं नास्तीति, ततः पश्चात् प्रविशन्ति ॥ अथैनामेव गाथां विवरीषुराह-

[भा.१५६३] बाहिरगामे वुच्छा, उज्जाने ठाण वसहिपडिलेहा।
इहरा उ गहियभंडा, वसहीवाघाय उड्डाहो ॥

वृ- प्रत्यासन्ने बाह्यग्रामे उषिताः प्रत्युषसि विवक्षितक्षेत्रस्योद्यानभागम्य तत्र स्थानं कुर्वन्ति। यैः क्षेत्रं प्रत्युपेक्षतं ते वसतिप्रत्युपेक्षणार्थं प्रेष्यन्ते। 'इतरथा' यदि वसतिमप्रत्युपेक्ष्य प्रविशन्ति ततो मासलघु। सा वसतिरन्येषां प्रदत्ता भवेत् ततः 'गृहीतभाण्डाः' गृहीतोपकरमा वसतिव्याघाते सत्यपरां वसतिमन्वेषयन्त इतस्ततः पर्यटन्ति, तथाभूताँश्च दृष्ट्वा उड्डाहो भवेत्, यथा-अहो ! निष्परिग्रहा निर्ग्रन्था इति ॥ ततः किं विधेयम् ? इत्याह-

[भा.१५६४] तम्हा पडिलेहिय साहियम्मि पुव्वगत असति सारविए।
फड्डगफड्ड पवेसो, कहणा न य उट्ठऽनायरिए ॥

वृ- तस्मात् चिलिमिली-दण्डकप्रोञ्छने गृहीत्वा वसतिं प्रत्युपेक्ष्य यदि सा नान्येषां प्रदत्ता तदा "साहियम्मि"त्ति शय्यातरस्य 'आचार्या आगताः सन्ति' इति कथिते सति यदि 'पूर्वगताः' पूर्वस्थिताः क्षेत्रप्रत्युपेक्षकास्तत्र सन्ति तदा तैः प्रागेव वसति प्रमार्जितैव। अथ न सन्ति ततः स्वयमेव "सारविए"त्ति सम्मार्जिते प्रतिश्रये द्वारे च चिलिमिलीं बद्ध्वा धर्मकथिनमेकं मुक्त्वा व्यावृत्य गुरूणां निवेदयन्ति। ततो वृषभास्तथैवाक्षान् गृहीत्वा शकुनान् परीक्षमाणाः प्रविशन्ति। तैश्च प्रविष्टैः शेषाः साधवः स्पर्द्धकस्पर्द्धकैः प्रविशन्ति, न पुनः सर्वे एकत्र पिण्डीभूयेति भावः। यश्च तत्र धर्मकथिकः स्थित आस्ते स सागारिकस्य धर्मकथां करोति। स च "अनायरिय" त्ति आचार्यं मुक्त्वा शेषसाधूनां ज्येष्ठार्याणामप्यभ्युत्थानं न करोति 'मा भूद् धर्मकथाया व्याघातः' इति ॥ अथ वृषभाणां प्रविशतां शकुना-ऽपशकुनविभागनिरूपणायाह-

[भा.१५६५] मइल कुचेले अब्भंगियल्लए साण खुज्ज वडभे या।
एयाइँ अप्पसत्थाइँ होंति गामं अइंताणं ॥

[भा.१५६६] रत्तपड चरग तावस, रोगिय विगला य आउरावेज्जा।
कासायवत्थ उद्धूलिया य कज्जं न साहिंति ॥

[भा.१५६७] नंदीतूरं पुन्नस्स दंसणं संख-पडहसद्दो य।
भिंगार-छत्त-चामर-वाहण-जाणा पसत्थाइं ॥

[भा.१५६८] समणं संजयं दंतं, सुमनं मोयगा दधिं।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

मीणं घंटं पडागं च, सिद्धमत्थं वियागरे ॥

वृ- चतस्रोऽपि गाथाः प्राग्वत् (गाथा) । नवरं श्वा दक्षिणपार्श्वाद् वामपार्श्वगामी गृह्यते ॥ इत्थं वृषभेषु प्रशस्तैः शकुनैः प्रविष्टेषु सूरयः क्षेत्रं प्रविश्य किं कुर्वन्ति ? इत्याह-

[भा.१५६९] पविसंते आयरिए, सागरिओ होइ पुव्व दट्ठव्वो ।
अदट्ठूण पविट्ठो, आवज्जइ मासियं लहुयं ॥

वृ- "पविसंते आयरिए" त्ति तृतीयार्थे सप्तमी, वसतिं प्रचिशता आचार्येण सागारिकः पूर्वमेव द्रष्टव्यो भवति । अथ सागारिकमदृष्टैव प्रविष्ट आचार्य तत आपाद्यते मासिकं लघुकम् ॥

अथाचार्यमायान्तं दृष्ट्वा धर्मकथी किं करोति ? इत्याह-

[भा.१५७०] आयरियअनुट्ठाणे, ओभावण बाहिरा अदक्खिन्ना ।
कहणं तु वंदणिज्जा, अनालवंते वि आलावो ॥

वृ- धर्मकथिना आचार्याणामभ्युत्थानं कर्त्तव्यम् । यदि न करोति तदा 'अपभावना' लाघवमाचार्याणां भवति-नूनं नामधारक एवायमाचार्य, नास्य किमप्याज्ञैश्वर्यं विद्यते । यद्वा लोकव्यवहारस्य बाह्या अमी, यतः पञ्चानामप्यङ्गुलीनां तावदेका ज्येष्ठा भवति । तथा 'अदाक्षिण्याः' 'गुरूनपि प्रति एतेषां दाक्षिण्यं नास्ति' इति शय्यातरश्चिन्तयति । "कहणं तु" त्ति शय्यातरस्य धर्मकथिना कथनीयम्, यथा-वन्दनीया एते भगवन्त इति । ततो गुरुभिरनालपतोऽपि शय्यातरस्यालापः कर्त्तव्यः ॥ अथ न कुर्वन्त्यालपनमाचार्यास्तत एते दोषाः-

[भा.१५७१] थद्धा निरोवयारा, अग्गहणं लोकजत्त वोच्छेदो ।
तम्हा खलु आलवणं, सयमेव य तत्थ धम्मकहा ॥

वृ- शय्यातरश्चिन्तयेत्-अहो ! 'स्तब्धाः' आत्माभिमानिन एते, वचसाऽपि नान्यस्य गौरवं प्रयच्छन्ति । 'निरुपकाराः' कृतमप्युपकार न बहुमन्यनते, कृतघ्ना इत्यर्थः । 'अग्रहणम्' अनादरो मां प्रत्यमीषाम् । लोयात्रामप्येते न जानन्ति, लोके हि यो यस्याश्रयदानादिनोपकारी स ततः स्निग्धदृष्ट्यवलोकन-मधुरसम्भाषमादिकां महतीं प्रतिपत्तिमर्हतीति । इत्थं कषायितस्तद्द्रव्य-स्यान्यद्रव्याणां वा व्यवच्छेदं कुर्यात् । यत् एवं तस्मात् स्वल्वालपनमाचार्येण कर्त्तव्यम्, स्वयमेव च तत्राचार्येण धर्मकथा कार्या ॥ कथम् ? इत्याह-

[भा.१५७२] वसहिफलं धम्मकहा, कहणमलद्धीओ सीस वावारे ।
पच्छा अइंति वसहिं, तत्थ य भुज्जो इमा मेरा ॥

वृ- धर्मकथां कुर्वन्तः सूरयो वसतिफलं कथयन्ति । यथा-

रयणगिरिसिहरसरिसे, जंबूणयपवरवेइआकलिए ।
मुत्ताजालगपयरग-खिंखिणिवरसोभितविडंगे ॥
वेरुलिय-वयर-विद्दुमखंभसहस्सोवसोभिअमुदारे ।
साहूण वसहिदाणा, लभती एयारिसे भवणे ॥

अथाचार्याणां धर्मकथने लब्धिर्न भवति तदा शिष्यं धर्मकथालब्धिसम्पन्नं व्यापारयेयुः । ततः पश्चादाचार्या प्रविशन्ति वसतिम् । तत्र च प्रविष्ठनां 'भूयः' पुनरियं 'मर्यादा' सामाचारी ॥

तामेवाभिधित्सुराह-

Jain Education International For Private & Personal Use Only www.jainelibrary.org

[भा.१५७३] मज्जाया-ठवणाणं, पवत्तगा तत्थ होंति आयरिया ।
जो उ अमज्जाइल्लो, आवज्जइ मासियं लहुयं ।।

वृ- मर्यादा च-सामाचारी स्थापना च दानादिकुलानां तयोः प्रवर्त्तकास्तत्र क्षेत्रे आचार्या भवन्ति। यश्च साधुः 'अमर्यादावान्' मर्यादामाचार्यैः स्थापितां न पालयति स आपद्यते मासिकं लघुकम् ।। मर्यादामेवाह-

[भा.१५७४] पडिलेहण संथारग, आयरिए तिन्नि सेस एक्केक्कं ।
विंटियउक्खेवणया, पविसइ ताहे य धम्मकही ।।

[भा.१५७५] उच्चारे पासवणे, लाउअनिल्लेवणे अ अच्छणए ।
करणं तु अनुन्नाए, अननुन्नाए भवे लहुओ ।।

वृ- संस्तारकभूमीनां 'प्रत्युपेक्षणाम्' अवलोकनां कुर्वते । तत्राचार्यस्य तिः संस्तारकभूमयो निरूपणीयाः, तद्यथा-एका निवाता अपरा प्रवाता तृतीया निवातप्रवाता । शेषाणां साधूनामेकैकां संस्तारकभूमिं यथारत्नाधिकतया अर्पयन्ति न यथाकथञ्चिदिति । तैश्च तदानीमात्मीयात्मीय विण्टिकानामुत्क्षेपणं कर्त्तव्यम्, येन तासूत्क्षिप्तासु भूमिभागः प्रतिनियतपरिमाणच्छेदेनावगम्यते। तदा च धर्मकथी संस्तारकग्रहणार्थं धर्मकथामुपसंहृत्य प्रतिश्रयाभ्यन्तरे प्रविशति । तथा क्षेत्रप्रत्युपेक्षकाः शय्यातरानुज्ञातां भुवं ग्लानाद्यर्थं दर्शयन्ति । तथा-इयति प्रदेश् उच्चारपरिष्ठापनमनुज्ञातम् नेत ऊर्द्ध्वम्, एवं ''पासवणे''त्तिप्रश्रवणभूमिं ''लाउए''त्ति अलाबूनि-तुम्बकानि तेषां कल्पकरणप्रायोग्यं प्रदेशं 'निर्लेपनं' पुतप्रक्षालनं तस्य स्थानं ''अच्छणए''त्ति यत्र स्वाध्यायं कुर्वद्भिरास्यते, एतानि तथैव दर्शयन्ति । ततो य एव शय्यातरेणानुज्ञातोऽ-वकाशस्तत्रैवोच्चारादीनां करणं भगवद्भिरादिष्टम् । अननुज्ञाते त्ववकाशे कुर्वतो मासलघु, तद्व्या-ऽन्यद्रव्यव्यवच्छेदादयश्च दोषाः ।।उक्ता मर्यादा । अथ स्थापनामभिधित्सुः प्रस्तावनामाह-

[भा.१५७६] भत्तट्ठिया व खमगा, अमंगलं चोयणा जिनाहरणं ।
जइ खमगा वंदंता, दाइंतियरे विहिं वोच्छं ।।

वृ- ते हि साधवः क्षेत्रं प्रविशन्तो भक्तार्थिनो वा भवेयुः क्षपका वा । यदि क्षपकाः ततो नोदकस्य 'नोदना' प्रेरा, यथा-प्रथममेव तावदमङ्गलमिदं यदुपवासं प्रत्याख्याय प्रविश्यते। सूरिराह-'जिनाहरणं' जिनानामुदाहरणमत्र मन्तव्यम् । ते हि भगवन्तो निष्क्रमणसमये प्रायश्चतुर्थादि तपः कृत्वा निष्क्रामन्ति, न च तत् तेषाममङ्गलम्, एवमत्रापि भावनीयम् । ततश्च यदि ते क्षपकास्तदा चैत्यानि वन्दमाना एव दर्शयन्ति स्थापनाकुलानि क्षेत्रप्रत्युपेक्षकाः । अथ भक्तार्थिनस्ते ततः ''इयरे''तति इतरेषु भक्तार्थिषु यो विधिस्तं वक्ष्ये ।। तमेवाह-

[भा.१५७७] सव्वे दट्ठुं उग्गाहिएण ओयरिय भय समुप्पज्जे ।
तम्हेक्क दोहि तिहि वा, उग्गाहिय चेइए वंदे ।।

वृ- चैत्यवन्दनार्थं गन्तुकामा यदि सर्वेऽपि पात्रकमुद्ग्राहयेयुः ततः सर्वान् साधून् उद्ग्राहितेन पात्रकेण दृष्ट्वा 'अहो ! औदरिका एते' इति श्रावकश्चिन्तयति । भयं च तस्य समुत्पद्यते, यथा-कथमेतावतां मयैकेन दास्यते ? इति । तस्मादेकेन द्वाभ्यां त्रिभिर्वा साधुभिरुद्रगाहितपात्रकैः शेषैः पुनरनुद्ग्राहितपात्रैः सहाः सूरयश्चैत्यानि वन्दन्ति ।। अथ यद्येकोऽपि साधुः पात्रकं नोद्ग्राहयति

Jain Education International For Private & Personal Use Only www.jainelibrary.org

ततः को दोषः ? इत्याह-

[भा.१५७८] सड्ढाभंगोऽनुग्गाहियम्मि ठवणाइया भवे दोसा ।
घरचेइय आयरिए, कयवयगमणं च गहणं च ॥

वृ- अथानुद्ग्राहिते पात्रके प्रयान्ति ततश्चैत्यानि वन्दमानान् दृष्ट्वा कोऽपि धर्मश्रद्धावान् भक्तपानेन निमन्त्रयेत् तदा यदि भाजनं नास्तीति कृत्वा न गृह्यते ततः श्रद्धाङ्गस्तस्योपजायते । अथ ब्रुवते 'पात्रकं गृहीत्वा यावद् यवमाच्छामस्तानवदेवमेव तिष्ठतु' ततः स्थापनादयो दोषा भवेयुः । तस्मादुद्ग्राहणीयं पात्रकम् । जिनगृहेषु च वृन्देन सर्वेऽपि चैत्यादिन वन्दित्वा गृहचैत्यवन्दनार्थमाचार्येण कतिपयैः साधुभिरुद्ग्रहातपात्रकैः समं गमनं कर्त्तव्यम् । तत्र यदि श्रावकः प्राशुकेन भक्त-पानेन निमन्त्रयेत् ततो ग्रहणमपि तस्य कर्त्तव्यम् ॥ आह कानि पुनः कुलानि चैत्यवन्दनं विदधानास्ते दर्शयन्ति ? उच्यते-

[भा.१५७९] दाने अभिगम सड्ढे, सम्मत्ते खलु तहेव मिच्छत्ते ।
मामाए अचियत्ते, कुलाइँ दाइंति गीयत्था ॥

वृ- यथाभद्रको दानरुचि दानश्राद्धः । सम्यग्दृष्टिर्गृहीताणुव्रतोऽभिगमश्राद्धः । "सम्मत्ते" त्ति अविरतसम्यग्दृष्टिः । "मिच्छत्ते"त्ति आभिग्रहिकमिथ्यादृष्टिः । 'मामाको नाम' ईर्ष्यालुतया 'हे श्रमण! मा मदीयं गृहमायासीः' इति ब्रवीति। यस्त्वीर्ष्यालुतयैव साधुषु गृहं प्रविशत्सु महदप्रीतिकं स्वचेतसि करोति वाचा न किमपि ब्रूते एष देशीभाषया च किं कुर्वन्ति ? इत्याह-

[भा.१५८०] दाने अभिगम सड्ढे, सम्मत्ते खलु तहेव मिच्छत्ते ।
मामाए अचियत्ते, कुलाइँ ठाविंति गीयत्था ॥

वृ- एतानि कुलानि स्थापयन्ति गीतार्थाः, 'अमीषु प्रवेष्टव्यम्, अमीषु तु न' इति व्यवस्थापयन्तीत्यर्थः ॥ अथ न स्थापयन्ति तदा किम् ? इत्याह-

[भा.१५८१] दाने अभिगम सड्ढे, सम्मत्ते खलु तहेव मिच्छत्ते ।
मानाए अचियत्ते, कुलाइं अठवंति चउगुरुगा ॥

वृ- एतानि कुलान्यस्थापयतश्चत्वारो गुरुकाः प्रायश्चित्तम् ॥ यत एवमतः-

[भा.१५८२] कयउस्सग्गाऽऽमंतण, अपुच्छणे अकहिएगयर दोसा ।
ठवणकुलाण य ठवणं, पविसइ गीयत्थसंघाडो ॥

वृ- 'उत्सर्गे' चैत्यवन्दनं विधायागतानामैर्यापथिकीकायोत्सर्गे कृते यद्वा "उस्सग्ग"त्ति आवश्यके कृते सर्वेऽपि साधवो गीतार्थैरामन्त्रणीयाः-आर्या! आगच्छत, क्षमाश्रमणाः स्थापनां प्रवर्त्तयिष्यन्ति। इत्तमुक्ते सर्वेऽप्यागम्य गुरुपदकमलमभिवन्द्य रचिताञ्जलयस्तिष्ठन्ति । तत आचार्यैः क्षेत्रप्रत्युपेक्षकाः प्रष्टव्याः-कथयत कानि कुलानि प्रवेष्टव्यानि ? कानि वा न ? इति । ततस्तैरपि क्षेत्रप्रत्युपेक्षकैर्विधिवत् कथनीयम् । यद्याचार्या क्षेत्रप्रत्युपेक्षकान् न पृच्छन्ति, तेवा पृष्टाः सन्तो न कथयन्ति, ततस्तेषु प्रविशतां ये संयमा-ऽऽत्मविराधनादयो दोषास्तान् 'एकतरे' सूरयः क्षेत्रप्रत्युपेक्षका वा प्राप्नुवन्ति। ततः कथिते सति यान्यभिगृहीतमिथ्यात्व-मामाका-ऽचियत्तानि तानि सर्वथैव स्थाप्यानि, यथा-नैतेषु केनापि प्रवेष्टव्यम् । यानि तु दानश्राद्धादीनि स्थापनाकुलानि तेषामपि स्थापनं कर्त्तव्यम् । कथम्? इत्याह-प्रविशति एक एव गीतार्थसङ्घाटको गुर्वादिवैयावृत्त्यकरस्तेषु ॥ इदमेव भावयति-

Jain Education International For Private & Personal Use Only www.jainelibrary.org

[भा.१५८३] गच्छम्मि एस कप्पो, वासावासे तहेव उडुबद्धे ।
गाम-नगर-निगमेसुं, अइसेसी ठावए सड्ढी ।।

वृ- वर्षावासे तथैव ऋतुबद्धे ग्राम-नकर-निगमेषु स्थितानां गच्छे एष कल्पः । कः ? इत्याह-अतिशेषाणि-अतिशायीनि स्निग्ध-मधुरद्रव्याणि प्राप्यन्ते येषु तानि कुलान्यतिशेषीणि ''सड्ढि'' त्ति दानश्रद्धावन्ति एवंविधानि कुलानि स्थापयेत् । एकं गीतार्थसङ्घाटकं मुक्त्वा शेषसङ्घाटकान् न तत्र प्रवेशं कारयेत् ।। आह-

[भा.१५८४] किं कारणं चमढणा, दव्वखओ उग्गमो वि य न सुज्झे ।
गच्छम्मि नयम कज्जं, आयरिय-गिलाण-पाहुणए ।।

वृ- 'किं कारणं' को हेतुः येन स्थापनाकुलेष्वेक एव सङ्घाटकः प्रविशति ? । सूरिराह-''चमढण''त्ति अन्यैरन्यैश्च सङ्घाटकैः प्रविशद्भिस्तानि कुलान्युद्वेगं प्राप्यन्ते । ततश्च द्रव्याणां-स्निग्धमधुराणां क्षयो भवति, उद्गमोऽपि च न शुध्यति । गच्छे च 'नियतं' निश्चितं प्रायोग्यद्रव्यैः कार्यं भवति । किमर्थम् ? इत्याह-आचार्य-ग्लान-प्राधूर्णकानां हेतोरिति निर्युक्तिगाथासमासार्थः ।।

अथ भाष्यकार एनामेव विवृणोति-

[भा.१५८५] पुव्विं पि वीरसुणिया, भणिया भणिया पहावए तुरियं ।
सा चमढणाए सिग्गा, निच्छइ दट्ठुं पि गंतुं जे ।।

वृ- जहा काइ वीरसुणिया केणइ पारद्धिएण तित्तिराईणं गहणे छिछिक्कारिया समाणी तित्तिराईणि गिण्हइ । पच्छा सो तेहिं सावएण विना वि काडं हंतूण छिछिक्कारेइ ।सा वीरसुणिया इतो तओ पहावइ जाव न किंचि पेच्छइ । ताहे सा वेयारिया समाणी जइ सो सावयं दट्ठुं पच्छा छिछिक्कारेइ तहा वि पयं पि न इच्छए गंतुं ।। अथ गाथाक्षरयोजना-यः शुनकद्वितीयः शस्त्राद्यपेक्षारहितो मृगयां करोति स वीर उच्यते, तस्य शुनिका यथा पूर्वमदृष्टेऽपि श्वापदे 'भणिता भणिता' छीत्कृता छीत्कृता सती त्वरितमितस्ततः प्रधावति । ततः सा 'चमढणया' निरर्थकमुद्वेजनया ''सिग्गा'' श्रान्ता सती सन्तमपि श्वापदं दृष्ट्वा पदमपि गन्तुं ''जे'' इति पादपूरणे नेच्छति ।।

एष दृष्टान्तः । अर्थोपनयस्त्वेवम्-

[भा.१५८६] एवं सड्ढकुलाइं, चमढिज्जंताइं अन्नमन्नेहिं ।
नेच्छंति किंचि दाउं, संतं पि तहिं गिलाणस्स ।।

वृ- 'एवम्' अमुनैव प्रकारेण श्राद्धकुलानि ''चमढिज्जंताइं'' ति उद्वेज्यमानानि 'अन्यान्यैः' क्षुल्लक-स्थविर-क्षपकादिभिः । यद्वा ''अन्नमन्नेहिं'' ति अन्यान्यैः-परिफल्गुप्रायैः कारणैः । यथा एकः प्राह-ग्लानस्य शीर्षं दुष्यति शर्करां प्रयच्छ; अपरः प्राह-ममोदरं दुष्यति दध्नः करम्बेण प्रयोजनम्; तदपरः प्राह-प्राधूर्णक आयातोऽस्ति घृतादिकं देहि; अन्यः प्राह-अहमाचार्यस्य हेतोरायातोऽस्मि दुग्धं सशर्करं प्रतिलाभयेत्यादि । ततस्तानि ब्रुवीरन्-यूयं सर्व एव ग्लाना अतो वयं कियतां प्रयच्छामः ? को वा जानाति यूयमाचार्यादीनां हेतोर्गृह्णीथ ? आहोश्चिदात्मार्थम् ? इति । एवमुद्वेज्यमानानि नेच्छन्ति 'सदपि' विद्यमानमपि घृतादिकं 'किञ्चित्' स्तोकमात्रमपि ग्लानस्य उपलक्षणत्वादाचार्य-प्राघूर्णकादेरप्यर्थाय दातुम् । ततश्च यत् ते ग्लानादयः परिताप्यन्ते

Jain Education International For Private & Personal Use Only www.jainelibrary.org

तन्निष्पन्नं प्रायश्चित्तम् ।। गतं चमढणाद्वारम् । अथ द्रव्यक्षयोद्गमाशुद्धिद्वारद्वयमाह-

[भा.१५८७] अन्नो चमढण दोसो, दव्वखओ उग्गमो वि य न सुज्झे ।
खीणे दुल्लभदव्वे, नत्थि गिलाणस्स पाउग्गं ॥

वृ- 'अन्यः' अपरश्चमढनायां दोषः, कः ? इत्याह-द्रव्यस्य-अवगाहिम-घृतादेः कारणमन्तरेणापि दिने दिने गृह्यमाणस्य क्षयो भवति । ततश्च यद्यभिनवमवगाहिमादि द्रव्यं साधूनामर्थाय करोति क्रीणाति वा तत उद्गमोऽपि च न शुद्यति, सदोषत्वात् तद् उत्पादितमपि न कल्पत इति भावः। ततः 'क्षीणे' व्यच्छिन्ने दुर्लभद्रव् प्रयोजने उत्पन्नेऽपि नास्ति ग्लानस्य प्रायोग्यम् । ततः परिताप-महादुःखादिका ग्लानारोपणा द्रष्टव्या, भद्रक-प्रान्तकृताश्च दोषा भवन्ति ।। तानेवाह-

[भा.१५८८] दव्वक्खएण पंतो, इत्थिं घाइज्ज कीस ते दिन्नं ।
भद्दो हट्ठपहट्ठो, करेज्ज अन्नं पि साहूणं ॥

वृ- इह कस्यापि प्रान्तस्य भार्या श्राद्धिका, ततस्तयाऽन्यान्यसाधूनां याचमानानां प्रायोग्यद्रव्यं सर्वमपि प्रदत्तम् । ततस्तस्याः पतिर्भोजनार्थमुपविष्टः सन् ब्रूते-कूरं मे परिवेषय । सा प्राह-साधूनां प्रदत्तः । स प्रतिब्रूयात्-पूपलिकास्तर्हि परिवेषय । सा प्राह-ता अपि प्रदत्ताः । एवं सूप-दुग्ध-दधिप्रभृतीन्यपि साधूनां वितीर्णानीति । इत्थं द्रव्यक्षयेण स प्रान्तः कुपितः सन् 'अरे रेकुलपांसने! किं ते मुण्डास्तवोपपतयो भवन्ति येनैवं मदीयं गृहसर्वस्वं दत्त्वा तान् पोषयसि ?' इत्यभिधाय स्वां स्त्रियं 'घातयेत्' कुट्टयेत्, 'कस्मात्' किमर्थं त्वया तेभ्यः सर्वमपि दत्तम् ? इति कृत्वा । अत्र पाठान्तरम्-''दव्वक्खएण लुद्धो''त्ति 'लुब्धः' लोभाभिभूतः, सेषं प्राग्वत् । यस्तु भद्रको गृहपति स श्राद्धिकया सर्वस्मिन्नपि दत्ते तथैव च कथिते हृष्टप्रहृष्टो भवति । हृष्टो नाम-मनसि परितोषवान्, प्रहष्टस्तु-प्रहसितवदनः समुद्भूतरोमहर्षो हर्षाश्रूणि विमुञ्चमान इति । ततश्च कुर्याद् 'अन्यदपि' अवगाहिमादिकं साधूनामर्थाय, करयेदित्यर्थः । एतद्दोषपरिहरणार्थमेकं गीतार्थसङ्घाटकं मुक्त्वा शेषाः स्थापनाकुलानि न निर्विशेयुः । प्राघूर्णके चायाते सति प्राघुर्ण्यं विधेयम्, तच्च स्वभावानुमतैरेव भक्त-पानैः ।। तथा चात्र दृष्टान्तमाह-

[भा.१५८९] जड्डे महिसे चारी, आसे गोणे य जे य जावसिया ।
एएसिं पडिवक्खे, चत्तारि उ संजया होंति ।।

वृ- 'जड्डः' हस्ती, महिषाश्वौ प्रतीतौ, 'गोणः' बलीवर्द, एतेषां ये 'यावसिकाः' यवसः-तत्प्रायोग्यमुद्ग-माषादिरूप आहारस्तेन तद्वहनेन चरन्तीति यासिकास्ते अनुकूलां चारीमानयन्ति। एतेषां जड्डादीनां 'प्रतिपक्षे' प्रतिरूपः पक्षः प्रतिपक्षः-सदृशपक्ष इत्यर्थः, तत्र चत्वारः प्राधूर्णकसंयता भवन्ति । तद्यथा-जड्डसमानो महिषसमानोऽश्वसमानो गोसमानश्चेति ।।

अथामीषामेव व्याख्यानमाह-

भा.**(१५९०)** जड्डो जं वा तं वा, सुकुमालं महिसओ महुरमासो ।
गोणो सुगंधिदव्वं, इच्छइ एमेव साहू वि ।।

वृ- 'जड्डः' हस्ती, सः 'यद्वा तद्वा' कर्कश-कटुकादिकमप्याहारयति । यस्तु महिषः 'सुकुमारं' वंशकरीलादिकमभिलषति । अश्वः 'मधुरं' मुद्ग-माषादिकमभिकाङ्क्षति । 'गौः' बलीवर्द सः 'सुगन्धिद्रव्यम्' अर्जुनक-ग्रन्थिपर्णादिकमिच्छति । एवमेव साधवश्चत्वारः चतुर्विधं भक्तमिच्छन्ति-

Jain Education International For Private & Personal Use Only www.jainelibrary.org

तत्थपढमो जङ्गसमाणो पाहुणगसाहू भणइ-मम जं दोसीणं वा उण्हगं वा कंजियं वा लब्भइ तं चेव आनेहि, नवरं उदरपूरं। एवं भणिए किं दोसीणं चेव आनेयव्वं ? न, विसेसेण सोहणं तस्स आनेयव्वं। बिइओ पाहुणयसाहू भणइ-परं मे नेहरहिया वि पूवलिया सुकुमाला होउ। तइओ भणइ-महुरंनवरिं मे होउ। चउत्थो भणइ-अन्नं वा पाणं वा निप्पडिगंधं मे आनेह। एवं ताणं भणंताणं जं जोग्गं तं सड्ढयकुलेहिंतो विसेसियं आनिज्जइ। तं च ठविएसु चेव सड्ढयकुलेसु लब्भइ नाठविएसु। पाहुन्ने य कीरमाणे महंतो निज्जरालाभो साहुक्कारो य पाविज्जइ। अतो कायव्वं तं जहाविसहं साहूहिं ति ॥ आह यद्येवं तर्हि श्राद्धकुलेषु मा कोऽपि प्रवेशं कार्षीत् ? यदा प्राघूर्ण-कादिकार्यं समुत्पन्नं भविष्यति तदा प्रवेशं करिष्यामः, ततश्च बहुतरमुत्कृष्टं च लप्स्यमहे। सूरिराह-

[भा.१५९१] एवं च पुनो ठविए, अप्पविसंते इमे भवे दोसा।
वीसरण संजयाणं,विसुक्कगोणीइ आरामे ॥

वृ-एवं च तावत् चमढनायां दोषा अभिहिताः। पुनःशब्दो विशेषणार्थ। यदि पुनः स्थापनाकुलानि सर्वथैव स्थाप्यन्ते ततः ''ठविए''त्ति सर्वथैव स्थापितेषु तेष्वप्रविशतां साधूनामेते दोषा भवेयुः। तद्यथा-विस्मरणं संयतानां भवति, भिक्षा दातव्येति नियमाभावात्।

अत्र च विशुष्कया गवा आरामेण च दृष्टान्तः- जहा-एगस्स वोद्दधिज्जाइयस्स गोणी धेनू। सा य पओस-पच्चूसे सुकुलवं सुकुलवं दुद्धस्स पयच्छइ। तस्स य दसहिं दिवसेहिं संखडी भविस्सइ। ताहे सो चिंतेइ-एसा गावी ताव बहुयं खीरं देइ, तया य दुल्लहं खीरं भविस्सइ, मम य तया अवस्सं कज्जं, तो इदानिं न दुहामि, तया चेव एक्कसराए दुहिस्सामि, वरं मे दस कुलया होंतया। पत्ते य संखडिदिवसे महंतं कुंडयं गहाय गोणीदुहणट्ठयाए ढुक्को जाव विसुक्का, चुलुओ वि नत्थि दुद्धस्स। एवं संजया वि अणल्लियंता तेसिं सड्ढाणं पम्हुट्ठा न चेव जाणंति-किं संजया अत्थि ? नवा ? । ते वि संजया जम्मि दिवसे कज्जं तम्मि गया जाव न संति तानि दव्वानि। तम्हा दोण्ह वा तिण्ह वा दिवसाणं अवस्सं गंतव्वं ॥

अहवा आरामदिट्ठंतो, जहा-एगो आरामिओ। सो चिंतेइ-मम आरामे पुप्फाणं आढयं दिने दिने उट्ठेइ, इंदमहदिवसे अ बहू जनो पुप्फाण कायओ भविस्सइ तो मा दिने दिने पुप्फाइं उच्चेमि, तद्दिवसं वरं बहूणि पुप्फानि होंताणि त्ति। पत्ते य इंदमहदिवसे सो पच्छियाओ घेत्तुं गओ जाव सो आरामो उप्फुल्लो, एगमवि पुप्फं नत्थि। एवं ते जद्दिवसं कज्जमुप्पन्नं तद्दिवसं पविट्ठा ठवणाकुलेसु। ताहे सड्ढा भणंति-तुब्भे इहं चिय अच्छंता न मुणह वेलं, अम्हं पए वत्ता वेला। अप्पविसंतेसु य न कोइ दंसणं पडिवज्जइ, न वा अनुव्वए, गिलाणपाउग्गं वा नत्थि ॥ यतश्चैवमतः प्रवेष्टव्यं स्थापनाकुलेषु गीतार्थसङ्घाटकेन ॥ स च कीदृग्दोषैर्विरहितः ? इत्यत आह-

[भा.१५९२] अलसं घसिरं सुविरं, खमगं कोह-मान-मा-लोहिल्लं।
कोऊहल पडिबद्धं, वेयावच्चं न कारिज्जा ॥

वृ-'अलसं' निरुद्यमम्, 'ग्रसितारं' बहुभक्षिणम्, 'स्वप्तारं' स्वप्नशीलम्, ''सीलाद्यर्थस्येरः'' इति प्राकतलक्षणबलादुभयत्रापि तृनप्रत्ययस्येरादेशः, क्षपकं प्रतीतम्, ''कोह-माण-माय-लोहिल्लं'' ति क्रोधवन्तं मानवन्तं मायावन्तं लोभवन्तम्, सर्वत्रापि भूम्नि मतुप्रत्ययः, यथा गोमानिति, ''कोऊहल''त्ति मत्वर्थीयप्रत्ययलोपात् कुतूहलिनम्, 'प्रतिबद्धं' सूत्रार्थग्रहणसक्तम। एतान्

Jain Education International For Private & Personal Use Only www.jainelibrary.org

वैयावृत्यमाचार्यो न कारयेदिति समासार्थः ।। अथैनामेव गाथां विवरीषुः प्रथमतः प्रायश्चित्तमाह-

[भा.१५९३] तिसु लहुओ तिसु लहुया, गुरुओ गुरुया य लहुग लहुगो य ।
पेसग-करिंतगाणं, आणाइ विराधना चेव ।।

वृ- अलसादीन् य आचार्य स्ववैयावृत्यार्थं प्रेषयति-व्यापारयतीत्यर्थः, यश्चैभिर्दोषैर्दुष्टः स्वयं वैयावृत्यं करोति, तयोः प्रेषक-कुर्वतोः प्रायश्चित्तम् । तद्यथा-'त्रिषु' अलस-बह्वाशि-निद्रालुषु लघुको मासः । 'त्रिषु' क्षपक-कोपना-ऽभिमानिषु चत्वारो लघवः । मायावति गुरुको मासः । लोभवति चत्वारो गुरुकाः । कौतूहलवति चत्वारो लघुकाः । सूत्रार्थप्रतिबद्धे लघुमासः । आज्ञादयश्च दोषा विराधना चात्म-संयमविषया ।। तत्रालस-स्वपनशीलयोर्नियोजने दोषानाह-

[भा.१५९४] ता अच्छि जा फिडिओ, सइकालो अ-सोविरे दोसा ।
गुरुमाई तेन विना, विराधनुस्सक्क-ठवणादी ।।

वृ-अलसः स्वपनशीलश्च तावदुपविष्टः शयानो वा आस्ते यावत् सन्-विद्यमानः कालः सत्कालो भिक्षायाः 'स्फिटितः' अतिक्रान्तो भवति । यद्वा तावलस-निद्रालू चिन्तयेताम्- 'समापतितं तावदिदमस्माकमवश्यकरमीयं कर्म, अत एतदपि निर्वाहितं भवतु' इति कृत्वा अप्राप्ते एव भिक्षाकाले पर्यटिताम्, ततो यद्वा तद्वा भक्त-पानं लभेते, न प्रायोग्यम्, 'तेन' प्रायोग्येण विना या 'गुर्वादीनाम्' आचार्य-बाल-वृद्ध-ग्लानादीनां विराधना तन्निष्पन्नं प्रायश्चित्तम् । यद्वाऽतिक्रान्तायां वेलायामायान्तं वैयावृत्यकरं मत्वा प्रायोग्यस्योत्ष्वष्कणं श्राद्धकानि कुर्युः, उत्सूरे तद् विदध्युरिति भावः । यद्वा तानि तदुपस्कृतं प्रायोग्यभक्तं स्थापयेयुः ततः स्थापनादोषः । आदिशब्दात् 'साधूनामसंविभक्तं भक्तं कथं स्वमुखे प्रक्षिप्यते ? 'इति बुद्ध्या तेषामभुञ्जानानामन्तरायमित्यादयो दोषाः ।।

[भा.१५९५] अप्पत्तेवि अलंभो, हानी ओसक्कणा य अइभद्दे ।
अनहिंडंतो य चिरं, न लहइ जं किंचि वाऽऽनेइ ।।

वृ- अथ 'यदेतत् कर्मास्माकं मध्ये समापतितं तद् निर्वाहितं भवतु' इति कृत्वा अप्राप्ते काले भिक्षामटति तदा 'अलाभः' न किमपि प्राप्यते इति भावः । ततश्चाचार्यादीनां 'हानि' असंस्तरणं भवति । यस्तु 'अतिभद्रकः' अतीवधर्मश्रद्धावान् गृहपति सः 'अवष्वष्कणं' विवक्षितकालादर्वाग् भक्तनिष्पादनं कुर्यात् । यद्वा असावलसत्वाद् निद्रालत्वाद्वा चिरमहिण्डमानः सन् न किमपि लभते, 'यत्किञ्चिद्वा' पर्युषितं वल्ल-चनकादिकं वा आनयति, तेन भुक्तेनाऽपथ्यतया गुर्वादीनां ग्लानत्वं भवति, ततः परिताप-महदुःखादिका ग्लानारोपणा ।। अथ "घसिर" त्ति पदं भावयति-

[भा.१५९६] गिण्हामि अप्पणो ता, पज्जत्तं तो गुरूण घिच्छामि ।
घेत्तुं च तेसि घिच्छं, सीयल-ओसक्क-ओमाई ।।

वृ- यो महोदरः स वैयावृत्ये नियुक्तो भिक्षामटन् चिन्तयति-गृह्णामि तावदात्मनो योग्यं पर्याप्तं ततो गुरूणां हेतोर्ग्रहीष्यामि । यद्वा तेषां गुरूणां योग्यं गृहीत्वा तत आत्मनोऽर्थाय ग्रहीष्ये । इत्थं विचिन्त्य यदि प्रथमं गुरूणां योगयं गृहीत्वा पश्चादात्मार्थं गृह्णाति ततो यावता कालेनात्मनः पर्याप्तं पूर्यते तावता तत् पूर्वं गृहीतं शीतलं स्यात्, तच्च गुरूणामकारकम्, ततः सैव ग्लानारोपणा। अथवा स्थापनाकुलेषु प्रथमतः प्रवेशे तत्राद्यापि वेलाया अप्राप्तत्वादवष्वष्कणादयो दोषाः । अथ प्रथममात्महेतोर्गृह्णाति ततो यावता तत् पर्याप्तं भवति तावता स्थापनाकुलेषु वेलातिक्रमो

Jain Education International For Private & Personal Use Only www.jainelibrary.org

भवेत् । अथ वेलातिक्रमभयाद् देशकाल एव तेषु प्रविशति तत आत्मनोऽवमं भवेत्, उदरपूरणं न भवेदिति भावः । ततश्चावमाहारतया तस्यैवानागाढा-ऽऽगाढपरितापादयो दोषा ॥

अथ क्षपक-क्रोधवतोर्दोषानाह-

[भा.१५९७] परिताविज्जइ खमओ, अह गिण्हइ अप्पणो इयरहानी ।
अविदिन्ने कोहिल्लो, रूसि किं वा तुमं देसि ॥

वृ- यदि क्षपको गुरूणां हेतोः प्रायोग्यं गृह्णाति नात्मनस्ततः स एव परिताप्यते, अथात्मनो गृह्णाति तत इतरेषां-आचार्याणां हानि-परितापना । यस्तु क्रोधवान् सः 'अवितीर्णे' अदत्ते सति रुष्यति । रुष्टश्चागारिणं भणति-यदि भवान् न ददाति तर्हि मा दात् किं भवदीयं गृहं दृष्ट्वाऽस्माभिः प्रव्रज्या प्रतिपन्ना ? इति, किं वा त्वं ददासि येन 'एवमहं ददामि' इति गर्वितो भवसि ? इत्यादिभिर्दुर्वचनैः श्राद्धं विपरिणमयति ॥ मानि-मायिनोर्दोषानाह-

[भा.१५९८] ऊणाणुट्ठमदिन्ने, थद्धो न य गच्छए पुनो जं च ।
माई भद्दगभोई, पंतेन व अप्पणो छाए ॥

वृ- यः स्तब्धः सः 'ऊने' तुच्छे दत्ते "अनुट्ठ"त्ति अभ्युत्थाने वा अकृते "अदिन्न"त्ति सर्वथैव वा अदत्ते सति 'पुनः' भूयस्तदीयं गृहं न गच्छति, भणति च-श्रावकाणामितरेषां च को विशेषः ? यदि द्वितयेऽपि साधूनामभ्युत्थानादिविनयप्रक्रियामन्तरेण भिक्षां प्रयच्छन्ति ततो नाहममुष्य गृहं भूयः प्रविशामीति । ततः "जं च"त्ति तद्गृहे प्रवेशं विना प्रायोग्यस्यालाभे यत् किञ्चिदाचार्यादीनां परितापनादिकं भवति तन्निष्पन्नं प्रायश्चित्तम् । यस्तु मायी सः 'भद्रकभोजी' प्रायोग्यमुपाश्रयाद् बहिर्भुक्त्वा प्रान्तमानयतीति भावः, यद्वा 'प्रान्तेन' वल्ल-चणकादिना आत्मनो योग्यं स्निग्ध-मधुरद्रव्यं छादयति, छादयित्वा च गुरूणां दर्शयति ॥ लुब्धस्य दोषानाह-

[भा.१५९९] ओभासइ खीराई, दिज्जंते वा न वारई लुद्धो ।
जेऽनेगविसणदोसा, एगस्स वि ते उ लुद्धस्स ॥

वृ- यो लुब्धः स स्थापनाकुलेषु क्षीरादीन्यवभाषते । यद्वा श्रद्धातिरेकतस्तैर्दीयमानानि स्निग्धमधुराणि न वारयति । ततश्च येऽडनेकेषु सङ्घाटकेषु स्थापनाकुलं प्रविशत्सु चमढणादयो दोषा वर्णितास्ते सर्वेऽप्येकस्यापि लुब्धस्य प्रविशतो द्रष्टव्याः ॥ कुतूहलिनः प्रतिबद्धस्य च दोषानाह-

[भा.१६००] नडमाई पिच्छंतो, ता अच्छइ जाव फिट्टई वेला ।
सुत्तत्थे पडिबद्धो, ओसक्क-ऽहिसक्कमाईया ॥

वृ- यः कुतूहली स नटादीन् प्रेक्षमाणस्तावदास्ते यावद् वेला स्फिटति । यस्तु सूत्रेऽर्थे वा 'प्रतिबद्धः' आसक्तः स गुरूणां धर्मकथादिव्यग्रतया यदैवान्तरं लभते तदैवाप्राप्तकालेऽपि भिक्षार्थमवतरति, वेलातिक्रमं वा कृत्वा कालवेलादाववतरति, ततोऽवष्वष्कणा-ऽभिष्वष्कणादयो दोषाः ॥ यतश्चैवमतः किं कर्त्तव्यम् ? इत्याह-

[भा.१६०१] एयद्दोसविमुक्कं, कडजोगिं नायसील मायारं ।
गुरुभत्तिमं विनीयं, वेयावच्चं तु कारिज्जा ॥

वृ- एभिः-अनन्तरोक्तैर्दोषैर्विमुक्तं-वर्जितम्, किंविशिष्टम् ? इत्याह-'कृतयोगिनं' गीतार्थं 'ज्ञातशीला-ऽऽचारं' ज्ञातं-सम्यगवतगतं शीलं-प्रियधर्मतादिरूपमाचारश्च-चक्रवालसामाचारीरूपो

Jain Education International For Private & Personal Use Only www.jainelibrary.org

यस्य स तथा तम्, तथा गुरवः-आचार्यास्तेषु भक्तिमन्तम्-आन्तरप्रतिबन्धोपेतम्, 'विनीतम्' अभ्युत्थनादिबाह्यविनयवन्तम्, एवंविधं शिष्यं वैयावृत्यमाचार्य कारयेत् ॥ आह किमर्थं वैयावृत्यकरस्येयन्तो गुणा मृग्यन्ते ? उच्यते-

[भा.१६०२] साहंति य पियधम्मा, एसणदोसे अभिग्गहविसेसे ।
एवं तु विहिगहणे, दव्वं वड्ढंति गीयत्था ॥

वृ-प्रियधर्माण उपलक्षणत्वादपरैरप्यनन्तरोक्तगुणैर्युक्ता वैयावृत्यकराः "साहंति"त्ति कथयन्ति 'एषणादोषान्' म्रक्षित-निक्षिप्तादीन् । यथा-इत्थं म्रक्षितदोषो भवति, इत्थं तु निक्षिप्त इत्यादि । एतैश्च दोषैर्दुष्टं साधूनां न दीयते । 'अभिग्रहविशेषाँश्च' जिनकल्पिक-स्थविरकल्पिकसम्बन्धिनः कथयन्ति । 'एवम्' उक्तेन विधिना स्थापनाकुलेषु ग्रहणे श्रद्धां वर्धयन्तो गीतार्था 'द्रव्यमपि' घृतादिकं वर्धयन्ति ॥ इदमेव भावयति-

[भा.१६०३] एसणदोसे व कए, अकए वा जइगुणे विकत्थिंता ।
कहयंति असढभावा, एसणदोसे गुणे चेव ॥

वृ- 'एषणादोषे' म्रक्षितादौ कृते वा अकृते वा 'यतिगुणान्' क्षान्ति-मार्दवादीन् 'विकत्थमानाः' विविधं श्लाघमानाः 'अशठभावाः' कैतववर्जिताः न भक्षणोपायनिमित्तमिति भावः एषणा दोषान् कथयन्ति । तथा गुणाः-साधूनां प्राशुकैषणीयभक्त-पानप्रदानप्रभवाः पापकर्मनिर्जरादयस्ताँश्च गीतार्थाः कथयन्ति । यथा- समणोवासगस्स नं भंते ! तहारूवं समणं वा माहणं वा फासुएणं एसणिज्जेणं असन-पान-खाइम-साइमेणं पडिलाभेमाणस्स किं कज्जइ ? गोयमा ! एगंतसो निज्जरा कज्जइ, नत्थि य से केइ पावकम्मे कज्जइ त्ति । अथेत्थं न कथयेयुः ततः के दोषाः ? इत्याह-

[भा.१६०४] बालाई परिचत्ता, अकहिंतेऽनेसणाइगहणं वा ।
न य कहपबंधदोसा, अह य गुणा साहिया होंति ॥

वृ- तेषु श्राद्धकुलेषु जिनकल्पिका भिक्षार्थमायाताः, तेषां परमान्नादिकं लेपकृतमुपनीतम्, तैश्च भगवद्भिः प्रतिषिदधम्, ततस्तानि श्राद्धकानि चिन्तयेयुः-एत एव प्रधानाः साधवः, इतरे तु स्निग्ध-मधुरद्रव्यग्राहिणः सर्वेऽपि नामधारकमात्राः साध्वाभासा एवेति । ततः श्रद्धाभङ्गभाञ्जि तानि भूयः प्रायोग्यद्रव्यं नोपढौकयेयुः । एवमभिग्रहविशेषान् अकथयद्भिर्गीतार्थैर्बालादयः परित्यक्ता भवन्ति । अथैषणादोषान् शुद्धभक्त-पानानस्य च गुणान् न कथयेयुः ततस्तानि श्राद्धकान्येषणां कुर्यु । तत्र यदि प्रतिषिध्यते तदाऽपि बालादयः परित्यक्ताः, तेषां प्रायोग्याभावे संस्तरणाभावात् । अथ न प्रतिषिध्यते ततोऽनेषणादिग्रहणं भवेत्, आदिशब्द एषणादोषाणामेव स्वगतानेकभेदसूचकः । आह गोचरप्रविष्टानां साधूनां कथाप्रबन्धः कर्त्तु न कल्पते, अमी च साधव इत्थमेषणादोषादीनां कथां प्रबध्नन्तः कथं न दोषभाजो भवन्ति ? इत्युच्यते-'न च' नैवात्र कथाप्रबन्धदोषा भवन्ति, यदि हि भक्त-पानलोलुपतया कथां प्रबघ्नीयुस्ततो भवेयुर्दोषाः, तच्च नास्ति, एषणाशुद्धिहेतोरेव तेषामित्थं कथनात् । अथ च प्रत्युतेत्थं कथयद्भिस्तैर्गीतार्थैः 'गुणाः' बाल-वृद्धाद्युपष्टम्भ-गुरुभक्तिप्रभृतयः साधिता भवन्ति ॥ कतं पुनस्ते कथयन्ति ? इत्याह-

[भा.१६०५] ठाणं गमनाऽऽगमनं, वावारं पिंडसोहिमुल्लोगं ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

जाणंताण वि तुज्झं, बहुवक्खेवाण कहयामो ॥

वृ- 'स्थानं' नाम आत्म-प्रवचन-संयमोपघातवर्जितो भूभागः । यत्र स्थितस्य गवा-ऽश्व-महिषादेराहननादि न भवति स आत्मोपघातवर्जितः । यत्र तु निर्द्धमनाद्यशुचिस्थानव्यतिरिक्ते प्रदेशे स्थितस्य लोकः प्रवचनस्यावर्णं न ब्रूयात् स प्रवचनोपघातवर्जितः । यत्र पुनः पृथिव्यादिकायानां विराधना न भवति स संयमोपघातवर्जितः । ईदृशे स्थाने साधुना दायकेन वा स्थित्वा भिक्षा ग्राह्या देया वेति ज्ञापयन्ति । 'गमनं' नाम दायकेन भिक्षादानार्थं गृहमध्ये प्रविशता षट्कायानामुपमर्दशमकुर्वता गन्तव्यम् । एवम् 'आगमनमपि' भिक्षां गृहीत्वा साधुसम्मुखमागच्छता दायकेनोपयुक्तेनागन्तव्यम् । व्यापारः-कर्त्तन-कण्डन-पेषणादिकः, तं च सम्यग् ज्ञापयन्ति-ईदृशे व्यापारे भिक्षा ग्रहीतुं कल्पते, ईदृशे तु नेति । "पिंडसोहिमुल्लोगं" ति पिण्डशुद्धेः 'उल्लोकं' लेशोद्देशं कथयन्ति, 'इत्थमाधाकर्मादयो दोषा उपजायन्ते, इत्थमेभिर्दोषैरदुष्टः पिण्डः साधूनां दीयमानः शुद्धो बहुफलश्च भवति' इथ्येवं पिण्डनिर्युक्तिं लेशतो ज्ञापयन्तीति भावः । तथा यद्यपि यूयमिदं साधुधर्मस्वरूपमग्रेऽपि जानीथ तथापि युष्माकं बहुव्याक्षेपाणामविस्मरणार्थं कथयाम इति ॥ अपि च-

[भा.१६०६] केसिंचि अभिग्गहिया, अनभिग्गहिएसणा उ केसिंचि ।
मा हु अवन्नं काहिह, सव्वे वि हु ते जिणाणाए ॥

वृ- केषाञ्चित् साधूनामभिगृहीता एषणा, यथा जिनकल्पिकानाम् । केषाञ्चित् त्वनभिगृहीता, यथा गच्छवासिनाम्, सप्तस्वपि पिण्डैषमासु तेषां भक्त-पानस्य ग्रहणात् । एवं चापरापरां भक्त-पानग्रहणसामाचारीं दृष्ट्वा यूयं मा अवज्ञां करिष्यथ । कुतः ? इत्याह-'सर्वेऽपि ते' भगवन्तो जिनकल्पिकाः स्थविरकल्पिकाश्च जिनाज्ञायां वर्त्तन्ते, स्वस्वकल्पस्थितिपरिपालनात् अतो न केऽप्यवज्ञातुमर्हन्तीति भावः ॥ किञ्च-

[भा.१६०७] संविग्गभावियाणं, लुद्धगदिट्ठंतभावियाणं च ।
मुत्तूण खेत्त-काले, भावं च कहिंति सुद्धुंछं ॥

वृ- येषां श्राद्धानां पुरत एषणादोषाः कथ्यन्ते ते द्विधा-संविग्नभाविता लुब्धकदृष्टान्तभाविताश्च । संविग्नैः-उद्यतविहारिभिर्भाविताः संविग्नभाविताः । ये तु पार्श्वस्थादिभिर्लुब्धकदृष्टान्तेन भावितास्ते लुब्धकदृष्टान्तभाविताः कथम् ? इति चेद् उच्यते-ते पार्श्वस्थाः श्राद्धानित्थं प्रज्ञापयन्ति-यथा कस्यापि हरिणस्य पृष्ठतो लुब्धको धावति, तस्य च हरिणस्य पलायनं श्रेयः, लुब्धकस्यापि तत्पृष्ठतोऽनुधावनं श्रेयः; एवं साधोरप्यनेषणीयग्रहणतः पलायितुमेव युज्यते, श्रावकस्यापि तेन तेनोपायेन साधोरेषणीयमनेषणीयं वा दातुमेव युज्यते इति । इत्थं द्विविधानामपि श्राद्धानां पुरतः शुद्धं-द्वाचत्वारिंशद्दोषरहितं यदुञ्छमिवोञ्छं स्तोकस्तोकग्रहणात् 'शुद्धोञ्छम्' उत्सर्गपदमित्यर्थः तत् कथयन्ति । किं सर्वदैव ? न इत्याह-'मुक्त्वा क्षेत्र-कालौ भावं च' इति क्षेत्रं-कर्कशक्षेत्रमध्वानं वा कालं-दुर्भिक्षादिकं 'भावं' ग्लानत्वादिकं प्रतीत्य ते श्राद्धाः किञ्चिदपवादमपि ग्राह्यन्ते ॥ अपि च इदमपि ते श्राद्धा आपनीयाः-

[भा.१६०८] संथरणम्मि असुद्धं, दोण्हवि गिण्हंत-दिंतयानऽहियं ।
आउरदिट्ठंतेनं, तं चेव हियं असंथरणे ॥

वृ- संस्तरणं नाम-प्राशुकमेषणीयमं चाशनादि पर्याप्तं प्राप्यते न च किमपि ग्लानत्वं विद्यते

Jain Education International For Private & Personal Use Only www.jainelibrary.org

तत्र 'अशुद्धम्' अप्राशुकमनेषणीयं च गृह्णतो ददतश्च द्वयोरपि 'अहितम्' अपथ्यम्, गृह्णतः संयमबाधाविधायित्वाद् ददतस्तु भवान्तरे स्वल्पायुर्निबन्धनकर्मोपार्जनात्। 'तदेव' अशुद्धम् 'असंस्तरणे' अनिवहि दीयमानं गृह्यमाणं च 'हितं' पथ्यं भवति। आह कथं तदेव कल्प्यं तदेव चाकल्प्यं भवितुमर्हति? इति उच्यते-आतुरः-रोगी तस्य दृष्टान्तेनेदं मन्तव्यम्। यथा हि रोगिणः कामप्यवस्थामाश्रित्यान्नौषधादिकमपथ्यं भवति, काञ्चित् पुनः समाश्रित्य तदेव पथ्यम्, एवमिहापि भावनीयम् ॥ तदेवं भावितं "साहंति य पियधम्मा, एसमदोसे अभिग्गहविसेसे" इति। अथ युक्तम् "एवं तु विहिग्गहणे" त्ति तत्र विधिग्रहणं भावयति-

[भा.१६०९] संचइयमसंचइयं, नाऊण असंचयं तु गिण्हंति।
संचइयं पुन कज्जे, निब्बंधे चेव संतरियं ॥

वृ-प्रायोग्यद्रव्यं द्विधा-सञ्चयिकमसञ्चयिकं च। 'सञ्चयिकं' घृत-गुड-मोदकादि, 'असञ्चयिकं' तु दुग्ध-दधि-शालि-सूपादि। तत्र यदसञ्चयिकं तत् स्थापनाकुलेषु प्रभूतं ज्ञातवा गृह्णन्ति। सञ्चयिकं पुनर्ग्लान-प्राधूर्णकादौ महति कार्ये उत्पन्ने गृह्णन्ति। अथ श्राद्धानां महान् निर्बन्धो भवति ततोऽग्लाना अपि गृह्णन्ति, परं 'सान्तरितं' न दिने दिने इति भावः। एष सञ्चयिकग्रहणस्यापवाद उक्तः ॥ अथापवादपसदस्याप्यपवादमाह-

[भा.१६१०] अहवण सद्धा-विभवे, कालं भावं च बाल-वुड्डाई।
नाउ निरंतरगहणं, अछिन्नभावे य ठायंति ॥

वृ- "अहवण" त्ति अखण्डमव्ययं प्रकारान्तरद्योतनार्थम्। श्रावकाणां श्रद्धां च-दानरुचिं तीव्रां परिज्ञाय विभवं च विपुलं तदीयगृहेष्ववगम्य 'कालं' दुर्भिक्षादिकं 'भावं च' ग्लानत्वादिकं ज्ञात्वा बाल-वृद्धादयो वा आप्यायि भवन्त्विति ज्ञात्वा निरन्तरग्रहणमपि कुर्वन्ति, सञ्चयिकमपि दिने दिने गृह्णन्तीति भावः। यावच्च दायकस्य दानभावो न व्यवच्छिद्यते तावदच्छिन्ने भावे 'तिष्ठन्ति' दीयमानं प्रतिषेधयन्तीत्यर्थः, यथा तेषां भूयोऽपि श्रद्धा जायते ॥ अथ स्थापनाकुलेषु भक्त-पानग्रहणे सामाचारीमभिधित्सुराह-

[भा.१६११] दव्वप्पमाण गणणा, खारिय फोडिय तहेव अद्धा य।
संविग्ग एगठाणे, अनेगसाहूसु पन्नरस ॥

वृ- द्रव्यं-शाल्दायि तस्य प्रमाणं ज्ञातव्यम्, कियदत्र गृहे रवत्यां शालि-मुद्गादिकं दिने दिने प्रविशति?। 'गणना' नाम कियन्ति घृतपलान्यत्र प्रविशन्ति? यद्वा कियन्ति मानषाण्यत्र जेमयन्ति?। "खारिय" त्ति क्षारः-लवणं तेन संस्कृतानि 'क्षारितानि' लवणकरीरादीनि व्यञ्जनानि तानि कियन्त्यत्र पच्यन्ते? इति। "फोडिय" त्ति 'स्फोटितानि' मरिच-जीरकादिकटुभाण्डधूपितानि शालनकानि एतेषामपि तथैव रमाणं ज्ञातव्यम्। 'अद्धा' कालः स ज्ञातव्यः, किमत्र प्रहरे वेला? उत सार्द्धप्रहरे? आहोश्वित् प्रहरद्वये? इति। एतद् द्रव्यप्रमाणादिकं विज्ञाय 'संविग्नः' मोक्षाभिलाषी "एगठाणे" त्ति एकः सङ्घाटकस्तत्र प्रविशति। यदि पुनरनेके साधवः स्थापनाकुलेषु प्रविशन्ति ततः 'पञ्चदश' आधाकर्मादोय अनिसृष्टान्ता उद्गमदोषा भवन्ति, अध्यवपूरकस्य मिश्रजात एवान्तर्भायात्। एष सङ्ग्रहगाथासमासार्थः ॥

अस्या एव भाष्यकृद् व्याख्यानमाह-

Jain Education International For Private & Personal Use Only www.jainelibrary.org

[भा.१६१२] असनाइदव्वमाणे, दसपरिमिय एगभत्तमुव्वरइ ।
सो एगदिनं कप्पइ, निच्चं तु अज्झोयरो इहरा ॥

वृ-अशनम्-ओदनमुद्गादिष आदिग्रहणात् पानक-खादिम-स्वादिमपरिग्रहः, एतेषां द्रव्याणां परिमितानामपरिमितानां वा मानं-प्रमाणं ज्ञातव्यम् । यत्र परिमितमशनादि द्रव्यं प्रविशति तत्र दशानां मानुषाणां हेतोरुपस्क्रियमाणे एकस्य-अपरस्य योग्यं भक्तं-भक्तार्थमुद्धरति, स च भक्तार्थ एकस्य साधोः परिपूर्णाहारमात्रारूपं एकं दिनं ग्रहीतुं कल्पते । 'इतरथा' यदि द्वितीयादिषु दिवसेषु गृह्णन्ति तदा "निच्चं तु" त्ति स साधुभि प्रतिदिवसगृह्यमाणो भक्तार्थो नित्यजेमनमेव तैः श्राद्धैर्गण्यते, ततश्च तदर्थमध्यवपूरकः प्रक्षिप्येत ॥ एवं तात् परिमितमाश्रित्योक्तम् ।

अथापरिमितमधिकृत्याह-

[भा.१६१३] अपरिमिए आरेण वि, दसण्हमुव्वरइ एगभत्तट्ठो ।
वंजण-समिइम-पिट्ठे-वेसणमाईसु य तहेव ॥

वृ- यत्र पुनरपरिमितं राध्यते तत्र दशानां मानुषाणाम् 'अर्वागपि' नवाष्टादिसङ्ख्याकानामपि हेतो राद्धे एकस्य योग्यो भक्तार्थ उद्धरति, स च दिने दिने कल्पत इति । आह च चूर्णिकृत् अपरिमिए पुन भत्ते दसण्ह आरेण वि एगस्स भत्तट्ठो दिणे दिणे कप्पइ चेव । तथा व्यञ्जनानि-तीमन-वटिका-मर्जिकादीनि, "समितिम" त्ति समिता-कणिक्का तया निष्पन्नाः समितिमाः-मण्डकाः पूपलिका वा, पिष्टम्-उण्डेरकादि सक्तुप्रभृति वा, वेसणं-मरिच-जीरक-हिङ्गुप्रभृतिकं कटुभाण्डम्, आदिग्रहणाद् लवण-शुण्ठयादिपरिग्रहः । एतेषामपि परिमाणं तथैव द्रष्टव्यं यथाऽशनादीनाम् ॥ एतावता "द्रव्यप्रमाणं गणना-क्षारित-स्फोटितानि" इति गाथादलं भावितम्। अथ "अद्धा य" त्ति पदं व्याचष्टे-

[भा.१६१४] सतिकालद्धं नाउं, कुले कुले ताहि तत्थ पविसंति ।
ओसक्कणाइदोसा, अलंभे बालाइहानी वा ॥

वृ- सत्कालाद्धा-भिक्षायाः सम्बन्धी यो यत्र देशकालरूपोऽद्धा तं ज्ञात्वा कुले कुले तस्मिन् देशकाले तत्र प्रविशन्ति । अथ देशकालेऽतिक्रान्तेऽप्राप्ते वा प्रविशन्ति ततोऽवष्वष्कणादयो दोषाः । अथावप्यष्कमादिकं तानि श्राद्धकान्यशुद्धदानदोषश्रवणव्युत्पन्नमतीनि न कुर्यु ततः प्रायोग्यद्रव्यस्यालाभे बालादीनां हानिर्भवेदिति ॥ एवं यत्र क्षेत्रे एक एव गच्छो भवेत् तत्र स्थापनाकुलप्रवेशे सामाचारी भणिता । अथानेकगच्छविषयां तामेवाभिधित्सुराह-

[भा.१६१५] एगो व होज्ज गच्छो, दोन्नि व तिन्नि व ठवणा असंविग्गे ।
सोही गिलाणमाई, असई य दवाई एमेव ॥

वृ- विवक्षितक्षेत्रे एको वा गच्छो भवेद् द्वौ वा त्रयो वा, तत्रैकं गच्छमाश्रित्य विधिरुक्तः । अथ व्याद्यादीन् गच्छानधिकृत्य विधिरभिधीयते-"ठवणा असंविग्गे" त्ति येषु असंविग्नाः प्रविशन्ति तेषां श्राद्धकुलानां स्थापना कर्त्तव्या, न तेषु प्रवेष्टवयम् । अथ प्रविशन्ति ततः पञ्चदशोद्गमदोषा-नापदयन्ते, "सोहि" त्ति तद्दोषनिष्पन्न 'शोधि' प्रायश्चित्तम् । यद्वा "सोहि" त्ति पदं "गिलाणमाई" इत्युत्तरपदेन सह योज्यते, ततोऽयमर्थ-ग्लान-प्राधूर्णकादीनामर्थायासंविग्नभावितेष्वपि कुलेषु 'शोधि' एषणाशुद्धि तया शुद्धं भक्तं गृह्यते न कश्चिद् दोषः । "असई इ दवाइ एमेव" त्ति अन्यत्र

Jain Education International For Private & Personal Use Only www.jainelibrary.org

'असति' अविद्यमाने द्रवादिकमपि 'एवमेव' असिग्नभावितकुलेषु ग्रहीतव्यमिति द्वारगाथा-समासार्थः ।। अथैनामेव विवरीषुराह-

[भा.१६१६] संविग्गमणुन्नाए, अइंति अहवा कुले विरिंचंति ।
अन्नाउंछं व सहू, एमेव य संजईवग्गे ।।

वृ- इह यैस्तत् क्षेत्रं प्रत्युपेक्षितं तेषु पूर्वस्थितेषु येऽन्ये साधवः समायान्ति ते साम्भोगिका असाम्भोगिका वा स्युः । तत्रासाम्भोगिकेषु संविग्नेषुविधिरुच्यते-संविग्नैर्वास्तव्यसाधुभिः 'अनुज्ञाते' 'यूयं स्थापनाकुलेषु प्रिशत, वयमज्ञातोञ्छं गवेषयिष्यामः' इत्येमनुज्ञायां प्रदत्तायां ये आगन्तुकाः संविग्नास्ते स्थापनाकुलेषु "अइंति" त्ति प्रविशन्ति । वास्तव्यास्तु स्थापनाकुलवर्जेषु गुरु-बाल-वृद्धादीनामात्मनश्च हेतोर्भक्त-पानमुत्पादयन्ति । अथ वास्तव्या असहिष्णवस्ततो यावन्तो गच्छास्तावद्भिर्भागैः स्थापनाकुलानि विरिश्चन्ति-आर्या ! एतावत्सु कुलेषु भवद्भि प्रवेष्टव्यम्, एतावत्सु पुनरस्माभिरिति ।अथवा यद्यागन्तुकाः "सहू" इति 'सहिष्णवः' समर्थशरीरास्ततोऽज्ञा-तोञ्छं पुनरस्माभिरिति । अथवा यद्यागन्तुकाः "सहू" इति 'सहिष्णवः' समर्थशरीरास्ततोऽज्ञातोञ्छं गेषयन्तः पर्यटन्ति ।एवमेव च संयतीवर्गेऽपि द्रष्टव्यम्, ता अपि द्व्यादिगच्छसद्भावे एवंविधमेव विधिं कुर्वन्तीत्यर्थः ।।

[भा.१६१७] एवं तु अन्नसंभोइआण संभोइआम ते चेव ।
जाणित्ता निब्बंधं, वत्थव्वेणं स उ पमाणं ।।

वृ- एवं 'तुः' पुनरर्थे एष पुनर्विधिरन्यसाम्भोगिकानामुक्तः, ये तु साम्भोगिकाः-परस्पर-मेकसामाचारीकास्तेषामागन्तुकानामर्थाय त एव वास्तव्याः स्थापनाकुलेभ्यो भक्त-पानमानीय प्रयच्छन्ति ।अथ श्राद्धाः प्राधूर्णकभद्रका अतीव निर्बन्धं कुर्यु, यथा-प्राधूर्णकसङ्घाटकोऽप्यस्मद्गृहे स्थापनीयः, ततो निर्बन्धं ज्ञात्वा वास्तव्यसङ्घटिकेन आगन्तुकसङ्घाटिकं गृहीत्वा तत्र गन्तव्यम् यदि च तत्र प्रचुरं प्रायोग्यं प्राप्यते तत आगन्तुकसङ्घाटिकेन गवेषणा न कर्त्तव्या-किमित्येतावत् प्रचुरं दीयते ? किन्तु 'स तु' स एव वास्तव्यसङ्घाटिकस्तत्र प्रमाणम्, यावन्मात्रं ग्रहीतव्यं यद्वा कल्पनीयं तदेतत् सर्वमपि स एव जानातीति भावः ।। एष एकस्यां वसतौ स्थितानां विधिरुक्तः।

अथ पृथग्वसतिव्यवस्थितानामाह-

[भा.१६१८] असइ वसहीए वीसुं, रायनिए वसहि भोयणाऽऽगम्म ।
असहू अपरिनया वा, ताहेवीसुंऽ सहू वियरे ।।

वृ- विस्तीर्णाया वसतेः 'असति' अभावे 'विष्वक्' पृथग् अन्यस्यां सतौ स्थितानामागन्तुक वास्तव्यो वा यः 'रत्नाधिकः' आचार्यास्तस्य वसतावागम्यावमरत्नाधिकेन भोजनं कर्त्तव्यम् । अथैकस्मिन् गच्छे द्वयोर्वा गच्छयोः 'असहिष्णवः' ग्लाना भवेयुः अपरिणता वा शैक्षाः परस्परं मिलिताः सन्तोऽसङ्खडं कुर्युः तदा "वीसुं 'ति अपरिणतान् 'विष्वक्' पृथग् भोजयन्ति । "सहूवियरे" त्ति अकारप्रश्लेषाद् असहिष्णूनां प्रथमालकां 'वितरन्ति' प्रयच्छन्ति । ततोऽपरिणतान् वसतौ स्थापयित्वा कृतप्रथमालिकान् असहिष्णून् गृहीत्वा सर्वेऽपि रत्नाधिकवसतौ गत्वा मण्डल्यां भुञ्जते ।अथवोत्तरार्द्धमन्यथा व्याख्यायते-"असहू" इति यद्यवमरत्नाधिक आचार्य स्वयमसहिष्णुर्न शक्नोति रत्नाधिकाचार्यसन्निधौ गन्तुं न वा तावतीं वेलां प्रतिपालयितुं शक्तः 'अपरिणता वा'

Jain Education International For Private & Personal Use Only www.jainelibrary.org

अगीतार्थास्तस्य शिष्यास्तेषां नास्ति कोऽपि सामाचार्या उपदेष्टा आलोचनाया वा प्रतीच्छकः ततो विष्वग्वसतौ द्वावप्याचार्यौ समुद्दिशतः । "सहू विअरे" त्ति 'वा' अथवा यदि रत्नाधिकः सहिष्णुस्ततः 'इतरस्य' अवररत्नाधिकस्योपाश्रयं गत्वा समुद्दिशति ॥ एवं तावद् द्वयोर्गच्छयोर्विधिरुक्तः । अथ त्रयो गच्छा भवेयुस्ततः को विधिः ? इत्याह-

[भा.१६१९] तण्हं एक्केम समं, भत्तट्ठं अप्पमो अवड्ढं तु ।
पच्छा इयरेण समं, आगमन विरेगु सो चेव ॥

वृ- यद्येक आचार्यो वास्तव्यो भवति द्वौ चागन्तुकौ तत इत्थं त्रयाणामाचार्याणां सम्भवे द्वयोरागन्तुकयोर्मध्याद् यो रत्नाधिकस्तस्य सम्बन्धी यो वैयावृत्त्यकरस्तेनैकेन समं वास्तव्याचार्यवैयावृत्त्यकरः पर्यटन् प्राधूर्णकाचार्यस्य हेतोः 'भक्तार्थं' परिपूर्णाहारमात्रारूपम् 'आत्मनश्च' आत्मीयाचार्यार्थम् 'अपार्द्धम्' अर्द्धध्रुवमात्रं श्राद्धकुलेभ्यो गृह्णाति । पश्चाद् 'इतरेण' आगन्तुकावमरत्नाधिकाचार्यसम्बन्धिना वैयावृत्त्यकृता समं पर्यटन् तथैव तद्योग्यं भक्तार्थमात्मनश्चार्द्धध्रुवमात्रं गृह्णाति । "आगमन विरेगो सो चेव" त्ति यदि त्रि-चतुःप्रभृतीनामाचार्याणामागमनं भवति ततः स एव 'विरेकः' विभजनम् । किमुक्तं भवत ? -तदीयैरपि वैयावृत्त्यकरैः समं यथाक्रमं पर्यटता वास्तव्यसाधुनाऽऽत्मीयाचार्यार्थं तथा त्र्यादिभिर्भागैर्भक्तार्थं विभज्य भक्तं ग्रहीतव्यं यथा सर्वान्तिमवैयावृत्त्यकरेण समं पर्यटन्नात्मगुरूणां भक्तार्थं परिपूरयतीति ॥ अथ "गिलाणमाई असति" त्ति पदं विवृणोति-

[भा.१६२०] अतरंतस्स उ जोगासईए इयरेहि भाविए विसिउं ।
अन्नमहानसुवक्खड, जं वा सन्नी सयं भुंजे ॥

वृ- "अतरंतो" ग्लानः तस्य उपलक्षणत्वादाचारयस्यापि यद् योग्यं-प्रायोग्यं तस्य असति-अलाभे इतरे नाम-असंविग्नास्तैर्भावितेषु श्राद्धकुलेषु प्रविश्य यस्मिन् महानसे ते असंविग्ना अध्यवपूरकादिदोषदुष्टां भिक्षां गृह्णते तद् वर्जयित्वा यदन्यस्मिन् महानसे केवलं गृहार्थमेवोपस्कृतं ततो ग्लानाद्यर्थं गृह्यते, यद् वा भक्तं पृथगुपस्कृतं "सन्नी" स गृहस्वामी श्रावकः स्वयं भुङ्क्ते ततो वा गृह्यते, अन्यदीयाद्वा कुतोऽपि गृहाद् यत् प्रहेणकादिकमायातं तद् गृह्यते ॥

अथ "दवाइ एमेव" त्ति पदं व्याख्यानयति-

[भा.१६२१] असतीए व दवस्स व, परिसित्तिय-कंजि-गुलदवाईणि ।
अत्तट्ठियाइँ गिण्हइ, सव्वालंभे विमिस्साइं ॥

वृ- यदि ग्लानस्य गच्छस्य वा योग्यं द्रव्यं-पानकं संविग्नभावितेषु कुलेषु न लभ्यते तदा द्रव्यस्य 'असति' अभावेऽसंविग्नभावितेष्वपि कुलेषु "परिसित्तिय" त्ति येनोषणोदकेन दधिभाजनानि निर्लेप्यन्ते तत् परिषिक्तपानकम्, काञ्जिकम्-आरनालम्, गुलद्रवं नाम-यस्यां कवल्लिकायां गुड उत्काल्यते तस्यां यत् सप्तमतप्तं वा पानीयं तद् गुडोपलिप्तं द्रवं गुडद्रवम्, आदिग्रहणात् चिञ्चापानकादिपरिग्रहः । एतानि पानकानि यदि तैः श्राद्धकैः 'आत्मार्थितानि' प्रथममेवात्मार्थं कृतानि तदा ग्लानाद्यर्थं गृह्णाति । "सव्वालंभे"त्ति यदि सर्वथैव ग्लानस्य वा गच्छस्य वा योग्यमेषणीयं पानकं न लभ्यते तदा "विमीसाइं"त्ति 'विमिश्राणि' असंविग्नानां श्रावकाणां चार्थायाचित्तीकृतानि तान्यपि द्वितीयपदे गृह्यन्ते ॥ अथ "असई इ दवादि" इत्यत्र

Jain Education International For Private & Personal Use Only www.jainelibrary.org

योऽयमादिशब्दस्तस्य सफलतामुपदर्शयन्नाह-

[भा.१६२२] पानट्ठा व पविट्ठो, विसुद्धमाहार छंदिओ गिण्हे।
अद्धाणाइ असंथरि, जइउं एमेव जदसुद्धं ॥

वृ- पानकार्थं वा प्रविष्टो यदि 'विशुद्धेन' एषणीयेनाहारेण गृहपतिना छन्द्यते-निमन्त्र्यते ततश्छन्दितः सन् तमपि गृह्णाति । तथा 'अद्धामाइ'त्ति अध्वनिर्गतानां साधूनां हेतोः आदिशब्दादमौदर्या-ऽशिवादिषु वा असंस्तरणेऽसंविग्नभावितकुलेषु 'एवमेव' ग्लानोक्तविधिना शुद्धान्वेषणे 'यतित्वा' यत्नं कृत्वा ततो यद् 'अशुद्धम्' अनेषणीयं तदप्यागमोक्तनीत्या गृह्णन्ति॥ उक्तं स्थविरकल्पिकानधिकृत्य विहारद्वारम् । अथामूनेवाङ्गीकृत्य सामाचारीद्वारमभिधित्सुः प्रागुक्तमेव द्वारगाथाचतुष्टयमाह-

[भा.१६२३] इच्छा मिच्छा तहक्कारे, आवस्सि निसीहिया य आपुच्छा।
पडिपुच्छ छंदण निमंतणा य उवसंपया चेव ॥

[भा.१६२४] सुय संघयणुवसग्गे, आतंके वेयणा कति जना य।
थंडिल्ल वसहि किच्चिर, उच्चारे चेव पासवणे ॥

[भा.१६२५] ओवासे तणफलए, सारक्खणया य संठवणया य।
पाहुडि अग्गी दीवे, ओहाण वसे कइ जना य।

[भा.१६२६] भिक्खायरिया पानग, लेवालेवे तहा अलेवे य।
आयंबिल पडिमाओ, गच्छम्मि उ मासकप्पो उ ॥

वृ- आसामर्थ प्राग्वद् द्रष्टव्यः ॥ यस्तु विशेषस्तमुपदिदर्शयिषुराह-

[भा.१६२७] ओहेन दसविहं पि य, सामायरिं न ते परिहवंति।
पवयणमाय जहन्ने, सव्वसुयं चेव उक्कोसे ॥

वृ- 'ओधेन' सामान्यतो दशविधामपि सामाचारीं न 'ते' स्थविरकल्पिकाः परिहापयन्ति । आचार्यादिपुरुषविशेषापेक्षया तु या यस्येच्छाकारादिका युज्यते या च तथाकारादिका न युज्यते सा तथा वक्तव्या। श्रुतद्वारमङ्गीकृत्य जघन्यतो गच्छवासिनामष्टौ प्रवचनमातरः श्रुतम्। उत्कर्षतः सर्वमेव श्रुतम्, चतुर्दशपूर्वाणीति हृदयम् ॥

[भा.१६२८] सव्वेसु वि संघयणेसु होंति धइदुब्बला व बलिया वा।
आतंका उवसग्गा, भईया विसहंति व न व त्ति ॥

वृ-स्थविरकल्पिकाः 'सर्वेष्वपि' षट्स्वपि संहननेषु भवन्ति, धृत्याऽपि-मानसावष्टम्भलक्षणया दुर्बला वा भवेयुर्बलिनो वा । 'आतङ्काः' रोगाः 'उपसर्गा' दिव्यादयो यदि समुदीर्यन्ते तदा तान् विषहन्ते वा न वेति 'भक्ताः' विकल्पिताः, यदि ज्ञानादिपुष्टालम्बनं भवति तदा चिकित्सादिविधानान्न सहन्ते, इतरथा तु सम्यगदीनमनसः सहन्त इति भावः ॥

[भा.१६२९] दुविहं पि वेयणं ते, निक्कारणओ सहंति भइया वा।
अममत्त अपरिकम्मा, वसही वि पमज्जणं मोत्तुं ॥

वृ- 'द्विविधामपि' आभ्युपगमिकीमौपक्रमिकीं च वेदनां 'निष्कारणतः' कारणमन्तरेण सहन्ते 'भाज्या वा' असहिष्णुत्व-तीर्थाव्यवच्छेदादिकारणवशान्न सहन्तेऽपीति भावः । तथा वसतिरपि

Jain Education International For Private & Personal Use Only www.jainelibrary.org

तेषाम् 'अममत्वा' ममेयमित्यभिष्वङ्गरहिता, 'अपरिकर्मा' उपलेपनादिपरिकर्मवर्जिता, किं सर्वथैव? न इत्याह-प्रमार्जनामेकां मुक्त्वा । कारणे तु सममत्वा सपरिकर्माऽपि भवति । तत्रापरिणतचारित्राणां शैक्षादीनां ममेयमित्यभिष्वङ्गविधानात् सममत्वा, सपरिकर्मा त्वपरिकर्माया वसतेरलाभे द्रष्टव्या ।। अथ कति जनः स्थण्डिलं चेति द्वारद्वयस्य विशेषमाह-

[भा.१६३०] तिगमाईया गच्छा, सहस्स बत्तीसई उसभसेने ।
थंडिल्लं पि य पढमं, वयंति सेसे वि आगाढे ।।

वृ- 'त्रिकादयः' त्रि-चतुःप्रभृतिपुरु,परिमाणा गच्छा भवेयुः । किमुक्तं भवति ?-एकस्मिन् गच्छे जघन्यतस्त्रयो जना भवन्ति, गच्छस्य साधुसमुदायरूपत्वात्, तस्य च त्रयाणामधस्तादभावादिति । तत ऊर्ध्वं ये चतुः-पञ्चप्रभृतिपुरुषसङ्ख्याका गच्छास्ते मध्यमपरिमाणतः प्रतिपत्तव्यास्तावद् यावदुष्कृष्टं परिमाणं न प्राप्नोति । किं पुनस्तत् ? इति चेद् अत आह-''सहस्स बत्तीसई उसभसेने'' त्ति द्वात्रिंशत् सहाण्येकस्मिन् गच्छे उत्कृष्टं साधूनां परिमाणम्, यथा श्रीऋषभस्वामिप्रथमगणधरस्य भगवत ऋषभसेनस्येति । तथा स्थिण्डिलमपि 'प्रथमम्' अनापातमसंलोकमेते गच्छवासिनो व्रजन्ति। 'आगाढे तु' भावासन्नतादौ कारणे 'शेषाण्यपि' अनापातमसंलोकप्रभृतीनि स्थण्डिलानि गच्छन्ति।। 'कियच्चिरम् ?' इति द्वारं विशेषयन्नाह-

[भा.१६३१] किच्चिर कालं वसिहिह, न ठंति निक्कारणम्मि इइ पुट्ठा ।
अन्नं वा मग्गंती, ठविंति साहारणमलंभे ।।

वृ- कियच्चिरं कालं यूयमस्यां वसतौ वत्स्यथ ? इति पृष्टाः सन्तो निष्कारणे न तिष्ठन्ति, किन्तु क्षेत्रान्तरं गच्छन्ति । अथ बहिरशिवादीनि कारणानि ततस्तत्रैव क्षेत्रेऽन्यां वसतिं मार्गयन्ति । अथ मृग्यामाणाऽप्यन्या न लभ्यते ततः साधारणं वचनं स्थापयन्ति, यथा-निव्याघाते तावद् वयं मासं यावदवतिष्ठामहे व्याघाते तु हीनाधिकम् ।।

अथ लाघवार्थं शेषद्वाराणि तुल्यवक्तव्यत्वादतिदिशन्नाह-

[भा.१६३२] एमेव सेसएसु वि, केवइया वसिहिह त्ति जा नेयं ।
निक्कारण पडिसेहो, कारण जयणं तु कुव्वंति ।।

वृ- 'एवमेव' कियच्चिरद्वारवत् 'शेषेष्वपि' उच्चार-प्रश्रवणादिषु द्वारेषु कियन्तो वत्स्यथेति द्वारं यावन्नेयम् । किम् ? इत्याह-एतेष्वपि निष्कारणे प्रतिषेधः, न वसन्तीति भावः, कारणे तु यतनां कुर्वन्ति । किमुक्तं भवति ?-यदि तिष्ठतामुच्चार-प्रश्रवणयोः परिष्ठापनमकाले फलिहकाभ्यन्तरतो वा नानुजानन्ति ततस्तत्र न तिष्ठन्ति । अथाशिवादिभिः कारणैस्तिष्ठन्ति तत उच्चारं प्रश्रवणं वा मात्रकेषु व्युत्सृज्य बहि परिष्ठापयन्ति । एवमवकाशादिष्वपि द्रष्टव्यम् । नवरमवकाशे यत्र प्रदेशे उपवेशन-भाजनधावनादि नानुज्ञातं तत्र नोपविशन्ति, कमढकादिषु च भाजनानि धावन्ति । तृणफलकान्यपि यानि नानुज्ञातानि तानि न परिभुञ्जते । संरक्षणता नाम यत्र तिष्ठतामगारिणो भणन्ति-यदि वयं तदानीं द्रक्ष्यामस्ततो रक्षिष्याम इति । संस्थापनता नाम वसतेः संस्कारकरणं तस्यामपि नियुक्ता भणन्ति-वयमकुशलाः संस्थापनाकर्ममि कर्त्तव्ये । सप्राभृतिकायापि वसतौ कारणतः स्थिता देशतः सर्वतो वा क्रियमाणायां प्राभृतिकायां स्वकीयमुपकरणं प्रयत्नेन संरक्षन्ति, यावत् प्राभृतिका क्रियते तावदेकस्मिन् पार्श्वे तिष्ठन्ति । सदीपायां साग्निकायां वा

Jain Education International For Private & Personal Use Only www.jainelibrary.org

वसतौ कारणे स्थिता आवश्यकं बहि कुर्वन्ति । अवधानं नाम यदि गृहस्थाः क्षेत्रादिषु गच्छन्तो भणन्ति-'अस्माकमपि गृहेषूपयोगो दातव्यः, अनुपस्थापितशैक्षैर्वा दापयन्ति । यत्र च 'कति जना वत्स्यथ ?' इति पुष्टे सति कारणतस्तिष्ठद्भि परिमाणनियमः कृतो यथा 'एतावद्भिः स्थातव्यं नाधिकैः' ततो यद्यन्ये प्राघूर्णकाः समाच्छन्ति तदा तेषामवस्थापनाय भूयोऽप्यनुज्ञापनीयः सागारिकः, यद्यनुजानाति ततः सुन्दरमेव, अथ नानुजानाति ततोऽन्यस्यां वसतौ स्थापनीयास्ते प्राघूर्णका इति ।। भिक्षाचर्यादीनामवशिष्यमाणद्वाराणां विशेषमाह-

[भा.१६३३] नियताऽनियता भिक्खायरिया पानऽन्न लेवऽलेवाडं ।
अंबिलमनंबिलं वा, पडिमा सव्वा वि अविरुद्धा ।।

वृ- भिक्षाचर्या 'नियता' कदाचिदाभिग्रहिकी 'अनियता' कदाचिदनाभिग्रहिकी, असंसृष्टा-संसृष्टाद्यन्यतमैषणाभिग्रहवती तद्वर्जिता चेति भावः । पानमन्नं च लेपकृतं वा भवेद् अलेपकृतं वा । द्राक्षा-चिञ्चापानकादि तक्र-तीमनादिकं च लेपकृतम्, सौवीरादिकं वल्ल-चणकादिकं चालेपृतम्। आचाम्लमनाचाम्लं वा द्वयमपि कुर्वन्ति । 'प्रतिमाश्च' मासिक्यादिका भद्रादिका वा सर्वा अप्यमीषामविरुद्धा इति ।। उक्तं सामाचारीद्वारम् । अथ स्थितिद्वारमभिधित्सुर्द्वारगाथाद्वयमाह-

[भा.१६३४] खित्ते काल चरित्ते, तित्थे परियाय आगमे वेए ।
कप्पे लिंगे लेसा, झाणे गणना अभिगहा य ।।

[भा.१६३५] पव्वावम मुंडावण, मनसाऽऽवन्ने उ नत्थि पच्छित्तं ।
कारण पडिकम्मम्मि उ, भत्तं पंथो य भयणाए ।।

वृ- क्षेत्रे १ काले २ चारित्रे ३ तीर्थे ४ प्याये ५ आगमे ६ वेदे ७ कल्पे ८ लिङ्गे ९ लेश्यायां १० ध्याने ११ गणनायां १२ एतेषु स्थितिर्वक्तव्या, अभिग्रहाश्चामीषामभिघातव्याः १३ । एवं प्रव्राजना १४ मुण्डापना १५ मनसाऽऽपन्ने त्वपराधे नास्ति प्रायश्चित्तं १६ कारणं १७ प्रतिकर्मणि च स्थिति १८ भक्तं पन्थाश्च भजनया १९ इति गाथाद्वयसमुदायार्थः ।।

अवयवार्थं तु प्रतिद्वारं बिभणिषुराह-

[भा.१६३६] पन्नरसकम्मभूमिसु, खेत्तऽद्धोसप्पिणीइ तिसु होज्जा ।
तिसु दोसु य उस्सप्पे, चउरो पलिभाग साहरणे ।।

वृ- क्षेत्रद्वारे जन्मतः सद्भावतश्च स्थविरकल्पिकाः 'पञ्चदशस्वपि कर्मभूमिषु' भरतैरावत-विदेहपञ्चकलक्षणासु भवन्ति । संहरणतः पञ्चदशानां कर्मभूमीनां त्रिंशतामकर्मभूमीनामन्यतरस्यां भूमौ भवेयुः । 'अद्धा' कालस्तमङ्गीकृत्यावसर्पिण्यां जन्मतः सद्भावतश्च 'त्रिषु' तृतीय-चतुर्थ-पञ्चमारकेषु भवेयुः । ''तिसु दोसु य उसप्पे''त्ति उत्सर्पिण्यां जन्मतः 'त्रिषु' द्वितीय-तृतीय-चतुर्थेष्वरकेषु सद्भावतस्तु 'द्वयोः' तृतीय-चतुर्थारकयोर्भवन्ति । नोअवसर्पिण्युत्सर्पिणीकाले जन्मतः सद्भावतश्च दुःषमसुषमाप्रतिभागे भवन्ति, संहरणतस्तु चत्वारोऽपि प्रतिभागा अमीषां विषयतया प्रतिपत्तव्याः, तद्यथा-सुषमसुषमाप्रतिभागः सुषमाप्रतिभागः सुषमदुःषमाप्रतिभागः दुषमसुषमाप्रतिभागश्चेति ।।

[भा.१६३७] पढम-बिइएसु पडिवज्जमाण इयरे उ सव्वचरणेसु ।
नियमा तित्थे जम्मऽट्ठ जहन्ने कोडि उक्कोसे ।।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

[भा.१६३८] पव्वज्जाए मुहुत्तो, जहन्नमुक्कोसिया उ देसूना ॥
आगमकरणे भइया, ठियकप्पे अट्ठिए वा वि ॥

वृ- प्रतिपद्यमानका अमी प्रथमे वा-सामायिकाख्ये द्वितीये वा-छेदोपस्थापनीयाख्ये चारित्रे भवेयुः । 'इतरे नाम' पूर्वप्रतिपन्नास्ते सर्वेष्वपि चरणेषु भवन्ति, सामायिकादिषु यथाख्यातपर्यन्तेष्विति भावः । तथा नियमादमी तीर्थे भवन्ति नातीर्थे । पर्यायो द्विधा-गृहिपर्यायः प्रव्रज्यापर्यायश्च । तत्र गृहिपर्यायो जघन्यतो जन्मत आरभ्याष्टौ वर्षाणि, उत्कर्षतः पूर्वकोटी । प्रव्रज्यापर्यायो जघन्यतोऽन्तर्मुहूर्त्तम्, तदनन्तरं मरणात् प्रतिपाताद्वा, उत्कर्षतस्तु देशोना पूर्वकोटी। आगमः-अपूर्वश्रुताध्ययनं तस्य करणे 'भाज्याः' अमी कुर्वन्ति वा न वा तमिति भावः । कल्पद्वारे-स्थिकल्पे वा अस्थितकल्पे वा भवेयुः । वेदद्वारं सुज्ञानत्वाद् भाष्यकृता न भावितम् । इत्थं तु द्रष्टव्यम्-वेदः स्त्री-पुं-नपुंसकभेदात् त्रिविधोऽप्यमीषां प्रतिपत्तिकाले भवेत्, पूर्वप्रतिपन्नकानां त्ववेदकत्वमपि भवतीति ॥

[भा.१६३९] भइया उ दव्वलिंग, पडिवत्ती सुद्धलेस-धम्मेहिं ।
पुव्वपडिवन्नगा पुन, लेसा झाणे अ अन्नयरे ॥

वृ- प्रतिपद्यमानकाः पूर्वप्रतिपन्नकाश्च द्रव्यलिङ्गे 'भक्ताः' विकल्पिताः, कदाचित् तद् न भवत्यपीति भावः । भावलिङ्गं तु नियमात् सर्वदैव भवति । तथा प्रतिपत्ति शुद्धलेश्या-धर्मध्यानयोर्भवेत् । किमुक्तं भवति ?-प्रथमतः प्रतिपद्यमानकाः शुद्धास्वेव तिसृषु लेश्यासु आज्ञाविचयादौ च धर्मध्याने वर्त्तमानाः प्रतिपत्तव्याः । पूर्वप्रतिपन्नकाः पुनः षन्नां लेश्यानामन्यतरस्यां लेश्यायामार्त्तादीनां च चतुर्णां ध्यानानामन्यतरस्मिन् ध्याने भवेयुः ॥ अथ लेश्या-ध्यानयोः कः प्रतिविशेषः ? उच्यते-लिश्यते-रिलष्यते कर्मणा सह या जीवः सा लेश्या-कृष्णादिद्रव्य-साचिव्यजनितो जीवस्य शुभाशुभरूपः परिणामविशेषः । उक्तञ्च-

कृष्णादिद्रव्यसाचिव्यात्, परिणामो य आत्मनः ।
स्फटिकस्येव तत्रायं, लेश्याशदः प्रवर्त्तते ॥

स च चलो वा स्यादचल वा । ध्यानं पुनर्निश्चल एवाशुभः शुभो वा आत्मनः परिणामः । तथा चाह-

[भा.१६४०] झाणेण होइ लेसा, झाणंतरओ व होइ अन्नयरी ।
अज्झवसाओ उ दढो, झाणं असुभो सुभो वा वि ॥

वृ- लेश्या द्विविधा-द्रव्यतो भावतश्च । तत्र द्रव्यलेश्यामुपरिष्टाद् वक्ष्यति । भावलेश्या त्वनन्तरोक्त एव शुभाशुभरूपो जीवपरिणामः । सा चैवंविधा शुभाशुभपरिणामरूपा कृष्णादीनामन्यतमा "लेस" त्ति भावलेश्या ध्यानेन वा भवति ध्यानान्तरत वा । ध्यानान्तरं नाम-अदढाध्यवसायरूपा चिन्ता, यद्वा ध्यानस्य चान्तरिका ध्यानान्तरमुच्यते । ध्यानं पुनः 'दढः' निश्चलोऽध्यवसायोऽशुभो वा शुभो वा मन्तव्यम् । स च निश्चलोऽध्यवसायो मानसो वाचिकः कायिकश्चेति त्रिधा द्रष्टव्यः। दढश्चाध्यवसायोऽन्तर्मुहूर्त्तमात्रमेव कालं यावद् द्रष्टव्यः, परतो निरन्तरं दढाध्यवसायस्य कर्तुमशक्यत्वात् । यश्चादढौऽध्यवसायः स सर्वोऽपि चिन्तेत्यभिधीयते ॥ आह यद्येवं तर्हि चिन्ता-ध्यानयोरन्यवमापन्नम् ? उच्यते-नायमेकान्तः किन्तु स्यादेकत्वं स्यादन्यत्वम् । कथं पुनः ? इति

Jain Education International For Private & Personal Use Only www.jainelibrary.org

उच्यते-

[भा.१६४१] झाणं नियमा चिंता, चिंता भइया उ तीसु ठाणेसु।
झाणे तदंतरम्मि उ, तव्विवरीया व जा काइ ॥

वृ- यद् मनःस्थैर्यरूपं ध्यानं तद् नियमात् चिन्ता। चिन्ता तु 'भक्ता' विकल्पिता त्रिषु स्थानेषु। तथाहि-कदाचिद् 'ध्याने' ध्यानविषया चिन्ता भवति यदा दृढाध्यवसायेन चिन्तयति। "तदंतरम्मि उ" ति तस्य-ध्यानस्यान्तरं तदन्तरं तस्मिन् वा चिन्ता भवेत्, ध्यानान्तरिकायामित्यर्थः। 'तद्विपरीता वा' या काचिद् ध्याने ध्यानान्तरिकायां वा नावतरति किन्तु विप्रकीर्णा चित्तचेष्टा साऽपि चिन्ता प्रतिपत्तव्या। अतो यदा दृढाध्यवसायेन चिन्तयति तदा चिन्ताध्यानयोरेकत्वम्, अन्यदा पुनरन्यत्वम्। अथ ध्यानस्यैव भेदानाह-

[भा.१६४२] कायादि तिहिक्किक्कं, चित्तं तिव्व मउयं च मज्झं च।
जह सीहस्स गतीओ, मंदा य पुता दुया चेव ॥

सत् पुनर्दृढाध्यवसायात्मकं चित्तं त्रिधा-कायिकं वाचिकं मानसिकं च। कायिकं नाम यत् कायव्यापारेण व्याक्षेपान्तरं परिहरन्नुपयुक्तो भङ्गकचारणिकां करोति, कूर्मवद्वा संलीनाङ्गोपाङ्गस्तिष्ठति। वाचिकं तु 'मयेदृसी निरवद्या भाषा भाषितव्या, नेदृसी सावद्या' इति विमर्शपुरस्सरं यद् भाषते, यद्वा विकथादिव्युदासेन श्रुतपरावर्त्तनादिकमुपयुक्तः करोति तद् वाचिकम्। मानसं त्वेकस्मिन् वस्तुनि चित्तस्यैकाग्रता। पुनरेकैकं त्रिविधम्-तीव्रं मृदुकं च मध्यं च। तत्र तीव्रम्-उत्कटम्, मृदुकं च-मन्दम्, मध्यं च-नातितीव्रं नातिमृदुकमित्यर्थः। यथा सिंहस्य गतयस्तिस्रो भवन्ति। तद्यथा-मन्दा च प्लुता च द्रुता चैव। तत्र मन्दा-विलम्बिता, प्लुता-नातिमन्दा नातित्वरिता, द्रुता च-अतिशीघ्रवेगा ॥ स्याद् बुद्धिः केयं पुनर्ध्यानान्तरिका ? इति उच्यते-

[भा.१६४३] अन्नतरझाणऽतीतो, बिइयं झाणं तु सो असंपत्तो।
झाणंतरम्मि वट्टइ, बिपहे व विकुंचियमईओ ॥

वृ-अन्यतरस्माद्-द्रव्याद्यन्यतरवस्तुविषयाद् ध्यानादतीतः-अतिक्रान्तो यः कश्चिदद्यापि द्वितीयं, ध्यानं न सम्प्राप्नोति स द्वितीयं ध्यानमसम्प्राप्तः सन् यद् ध्यानान्तरे वर्त्तते सा ध्यानान्तरिका भवतीति शेषः। इयमत्र भावना-द्रव्यादीनामन्यतमं ध्यातवतो यदा चित्तमुत्पद्यते 'सम्प्रति शेषाणां ध्यातव्यानां कतरद् ध्यायामि ?' इत्येवंविधो विमर्शो ध्यानान्तरिकेत्युच्यते। दृष्टान्तोऽत्र "बिपहे व विकुंचियमतीउ" त्ति द्विपथं-मार्गद्वयस्थानम्, ततो यथा कश्चिदेकेन पथा गच्छन् पुरस्ताद् 'द्विपथे' मार्गद्वये दृष्टे सति 'विकुञ्चिमतिकः' 'अनयोर्मार्गयोः कतरेण व्रजामि ?' इति विमर्शाकुलबुद्धि सन्नपान्तराले वर्त्तते, एवमेषोऽपि ध्यानान्तरे इति ॥

अथ शुभाशुभध्यानज्ञापनार्थमिदमाह-

[भा.१६४४] वण्ण-रस-गंध-फासा, इट्ठाऽनिट्ठा विभासिया सुत्ते।
अहिकिच्च दव्वलेसा, ताहि उ साहिज्जई भावो ॥

वृ- 'सूत्रे' प्रज्ञापनादौ कृष्णादीनां लेश्यानां यद् वर्ण-गन्ध-रस-स्पर्शा इष्टा अनिष्टाश्च 'विभाषिताः' विविधम्-अनेकैरुपमानैर्वर्णिताः। तत्र वर्णवर्णना यथा-

कण्हलेसा णं भंते! केरिसिया वन्नेणं पन्नत्ता ? से जहानामए जीमूते इ वा अंजणे इ वा कज्जले

Jain Education International For Private & Personal Use Only www.jainelibrary.org

इ वा गवले इ वा गवलवलए इ वा जंबूफले इ वा अद्दायरेट्ठए इ वा परपुट्ठे इ वा भमरे इ वा भमरावली इ वा गयकलभे इ वा किण्हकेसरे इ वा आगासथिग्गले इ वा किण्हासोए इ वा किण्हकणवीरे इ वा किण्हबंधुजीवए इ वा भवे एयारूवे ? गोयमा ! नो इणट्ठे समट्ठे, कण्हलेसा णं इत्तो अनिट्ठतरिया चेव वन्नेणं पन्नत्ता समणाउसो ! रसवर्णना यथा- कण्हलेसा णं भंते ! केरिस्या आसाएणं पन्नत्ता ? से जहानामए निंबे इ वा निबंरए इ वा निंबछल्ली इ वा निंबफाणिए इ वा कुडए इ वा कुडगफलए इ वा इत्यादि। गन्धवर्णना यथा-

जह गोमडस्स गंधो, सुणगमडस्स व जहा अहिमडस्स।
इत्तो वि अनंतगुणो, लेसाणं अप्पसत्थाणं ॥
जह सुरभिकुसुमगंधो, सुगंधवासाण पिस्समाणाणं।
इत्तो वि अनंतगुणो, पसत्थलेसाण तिण्हं पि ॥

—स्पर्शवर्णना यथा—

जह करगयस्स फासो, गोजिब्भाए व सागपत्ताणं।
एत्तो वि अनंतगुणो, लेसाणं अप्पस्थाणं ॥
जह बूरस्स व फासो, नवनीयस्स व सिरीसकुसुमाणं।
इत्तो वि अनंतगुणो, पसत्थलेसाण तिण्हं पि ॥

तदेतत् सर्वमपि द्रव्यलेश्या अधिकृत्य प्रतिपत्तव्यम्। द्रव्यलेश्या नाम-जीवस्य शुभाशुभ-परिणामरूपायां भावलेश्यायां परिणममानस्योपष्टम्भजनकानि कृष्णादीनि पुद्गलद्रव्याणि। 'ताभिश्च' द्रव्यलेश्याभि 'भावः' शुभाशुभाध्यवसायरूपः साध्यते ॥ इदमेव भावयति-

[भा.१६४५] पत्तेयं पत्तेयं, वन्नाइगुणा जहोदिया सुत्ते।
तारिसओ च्चिय भावो, लेस्साकाले वि लेस्सीणं ॥

वृ- 'प्रत्येकं प्रत्येकं' कृष्णादीनां मध्यादेकैकस्या द्रव्यलेश्याया वर्णादयो गुणाः 'यथा' याद्दशाः शुभा अशुभाश्च 'उदिताः' अभिहिताः 'सूत्रे' प्रज्ञापनादौ ताद्दश एव शुभोऽशुभो वा 'भावः' परिणामो लेश्यिनामपि लेश्याकाले भवति। लेश्या विद्यते येषां ते लेश्यिनः, शिखादेराकृतिगणत्वाद् इनप्रत्ययः, लेश्यावन्त इत्यर्थः, तेषामिति ॥ अथैताभिर्भावलेश्याभिरुपचितस्य कर्मणः कथमुदयो भवति ? इत्याह-

[भा.१६४६] जं चिज्जए उ कम्मं, जं लेसं परिणयस्स तस्सुदओ।
असुभो सुभो व गीतो, अपत्थ-पत्थऽन्न उदओ वा ॥

वृ- "जं लेसं"ति सप्तम्यर्थे द्वितीया, ततोऽयमर्थ-'यस्यां' कृष्णादीनामन्यतमस्यां लेश्यायां परिणतस्य जीवस्य यद् अशुभं शुभं वा 'कर्म' ज्ञानावरणादि चीयते, कर्मकर्त्तर्ययं प्रयोगः, चयं-बन्धुमुपगच्छतीत्यर्थः, 'तस्य' एवमशुभरूपतया शुभरूपतया वा बद्धस्य कर्मण उदयावलिकां प्राप्तस्याशुभः शुभो वा यथानुरूप एवोदयः 'गीतः' संशब्दितस्तीर्थकरैः। द्दष्टान्तमाह- 'अपथ्य-पथ्यान्न उदय इव' यथा अपथ्यान्नं भुक्तवतो ज्वरादिरोगद्वारेणापथ्य एवोदयो भवति, पथ्यान्नं तु भुक्तवतः सुखासिकादिद्वारेण पथ्यः। एवं कर्मणोऽपि प्रशस्ता-ऽप्रशस्तलेश्या परिणामबद्धस्य

Jain Education International For Private & Personal Use Only www.jainelibrary.org

विपाकः शुभाशुभो भवतीति ॥ उक्तं सप्रपञ्चं ध्यान-लेश्याद्वारद्वयम् । अथ गणद्वारमाह-

[भा.१६४७] पडिवज्जमाण भइया, एगो व सहस्ससो व उक्कोसा ।
कोडिसहस्सपुहत्तं, जहन्न-उक्कोसपडिवन्ना ॥

वृ- स्थविरकल्पस्य प्रतिपद्यमानकाः 'भाज्याः' विवक्षितकाले भवेयुर्वा न वा । यदि भवेयुस्तत एको द्वौ वा त्रयो वा उत्कर्षतो यावत् सहपृथक्त्वम् । पूर्वप्रतिपन्ना जघन्यतोऽपि कोटिसहपृथक्त्वम्, उत्कर्षतोऽपि कोटिसहपृथक्त्वम् । नवरं जघन्यपदादुत्कृष्टपदे विशेषाधिकत्वम् ॥

गतं गणनाद्वारम् । अथाभिग्रहद्वारं व्याख्यायते-ते च चतुर्द्धा, तद्यथा- द्रव्यतः क्षेत्रतः कालतो भावतश्च । तत्रद्रव्यतस्तावदाह-

[भा.१६४८] लेवडमलेवडं वा, अमुगं दव्वं च अज्ज घिच्छामि ।
अमुगेन व दव्वेणं, अह दव्वाभिग्गहो नाम ॥

वृ- 'लेपकृतं' जगारिप्रभृतिकम् 'अलेपकृतं वा' तद्विपरीतं वल्ल-चणकादि 'अमुकं वा' निर्दिष्टनामकं मण्डकादिद्रव्यमहं ग्रहीष्यामि, 'अमुकेन वा' दर्वी-कुन्तादिना दीयमानमहं ग्रहीष्ये, 'अथ' अयं 'द्रव्याभिग्रहो नाम' भिक्षाग्रहणादिविषयः प्रतिज्ञाविशेष इति ॥ क्षेत्राभिग्रहमाह-

[भा.१६४९] अट्ठ उ गोयरभूमी, एलुगविक्खंभमित्तगहणं च ।
सग्गाम परग्गामे, एवइए घरा य खित्तम्मि ॥

वृ- अष्टौ गोचरभूमयो भवन्ति । ताश्चैताः-ऋज्वी १ गत्वाप्रत्यागतिका २ गोमूत्रिका ३ पतङ्गवीथिका ४ पेडा ५ अर्द्धपेडा ६ अभ्यन्तरशम्बूका ७ बहिशम्बूका ८ च । तत्र यस्यामेकां दिशमभिगृह्योपाश्रयाद् निर्गतः प्राञ्जलेनैव पथा समश्रेणिव्यवस्थितगृहपङ्क्तौ भिक्षां परिभ्रमन् तावद् याति यावत् पङ्क्तौ चरमगृहम्, ततो भिक्षामगृह्णन्नेवापयातिऽपि प्राञ्जलयैव गत्वा प्रतिनिवर्त्तते सा ऋज्वी १ । यत्र पुनरेकस्यां गृहपङ्क्तौ परिपाट्या भिक्षमाणः क्षेत्रपर्यन्तं गत्वा प्रत्यागच्छन् पुनर्द्वितीयस्या गृहपङ्क्तौ भिक्षामटति सा गत्वाप्रत्यागतिका, 'गत्वा प्रत्यागतिर्यस्यां सा गत्वाप्रत्यागतिका' इति व्युत्पत्तेः २ । यस्यां तु वामगृहाद् दक्षिणगृहे दक्षिणगृहाच्च वामगृहे भिक्षां पर्यटति सा गोः-बलीवर्दस्य मूत्रणं गोमूत्रिका, उपचारात् तदाकारा गोचरभूमिरपि गोमूत्रिका ३ । यस्यां तु त्रिचतुरादीनि गृहाणि विमुच्याग्रतः पर्यटति सा पतङ्गवीथिका, पतङ्गः शलभस्तस्येव या वीथिका-पर्यटनमार्गं सा पतङ्गवीथिका, पतङ्गो हि गच्छन्नुत्लुत्योत्लुत्यानियतया गत्या गच्छति एवं गोचरभूमिरपि या पतङ्गोड्डयनाकारा सा पतङ्गवीथिकेति भावः ४ । यस्यां तु साधुः क्षेत्रं पेटावत् चतुरं विभज्य मध्यवर्तीनि च गृहाणि मुक्त्वा चतसृष्वपि दिक्षु समश्रेण्या भिक्षामटति सा पेटा ५ । अर्द्धपेटाऽप्येवमेव, नवरमर्द्धपेटासदृशसंस्थानयोर्दिगद्वयसम्बद्धयोर्गृहश्रेण्योरत्र पर्यटति ६ । तथा शम्बूकः-शङ्खः तद्वद् या वीथि सा शम्बूका । सा द्वेधा-अभ्यन्तरशम्बूका बहिशम्बूका च । यस्यां क्षेत्रमध्यभागात् शङ्खवद् वृत्तया परिभ्रमणभङ्गया भिक्षां गृह्णन् क्षेत्रबहिर्भागमागच्छति सा अभ्यन्तरशम्बूका ७ । यस्यां तु क्षेत्रबहिर्भागात् तथैव भिक्षामटन् मध्यभागमायाति सा बहिशम्बूका ८ । आह च स्वोपज्ञपञ्चवस्तुकटीकायां श्रीहरिभद्रसूरि- अब्भिंतरसंबुक्का बाहिसंबुक्का य संखनाहिखेत्तोवमा । एगीए अंतो आढवइ बाहिरतो संनियट्टइ, इयरीए विवज्जओ त्ति । तथा "एलुगविक्खंभमित्तगहणं च" त्ति एलुक-उदुम्बरस्तस्य विष्कम्भः-आक्रमणं तन्मात्रेण मया ग्रहणं

Jain Education International For Private & Personal Use Only www.jainelibrary.org

कर्त्तव्यमिति कस्याप्यभिग्रहो भवति, यथा भगवतः श्रीमन्महावीरस्वामिनः। तथा स्वग्रामे वा परग्रामे वा एतावन्ति गृहाणि मया प्रवेष्टव्यानीत्येषः 'क्षेत्रे' क्षेत्रविषयोऽभिग्रहः ॥ कालाभिग्रहमह-

[भा.१६५०] काले अभिग्गहो पुन, आई मज्झे तहेव अवसाने।
अप्पत्ते सइ काले, आई बिइओ अ चरिमम्मि ॥

वृ- 'काले' कालविषयोऽभिग्रहः पुनरयम्-आदौ मध्ये तथैवावसाने भिक्षावेलायाः। एतदेव व्याचष्टे-अप्राप्ते भिक्षाकाले यत् पर्यटति सः 'आदौ' मध्ये तथैवावसाने भिक्षावेलायाः। एतदेव व्याचष्टे-अप्राप्ते भिक्षाकाले चरति स द्वितीयो मध्यभिक्षाकालविषयोऽभिग्रहः। यत् पुनः 'चरिमे' अतिक्रान्ते भिक्षाकाले पर्यटति सोऽवसानविषयोऽभिग्रहः ॥ कालत्रयेऽपि गुण-दोषानाह-

[भा.१६५१] दिंतग-पडिच्छगाणं, हविज्ज सुहुमं पि मा हु अचियत्तं।
इअअप्पत्ते अइए, पवत्तणं मा ततो मज्झे ॥

वृ- 'ददत्-प्रतीच्छकयोः' इति भिक्षादातुरगारिणो भिक्षाप्रतीच्छकस्य च वनीपकादेर्मा भूत् सूक्ष्ममपि 'अचियत्तम्' अप्रीतिकं 'इति' अस्माद्धेतोरप्राप्तेऽतीते च भिक्षाकालेऽटनं न श्रेय इति गम्यते। "पवत्तणं मा ततो मज्झे"त्ति अप्राप्तेऽतीते वा पर्यटतः प्रवर्त्तनं पुरःकर्म-पश्चात्कमदिर्मा भूत् 'ततः' एतेन हेतुना 'मध्ये' प्राप्ते भिक्षाकाले पर्यटति ॥ अथ भावाभिग्रहमाह-

[भा.१६५२] उक्खित्तमाइचरगा, भावजुया खलु अभिग्गहा होंति।
गायंतो व रुदंतो, जं देइ निसन्नमादी वा ॥

वृ-उत्क्षिप्तं-पाकपिठरात् पूर्वमेव दायकेनोद्ध तं तद् ये चरन्ति-गवेषयन्ति ते उत्क्षिप्तचरकाः, आदिशब्दाद् निक्षिपतचरकाः सङ्ख्यादत्तिका दृष्टलाभिकाः पृष्टलाभिका इत्यादयो गृह्यन्ते। त एते गुण-गुणिनोः कथञ्चिदभेदाद् भावयुताः सङ्ख्यादत्तिका दृष्टलाभिकाः पृष्टलाभिका इत्यादयो गृह्यन्ते। त एते गुण-गुणिनोः कथञ्चिदभेदाद् भावयुताः खल्वभिग्रहा भवन्ति, भावाभिग्रहा इति भावः। यद्वा गायन् यदि दास्यति तदा मया ग्रहीतव्यम्, एवं रुदन् वा निषन्नादिर्वा, आदिग्रहणादुत्थितः सम्प्रस्थितश्च यद् ददाति तद्विषयो योऽभिग्रहः स सर्वोऽपि भावाभिग्रह उच्यते ॥ तथा-

[भा.१६५३] ओसक्कण अहिसक्कण, परम्मुहाऽलंकिएयरो वा वि।
भावन्नयरेण जुओ, अह भावाभिग्गहो नाम ॥

वृ- 'अवष्वष्कन्' अपसरणं कुर्वन् 'अभिष्वष्कन्' सम्मुखमागच्छन् 'पराङ्मुखः' प्रतीतः, अलङ्कृतः कटक-केयूरादिभिः, 'इतरो वा' अनलङ्कृतः पुरुषो यदि दास्यति तदा मया ग्राह्यमिति। एतेषां भावानामन्यतेण भावेन युतः 'अथ' अयं भावाभिग्रहो नामेति। एते च द्रव्यादयश्चतुर्विधा अप्यभिग्रहास्तीर्थकरैरपि यथायोगमाचीर्णत्वाद् मोह-मदापनयनप्रत्यलत्वाच्च गच्छवासिनां तथाविधसहिष्णुपुरुषविशेषापेक्षया महत्याः कर्मनिर्जराया निबन्धनं प्रतिपत्तव्या इति ॥

अथ प्रव्राजना-मुण्डापनाद्वारे भावयति-

[भा.१६५४] सच्चित्तदवियकप्पं, छव्विहमवि आयरंति थेरा उ।
कारणओ असहू वा, उवएसं दिंति अन्नत्थ ॥

वृ-प्रव्राजना-मुण्डापनाभ्यामुपलक्षणत्वात् षड्विधोऽपि सच्चित्तद्रव्यकल्पो गृहीतः। तद्यथा-प्रव्राजना १ मुण्डापना २ शिक्षापना ३ उपस्थापना ४ सम्मुञ्जना ५ संवासना ६ चेति। तमेवंविधं

Jain Education International For Private & Personal Use Only www.jainelibrary.org

षडविधमपि सचित्तद्रव्यकल्पमाचरन्ति 'स्थविराः' गच्छावासिनः । ''कारणओ'' त्ति तथाविधैरनाभाव्यतादिभि कारणैः 'असहिष्णवो वा' स्वयं वस्त्र-पात्रादिभिर्ज्ञानादिभिश्च शिष्याणां सङ्ग्रहोपग्रही कर्त्तुमसमर्था उपदेशम् 'अन्यत्र' गच्छान्तरे 'ददति' प्रयच्छन्ति, अमुकत्र गच्छे संविग्नगीतार्था आचार्या सन्ति तेषां समीपे भवता दीक्षा प्रतिपत्तव्येति ॥

अथ ''मनसाऽऽपन्ने नास्ति प्रायश्चित्तम्'' इति पदं व्याख्यानयति-

[भा.१६५५] जीवो पमायबहुलो पडिवक्खे दुक्करं ठवेउं जे ।
केत्तियमित्तं वोज्झिति, पच्छित्तं दुग्गयरिणी वा ॥

वृ-अयं 'जीवः' प्राणी 'प्रमादबहुलः' अनादिभवाभ्यस्तप्रमादभावनाभावितः, ततः 'प्रतिपक्षे' अप्रमादे स्थापयितुं दुष्करं भवति, दुःखेन अप्रमादभावनायां स्थाप्यत इत्यर्थः । ''जे'' इति निपातः पादपूरणे । अतो 'दुर्गतऋणिक इव' दरिद्राधमर्ण इव अतिप्रभूतं ऋणं अतिचपलचित्तसम्भवापराधवशादयं प्रमादबहुलो जीवः पदे पदे समापद्यमानं कियन्मात्रं प्रायश्चित्तं 'वक्ष्यति' वोढुंशक्ष्यति ? इति मनसाऽऽपन्नेऽप्यपराधे नास्ति तपःप्रायश्चित्तं स्थविरकल्पिकानाम्, आलोचनाप्रतिक्रमणप्रायश्चित्ते तु तत्रापि भवत इति मन्तव्यम् ॥

अथ ''कारणे पडिकम्मम्मि य'' त्ति पदं व्याख्यायते-कारणम्-अशिवाऽवमौदर्यादिकं तत्रोत्पन्ने द्वितीयपदमप्यासेवन्ते । तथा निष्कारणे निष्प्रतिकर्मशरीराः । कारणे तु ग्लानमाचार्यं वादिनं धर्मकथिकं च प्रतीत्य पादधावन-मुखमार्जन-शरीरसम्बाधनादिकरणात् सप्रतिकर्माण इति । ''भत्तं पंथो य भयणाए'' त्ति भक्तं पन्थाश्च भजनया । किमुक्तं भवति ? -उत्सर्गस्तावत् तृतीयपौरुष्यां भिक्षाटनं विहारं च कुर्वन्ति, अपवादतस्तु तदानीं भिक्षाया अलाभे काले वाऽपूर्यमाणे शेषास्वपि पौरुषीष्विति । गतं स्थितिद्वारम् । अथोपसंहरन्नाह-

[भा.१६५६] गच्छम्मि उ एस विही, नायव्वो होइ आनुपुव्वीए ।
जं एत्थं नाणत्तं, तमहं वोच्छं समासेणं ॥

वृ- 'गच्छे' गच्छवासिनां 'एषः' अनन्तरोक्तो विधिर्ज्ञातव्यः 'आनुपूर्व्या' परिपाट्या । यत् पुनरत्र 'नानात्वं' विशेषस्तदहं वक्ष्ये समासेन ॥ एतदेव सविशेषमाह-

[भा.१६५७] सामायारी पुनरवि, तेसिं इमा होइ गच्छवासीणं ।
पडिसेहो व जिणाणं, जं जुज्जइ वा तगं वोच्छं ॥

वृ- सामाचारी पुनरपि तेषां गच्छवासिनां मासकल्पेन विहरताम् 'एषा' वक्ष्यमाणा भवति । 'जिनानां' जिनकल्पिकानामस्या एव सामाचार्याः प्रतिषेधो वा वक्तव्यः । 'यद् वा' प्रत्युपेक्षणादिकं तेषामपि युज्यते तकमपि वक्ष्ये ॥ प्रतिज्ञातमेव निर्वाहयन् द्वारगाथाद्वयमाह-

[भा.१६५८] पडिलेहण निक्खमणे, पाहुडिया भिक्ख कप्पकरणे य ।
गच्छ सतिए अ कप्पे, अंबिल भरिए य ऊसित्ते ॥

वृ- प्रथमतः प्रत्युपेक्षणा वक्तव्या । ततो 'निष्क्रमणं' कति वारा उपाश्रयाद् निर्गन्तव्यमिति, प्राभृतिका सूक्ष्म-बादरभेदाद् द्विविधा, 'भिक्षा' गोचरचर्या, 'कल्पकरणं च' भाजनस्य धावनविधिलक्षममित्येतानि वक्तव्यानि । ''गच्छ सइए'' त्ति शतिकाः-शतसङ्ख्यपुरुषपरिमाणा ये गच्छास्तेषु प्रभूतेन पानकेन प्रयोजनं भवेत्, तच्च ''कप्पे अंबिल'' त्ति 'कल्प्यं' कल्पनीयम्

Jain Education International For Private & Personal Use Only www.jainelibrary.org

'अम्लं च' सौवीरं ग्रहीतव्यम्, अनेन सम्बन्धेन सौवीरिणीसप्तकमभिधानीयम्। "भरिए य" त्ति तस्याः सौवीरिण्याः सप्तविधं भरणं वाच्यम्। "ऊसित्ति" त्ति उत्सेचनमुत्सिक्तं-सौवीरस्योल्लिञ्चनमित्यर्थः तत्स्वरूपं च निरूपणीयम्॥

[भा.१६५९] परिहरणा अणुजाणे, पुरकम्मे खलु तहेव गेलन्ने।
गच्छपडिबद्धऽहालंदि उवरि दोसा य अववादे॥

वृ- "परिहरण" त्ति नोदकः प्रश्नयिष्यति-यदि साम्प्रतं शतिकेष्वपि गच्छेष्वित्थमाधाकर्मादयो दोषा उद्भवन्ति ततः पूर्वं साहेसु गच्छेषु साधवः कथमाधाकर्मादीनां परिहरणं कृतवन्तः? इति। अत्राऽऽचार्य प्रतिवक्ष्यति-'अनुयानं' रथयात्रा उपलक्षणत्वात् स्नात्रादेरपि परिग्रहः, ततो यथा सम्प्रति रथयात्रादौ समवसरणे सहसङ्ख्याका अपि साधवो मिलिताः सन्तः आधाकर्मादिकं परिहरन्ति तथा पूर्वमपि परिहृतवन्त इत्यनेन सम्बन्धेनानुयानविषयो विधिर्वक्तव्यः। ततः पुरः कर्म्मस्वरूपं निरूपयितव्यम्। 'खलुः' वाक्यालङ्कारे। तथैव ग्लान्यविषयो विधि प्रतिपादनीयः। गच्छप्रतिबद्धानां यथालन्दिकानां सामाचारी दर्शनीया। ततः 'उपरि' मासकल्पादूर्द्धव तिष्ठतां स्थविरकल्पिकानां दोषा अभिधातव्याः। ततः 'अपवादः' द्वितीयपदमुपदर्शनीयमिति द्वारगाथाद्वयसमासार्थः॥

अथ विस्तरार्थं प्रतिपदं प्रचिकटयिषुः "यथोद्देशं निर्देशः" इति वचनप्रामाण्यात् प्रथमतः प्रत्युपेक्षणाद्वारमभिधातुकाम इमां प्रतिद्वारगाथामाह-

[भा.१६६०] पडिलेहणा उ काले, अपडिलेह दोस छसु वि काएसु।
पडिगहनिक्खेवणया, पडिलेहणिया सपडिवक्खा॥

वृ- प्रतिलेखना 'तुः' एवकारार्थो भिन्नक्रमश्च काल एव कर्त्तव्या नाकाले। "अपडिलेह" त्ति अप्रतिलेखने प्रायश्चित्तम्। "दोस" त्ति दोषाः-आरभडाद्यास्तैर्दुष्टां प्रत्युपेक्षणां कुर्वतः प्रायश्चित्तम्। "छसु वि काएसु" त्ति षट्सु जीवनिकायेषु स्वयं प्रतिष्ठित उपधिर्वा प्रतिष्ठित इति। प्रतिग्रहस्य निक्षेपणं वर्षासु विधेयम्। प्रतिलेखना 'सप्रतिपक्षा' सापवादा भवतीति। एतानि द्वाराणि वक्तव्यानीति समासार्थः॥ व्यासार्थं तु प्रतिद्वारमभिधित्सुराह-

[भा.१६६१] सूरुग्गए जिनानं पडिलेहणियाए आढवणकालो।
थेराणऽनुग्गयम्मी, ओवहिणा सो तुलेयव्वो॥

वृ- सूर्ये उद्गते सति 'जिनानां' जिनकल्पिकानाम् "एकग्रहणे तज्जातीयग्रहणम्" इति वचनादपरेषामपि गच्छनिर्गतानां प्रतिलेखनाया आरम्भणकालो मन्तव्यः। 'स्थविराणां' स्थविरकल्पिकानामनुद्गते सूर्ये प्रत्युपेक्षणायाः प्रारम्भकालः। स चोपधिना तोलयितव्यः॥ कथम्? इति चेद् उच्यते-इह प्राभातिकप्रतिलेखनायां भूयांस आदेशाः सन्ति, अतस्तत्प्रतिपादकः पञ्चवस्तुकवृत्त्युक्तो वृद्धसम्प्रदायो लिख्यते- को पडिलेहणाकालो? एगो भणइ-जया वायसा वासंति तया पडिलेहिज्जउ, तो पट्ठवित्ता अज्झाइज्जउ। अन्नो भणइ-अरुणे उट्ठिए। अवरो भणइ-जाहे पगासं जायं। अन्नो पुन-जाहे पडिस्सए परोप्परं पव्वइयगा दीसंति। अन्ने भणंति-जाहे हत्थरेहाओ दीसंति। आयरिया भणंति-एए सव्वे वि अनाएसा, अपसिद्धान्तत्वात्, जओ अंधयारे पडिस्सए हत्थरेहाओ उट्ठिए वि सूरे न दीसंति, वायसाइआएसेसु य अंधकारं ति पडिलेहणा न

Jain Education International For Private & Personal Use Only www.jainelibrary.org

सुज्झइ, तम्हा इमो पडिलेहणाकालो-आवस्सए कए तिहिं थुईहिं दिन्नियाहिं जहा पडिलेहणाकालो भवइ तहा आवस्सयं कायव्वं, इमेहि य दसहि पडिलेहिएहिं जहा सूरो उट्ठेइ-

मुहपुत्ती रयहरणं, दुन्नि निसिज्जा य चोलपट्टो य।
संथारुत्तरपट्टो, तिन्नि य कप्पा मनणेयव्वा ॥
जीवदयट्ठं पेह, एसो कालो इमीइ ता नेओ।
आवस्सगथुइअंते, दसपेहा उट्ठए सूरो ॥

चूर्णिकृत् पुनराह-यथाऽऽवश्यके कृते एकद्वित्रिश्लोकस्तुतित्रये गृहीते एकादशभिः प्रतिलेखितैरादित्य उत्तिष्ठते स प्रारम्भकालः प्रतिलेखनिकायाः। कतरे पुनरेकादश ? पंच अहाजातानि, तिन्नि कप्पा, तेसिं एगो उन्निओ दो सुत्तिया, संथारपट्टओ त्तरपट्टओ दंडओ एगारसमो त्ति ॥ गतं "प्रतिलेखना तु काले" इति द्वारम्। अथ प्रत्युपेक्षणादोषद्वारं विवृणोति-

[भा.१६६२] लहुगा लहुगो पनगं, उकक्कोसादुवहिअपडिलेहाए।
दोसेहि उ पेहंते, लहुओ भिन्नो य पनगंच ॥

वृ- उत्कृष्टाद्युपधीनामप्रत्युपेक्षणे प्रायश्चित्तं लघुका लघुकः पञ्चकं चेति। उत्कृष्टमुपधिं न प्रत्युपेक्षते चत्वारो लघुकाः, मध्यमं न प्रत्युपेक्षते तत उत्कृष्टे मासलघु, मध्यमे भिन्नमासः, जघन्ये रात्रिन्दिवपञ्चकम् ॥ अथ "षट्सु कायेषु" इति पदं व्याचष्टे-

[भा.१६६३] काएसु अप्पणा वा, उवही व पइट्ठिओऽत्थ चउभंगो।
मीस सचित्त अनंतर-परंपरपइट्ठिए चेव ॥

वृ- प्रत्युपेक्षमाणः षट्सु कायेष्वात्मना प्रतिष्ठित उपधिर्वा तेषु प्रतिष्ठित इत्यत्र चतुर्भङ्गी। तद्यथा-स्वयं कायेषु प्रतिष्ठितो नोपधि १ उपधि प्रतिष्ठितो न स्वयं २ स्वयमपि प्रतिष्ठित उपधिरपि प्रतिष्ठितः ३ स्वयमप्यप्रतिष्ठित उपधिरप्यप्रतिष्ठितः ४ इति। एते च षट् काया मिश्रा वा भवेयुः सचित्ता वा। एतेषु साधुरुपधिर्वा अनन्तरं वा परम्परं वा प्रतिष्ठितो भवेत्। अत्र च प्रायश्चित्तं "छक्काय चउसु लहुगा" इत्यादिगाथानुसारेणावगन्तव्यम्। यस्तु द्वाभ्यामप्यप्रतिष्ठितः स शुद्ध इति ॥ अथ दोषद्वारस्य वक्तव्यताशेषं प्रतिग्रहनिक्षेपणपदं च व्याख्यानयति-

[भा.१६६४] आयरिए य परिन्ना, गिलाण सरिसखमए य चउगुरुगा।
उडु अधरऽबंध लहुओ, बंधण धरणे य वासासु ॥

वृ- "आयरिए" त्ति षष्ठी-सप्तम्योरर्थं प्रत्यभेदादाचार्यस्य "परिन्न" त्ति मत्वर्थीयप्रत्युयलोपात् 'परिज्ञावतः' कृतभक्तप्रत्याख्यानस्य "गिलाण सरिसखमए य" त्ति ग्लानस्य ग्लानसदृशश्च यः क्षपकः-विकृष्टतपस्वी तस्य, एतेषां चतुर्णामुपधिं यदि न प्रत्युपेक्षते तदा चत्वारो गुरवः। चशब्दात् प्राघूर्णक-स्थविर-शैक्षाणामग्लानोपमस्य च क्षपकस्योपधिमप्रत्युपेक्षमाणानां चतुर्लघवः। "उडु" इत्यादि पश्चार्द्धम्। यदा सर्वाण्यपि वस्त्राणि प्रत्युपेक्षितानि भवन्ति तदा यान्यतिरिक्तानि भाजनानि तानि प्रत्युपेक्ष्यन्ते। प्रतिग्रहं मात्रकं च यदि तदानीमेव प्रत्युपेक्षते तदा मासलघु, असामाचारीनिष्पन्नमिति भावः। अतः सूत्रपौरुषीं कृत्वा चतुर्भागावशेषायां पौरुष्यां प्रत्युपेक्ष्य द्वे अपि ऋतुबद्धे काले धारमीये न निक्षेप्तव्ये। अथ ऋतुबद्धे प्रतिग्रहं मात्रकं वा न धारयत्युपकरणंवा दवरकेण न बध्नाति तदा मासलघु, अग्नि-स्तेन-दण्डिकक्षोभादयश्च ओघनिर्युक्तिप्रतिपादिता

Jain Education International For Private & Personal Use Only www.jainelibrary.org

दोषाः। वर्षासु पुनरुपधिं न बघनाति प्रतिग्रहं मात्रकं च प्रत्युपेक्ष्य निक्षिपति। अथोपधिं बघ्नाति भाजने वा धारयति तदा मासलघु। विशेषचूर्णिकृता त्वस्या एकगाथायाः स्थाने गाथाद्वयं लिखितम्। यथा-

गुरु पच्चक्खायाऽसहु, गिलाण सरिसखमए य चउगुरुगा।
पाहुणग सेह बाले, वुड्ढे खमए अ चउलहुगा॥
चउभागवसेसाए, पडिग्गहं पच्चुवेक्ख न धरेइ।
उडुबद्धे मासलहुं, वासासु धरिंति मासलहुं॥

वृ- इदं च भावितार्थमेव॥ अथ "प्रतिलेखनिका सप्रतिपक्षा" इति पदं भावयति-

[भा.१६६५] असिवे ओमोयरिएष सागार भए व राय गेलन्ने।
जो जम्मि जया जुज्जइ, पडिवक्खो तं तहा जोए॥

वृ- 'प्रतिपक्षो नाम' द्वितीयपदम्, तच्चेदम्-'अशिवे' अशिवगृहीतः सन्न शक्नोति प्रत्युपेक्षितुम्, अवमौदर्ये तु प्रत्यूष एव भिक्षां हिण्डितुं प्रारब्धवन्तः अतो नासित प्रत्युपेक्षणायाः कालः, सागारिको वा प्रेक्षमाणो मा तं सारमुपधिं द्राक्षीदिति कृत्वा, 'भये वा' बोधिक-स्तेनादिसम्बन्धिनि सारोपकरणहरणभयान्न प्रत्युपेक्षन्ते, राजा वा प्रत्यनीकस्तद्भयादहर्निशमध्वनि वहन्तो न प्रत्युपेक्षेरन्, ग्लानत्वे वा वर्त्तमान एकाकी तिष्ठन् न प्रत्युपेक्षते। एतैः कारणैर्न वा प्रत्युपेक्षेत, अनागतेऽतीते वा काले प्रत्युपेक्षेत, त्वरमाणो वा आरभडादिभिर्दोषैर्दुष्टां प्रत्युपेक्षणां कुर्वीत,

असमर्थो वा गुर्वादीनामप्युपधिं न प्रत्युपेक्षेत; एवं यः 'यत्र' अशिवादौ 'यदा' यस्मिन्नवसरे 'प्रतिपक्षः' अप्रत्युपेक्षणा-ऽकालप्रत्युपेक्षणादिको युज्यते तं तथा तत्र योजयेदिति॥ अथ षट्सु कायेषु प्रत्युपेक्षमाणस्य प्रायश्चित्तं भवतीत्यर्थात् तत्र प्रत्युपेक्षणा न कर्त्तव्येति यदुक्तं तदपवदति-

[भा.१६६६] तस-बीयरक्खणट्ठा, काएसु वि होज्ज कारणे पेहा।
नदिहरणपुत्तनायं, तनू य थूरे य पुत्तम्मि॥

[भा.१६६७] जइ से हवेज्ज सत्ती, उत्तारिज्जा तओ दुवग्गे वि।
थूरो पुन तणुअतरं, अवलंबंतो वि बोलेइ॥

वृ- त्रसाश्च-द्वीन्द्रियादयः बीजानि च-शाल्यादीनि तेषामस्थिरसंहनिनां रक्षार्थं 'कायेष्वपि' पृथिव्यादिषु दृढसंहननिषु कारणतः प्रत्युपेक्षणा भवति, न च प्रायश्चित्तम्। आह तेषु प्रतिष्ठितः प्रत्युपेक्षणं कुर्वन् सङ्घट्टनादिबाधाविधानात् कथं न दोषभाग् भवति? इति उच्यते-नदीहरणोपलक्षितं पुत्रज्ञातमत्र भवति। कथम्? इत्याह-"तनू य थूरे य पुत्तम्मि" त्ति यथा कश्चित् पुरुषः, तस्य द्वौ पुत्रौ, तयोरेकः तनुकः-कृशशरीरः, द्वितीयस्तु स्थूलः-अतीवपीवरगात्रः। स चान्यदा ताभ्यां सहितः कश्चिद् ग्रामं गच्छन्नपान्तराले एकामपार-गम्भीरां नदीमवतीर्णवान्। स च नदीष्णतया सुखेनैव स्वयं तां तरीतुं शक्तः, परं पुत्रावद्यापि तरण कलायामकोविदाविति कृत्वा तनुके स्थूले च पुत्रे उभयेऽपि तारयितुं प्राप्ते सति स किं करोति? इत्याह-

यदि "से" तस्य पितुः 'शक्ति' सामर्थ्यं भवेत् ततः "दुवग्गे वि" त्ति देशीवचनत्वाद् द्वावपि पुत्रावुत्तारयेत्, नैकमप्युपेक्षेत। अथ नास्ति तस्य तथाविधं सामर्थ्यं ततो यस्तयोः कृशशरीरस्तं

Jain Education International For Private & Personal Use Only www.jainelibrary.org

तारयति, लघुभूतशरीरतया तस्य सुखेनैव तारणीयत्वात्। यस्तु 'स्थूरः' शरीरजड्डः सः 'तनुकतरं' स्तोकमात्रमप्यवलम्बमानो निजशरीरभारिकतयैवात्मानं तं च नन्द्यां बोलयति, अतस्तमुपेक्षेत। एष दृष्टान्तोऽमर्थोपनयः-पितृस्थानीयः साधुः, पुत्द्वयस्थानीयाः स्थिरा-ऽस्थिरसंहनिनः पृथिवीकायादयः, ततः साधुना प्रथमतो निर्विशेषं षडपि कायाः स्थिरसंहनिनोऽस्थिरसंहनिनश्च रक्षणीयाः अथान्यतरेषांविराधनामन्तरेणाध्वगमनादिषु प्रत्युपेक्षणादीनां प्रवृत्तिरेव न घटामश्चति ततः स्थिरसहनिनां पृथिव्यादीनां विराधनामभ्युपेत्याप्यस्थिरसंहननिनस्त्रसादयो रक्षणीया इति।

अस्यैवार्थस्य समर्थनाय द्वितीयं दृष्टान्तमाह-

[भा.१६६८] अंगारखड्डपडियं, दद्दूण सुयं सुयं बिइयमन्नं।
पवलित्ते नीणिंतो, किं पुत्ते नो कुणइ पायं ॥

वृ- यथा नाम कश्चित् पुरुषस्तस्य पुत्रद्वयम्, अन्यदा च रात्रौ तद्गृहे प्रदीपनकं लग्नम्, तद्भयादेकः पुत्रः पलायमानः सहसैवाङ्गारभृतायां गर्तायां निपतितः, स च गृहपतिर्द्वितीयं पुत्रमादाय गृहाद् निर्गतो यावत् पश्यति पुरतः स्वपुत्रमङ्गारगर्त्तायां पतितम्, ततश्च तं सुतं तथाभूतं दृष्ट्वा द्वितीयमन्यं सुतं "पवलित्ते नीणिंतो"त्ति पञ्चम्यर्थे सप्तमी प्रदीप्ताद् गृहान्निष्काशयन् निजसहजपारिणामिकमत्या विचार्य परिच्छेदकुशलः सन् किमङ्गारगर्त्तायां निपतितपूर्वे पुत्रे पादं न करोति ? अपि तु करोत्येव, कृत्वा च तदुपरि पादं सुखेनैव तां लङ्घयतीति भावः ॥अ तदुपरि पादं न दद्यात् 'स्वपुत्रं कथं पादेनाक्रामामि ?' इति कृत्वा ततः को दोषः स्याद् ? इत्याह-

[भा.१६६९] तं वा अणक्कमं, चयइ सुयं तं च अप्पगं चेव।
नित्थिन्नो हु कदाई, तं पि हु तारिज्ज जो पडिओ ॥

वृ-चाशब्दः पातायाम्, सा च कृतैव। 'तं' गर्त्तानिपतितं पुत्रं पादेनानाक्रामन् स पिता त्यजति सुतं 'तं च' स्वहस्तगृहीतमात्मानं च, उभयोरप्यङ्गारगर्त्तापातेन विनाशसद्भावात्। अपि च स स्वयं निस्तीर्ण सन् कदाचित् तमपि पुत्रं तारयेद् यः पूर्वं गर्त्तायां निपतित इति। एष द्वितीयो दृष्टान्तः। उपनययोजना तु प्रागुक्तोपनयानुसारेण कर्त्तव्येति ॥ गतं प्रत्युपेक्षणाद्वारम्। अथ निष्क्रमणद्वारमाह-

[भा.१६७०] निरवेक्खो तइयाए, गच्छे निक्कारणम्म तह चेव।
बहुवक्खेवदसविहे, साविक्खे निग्गमो भइओ ॥

वृ- 'निरपेक्षः' जिनकल्पिक-प्रतिमाप्रतिपन्नकादिर्गच्छसत्कापेक्षारहितः स तृतीयस्यामेव पौरुष्यामुपाश्रयाद् निर्गच्छति। 'गच्छे' गच्छवासिनोऽपि साधवो निष्कारणे तथैव निर्गच्छन्ति, तृतीयस्यां पौरुष्यामित्यर्थः। परं गच्छे यद् आचार्योपाध्यायादिविषयभेदाद् दशविधं वैयावृत्त्यं तेन यो बहुविधो व्याक्षेपस्तेन सापेक्षे गच्छवासिनि निर्गमो भजनीयः, कदाचित् तृतीयस्यां कदाचित् प्रथम-द्वितीय-चतुर्थीषु वा पौरुषीष्विति ॥ अथैनामेव निर्युक्तिगाथां व्याख्याति-

[भा.१६७१] गहिए भिक्खे भोत्तुं, सोहिय आवास आलयमुवेइ।
जहि निग्गओ तहिं चिय, एमेव य खेत्तसंकमणे ॥

वृ-निरपेक्षो भगवान् तृतीयपौरुष्यामुपाश्रयान्निर्गत्य भिक्षामटित्वा गृहीते सति भैक्षे अनापाते असंलोके च स्थाने भुक्त्वा 'आवश्यकं च' संज्ञा-कायिकीलक्षणं शोधयित्वा यस्यामेव पौरुष्यां

Jain Education International For Private & Personal Use Only www.jainelibrary.org

निर्गतस्तस्यामेव भूयः 'आलयम्' उपाश्रयमुपैति, तृतीयस्यामित्यर्थः। एवमेव च क्षेत्रसङ्क्रमणेऽपि द्रष्टव्यम्, क्षेत्रात् क्षेत्रान्तरगमनमपि तृतीय्यां करोतीति भावः। स्थविरकल्पिका अपि निष्कारणे तृतीयस्यामेव निर्गत्य भिक्षामटित्वा प्रतिश्रये समुद्दिश्य संज्ञाभूमिं गत्वा तस्यामेव प्रत्यागच्छन्ति। क्षेत्रसङ्क्रमप्येवमेव। कारणतस्तु न कोऽपि प्रतिनियमः ॥ तथा चाह-

[भा.१६७२] अतरंत-बाल-वुड्ढे, तवस्सि-आएसमाइकज्जेसु।
बहुसो वि होज्ज विसणं, कुलाइकज्जेसु य विभासा

वृ- अतरन्तः-ग्लानस्तस्य तथा बाल-वृद्धयोः तपस्विनः-क्षपकस्य आदेशस्य-प्राघूर्णकस्य आदिशब्दादाचार्योपाध्याय-शैक्षका-ऽलब्धिमत्प्रभृतीनां यानि कार्याणि-तत्प्रायोग्यभक्त-पानौषधादिग्रहणरूपाणि तेषु 'बहुशोऽपि' बहूनपि वारान् गृपतिगृहेषु प्रवेशनं गच्छसाधूनां भवति। तथा कुलादिकार्येषु, आदिग्रहणाद् गण-सङ्घपरिग्रहः। कुलं-नागेन्द्र-चन्द्रादि, गणः-कुलसमुदायः, गणसमुदायः सङ्घः चतुर्वर्णरूपो वा, तत्कार्येषु च विभाषा कर्त्तव्या। सा चेयम्-कुले गणे सङ्घे वा आभाव्या-ऽनाभाव्यविषयः कोऽपि व्यवहारः समुपस्थितः तस्य यथावत् परिच्छेदनं कर्त्तव्यम्, प्रत्यनीको वा कोऽपि साधूनामुपस्थितः तस्य शिक्षणं विधेयम्, चैत्यद्रव्यं वा कश्चिद् निशङ्कं मुष्णाति स शासितव्यो वर्त्तत इत्यादि ॥ तथा-

[भा.१६७३] उच्चार-विहारादी, संभम-भय-चेइवंदणाईया।
आयपरोभयहेउं, विनिग्गमा वन्निया गच्छे ॥

वृ- उच्चाचारः-पुरीषं तस्य उपलक्षणत्वात् प्रश्रवण-खेलादेश् व्युत्सर्जनार्थं बहिर्गन्तव्यम्। विहारो नाम-वसतावस्वाध्यायिके समुत्पन्ने सति स्वाध्यायनिमित्तमन्यत्र गमनम्, आदिग्रहणात् पूर्वगृहीतपीठफलक-शय्या-संस्तारकप्रत्यर्पणप्रभृतिपरिग्रहः। सम्भ्रमो नाम-उदका-ऽग्नि-हस्त्याद्यागमनसमुत्थ आकस्मिकः संत्रासः, भयं तु-सामान्येन दुष्टस्तेनाद्युपद्रवप्रभवम्, चैत्यानिजिनबिम्बानि तेषां वन्दनम्, आदिशब्दादपूर्वबहुश्रुताचार्यन्दनादिपरिग्रहः एवमादीनि यान्यात्मनः परेषामुभयस्य वा हेतोः कार्याणि तन्निमित्तं गच्छे बहुशोऽपि प्रतिश्रयाद् विनिर्गमाः 'वर्णिताः' प्रतिपादिता इति ॥ गतं निष्क्रमणद्वारम्। अथ प्राभृतिकाद्वारं विभावयिषुराह-

[भा.१६७४] पाहुडिया वि य दुविहा, बायर सुहुमा य होइ नायव्वा।
एक्केक्का वि य एत्ते, पंचविहा होइ नायव्वा ॥

वृ- 'प्राभृतिका' वसतेश्छादन-लेपनादिरूपा, सा द्विविधा-बादरा सूक्ष्मा च भवति ज्ञातव्या। एकैकाऽपि चेत उर्द्धं पञ्चविधा भवति ज्ञातव्या ॥ तत्र बादरां पञ्चविधामपि तावदाह-

[भा.१६७५] विद्धंसण छायम लेवणे य, भूमीकम्मे पडुच्च पाहुडिया।
ओसक्कण अहिसक्कण, देसे सव्वे य नायव्वा ॥

वृ- 'विध्वंसनं' सतेर्भञ्जनम्। 'छादनं' दर्भादिभिराच्छादनम्। 'लेपनं' कुड्यानांकर्दमेन गोमयेन च लेपप्रदानम्। 'भूमिकर्म' सम-विषमाया भूमेः परिकर्मणम्। ''पडुच्च''त्ति 'प्रतीत्यकरणं' त्रिशालं गृहं कर्तुकामः साधून् प्रतीत्य चतुःशालं करोति, आत्मीयं वा गृहं साधूनां दत्त्वा आत्मार्थमपरं कारयतीत्यादि। एषा पञ्चविधाऽपि बादरप्राभृतिका प्रत्येकं द्विधा-अवष्वष्कणतोऽभिष्वष्कण-तश्च। अवष्वष्कणं नाम-वर्वक्षितविध्वंसनादिकालस्य ह्रासकरणम्, अर्वाक्करणमित्यर्थः।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

अभिष्वष्कणं-तस्यैव विवक्षितकालस्य संवर्द्धनम्, परतः करणमित्यर्थः। पुनरेकैके विध्वंसनादयो द्विधा देशतः सर्वतश्च ज्ञातव्याः ॥ तत्र देशतः सर्वतो वा विध्वंसनमभिष्वष्कणतो भाव्यते-केनचिद् गृहपतिना चिन्तितम्-यथेदं गृहं ज्येष्ठमासे भंक्त्वा ततोऽभिनवं करिष्याम इति। इतश्च ज्येष्ठमासे तत्र गृहे साधवो मासकल्पेन स्थिताः, ततोऽसौ चिन्तयति-

[भा.१६७६] अच्छंतु ताव समणा, गएसु भंतूण पच्छ काहामो।
ओभासिए व संते, न एंति जा भंतुणं कुणिमो ॥

वृ-इदानीं तावद् 'आसतां' तिष्ठन्तु श्रमणाः, गतेषु तेषु 'पश्चाद्' आषाढमासे भंक्त्वा करिष्याम इति, एतदभिष्वष्कणम्। अथाष्वष्कणमाह-"ओभासिए व" इत्यादि। क्षेत्रप्रत्युपेक्षकैरवभाषिते प्रदत्ते चोपाश्रये सति स गृहपतिश्चिन्तयति-ज्येष्ठमासे तावदत्र साधवः स्थास्यन्ति, अतो यावत् ते नागच्छन्ति तावद् वैशाखे मासे भंक्त्वा कुर्म इति, एतदवष्वष्कणम् ॥ भावितं विध्वंसनपदम्।

अथ च्छादनादीन्यतिदिशन्नाह-

[भा.१६७७] एसेव कमो नियमा, छज्जे लेवे य भूमिकम्मे य।
तेसाल चाउसालं, पडुच्चकरणं जईनिस्सा ॥

वृ- एष एवाभिष्वष्कणतोऽवष्वष्कणतश्च क्रमो नियमाद् मन्तव्यः। क्व ? इत्याह-'छज्जे' छादने 'लेपे' लिम्पने भूमिकर्मणि च। तिष्ठन्तु तावदिदानीं श्रमणाः, पश्चाद् गतेषु सत्सु गृहं छादयिष्यामो लेप्स्यामो भूमिं वा परिकर्मयिष्याम इति, एतदभिष्वष्कणम्। एतान्येव च्छादनादीनि यद्यनागतमेव करोति तदाऽवष्कष्कणम्। अथ प्रतीत्यकरणं भाव्यते-"तेसाल" इत्यादि। त्रिशालं गृहं कर्तुकामो यतीनां निश्रया तान् प्रतीत्येति भावः चतुःशालं यत् करोति तत् प्रतीत्यकरणमुच्यते अथवा-

[भा.१६७८] पुव्वघरं दाऊण व, जईण अन्नं करिंति सङ्काए।
काउमणा वा अन्नं, ण्हाणाइसु कालमोसक्के ॥

वृ- 'पूर्वगृहं' स्वार्थं पूर्वं कृतं यद् गृहं तद् यतीनां दत्त्वा स्वार्थम् 'अन्यद्' अभिनवं यदगारिणः कुर्वन्ति तद् वा प्रतीत्यकरणम्। अथवा केऽपि श्राद्धाः स्वार्थमन्यद् गृहं ज्येष्ठमासे कर्तुमनसः परं तत्र वैशाखमासि स्नानादिकं जैनचैत्येषु भविता ततस्ते चिन्तयन्ति-अनागतमेव गृहं कुर्मो येन तत्र साधवो वैशाखमासि स्नानादिषु समायातास्तिष्ठन्ति। एवं साधून् प्रतीत्य कालमवष्वष्कयेयुः एतदवष्वष्कणतः प्रतीत्यत्करणमुक्तम् ॥ अथाभिष्वष्कणतस्तदेवाह-

[भा.१६७९] एमेव य ण्हाणाइसु, सीयलकज्जट्ठ कोइ उस्सक्के।
मंगलबुद्धी सो पुन, गएसु तहियं वसिउकामो ॥

वृ- 'एवमेव' अवष्वष्कणवत् कोऽपि श्राद्धः शीतकाले गृहं कर्तुकामश्चिन्तयति-'वैशाखमासि स्नानं रथयात्रा वेह भविष्यति, तत्र च साधवः समागमिष्यन्ति तच्च तदानीमेव कृतं नवगृहं शीतलं भवति, शीतले च तस्मिन् साधवः सुखमासिष्यन्ते, अथः स्नानादिप्रत्यासन्न एव समये करिष्यामि' इति साधून् प्रतीत्य स्नानादिषु शीतलकार्यार्थं यत् कोऽप्युत्ष्वष्कते एतदभिष्वष्कणतः प्रतीत्यकरणम्। स पुनरवष्वष्कणमभिष्वष्कणं वा मङ्गलबुध्या करोति, यथा-पूर्वं साधवो मदीयं नवगृहं यदि परिभुञ्जते ततः पवित्रं भवतीति। गतेषु च तेष तत्र नवगृहे स्वयमेव स्वयमेव वस्तुकाम

Jain Education International For Private & Personal Use Only www.jainelibrary.org

इति ॥ अथात्रैव प्रायश्चित्तमाह-

[भा.१६८०] सव्वम्मि उ चउलहुया, देसम्मी बायराए लहुओ उ।
सव्वम्मि मासियं खलु, देसे भिन्नो य सुहुमाए ॥

वृ- बादरायां प्राभृतिकायामनन्तरोक्तायामेव सर्वतः करिष्यमाणायां कृतायां वा तिष्ठति चत्वारो लघवः। देशतः करिष्यमाणायां कृतायां वा तिष्ठतो मासलघु। सूक्ष्मायां प्राभृतिकायां वक्ष्यमाणायां सर्वतो विधास्यमानायां विहितायां वा तिष्ठति मासलघु। देशतस्तस्यामेव भिन्नमासः ॥ सा पुनः सूक्ष्माप्राभृतिका पञ्चविधा। तामेवाह-

[भा.१६८१] संमज्जण आवरिसण, उवलेवण सुहुम दीवए चेव।
ओसक्कण अहिसक्कण, देसे सव्वे य नायव्वा ॥

वृ- 'सम्मार्जनं' बहुकरिकया प्रमार्जनम्, 'आवर्षणम्' उदकेन च्छटकप्रदानम्, 'उपलेपनं' छगणमृत्तिकया भूमिकाया लेपनम्, ''सुहुमे''त्ति 'सूक्ष्माणि' समयभाषया पुष्पाण्युच्यन्ते, तथा च दशवैकालिकनिर्युक्तौ पुष्पाणामेकार्थिकानि-

पुप्फा य कुसुमा चेव, फुल्ला य कुसुमा वि य।
सुमणा चेव सुहुमा य, सुहुमकाइया वि य ॥

ततश्च पुष्पाणां प्रकरचनेत्यर्थः। 'दीवए चेव'' त्ति दीपकप्रज्वालनम्। एतानि पूर्वमात्मार्थं क्रियमाणान्येव विद्यन्ते। नवरं साधून् प्रतीत्य देशतः सर्वतो वा यदवष्वष्कणमभिष्वष्कणं वा क्रियते सा सूक्ष्मप्राभृतिका ज्ञातव्या ॥ अथास्या एवावष्वष्कणा-ऽभिष्वष्कणे भावयति-

[भा.१६८२] जाव न मंडलिवेला, ताव पमज्जामो होइ ओसक्का।
उट्ठेंतु ताव पढिउं, उस्सक्कण एव सव्वत्थ ॥

वृ- यावत् 'मण्डलीवेला' स्वाध्यायमण्डलीकालो नोपढौकते तावत् प्रमार्जयाम इत्येवं विचिन्त्यानागतमेव यदि प्रमार्जयन्ति तदाऽवष्वष्कणं भवति। अथ साधवः स्वाध्यायं कुर्वाणास्तदानीं मण्डल्यामुपविष्टाः सन्ति ततश्चिन्तयन्ति-उत्तिष्ठन्तु तावदमी पठित्वा ततः पश्चात् प्रमार्जयिष्याम इति विचिन्त्य तथैव यदि कुर्वते तदा उत्ष्वष्कणं भवति। एवमवष्वष्कणमभिष्वष्कणं च 'सर्वत्र' आवर्षणोपलेपनादावपि भावनीयम् ॥ सा पुनः सूक्ष्मप्राभृतिका द्विविधा-

[भा.१६८३] छिन्नमछिन्ना काले, पुनो य नियया य अनियया चेव।
निद्दिट्ठाऽनिद्दिट्ठा, पाहुडिया अट्ठ भंगा उ ॥

वृ- 'काले' कालतश्छिन्ना अच्छिन्ना वा, छिन्नकालिका अच्छिन्नकालिका चेत्यर्थः। यस्यामुपलेपनादिकं छिन्ने-प्रतिनियते मासादौ काले क्रियते सा छिन्नकालिका। या तु यदा तदा वा क्रियते सा अच्छिन्नकालिका। पुनरेकैका द्विधा-नियता अनियता चैव। नियता नाम-यापूर्वाह्लादावेव वेलायामवश्यमेव वा क्रियते। तद्विपरीता अनियता । पुनरेकैका द्विविधा-निर्दिष्टा अनिर्दिष्टा च। तत्र यः प्राभृतिकाकारकः सन निर्दिष्टः-इन्द्रदत्तादिनाम्नोपलक्षितः तेन क्रियमाणा प्राभृतिका अपि निर्दिष्टा। तद्विपरीता अनिर्दिष्टा। अत्र च त्रिभि पदैरष्टौ भङ्गा भवन्ति, तद्यथा-छिन्नकालिका नियता निर्दिष्टा १ छिन्नकालिका नियता अनिर्दिष्टा २ इत्यादि ॥ अथ छिन्नकालिकां व्याख्यानयति-

Jain Education International For Private & Personal Use Only www.jainelibrary.org

[भा.१६८४] मासे पक्खे दसरायए य पणए अ एगदिवसे य ।
वाघाइमपाहुडिया, होइ पवाया निवाया य ॥

वृ- या प्राभृतिका 'मासे' मासस्यान्ते 'पक्षे' पक्षस्यान्ते 'दशरात्रे' दशानामहोरात्राणां पर्यन्ते 'पञ्चके' पञ्चरात्रिन्दिवान्ते 'एकदिवसे' एकान्तरिते दिने चशब्दाद् निरन्तरं दिने दिने इत्यर्थः, एवं प्रतिनियते काले या क्रियते सा छिन्नकालिका । या तु न ज्ञायते कस्मिन् दिवसे विधीयते सा अच्छिन्नकालिकेति । व्याघातिप्राभृतिका नाम-या सूत्रार्थपौरुषीवेलायां क्रियते । भवति प्रवाता निवाता चेति । प्रवाता नाम-या ग्रीष्मकाले अपराह्ने उपलेपनादिकरणेन धर्मं नाशयति । या तु शीतकाले पूर्वाह्ने उपलेपनकरणेन रात्री व्यपगतस्नेहा जायते सा निवाता भण्यते ॥

अथ कस्यां प्राभृतिकायां वस्तुं कल्पते ? कस्यां वा न ? इति अत आह-

[भा.१६८५] पुव्वण्हे अवरण्हे, सूरम्मि अनुग्गए व अत्थमिए ।
मज्झंतिए व वसही, सेसं कालं पडिक्कुट्ठा ॥

वृ- पूर्वाह्ने अनुद्गते सूर्ये, अपराह्ने तु अस्तमिते, 'मध्यान्ते वा' मध्याह्नवेलायाम् अर्धपौरुष्या उत्थितेषु इत्यर्थः, एतेषु कालेषु यस्यां प्राभृतिका क्रियते सा वसतिरनुज्ञाता, सूत्रार्थव्याघाताभावात् । "सेसं कालं" ति सप्तम्यर्थे द्वितीया, 'शेषे' उद्गतसूर्यादौ काले यस्यां प्राभृतिका विधीयते सा प्रतिक्रुष्टा, न कल्पते तस्यां वस्तुम्, सूत्रार्थव्याघातसम्भवात् ॥ अथ निर्दिष्टा-ऽनिर्दिष्टप्राभृतिके भावयति-

[भा.१६८६] पुरिसज्जाओ अमुगो, पाहुडियाकारओ उ निद्दिट्ठो ।
सेसा उ अनिद्दिट्ठा, पाहुडिया होइ नायव्वा ॥

वृ- अमुकः 'पुरुषजातः' पुरुषप्रकारः प्राभृतिकाकारक इन्द्रदत्तादिनाम्ना यस्यां निर्दिष्टः सा निर्दिष्टा । शेषा तु सर्वाऽप्यनिर्दिष्टा प्राभृतिका भवति ज्ञातव्या ॥

अथ पूर्वोक्तभङ्गाष्टकविषयं विधिमाह-

[भा.१६८७] काऊण मासकप्पं, वयंति जा कीरई उ मासस्स ।
सा खलु निव्वाघाया, तंवेलारेण निंताणं ॥

वृ- इह प्रथमे भङ्गे या मासस्यान्ते क्रियत इति कृत्वा छिन्नकालिका, तत्राप्यपराह्न एव विधीयमानत्वाद् नियता, अमुकपुरुषकर्तृकत्वेन च निर्दिष्टा । तस्यां कृतायां प्रथमतः प्रविष्टास्ततो मासकल्पं कृत्वा यदि व्रजन्ति । कथम् ? इत्याह-"तंवेलारेण निंताणं" ति तस्याः-प्राभृतिकाकरणवेलाया अर्वाग् निर्गच्छतां सा प्राभृतिका निव्याघाता मन्तव्या, सूत्रार्थव्याघाताभावात्, कल्पते तस्यां वस्तुमिति भावः । शेषा द्वितीयादयो भङ्गाः क्वापि कथञ्चित् सव्याघाता इति कृत्वा तेषु न कल्पते ॥ अथ प्रवाता निवातेति च पदद्वयं भावयति-

[भा.१६८८] अवरण्हे गिम्ह करणे, पवाय सा जेण नासयइ धम्मं ।
पुव्वण्हे जा सिसिरे, निव्वाय निवाय सा रत्तिं ॥

वृ- ग्रीष्मे अपराह्ने यदुपलेपनस्य करणं सा प्रवाता । कुतः ? इत्याह-येना सा रात्रौ 'नाशयति' व्यपनयति 'धर्मं' ग्रीष्मर्तुसम्भवं तापम् । या तु 'शिशिरे' शीतकाले पूर्वाह्ने उपलेपनकरणेन दिवसस्य चतुर्भिः प्रहरैः 'निवाता' शुष्का इत्यर्थः सा रात्रौ निवाता भवति । एतयोः कारणतोऽवस्थातुं

Jain Education International For Private & Personal Use Only www.jainelibrary.org

कल्पत इति ।। अथ निव्याघातिमां भङ्गयन्तरेणाह-

[भा.१६८९] पुव्वण्हे अपट्ठविए, अवरण्हे उट्ठिएसु य पसत्था ।
मज्झण्ह निग्गएसु य, मंडलिसुत-पेहऽवाघाया ।।

वृ-या पूर्वाह्णे अप्रस्थापिते सति स्वाध्याये अपराह्णे पुनः समुद्दिश्योत्थितेषु सत्सु साधुषु मध्याह्ने तु भिक्षापर्यटनार्थं निर्गतेषु या प्राभृतिका क्रियते सा प्रशस्ता । कुतः ? इत्याह-''मंडलिसुय-पेह''त्ति येन श्रुतमण्डल्या उपकरणप्रेक्षणायाश्च ''वाघाय''त्ति अकारप्रश्लेषाद् 'अव्याघाता' न व्याघातविधायिनी, अत एषा प्रशस्ता ।। प्ररूपिता बादरा सूक्ष्मा च पञ्चविधा प्राभृतिका, एवंविधना सहितायां वसतौ न स्थाव्यम् । अथ नास्ति तथाविधा अप्राभृतिका वसति ततः कारणतः सप्राभृतिकायामपि तिष्ठतां यतनामाह-

[भा.१६९०] तं वेल सारविंती, पाहुडियाकारगं च पुच्छंति ।
मोत्तूण चरिम भंगं, जयंति एमेव सेसेसु ।।

वृ-यस्यां वेलायां प्राभृतिका क्रियते तां वेलामुपकरणं 'सारयन्ति' सङ्गोपयन्ति, अभिव्याप्तौ चात्र द्वितीया, तां वेलामभिव्याप्येत्यर्थः । प्राभृतिकाकारकं च पुरुषं पृच्छन्ति-कस्यां वेलायां भवान् सम्मार्जनादि करष्यति ? इति । एवं 'चरमम्' अष्टमं भङ्गं मुक्त्वा 'शेषेषु' सप्तस्वपि भङ्गेषु 'यतन्ते' यतनां कुर्वन्ति ।।

[भा.१६९१] चरमे वि होइ जयणा, वसंति आउत्तउवहिणो निच्चं ।
दक्खे य वसहिपाले, ठविंति थेरा पुणित्थीसु ।।

वृ- 'चरमेऽपि' अष्टमे भङ्गे 'अच्छिन्नकालिका अनियता अनिरदिष्टा च' इत्येवंलक्षणे आगाढे कारणे तिष्ठतां भवति यतना । कथम् ? इत्याह-नित्यमायुक्तोपधयो वसन्ति, उपधावायुक्ताः-सावधाना आयुक्तोपधयः, राजदन्तादेराकृतिगणत्वाद् व्यत्यासेन पूर्वापरनिपातः, मा गोमयादिना कोऽप्युपधिं गुण्डयेत् प्राभृतिकाकरणव्याजेनापहरेद्वेति सम्यगुपधिविषयमवधानं ददतीत्यर्थः । दक्षाँश्च वसतिपालान् स्थापयन्ति । यदि च ते प्राभृतिकाकारिणः पुरुषा न स्त्रियस्ततस्तरुणा वसतिपालाः स्थापयितव्याः । ''थेरा पुणित्थीसु''त्ति यदि स्त्रियस्ततो ये स्थविराः परिपाक-प्राप्तब्रह्मचर्यास्ते वसतौ स्थापनीया इति ।। गतं प्राभृतिकाद्वारम् । अथ भिक्षाद्वारमभिधित्सुराह-

[भा.१६९२] जिनकप्पिअभिग्गहिएसणाए पंचण्हमन्नतरियाए ।
गच्छे पुन सव्वाहिं, सावेक्खो जेन गच्छो उ ।।

वृ-जिनकल्पिका अभिगृहीतया 'पञ्चानाम्' उद्ध तादीनामन्यतरया एकया एषणया भक्तम् एकया पानकं गृह्णन्ति । 'गच्छे' गच्छवासिनः पुनः 'सर्वाभिरपि' असंसृष्टादिभिरेषणाभिर्भक्त-पानं गृह्णन्ति । कुतः ? इत्याह-'सापेक्षः' बाल-वृद्धाद्यपेक्षायुक्तः 'येन' कारणेन 'गच्छः' गच्छवासिसाधुसमूह इति ।। आह किमित गच्छवासिनः सर्वाभिरप्येषणाभिर्गृह्णन्ति ? किं तेषां निर्जरया न कार्यम् ? उच्यते-

[भा.१६९३] बाले वुड्ढे सेहे, अगीयत्थे नाण-दंसणप्पेही ।
दुब्बलसंघयणम्मि य, गच्छि पइन्नेसणा भणिया ।।

वृ-षष्ठी-सप्तम्योरर्थं प्रत्यभेदाद् बालस्य वृद्धस्य शैक्षस्यगीतार्थस्य 'ज्ञान दर्शनप्रेक्षिणः' ज्ञानार्थिनो

Jain Education International For Private & Personal Use Only www.jainelibrary.org

दर्शनप्रभावकशास्त्रार्थिनश्चेत्यर्थः 'दुर्बलसंहननस्य च' असमर्थशरीरस्यानुग्रहार्थं गच्छे 'प्रकीर्णा' अप्रतिनियता एषणा भणिता भगवद्भिरिति ॥ अथैतान्येव पदानि गाथाद्वयेन भावयति-

[भा.१६९४] तिक्खछुहाए पीडा, उड्डाह निवारणम्मि निक्किवया ।
इय जुवल-सिक्खगेसुं, पओस भेओ य एक्कतरे ॥

वृ- अभिगृहीतयैवैषणया भक्त-पानग्रहणे प्रतिज्ञाते तया चालब्धे स्तोके वा लब्धे सति बाल-वृद्धशैक्षकाणां तीक्ष्णया-दुरधिसहया क्षुधा उपलक्षणत्वात् तृषा चम हती पीडा भवति । उड्डाहो वा भवेत्, स हिबालादिरित्थं लोकपुरतो ब्रूयात्-एते साधवो मां क्षुधा तृषा वा मारयन्तीति । तथा 'निवारणे' विवक्षितामेकामेषणां विमुच्य अन्यासां प्रतिषेधे विधीयमाने सति बालादयश्चिन्तयेयुः-अहो ! निष्कृपताऽमीषाम्; ततः प्रद्वेषं गच्छेयुः । 'भेदो वा एकतरे' जीवितस्य चारित्रस्य वा विनाशोऽमीषां भवेदित बाल-वृद्धयुगले शैक्षके वा नियन्त्रयमाणे दोषा मन्तव्याः ॥

[भा.१६९५] सुचिरेण वि गीयत्थो, न होहिई न वि सुयस्स आभागी ।
पग्गहिएसणचारी, किमहीउ धरेउ वा अबलो ॥

वृ- तथा अगीतार्थ सुचिरेणापि कालेन गीतार्थो न भविष्यति, नापि 'श्रुतस्य' आचारादेः उपलक्षणत्वाद् दर्शनप्रभावकशास्त्राणां वा आभागी । कीदृशः ? इत्याह-'प्रगृहीतैषणाचारी' प्रगृहीता-अभिग्रहवती या एषणा तच्चारी-तत्पर्यटनशीलः, तथाविधभक्त-पानोपष्टम्भाभावादिति भावः । यो वा 'अबलः' दुर्बलसंहननः स प्रणीताहाराद्युपष्टम्भाभावे किं सूत्रमर्थं वा अधीतां धारयतां वा ? । अत एतेषामनुग्रहार्थं गच्छे प्रकीर्णैषणा दृष्टा ॥

अथास्या एव विधिमभिधित्सुर्द्वारगाथामाह-

[भा.१६९६] पमाणे काले आवस्सए य संघाडगे य उवगरणे ।
मत्तग काउस्सग्गो, जस्स य जोगो सपडिवक्खो ॥

वृ- प्रमाणं नाम-कति वारान् पिण्डपातार्थं गृहपतिकुलेषु प्रवेषटव्यम् ? इति । "कालि"त्ति कस्यां वेलायां भिक्षार्थं निर्गन्तव्यम् ? । "आवस्सग"त्ति 'आवश्यकं' संज्ञा-कायिकीलक्षणं तस्य सोधनं कृत्वा निर्गन्तव्यम् । "संघाडगे"त्ति सङ्घाटकेन-साधुयुग्मेन निर्गन्तव्यं नैकाकिना । "उवगरणि"त्ति सर्वोपकरणमादाय भिक्षायामवतरणीयम् । "मत्तगि"त्ति मात्रकं ग्रहीतव्यम् । "काउस्सग्गो"त्ति उपयोगनिमित्तं कायोत्सर्ग कर्त्तव्यः । "जस्स य जोगो"त्ति 'यस्य च' सचित्तस्याचित्तस्य वा 'योगः' सम्बन्धो भविष्यति लाभ इत्यर्थः तदप्यहं ग्रहीष्यामीति भणित्वा निर्गन्तव्यम् । "सपडिवक्खो"त्ति एष प्रमाणादिको द्वारकलापः 'सप्रतिपक्षः' सापवादो वक्तव्य इति द्वारगाथासमासार्थ ॥ अथ विस्तरार्थमभिधित्सुः प्रमाणद्वारं भावयति-

[भा.१६९७] दोन्नि अणुन्नायाओ, तइय आवज्ज मासियं लहुयं ।
गुरुगो उ चउत्थीए, चाउम्मासो पुरेकम्मे ॥

वृ-चतुर्थभक्तिकस्य द्वौ वारौ गोचरचर्यामटितुमनुज्ञातौ । अथ तृतीयं वारमटति तत आपद्यते मासिकं लघुकम् । अथ चतुर्थं वारं पर्यटति तदा गुरुको मासः । स्त्रीत्वं सर्वत्र प्राकृतत्वात् । अथ तृतीयादीन् रान् भिक्षार्थं प्रविशति ततो गृहिणः पुरः कर्म कुर्वन्ति तत्र चत्वारो मासा लघव इति । एषा निर्युक्तिगाथा ॥ अथैनामेव भाष्यकृद् विवृणोति-

Jain Education International For Private & Personal Use Only www.jainelibrary.org

[भा.१६९८] सइमेव उ निग्गमणं, चउत्थभत्तिस्स दोन्नि वि अलद्धे।
सव्वे गोयरकाला, विगिट्ठ छट्ठऽट्ठमे बि-तिहिं ॥

वृ- 'सकृदेव' एकवारमेव नित्यभक्तिकस्य भक्ताय वा पानाय वा निर्गमनं कल्पते। चतुर्थभक्तिकस्याप्युत्सर्गतः सकृदेव भिक्षामटितुं कल्पते। अथ तदानीं पर्यटताऽपि तेन परिपूर्णो भक्तार्थो न लब्धः ततोऽलब्धे सति तस्य द्वावपि गोचरकालावनुज्ञातौ। उक्तञ्च दशाश्रुतस्कन्धे- कप्पइ चउत्थभत्तियस्स एगं गोयरकालं गाहावइकुलं भत्ताए वा पाणाए वा निक्खमित्तए वा पविसित्तए वा। से य नो संथरिज्ञा एवं से कप्पइ दुच्चं पि गाहावइकुलं इत्यादि। यस्तु 'विकृष्टभक्तिकः' दशम-द्वादशमादिक्षपकस्तस्य सर्वेऽपि गोचरकालाः कल्पन्ते। "छट्ठऽट्ठमे ब-तिहिं" ति षष्ठ-भक्तिकस्य द्वयोर्गोचरकालयोरष्टमभक्तिकस्य तु त्रिषु गोचरकालेषु भिक्षामटितुं कल्पत इति ॥ स्यान्मति किमर्थं षष्ठादिभक्तिकानां व्यादिगोचरकालानामनुज्ञा ? उच्यते-

[भा.१६९९] संखुन्ना जेणंता, दुगाइ छट्ठादिनं तु तो कालो।
भुत्तनुभुत्ते अ बलं, जायइ न य सीयलं होइ ॥

वृ- 'संक्षुन्नानि' सङ्क्रुचितानि 'येन' कारणेन षष्ठादितपसा 'अन्त्राणि' प्रतीतानि, ततः षष्ठादिभक्तिकानां 'द्विकादिकः' गोचरद्वयादिकः कालोऽनुज्ञातः। अपि च प्रथममेकवारं भुक्तस्ततो द्वितीयादिं वारमनुभुक्तो भुक्तानुभुक्तस्तस्य व्यादीन् वारान् भुक्तवत् इत्यर्थः 'बलं' भूयोऽपि षष्ठादिकरणे सामर्थ्यमुपजायते। न चेत्थं तद् भक्तं शीतलं भवति, सद्यो गृहीतत्वात्। यदि ह्येकमेव वारं पर्यटता यद् गृहीतं तन्मध्यात् किञ्चित् समुद्दिश्य द्वितीयादिवारसमुद्देशनार्थं शेषं स्थापयेत् तदा तद् भवत्येव शीतलम्। तच्च तस्य तपःक्षामदेहस्याकारकमिति कृत्वा द्व्यादयो गोचरकाला अनुज्ञाता इति ॥ अत्र परः प्राह-यद्यसौ षष्ठादिभक्तिको यावन्ति भक्तानि च्छिनत्ति तावन्त्येकेनैव दिवसेन पूरयति ततः को नाम गुणस्तस्य भक्तच्छेदनेन ? उच्यते-

[भा.१७००] बहुदेवसिया बत्ता, एगदिनेनं तु जइ वि भुंजेज्ञा।
तह वि य चाग-तितिक्खा-एग्ग-पभावणाईया ॥

वृ- बहुदैवसिकानि भक्तानि यद्यप्यसावेकदिनेनैव तुशब्दस्यैवकारार्थत्वात् षष्ठादिभक्तिको भञ्जीत तथापि भक्तच्छेदने त्याग-तितिक्षैकाग्र्य-प्रभावनादयो गुणा भवन्ति। त्यागो नाम-द्व्यादीन् दिवसान् यावत् सर्वथैव भक्तार्थपरिहारः, तितिक्षा-क्षुधापरीषहस्याधिसहनम्, एकाग्र्यं तु सूत्रार्थपरावर्त्तनादौ चित्तस्यानन्योपयुक्तता, प्रभावना नाम-अहो ! अमीषां शासनं विजयते यत्रेदशास्तपस्विन इति, आदिशब्दादन्येषामपि तपःकर्मणि श्रद्धाजननम्, गृहिणां वा तद्दर्शनात् प्रव्रज्याप्रतिपत्तिरिति। अतः षष्ठादिभक्तिकस्य द्व्यादिगोचरकालानुज्ञानम्। नित्यभक्तिकस्तु यदि द्वितीयं वारं भिक्षार्थमवतति मासलघु, तृतीयवारं मासगुरु, चतुर्थं चतुर्लघु, पञ्चमं चतुर्गुरु, षष्ठं षड्लघु, सप्तमं षड्गुरु, अष्टमं छेदः, नवमं मूलम्, दशममनवस्थाप्यम्, एकादशं वारं पाराञ्चिकम्।

चतुर्थभक्तिकादीनामतिदेशमाह-

[भा.१७०१] जह एस एत्थ वुड्ढी, ओअरमाणस्स दसहि सपदं च।
सेसेसु वि जं जुञ्जइ, तत्थ विवड्ढी उ सोहीए ॥

वृ- यथा द्वितीयादिवारं भिक्षामवतरतः 'एषा' लघुमासादारभ्य प्रायश्चित्तस्य वृद्धिर्भणिता

Jain Education International For Private & Personal Use Only www.jainelibrary.org

'दशभिश्च' दशसङ्ख्याकैः स्थानैः 'स्वपदं' पाराञ्चिकं नित्यभक्तिकस्योक्तम्, तथा 'शेषेष्वपि' चतुर्थभक्तिकादिषु 'यत्' तृतीयवारादिकं प्रायश्चित्तस्थानं युज्यते 'तत्र' तदारभ्य 'शोधेः' प्रायश्चित्तस्य विवृद्धिः कर्त्तव्या । तद्यथा-चतुर्थभक्तिकस्तृतीयं वारं भिक्षामवतरति मासलघु, चतुर्थं मासगुरु, पञ्चमं चतुर्लघु, षष्ठं चतुर्गुरु, सप्तमं षड्लघु, अष्टमं षड्गुरु, नवमं छेदः, दशमं मूलम्, एकादशमनवस्थाप्यम्, द्वादशं वारं पर्यटतः पाराञ्चिकम् । एवं षष्ठभक्तिकस्यापि द्वादशं वारमवतरतः पाराञ्चिकम् । यदाह चूर्णिकृत्- छट्ठभत्तियस्स वि बारसहिं पावइ सपयं ति । अष्टमभक्तिकस्य तु चतुर्थवारादारभ्य त्रयोदशं वारं यावत् पर्यटतो लघुमासादिकं पाराञ्चिकान्तमिति ।

गतं प्रमाणद्वारम् । अथ कालद्वारम्-कस्मिन् काले भिक्षार्थं निर्गन्तव्यम् ? उच्यते-यः क्षपको बालो वृद्धो वा पर्युषितेन प्रथमालिकां कर्त्तुकामः स सूत्रपौरुषीं कृत्वा निर्गच्छति । अथ तावतीं वेलां न प्रतिपालयितुं क्षमः ततोऽर्द्धपौरुष्यां निर्गच्छति । यद्यतिप्रभाते पर्यटति तदा मासलघु, भद्रक-प्रान्तकृताश्च दोषा भवन्ति । तत्र साधुरतिप्रभात एव कस्यापि गृहं गत्वा भिक्षां याचितवान्, स च गृहपतिर्भद्रकः सुप्ताविरतिकामुत्थापयेत् ततस्तस्यामुत्थितायामधिकरणं प्रवर्त्तितं भवेत् । यस्तु प्रान्तो भवति स ब्रूयात्-किमुन्मत्तो वर्तसे यदेवमतिप्रभाते पर्यटसि ? सुखरात्रिकं वा प्रष्टुं समायासीः ? इति । यद्वा कोऽपि ग्रामान्तरं प्रस्थितः प्रथममेव तं साधुं दृष्ट्वा अपशकुनं मन्यमानः प्रद्वेषं यायात्, प्रद्विष्टश्चाहननादि कुर्यात् । अथैतद्दोषभयादतिक्रान्तायां वेलायामटति तदाऽपि मासलघु, "अकाले चरसी भिक्खू" इत्यादिगाथोक्ताश्च दोषाः । एवमुष्णस्यापि भक्तस्याप्राप्ते अतिक्रान्ते वा एत एव दोषा मन्तव्याः ॥

गतं कालद्वारम् । अथावश्यकद्वारम्-यद्यावश्यकमविशोध्य निर्गच्छति तदा मासलघु आज्ञादयश्च दोषा विराधना च प्रवचनादीनाम् । तद्यथा-भिक्षामटतः संज्ञा समागच्छेत् ततो यद्युद्ग्राहितपात्रकः पानकं वा विना व्युत्सृजति तदा प्रवचनविराधना-अहो ! अशुचयोऽमी । अथैतद्दोषभयान्न व्युत्सृजति तत आत्मविराधना । अथ प्रतिश्रयमागत्य पानकं गृहीत्वा संज्ञाभूमी व्रजति ततो देश-काले स्फिटिते सति भिक्षामलभमान एषणां प्रेरयेत्, ततः संयमविराधना । यत एवमत आवश्यकं शोधयित्वा निर्गन्तव्यम् ।। गतमावश्यकद्वारम् ।

अथ सङ्घाटकद्वारं भाष्यकृदेव व्याख्यानयति-

[भा.१७०२] एगानियस्स दोसा, साणे इत्थी तहेव पडिनीए ।
भिक्खविसोहि महव्वय, तम्हा सबिइज्जए गमणं ।।

वृ- यद्येकाकी पर्यटति तदा मासलघु । एते च दोषाः-स एकाकी यदि भिक्षां शोधयति तदा पृष्ठतः श्वानः समागत्य तं दशेत् । अथ श्वानमवलोकते तत एषणां न रक्षति । तमेकाकिनं दृष्ट्वा काचित् प्रोषितभर्तृका विधवा वा स्त्री बहिः प्रचारमलभमाना द्वारं पिधाय तं गृह्णीयात् । प्रत्यनीको वा तमेकाकिनं दृष्ट्वा प्रान्तापनादि कुर्यात् । 'भिक्षाविशोधि' इति एकाकी यदि त्रिषु गृहेषु भिक्षां दीयमानां गृह्णाति तत एषणायामशुद्धिर्भवति । अथैकत्रैव गृहे गृह्णाति तत इतरयोर्दायकयोः प्रद्वेषो भवेत् । द्वयोस्तु निर्गतयोरेक एकत्र भिक्षामाददान एवोपयोगं ददाति, द्वितीयस्तु शेषगृहद्वयादानीयमानं भिक्षाद्वयमपि सम्यगुपयुङ्क्ते । महाव्रतानि वा एकाकी विराधयेत् । तथाहि-

Jain Education International For Private & Personal Use Only www.jainelibrary.org

एकाकी निशङ्कत्वादप्कायमप्यापिबेत् १ कुण्टल-विण्टलादि वा प्रयुञ्जीत २ हिरण्यादिकं वा विक्षिप्तं गुरुकर्मतया स्तेनयेत् ३ अविरतिकां वा रूपवतीं दृष्ट्वा समुदीर्णमोहतया प्रतिसेवेत ४ भैक्षेण वा समं पतितं सुवर्णादि गृह्णीयाद् ५ इति । यत एते दोषास्तस्मात् सद्वितीयेन गमनं कर्त्तव्यम्, सङ्घाटकेनेत्यर्थः ॥ स पुनरेकाकी कैः कारणैः सङ्घाटिकं न गृह्णाति ? इति उच्यते-

[भा.१७०३] गारविए काहीए, माइल्ले अलस लुद्ध निद्धम्मे ।
दुल्लह अत्ताहिट्ठिय, अमणुन्ने या असंघाडो ॥

वृ- 'गौरविको नाम' 'लब्धिसम्पन्नोऽहम्' इत्येवं गर्वोपेतः । अत्र चेयं भावना-सङ्घाटके यो रत्नाधिकः सोऽलब्धिमान् अवमरत्नाधिकस्तु लब्धिसम्पन्नः ततोऽसावग्रणीभूय भिक्षामुत्पादयति, प्रतिश्रयमागतयोश्च तयो रत्नाधिको मण्डलीस्थविरेण भण्यते-'ज्येष्ठार्य ! मुञ्च प्रतिग्रहम्' ततोऽवमरत्नाधिकः स्वलब्धिर्वितश्चिन्तयेत्-'मया स्वलब्धिसामर्थ्येनेदं भक्त-पानमुत्पादितम्, इदानीमस्य रत्नाधिकः प्रभुरभूद् येनास्य पार्श्वे प्रतिग्रहो याच्यते' इति कषायितः सन्नेकाकित्वं प्रतिपद्यते । "काहीए"त्ति कथाभिश्चरतीति 'काथिकः' कथाकथनैकनिष्ठः, स गोचरं प्रविष्टः कथाः कथयन् द्वितीयेन साधुना गुर्वादिभिर्वा वार्यमाणोऽपि नोपरमते तत एकाकी भवति । 'मायावान्' भद्रकं भद्रकं भुक्त्वा शेषमानयन्नेकाकी जायते । 'अलसः' चिरगोचरचर्याभ्रमणभग्नः सन्नेकाकी पर्यटति । 'लुब्धस्तु' दधि-दुग्धादिका विकृतीवभाष्यमाणः पृथगेवाटति । 'निर्द्धर्मा पुनः' अनेषणीयं जिघृक्षुरेकत्वं प्रतिपधते । "दुल्लह"त्ति दुर्लभभैक्षे काले एकत्वमुपसम्पद्यते । 'अत्ताहिट्ठिय' त्ति आत्मार्थिकः-आत्मलब्धिकः सः 'स्वलब्धिसामर्थ्येनैवोत्पादितमहं गृह्णामि' इत्येकाकी भवति । 'अमनोज्ञो नाम' सर्वेषामप्यनिष्टः कलहकारकत्वाद् असावप्येकाकी पर्यटतीति । एतैः कारणैः 'असङ्घाटः' सङ्घाटको न भवति ॥

अथैतेषामेकाकित्वप्रत्ययं प्रायश्चित्तमाह-

[भा.१७०४] लहुया यदोसु गुरुओ, अ तइअए चउगुरू य पंचमए ।
सेसाण मासलहुओ, जं वा आवज्जई जत्थ ॥

वृ- 'द्वयोः' गौरविक-काथिकयोश्चत्वारो लघवः । 'तृतीयकस्य' मायावतो गुरुको मासः । 'पञ्चमस्य' लुब्धस्य चत्वारो चत्वारो गुरवः । 'शेषाणाम्' अलस-निर्धर्मादीनां मासलघु । 'यद् वा' संयमविराधनादिकं यत्रापद्यते तन्निष्पन्नं तत्र प्रायश्चित्तम् ॥ गतं सङ्घाटकद्वारम् । अथोपकरणद्वारम्-सर्वमप्युपकरणमादाय भिक्षायामटितव्यम् । यदि सर्वोपकरणं न गृह्णाति तदा मासलघु, उफधिनिष्पन्नं वा । तथा तेषां भिक्षामटितुं गतानां स प्रतिश्रयस्थापित उपिरग्निकायेन दह्येत, दण्डिकक्षोभो मालवस्तेनक्षोभो वा तेषां भिक्षामटतां सहसा समापतित इति कृत्वा तत एव ते पलायिताः, तोत यदुपधिं विना तृणग्रहणादि कुर्यु तन्निष्पन्नं प्रायश्चित्तमिति ॥

गतमुपकरणद्वारम् । अथ मात्रकद्वारं व्याख्यायते-मात्रकमगृहीत्वा निर्गच्छति मासलघु । आर्यादीनां प्रायोग्यं मात्रकं विना कुत्र गृह्णातु ? । यदि न गृह्णाति तदा यत् ते अनागाढमागाढं वा परिताप्यन्ते तन्निष्पन्नम् । अथ ते अन्त-प्रान्तं समुद्दिशेयुः ततो ग्लान्यादयो दोषाः । दुर्लभद्रव्यस्य वा घृतादेस्तद्दिवसं लाभो जातः, यदि मात्रकं नास्तीति कृत्वा तन्न गृह्णाति तदा मासलघु । संसक्तभक्त-

Jain Education International For Private & Personal Use Only www.jainelibrary.org

पानं वा मात्रकं विना क्व शोधयतु ? । यदि मात्रकमभविष्यत् ततस्तत्र शोधयित्वा परिष्ठापयेत् प्रतिग्रहे प्रक्षिपेद्वा । यत् एवमतः कर्त्तव्यं मात्रकग्रहणम् ।। गतं मात्रकद्वारम् । अथ कायोत्सर्गद्वारम्- कायोत्सर्गमकृत्वा व्रजति मासलघु । दोषाश्चात्र-कश्चिद् योगप्रतिपन्नस्तस्य तद्दिवसमाचाम्लम्, स चोपयोगकायोत्सर्गमकृत्वा गतो दध्नः करम्बं गृहीत्वा समायातः, पश्चादपरैः साधुभिस्तस्याचम्लं स्मारितम् ततः कायोत्सर्गं कृत्वा निर्गच्छेत् । तत्र च कायोत्सर्गे चिन्तयेत्-यथा अद्य किं मे आचा-म्लम् ? उत निर्विकृतिकम् ? उताहो अभक्तार्थम् ? आहोश्चिदेकाशनकम् ? इति । इत्थमुपयोगं दत्त्वा प्रत्याख्यानानुगणमेवाहारं गृह्णाति ।।

गतं कायोत्सर्गद्वारम् । अथ यस्य च योग इति द्वारम्-यस्य-वस्त्र-पात्र-शैक्षादेर्योगः-सम्बन्धो भविष्यति तदपि ग्रहीष्यामीति यदि न भणति तदाऽपि मासलघु । वस्त्र-पात्रादिकं च ग्रहीतुं न कल्पते ।। अथ सप्रतिपक्ष इति द्वारम्-एष द्वारकलापः सप्रतिपक्षः-सापवादो मन्तव्यः । तद्यथा- आचार्याद्यर्थं बहूनपि वारान् प्रविशेत् । प्रथम-द्वितीयपरीषहपीडितो यद्यप्यतप्रभातं तदाऽपि निर्गच्छेत्, यत्र च मानुषाणि विबुद्धानि तत्रगत्वा धर्मलाभयेत्, ग्लान-प्राघूर्णकादीनां हेतोरतिक्रान्तेऽपि निर्गच्छेत् । अनाभोगतो ग्लानादिषु वा कार्येषु व्यापृतः सन्नावश्यकमप्यविशोध्य निर्गच्छेत् । निर्गतश्च संज्ञया बाध्यमानो यदि प्रतिश्रयः प्रत्यासन्नस्ततो निवर्त्तते । अथ दूरे ततो यदि कालो न पूर्यते तदा तयोरेकः पात्रकाणि धारयति इतरः संज्ञां व्युत्सृजति । अथ सागारिकास्तत्र पश्यन्ति ततः समनोज्ञानां प्रतिश्रयं गत्वा व्युत्सृजति । तदभावे अमनोज्ञानां संविग्नानाम् । तेषामलाभे पार्श्वस्थादीनाम् । तेषामप्यभावे सारूपिकाणाम् । तदसत्त्वे सिद्धपुत्रकाणाम् । तेषामप्राप्तौ श्रावकाणां वैद्यस्य वा गृहे । एतेषामभावे राजमार्गे गृहद्वयमध्यभागे वा गृहस्थसत्के वा अवग्रहे कायिकीवर्जं व्युत्सृजति । ततो यद्यसौ गृहपतिस्तां संज्ञां त्याजयति तदा राजकुले व्यवहारो लभ्यते । यथा-

त्रयः शल्या महाराज !, अस्मिन् देहे प्रतिष्ठिताः ।
वायु-मूत्र-पुरीषाणां, प्राप्तं वेगं न धारयेत् ।।

तथा सङ्घाटकं विनाऽपि निर्गच्छेत् । कथम् ? इति चेद् उच्यतेयदि दुर्भिक्षे चिरमप्यटित्वा पर्याप्तं लभ्यते ततो द्वावेव पर्यटतां न पुनरेकाकी । अथ द्वयोरप्येकैव भिक्षा लभ्यते न च कालः पूर्यते तत एकोऽपि पर्यटेत् । यदि सर्वेऽपि खग्गूडत्वादात्मलब्धिका भवन्ति तदा प्रतिषे-द्धव्याः । अथ कोऽपि प्रियधर्मा मातृस्थानविरहित आत्मलब्धिकत्वं प्रतिपद्यते ततः सोऽनुज्ञा-तव्यः । यः पुनरमनोज्ञः स अन्यान्यैः साधुभि समं संयोज्य प्रेष्यते । यदि सर्वेऽपि नेच्छन्ति ततः परित्यजनीयोऽसौ । अथ स एवैकः कलहकरणलक्षणस्तस्य दोषः अपरे निर्लोभत्वादयो बहवो गुणा एषणाशुद्धौ चातीव दृढता ततो न परित्यक्तव्य इति । यत्र श्वान-गवादयो दुष्टा भवन्ति तद्गृहं यद्यमानभोगतः प्रविष्टस्ततः कुड्य-कटनिश्रया तिष्ठति, दण्डकेन वा तान् वारयति । यदि काचिदविरतिका तमुपसर्गयेत् ततो धर्मकथा कर्त्तव्या । तया यद्युपशाम्यति ततः सुन्दरम्, नो चेदभिघातव्यम्-एतानि व्रतानि गुरुसमीपे स्थापयित्वा समागच्छामीति । यदि प्रत्यनीकगृहमनाभोगतः प्रविष्टस्ततो महता शब्देन तथा बोलं करोति यथा भूयाँल्लोको मिलति । त्रयाणां गृहाणां मध्ये स्थितः सन्नुपयोगं कृत्वा भिक्षां गृह्णीयात् । पञ्चानामपि महाव्रतानामतिक्रमं

Jain Education International For Private & Personal Use Only www.jainelibrary.org

महता प्रयत्नेन परिहरेत्।

सर्वोपकरणमपि स्तेन-प्रत्यनीकाद्युपद्रवभयाद् वृद्धत्वादधुनोत्थितग्लानत्वाद्वा न गृह्णीयात्। इयत् पुनरवश्यमेव ग्रहीतव्यम्-पात्रभाण्डकं चोलपट्टको रजोहरणं मुखवस्त्रिका चेति। मात्रकमप्यनाभोगादिना न गृह्णीयात्। कायोत्सर्गादीन्यपि ग्लानादिकार्येषु त्वरमाणो न कुर्यादिति। उक्तं सप्रतिपक्षद्वारम्। तदुक्तौ च गतं भिक्षाद्वारम्। अथ कल्पकरणद्वारमभिधित्सुराह-

[भा.१७०५] भाणस्स कप्पकरणे, अलेवडे नत्थि किंचि कायव्वं।
तम्हा लेवकडस्स उ, कायव्वा मग्गणा होइ॥

वृ- भाजनस्य कल्पकरणे चिन्त्यमाने यदलपकृतं द्रव्यं तद् यत्र प्रक्षिप्तं तस्य भाजनस्य न किञ्चित् कर्त्तव्यम्, कल्पो न विधेय इत्यर्थः। लेपकृतभाजनस्य त्ववश्यं कल्पो दातव्य इत्यतो लेपकृतस्य मार्गणा कर्त्तव्या, कीदृशं लेपकृतम्? अलेपकृतं वा? इति चिन्तनीयमित्यर्थः॥

तत्रालेपकृतानि तावदाह-

[भा.१७०६] कुंजसिण-चाउलोदे, संसट्ठा-ऽऽयाम-कट्ठमूलरसे।
कंजियकढिए लोणे, कुट्टा पिज्ञा य निस्तुप्पा॥

वृ- काञ्जिकम्-आरनालम्, उष्णोदकम्-उद्वृत्तत्रिदण्डम्, "चाउलोदगं" तन्दुलधावनम्, संसृष्टं नाम-गोरससंसृष्टे भाजने प्रक्षिप्तं सद् यदुदकं गोरसरसेन परिणामितम्, 'आयामम्' अवश्रावणम्, "कट्ठमूलरसे" त्ति काष्ठमूलं-चणक-चवलादिकं द्विदलं तदीयेन रसेन यत् परिणामितं तत् काष्ठमूलरसं नाम पानकम्, तथा यत् काञ्जिकक्वथितम्, "लोणि" त्ति सलवणम्, या च "कुट्टा" चिञ्चिनिका, 'पेया च' प्रतीता 'निस्तुप्पा' अचोप्पडा अवग्घारिता वा॥ तथा

[भा.१७०७] कंजिय-उदगविलेवी, ओदण कुम्मास सत्तुए पिट्ठे।
मंडग समिउस्सिन्ने, कंजियपत्ते अलेवकडे॥

वृ- विलेपिका द्विविधा-एका काञ्जिकविलेपिका, द्वितीया उदकविलेपिका। 'ओदनः' तन्दुलादि भक्तम्, 'कुल्माषाः' उडदा राजमाषा वा, 'सक्तवः' भ्रष्टयवक्षोदरूपाः, 'पिष्टं' मुद्गादिचूर्णम्, 'मण्डकाः' कणिकामयाः, 'समितं' अट्टकः, 'उत्स्विन्नम्' उण्डेरकादि, 'काञ्जिकपत्रं' काञ्चिकेन बाष्पितं अरणिकादिशाकम्। एतानि काञ्चिकादीन्यलेपकृतानि मन्तव्यानि॥

अथ लेपकृतानि निरूपयति-

[भा.१७०८] विगई विगइअवयवा, अविगइपिंडरसएहि जं मीसं।
गुल-दहि-तेल्लावयवे, विगडम्मि य सेसएसुं च॥

वृ- दधि-दुग्ध-घृतादिका या विकृतयो ये च विकृतीनामवयवाः-मन्थुप्रभृतस्तैर्यद् मिश्रं यद्वाविकृतिरूपैः पिण्डरसैः-खर्जूरादिभिर्मिश्रं एतत् सर्वमपि लेपकृतमिति प्रक्रमः। अत्र च गुडदधि-तैलानां येऽवयवाः यश्च 'विकटे' मद्येऽवयवः 'शेषेषु च' घृतादिषु येऽवयवास्ते केचिद् विकृतयः केचिद्वाविकृतयः प्रतिपत्तव्याः॥ अथैनामेव निर्युक्तिगाथां विवृणोति-

[भा.१७०९] दहिअवयवो उ मंथू, विगई तक्कं न होइ विगई उ।
खीरं तु निरवयवं, नवनीओगाहिमा चेव॥

वृ- दध्नः सम्बन्धी यो मन्थु इति नाम्ना प्रसिद्धोऽवयवः स विकृति। यत्तु तक्रं तद् दध्यवयवरू-

Jain Education International For Private & Personal Use Only www.jainelibrary.org

पमपि विकृतिर्न भवति । 'क्षीरं तु' दुग्धं पुनः 'निरवयवम्' अवयवरहितम्, नवनीतं-म्रक्षणम् अवगाहिमं-पक्वान्नम् एते अपि निरवयवे, एतद्विषयाणामवयवानां पृथगव्यवह्रियमाणत्वादिति॥

[भा.१७१०] घयघट्टो पुन विगई, वीसंदण मो य केइ इच्छंति ।
तेल्ल-गुलाण अविगई, सूमालिय-खंडमाईणि ॥

वृ- 'घृतघट्टः पुनः' घृतस्य सम्बन्धी यः किट्टो महियाडुकमित्यर्थः स विकृतिर्व्यवह्रियते । विस्पन्दनं नाम-अर्द्धनिर्दग्धघृतमध्यक्षिप्ततन्दुलनिष्पन्नम् । उक्तञ्च पञ्चवस्तुकटीकायाम्- वीसंदणं अद्धनिद्दड्ढघयमज्झछूढतंदुलनिप्फन्नं ति । "मो" इति पादपूरणे । चशब्दोऽपिशब्दार्थे । विस्पन्दनमपि केचिद् विकृतिमिच्छन्ति न पुनर्वयम् । यदाह चूर्णिकृत्- अम्हाणं पुम वीसंदणं अविगइ त्ति । तैल-गुलयोर्यथाक्रमं यानि सुकुमारिका-खण्डादीनि तानि 'अविकृति' विकृतिर्न भवतीत्यर्थः । सुकुमारिका-तैलकिट्टविशेषः, खण्डः-प्रतीतः, आदिशब्दात् शर्करा-मत्स्यण्डिकदिपरिग्रहः ॥

[भा.१७११] महुणो मयणमविगई, खोलो मज्जस्स पोग्गले पिउडं ।
रसओ पुन तदवयवो, सो पुन नियमा भवे विगई ॥

वृ- 'मधुनः माक्षिकादिभेदभिन्नस्यावयवो यद् मदनं तदविकृति । मद्यस्य यः 'खोलः'' किट्टविशेषः सोऽपि न विकृति । पुद्गलस्य यत् 'पिटकम्' उज्झम् अस्थि वा तदप्यविकृति । 'रसकः पुनः' वसा मेदश्च यस्तस्य-पुद्गस्यावयवः स पुनर्नियमाद् भवेद् विकृतिः ॥

अथ पिण्डरसपदं व्याख्यानयति-

[भा.१७१२] अंबंबाड-कविट्ठे, मुद्दीया माउलिंग कयले य ।
खज्जूर-नालिएरे, कोले चिंचा य बोधव्वा ॥

वृ- आम्रं आम्रातकं कपित्थं 'मुद्रिका' द्राक्षा 'मातुलिङ्गं' बीजपूरकं ''कयलं'' कदलीफलं 'खर्जूरं नालिकेरम्' उभयमपि सुप्रसिद्धं 'कोलः' बदरचूर्णं 'चिञ्चा' अम्लिका चशब्दादन्यान्यप्येवंविधानि पिण्डरसद्रव्याणि बोद्धव्यानि । एतानि च विकृतयो न भवन्ति ॥ यत आह-

[भा.१७१३] खज्जूर-मुद्दिया-दाडिमाण पीलुच्छु-चिंचमाईणं ।
पिंडरस न विगईओ, नियमा पुन होंति लेवाडा ॥

वृ- खर्जूर-मुद्रिका-दाडिमानां पीलु-इक्षु-चिञ्चादीनां च सम्बन्धिनौ यौ पिण्डरसौ तौ 'अविकृती' विकृती न भवतः, नियमात् पुनर्लेपकृतौ भवत इति ॥ उक्तानि लेपकृतानि । लेपकृतैः संसृष्टस्य भाजनस्य कल्पः करणीयः । यदि पुनस्स्य भाजनस्य लेपः स्फटितो भवति ततः कल्पत्रये कृतेऽपि लेपकृतमेव तद् मन्तव्यम् । अतस्तद्दोषपरिहारार्थमाह-

[भा.१७१४] कुट्टिमतलसंकासो, भिसिणीपुक्खलपलाससरिसो वा ।
सामास धुवण सुक्खावणा य सुहमेरिसे होंति ॥

वृ- यथा कुट्टिमतलंनिम्नोन्नमतप्रदेशरहितं सर्वतः सममेव भवते एवं पात्रकस्य लेपोऽपि कुट्टिमतलसङ्काशः सर्वतः सम एव कर्त्तव्यः । तथा बिसिनी-पद्मिनी स्या यत् पुष्कलं-विस्तीर्णं पलाशं-पत्रं तत्र पतितं जलं यथा नावतिष्ठते एवं यत्र सूक्ष्मसिक्थाद्यवयवा लग्ना अपि न स्थितिं कुर्वन्ति स बिसिनीपुष्कलपलाशसदृशः । ईदृशे लेपे पात्रसय् समास-धावन-शोषणाः सुखमेव कर्त्तुं शक्यन्ते । सम् इति-सम्यक् प्रवचनोक्तेन विधिना आङ इति-मर्यादया पात्रकलेपमवधीकृत्य

Jain Education International For Private & Personal Use Only www.jainelibrary.org

यद् असनं-सिक्थाद्यवयवानामपनयनं स समासः, संलेखनकल्प इत्यर्थः । धावनं-कल्पत्रयप्रदानम् । शोषणं-सिक्खाद्यवयवानामपनयनं स समासः, संलेखनकल्प इत्यर्थः । धावनं-कल्पत्रयप्रदानम् । शोषणं-उद्वापनम् । अपरश्चायं गुण ईद्दशे पात्रे भवति-

एगो साहू रुक्खमूले समुद्दिसइ । तेश साहुणा दिसालोगो कओ, न पुन उवरिमारूढो धिज्जाइओ दिट्ठो । तेण सो साहू दरजिमिओ दिट्ठो । ताहे सो ओअरित्ता गाममइगओ । तच्छणेण सिट्ठं गामिल्लयाणं । तेण पुन साहुणा सो ओअरंतो दिट्ठो । ताहे सो भगवं दवदवस्स आउत्तो समुद्दिसिउं तहा संलिहइ जहा नज्जइ धोयं पिव पत्तं । पच्छा सो भगवं मुहपोत्तियाए मुहं पिहेऊण पढंतो अच्छइ । ते आगया पिच्छंति साहुं उवसंतं । कओ एह ? ,कत्तो भिक्खं गहियं ? । तओ भणइ-न ताव हिण्डामि, किं वेला जाया ? । ते अन्नमन्नस्स मुहं पलोईंति । ताहे धिज्जाइओ भणइ-मए दिट्ठो, पलोएह से भायणं ति । पिच्छामो भायणं । तेनं दाइयं । ताहे ते दट्ठुण भणंति-तुमं सि पावो मरुगो त्ति ॥ अमुमेवार्थं भाष्यकृदाह- ॥

[भा.१७१५] आउत्तो सो भगवं, चोक्खं सुइयं च तं कयं पत्तं ।
निस्सील-निव्वयाणं, पत्तस्स य दायणा भणिया ॥

वृ- स भगवान् तं धिग्जातीयं वृक्षादवतरन्तं द्दष्ट्वा 'आयुक्तः' प्रवनचमालिन्यरक्षणाय प्रयत्नपरो बभूव । तस्तेन संलेखनाकल्पकरमेन चोक्खं शुचिकं च कृतं तत् पात्रकम् । ततश्च निशीलनिर्व्रतानां च तेषां ग्रामेयकाणां पात्रकस्य 'दर्शना' 'निरीक्षध्वमिदं यदि भवतामेतद्दर्शने कौतुकमस्ति' इत्येवंलक्षणा भणिता ॥

[भा.१७१६] ओभामिओ उ मरुओ, पत्तो साहू जसं च कित्तिं च ।
पच्छाइआ य दोसा, वन्नो य पभाविओ तहियं ॥

वृ- पात्रे च दर्शिते तैः 'मरुकः' दिग्जातीयोऽपभ्राजितः । यथा-धिग् भवन्तमसद्दोषोद्धोषणकारिणं गुणिषु मत्सरिणमिति । साधुश्च प्राप्तः 'यशश्च' मिथ्याद्दष्टिमानमर्दनपराक्रमसमुत्थं 'कीर्त्तिं च' शुचिसमाचाररूपसुकृतप्रभवाम् । प्रच्छादिताश्च दोषाः पानकेन विना तुम्बकेषु वा भोजनकरणसमुत्थाः । वर्णश्च प्रभावितः प्रवचनस्य तत्रावसरे तेन भगवता । एष गुणः शोभनलेपलिप्तस्य पात्रस्येति ॥ अथ येषु द्रव्येषु कल्पकरणमवश्यं कर्त्तव्यं तानि दर्शयति-

[भा.१७१७] लेवाड विगइ गोरस, कढिए पिंडरस जहन्न उब्भज्जी ।
एएसिं कायव्वं, अकरणे गुरुगा य आणाई ॥

वृ- एतानि द्रव्याणि लेपकृतानि । तद्यथा-'विकृतयः' दधि-दुग्धादिकाः, 'गोरसं' तक्रादि, 'कथितं' तीमनादि, 'पिण्डरसाः' खर्जूरादयो यावज्जघन्यतः "उब्भज्जि" त्ति कोद्रवजाउलकम् । 'एतेषां' लेपकृतानां कल्पकरणं कर्त्तव्यम् । यदि न करोति तदा चत्वारो गुरुकाः, आज्ञादयश्च दोषाः, विराधना च संयमादिविषया ॥ तामेव भावयति-

[भा.१७१८] संचयपसंगदोसा, निसिभत्तं लेवकुच्छणमगंधं ।
दव्वविणासुड्डादी, अवन्न संसज्जणाऽऽहारे ॥

वृ- लेपकृतपात्रकस्य कल्पेऽक्रियमाणे यः सञ्चयः-सूक्ष्मसिक्थाद्यवयवपरिवासनरूपस्तस्य प्रसङ्गेन दोषा एते भवेयुः-निशिभक्तं प्रतिसेवितं भवति । लेपस्य च कोथनं-पूतिभवनम् । ततश्च

Jain Education International For Private & Personal Use Only www.jainelibrary.org

'अगन्धं' नञः कुत्सार्थत्वादतीवदुर्गन्धि भाजनं भवति । तादृशे च भाजने गृहीतस्य द्रव्यस्य-ओदनादेर्विनाशो भवति । तस्मिन् भुञ्जानस्य च विरसगन्धाघ्राणत ऊर्द्धवादीनि भवन्ति। ऊर्द्ध-वमनम्, आदिशब्दादरोचक-मान्द्यादिपरिग्रहः । 'अवर्णश्च' प्रवचनस्योड्डाहो भवति । तथाहि-लोको भिक्षां ददानो दुर्गन्धि भाजनं दृष्ट्वा गर्हते-ईदृशा एवैते अशुचयः पापोपहता इति । ''संसज्जणाऽऽहारे''त्ति दुर्गन्धिनाऽऽहारे पनक-कुन्थुप्रभृतयः प्राणिनः संसजेयुः ।। यत एवमतः-

[भा.१७१९] लेवकडे कायव्वं, परवयणे तिन्नि वार गंतव्वं ।
एवं अप्पा य परो, य पवयणं होंति चत्ताइं ।।

वृ-लेपकृतभाजे कर्त्तव्य कल्पकरणम् । अत्र परः-प्रेरकस्तस्य वचने त्रीन् वारान् कल्पप्रा-योग्यपानकग्रहणार्थं गृहपतिगृहे गन्तव्यमिति । सूरिराह-एवंक्रियमाणे आत्मा च परश्च प्रवचनं च भवन्ति परित्यक्तानीति निर्युक्तिगाथासमासार्थ ।। अथैनामेव विवरीषुराह-

[भा.१७२०] गोउल विरूवसंखडि, अलंभे साधारणं च सव्वेसिं ।
गहियं संती य तहिं, तक्कुच्छुरसादि लग्गट्ठा ।।

वृ- गच्छे साधवः सुबहवो भवेयुः, तैश्च भिक्षां हिण्डमानैर्गोकुले दुग्ध-दध्यादीनि प्राचुर्येण लब्धानि, 'विरूपायां वा' अनेकभक्ष्य-भोज्यप्रकारायां सङ्खड्यामुत्कृष्टमशनादिद्रव्यं लभ्येत, तैश्च साधुभिः 'अलाभे' अन्यत्र तथाविधस्य दुर्लभद्रव्यस्यासम्प्राप्तौ सर्वेषां साधारणमुपष्टम्भकारक-मिदमिति मत्वा सर्वाण्यपि भक्तभाजनानि भृत्वा पानकप्रतिग्रहेष्वपि गृहीतम् । ततः प्रतिश्रयमागता यावत् पानकेन विना न शक्यते समुद्देष्टुम्, आहारस्य गलके विलगनात्, ततः किं कर्त्तव्यम् ? इत्याह-सन्ति च तत्र तक्रेक्षुरसादीनि, आदिशब्दाद् दुग्धादीनि च, तान्यपान्तराले आपिबेत् । किमर्थम् ? इत्याह-''लग्गड्ड''त्ति लगनं लग्नम्, भावे क्तप्रत्ययः, आहारस्य गलके विलगनमुत्तूहणं कथं भाजनानि कल्पयितव्यानि ? इत्युच्यते-

[भा.१७२१] मंडलितक्की खमए, गुरुभाणेणं व आनयंति दवं ।
अपरीभोगऽतिरित्ते, लहुओऽनाजीविभाणे य ।।

वृ- यः क्षपकः ''मण्डलितक्की'' मण्डल्युपजीवकस्तस्य भाजनेन गुरूणां भाजनेन वा 'द्रवं' पानकमानयन्ति । अथापरिभोग्येषु भाजनेषु भाजनेषु 'अतिरिक्ते वा' नन्दीभाजने मण्डल्यनुप-जीविक्षपकभाजने वाद्रवमानयन्ति तदा लघुको मासः ।। अथ ''परवचने त्रीन् वारान् गन्तव्यम्'' इति पदं व्याख्यानयति-

[भा.१७२२] भणइ जइ एस दोसो, तो आइमकप्पमाण संलिहिउं ।
अन्नेसि तदं दाउं, तो गच्छइ बिइय-तइयाणं ।।

वृ- 'भणति' परः प्रेरयति-यद्येषः 'दोष-' प्रायश्चित्तापत्तिलक्षणस्ततोऽहं विधिं भणामि-प्रतिग्रहं संलिख्य तत एकाकी गृहपतिगृहे प्रविश्य 'आदिमकल्पमानं' यावता सर्वसाधुभिरादिमः कल्पः क्रियते तावन्मात्रं द्रवं गृहीत्वाऽन्येषां साधूनां 'तत्' पानकं दत्त्वा ततः स्वयं प्रथमकल्पं करोतु । कृत्वा च ततो गच्छति द्वितीय-तृतीययोः कल्पयोः । इदमुक्तं भवति-द्वितीयकल्पकरणार्थं द्वितीयं वारं तत्र गृहे प्रविश्य तावन्मात्रं द्रवं गृहीत्वा प्राग्वदन्यसाधूनां दत्त्वा द्वितीयकल्पं करोतु, ततः तृतीयं वारं भूयः प्रविश्य तावन्मात्रं गृहीत्वा तथैव तृतीयं कल्पं कृत्वा यावन्मात्रेण शेषभाजनानि

Jain Education International For Private & Personal Use Only www.jainelibrary.org

धाव्यन्ते संज्ञाभूमीपानकं च भवति तावन्मात्रं गृहीत्वा समायातु ।।

आचार्य प्राह-एवंकुर्वता आत्मा च परश्चप्रवचनं च परित्यक्तानि भवन्ति । तत्रात्मा कथं त्यक्तो भवति ? इत्युच्यते-

[भा.१७२३] संदंसणेन बहुसो, संलाव-ऽनुराग-केलि आउभया ।
देंती नु कंजियं णुं, जइस्स इट्ठो त्ति य भणंति ।।

वृ- तस्यैकाकिनो भूयो भूयस्तद्गृहं प्रविशतो याऽसौ काञ्जिकदात्री अविरतिका तस्याः सम्बन्धिना बहुशः सन्दर्शनेन संलापा-ऽनुराग-केलिप्रभृतय आत्मोभयसमुत्था दोषा भवेयुः । संलापः-सङ्कथा, अनुरागः-सन्दर्शनेन संलापा-ऽनुराग-केलिप्रभृतय आत्मोभयसमुत्था दोषा भवेयुः। संलापः-सङ्कथा, अनुरागः-परस्परमात्यन्तिकी प्रीति, केलि-परिहासः । तथा यद्येष प्रव्रजितकः पुनः पुनरेति याति च तत् किमस्य 'ददती' पानकदायिका इष्टा ? उत काञ्चिकम् ? इत्येवमगारिणस्तमुध्दिश्य भणन्ति । नुशब्द उभयत्रापि वितर्के ।। प्रवचनं यथा परित्यक्तं भवति तथा दर्शयति-

[भा.१७२४] आयपरोभयदोसा, चउत्थ-तेणट्ठसंकणा णीए ।
दोच्चं णु चारिओ णुं, करेइ आयट्ठ गहणाई ।।

वृ- 'आत्मपरोभयदोषाः' आत्मनः-स्वस्मात्रस्याः-काञ्चिकदायिकायास्तदुभयस्माच्च एते दोषा भवेयुः । तद्यथा-चतुर्थे-चतुर्थाश्रवद्वारविषया स्तैनार्थविषया च शङ्का तस्या स्कैर्निजकैः क्रियते। यथा-'नुः' इति वितर्के, किमेष प्रव्रजितकः ,कस्याप्युदूभामकस्य मैथुनदौत्यं करोति यदेवमायाति याति च ? यद्वा चारिको भूत्वा चौराणां हेरिकतां कर्त्तुमित्थमायाति ? यद्वा आत्मार्थमेवायमित्थं करोति ? स्वयमेव मैथुनार्थी हर्तुकामो वेत्यर्थः । इत्थं शङ्कमानास्ते तस्य साधोर्ग्रहणा-ऽऽकर्षणादीनि कुर्यु । ततः प्रवचनं परित्यक्तं भवति ।। परः कथं परित्यक्तो भवति ? इत्युच्यते-

[भा.१७२५] गिण्हंति सिज्झियाओ, चिद्दं जाउग सवत्तिणीओ अ ।
सुत्तत्थेपरिहाणी, निग्गमणे सोहिवुड्ढी य ।।

वृ- गृह्णन्ति 'छिद्रं' दूषणं काञ्जिकदायिकायाः, काः ? इत्याह-'सिज्झिकाः' सहवासिन्यः, प्रातिवेश्मिकस्त्रिय इत्यर्थः, ''जाउग''त्ति 'यातरः' ज्येष्ठ-देवरजायाः 'सपत्यः' प्रतीताः, यथा-यदेष संयतो भूयो भूयः समायाति तद् नूनमस्या अयमुद्रामक इति । ततो यदा तया सहासङ्कडमुपजायते तदा तत् प्राग्विकल्पितं दूषणं साक्षात् तत्पतेः पुरत उद्गिरन्ति । तथा सूत्रार्थविषया परिहाणि पुनः पुनर्गच्छतो भवि । ''निग्गमणे सोहिवुड्ढी य'' त्ति त्रीन् चतुरो वा वारान् निर्गमने शोधिवृद्धिश्च तथैव द्रष्टव्या यथा भिक्षाद्वारे प्रागुक्तम् । यत एते दोषा अतो नैकाकिना भूयो भूयो गन्तव्यम् ।। कथं पुनस्तर्हि गन्तव्यम् ? इत्याह-

[भा.१७२६] संघाडएण एगो, खमए बिइयपय वुड्ढमाइन्ने ।
पुव्वुढ्ढि (द्दि)एन करणं, तस्स व असई य उस्सित्ते ।।

वृ- सङ्घाटकेन भावितकुलेषु प्रविश्य पानकं ग्रहीतव्यम् । द्वितीयपदे एकोऽपि यः क्षपको वृद्धो वा अशङ्कनीयः स आकीर्णेषु भावितकुलेषु पानकं गृह्णाति । तच्च पानकं यत् पूर्वमेव

Jain Education International For Private & Personal Use Only www.jainelibrary.org

सौवीरिण्याउद्ध तं-पृथक् स्थापितं तेन कल्पकरणं कर्त्तव्यम्। 'तस्य वा' पूर्वोद्ध तस्य 'असति' अभावे उत्सेचनमुत्सिक्तं तदपि कारापणीयम्। एषा पुरातनगाथा॥

अथैनामेव भाष्यकृद् विवृणोति-

[भा.१७२७] भावितकुलेसु धोवितु भायणे आनयंति सेसट्ठा।
तव्विहकुलाण असई, अपरीभोगादिसु जयंति॥

वृ- भावितकुलानि नाम-येषु पूर्वोक्ताः शङ्कादयो दोषा न स्युस्तेषु गत्वा गृहस्थभाजने मण्डल्युपजीविक्षपकभाजने गुरुभाजने वा द्रवं गृहीत्वा स्वकीयभाजनानि धौत्वा शेषाणां भाजनानां धावनार्थं संज्ञाभूमिगतानामाचमनार्थं चापरमपि पानकमानयन्ति। तद्विधानां भावितकुलानाम् 'असति' अभावे अपरिभोग्यादिषु यतन्ते, अपरिभोग्यानि नाम अव्यापार्यमाणभाजनानि तेषु, आदिग्रहणाद् मण्डल्यनुपजीविनः क्षपकस्य भाजनेषु नन्दीभाजने वा, द्रवं गृहीत्वा संसृष्टभाजनानां कल्पं कुर्वन्ति। तच्च पानकं पूर्वोत्सिक्तमेव गृह्णन्ति॥ ननु यदि सौवीरिणीमुदृत्य दीयमानं गृह्णन्ति ततः को दोषः स्यात्? उच्यते-

[भा.१७२८] ओअत्तंतम्मि वहो, पानानं तेण पुव्वउस्सित्तं।
असती वुस्सिंचणिए, जं पेक्खइ वा असंसत्तं॥

वृ- "ओयत्तंतम्मि"त्ति प्राकृतत्वात् पुंस्त्वनिर्देशः, सौवीरिण्याम् 'उद्वर्त्यमानायाम्' उत्पाट्यमानायां ये तत्र सौवीरगन्धेन कंसारिकादयः प्राणजातीया आयाताः सन्ति तेषां बाधा भवति, तेना कारणेन पूर्वोत्सिक्तं ग्रहीतव्यम्। अथ नास्ति पूर्वोत्सिक्तं ततस्तस्यासति उत्सिञ्चनिकया उत्सिञ्चाप्य यतनया गृह्णन्ति। अथ नास्त्युत्सिञ्चनिका ततो यत् पार्श्वं प्राणिभिरसंसक्तं प्रेक्षन्ते तेनोद्वर्त्य गृहिभाजनं प्रातिहारिकं याचित्वा तत्र द्रवं गृहीत्वा भाजनानि कल्पयन्ति॥ आह च-

[भा.१७२९] गिहिसंति भाण पेहिय, कयकप्पा सेसगं दवं घेत्तुं।
धोअण-पियणस्सट्ठा, अह थोवं गिण्हए अन्नं॥

वृ- गृहिसत्कं भाजनं प्रत्युपेक्ष्य यदि निर्जीवं भवति तदा तत्र द्रवं गृहीत्वा 'कृतकल्पाः' स्वकीयभाजनानि कल्पयित्वा शेषं द्रवमन्येषां भाजनानां धावनार्थं भुक्तोत्तरकालं च पानार्थम् उपलक्षणत्वात् संज्ञाभूमिगमनार्थं च गृहीत्वा समायान्ति। अथ तत्र स्तोकमेव द्रवं लब्धं ततो यावता पर्याप्तं भवति तावदन्यदपरेषु गृहेषु गृह्णन्ति॥ अथ "एगो खमए बिइयपय वुड्ढमाइन्ने" त्ति पदं व्याख्यानयति-

[भा.१७३०] जा भुंजि ता वेला, फिट्टइ तो खमग थेरओ वाऽऽणे।
तरुणो वन नायसीलो, नीयल्लग-भावियादीसु॥

वृ- "जा भुंजइ" त्तिप्राकृतत्वादेकवचनेन निर्देशः, यावद् वा साधवो भुञ्जते तावत् पानकस्य वेला "फिट्टति" व्यतिक्रामति ततः 'क्षपकः" उपवासिकः 'स्थविरो वा' वृद्धोऽशङ्कनीय इति कृत्वा कल्पकरणार्थमेकाक्यपि "आने" त्ति पानकमानयेत्। तरुणो वा यः 'ज्ञातशीलः' दृढधर्मा निर्विकारश्च स एकाक्यपि निजकानां-मातृ-पितृपक्षीयस्वजनानां कुलेषु भावितकुलेषु वा आदिशब्दादन्येष्वपि तथाविधकुलेषु प्रविश्य पानकं गृह्णीयात्॥ अथात्रैव कल्पकरणद्वारे विध्यन्तरं बिभणिषुर्द्वारगाथामाह-

Jain Education International For Private & Personal Use Only www.jainelibrary.org

[भा.१७३१] बिइयपय मोय गुरुगा, ठाण निसीयण तुयट्ट धरणं वा।
गोब्बरपुंछण ठवणा, धोवण छट्ठे य दव्वाइं ॥

वृ- 'द्वितीयपदे' अपवादाख्ये साधवो व्रजिकां गता भवेयुः, तत्र च पानकं न लब्धमिति कृत्वा यदि पात्रं 'मोकेन' प्रश्रवणेनाऽऽचमन्ति ततश्चत्वारो गुरवः। शिष्यःप्राह-यदि मोकेनाऽऽचमने दोषास्ततो रात्रौ स्थानं निषदनं त्वग्वर्त्तनं वा कुर्वन् संसृष्टपात्रकस्य धारणं करोतु। सूरिराह-एवंकुर्वतः संयमा-ऽऽत्मविराधना भवति, ततो गोबरेण-गोमयेन पात्रकस्य प्रोञ्छनं-घर्षणं कृत्वा स्थापनं कर्त्तव्यम्। ततो द्वितीयदिवसे यदि द्रवं ग्रहीतव्यं तदा 'धावनं' कल्पत्रयप्रदानं कर्त्तव्यम्। अथ भक्तं ग्रहीतव्यं ततो न कल्पत्रयं तादव्यम्। "छट्ठे य दव्वाइं" ति शिष्यः प्राह-यद्यधौते पात्रे भक्तं गृह्यते ततो ननु तत्र यान्यवयवद्रव्याणि पर्युषितानि सन्ति तैः षष्ठव्रतमतिचरितं स्यादिति निर्युक्तिगाथासङ्क्षेपार्थः॥ विस्तरार्थं तु बिभणिषुरह-

[भा.१७३२] वइगा अद्धाणे वा, दव असईए विलंबि सूरे वा।
जइ मोएणं धोवइ, सेहऽन्नह भिक्ख गंधाई॥

वृ- व्रजिका-गोकुलं तस्यां कारणे गतानामध्वनि वा वहमानानां 'द्रवस्य' पानकस्य 'असति' अप्राप्तौ 'विलम्बिनि वा' अस्तङ्गतप्राये सूर्ये यदि पानकं नास्ति ततः कथं कल्पः करणीयः ?। अत्र नोदकः स्वच्छन्दमत्या प्रतिवचनमाह-मोकेन तदानीं पात्रमाचमनीयम्। आचार्य प्राह-एवं ते स्वच्छन्दप्ररूपणां कुर्वतो यथाच्छन्दत्वात् चत्वारो गुरवः प्रायश्चित्तम्। यश्च मोकेन पात्रकमाचामति तस्यापि चतुर्गुरवः। कुतः ? इत्याह-यदि मोकेन धावति तदा शैक्षाणाम् अन्यथाभावः-विपरिणमनं भवेत्, विपरिणताश्च प्रतिगमनादीनि कुर्युः। द्वितीये च दिवसे भिक्षार्थं पात्रकेप्रसारिते सति कायिक्याः कुथितो गन्धः समायाति ततो लोकः प्रवचनावर्णवादं कुर्यात्-अहो ! अमीभिर-स्थिकापालिका अपि निर्जिता यदेवं पात्रकं परश्रवणेनाचमन्तीति। आदिग्रहणेन श्रावकाणां विपरिणामो भवतीत्यादिपरिग्रहः॥ अथ भूयः परः प्राह-

[भा.१७३३] भणइ जइ एस दोसो, तो ठाण निसियण तुअट्ट धरणं वा।
भन्नइ तं तु न जुज्जइ, दु दोस पादे अ हानी य॥

वृ- भणति परः-यदि 'एषः' शैक्षविपरिणामादिको दोष उपजायते ततो मा मोकेनाऽऽचामतु परं गृहीतेनैव पात्रकेण सकलामपि रात्रिं "ठाण"त्ति ऊर्ध्ध्वस्थितस्तिष्ठतु, तथा यदि न शक्नोति स्थातुं ततः "निसियण"त्ति निषन्नः पात्रकं धारयतु, तथापि यदि न शक्नोति ततस्त्वग्वर्त्तनं कुर्वाणः-तिर्यगनिपन्नः सन् धारयतु। सूरिराह-भण्यते अत्रोत्तरम्-हे नोदक ! तत् तु न युज्यते यद् भवता प्रोक्तम्। कुतः ? इत्याह-"दु दोस"त्ति द्वौ दोषावत्र भवतः, तद्यथा-आत्मविराधना संयमविराधना च। तत्रोर्द्ध्वस्थितस्योपविष्टस्य वा निद्रया प्रेरितस्य भूमौ निपततः शिरो-हस्त-पादाद्युपघाते आत्मविराधना; पतितः सन् षन्नां कायानामन्यतमं विराधयेदिति संयमविराधना। "पादे अ हानि" त्ति तद् वा पात्रं पतितं सद् भज्येत ततो या पात्रकेण विना परिहाणिस्तन्निष्पन्नं प्रायश्चित्तम्॥ यत एते दोषा अतोऽयं विधि-

[भा.१७३४] निद्धमनिद्धं निद्धं, गोब्बरपुट्ठं ठविंति पेहित्ता।
जइ य दवं घेत्तव्वं, बिइयदिणे धोइउं गिण्हे॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

वृ- लेपकृतं स्निग्धं वा भवेदस्निग्धं वा भवेत् । यदि स्निग्धं ततो गोबरेण-गोमयेन "पुट्टं" प्रोञ्छितं सुघृष्टं पात्रकं कृत्वा निरवयवीभूतं सत् प्रत्युपेक्ष्य रात्रौ स्थापयन्ति, न धारयन्तीति - भावः । अथास्निग्धं ततः संलेखनकल्पेन सुसंलीढं कृत्वा स्थ्यायते पुनः करीषेण घृष्यते । यदि च द्वितीये दिवसे द्रवं ग्रहीतव्यं ततः 'धावित्वा' त्रि कल्पयित्वा गृह्यते, अथ भक्तं ततोऽधौतेऽपि गृह्यते न कश्चिद् दोषः ॥ अत्र परः प्राह-

[भा.१७३५] जइ ओदनो अधोए, धिप्पइ तो अवयवेहि निसिभत्तं ।
तिन्नि य न होंति कप्पा, ता धोवसु जाव निग्गंधं ।

[भा.१७३६] तम्हा गुब्बरपुट्ठं, संलीढं चेव धोविउं हिंडे ।
इहरा मे निसिभत्तं, ओअविअं चेव गुरुमादी ॥

वृ- यद्यधौते पात्रे द्वितीयेऽहनि ओदनो गृह्यते ततो ननु तत्र सूक्ष्मा अवयवाः सन्ति येषां गन्धस्तृतीयेऽप्यहनि लक्ष्यते, तैश्चावयवैस्तथास्थितैः सद्भिर्यदपरं भक्तं तत्र गृह्यते तद् भुञ्जानानां निशिभक्तं भवति । यच्च यष्माभिर्लेपकृतस्य त्रयः कल्पाः शुद्धिकारणतया निर्दिष्टास्तदप्यस्माकं मनसि न रुचिपथियर्त्ति, कल्पत्रये दत्तेऽपि तदीयगन्धस्याघ्रायमाणत्वात् । ततोऽहमित्थं प्ररूपयामि- "ता धोवसु जाव निग्गंधं" ति 'तावद् धाव' तावत् प्रक्षालय यावद् निर्गन्धीभवति; न च बहुभिरपि कल्पैर्निर्गन्धभवति तस्माद् यद् लेपकृतं स्निग्धं तद् गोबरेण-छगणेन प्रोञ्छितं कृत्वा अस्निग्धं तु सुसंलीढं कृत्वा द्वितीये दिवसे 'धावित्वा' कल्पयित्वा भिक्षां हिण्डेत; 'इतरथा' कल्पकरणमन्तरेण "मे" भवतां निसिभक्तमापद्यते, अकृतकल्पे च भाजने गृहीतमपरमपि भक्तम् "ओअवियं" उच्छिष्टं भवति, तच्च 'गुर्वादीनाम्' आचार्योपाध्यायप्रभृतीनां दीयमानं महतीमाशातनामुप- जनयति ।इत्थं परेणोक्ते सति सति सूरिराह-

[भा.१७३७] भन्नइ न अन्नगंधा, हणंति छट्ठं जहेव उग्गारा ।
तिन्नि य कप्पा नियमा, जइ वि य गंधो जहा लोए ॥

वृ- भण्यतेऽत्र प्रतिवचनम्-अन्नस्य-भक्तस्य गन्धाः 'षष्ठं' रात्रिविरमणव्रतं न घ्नन्ति, यथैवोद्गारा रात्रौ समागच्छन्तोऽपि न षष्ठव्रतमुपघ्नन्ति । तथा पात्रके यद्यपि गन्धः समागच्छति तथापि नियमात् त्रय एव कलपा दातव्या नाधिका न वा हीनाः, तथा भगवद्भिरुक्तत्वात् । यथा लोकेऽपि प्रतिनियता भाजनशोधनाय मृत्तिकालेपा भवन्ति ॥ तथाहि-

[भा.१७३८] वारिखलाणं बारस, मट्टिया छ च्च वाणपत्थाणं ।
मा एत्तिए भणाही, पडिमा भणिया पवयणम्मि ॥

वृ- वारिखलाः-परिव्राजकास्तेषां द्वादश मृत्तिकालेषा भाजनशोधनका भवन्ति । षट् च मृत्तिकालेषाः 'वानप्रस्थानां' तापसानां शौचसाधकाः सञ्जायन्ते । एवं लोकेऽपि स्वस्वसम- यप्रतिपादितानि प्रतिनियतान्येव शौचानि दृष्टानि, अतो हे नोदक! एतावतः कल्पान् 'मा भण' मा ब्रूहि, तावद् धौतव्यं यावद् निर्गन्धीभवतीत्यप्रतिनियतानित्यर्थः ।तथा 'प्रतिमा' इति मोकप्रतिमा साऽपि प्रवचने भणिता, तस्यां हि मोकमपि पीत्वा साधुः शुचिरेव भवति ॥ एतदेव भावयति-

[भा.१७३८] पिह सोयाइ लोए, अम्हं पि अलेवगं अगंधं च ।
मा एत्तिए भणाही, पडिमा भणिया पवयणम्मि ॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

वृ- वारिखलाः-परिव्राजकास्तेषां द्वादश मृत्तिकालेपा भाजनशोधनका भवन्ति । षट् च मृत्तिकालेपाः 'वानप्रस्थानां' तापसानां शौचसाधकाः सञ्जायन्ते । एवं लोकेऽपि स्वस्व-समय-प्रतिपादितानि प्रतिनियतान्येव शौचानि दृष्टानि, अतो हे नोदक ! एतावतः कल्पान् 'मा भण' मा ब्रूहि, तावद् धौतव्यं यावद् निर्गन्धीभवतीत्यप्रतिनियतानित्यर्थः । तथा 'प्रतिमा' इति मोकप्रतिमा साऽपि प्रवचने भणिता, तस्यां हि मोकमपि पीत्वा साधुः शुचिरेव भवति ।। एतदेव भावयति-

[भा. १७३९] पिह सोयाइ लोए, अम्हं पि अलेवगं अगंधं च ।
मोएण वि आयमनं, दिट्ठं तह मोयपडिमाए ।।

वृ- यथा लोके 'पृथग्' विभिन्नानि शौचानि दृष्टानि तथाऽस्माकमपि त्रिभि कल्पैः प्रदत्तैरलेपकमगन्धं च पात्रकं भवतीति । एवं शौचविधिर्भगवद्भिर्दृष्ट इति । तथा मोकेनाप्याचमनं मोकप्रतिमायां दृष्टमेव ।। परः प्राह-

[भा. १७४०] जइ निल्लेवमगंधं, पडिकुट्ठं तं कहं नु जिनकप्पे ।
तेसिं चेव अवयवा, रुक्खासि जिना न कुव्वंति ।।

वृ- यदि निर्लेपमगन्धं च सौचं दृष्टं ततः कथं 'नुः' इति वितर्के 'तद्' निर्लेपनं जिनकल्पे प्रतिपन्ने सति 'प्रतिक्रुष्टं' प्रतिषिद्धम् ?, "तेसिं चेव अवयव" त्ति अनिर्लेपिते 'तेषां' जिनकल्पिकानां सनत्येव सूक्ष्माः पुरीषादेरवयवाः यैरमीषां शुचित्वं न भवति । सूरिराह-रूक्षाशिनः 'जिनाः' जिनकल्पिका भगवन्तास्ततोऽभिन्नवर्चस्कतया न सन्ति सूक्ष्मा अप्यवयवा अमीषाम्, तदभावाच्च दूरापास्तप्रसरस्तेषां पुरीषगन्ध इति हेतोर्न कुर्वन्ति निर्लेपनम् ।। आह यद्यभिन्नवर्चस्कताय जिनकल्पिकाः शौचं न कुर्वन्ति तर्हि ये स्थविरकल्पिका अप्यभिन्नोच्चारास्तेषामपि संज्ञामुत्सृज्य किंकारणमवश्यं शौचकरणमुक्तम् ? उच्यते-

[भा. १७४१] थंडिल्लाण अनियमा, अभाविए इड्ढि जुयलमुड्डुयरे ।
सज्झाए पडिणीए, न ते जिने जं अणुप्पेहे ।।

वृ- स्थविरकल्पिकाः प्रथमस्थण्डिलाभावे द्वितीयतृतीयचतुर्थान्यपि स्थण्डिलानि गच्छन्ति । तत्र च यदि न निर्लेपयन्ति तत आपातसंलोकसमुत्था अवर्णवादादयो दोषा भवेयुरिति स्थण्डिलानामनियमादवश्यन्तया शौचं कुर्वन्ति । अभावितो नाम-अपरिणतजिनवचनस्तस्य निर्लेपनाभावे मा भूद् विपरिणाम इति । "इड्ढि" त्ति 'ऋद्धिमान्' राजादीनामन्यतमः प्रव्रजितः स प्रायेण शौचकरणभावित इति तदर्थम् । तथा 'युगलं' बाल-वृद्धद्वयं तत् प्रायेण भिन्वर्चस्कं भवति । 'उड्डुयरो नाम' यः समुद्दिशन् संज्ञां वा व्युत्सृजन् चपलतया हस्तादीन्यपि लेपयति । "सज्झाये" त्ति अनिर्लेपिते स्थविरकल्पिकानां स्वाध्यायो न वर्त्तते वाचा कर्त्तुम् । "पडिनीए" त्ति प्रथमस्थण्डिलाभावे द्वितीयादिस्थण्डिलगतस्य शौचकरणमदृष्ट्वा प्रत्यनीक उड्डाहं कुर्यात् । "न ते जिणे" त्ति जिकल्पिके न 'एते' स्थण्डिलानियमादयो दोषा भवन्ति, "जं अणुप्पेहे" त्ति यच्चासौ स्वाध्यायं मनसैवानुप्रेक्षते न वाचा परिवर्त्तयति तेन न निर्लेपयति । स्थविरकल्पिकानां तु मनसा स्वाध्यायकरणेप्रभूतेनापि कालेन न सूत्रार्थौ परिजितौ भवत इति ।।

[भा. १७४२] एमेव अप्पलेवं, सामासेउं जिना न धोवंति ।
तं पि य न निरावयवं, अहाठिईए उ सुज्झंति ।।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

वृ-एवमेव 'अल्पलेपम्' अल्पशब्दस्याभाववाचकत्वादलेपृतं भाजनं 'समस्य' सम्यक् संलिख्य जिनकल्पिकाः 'न धावन्ति' न कल्पं प्रयच्छन्ति। तच्च भानं यद्यपि न निरवयवं सञ्जायते तथापि 'यथास्थित्यैव' यथास्वकल्पानुपालनादेव शुध्यन्ति, स्थितिरियं तेषां यदेवमेव शुचयो भवन्तीति ।यदप्युक्तं भवता प्राक् "अकृतकल्पे भाजने गृहीतं भक्तमुच्छिष्टं भवति" तदपि परिफलिभवति दर्शयति-

[भा.१७४३] मन्नंतो संसट्ठं, जं इच्छसि धोवणं दिणे विइए।
इत्थ वि सुणसु अपंडिय !, जहा तयं निच्छए तुच्छं ॥

वृ-संसृष्टं मन्यमानो यद् द्वितीये दिने 'धावनं' कल्पकरणमिच्छसि अत्राप्यर्थे 'श्रृणु' निशमय हे अपण्डित ! यथा 'तकत्' त्वदीयं वचनं 'निश्चये' परमार्थतः 'तुच्छ्' असारम् ॥ तदेवाह-

[भा.१७४४] सव्वं पि य संसट्ठं, नत्थि असंसट्ठिएल्लयं किंचि।
सव्वं पि य लेवकडं, पाणगजाए कहं सोही ॥

वृ-यदि गन्धमात्रेणैव त्वदुक्त्या नीत्या भक्तमुच्छिष्टं भवति ततः सर्वमप्यत्र जगति 'संसृष्टम्' उच्छिष्टमेव विद्यते नास्ति किञ्चिदप्यसंसृष्टम्। एवं 'सर्वमपि' भक्तं पानकं च लेपकृतमुच्छिष्टं भवति अतः पानकजातेन कथं शुद्धिर्भविष्यति ? ॥ एतदेव भावयति-

[भा.१७४५] खीरं वच्छुच्छिट्ठं, उदगं पि य मच्छ-कच्छभुच्छिट्ठं।
चंदो राहुच्छिट्ठो, पुप्फाणि य महुअरगणेहिं ॥

वृ-क्षीरं 'वत्सोच्छिष्टं' वत्सेन स्वमातुः स्तन्यमापिबता संसृष्टम्। तथा उदकमपि मत्स्य-कच्छपोच्छिष्टम्। चन्द्रो राहूच्छिष्टः। पुष्पाणि च मधुकरगणैरुच्छिष्टानि ॥

[भा.१७४६] रंधंतीओ बोट्टिंति वंजणे खल-गुले य तक्कारी।
संसट्ठमुहा य दवं, पियंति जइणो कहं सुज्झे ॥

वृ-तथा अविरतिका राध्नुवन्त्यः 'व्यञ्जनानि' शालनकानि वोट्यन्ति 'किं निष्पन्नानि ? न वा ?' इति परिज्ञानार्थम् । खल-गुलावपि 'तत्कारिणः' तस्य-खलादेः कारिणश्चाक्रिकादयो वोट्टयन्ति। 'संसृष्टमुखाश्च' उच्छिष्टेन मुखेन यतयो यद् द्रवमापिबन्ति तदपि संसृष्टम्। तेन च संसृष्टेन यस्य भाजनस्य कल्पः क्रियते तत् कथं शुध्यति ? इति। यत एवमतो न गन्धमात्रेणैव भक्तमुच्छिष्टं भवतीति स्थितम् ॥

अथ कल्पकरणे वितथसामाचारीनिष्पन्नं प्रायश्चित्तमाह-

[भा.१७४७] एक्किक्कम्मि उ ठाणे, वितह करिंतस्स मासियं लहुअं।
तिगमासिय तिगपणगा, य होंति कप्पं कुणइ जत्थ ॥

वृ- एकैकस्मिन् स्थाने वितथां सामाचारीं कुर्वाणस्य मासिकं लघुकम्। तद्यथा-असंलीढे पात्रके प्रथमं कल्पं करोति १ संलिख्य वा प्रथमं कल्पं कृत्वा तं नापिबति २ द्वितीयं कल्पं पात्रकेऽप्रक्षिप्य बहिर्निर्गच्छति ३ एतेषु त्रिष्वपि स्थानेषु मासलघु। तथा त्रीणि मासिकानि त्रीणि पञ्चकानि च भवन्ति यत्र कल्पं करोति। तद्यथा-न प्रत्युपेक्षते न प्रमार्जयति १ न प्रत्युपेक्षते प्रमार्जयति २ प्रत्युपेक्षते प्रमार्जयति च, नवरं दुःप्रत्युपेक्षितं दुःप्रमार्जितं करोति १ दुष्प्रत्युपेक्षितं सुप्रमार्जितं २ सुप्रत्युपेक्षितं दुष्परमार्जितं करोति ३ एतेषु त्रिषु तपःकालविशेषितानि पञ्च

Jain Education International For Private & Personal Use Only www.jainelibrary.org

रात्रिन्दिवानि। सुप्रत्युपेक्षितं सुप्रमार्जितमिति चतुर्थो भङ्गः शुद्ध इति ॥ गतं कल्पकरण-द्वारम्। अथ "गच्छसइए अ कप्पे अंबिलमभरिए अ ऊसित्ते" त्ति द्वारमभिधित्सुः प्रथमतः समबन्धमाह-

[भा.१७४८] भुत्ते भुंजंतम्मि य, जम्हा नियमा दवस्स उवओगो।
समहियतरो पयत्तो, कायव्वो पानए तम्हा ॥

वृ- 'भुक्ते' भोजनानन्तरंपानार्थं संज्ञाभूमिगमनार्थं च भुञ्जानानां च उत्तूढलग्नरक्षणार्थं यस्माद् नियमाद् 'द्रवस्य' पानकस्योपयोगो भवति 'तस्माद्' भक्तग्रहणप्रयत्नात् समधि कतरः प्रयत्नः पानकग्रहणे कर्त्तव्य इति, अतस्तद्ग्रहणविधिरुच्यते ॥ इह शतिकेषु सहेषु वा गच्छेषु प्रभूतेन पानकेन कार्यं भवति, तच्च कल्पनीयमेव ग्रहीतव्यम्, अतस्तद्विधिप्रतिबद्धद्वारसङ्क्रामिमां गाथामाह-

[भा.१७४९] पानगजाइणियाए, आहाकम्मस्स होइ उप्पत्ती।
पूती य मीसजाए, कडे य भरिए य ऊसित्ते ॥

वृ- पानकस्य याच्ञायामाधाकर्मण उत्पत्तिर्भवति सा वक्तव्या। ततः "पूइ"त्ति पूतिका "मीस" त्ति स्वगृहयतिमिश्रा स्वगृहपाषण्डिमिश्रा स्वगृहयावदर्थिकमिश्रा च "कडे य"त्ति आधाकृता क्रीतकृता आत्मार्थकृता च अम्लिनी वक्तव्या। "भरिए य"त्ति भरणं भरितमम्लिनी-नामभिधातव्यम्। "ऊसित्ति"त्ति उत्सेचनमुत्सिक्तं तद् वक्तव्यमिति द्वारगाथा-सार्थ ॥

अथ विस्तरार्थमाह-

[भा.१७५०] अन्नन्न दवोभासण, संदेसा पुन्न बेइ घरसामी।
कल्लं ठवेहि अन्नं, महल्लसोवीरिणिं गेहे ॥

वृ- कोऽपि भद्रको गृहपतिरन्यान्यान् सङ्घाटकान् द्रवस्यावभाषणं कुर्वाणान् दृष्ट्वा तेषां च मध्ये केषाञ्चित् सङ्घाटकानां 'सन्देशं' मुत्कलनं-'गृहीतमग्रेतनैः सङ्घाटकैः पानकम्, नास्तीदानीं भवद्योग्यम्' इति क्रियमाणं निरीक्ष्य "पुन्ने"ति पुण्यार्थं गृहस्वामिनीं ब्रवीति-धर्मप्रिये! मा कञ्चनापि साधुं जङ्गमं निधिमिव गृहाङ्गणमायातं प्रतिषेधयेः, किं भवत्या दानधर्मकथायामयं श्लोको नाक-र्णितः ?, यथा-

दातुरुन्नतचित्तस्य, गुणयुक्तस्य चार्थिनः।
दुर्लभः खलु संयोगः, सुबीज-क्षेत्रयोरिव ॥

ततः सा ब्रूयात्-नास्त्येतावतां साधूनां योग्यं काञ्जिकम्। ततोऽसौ गृहपतिर्ब्रूयात्- कल्ये स्थापयान्यां महतीं 'सौवीरिणीम्' अम्लिनीं गेहे येन सर्वेषामपि योग्यंपानकं पूर्यते ॥

एतच्चाकर्ण्य वक्तव्यम्-

[भा.१७५१] मा काहिसि पडिसिद्धो,जइ बूया कुणसु दानमन्नेसिं।
ते वुद्दिट्ठविवज्जी, न यावि निच्चं अहिवडंति ॥

वृ- न कल्पते एवं विधीयमानं ग्रहीतुमतो मा कार्षी। यद्येवं प्रतिषिद्धः स गृहस्वामी ब्रूयात्- 'प्रिये! कुर्यास्त्वं तावदपरां सौवीरिणीम्, यद्येष न ग्रहीष्यति ततोऽन्येषां साधूनां पानकदानं करिष्यते' ततो वक्तव्यम्-तेऽपि साधवः 'उद्दिष्टविवर्जिनः' साधर्मिकमुद्दिश्य कृतं वर्जयितुं

Jain Education International For Private & Personal Use Only www.jainelibrary.org

शीलं येषां ते तथा, नापि च नित्यं पानकार्थमभिपतन्ति, अनियतभिक्षाटनशीलत्वादेषाम् ।। इत्थमुक्ते यद्यसौ गृहस्वामी ब्रूयात्-

[भा.१७५२] अम्ह वि होहिइ कज्जं, घिच्छंति बहू य अन्नपासंडा ।
पत्तेयं पडिसेहो, साहारे होइ जयणा उ ।।

वृ-अस्माकमपि भविष्यति कार्यं काञ्जिकेन, ग्रहीष्यन्ति च बहवोऽन्येऽपि युष्मद्व्यतिरिक्ताः पाषण्डिन इति । तत्र साधारणे यतना कर्त्तव्या, यथा-अस्माकं तावन्न कल्पते । "पत्तेयं पडिसेहो" त्ति अथ गृहपतिर्भणति-अन्येऽपि निर्ग्रन्थाः पानकार्थमायास्यन्ति तेभ्यो दास्यते । इत्थं प्रत्येकं निर्ग्रन्थानेवाश्रित्याभिधीयमाने प्रतिषेधः कार्य 'न कल्पते साधूनामित्थं विधीयमानम्' ।। एवंप्रतिषिद्धेऽपि कोऽपि सप्त सौवीरिणीः स्थापयेत्, ताश्चैताः-

[भा.१७५३]आहाकम्मिय१ सघर२पासंडमीसए३ जाव४ कीय५ पूई६ अत्तकडे७ ।
एक्केक्कम्मि य सत्त उ, कए य काराविए चेव ।।

वृ- 'आधाकर्मिका' साधूनामेवार्थाय कारिता १ 'स्वगृहयतिमिश्रा' गृहस्य साधूनां चार्थाय निर्मापता २ 'स्वगृहपाषण्डमिश्रा' गृहस्य पाषण्डिनां चार्थाय कारिता ३ 'यावदर्थिकमिश्रा तु' साध्वर्थं मूल्येन गृहीता 'पूतिकर्मिका' आधाकर्मिकसुधादिना पूरितच्छिद्रा ६ 'आत्मार्थकृता' स्वगृहार्थमेव स्थापिता ७ । एतासां सप्तानां सौवीरिणीनामेकैकस्यां सप्त सप्त भरणानि भवन्ति । सप्त च सप्तभिस्ताडिता एकोनपञ्चाशद् भवति । एषा च प्रत्येकं कृते करापिते च सम्भवति । ततो द्वाभ्यां गुण्यते जाता भेदानामष्टानवतिरिति ।। अथ सप्त भरमानि दर्शयति-

[भा.१७५४] कम्मघरे पासंडे, जावंतिय कीय-पूइ-अत्तकडे ।
भरणं सत्तविकप्पं, एक्केक्कीए उ रसिणीए ।।

वृ-आधाकर्मिकं १ स्वगृहयतिमिश्रं २ स्वगृहपाषण्डिमिश्रं ३ यावदर्थिकमिश्रं ४ क्रीतकृतं ५ पूतिकर्म्मिकम् ६ आत्मार्थकृतं चेति ७ 'सप्तविकल्पं' सप्तप्रकारं भरणमेकैकस्यां 'रसिन्यां' सौवीरिण्यां भवति । अथ किं सप्तैवाम्लिन्यो भवन्ति नाधिकाः ? इत्युच्यते-

[भा.१७५५] सत्त त्ति नवरि नेम्मं, उग्गमदोसा हवंति अन्ने वि ।
संजोगा कायव्वा, सत्तहि भरणेहि रसिणीणं ।।

वृ-सप्तेति यदुक्तं तद् 'नवरं' केवलं "नेम्मं" चिह्नम्-उपलक्षणं द्रष्टव्यम्, तेन 'उद्‌गमदोषाः' औद्देशिकादयः 'अन्येऽपि' यथासम्भवमत्र मन्तव्याः यैः प्रक्षिप्तैरभ्यधिका अप्यम्लिन्यो भवन्ति। अत्र च 'संयोगाः' भङ्गकाः कर्त्तव्याः सप्तभिर्भरणैः सप्तानामेव रसिनीनाम् । तद्यथा-आधाकर्मिका सौवीरिणी भरणमपि तस्यामाधाकर्मिकम् १ आधाकर्मिका सौवीरिणी भरणं स्वगृहयतिमिश्रम् २ एवं सौवीरिणी सैव भरणं तु पाषण्डिमिश्रं ३ यावदर्थिकमिश्रं ४ क्रीतकृतं ५ पूतिकर्मिकम् ६ आत्मार्थकृतम् ७ । एवं स्वगृहयतिमिश्रादिष्वपि सौवीरिणीषु प्रत्येकं सप्त सप्त भरणानि योजनीयानि । ततश्च कियन्तो भङ्गका उत्तिष्ठन्ते ? इत्याह-

[भा.१७५६] जावइया रसिणीओ, तावइया चेव होंति भरणा वि ।
अउणापन्नं भेया, सयग्गसो यावि णेयव्वा ।।

वृ- 'यावत्यः' यावत्सङ्ख्याका रसिन्यः 'तावन्त्येव' तावत्सङ्ख्याकान्येव भवन्ति भरणानि ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

ततश्च यदा सप्ताम्लिन्यः सप्त च भरणानि गृह्यन्ते तदा एकनोपञ्चाशद् 'भेदाः' भङ्गका भवन्ति। अथान्यानप्युद्गमदोषान् प्रक्षिप्य बहुतराः सौवीरिण्यो बहुतराणि च भरणानि विवक्ष्यन्ते ततः 'शताग्रशः' शतसङ्ख्यापरिच्छिन्ना अपि भेदा मन्तव्याः ॥अथाधाकर्मिकभरणं भावयति-

मूलभरणं तु बीया, तहि छम्मासा न कप्पए जाव।
तिन्नि दिणा कड्ढियए, चाउलउदए तहाऽऽयामे ॥

'मूलमरणं नाम' प्राशुकायामम्लिन्यां राजिकादीनि बीजानि संयतार्थं यत् प्रक्षिप्यन्ते तच्चाधाकर्म्मिकम्। अतस्तत्र यदन्यत् प्राशुकमपि क्षिप्यते तत् षन्मासान् यावन्न कल्पते परतस्तु कल्पते। अथ तस्या रसिन्याः सकाशात् तदाधाकर्मिकमाकर्षितं ततस्तस्मिन्नाकर्षिते 'चाउलोदगं' तन्दुलधावनं तथा 'आयामम्' अवावणं यत् तत्र क्षिप्यते तत् त्रीन् दिनान् न कल्पते पूतिकर्मत्वात्, तत ऊर्ध्वं कल्पते ॥ अथ स्वगृहमिश्रादिभरणान्यतिदिशन्नाह-

एमेव सघर-पासंडमीस जाव कीय-पूइ-अत्तकडे।
कय कीयकडे ठविए, तहेव वत्थाइणं गहणं ॥

'एवमेव' आधाकर्मिकभरणवत् स्वगृहमिश्रं पाषण्डमिश्रं यावदर्थिकमिश्रं क्रीतकृतं पूतिकर्म आत्मार्थकृतं च भरणं मन्तव्यम्। वस्त्रादिविषयमप्यतिदेशमाह-"कय" इत्यादि पश्चार्द्धम्। 'कृते' संयतार्थं निष्पादिते 'क्रीतकृते' मूल्येन गृहीते 'स्थापिते' साध्वर्थं निक्षिप्ते 'तथैव' पानकवद् वस्त्रादीनां ग्रहणं भावनीयम्। एतच्च पश्चार्द्धमुत्तरत्र भावयिष्यते ॥

अथानन्तरोक्तभङ्गकेषु प्रायश्चित्तमाह-

[भा.१७५९] जेन असुद्धा रसिणी, भरणं वुभवं व तत्थ जाऽऽरुवणा।
सुद्धुभय लहूसित्ते, कम्ममजीवे वि मुनिभरणे ॥

वृ- पूर्वोक्तभङ्गकेषु यत्र 'येन' आधाकर्मादिना दोषेणाशुद्धा रसिनी भरणं वा 'उभयं वा' सौवीरिणी-भरणयुगं यत्र येन दोषेण दूषितं तत्र तद्दोषनिष्पन्ना या काचित् प्रत्येकं संयोगतो वा आरोपणा सा वक्ष्यमाणनीत्या वक्तव्या। तथा यत्र रसिनी भरणं चोभयमपि शुद्धं परं संयतार्थं पानकमुत्सिक्तं तत्र लघुमासः। "कम्ममजीवे वि भुणिभरणे" त्ति यदजीवमपि-प्राशुकमपि मुनीनां हेतोर्भरणं क्रियते तदप्याधाकर्म मन्तव्यं परं विशोधिकोटिः ॥

अथाधाकर्मादिभेदेष्वारोपणामाह-

[भा.१७६०] तिन्नेव य चउगुरुगा, दो लहुगा गुरुग अंतिमो सुद्धो।
एमेव य भरणे वी, एक्केक्कीए उ रसिणीए ॥

वृ- आधाकर्मणि स्वगृहमिश्रे पाषण्डमि च प्रत्येकं चतुर्गुरुकमिति त्रयश्चतुर्गुरवो भवन्ति। 'द्वयोः' यावदर्थिक-क्रीतकृतयोश्चतुर्लघवः। भक्तपानपूतिके गुरुमासः। उपकरणपूतिके लघुमास इत्यनुक्तमपि द्रष्टव्यम्। 'अन्तिमः' आत्मार्थकृतलक्षणो भेदः शुद्धः। एवमेकैकस्यां रसिन्यामुक्तम्। भरणेऽप्येकैकस्मिन्नेवमेव मन्तव्यम् ॥ अथासामेवाम्लिनीनां मध्ये का विशोधिकोटिः ? का वा अविशोधिकोटिः ? इत्यादिचिन्ताचिकीर्षुराह-

[भा.१७६१] संजयकडे य देसे, अप्फासुग फासुगे य भरिए अ।
अत्तकडे वि य ठविएष लहुगो आणाइणो चेव ॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

वृ-संयतानेव केवलानाश्रित्य कृतं 'संयतकृतम्' आधाकर्म। "देसि" त्ति 'देशतः' त्ति 'देशतः' एकदेशेन संयतादीनाश्रित्य कृतं देशकृतम्, स्वगृहमिश्रादिकमित्यर्थः। अप्राशुकेन प्राशुकेन वा संयतार्थं यद् भरणं तदप्याधाकर्म। "अत्तकडे वि य ठविए" त्ति आत्मार्थकृतायामम्लिन्यां यदात्मार्थं भरणं तदपि यदि श्रमणार्थमुत्सिच्य बहि स्थापयति तदा स्थापनादोष इति कृत्वा न ग्रहीतव्यम्। यदि गृह्णाति तदा लघुको मास आज्ञादयश्च दोषाः। एषा निर्युक्तिगाथा॥

अथैनामेव व्याख्यानयति-

[भा.१७६२] देसकडा मज्झपदा, आदिपदं अंतिमं च पत्तेयं।
उग्गमकोडी व भवे, विसोहिकोडी व जो देसो॥

वृ-यानि 'मध्यपदानि' स्वगृहमिश्र-पाषण्डमिश्र-यावदर्थिकमिश्र-क्रीतकृत-पूतिकर्मलक्षणानि तानि देशकृतान्युच्यन्ते, देशतः स्वगृहार्थं देशतस्तु साध्वाद्यर्थममीषां क्रियमाणत्वात्। यत् पुनः 'आदिपदम्' आधाकर्म 'अन्तिमपदं च' आत्मार्थकृतं तद् द्वितयमपि 'प्रत्येकं' एकपक्षविषयम्, केवलमेव साधुपक्षं स्वगृहपक्षं चोद्दिश्य प्रवृत्तत्वात्। अत्र च यः 'देशः' देशकृतः स्वगृहमिश्रादिको दोषः स उद्गमकोटिर्वा भवेत्, अविशोधिकोटिरित्यर्थः, विशोधिकोटिर्वा। तत्र स्वगृहमिश्रं पाषण्डमिश्रं च नियमादविशोधिकोटी, पूतिकर्म यावदर्थिकमिश्रं क्रीतकृतं चेति त्रीणि विशोधिकोटयः आधाकर्मिकं पुनरेकान्तेनाविशोधिकोटि, आत्मार्थकृतं तु निरवद्यमेवेति॥

[भा.१७६३] जं जीवजुयं भरणं, तदफासुं फासुयं तु तदभावा।
तं पि य हु होइ कम्मं, न केवलं जीवघाएण॥

वृ- यद् 'जीवयुतं' राजिकादिबीजसहितं भरणं तदप्राशुकम्। 'तदभावात्' राजिकादिबीजाभावाद् यद् भरणं तत् प्राशुकम्। तदपि च निर्जीवं भरणं 'हु' निश्चितं संयतार्थं क्रियमाणमाधाकर्म भवति, न केवलं 'जीवघातेन' राजिकादिबीजजन्तूपघातेन निष्पन्नमिति॥

अथोत्सिक्तपदं भावयति-

[भा.१७६४] समणे घर पासंडे, जावंतिय अत्तणो य मुत्तूणं।
छट्ठो नत्थि विकप्पो, उस्सिंचणमो जयट्ठाए॥

वृ- काञ्जिकस्य सौवीरिणीतो यद् निष्काशनं तद् उत्सिक्तम्। तच्च पञ्चधा-श्रमणार्थं साधूनामर्थायेत्यर्थः १ स्वगृहयतिमिश्रं २ पाषण्डिमिश्रं ३ यावदर्थिकमिश्रं ४ आत्मार्थकृतम् ५। एतान् पञ्च भेदान् मुक्त्वा अपरः षष्ठो विकल्पो नास्ति यदर्थमुत्सेचनं भवेत्। अत्र चात्मार्थं यद् गृहिभिरुत्सिक्तं तदेव ग्रहीतुं कल्पते न शेषाणीति॥ उक्त आहारविषयो विधिः।

अथोपधिविषयं तमेवाह-

[भा.१७६५] तत पाइयं वियं पि य, वत्थं एक्केक्कगस्स अट्ठाए।
पाउब्भिन्नं निक्कोरियं च जं जत्थ वा कमइ॥

वृ- वस्त्रमेकैकस्यार्थाय ततं पायितं विततं च वक्तव्यम्। तद्यथा-संयतार्थं ततं संयतार्थं पायितं संयतार्थमेव च विततं १ संयतार्थं ततमात्मार्थं पायितं आत्मार्थमेव विततम् ४, एवमात्मार्थततेनापि चत्वारो भङ्गा लभ्यन्ते, जाता अष्टौ भङ्गाः। अत्र चाष्टमो भङ्ग- शुद्धः, त्रयाणामप्यात्मार्थं कृतत्वात्। एवं स्वगृहमिश्र-पाषण्डमिश्र-यावदर्थिकमिश्रेष्वपि द्रष्टव्यम्, सर्वत्रापि

Jain Education International For Private & Personal Use Only www.jainelibrary.org

चाष्टमो भङ्गः शुद्धः, शेषास्तु सर्वेऽप्यशुद्धा इति। पात्रमप्युद्भिन्नं निष्कीर्णं चैवमेव वक्तव्यम्।

तद्यथा-संयतार्थमुद्भिन्नं संयतार्थं चोत्कीर्णं १ संयतार्थमुद्भिन्नमात्मार्थमुत्कीर्णं २ आत्मार्थमुद्भिन्नं संयतार्थमुत्कीर्णं ३ आत्मार्थमुद्भिन्नम् आत्मार्थमेव चोत्कीर्णम् ४। अत्र चतुर्थो भङ्गः शुद्धः, शेषास्त्रयोऽप्यशुद्धाः। 'यद् वा' क्रीतकृत-स्थापितादिकं यत्र वस्त्रे पात्रे वा 'क्रमते' अवतरति तत् तत्र सम्यगुपयुज्य योजनीयम्। अत्र च तननं वितननं चाविशोधिकोटि पायनं विशोधिकोटिरित्याचार्यस्य मतम्। परस्तु ब्रवीति-पायनमविशोधिकोटि, कन्दादिजीवोपघात-निष्पन्नत्वात्; तननं वितननं च विशोधिकोटि, जीवोपघातस्यादृश्यमानत्वादिति। अत्र सूरिराह-नास्माकं जीवोपघातेनैवाधाकर्म किन्तु श्रमणार्थं वस्त्रादेर्यत् पर्यायान्तरनयनं तदप्याधाकर्म म-न्तव्यम्॥

अपि च-

[भा.१७६६] अत्तट्ठियतंतूहिं, समणट्ठ ततो अ पाइय वुतो अ।
किं सो न होइ कम्मं, फासूण विपज्झिओ जो उ॥

वृ- आत्मार्थिताः-स्वार्थं निष्पादिता ये तन्तवस्तैः श्रमणार्थं यः पटः तत- पायितो व्यूतश्च सः 'प्राशुकेनापि' स्वार्थमचित्तीकृतेन खलिकाद्रव्यसम्भारेण पायितः सन् किमाधाकर्म न भवति? त्वदुक्तनीत्या भवतीति भावः॥

[भा.१७६७] जइ पज्जणं तु कम्मं, इतरमकम्मं स कप्पऊ धोओ।
अह धोओ वि न कप्पइ, तणणं विणणं च तो कम्मं॥

वृ- ततो यदि जीवोपघातनिष्पन्नत्वात् पायनमाधाकर्म 'इतरत्' तननं वितननं च 'अकर्म' न आधाकर्मेति तर्हि स पटो धौतः सन् कल्पतां भवतः, अपनीतपायनिकालेपत्वात्। अथ ब्रवीथाः 'धौतोऽप्यसौ न कल्पते' ततस्तननं वितननं चार्थादाधाकर्म संवृत्तमिति सिद्धं नः समीहितम्॥

गतं "गच्छसइए अ कप्पे अंबिलभरिए अ ऊसित्ते" इति द्वारम्। अथ "परिहरणा अनुजाणे" त्ति द्वारं व्याख्यानयति-

[भा.१७६८] चोअग जिनकालम्मि, किह परिहरणा जहेव अनुजाणे।
अइगमणम्मि य पुच्छा, निक्कारण कारणे लहुगा॥

वृ- नोदकः प्रश्नयति-यदि शतिकेष्वपि गच्छेषु साम्प्रतमित्थमाधाकर्मादयो दोषा जायन्ते तर्हि जिनः-तीर्थकरस्तस्य काले साहेषु गच्छेषु साधवः कथमाधाकर्मादीनां परिहरणं कृतवन्तः? इति। सूरिराह-यथैव 'अनुयाने' रथयात्रायां साम्प्रतमपि परिहरन्ति तथा पूर्वमपि परिहृत-वन्तः। "अतिगमणम्मि य पुच्छ" त्ति शिष्यः पृच्छति-किमनुयाने 'अतिगमनं' प्रवेशनं कर्त्त-व्यम्? उत न? इति। आचार्य प्राह-"निक्कारण कारणे लहुग" त्ति निष्कारणे यदि गच्छति तदा चत्वारो लघवः, कारणे यदि न गच्छति तदाऽपि चत्वारो लघवः॥

अथैतदेव भावयति-

[भा.१७६९] ण्हाणा-ऽनुजाणमाइसु, जतंति जह संपयं समोसरिया।
सतंसो सहस्ससो वा, तह जिनकले विसोहिंसु॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

वृ- 'स्नानं'इह वर्षान्तः प्रतिनियतदिवसभावी भगवत्प्रतिमयाः स्नात्रपर्वविशेषः, अनुयानं-रथयात्रा, आदिशब्दात् कुल-गण-सङ्घकार्यपरिग्रहः, तेषु स्नाना-ऽनुयानादिषु सङ्घमीलकेषु साम्प्रतमपि 'शतशः' शतसङ्ख्याः 'सहस्रः' सहस्रसङ्ख्याः साधवः समवसृताः सन्तो यथा 'यतन्ते' आधाकर्मादिदोषशोधनायां प्रयत्नं कुर्वते तथा जिनकालेऽपि ते भगवन्तः 'शोधितवन्तः' एषणाशुद्धिं कृतवन्त इत्यर्थः ॥

भूयोऽपि परः प्राह-ननु च 'सर इव सागरः, खद्योत इव प्रद्योतनः, मृग इव मृगेन्द्रः' इत्यादिवदैदंयुगीनसमवसरणसत्कमेषणाशुध्युपमानं तीर्थकरकालभाविनीमेषणा-शुद्धिमुपमातुमभिधीयमानं हीनत्वान्न समीचीनम्, अत आह-

[भा.१७७०] पच्चक्खेण परोक्खं, साहिज्जइ नेव एस हीनुवमा।
जं पुरिसजुगे तइए, वोच्छिन्नो सिद्धिमग्गो उ ॥

वृ- इह 'प्रत्यक्षेण' उपमानवस्तुना 'परोक्षम्' उपमेयं वस्तु साक्षादनुपलभ्यमानमपि साध्यते इति शास्त्रे लोके च स्थिति । तथाहि-खुर-ककुद-लाङ्गूल-सास्नाद्यवयवोपलक्षितमध्यक्षवीक्षितं गवादि वस्तु दृष्टान्ततयोपदर्श्य गवयादिकं परोक्षमपि प्रतीतिपथमारोप्यते । एवमत्रापि प्रत्यक्षवीक्ष्यमाणेन साम्प्रतकालीनसमवसरणसत्केनैषणाशोधनेन परोक्षमपि तीर्थकरकालभाविसमवसरणसाधूनामेषणाशोधनं साध्यते इति "नेव एस हीनुवम"त्ति न चेयं सर इव सागर इत्यादिवद् हीनोपमा, तीर्थकरकालेऽपि हि सहसङ्ख्या एव साधव एकत्र क्षेत्रे समवसरन्ति स्म, एतावन्तश्च ते साम्प्रतमपि स्नाना-ऽनुयानादौ पर्वणि समवसरन्त उपलभ्यन्ते शोधयन्तश्चैषणाम्, ततोऽनुमीयते तीर्थकरकालेऽप्येवमेव दोषान् शोधितवन्त इति । अपि च श्रीमन्महावीरस्वामी १ श्रीसुधर्मस्वामी २ जम्बूस्वामी ३ चेति त्रीणि पुरुषयुगानि यावदनगाराणां निर्वाणपदवीगमनमभवत् । तृतीये च पुरुषयुगे निरवृते सति 'सिद्धिमार्ग' क्षपकश्रेणि-केवलोत्पत्त्यादिरूपो व्यवच्छिन्नः, न पुनर्ज्ञान-दर्शन-चारित्ररूपः शास्त्रपरिभाषितः, तस्येदानीमप्यनुवर्त्तमानत्वात् । ततश्च यदि तेषां साधूनामुद्गमादिदोषशोधनं नाभविष्यत ततस्ते सिद्धिमार्गमपि नासादयिष्यन् । अतो निश्चीयते-तेऽपि भगवन्त इत्थमेवैषणाशुद्धिं कृतवन्त इति ॥

अथानुयानविषयो विधिरुच्यते-

[भा.१७७१] आणाइणो य दोसा, विराहणा होइ संजमा-ऽऽयाए।
एवं ता वच्चंते, दोसा त्ते अनेगविहा ॥

वृ- निष्कारणे अनुयानं गच्छत आज्ञादयश्च दोषाः, विराधना च संयमा-ऽऽत्मनोर्भवति । एवं तावद् व्रजतो मार्गे दोषाः । तत्र प्राप्तानां पुनरनेकविधा दोषाः ॥

तत्र संयमा-ऽऽत्मविराधनां भावयति-

[भा.१७७२] महिमाउस्सुयभूए, रीयादी न विसोहए।
तत्थ आया य काया य, न सुत्तं नेव पेहणा ॥

वृ- महिमा नाम-भगवत्प्रतिमायाः पुष्पारोपणादिपूजात्मकः सातिशय उत्सवस्तस्या दर्शनार्थमुत्सुकभूत ईर्यादिसमितीर्न विशोधयति, आदिशब्दादेषणादिपरिग्रहः । 'तत्र च' ईर्यादीनामशोधने आत्मा च कायाश्च विराध्यन्ते । आत्मविराधना कण्टक-स्थाण्वाद्युपघातेन,

Jain Education International For Private & Personal Use Only www.jainelibrary.org

संयमविराधा षन्नां कायानामुपमर्दादिना। तथा त्वरमाणत्वादेव न सूत्रं गुणयति, उपलक्षणत्वादर्थं च नानुप्रेक्षते, नैव प्रतिलेखनां वस्त्र-पात्रादेः करोति, अकालेऽविधिना वा करोति ॥

एवमेते मार्गे गच्छतां दोषा अभिहिताः। अथ तत्र प्राप्तानां ये दोषास्तानभिधित्सुर्द्वारगाथामाह-

[भा.१७७३] चेइय आहाकम्मं, उग्गमदोसा य सेह इत्थीओ।
नाडग संफासण तंतु खुड्ड निद्धम्मकज्जा य ॥

वृ- चैत्यानां स्वरूपं प्रथमतोवक्तव्यम्, तत आधाकर्म, तत उद्‌गमदोषाः, ततः शैक्षाणां पार्श्वस्थेषु गमनम्, ततः स्त्रीदर्शनसमुत्था दोषाः, ततो नाटकावलोकनप्रभवाः, ततः संस्पर्शनसमुत्थाः, तदनन्तरं तन्तवः-कोलिकजालं तद्विषयाः, तदनु "खुड्ड" त्ति पार्श्वस्थादिक्षुल्लकदर्शनसमुत्थाः,ततो निर्धर्मणां-लिङ्गिनां यानि कार्याणि तदुत्थिताश्च दोषावक्तव्या इति द्वारगाथासमासार्थः॥

अथैनामेव विवरीषुः प्रथमतश्चैत्यस्वरूपं व्याख्याति-

[भा.१७७४] साहम्मियाण अट्ठा, चउव्विहे लिंगओ जह कुटुंबी।
मंगल-सासय-भत्तीइ जं कयं तत्थ आदेसो ॥

वृ- चैत्यानि चतुर्विधानि, तद्यथा-साधर्मिकचैत्यानि मङ्गलचैत्यानि शाश्वतचैत्यानि भक्तिचैत्यानि चेति। तत्र साधर्मिकाणामर्थाय यत् कृतं तत् साधर्मिकचैत्यम्। साधर्मिकश्चात्र द्विधा-लिङ्गतः प्रवचनतश्च। तत्रेह लिङ्गतो गृह्यते, स च यथा कुटुम्बी, कुटुम्बी नाम-प्रभूतपरिचारकलोकपरिवृतो रजोहरण-मुखपोतिकादिलिङ्गधारी वारत्तकप्रतिच्छन्दः। तथा मथुरापुर्यां गृहेषु कृतेषु मङ्गलनिमित्तं यद् निवेश्यते तद् मङ्गलचैत्यम्। सुरलोकादौ नित्यस्थयि शाश्वतचैत्यम्। यत्तु भक्त्या मनुष्यैः पूजा-वन्दनाद्यर्थं कृतं कारितमित्यर्थः तद् भक्तिचैत्यम्। 'तेन च' भक्तिचैत्येन 'आदेशः' अधिकारः, अनुयानादिमहोत्सवस्य तत्रैव सम्भवादिति। एषा निर्युक्तिगाथा ॥

अथैनामेव बिभावयिषुः साधर्मिकचैत्यं तावदाह-

[भा.१७७५] वारत्तगस्स पुत्तो, पडिमं कासी य चेइयहरम्मि।
तत्थ य थली अहेसी, साहम्मियचेइयं तं तु ॥

वृ- इहाऽऽवश्यके योगसङ्ग्रहेषु "वारत्तपुरे अभयसेण वारत्ते" इत्यत्र प्रदेशे प्रतिपादितचरितो यो वारत्तक इति नाम्ना महर्षि, तस्य पुत्रः स्वपितरि भक्तिभरापूरिततया चैत्यगृहं कारयित्वा तत्र रजोहरण-मुखवस्त्रिका-प्रतिग्रहधारिणीं पितुः प्रतिमामस्थापयत्, तत्र च 'स्थली' सत्रशाला तेन प्रवर्त्तिता आसीत्, तदेतत् साधर्मिकचैत्यम्। अस्य च साधर्मिकचैत्यस्यार्थाय कृतमस्माकं कल्पते

अथ मङ्गलचैत्यमाह-

[भा.१७७६] अरहंतपइट्ठाए, महुरानयरीए मंगलाइं तु।
गेहेसु चच्चरेसु य, छन्नउईगामअद्धेसु ॥

वृ- मथुरानगर्यां गृहे कृते मङ्गलनिमित्तमुत्तरङ्गेषु प्रथममर्हत्प्रतिमाः प्रतिष्ठाप्यन्ते, अन्यथा तद् गृहं पतति, तानि मङ्गलचैत्यानि। तानि च तस्यां नगर्यां गेहेषु चत्वरेषु च भवन्ति। न केवलं तस्यामेव किन्तु तत्पुरीप्रतिबद्धा ये षन्नवतिसङ्ख्याका ग्रामार्द्धास्तेष्वपि भवन्ति। इहोत्तरापथानां ग्रामस्य ग्रामार्द्ध इति संज्ञा। आह च चूर्णिकृत्- गामद्धेसु त्ति देसभणिती, छन्नउईगामेसु त्ति भणियं होइ, उत्तरावहाणं एसा भणिइ त्ति ॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

शाश्वतचैत्य-भक्तिचैत्यानि दर्शयति-

[भा.१७७७] निइयाइ सुरलोए, भत्तिकयाइं तु भरहमाईहिं।
निस्सा-ऽनिस्सकयाइं, जहि आएसो चयसु निस्सं ॥

वृ- 'नित्यानि' शाश्वतचैत्यानि 'सुरलोके' भवनपति-व्यन्तर-ज्योतिष्क-वैमानिकदेवानां भवननगर-विमानेषु, उपलक्षणत्वाद् मेरुशिखर-वैताढ्यादिकूट-नन्दीश्वर-रुचकवरादिष्वपि भवन्तीति। तथा भक्त्या भरतादिभिर्यानि कारितानि अभूतण्यर्थत्वाद् भक्तिकृतानि। अत्र च "जहि आएसो" त्ति येन भक्तिचैत्येन 'आदेशः' प्रकृतम् तद् द्विधा-निश्राकृतमनिश्राकृतं च। निश्राकृतं नाम-गच्छप्रतिबद्धन्, अनिश्राकृतं-तद्विपरीतम् सङ्घसाधारणमित्यर्थः। "चयसु निस्सं"ति यद् निश्राकृतं तत् 'त्यज' परिहर। अनिश्राकृतं तु कल्पते ॥

गतं चैत्यद्वारम्। अथाधाकर्मद्वारमाह-

[भा.१७७८] जीवं उद्दिस्स कडं, कम्मं सो वि य जया उ साहम्मी।
सो विय तइए भंगे, लिंगादीणं न ससेसु ॥

वृ-जीवमुद्दिश्य यत् षट्कायविराधनया कृतं सोऽपि च यदि जीवः 'साधर्मिकः' समानधर्मा भवति 'सोऽपि च' साधर्मिकः 'लिङ्गादीनां' 'लिङ्गतः साधर्मिको न प्रवचनतः' इत्यादीनां चतुर्णां भङ्गानां 'तृतीये भङ्गे' 'लिङ्गतः प्रवचनतोऽपि' इत्येवंलक्षणे यदि वर्त्तते न शेषेषु तदेतदाधाकर्म मन्तव्यम् ॥

अथ तीर्थकरप्रतिमार्थं यन्निर्वर्त्तितं तत् किं साधूनां कल्पते न वा? इत्याशङ्कानिरासार्थमाह-

[भा.१७७९] संवट्टमेह-पुप्फा, सत्थनिमित्तं कया जइ जईणं।
न हु लब्भा पडिसिद्धुं, किं पुन पडिमट्ठमारद्धं ॥

वृ- शास्ता-तीर्थकरस्तस्य निमित्तं यानि देवैः संवर्त्तकमेघ-पुष्पाणि समवसरणभूमौ कृतानि तानि यीनां यदिप्रतिषेद्धुं न लभ्यानि, तेषां तत्रावस्थातुं यदि कल्पते इति भावः, तर्हि किं पुनः 'प्रतिमार्थम्' अजीवानां प्रतिमानां हेतोरारब्धम्?, तत् सुतरां न प्रतिषेधमर्हतीत्यभिप्रायः ॥

आह यदि तीर्थकरार्थं संवर्त्तकमेघ-पुष्पाणि कृतानि तर्हि तस्य भगवतस्तानि प्रतिसेवमानस्य कथं न दोषो भवति? इति उच्यते-

[भा.१७८०] तित्थयरनाम-गोयस्स खयट्ठा अवि य दाणि साभव्वा।
धम्मं कहेइ सत्था, पूयं वा सेवई तं तु ॥

वृ- तीर्थकरनाम-गोत्रस्य कर्मणः क्षयार्थं 'शास्ता' भगवान् धर्मं कथयति, 'पूजां च' महिमां तामनन्तरोक्तं संवर्त्तकवातप्रभृतिकामासेवते। भगवता हि तीर्थकरनाम-गोत्रं कर्मावश्यवेदनीयम्, विपाकोदयावलिकायामवतीर्णत्वात्। तस्य च वेदनेऽयमेवोपायः-यदग्लान्या धर्मदेशनाकरणं सदेव-मनुजा-ऽसुरलोकविरचितायाश्च पूजाया उपजीवनम्। तं च कहं वेइज्जइ, अगिलाए धम्मदेसणाईहि। तथा-

उदए जस्स सुरा-ऽसुर-नरवइनिवेहेहि पूइओ लोए।
तं तित्थयरं नामं, तस्स विवागो उ केवलिणो ॥

इति वचनप्रामाण्यात्। 'अपि च' इत्यभ्युच्चये। "दाणि"त्ति निपातो वाक्यालङ्कारे। "साभव्व"

Jain Education International For Private & Personal Use Only www.jainelibrary.org

त्ति स्वो भावः स्वभावः, यथा-"आपो द्रव्याश्चलो वायुः" इत्यादि, तस्य भावः स्वाभाव्यं तस्मात्। तस्य हि भगवतः स्वभावोऽयं यत् तथाधर्मकथाविधानं पूजायाश्चासेवनम् ॥

इदमेव स्पष्टतरमाह-

[भा.१७८१] खीणकसाओ अरिहा, कयकिच्चो अवि य जीयमनुयत्ती ।
पडिसेवंतो वि अओ, अदोसवं होइ तं पूयं ॥

वृ- क्षीणाः-प्रलयमुपगताः कषायाः-क्रोधादयो यस्य स क्षीणकषायः, एवंविधोऽर्हन् तां पूजां प्रतिसेवमानोऽपि न दोषवान्। इयमत्र भावना-यो हि रागादिमान् पूजामुपजीवन् स्वात्मन्युत्कर्षं मन्यते स दोषभाग् भवति, भगवतस्तु क्षीणकषायस्य पूजामुपजीवतोऽपि नास्ति स्वात्मन्युत्कर्षगन्धोऽपि अतो दूरापास्तप्रसरा तस्य सदोषतेति। तथा कृतानि-समापितानि कृत्यानि येन सः 'कृतकृत्यः' कवेलज्ञानलाभान्निष्ठितार्थ। ततः कृतकृत्यत्वादेवासौ पूजामासेवते न च दोषमापद्यते । अपि च जीतम्-'उपजीवनीया सुरा-ऽसुरविरचिता पूजा' इत्येवंलक्षणं कल्पमनुवर्त्तयितुं शीलमस्यासौ जीतानुवर्ती, गाथायां मकारोऽलाक्षणिकः ॥ आह भवत्वेवं परं तीर्थकरस्य तत्प्रतिमाया वा निमित्तं यत् कृतं तत् केन कारणेन यतीनां कल्पते ? उच्यते-

[भा.१७८२] साहम्मिओ न सत्था, तस्स कयं तेण कप्पइ जईणं ।
जं पुन पडिमाण कयं, तस्स कहा का अजीवत्ता ॥

वृ- 'शास्ता' तीर्थकरः स साधर्मिको लिङ्गतः प्रवचनतोऽपि न भवति। तथाहि-लिङ्गतः साधर्मिकः स उच्यते यो रजोहरणादिलिङ्गधारी भवति, तच्च लिङ्गमस्य भगवतो नास्ति तथाकल्पत्वात्, अतो न लिङ्गतः साधर्मिकः। प्रवचनतोऽपि साधर्मिकः सोऽभिधीयते यश्चतुर्वर्णसङ्घाभ्यन्तरवर्ती भवति, "पवयणसंघेगयरे" इति वचनात्; भगवाँश्च तत्प्रवर्त्तकतया न तदभ्यन्तरवर्ती किन्तु चतुर्वर्णस्यापि सङ्घस्याधिपति, ततो न प्रवचनतोऽपि साधर्मिक इति। अतः 'तस्य' तीर्थकरस्यार्थाय कृतं यतीनां कल्पते। यत् पुनः प्रतिमानामर्थाय कृतं तस्य 'का कथा ?' का वार्त्ता ? सुतरां तत् कल्पते। कुतः ? इत्याह-अजीवत्वात्, जीवमुद्दिश्य हि यत् कृतं तदाधाकर्म भवति, "जीवं उद्दिस्स कडं" इति प्रागेवोक्तत्वात्, तच्च जीवत्वमेव प्रतिमानां नास्तीति॥

अथ वसतिविषयमाधाकर्म दर्शयति-

[भा.१७८३] ठाइमठाई ओसरण मंडवा संजयट्ठ देसे वा ।
पेढी भूमीकम्मे, निसेवतो अनुमई दोसा ॥

वृ- "ओसरणे" समवसरणे बहवः संयताः समागमिष्यन्तीति बुध्धा श्रावका धर्मश्रद्धया बहून् मण्डपान् कुर्यु। ते च द्विधा-स्थायिनोऽस्थायिनश्च। ये समवसरणपर्वणि व्यतीते सति नोत्कील्यन्ते ते स्थायिनः, ये पुनरुत्कील्यन्ते तेऽस्थायिनः। पुनरेकैके द्विविधाः-संयतार्थकृता देशकृता वा। ये आधाकर्मिकास्ते संयतार्थकृताः, ये तु साधूनामात्मनश्चार्थाय कृतास्ते देशकृताः। एतेषु तिष्ठतां तन्निष्पन्नं प्रायश्चित्तम्। तथा 'पीठिका नाम' उपवेशनादिस्थानविशेषाः, "भूमिकम्मे"त्ति 'भूमिकर्म' विषमाया भूमेः समीकरणम्, उपलक्षणं चेदम्, तेन सम्मार्जनो पलेपनादिपरिग्रहः। एतान्यपि पीठिकादीनि संयतार्थकृतानि देशकृतानि वा भवेयुः। एतानि मण्डपादीनि सदोषानि निषेवमाणस्यानुमतिदोषा भवन्ति, एतेषु क्रियमाणेषु या षन्नां जीवनिकायानां

Jain Education International For Private & Personal Use Only www.jainelibrary.org

विराधना सा अनुमोदिता भवतीति भावः ॥

गतमाधाकर्मद्वारम् । अथोद्गमदोष-शैक्षद्वारद्वयमाह-

[भा.१७८४] ठवियग-संछोभादी, दुसोहया होंति उग्गमे दोसा ।
वंदिज्जंते दट्ठुं, इयरे सेहा तहिं गच्छे ॥

वृ- 'बहवः संयताः समायाताः' इति कृत्वा धर्मश्रद्धावान् लोकः संयतार्थं स्थापितं-भक्त-पानादेः स्थापनां कुर्यात् 'गृहमागतानामक्षेपेणैव दास्यामः' इति कृत्वा, "संछोभ"त्ति यानि गृहाणि साधुभिरनेषणीयदानेऽशङ्कनीयानि तेषु शाल्योदन-तन्दुलधावनादिकं भक्त-पानं मोदकाऽशोकवर्तिप्रभृतीनि वा खाद्यकविधानानि निक्षिपेयुः 'साधूनामागतानां दातव्यानि' इति, आदिशब्दात् क्रीतकृत-प्राभृतिकादिपरिग्रहः । एते उद्गमदोषास्तत्र 'दुःशोध्याः' दुष्परिहार्या भवन्ति । तथा 'इतरान्' पार्श्वस्थादीन् बहुजनेन बन्धमानान् पूज्यमानाँश्च दृष्ट्वा शैक्षाः 'तत्र' पार्श्वस्थादिषु गच्छेयुः ॥

स्त्री-नाटकद्वारद्वयमाह-

[भा.१७८५] इत्थी विउव्वियाओ, भुत्ता-ऽभुत्ताण दट्ठु दोसा उ ।
एमेव नाडइज्जा, सविब्भमा नच्चिय-पगीया ॥

वृ-स्त्रीः 'विकुर्विताः' वस्त्र-विलेपनादिभिरलङ्कृता दृष्ट्वा भुक्ता-ऽभुक्तानां 'दोषाः' स्मृति-कौतुकप्रभवा भवन्ति । एवमेव 'नाटकीयाः' नाट्ययोषितः 'सविभ्रमाः' सविलासा नर्त्तित-गीतयोः प्रवृत्ता विलोक्य श्रुत्वा च भुक्ता-ऽभुक्तसमुत्था दोषा विज्ञेयाः ॥

संस्पर्शनद्वारमाह-

[भा.१७८६] थी-पुरिसाण उ फासे, गुरुगा लहुगा सई य संघट्टे ।
आया-संजमदोसा, ओभावण-पच्छकम्मादी ॥

वृ- समवसरणे पुष्पारोपणादिकौतुकेन भूयांस- स्त्री-पुरुषाः समायान्ति तेषां सम्मर्देन स्पर्शो भवति । ततः स्त्रीणां स्पर्शे चत्वारो गुरवः, पुरुषाणां स्पर्शे चत्वारो लघवः । स्मृतिश्च सङ्घट्टे भुक्तभोगिनां भवति, चशब्दादभुक्तभोगिनां कौतुकम् । आत्म-संयमविराधनादोषाश्च भवन्ति-आत्मविराधना सम्मर्दे सति हस्त-पादाद्युपघातः, संयमविराधना सम्मर्दे पृथिव्यां प्रिष्ठिताः षट् काया नावलोक्यन्ते न च परिहर्तुं शक्यन्ते । "ओभावण-पच्छकम्माइ"त्ति साधुना कोऽपि शौचवादी पुरुषः स्पृष्ट स स्नायात्, तं स्नान्तं निरीक्ष्यापरः पृच्छति-किमर्थं स्नासि ? इति, स प्राह-संयतेन स्पृष्ट इति, एवं परम्परया साधूनां जुगुप्सोपजायते, यथा-अहो ! मलिना एते, एवमपभ्राजना पश्चात्कर्म च भवति, आदिशब्दाद् असङ्खडादयो दोषाः ॥

अथ तन्तुद्वारमाह-

[भा.१७८७] लूया कोलिगजालग, कोत्थलकारीय उवरि गेहे य ।
साडिंतमसाडिंते, लहुगा गुरुगा अभत्तीए ॥

वृ- असम्मार्ज्यमाणे चैत्ये भगवत्प्रतिमाया उपरिष्टदेतानि भवेयुः-'लूता नाम' कोलिकपुटकानि, 'कोलिकजाकानि तु' जालकाकाराः कोलिकानां लालातन्तुसन्तानाः, कोत्थलकारी-भ्रमरी तस्याः सम्बन्धि गृहमुपरि भवेत् । यद्येतानि लूतादीनि शाटयति तदा चत्वारो लघवः । अथ न शाटयति

Jain Education International For Private & Personal Use Only www.jainelibrary.org

ततो भगवतां भक्ति कृता न भवति, तस्यां चाभक्त्यां चत्वारो गुरुकाः ॥

अथ क्षुल्लकद्वारं निर्द्धर्मकार्यद्वारं च व्याख्यानयति-

[भा.१७८८] घट्ठाइ इयरखुड्डे, दट्ठुं ओगुंडिया तहिं गच्छे।
उक्कुट्ठघर-धणाईववहारा चेव लिंगीणं ॥

[भा.१७८९] छिंदंतस्स अनुमई, अमिलंत अछिंदओ य उक्खिवणा।
छिड्डाणि य पेहंती, नेव य कज्जेसु साहिज्जं ॥

वृ- इतरे-पार्श्वस्थास्तेषां ये क्षुल्लका घृष्टाः, आदिग्रहणात् "मट्ठा तुप्पोट्ठा पंडुरपडपाउरणा" इत्यादि, तानित्थम्भूतान् दृष्ट्वा संविग्नक्षुल्लकाः 'अवगुण्डिताः' मलदिग्धदेहाः परिभग्नाः सन्तः 'तत्र' तेषां लिङ्गिनामन्तिके गच्छेयुः। तेषां च तत्र मिलितानां परस्परमुत्कृष्टगृहधनादिविषयाः 'व्यवहाराः' विवादा उपढौकन्ते, ते च व्यवहारच्छेदनाय तत्र संविग्नानाकारयन्ति, ततो यदि तेषां व्यवहारश्छिद्यते तदा भवति परिस्फुटस्तेषां गृह-धनादिकं ददतः साधोरनुमतिदोषः। उपलक्षणमिदम्, तेन येषां तद् गृह-धनादिकं न दीयते तेषामप्रीतिक-प्रद्वेषगमनादयो दोषाः। अथ लिङ्गिनामेतद्दोषभयात् प्रथमत एव न मिलन्ति न वा व्यवहारपरिच्छेदं कुर्वन्ति ततः 'उत्क्षेपणा' उद्घाटना साधूनां भवति, सङ्घाद् बाह्यीकरणमित्यर्थः। 'छिद्राणि च' दूषणानि ते कषायिताः सन्तः साधूनां प्रेक्षन्ते। नैव च ते 'कार्येषु' राजद्विष्ट-ग्लानत्वादिषु 'साहाय्यं' तन्निर्णक्षममुपष्टम्भं कुर्वते। यत एते दोषा अतो निष्कारणे न प्रवेष्टव्यमनुयानमिति स्थितम्। कारणेषु तु समुत्पन्नेषु प्रवेष्टव्यम्। यदि न प्रविशति तदा चत्वारो लघवः ॥

कानि पुनस्तानि? इत्युच्यते-

[भा.१७९०] चेइयपूया रायानिमंतणं सन्निवाइ खमग कही।
संकिय पत्त पभावण, पवित्ति कज्जाइँ उड्डाहो ॥

वृ- अनुयानं गच्छता चैत्यपूजा स्थिरीकृता भवति। राजा वा कश्चिदनुयानमहोत्सवकारकः सम्प्रतिनरेन्द्रादिवत् तस्य निमन्त्रणं भवति। 'संज्ञी' श्रावकः स जिनप्रतिमायाः प्रतिष्ठापनां चिकीर्षति। तथा वादी क्षपको धर्मकथी च तत्र प्भावनार्थं गच्छति। शङ्कितयोश्च सूत्रार्थयोस्तत्र निर्णयं करोति। पात्रं वा तत्राव्यवच्छित्तिकारकं प्राप्नोति। प्रभावना वा राजप्रव्रजितादिभिस्तत्रगतैर्भवति। प्रवृत्तिश्चाचार्यादीनां कुशलवार्त्तारूपा तत्र प्राप्यते। कार्याणि च कुलादिविषयाणि साधयिष्यन्ते। उड्डाहश्च तत्रगतैर्निवारयिष्यत इति। एतैः कारणैर्गन्तव्यमिति द्वारगाथासमासार्थः ॥

अथ विस्तरार्थं बिभणिषुश्चैत्यपूजा-राजनिमन्त्रणद्वारे विवृणोति-

भा.(१७९१] सड्ढावुड्ढी रन्नो, पूयाए थिरत्तणं पभावणया।
पडिघातो य अणत्थे, अत्था य कया हवइ तित्थे ॥

वृ-कोऽपि राजा रथयात्रामहोत्सवं कारयितुमनास्तन्निमन्त्रणे गच्छद्भिस्तस्य राज्ञः श्रद्धावृद्धि कृता भवति। चैत्यपूजायां स्थिरत्वं प्रभावना च तीर्थस्य सम्पादिता भवति। यच्च जैनप्रवचनप्रत्यनीकाः शासनावर्णवाद-महिमोपघातादिकमनर्थं कुर्वन्ति तस्य प्रतिघातः कृतो भवति। तीर्थे च 'आस्था' स्वपक्ष-परपक्षयोरादरबुद्धिरुत्पादिता भवतीति ॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

अथ संज्ञिद्वारं वादिद्वारं चाह-

[भा.१७९२] एमेव य सन्नीण वि, जिणाण पडिमासु पढमपट्ठवणे।
मा परवाई विग्घं, करिज्ज वाई अओ विसइ ॥

वृ- संज्ञिनः-श्रवकाः केचिद् जिनानां प्रतिमासु प्रथमतः "पट्ठवणे"त्ति प्रतिष्ठापनं कर्तुकामास्तेषामपि 'एवमेव' राज्ञ इव श्रद्धावृध्यादिकं कृतं भवति। तथा मा परवादी प्रस्तुतोत्सवस्य विघ्नं कार्षाद् अतो वादी प्रविशति ॥

परवादिनिग्रहे च क्रियमाणे गुणानुपदर्शयति-

[भा.१७९३] नवधम्माण थिरत्तं, पभावणा सासणे य बहुमानो।
अभिगच्छंति य विदुसा, अविग्घ पूया य सेयाए ॥

वृ- 'नवधर्मणाम्' अभिनवश्रावकाणां 'स्थिरत्वं' स्थिरीकरणम्। शासनस्य च प्रभावना भवति, यथा-अहो! प्रतपति पारमेश्वरं प्रवचनं यत्रेदृशा वादलब्धिसम्पन्ना इति। बहुमानश्चान्येषामपि शासने भवति। तथा तं वादिनं 'अभिगच्छन्ति' अभ्यायान्ति 'विद्वांसः' सहृदयास्तद्वाग्मिताकौतुकाकृष्टचिताः, तेषां च सर्वविरत्यादिप्रतिपत्या महाँल्लाभो भवति। परवादिना च निगृहीतेन 'अविघ्नं' निप्रत्यूहं पूजा कृता सती स्वपक्ष-परपक्षयोरिह परत्र च श्रेयसे भवति ॥

अथ क्षपकद्वारमाह-

[भा.१७९४] आयाविंति तवस्सी, ओभावणया परप्पवाईणं।
जइ एरिसा वि महिमं, उविंति कारिंति सड्ढा य ॥

वृ-तत्र 'तपस्विनः' षष्ठा-ऽष्टमादिक्षपका आतापयन्ति। ततश्च 'अपभावना' लाघवं 'परप्रवादिनां' परतीर्थिकानां भवति,तेषां मध्ये ईदृशानां तपस्विनामभावात्। श्राद्धाश्च चिन्तयन्ति- यदि तावदीदृशा अपि भगवन्तोऽस्माभि क्रियमाणां 'महिमां' चैत्यपूजां द्रष्टुमायान्ति, तत इत ऊर्ध्वं विशेषत एव तस्यां यत्नं विधास्याम इति प्रवर्द्धमानश्रद्धाका महिमां कुर्वन्ति कारयन्ति च।

अथ कथिकद्वारमाह-

[भा.१७९५] आय-परसमुत्तारो, तित्थविवड्ढी य होइ कहयंते।
अन्नोन्नाभिगमेण य, पूया थिरया य बहुमाणो ॥

वृ-क्षीराश्रवादिलब्धिसम्पन्न आक्षेपणी-संवेजनी-निर्वेदनीभेदात् चतुर्विधां धर्मकथां कथयन् धर्मकथीत्युच्यते। तस्मिन् धर्मं कथयति आत्मनः परस्य च संसारसागरात् समुत्तारः-निस्तरणं भवति। तीर्थविवृद्धिश्च भवति, प्रभूतलोकस्य प्रव्रज्याप्रतिपत्तेः। तथा देशनाद्वारेण पूजाफलमुपवर्ण्य 'अन्यान्याभिगमेन' अन्यान्यश्रावकबोधनेन पूजायां स्थिरता बहुमानश्च कुतो भवति ॥

अथ शङ्कितःपात्रद्वारे व्याख्याति-

[भा.१७९६] निस्संकियं च काहिइ, उभए जं संकियं सुयहरेहिं।
अव्वोच्छित्तिकरं वा, लब्भिहि पत्तं दुपक्खाओ ॥

वृ- 'उभये' सूत्रे अर्थे च यत् तस्य शङ्क्रितं तत् तत्र श्रुतधरेभ्यः पार्श्वान्निःशङ्कितं करिष्यति। अव्यवच्छित्तिकारकं वा पात्रं द्विपक्षाद् लप्स्यते। द्वौ पक्षौ समाहृतौ द्विपक्षम्, गृहस्थपक्षः संयतपक्षश्चेत्यर्थः ॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

अथ प्रभावनाद्वारमाह-

[भा.१७९७] जाइ-कुल-रूव-धण-बलसंपन्ना इड्ढिमंतनिक्खंता ।
जयणाजुत्ता य जई, समेच्च तित्थंपभाविंति ॥

वृ- जाति-मातृकः पक्षः, कुलं-पैतृकः पक्षः, रूपम-आकृति, धनं-गणिम-धरिम-मेय-पारिच्छेद्यभेदाच्चतुर्द्धा तदतिप्रभूतं गृहस्थावस्थायामासीत्, बलं-सहयोधिप्रभृतीनामिव सातिशयं शारीरं वीर्यम्, एतैर्जात्यादिभिर्गुणैः सम्पन्ना ये च 'ऋद्धिमन्निष्क्रान्ताः' राजप्रव्रजितादयो ये च 'यतनायुक्ताः' यथोक्तसंयमयोगकलिता यतयस्ते 'समेत्य' तत्रागत्य तीर्थं प्रभावयन्ति ॥

अपि च-

[भा.१७९८] जो जेन गुणेनऽहिओ, जेन विमा वा न सिज्झए जं तु ।
सो तेण तम्मि कज्जे, सव्वत्थामं न हावेइ ॥

वृ- 'यः' आचार्यादि 'येन' प्रावचनिकत्वादिना गुणेन 'अधिकः' सातिशयः 'येन वा' विद्यासिद्धादिना विना यत् प्रवचनप्रत्यनीकशिक्षणादिकं कार्यं न सिध्यति सः 'तेन' गुणेन तस्मिन् कार्ये 'सर्वस्थाम' सकलमपि वीर्यं न हापयति किन्तु सर्वया शक्त्या तत्र लगित्वा प्रवचनं प्रभावयतीति भावः । उक्तश्च-

प्रावचनी धर्मकथी, वादी नैमित्तिकस्तपस्वी च ।
जिनवचनज्ञश्च कवि, प्रवचनमुद्भावयन्त्येते ॥

--प्रवृत्तिद्वारमाह-

[भा.१७९९] साहम्मि-वायगाणं, खेम-सिवाणं च लब्भिइ पवित्तिं ।
गच्छिहिति जहिं ताइं, होहिंति न वा वि पुच्छइ वा ॥

वृ- तत्रान्येषां साधर्मिकाणां चिरदेशान्तरगतानां वाचकानां वा-आचार्याणां तत्र प्राप्तः प्रवृत्तिं लप्स्यते । तथा क्षेमं-परचक्राद्युपप्लवाभावः शिवं-व्यन्तरकृतोपद्रवाभावः तयोः, उपलक्षणत्वात् सुभिक्ष-दुर्भिक्षादीनां चागामिसंवत्सरभाविनां प्रवृत्तिं तत्र नैमित्तिकसाधूनां सकाशाद् लप्स्यते । यदि वा यत्र देशे स्वयं गमिष्यति तत्र तानि क्षेमादीनि भविष्यन्ति न वा ? इति साधर्मिकादीन् पृच्छति ॥

कार्योड्डाहद्वारद्वयमाह-

[भा.१८००] कुलमादीकज्जाइं, साहिस्सं लिंगिणो य सासिस्सं ।
जे लोगविरुद्धाइं, करेंति लोगुत्तराइं च ॥

वृ- कालुदीनि-कुल-गण-सङ्घसत्कानि कार्याणि तत्र गतः साधयिष्यामि । लिङ्गिनश्च तत्र गतः 'शासिष्यामि' हितोपदेशदानादिना शियिष्यामि, ये लिङ्गिनो लोकविरुद्धानि लोकोत्तरविरुद्धानि च प्रवचोड्डाहकारीणि कार्याणि कुर्वन्तीति ॥

आह यद्येतानि कारणानि भवन्ति ततः किं कर्त्त-व्यम् ? इत्याह-

[भा.१८०१] एएहि कारणेहिं, पुव्वं पडिलेहिऊण अइगमणं ।
अद्धाणनिग्गयादी, लग्गा सुद्धा जहा खमओ ॥

वृ- 'एतैः' चैत्यपूजादिभिः कारणैरनुयानं प्रवेष्टव्यमिति निश्चित्य पूर्वं प्रत्युपेक्ष्य ततोऽतिगमनं

Jain Education International For Private & Personal Use Only www.jainelibrary.org

कार्यम्। अथाध्वनिर्गताः-ते अध्वानमतिलङ्घ्य सहसैव तत्र प्राप्ताः, आदिशब्दादपूर्वोत्सवादिवक्ष्यमाणकारणपरिग्रहः, एवंविधैः कारणैरप्रत्युपेक्षितेऽपि क्षेत्रे गताः सन्तो यथोक्तां यतनां कुर्वाणा अपि यदि 'लग्नाः' अशुद्धभक्तादिग्रहणदोषमापन्नास्तथापि शुद्धाः। यथा 'क्षपकः' पिण्डनिर्युक्तौ प्रतिपादितचरितः शुद्धं गवेषयन्नपि निगूढबाह्याकारया तथाविधश्राद्धिकया च्छलितः सन्नाधाकर्मण्यपि गृहीते शुद्धः, अशठपरिणामत्वादिति निर्युक्तिगाथासमासार्थः ॥

अथैनामेव विवृणोति-

[भा.१८०२] नाऊण य अइगमणं, गीए पेसिंति पेहिउं कज्जे।
उवसय भिक्खायरिया, बाहिं उब्भामगादीया ॥

[भा.१८०३] सब्भाविक इयरे वि य, जाणंती मंडवाइणो गीया।
सेहादीण य थेरा, वंदनजुत्तिं बहिं कहए ॥

वृ- चैत्यपूजादिके कार्ये समुत्पन्नेऽनुयानक्षेत्रं प्रत्युपेक्षितुं गीतार्थान् प्रेषयन्ति। ततो ज्ञात्वा सम्यक् क्षेत्रस्वरूपमतगमनं कर्त्तव्यम्। किं पुनस्तत्र प्रत्युपेक्ष्यम्? इत्याह-मौलग्रामे उपाश्रयः, 'बहि' बाह्यग्रामेषु च उद्भ्रामकाख्या भिक्षाचर्या, आदिशब्दात् तस्यां गच्छतामपान्तराले विश्रामस्थानं मौलग्रामे च भिक्षा-विचारभूमिप्रभृतिकं प्रत्युपेक्ष्यम्। तथा सद्भाविकानितराँश्च मण्डपादीन् गीतार्था जानन्ति, यथा-अमी सद्भावतः स्वार्थं मण्डपाः कृताः, अमी तु संयतार्थं परं कैतवप्रयोगेणास्मानित्थं प्रत्याययन्ति, आदिग्रहणात् पीठिकादिपरिग्रहः। इत्थं तैः प्रत्युपेक्षिते सूरयः सबाल-वृद्धगच्छसहिता अनुयानक्षेत्रं प्रविशन्ति। स्थविराश्च बहिरेव वर्त्तमानाः शैक्षादीनां 'वन्दनयुक्तिं' पार्श्वस्थादिवन्दनविधिं कथयन्ति, मा भूदन्यथा तद्वन्दने तेषां विपरिणाम इति ॥

अथ चैत्यवन्दनविधिमाह-

[भा.१८०४] निस्सकडमनिस्से वा, वि चेइए सव्वहिं थुई तिन्नि।
वेलं च चेइयाणि य, नाउं एक्किक्किया वा वि ॥

वृ- 'निश्राकृते' गच्छप्रतिबद्धे 'अनिश्राकृते वा' तद्विपरीते चैत्ये सर्वत्र तिः स्तुतयो दीयन्ते। अथ प्रतिचैत्यं स्तुतित्रये दीयमाने वेलाया अतिक्रमो भवति, भूयांसि वा तत्र चैत्यानि, ततो वेलां चैत्यानि वा ज्ञात्वा प्रतिचैत्यमेकैका स्तुतिर्दातव्येति ॥

अथ समवसरणविषयं विधिमाह-

[भा.१८०५] निस्सकडे ठाइ गुरू, कइवयसहिएयरा वए वसहिं।
जत्थ पुन अनिस्सकडं, पूरिंति तहिं समोसरणं ॥

वृ- निश्राकृते चैत्ये 'गुरु' आचार्य कतिपयैः परिणतसाधुभिः सहितश्चैत्यमहिमावलोकनार्थं तिष्ठति, 'इतरे' शैक्षादयस्ते 'मा पार्श्वस्थादीन् भूयसा लोकेन पूज्यमानान् दृष्ट्वा तत्र गमनं कार्षु' इति कृत्वा गुरुभिरनुज्ञाता वसतिं व्रजेयुः। यत्र पुनः क्षेत्रे अनिश्राकृतं चैत्यं तत्राचार्या समवसरणं पूरयन्ति, सभामापूर्य धर्मकथां कुर्वन्तीत्यर्थः ॥

आह किं संविग्नैस्तत्र धर्मकथा कार्या? आहोश्विदसंविग्नैरपि? उच्यते-

[भा.१८०६] संविग्गेहि य कहणा, इयरेहि अपच्चओ न ओवसमो।
पव्वज्जाभिमुहा वि य, तेसु वए सेहमादी वा ॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

वृ- 'संविग्नैः' उद्यतविहारिभि कथना धर्मस्य कर्त्तव्या। कुतः ? इत्याह-इतरे-असंविग्नास्तैर्धर्मकथायां क्रियमाणायां श्रोतृणामप्रत्ययो भवति, नैते यथा वादिनस्तथा कारिण इति। न च तेषाम् 'उपशमः' सम्यग्दर्शनादिप्रतिपत्तिर्भवति। येऽपि च प्रव्रज्याभिमुखाः शैक्षादयो वा अद्याप्य-परिणतजिनवचनास्तेऽपि तेषु व्रजेयुः-शोभनं स्वल्वेतेऽपि धर्मं कथयन्तीति॥

आह निश्राकृते चैत्ये यदि तदानीमसंविग्ना न भवन्ति ततः को विधिः ? इत्याह-

[भा.१८०७] पूरिंति समोसरणं, अन्नासइ निस्सचेइएसुं पि।
इहरा लोगविरुद्धं, सद्धाभंगो य सड्ढाणं॥

वृ- 'अन्येषाम्' असंविग्नामसति निश्राकृतेष्वपि चैत्येषु समवसरणं पूरयन्ति। इतरथा 'लोकविरुद्धं' लोकापवादो भवति-अहो ! अमी मत्सरिणो यदेवमन्यदीयं चैत्यम् इति कृत्वा नात्रोपविश्य धर्मकथां कुर्वन्ति। श्रद्धाभङ्गश्च श्राद्धानां भवति, तेषामत्यर्थःमभ्यर्थयमानानामपि तत्र धर्मकथाया अकरणात्॥

अथ भिक्षाचर्यायां यतनामाह-

[भा.१८०८] पुव्वपविट्ठेहि समं, हिंडंती तत्थ ते पमाणं तु।
साभाविअभिक्खाओ, विदंतऽपुव्वा य ठवियादी॥

वृ- पूर्वप्रविष्टा नाम-पूर्वं ये क्षेत्रप्रत्युपेक्षणार्थं प्रहितास्तैः समं भिक्षां हिण्डन्ते। तत्र च भिक्षामटतां त एव प्रमाणम, नागन्तुकैस्तत्र शुद्धा-शुद्धगवेषणा कर्त्तव्या। ते च पूर्वप्रविष्टा इदं विदन्ति-यदेताः 'स्वाभाविकभिक्षाः' स्वार्थनिष्पादिताः, एतास्तु 'अपूर्वा' संयतार्थं स्थापितनिक्षिप्तादयः॥

स्त्रीसङ्कुलनाटकदर्शनयोर्यतनामाह-

[भा.१८०९] वंदेन इंति निंति च, जुव मज्झे थेर इत्थिओ तेनं।
ठंति न य नाडएसुं, अह ठंति न पेह रागादी॥

वृ- स्त्रीसङ्कुले वृन्देनायान्ति निर्गच्छन्ति च। ये च युवानस्ते मध्ये क्रियन्ते। यतः स्त्रियस्तेन पार्श्वेन 'स्थविराः' वृद्धा भवन्ति, मा भूवन् भुक्ता-भुक्तसमुत्था दोषा इति। यत्र नाटकानि निरीक्ष्यन्ते तत्र न तिष्ठन्ति। अथ कारणतस्तिष्ठन्ति ततः "न पेह" त्ति नर्त्तक्यादिरूपाणि न प्रेक्षन्ते। सहसा दृष्टिगोचरागतेषु च तेषु रागादीन्न कुर्वन्ति, तेभ्यश्च द्राग् दृष्टिं निवर्त्तयन्ति॥

तन्तुजालादिषु विधिमाह-

[भा.१८१०] सीलेह मंखफलए, इयरे चोयंति तंतुमादीसु।
अभिजोयंति सवित्तिसु, अनिच्छि फेडंतऽदीसंता॥

वृ- 'इतरे' असंविग्ना देवकुलिका इत्यर्थः तान् तन्तुजाल-लूतापुटकादिषु सत्सु ते साधवो नोदयन्ति। यथा-'शीलयत' परिकर्मयत मङ्खफलकानीव मङ्खफलकानि देवकुलानि। मङ्खो नाम-चित्रफलकव्यग्रहस्तः, तस्य च यदि फलकमुज्ज्वलं भवति ततो लोकः सर्वोऽपि तं पूजयति, एवं यदि यूयमपि देवकुलानि भूयो भूयः सम्मार्जनादिना सम्यगुज्ज्वालयत ततो भूयान् लोको भवतां पूजा-सत्कारं कुर्यात्। अथ ते देवकुलिकाः सवृत्तिकाः-चैत्यप्रतिबद्धगृह-क्षेत्रादिवृत्ति-भोगिनस्ततस्तान् 'अभोयोजयन्ति' गाढं निर्भर्त्सयन्ति, यथा-एक तावद् देवकुलानां वृत्तिमुपजीवथ द्वितीयमेतेषां सम्मार्जनादिसारामपि न कुरुथ। इत्थमुक्ता अपि यदि तन्तुजालादीन्यपनेतुं नेच्छन्ति

Jain Education International For Private & Personal Use Only www.jainelibrary.org

ततोऽदृश्यमानाः स्वयमेव 'स्फेटयन्ति' अपनयन्तीत्यर्थः ॥

क्षुल्लकविपरिणामसम्भवे यतनामाह-

[भा.१८११] उज्जलवेसे खड्डे, करिंति उव्वट्टणाइचोक्खे अ।
न य मुच्चंतऽसहाए, दिंति मणुन्ने य आहारे ॥

वृ- क्षुल्लकान् 'उज्ज्वलवेषान्' पाण्डुरपट-चोलपट्टधारिणः उद्वर्त्तन-प्रक्षालनादिना च चोक्षान्-शुचिशरीरान् कुर्वन्ति। न च ते क्षुल्लकाः 'असहायाः' एकाकिनो मुच्यन्ते। वृषभाश्च तेषां 'मनोज्ञान्' स्निग्ध-मधुरानाहारानानीय ददति, उरभ्रदृष्टान्तेन च प्रज्ञापयन्ति ॥

तमेवाह-

[भा.१८१२] आतुरचिन्नाइं एयाइं, जाइं चरइ नंदिओ।
सुक्कत्तणेहि जावेहि, एयं दीहाउलक्खणं ॥

वृ- जहा एगो ऊरणगो पाहुणयनिमित्तं पोसिज्जइ। सो य पीणियसरीरो हलिद्दाइकयंगराओ कयकन्नचूलओ सुहंसुहेणं अभिरमइ। कुमरगा वि य तं नाणाविहेहिं कीडाविसेसेहिं कीला-विंति। तं च एवं लालिज्जमाणं दट्ठूण वच्छगो माऊए नेहेण गोवियं दोहएण य तयनुकंपाए मुक्कमवि खीरं न पिबइ रोसेणं। ताए पुच्छिओ-वच्छ! किं न धावसि?। तेण भणियं-अम्मो! एस नंदियगो इट्ठेहिं जवसजोगासणेहिं अलंकारविसेसेहि य अलंकारिओ पुत्त इव परिपालिज्जइ, अहं तु मंदभग्गो सुक्काणि तणाणि कयाइ लभामि, ताणि वि न पज्जत्तगाणि, एवं पाणियं पि, न य मं कोइ लालइ। ताए भन्नइ-पुत्त! आउरचिन्नाइं एयाइं, जहा आउरो मरिउकामो जं मग्गइ पत्थं वा अपत्थं वा तं दिज्जइ एवमेसो वि नंदियओ पोसिज्जइ, जया मारिज्जिहिइ तया पच्छिहिसि। अन्नया सो वच्छगो तं नंदियगं पाहुणएसु आगएसु पहिज्जमाणं दट्ठुं तिसिओ वि माऊए थन्नं नाभिलसइ भएणं। ताए भन्नइ-किं पुत्त! भयभीओ सि नेहेण पण्हुयं पि मं न पियसि?। तेण भन्नइ-कत्तो मे थन्नाभिलासो? ननु सो वराओ नंदियओ अज्ज पाहुणएहिं आगएहिं मम अग्गओ विन्निग्गयजीहो लोलनयणो विस्सरं रसंतो मारिओ, तब्भया कओ मे पाउमिच्छा?। ताए भन्नइ-नणु पुत्तय! तया चेव ते कहियं "आउरचिन्नाइं एयाइं" ति, एसतेसिंविवागो अनुपत्तो त्ति ॥

अथाक्षरार्थः-आतुरः-चिकित्साया अविषयभूतो रोगी, तस्य था मर्तुकामस्य पथ्यमपथ्यं वा दीयते एवमयमपि नन्दिको यानि मनोज्ञाहार जातानि चरति तानि आतुरचीर्णानि, अतो वत्स! शुष्कतृणैः 'यापय स्वशरीरं निर्वाहय, यत एतद् दीर्घायुषो लक्षणम्। एवमेतेऽप्यसंविग्नक्षुल्लका यद् मनोज्ञाहारादिभिरुपलाल्यन्ते तद् नन्दिकपोषणवद् द्रष्टव्यम् ॥

अथ निर्द्धर्मकार्येषु यतनामाह-

[भा.१८१३] न मिलंति लिंगिकज्जे, अच्छंति व मेलिया उदासीना।
बिंति य निब्बंधम्मि, करेमु तिव्वं खु भे दंडं ॥

वृ- यत्र लिङ्गिनामाक्रुष्टगृह-धनादिकार्याण्युपढौकन्ते तत्र प्रथमत एव न मिलन्ति। अथ तैर्बलामोटिकया मील्यन्ते ततो मेलिता अप्युदासीना आसते। अथ ते ब्रवीरन्-कुरुतास्मदीयस्य व्यवहारस्य परिच्छेदम्। तत एवं निर्बन्धे तैः क्रियमाणे साधवो ब्रुवते-यद्यस्माकं पार्श्वाद् व्यवहारपरिच्छेदं कारयिष्यथ तत उभयेषामपि भवतां 'तीव्रं दण्डम् आगमोक्तप्रायश्चित्तलक्षणं

Jain Education International		For Private & Personal Use Only		www.jainelibrary.org

'कुर्म' करिष्याम इति ॥

"अद्धाणनिग्गयादी' इति पदं व्याख्यानयति-

[भा.१८१४] अद्धाणनिग्गयादी, थाणुप्पाइयमहं व सोऊण।
गेलन्न-सत्थवसगा, महाणदी तत्तिया वा वि ॥

वृ- अध्वनिर्गताः-अध्वानमतिलङ्घय सहसैव तत्र प्राप्ताः, आदिशब्दादन्यदप्येवंविधं कारणं गृह्यते। स्थानौत्पातिकमहो नाम-तत्रापूर्व कोऽप्युत्सवविशेषः सहसैव श्राद्धैः कर्त्तुमारब्धः तं वा श्रुत्वा। यदि वा ये क्षेत्रं प्रत्युपेक्षितुं प्रेष्यनते ते तदानीं ग्लाना-ऽग्लानप्रतिचरणव्यापृता वा। अथवा सार्थवशगाः-ते तत्र सार्थमन्तरेण गंतुं न शक्यते। महानदी वा काचिदपान्तराले तामभीक्ष्णमुत्तरतां बहवो दोषाः। तावन्मात्रा एव वा ते साधवो यावतां मध्यादेकस्याप्यन्यत्र प्रेषणं न संगच्छते। अत एतैः कारणैरप्रत्युपेक्षितेऽपि प्रविशतां न कश्चिद् दोषः ॥

अत्र यतनामाह-

[भा.१८१५] समणुन्नाऽसइ अन्ने, वि पुच्छिउं दानमाइ वज्जिंति।
दव्वाई पेहंता, जइ लग्गंती तह वि सुद्धा ॥

वृ- यदि 'समनोज्ञाः' साम्भोगिकाः पूर्वप्रविष्टाः सन्ति ततस्तैः सह भिक्षामटन्ति। अथ न सन्ति समनोज्ञास्ततः 'अन्यानपि' अन्यसाम्भोगिकानपि पृष्ट्वा दानश्राद्धकुलानि वर्जयन्ति, तेष्वाधाकर्मादिदोषसम्भवात्। शेषेषु कुलेषु पर्यटन्तः "दव्वादी पेहंत"त्ति द्रव्यतः क्षेत्रतः कालतो भावतश्च शुद्धमन्वेषयन्तो यद्यपि कमपि स्थापनादिकं दोषं 'लगन्ति' प्राप्नुवन्ति तथापि शुद्धाः, क्षपकवदशठपरिणामतया श्रुतज्ञानोपयोगप्रवृत्तत्वादिति ॥

गतं 'परिहरणा अनुयाने' इति द्वारम्। अथ पुरःकर्मद्वारमाह-

[भा.१८१६] पुरकम्मम्मि य पुच्छा, किं कस्साऽऽरोवणा य परिहरणा।
एएसिं तु पयाणं, पत्तेयपरूवणं वोच्छं ॥

वृ- पुरःकर्मणि पृच्छा कर्त्तव्या। तद्यथा-किं पुरःकर्म ? कस्य वा पुरःकर्म ? का वा पुरःकर्मण्यारोपणा ? कथं पुरःकर्मणः परिहरणं क्रियते ? एतेषां चतुर्णामपि पदानां प्रत्येकमहं प्ररूपणां वक्ष्ये ॥

तत्र किमिति द्वारस्य प्ररूपणां चिकीर्षु प्रेर्यमुत्थापयन्नाह-

[भा.१८१७] जइ जं पुरतो कीरइ, एवं उट्ठाण-गमनमादीनि।
होंति पुरेकम्मं ते, एमेव य पुव्वकम्मे वि ॥

वृ-परः प्राह-यदि साधोर्भिक्षार्थिनो गृहाङ्गणमागतस्य यत् 'पुरतः' अग्रतः क्रियते तत् पुरःकर्मेति व्यवह्रियते, एवं 'ते' तव यानि दायकस्योत्थान-गमनादीनि कर्माणि साधोरग्रतः क्रियमाणानि तानि सर्वाण्यपि पुरःकर्म भवति। अथ पूर्वार्थवाचकः पुरःशब्द इहाधिक्रियते तत आह-एवमेव च पूर्वकर्मण्यपि द्रष्टव्यम्। किमुक्तं भवति ?-'पुरः-साधोरागमनात् पूर्वं कर्म पुरःकर्म' इत्यस्यामपि व्युत्पत्तौ यान्युत्थानादीनि पूर्वं कृतानि तानि पुरःकर्म प्राप्नुवन्ति ॥

यदि नामैवं ततः का नो हानि ? इति चेद् उच्यते-

[भा.१८१८] एवं फासुमफासुं, न विज्जए न वि य काइ सोही ते।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

हंदि हु बहूणि पुरतो, कीरंति कयाणि पुव्वं च ॥

वृ- 'एवं' द्विधाऽपि समासे क्रियमाणे प्राशुकमप्राशुकं वा 'न विद्यते' न ज्ञायते, सर्वस्या अभ्युत्थान-गमनादिचेष्टयाः पुर-कर्मत्वप्राप्तेः । अज्ञायमाने च प्राशुका-ऽप्राशुकविभागे शोधिरपि काचिन्नास्ति 'ते' तवाभिप्रायेण, तस्याश्चाभावे चारित्रस्याप्यभाव इति भावः । 'हन्दि' इत्युपप्रदर्शने । 'हुः' इत्यामन्त्रणे । ततश्चैवम्-हे आचार्या ! बहूनि पुरतः क्रियन्ते बहूनि च दायकेन पूर्वं कृतानि तानि सर्वाण्यपि पुरः कर्म प्राप्नुवन्ति ॥

अत्र सूरि प्रतिवचनमाह-

[भा.१८१९] कामं खलु पुरसद्दो, पच्चक्ख-परोक्खतो दुहा होइ ।
तह वि य न पुरेकम्मं,पुरकम्मं चोदग ! इमं तु ॥

वृ- 'कामम्' अनुमतं खलुशब्दोऽवधारणे अनुमतमेवास्माकं यत् पुरःशब्दः प्रत्यक्ष-परोक्षयोर्द्विधा भवति-यदा 'पुरः-अग्रतः कर्म पुरःकर्म' इति व्युत्पत्तिराश्रीयते तदा प्रत्यक्षार्थवाचकः पुरःशब्दः, यदा तु 'पुरः-पूर्वं कर्म पुरःकर्म' तदा परोक्षार्थवाचकः । एवं पुरःशब्दस्यप्रत्यक्ष-परोक्षार्थवाचकतया यद्यप्युत्थानादीनि पुरःकर्म प्राप्नुवन्ति तथापि तानि पुरःकर्म न भवति, किन्तु पुरःकर्म हे नोदक ! 'इदं' वक्ष्यमाणं भवति ॥

तदेवाह-

[भा.१८२०] हत्थं वा मत्तं वा, पुव्विं सीतोदएण जं धोवे ।
समणट्ठाए दाया, पुरकम्मं तं विजाणाहि ॥

वृ- हस्तंवा मात्रकं वा 'पूर्वं' भिक्षादानात् प्रथमं 'शीतोदकेन' सचित्तजलेन यद् दाता श्रमणार्थं 'धावति' प्रक्षालयति तत् पुरःकर्म विजानीहि न शेषमुत्थान-गमनादिकम्, तथासमयपरिभाषया रूढत्वात् ॥

गतं किमिति द्वारम् । अथ कस्येति द्वारस्य प्ररूपणामाह-

[भा.१८२१] कस्स त्ति पुरेकम्मं, जइणो तं पुन पभू सयं कुज्जा ।
अहवा पभुसंदिट्ठो, सो पुन सुहि पेस बंधू वा ॥

वृ- कस्य पुनः पुरःकर्म भवति ? इति पृच्छायां निर्वचनं 'यतेः' तत्परिहारिणः साधोः पुरःकर्म मन्तव्यम्, तदितरेषां दोषत्वेनानभ्युपगमात् । 'तत् पुनः' पुरःकर्म 'प्रभुः' गृहस्वामी स्वयमेव कुर्यात्, अथवा 'प्रभुसन्दिष्टः' प्रभुणा आदिष्टः । 'स पुनः' प्रभुसन्दिष्टस्त्रिधा, तद्यथा- 'सुहृद्' मित्रम्, 'प्रेष्यः' दासी-दासादि, 'बन्धुः' माता-भगिन्यादि ॥

अथ पुरःकर्मणः सम्भवमाह-

[भा.१८२२] दमए पमाणपुरिसे,जाए पंतीए तान मोत्तूणं ।
सो पुरिसो तं वऽन्नं, तं दव्वं अन्नो अन्नं वा ॥

वृ- सङ्खड्यां पङ्क्तिपरिवेषणे नियुक्तः कोऽपि 'द्रमकः' कर्मकरः, एतेन प्रभुसन्दिष्टग्रहणम्; 'प्रमाणपुरुषो वा' देयद्रव्यस्वामी, अनेन च प्रभुग्रहणम्; ततश्च दाता प्रभुर्वा प्रभुसन्दिष्टो वा यस्यां पङ्क्तौ पुरःकर्म कृतवान् तां मुक्त्वा यद्यन्यां पङ्क्तिं सङ्क्रामति तदा यदि परिणतहस्तस्ततः कल्पते । अत्र चाष्टौ भङ्गा भवन्ति-स पुरुषस्तां पङ्क्तिमन्यां वा पङ्क्तिं तद् द्रव्यमन्यद् द्रव्यं वा

Jain Education International For Private & Personal Use Only www.jainelibrary.org

इत्यनेन चत्वारो भङ्गाः सूचिताः, एवमन्यः पुरुष इत्यनेनापि चत्वारो भङ्गाः सूच्यन्ते, एवमेत्ते अष्टौ भङ्गाः ॥

एनामेवाष्टभङ्गी स्पष्टयति-

[भा.१८२३]सो तं ताए १ अन्नाए बिइओ २ अन्न तीए ३ दो वऽन्ने ४।
एमेव य अन्नेन वि, भंगा खलु होंति चत्तारि ॥

वृ-स पुरुषस्तद् द्रव्यं तस्यां पङ्क्ताविति प्रथमः १। स पुरुषस्तद् द्रव्यमन्यस्यां पङ्क्ताविति द्वितीयः २। स पुरुषोऽन्यद् द्रव्यं तस्यां पङ्क्ताविति तृतीयः ३। स पुरुषोऽन्यद् द्रव्यमन्यस्यां पङ्क्ताविति चतुर्थ ४, अत्र च 'द्वे अपि' द्रव्य-पङ्क्ती अन्ये इति। एवमेव चान्यपुरुषपदेनापि चत्वारो भङ्गा भवन्ति। तद्यथ-अन्यः पुरुषस्तद् द्रव्यं तस्यां पङ्क्तौ ५ अन्यः पुरुषस्तद् द्रव्यमन्यस्यां पङ्क्तौ ६ अन्यः पुरुषोऽन्यद् द्रव्यं तस्यां पङ्क्तौ ७ अन्यः पुरुषोऽन्यद् द्रव्यमन्यस्यां पङ्क्तौ ८॥ एतेषां मध्याद् येषु यथा कल्पते तदेतद् दर्शयति-

[भा.१८२४] कप्पइ समेसु तह सत्तमम्मि तइयम्मि छिन्नवावारे।
अत्तट्ठियम्मि दोसुं, सव्वत्थ य भयसु कर-मत्ते ॥

वृ- 'समेषु' द्वितीय-चतुर्थ-षष्ठा-ऽष्टमेषु भङ्गेषु ग्रहीतुं कल्पते। तथाहि-द्वितीये तावदन्यस्यां पङ्क्तौ सङ्क्रान्तत्वेन तद् द्रव्यमपि वक्ष्यमाणनीत्या चतुर्थे तु द्रव्यान्तरत्वेनान्यस्यां पङ्क्तौ दीयमानत्वेन च षष्ठे तुपुरुषान्तरेणापरस्यां पङ्क्तौ तद् दरव्यं दीयत इति हेतोः अष्टमे तु तिसृणामपि पुरुष-द्रव्य-पङ्क्तीनामन्यत्वेन परिस्फुटमेव कल्पत इति। तथा सप्तमेऽपि भङ्गे कल्पत एव, पुरुषान्तरेणान्यद्रव्यस्य दीयमानत्वात्। तृतीये तु च्छिन्नव्यापारे सति कल्पते, यः साधुदानार्थं हस्तमात्रकप्रक्षालनव्यापारः कृतः स यदा व्यापारान्तरेण च्छिन्नो भवति तदा तेनैव पुरुषेणान्यद् द्रव्यं तस्यां पङ्क्तौ दीयमानं कल्पत इति भावः। 'द्वयोः' प्रथम-पञ्चमयोर्यदि तद् द्रव्यं तेनात्मार्थितं भवति ततः कल्पते नान्यथा। 'सर्वत्र च' अष्टस्वपि भङ्गेषु कर-मात्रके 'भज' विकल्पय,यदि हस्तो वा मात्रकं वा सस्निग्धमुदकार्द्रं वा न भवति ततः कल्पते अन्यथा तु नेत्येवं भजना कर्त्तव्येत्यर्थः ॥ अथ किमर्थं पुरःकर्म करोति ? इत्याह-

[भा.१८२५] अच्चुसिण चिक्कणे वा,कूरे धुविउं पुनो पुनो देइ।
आयमिऊणं पुव्वं, दइज्ञ्जइणं पढमयाए ॥

वृ-परिवेषणं कुर्वतो यद्यत्युष्णश्चिक्कणो वा कूरस्तत एकत्र हस्तदाहभयादपरत्र हस्ते विलगनात् कुण्डकादिस्थितेनोदकेन स दाता पुनः पुनः 'धौत्वा' हस्तमार्द्रीकृत्य 'ददाति' परिवेषयतीत्यर्थः, साधोरप्यागतस्य तथैव यदि भिक्षां ददाति तदा पुरःकर्म भवति। यदि वा पूर्वम् 'चम्य' हस्तं मात्रकंवा प्रक्षाल्य प्रथमत एव यतीनां दद्यात् ततोऽन्येभ्यः परिवेषयेत् तदाऽपि पुरःकर्म - भवति ॥ एवं पुरःकर्मणि कृते यद् यत्र कल्पते तदेतद् निर्युक्तिगाथया दर्शयति-

[भा.१८२६] दाऊण अन्नदव्वं, कोई दिज्ञा पुनो वि तं चेव।
अत्तट्ठिय-संकामियगहणं गीयत्थसंविग्गे ॥

वृ-तद् अनेषणाकृतं द्रव्यं मुक्त्वा अन्यस्यान्यद् द्रव्यं 'दत्त्वा' परिवेष्य कश्चित् 'तदेव' अनेषणाकृतं द्रव्यं पुनरपि तस्यामन्यस्यां वा पङ्क्तौ साधूनां दद्यात्, एवं छिन्नव्यापारे आत्मार्थितं सत् कल्पते।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

अथवा "संकामिय" त्ति तदनेषणाकृतं द्रव्यं स दाता अन्यस्मै परिवेषयेत् स यदि दद्यात् तत एवं सङ्क्रामितं सत् कल्पते। एतच्च ग्रहणं गीतार्थस्यानुज्ञातम्, यतो गीतार्थस्तद् द्रव्यमित्थं गृह्णानोऽपि संविग्नो भवति ॥

एतदेवान्त्यपदं भाष्यकारो भावयति-

[भा.१८२७] गीयत्थग्गहणेणं, अत्तट्ठियमाइ गिण्हई गीतो।
संविग्गग्गहणेणं, तं गिण्हंतो वि संविग्गो ॥

वृ-गीतार्थग्रहणेन कृतेनैतद् ज्ञापितं यद् आत्मार्थितम्, आदिशब्दात् सङ्क्रामितं च तद् आगमप्रमाणतो गीतार्थ एव गृह्णाति नागीतार्थः। संविग्नग्रहणेन तु 'तद्' आत्मार्थितादि गृह्णानोऽपि गीतार्थ संविग्नो भवति नासंविग्न इत्युक्तं भवति ॥ इत्थं पुनः पुरतः कृतमपि न पुरःकर्म भवतीति दर्शयति-

[भा.१८२८] पुरतो वि हु जं धोयं, अत्तट्ठाए न तं पुरेकम्मं।
तं उदउल्लं ससिणिद्धगं व सुक्खे तहिं गहणं ॥

वृ- यत् 'पुरतोऽपि' साधोरग्रतोऽप्यात्मार्थं धौतं तत् पुरःकर्म न भवति, किन्तु तद् उदकार्द्रं सस्निग्धं वा मन्तव्यम्। 'उदकार्द्रं' बिन्दुसहितम्, 'सस्निग्धं' बिन्दुरहितम्। तस्मिन्नुभयेऽपि 'शुष्के' परिणते ग्रहणं कर्त्तव्यम् ॥

पुरःकर्मोदकार्द्रयोर्विशेषमाह-

[भा.१८२९] तुल्ले वि समारंभे, सुक्के गहणेक्क एक्क पडिसेहो।
अन्नत्थ छूढ ताविय, अत्तट्ठे होइ खिप्पं तु।

वृ-उदकार्द्र-पुरःकर्मणोस्तुल्येऽप्यप्कायसमारम्भे 'एकस्मिन्' उदकार्द्रे शुष्के सति ग्रहणं भवति 'एकस्मिन्' पुरःकर्मणि पुनः शुष्केऽप्यनात्मार्थिते ग्रहणस्य प्रतिषेधः। तथाहि-संयतार्थं द्वाभ्यां पृथक्पृथक्पङ्क्तौ पुरःकर्म कृतम्, तच्च परिणतम् उदकार्द्र-सस्निग्धौ न स्तः, परं येनात्मार्थितं तस्य हस्तात् कल्पते, येन तु नात्मार्थितं तस्य हस्ताद् न कल्पते। एवं चिरकालिके पुरःकर्मण्युक्तम्। यत्र तु हस्तो मात्रकं वा तत्क्षणमेव 'अन्यत्र' तक्रादौ प्राशुकद्रव्ये प्रक्षिप्तमग्निना वा तापितं तत्रात्मार्थिते क्षिप्रमपि ग्रहणं कर्त्तव्यम् ॥

गतं कस्येति द्वारम्। अथारोपणाद्वारमाह-

[भा.१८३०] चाउम्मासुक्कोसे, मासिय मज्झे य पंचग जहन्ने।
पुरकम्मे उदउल्ले, ससिणिद्धाऽऽरोवणा भणिया ॥

उदकसमारम्भे पुर-कर्मोत्कृष्टमपराधपदम्, उदकार्द्रं मध्यमम्, सस्निग्धं जघन्यम्। उत्कृष्टे चत्वारो मासा लघवः, मध्यमे लघुमासिकम्, जघन्ये पञ्चरात्रिन्दिवानि। एवं पुरःकर्मोदकार्द्रसस्निग्धेषु यथाक्रममारोपणा भणिता ॥

अथ परिहरणाद्वारमाह-

[भा.१८३१] परिहरणा वि य दुविहा, विहि-अविहीए अ होइ नायव्वा।
पढमिल्लुगस्स सव्वं, बिइयस्स य तम्मि गच्छम्मि ॥

[भा.१८३२] तइयस्स जावजीवं, चउथस्स य तं न कप्पए दव्वं।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

तद्दिवस एगगहणे, नियट्टगहणे य सत्तमए ॥

वृ- परिहरणाऽपि च द्विविधा-विधिपरिहरणा अविधिपरिहरणा च भवति ज्ञातव्या । अविधिपरिहरणा सप्तविधा-तत्र प्रथमस्य नोदकस्य सर्वमपि द्रव्यजातं स्वगच्छे परगच्छे च यावज्जीवमकल्पनीयम् १, द्वितीयस्य तु तस्मिन्नेव गच्छे यावज्जीवम् २, तृतीयस्य यावज्जीवं तस्यैवैकस्य साधोः सर्वमपि द्रव्यजातम् ३, चतुर्थस्य तु तद् द्रव्यमेकं यावज्जीवम् ४, पञ्चमस्य तु तद्दिवसं सर्वद्रव्याणि ५, षष्ठस्य तु तस्यैवैकद्रव्यस्य ग्रहणं न कल्पते ६, सप्तमस्य निवृत्तः सन् स एव साधुः परिणतेन हस्तेन ग्रहणं करोतीत्यभिप्रायः ७ ॥

अथैतेषामेव पराभिप्रायेण व्याख्यानमाह-

[भा.१८३३] पढमो जावज्जीवं, सव्वेसिं संजयाण सव्वाणि ।
दव्वाणि निवारेई, बीओ पुन तम्मि गच्छम्मि ॥

वृ-प्रथमो नोदको यस्मिन् पुरःकर्म कृतं तत्र यावदसौ पुरःकर्मकारो दाता यदर्थं च तत् पुरःकर्म कृतं तौ यावद् जीवतस्तावत् स्वगच्छ-परगच्छसत्कानां सर्वेषां संयतानां सर्वाणि द्रव्याणि निवारयति। द्वितीयः पुनस्तस्मिन् गच्छे सर्वेषामपि साधूनां यावज्जीवं सर्वद्रव्याणि निवारयति ॥

[भा.१८३४] तइओ जावज्जीवं, तस्सेवेगस्स सव्वदव्वाइं ।
वारेइ चउत्थो पुन, तस्सेवेगस्स तं दव्वं ॥

वृ-तृतीयो ब्रवीति-यदर्थं पुरःकर्म कृतं तस्यैवैकस्य यावज्जीवं सर्वद्रव्याणि न कल्पन्ते । चतुर्थस्तु तदेवैकं द्रव्यं तस्यैवैकस्य यावज्जीवं वारयति ॥

[भा.१८३५] सव्वाणि पंचमो तद्दिणं तु तस्सेव छट्ठो तं दव्वं ।
सत्तमओ नियट्टंतो, गिण्हइ तं परिणयकरम्मि ॥

वृ- पञ्चमो ब्रवीति-तदेवैकं दिनं सर्वाणि द्रव्याणि तदीयगृहे न कल्पन्ते । षष्ठो ब्रूते-तदेवैकं द्रव्यं तस्य गृहे तद्दिनं मा गृह्यताम् । सप्तमः प्राह- 'परिणतकरे' परिणताप्काये सति हस्ते भिक्षामटित्वा निवर्त्तमानस्तत्रैव गृहे स एव साधु सर्वद्रव्याणि गृह्णातु न कश्चिद् दोषः ॥

इत्थं परैरुक्ते सति सूरिराह-

[भा.१८३६] एगस्स पुरेकम्मं, वत्तं सव्वे वि तत्थ वारिंति ।
दव्वस्स य दुल्लभता, परिचत्तो गिलाणओ तेहिं ॥

वृ- 'एकस्य' साधोरर्थाय पुरःकर्म यत्र 'वृत्तं' सञ्जातं तत्र ये सर्वेषामेकस्य वा सर्वद्रव्याणि उपलक्षणत्वादेकमपि द्रव्यं यावज्जीवं तद्दिनं वा वारयन्ति तैर्द्रव्यस्य ग्लानप्रायोग्यस्यान्यत्र दुर्लभतया ग्लानः परित्यक्तो मन्तव्यः ॥

एतदेव सविशेषमाह-

[भा.१८३७] जेसिं एसुवएसो, आयरिया तेहि ऊ परिच्चत्ता ।
खमगा पाहुणगा वि य, सुव्वत्तमजाणगा ते उ ॥

वृ- 'येषां' यथाच्छन्दवादिनां 'एषः' सर्वद्रव्यग्रहणादिप्रतिषेधरूप उपदेशस्तैराचार्या क्षपकाः प्राघूर्णकाश्चपरित्यक्ता द्रष्टव्याः, तत्प्रायोग्यस्य घृतादिद्रव्यस्यान्यत्र दुर्लभत्वात् । ते च 'सुव्यक्तं'

Jain Education International For Private & Personal Use Only www.jainelibrary.org

परिस्फुटम् 'अज्ञाः' मूर्खा, अतत्त्ववेदित्वात्। स्वच्छन्दप्ररूपणानिष्पन्नं चामीषां चतुर्गुरु प्रायश्चित्तम्॥ तत्र ये सर्वानपि साधून् परिहारं कारयन्ति ते स्वपक्षसाधनसमर्थं विधिमाहुः-

[भा.१८३८] अद्धाणनिग्गयाई, उब्भामग खमग अक्खरे रिक्खा।
मग्गण कहण परंपर, सुव्वत्तमजाणगा ते वि॥

वृ- यत्र गृहे पुःकर्म कृतं तत्राध्वनिर्गतादयः 'उद्रामका वा' बहिर्ग्रामे भिक्षाटनशीलाः 'अजानन्तो मा प्रविक्षन्' इति कृत्वा क्षपकस्तत्र स्थाप्यते। अथ नास्ति क्षपकस्ततः कुड्यादावक्षराणि लिख्यन्ते, यथा-अत्र पुरःकर्म कृतम्, न केनापि भिक्षा ग्राह्येति। अथ तावक्षराणि लिखितुं न जानीतस्ततो रेखा कर्त्तव्या। अथ कृताऽपि सा केनापि भज्येत ततोऽपरेषां साधूनां मार्गणं कृत्वा मिलितानां कथनीयम्-अमुष्मिन् गृहे पुरःकर्म कृतम्। तेऽपि परम्परया सर्वसाधून् ज्ञापयन्ति। इत्थं ये ब्रुवते सुव्यक्तं तेऽप्यज्ञा मन्तव्याः॥

अथैतदेव भावयति-

[भा.१८३९] उब्भामग-ऽनुब्भामग-सगच्छ-परगच्छजाणणट्ठाए।
अच्छइ तहयं खमओ, तस्सऽसइ स एव संघाडो॥

वृ- उद्भ्रामकाणां-बाह्यग्रामे भिक्षाटनं विधायापर्याप्ते भिक्षामटताम् अनुभ्द्रामकाणां-मौलग्रामे भिक्षापरिभ्रमणशीलानां स्वगच्छीयानां परगच्छीयानां च सर्वेषां ज्ञापनार्थं क्षपकस्तत्र गृहे निषन्नस्तिष्ठति। स च यो यः सङ्घाटकस्तत्रागच्छति तस्य तस्य कथयति-अत्र पुरःकर्म कृतं वर्तते। अथ नास्ति क्षपकः पारणकं वा तस्य तद्दिने ततो यदर्थं पुरःकर्म कृतं स एव सङ्घाटकस्तत्र तिष्ठति॥

[भा.१८४०] जइ एगस्स वि दोसा, अक्खर न उ ताइँ सव्वतो रिक्खा।
जइ फुसण संकदोसा, हिंडंता चेव साहंति॥

वृ- अथ तयोरेकः प्रथम-द्वितीयपरीषहपीडितो न शक्नोति स्थातुम् ततः स प्रतिश्रयं व्रजति द्वितीयस्तु तत्रास्ते। अथैकस्य तस्य तिष्ठतः स्त्रीसमुत्थादयो दोषाः ततः कुड्यादिषु पुरःकर्मकरणसूचकान्यक्षराणि लिख्यन्ते। अथ 'न तु' नैव 'तानि' अक्षराणि सर्वेऽपि लिखितुं जानते ततः साधुजनसाङ्केतिकी रेखा करणीया। यदि तस्याः 'स्पर्शना' पादोघातेन मर्दना तदिषया आशङ्कादोषा भवेयुः, बहुवचननिर्देशादन्योऽपि रेखां करोतीत्याद्याशङ्कापरिग्रहः, ततस्तावेव साधू भिक्षामटन्तावपरेषां साधूनां कथयतः, तेऽपि हिण्डमाना एव परम्परया सर्वसाधूनां कथयन्ति। इत्थं येषां परिहरणविधिस्ते सुव्यक्तमज्ञा मन्तव्याः॥

उपसंहरन्नाह-

[भा.१८४१] एसा अविही भणिया, सत्तिहा खलु इमा विही होइ।
तत्थाई चरिमदुए, अत्तट्ठियमाइ गीयस्स॥

वृ- एषा अविधिपरिहरणा सप्तविधा भणिता। 'इयं तु' वक्ष्यमाणा विधिपरिहरणा भवति। सा चाष्टविधा। 'तत्र' अष्टानां भङ्गानां मध्याद् यदाद्यं पदं यच्च चरमम्-अन्तिमं प्रकारद्वयं तेषु त्रिषु भेदेषु आत्मार्थिते आदिशब्दात् सङ्क्रामिते च सति गीतार्थस्य ग्रहणं भवति। एतच्च यथास्थानं भावयिष्यते॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

के पुनस्तेऽष्टौ भेदाः ? उच्यन्ते-

[भा.१८४२] एगस्स बीयगहणे १, पसज्जणा तत्थ होइ २ कब्बट्टी ३।
वारण ललियासणिओ ४, गंतूणं ५ कम्म ६ हत्थ ७ उप्फोसे ८॥

वृ- "एगस्से"ति विभक्तिव्यत्ययादेकेन पुरःकर्मणि कृते यदि द्वितीयो ददाति तदा तस्य द्वितीयस्य हस्ताद् ग्रहणे विधिर्वक्तव्यः १। तथा "पसज्जण"त्ति अगीतार्थभिप्रायेण "तत्थ" त्ति 'तत्र' द्वितीयेऽपि दायके 'प्रसजना' प्रसङ्गदोषो भवतीति वक्तव्यम् २। "कप्पट्ठि"त्ति 'कल्पस्थिकाः' तरुणस्त्रियः केलिप्रियतया अभीक्ष्णं पुरःकर्म यथा कुर्वन्ति तथा निरूपणीयम् ३। "वारण ललियासणिओ"त्ति यदि साधुः 'त्वं मा देहि एषा दास्यति' इत्यविधिना पुरःकर्मकारिणीं वारयति तदा ललिताशनिक इति तया यथा गण्यते तथा वक्तव्यम् ४। "गंतूणं" ति 'गत्वा प्रतिनिवृत्तायास्मै दास्यामि' इति बुध्या यदि दाता हस्तगृहीतया भिक्षया तिष्ठति तदा न कल्पते इति वाच्यम् ५। "कम्मे"त्ति द्रव्यभावभेदभिन्नं पुरःकर्म यथा भवति तथा दर्शनीयम् ६। "हत्थ"त्ति तत्र पुर-कर्मणि किं हस्ते उपघातः ? उत मात्रके ? इत्यादि चिन्तनीयम् ७। "उप्फोसे"त्ति उत्स्पर्शनं-छन्दनं तद् वस्त्रविषयं वक्तव्यम् इति द्वारगाथासमासार्थः॥ अथ विस्तरार्थमभिधित्सुराह-

[भा.१८४३] एगेन समारद्धे, अन्नो पुन जो तहिं सयं देइ।
जयऽजाणगा भवंती, परिहरियव्वं पयत्तेण॥

वृ- 'एकेन' दायकेन पुर-कर्मणि समारब्धे साधुना प्रतिषिद्धे तद् द्रव्यं यद्यन्यः स्वयमेव कश्चिद् ददाति तदा ते साधवो यदि 'अज्ञाः' अगीतार्था अगीतार्थमिश्रावा भवन्ति ततः परिहर्त्तव्यं प्रयत्नेन॥ इदमेव व्यतिरेकेणाह-

[भा.१८४४] समणेहिं अभणंतो, गिहिभणिओ अप्पणो व छंदेणं।
मोत्तु अजाणग मीसे, गिण्हंति उ जाणगा साहू॥

वृ- पुरःकर्मकारिणि प्रतिषिद्धे 'श्रमणैः' साधुभिरभण्यमानो यद्यन्यो दाता गृहिणा केनापि भणित आत्मनो वा 'छन्देन' अभिप्रायेण ददाति तदा मुक्त्वा 'अज्ञान्' अगीतार्थान् 'मिश्राँश्च' अगीतार्थमिश्रान् 'ज्ञायकाः' गीतार्थास्तद् द्रव्यमात्मार्थितं गृह्णन्ति॥

अथ किमर्थमगीतार्थेषु न गृह्यते ? इति सम्बन्धायातं प्रसजनाद्वारं विवृण्वन् तावद-गीतार्थाभिप्रायमाह-

[भा.१८४५] अम्हट्ठसमारद्धे, तद्दव्वऽन्नेन किह नु निद्दोसं।
सविसन्नाहरणेणं, मुज्झइ एवं अजाणंतो॥

वृ- अस्माकमर्थायाप्काये समारब्धे सति दायकेन यद् द्रव्यं गृहीतं तद् अन्येन दीयमानं कथं नु निर्दोषम् ? सदोषमेवेति भावः। कुतः ? इत्याह-'सविषान्नाहरणेन' सविषं यद् अन्नं तद्दृष्टान्तेन। यथा हि वैरिणोऽर्थाय केनचिद् विषयुक्तं भक्तं कृतं तद् अन्येन दीयमानं किं सदोषं न भवति ? एवमस्मदर्थमुदकस्यारम्भं कृत्वा या भिक्षा गृहीता तां यद्यन्यो ददाति तदा किं दोषो न प्रसजति ? इति। एवमजानन्नगीतार्थो मुह्यति, न पुनर्भावयति, यथा-तद् अन्येन दीयमानं पुरःकर्मैव न भवति। यत एवमतोऽगीतार्थेषु मिश्रेषु वा परिहर्त्तव्यम्॥ गीतार्थेषु विधिमाह-

[भा.१८४६] एगेन समारद्धे, अन्नो पुन जो तहिं सयं देइ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

जइ जाणगा उ साहू, परिभोत्तुं जे सुहं होइ ।।

वृ-एकेन पुर-कर्मणि समारब्धे यद्यन्यः स्वयं ददाति यदि च 'ज्ञायकाः' गीतार्था साधवस्ततः परिभोक्तुं "जे" इतिपादपूरणे सुखं भवति, परिभोक्तव्यं तदिति भावः ।। अथवा-

[भा.१८४७] गीयत्थेसु वि भयणा, अन्नो अन्नं व तेण मत्तेणं ।
विप्परिणयम्मि कप्पइ, ससिणिद्धदउल्ल पडिकुट्ठा ।।

वृ-गीतार्थेष्वपि भजना कार्या। कथम् ? इत्याह-'अन्यः' पुरुषोऽन्यद् वा तद् वा द्रव्यं 'तेन' पुरःकर्मकृतेन मात्रकेण यदि ददाति तदा विपरिणतेऽप्काये आत्मार्थिते च सति कल्पते। यदि तु सस्निग्धमुदकार्द्रं वा दायकस्य पाणितलं भवति ततः प्रतिकुष्टा सा भिक्षा, न कल्पत इत्यर्थः ।।

अथ कल्पस्थिकाद्वारं व्याख्याति-

[भा.१८४८] तरुणीउ पिंडियाओ, कंदप्पा जइ करे पुरेकम्मं ।
पढम-विइयासु मोत्तुं, सेसे आवज्ज चउलहुगा ।।

वृ-काश्चित् 'तरुण्यः' युवतयः 'पिण्डिताः' एकत्र मिलिताः साधुं समायान्तं दृष्ट्वा परस्परं जल्पन्ति-'एतेषां तावदेतदर्थं धौतेन हस्तेन मात्रकेण वा दीयमानं न कल्पते, अतः पश्यामस्तवदेनम्, अस्माभि स्वलीकृतः किमेष करोति ?' इत्येकया तासं मध्यादुत्थाय पुरःकर्म कृतम्, ततः साधुः प्रतिनिवर्त्तितुं लग्नः; द्वितीया ब्रवीति-प्रतीक्षस्व भगवन् ! अहं ते दास्यामि; ततो भूयोऽप्यागतस्य तस्य तयाऽपि पुरःकर्म कृतम्; ततः प्रतिनिवर्त्तमानं यदि तृतीया काचिदाकारयति तदा ज्ञातव्यम्, यथा-एता मां खलीकुर्वन्ति; अतो न प्रतिनिवर्त्तितव्यम्। अत एवाह-यदि ताः कन्दर्पात् पुरःकर्म कुर्वीरन् ततः प्रथम-द्वितीये तरुण्यौ मुक्त्वा शेषाभिराकारितः प्रतिनिवर्त्तमान आपद्यते चतुर्लघुकम् ।। अथवारणललिताशनिकद्वारं व्याचष्टे-

[भा.१८४९] पुरकम्मम्मि कयम्मी, जइ भन्नि मा तुमं इमा देउ ।
संकापदं व होज्जा, ललितासणिओ व सुव्वत्तं ।।

वृ-पुरःकर्मणि कृते यदि साधुना दात्री भण्यते 'मा दास्त्वम् इयं ददातु' ततः सा चिन्तयति-अहं विरूपा वृद्धा वा अतो नास्मै प्रतिभामि, इयं तु सुरूपा यौवनमधिरूढा प्रतिभासते। शङ्कापदं वा तस्याश्चेतसि भवेत्-किमेष एतया सह घटितो यदेवमस्याः पार्श्वाद् भिक्षां ग्रहीतुमिच्छति ? यदि वा ब्रूयात्-भवान् सुव्यक्तं ललिताशनिको लक्ष्यते यदेवं यथाभिलषितां परिवेषिकामभिकाङ्क्षसि ।। अथ गत्वेतिद्वारं व्याख्यानयति

[भा.१८५०] गंतूणपडिनियत्तो, सो वा अन्नो व से तयं देइ ।
अन्नस्स व दिज्जिहिई, परिहरियव्वं पयत्तेणं ।।

वृ-कृतपुरःकर्मा दायको भिक्षां ददानः साधुना प्रतिषिद्धश्चिन्तयति-'यदेष साधुरस्यां गृहपङ्क्तौ गत्वा प्रतिनिवृत्तः समायास्यति तदा दास्यामि' इति तद् द्रव्यं स वा अन्यो वा दायकः "से" तस्या साधोर्ददाति तदा न कल्पते। अथ यद्येष न गृह्णाति ततः 'अन्यस्य' साधोर्दास्यते इति सङ्कल्पयति ततस्तेनापि परिहर्त्तव्यं तद् भक्तं प्रयत्नेन। एषा निर्युक्तिगाथा ।।

अस्या एव भाष्यकारो व्याख्यानमाह-

[भा.१८५१] पुरकम्मम्मि कयम्मी, पडिसिद्धो जइ भणिज्ज अन्नस्स ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

दाहं ति पडिनियत्ते, तस्स व अन्नस्स व न कप्पे ॥

वृ- पुरःकर्मणि कृते प्रतिषिद्धो दायको यदि भणेत्-अन्यस्मै साधवे दास्यामीति । ततः प्रतिनिवृत्तस्य तस्य वा अन्यस्य वा न कल्पते ॥ तथा-

[भा.१८५२] भिक्खयरस्सऽन्नस्स व, पुव्वं दाऊण जइ दए तस्स ।
सो दाया तं वेलं, परिहरियव्वो पयत्तेणं ॥

वृ-पुरःकर्मणि कृते पूर्वमन्यस्य भिक्षाचरस्य भिक्षां दत्त्वा पश्चादच्छिन्नव्यापारः 'तस्य' साधोर्भिक्षां दद्यात्, स दाता तस्यां वेलायां प्रयत्नेन परिहर्त्तव्य इति ॥

अमुमेवार्थं किञ्चिद्विशेषयुक्तमाह-

[भा.१८५३] अन्नस्स व दाहामी, अन्नस्स व संजमस्स न वि कप्पे ।
अत्तट्ठिए व चरगाइणं च दाहं ति तो कप्पे ॥

वृ-अन्यस्मै वा साधवे दास्यामीति यदि सङ्कल्पयति तदा अन्यस्यापि संयतस्य नैव कल्पते। अथ आत्मार्थयति 'चरकादीनां वा दास्यामि' इति सङ्कल्पयति ततः परिणते हस्ते मात्रके वा कल्पते ॥ अथ कर्मेति द्वारं विवृणोति-

[भा.१८५४] दव्वेण य भावेण य, चउक्कभयणा भवे पुरेकम्मे ।
सागरिय भावपरिणय, तइओ भावे य कम्मे य ॥

वृ- द्रव्येण च भावेन च 'चतुष्कभजना' चतुर्भङ्गीरचना पुरःकर्मणि भवति । तद्यथा-द्रव्यतः पुरःकर्म न भावतः १ भावतः पुरःकर्म न द्रव्यतः २ द्रव्यतोऽपि भावतोऽपि पुरःकर्म ३ न द्रव्यतो न भावतः पुरःकर्म ४ । अथामीषां भावना-"सागरिय" त्ति ये शौचवादिनोऽभाविताश्च गृहस्थास्ते पुरःकर्मणि कृते यदि न गृह्यते ततः 'अशुचयोऽमी' इति मन्येरन्; इत्थं सागारिकभयात् पुर-कर्मकृतेन हस्तादिना भक्तादिकं गृहीत्वाऽपि परिष्ठापयत द्रव्यतः पुरःकर्म भवति न भावत इति । "भावपरिणय" त्ति भिक्षामवतरन् 'पुरःकर्मकृतमपि भक्तादिकं ग्रहीष्ये' इति भावेन परिणतस्तथापि पुरःकर्मकृतं ग्रहीष्यामि' इति भावपरिणतो भिक्षामवतीर्ण प्राप्तं च तेन पुरःकर्मकृतमिति तृतीयभङ्गो द्रष्टव्यः ॥

[भा.१८५५] सुन्नो चउत्थ भंगो, मज्झिल्ला दोन्नि वी पडिक्कुट्ठा ।
सपत्तीइ वि असती, गहणपरिणते पुरेकम्मं ॥

वृ- चतुर्थस्तु (भङ्गः) पुरःकर्म प्रतीत्योभयथाऽपि शून्यः, अयं चात्र निरवद्यः प्रतिपत्तव्यः । 'मध्यमौ' द्वितीय-तृतीयभङ्गौ द्वावपि 'प्रतिक्रुष्टौ' प्रतिषिद्धौ, भावस्याविशुद्धत्वात् । प्रथमभङ्गस्तु शुद्ध इव मन्तव्यः,प्रयोजनापेक्षत्वात् । द्वितीयभङ्गे तु "संपत्तीइ वि असई गहणपरिणए पुरेकम्मं" ति द्रव्यतः सम्प्राप्तावसत्यामपि भावतो ग्रहणपरिणतस्य पुरःकर्म भवति ॥

अस्यैव निर्युक्तिगाथाद्वयस्य भावार्थमाक्षेप-परिहाराभ्यां स्पष्टयितुमाह-

[भा.१८५६] पुरकम्मम्मि कयम्मी, जइ गिण्हइ जइ य तस्स तं होइ ।
एवं खु कम्मबंधो, चिट्ठइ लोए व बंभवहो ॥

वृ- पुरःकर्मणि कृते यदि गृह्णाति, यदि च 'तस्य' यतः 'तत्' पुरःकर्मग्रहणं प्रतिभावो भवति तदा तृतीयभङ्गो भवतीति वाक्यशेषः । आह पुरःकर्मदोषस्तावद् दायकस्य न भवति, कृतोऽपि

Jain Education International For Private & Personal Use Only www.jainelibrary.org

घासौ प्रथमभङ्गे साधोर्गृह्णतोऽपि यदि न भवति, एवं 'खुः' अवधारणे पुरःकर्मकृतः कर्मबन्धो दायकग्राहकयोरस्थितस्तटस्थ एव तिष्ठति, यथा लोके ब्रह्मवध इति । इमं लोइयं उदाहरणं- इंदेण उडंकरिसिपत्ती रूववती दिट्ठा । तओ अज्झोववन्नो तीए समं अहिगमं गतो सो तओ निग्गच्छंतो रिसिणा दिट्ठो । रुट्ठेण रिसिणा तस्स सावो दिन्नो । जम्हा तुमे अगम्मा रिसिपत्ती अभिगया तम्हा ते बंभवज्झा उवट्ठिया । सो तीए भीओ कुरुखेत्तं पविट्ठो । सा बंभवज्झा कुरुखेत्तस्स पासओ भमइ । सो वि तओ तब्भया न नीति । इंदेन विना सुन्नं इंदट्ठाणं । ततो सव्वे देवा इंदं मग्गमाणा जाणिऊण कुरुखेत्ते उवट्ठिया भणंति-एहि, सणाहं कुरु देवलोगं । सो भणइ-मम इओ निग्गच्छंतस्सबंभवज्झा लग्गइ । तओ सा देवेहिं बंभवज्झा चउहा विहत्ता-एको विभागो इत्थीणं रिउकाले ठिओ, बिइओ उदगे काइयं निसिरंतस्स, तइओ बंभणस्स सुरापाणे, चउत्थो गुरुपत्तीए अभिगमे । सा बंभवज्झा एएसु ठिया । दंडो वि देवलोगं गओ । एवं तुब्भं पि पुरेकम्मकओ कम्मबंधदोसो ब्रह्महत्यावद् वेगलो भवति ।। पर एवाह-

[भा.१८५७] संपत्तीइ वि असती, कम्मं संपत्तिओ वि य अकम्मं ।
एवं खु पुरेकम्मं, ठवणामित्तं तु चोएइ ।।

वृ- यदि सम्प्राप्तावसत्यामपि द्वितीयभङ्गे साधोः पुरःकर्म भवति, सम्प्राप्तावपि च प्रथमभङ्गे यदि 'अकर्म' पुरःकर्म न भवति, ततः एवं 'खुः' अवधारणे इत्थमेव मदीयमनसि प्रतिष्ठितं यदेतत् पुरःकर्म तत् स्थापनामात्रमेव, तुशब्दस्यैवकारार्थत्वात् प्ररूपणामात्रमेवेदमिति 'नोदयति' प्रेरयति ।। अत्रोच्यते-यत् तावदुक्तम्-"एवं पुरःकर्मकृतः कर्मबन्धस्तटस्थ एव तिष्ठति" तत्र तिष्ठतु नाम, न काचिदस्माकं क्षतिरुपजायते, तथा चात्र स्वदुक्तमेव दृष्टान्तमनूद्यास्माभि स्वाभिमतमर्थं साधयितुमिदमुच्यते-

[भा.१८५८] इंदेन बंभवज्झा, कया उ भीओ अ तीए नासंतो ।
तो कुरुखेत्तपविट्ठो, सा वि बहि पडिच्छए तं तु ।।

[भा.१८५९] निग्गय पुनो वि गिण्हे, कुरुखेत्तं एव संजमो अम्हं ।
जाहे ततो नीइ जीवो, घेप्पइ तो कम्मबंधेणं ।।

वृ- इन्द्रेण ब्रह्महत्या कृता, ततो भीतः सन् तस्या नश्यन् कुरुक्षेत्रं प्रविष्टः । साऽपि ब्रह्महत्या 'तम्' इन्द्रं वहि प्रतीक्षते । यद्यसौ कुरुक्षेत्रान्निर्गच्छति ततो निर्गतं तमिन्द्रं पुनरपि ब्रह्महत्या गृह्णाति । एवमस्माकमपि संयमः कुरुक्षेत्रम्, कर्मबन्धस्तु ब्रह्महत्यासदृशः, ततो यदा संयमकुरुक्षेत्राद् द्वितीय-तृतीयभङ्गयोरशुभाध्यवसायपरिणतो जीवो निर्गच्छति ततो गृह्यतेऽसौ कर्मबन्धेन ब्रह्महत्याकल्पेन, अनिर्गतस्तु प्रथम-चतुर्थभङ्गयोर्न गृह्यते ।। यच्चोक्तम्- "स्थापनामात्रं पुरःकर्म" तदपि न सङ्गच्छते, कुतः ? इति चेद् उच्यते-

[भा.१८६०] जे जे दोसाययणा, ते ते सुत्ते जिनेहि पडिकुट्ठा ।
ते खलु अमायरंतो, सुद्धो इहरा उ भइयव्वो ।।

वृ- यानि यानि दोषाणां-प्राणातिपातादीनामायतनानि-स्थानानि पुरःकर्मप्रभृतीनि तानि तानि सूत्रे 'जिनैः' भगवद्भिः 'प्रतिक्रुष्टानि' निषिद्धानि । अतः 'तानि खलु' दोषायतनानि अनाचरन् साधुः शुद्धो मन्तव्यः । 'इतरथा तु' समाचरन् 'भक्तव्यः' विकल्पयितव्यः ।।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

[भा.१८६१] का भयणा जइ कारणि, जयणाए अकप्प किंचि पडिसेवे ।
तो सुद्धो इहरा पुन, न सुज्झए दप्पओ सेवं ।।

वृ- का पुनः 'भजना ?' विकल्पना ? । सूरिराह-कारणे यतनया पुरःकर्मादि किञ्चिदकल्प्यं यदि प्रतिसेवेत ततः शुद्धः । 'इतरथा पुनः' अयतनया दर्पतो वा सेवमानो न शुध्यति ।।

अथ पुरःकर्मवर्जने कारणमुपदर्शयति-

[भा.१८६२] समणुन्नापरिसंकी, अवि य पसंगं गिहीण वारिंता ।
गिण्हंति असढभावा, सुविसुद्धं एसियं समणा ।।

वृ- समनुज्ञा नाम-पुरःकर्मकृतं गृह्णतामप्कायविराधनानुमतिस्तत्परिशङ्किनः-तद्दोषभीताः पुरःकर्म परिहरन्ति । अपि च यदि पुरःकर्मकृतां भिक्षां ग्रहीष्यामस्ततो गृहिणां भूयः पुरःकर्मकरणे प्रसङ्गो भवति अतस्तं 'वारयन्तः' तद्ग्रहणेनार्थात् प्रतिषेधयन्तोऽशठभावाः सन्तः श्रमणाः सुविशुद्धमेषणीयं गृह्णन्ति ।।

अथ हस्तद्वारं विवृणोति-

[भा.१८६३] किं उवघातो हत्थे, मत्ते दव्वे उदाहु उदगम्मि ।
तिन्नि वि ठाणा सुद्धा, उदगम्मि अनेसणा भणिया ।।

वृ- शिष्यः प्रश्नयति-पुरःकर्मणि कृते किं हस्ते 'उपघातः' अनेषणीयता ? उत मात्रके ? आहोश्विद् द्रव्ये ? उताहो उदके ? । सूरिराह-हस्त-मात्रक-द्रव्याणि त्रीण्यपि स्थानानि 'शुद्धानि' नैतान्यनेष-णीयानि, किन्तूदकेऽनेषणीयता भणिता ।। अत्रोपपत्तिमाह-

[भा.१८६४] जम्हा तु हत्थ-मत्तेहि कप्पती तेहि चेव तं दव्वं ।
अत्तट्ठिय परिभुत्तं, परिणत तम्हा दगमनेसिं ।।

वृ-यस्मात् ताभ्यामेव हस्त-मात्रकाभ्यां तदेव द्रव्यमात्मार्थितं सत् परिमुक्तशेषं वा परिणतेऽप्काये कल्पते, तस्मादुदकमेवानेषणीयं न हस्त-मात्रक-द्रव्याणीति ।।

एवमशनादिविषयो विधिरुक्तः । सम्प्रति । निर्युक्तिगाथया वस्त्रविषयं तमेवाह-

[भा.१८६५] कि वा उवघातो धोए, रत्ते चोक्खे सुइम्मि व कयम्मि ।
अत्तट्ठिय संकामिय गहणं, गीयत्थ संविग्गे ।।

वृ- 'धौतं' मलिनं सत् प्रक्षालितम्, 'रक्तं' धातुप्रभृतिभिर्द्रव्यै रक्तीकृतम्, 'चोक्खं' रजकपार्श्वादतीवोज्वलं कारितम्, 'सुचिकम्' अशुच्यादिनोपलिप्तं सत् पवित्रीकृतम्, एतानि साध्वर्थं वस्त्रे कृतानि भवेयुः । ततश्च शिष्यः पृच्छति-किं धौते उपघातः ? उत रक्ते ? उताहो चोक्खे ? आहोश्वित् शुचीकृते ? । अत्रापि तदेव निर्वचनम्, नैतेषां चतुर्णामेकतरस्मिन्नप्युपघातः, किन्तूदक एव । यत एतदपि साधुना प्रतिषिद्धं सद् यद्यात्मार्थितं सङ्क्रामितं वा अन्यस्मै दत्तं ततो गीतार्थसंविग्नस्य ग्रहणं भवति नान्यस्य ।। किमर्थमेतद् ग्रहणम् ? इति चेद् उच्यते-

[भा.१८६६] गीयत्थग्गहणेणं, अत्तट्ठियमाइ गिण्हई गीतो ।
संविग्गग्गहणेणं, तं गिण्हंतो वि संविग्गो ।।

वृ- गीतार्थग्रहणेनैतद् ज्ञाप्यते-आत्मार्थितं सङ्क्रामितं वा गीतार्थो गृह्णाति नागीतार्थ :। संविग्नग्रहणेन तु-'तद्' आत्मार्थितादिकं गृह्णन्नपि 'संविग्नः' मोक्षाभिलाष्येव असौ नासंविग्न

Jain Education International For Private & Personal Use Only www.jainelibrary.org

इति सूच्यते ।। उत्स्पर्शनद्वारं व्याचष्टे-

[भा.१८६७] एमेव य परिभुत्ते, नवे य तंतुग्गए अधोयम्मि ।
उप्फुसिऊणं देंते, अत्तट्ठिय सेविए गहणं ।।

वृ-यद् वस्त्रं गृहिणा परिधानादिना परिमलितं तत् परिभुक्तं भण्यते, तद्विपरीतं नवं-तन्तुभ्य उद्गतमात्रम् । ततः परिभुक्तं वा नवं वा तन्तूद्गतमधौतं सद् यद् 'उत्स्पृश्य' उदकेनाभ्युक्षणं दत्त्वा ददाति तत्राप्येवमेव द्रष्टव्यम्, न कल्पत इत्यर्थः । अथात्मार्थितमात्मना वा सेवितं-परिभुक्तं ततो ग्रहणं कर्त्तव्यम् ।।

अथ विनेयानुग्रहार्थं प्रसङ्गतः पश्चात्कर्मण्यपि विधिमाह-

[भा.१८६८] संसट्ठमसंसट्ठे, य सावसेसे य निरवसेसे य ।
हत्थे मत्ते दव्वे, सुद्धमसुद्धे तिगट्ठाणा ।।

वृ-इह भिक्षादातुः सम्बन्धी हस्तः संसृष्टो वा भवेदसंसृष्टो वा, येन च कांस्यिकादिना मात्रकेण भिक्षां ददाति तदपि संसृष्टमसंसृष्टं वा, द्रव्यमपि सावशेषं वा स्यान्निरवशेषं वा; अतः संसृष्टाऽसंसृष्ट-सावशेष-निरवशेषपदैर्हस्त-मात्रक-द्रव्यविषयैरष्टौ भङ्गा भवन्ति । तद्यथा-संसृष्टो हस्तः संसृष्टं मात्रकं सावशेषं द्रव्यं १ संसृष्टो हस्तः संसष्टं मात्रकं निरवशेषं द्रव्यं २ संसृष्टो हस्तोऽसंसृष्टं मात्रकं सावशेषं द्रव्यं ३ संसृष्टो हस्तोऽसंसृष्टं मात्रकं निरवशेषं द्रव्यं ४, एवमसंसृष्टेनापि हस्तेन चत्वारो भङ्गाः प्राप्यन्ते ८ । एतस्यामष्टभङ्गयां यानि 'त्रीणि स्थानानि' हस्तमात्रक-द्रव्यरूपाणि तैर्यत्र पश्चात्कर्मदोषो न भवति ते भङ्गकाः शुद्धा इतरे अशुद्धाः ।।

अमुमेवार्थं स्पष्टयति-

[भा.१८६९] पढमे भंगे गहणं, सेसेसु य जत्थ सावसेसं तु ।
अन्नेसु उ अग्गहणं, अलेव-सुक्खेसु ऊ गहणं ।।

वृ-अस्यामष्टभङ्गयां यः प्रथमो भङ्गस्त्रिभिरपि पदैः शुद्धस्तत्र ग्रहणं भवति । शेषेष्वपि भङ्गकेषु यत्र सावशेषं द्रव्यं भवति तत्र ग्रहीतुं कल्पते, पश्चात्कर्मासम्भवात् । 'अन्येषु' निरवशेषपदयुक्तेषु भङ्गकेष्वग्रहणम्, न कल्पते ग्रहीतुमिति भावः । इयमत्र भावना-इहहस्तो मात्रकं वा द्वे वा स्वयोगेन संसृष्टे वा भवतामसंसृष्टे वा न तद्वशेन पश्चात्कर्म सम्भवति, किं तर्हि ? द्रव्यवशे । तथाहि-यत्र द्रव्यं सावशेषं तत्रैते साध्वर्थं खरण्टिते अपि न दात्री प्रक्षालयति, भूयोऽपि परिवेषणसम्भवात्; यत्र तु निरवशेषं द्रव्यं तत्र साधुदानानन्तरं नियमतो हस्तं मात्रकं वा प्रक्षालयति । ततो द्वितीयादिषु समेषु भङ्गेषुपश्चात्कर्मसम्भवान्न कल्पते, प्रथमादिषु तु भङ्गेषु तदसम्भवात् कल्पते ग्रहीतुमिति । यदि चैतेष्वपि यद् 'अलेपकृतं' सक्तु-मण्डकादि यच्च 'शुष्कं' सप्रसङ्गं पुरःकर्मद्वारम् ।

अथ ग्लान्यद्वारं बिभावयिषुराह-

[भा.१८७०] सग्गामे सउवसए, सग्गामे परउवस्सए चेव ।
खेत्तंतो अन्नगामे, खेत्तबहि सगच्छ परगच्छे ।।

[भा.१८७१] सोऊण ऊ गिलाणं, उम्मग्गं गच्छ पडिवहं वा वि ।
मग्गाओ वा मग्गं, संकमई आणमाईणि ।।

वृ-स्वग्रामे स्वोपाश्रये तिष्ठता श्रुतम्, यथा-अमुकत्र ग्लान इति, स्वग्रामे वा परेषां-साधूनामुपाश्रये

Jain Education International For Private & Personal Use Only www.jainelibrary.org

कुतोऽपि प्रयोजनादायातेन, यद्वा 'क्षेत्रान्तः' क्षेत्राभ्यन्तरे अन्यग्रामे भिक्षाचर्यां गतेन, यदि वा क्षेत्रबहिरन्यग्रामे पथि वा वर्त्तमनेन एतेषु स्थानेषु स्वगच्छे वा परच्छे वा ग्लानः श्रुतो भवेत्, श्रुत्वा च ग्लानं यः 'उन्मार्गम्' अटवीगामिनं पन्थानं 'प्रतिपथं वा' येन पथा आयातस्तमेव पन्थानं गच्छति 'मार्गाद्वा' विवक्षितपथादन्यमार्गं सङ्क्रामति स प्राप्नोति आज्ञादीनि दोषपदानि, आदिशब्दादनवस्था-मिथ्यात्व-विराधनापरिग्रहः। एवंकुर्वाणस्य चास्य यद् ग्लानोऽप्रतिजागरितः परितापनादिकं प्राप्नोति तन्निष्पन्नं प्रायश्चित्तम् ।। अत एवाह-

[भा.१८७२] सोऊण ऊ गिलाणं, पंथे गामे य भिक्खवेलाए।
जइ तुरियं नागच्छइ, लग्गइ गरुए य चउमासे ।।

वृ-श्रुत्वा ग्लानं पथि वा गच्छन् ग्रामे वा प्रविष्टो भिक्षायां वा पर्यटन् यदि 'त्वरितं' तत्क्षणादेव नागच्छति ततः 'लगति' प्राप्नोति स चतुरो मासान् गुरुकान् ।। यत एवमतः-

[भा.१८७३] जह भमर-महुयरिगणा, निवतंती कुसुमियम्मि चूयवणे।
इय होइ निवइअव्वं, गेलन्ने कइयवजढेणं ।।

वृ- यथा भ्रम-मधुकरीगणाः 'कुसुमिते' मुकुरिते 'चूतवने' सहकारवनखण्डे मकरन्दपानलोलुपतया निपतन्ति 'इति' अमुनैव प्रकारेण भगवदाज्ञामनुवर्त्तमानेन कर्मनिर्जरालाभलिप्सया ग्लान्ये समुत्पन्ने 'कैतवजढेन' मायाविप्रमुक्तेन त्वरितं 'निपतितव्यम्' आगन्तव्यं भवति। एवंकुर्वता साधर्मिकवात्सल्यं कृतं भवति, आत्मा च निर्जराद्वारे नियोजितो भवति ।।

तस्य च ग्लानत्वस्य प्रतिबद्धामिमां द्वारगाथामाह-

[भा.१८७४] सुद्धे सङ्की इच्छकारे, असत्त सुहिय ओमाण लुद्धे य।
अनुअत्तणा गिलाणे, चालन संकामणा तत्तो ।।

वृ-प्रथमतः शुद्ध इति द्वारं वक्तव्यम्। ततः 'श्रद्धी' श्रद्धावानिति द्वारम्, तत इच्छाकारद्वारम्, तदनन्तरमशक्तद्वारम्, ततः सुखितद्वारम्, तदनु अपमानद्वारम्, ततोऽपि लुब्धद्वारम्, ततोऽनुवर्त्तना ग्लानस्य उपलक्षणत्वाद् वैद्यस्य च वक्तव्या, ततश्चालना सङ्क्रामणा च ग्लानस्याभिधातव्येति द्वारगाथासमुदायार्थः ।।

अथावयवार्थं प्रतिद्वारं प्रचिकटयिषुः "यथोद्देशं निर्देशः" इति वचनात् प्रथमतः शुद्धद्वारं भावयति-

[भा.१८७५] सोऊण ऊ गिलाणं, जो उवयारेण आगओ सुद्धो।
जो उ उवेहं कुज्जा, लग्गइ गुरुए सवित्थारे ।।

वृ-श्रुत्वा ग्लानं 'यः' साधुः 'उपचारेण' वक्ष्यमाणलक्षणेन ग्लानसमीपमागतः सः 'शुद्धः' न प्रायश्चित्तभाक्। यस्तूपेक्षां कुर्यात् सः 'लगति' प्राप्नोति चतुरो गुरुकान् 'सविस्तरान्' ग्लानारोपणासंयुक्तान् ।। उपचारपदं व्याचष्टे-

[भा.१८७६] उवचरइ को णऽतिन्नो, अहवा उवचारमित्तगं एइ।
उवचरइ व कज्जत्थी, पच्छित्तं वा विसोहेइ ।।

वृ- यत्र ग्लानो वर्त्तते तत्र गत्वा पृच्छति-"को णऽतिन्नो"त्ति द्वितीयार्थे प्रथमा, 'नुः' इति प्रश्ने, युष्माकं मध्ये 'अतिन्नं' ग्लानं 'क उपचरति?' कः प्रतिजागर्त्ति?; यद्वा धातूनामनेकार्थत्वाद्

Jain Education International For Private & Personal Use Only www.jainelibrary.org

'उपचरति' पृच्छति-को नु युष्माकं मध्ये "अतित्रो ?" ग्लानो येनाहं तं प्रतिजागर्मि ? । अथवा 'उपचारमात्रं' लोकोपचारमेव केवलमनुवर्त्तयितुं ग्लानसमीपम् 'एति' आगच्छति । यदि वा कार्यार्थी सन्नुपचरति । किमुक्तं भवति ?-कार्यं किमपि ज्ञान-दर्शनादिकं तत्समीपादीहमानः प्रतिजागर्ति । 'प्रायश्चित्तं वा मे भविष्यति यदि न गमिष्यामि' इति विचिन्त्यागत्य च प्रायश्चित्तं विशोधयति । एष सर्वोऽप्युपचारो द्रष्टव्यः ॥

अथ श्रद्धावानिति द्वारमाह-

[भा.१८७७] सोऊण ऊ गिलाणं, तूरंतो आगओ दवदवस्स ।
संदिसह किं करेमी, कम्मि व अट्ठे निउज्जामि ॥

[भा.१८७८] पडिचरिहामि गिलाणं, गेलन्ने वावडाण वा काहं ।
तित्थानुसज्जणा खलु, भत्ती य कया हवइ एवं ॥

वृ- 'ग्लानं प्रतिजाग्रदहं महतीं निर्जरामासादयिष्यामि' इत्येवंविधया धर्मश्रद्धया युक्तः श्रद्धावानुच्यते । स च श्रुत्वा ग्लानं 'त्वरमाणः' श्रवणानन्तरं शेषकार्याणि विहाय पन्थानं प्रतिपन्नः सन् "दवदवस्स" त्ति द्रुतं द्रुतं गच्छन् झगिति ग्लानसमीपमागतस्ततो ग्लानप्रतिचारकानाचार्यान् वा गत्वा भणति-सन्दिशत भगवन्तः ! किं करोम्यहं ? कस्मिन् वा 'अर्थे' ग्लानसम्बन्धिनि प्रयोजने युष्माभिरहं नियोज्ये ? , अहं तावदनेनाभिप्रायेणायातः, यथा-प्रतिजागरिष्यामि ग्लानं ग्लानवैयावृत्त्ये वा व्यापृता ये साधवस्तेषां भक्त-पानप्रदान-विश्रामणादिना वैयावृत्त्यं करिष्यामि। एवंकुर्वता तीर्थस्यानुसजना-अनुवर्त्तना कृता भवति, भक्तिश्च भगवतां तीर्थकृतां कृता भवति, "जे गिलाणं पडियरइ से ममं णाणेणं दंसणेणं चरित्तेणं पडिवज्जइ" इत्यादिभगवदाज्ञाऽऽराधनात्। इत्थं तेनोक्ते यदि ते स्वयमेव ग्लानवैयावृत्त्यं कर्तुं प्रभवन्ति ततो ब्रुवते-आर्य ! व्रजतु यथास्थानं भवान्, वयं ग्लानस्य सकलमपि वैयावृत्त्यं कुर्वाणाः स्म इति ॥

अथ ते न प्रभवन्ति यदि वाऽसावेवंविधगुणोपेतो वर्त्तते-

[भा.१८७९] संजोगदिट्ठाढी, तेनुवलद्धा व दव्वसंजोगा ।
सत्थं व तेणऽधीय, वेज्जोवा सो पुरा आसि ॥

वृ- संयोगाः-औषधद्रव्यमीलनप्रयोगास्तद्विषयो दृष्टः पाठः-चिकित्साशास्त्वायवविशेषो येन स संयोगदृष्टपाठः, आर्षत्वाद् गाथायामिनप्रत्ययः, यदि वा तेन द्रव्यसंयोगाः कुतोऽपि सातिशयज्ञानविशेषादुपलब्धाः, 'शास्त्रं वा' चरक-सुश्रुतादिकं सकलमपि तेनाधीतम्, वैद्यो वा सः 'पुरा' पूर्वं गृहाश्रम आसीत्, ततो न विसर्जनीयः ॥

[भा.१८८०] अत्थि य से योगवाही, गेलन्नतिगिच्छणाए सो कुसलो ।
सीसे वावारेत्ता, तेगिच्छं तेण कायव्वं ॥

वृ- यदि 'तस्य' आधन्तुकस्य गच्छे योगवाहिनः सन्ति, स च स्वयं ग्लान्यचिकित्सायां कुशलः, ततः शिष्यान् सूत्रार्थपौरुषीप्रदानादौ व्यापार्य स्वयं तेन ग्लानस्य 'चैकित्स्यं' चिकित्साकर्म कर्त्तव्यम् । उपलक्षणमिदम्, तेन कुल-गण-सङ्घप्रयोजनेषु गुरुकार्यप्रेषणे वस्त्र-पात्राद्युत्पादने वा यो यत्र योग्यस्तं तत्र व्यापार्य सर्वप्रयत्नेन स्वयं ग्लानस्य चिकित्साकर्म कर्त्तव्यम् ॥

सूत्रार्थपौरुषीव्यापारणे विधिमाह-

Jain Education International For Private & Personal Use Only www.jainelibrary.org

[भा.१८८१] दाऊणं वा गच्छइ, सीसेण व वायएहि वा वाए।
तत्थऽन्नत्थ व काले, सोहिए सव्वुद्दिसइ हट्ठे ।।

वृ- सूत्रार्थपौरुष्यौ दत्त्वा ग्लानस्य समीपं गच्छति, गत्वा च चिकित्सां करोति। अथ दूरे ग्लानस्य प्रतिश्रयस्ततः सूत्रपौरुषीं दत्त्वा अर्थपौरुषीं शिष्येण दापयति। अथ दवीयान् स प्रतिश्रयस्ततो द्वे अपि पौरुष्यौ शिष्येण दापयति। अथात्मीयः शिष्यो वाचनां दातुमशक्तस्ततो येषां वाचकानाम्-आचार्याणां स ग्लानस्तैः सूत्रमर्थं वा स्वशिष्यान् वाचयति। अथ तेषामपि नास्ति वाचनाप्रदाने शक्तिस्ततो यदि तेऽनागाढयोगवाहिनस्तदा तेषां योगो निक्षिप्यते। अथागाढयोगवाहिनस्ततोऽयं विधि- "तत्थऽन्नत्थ व" इत्यादि। यत्र क्षेत्रे स ग्लानस्तत्रान्यत्र वा क्षेत्रे स्थितास्ते आगाढयोगवाहिन आचार्येण वक्तव्याः, यथा-आर्या! कालं शोधयत। ततस्तैर्यथावत् कालग्रहणं कृत्वा यावतो दिवसान् कालः शोधितस्तावतां दिवसानामुद्देशनकालान् सर्वानप्याचार्यो ग्लाने 'हृष्टे' प्रगुणीभूते सति एकदिवसेनैवोद्दिशति, यावन्ति पुनर्दिनानि कालग्रहणे प्रमादः कृतो गृह्यमाणे वा कालो न शुद्धः तेषामुद्देशनकाला न उद्दिश्यन्ते ।।

तत्र क्षेत्रे संस्तरणाभावेऽन्यत्र गच्छतां विधिमाह-

[भा.१८८२] निग्गमणे चउभंगो, अद्धा सव्वे वि निंति दोण्हं पि।
भिक्ख-वसहीइ असती, तस्सानुमए ठविज्ञा उ ।।

वृ- ततः क्षेत्राद् निर्गमने चतुर्भङ्गी भवति। गाथायां पुंस्त्वनिर्देशः प्राकृतत्वात्। वास्तव्याः संस्तरन्ति नागन्तुकाः १ आगन्तुकाः संस्तरन्ति न वास्तव्याः २ न वास्तव्या न चागन्तुकाः संस्तरन्ति ३ वास्तव्या अप्यागन्तुका अपि संस्तरन्ति ४। तत्र यत्र द्वयेऽपि संस्तरन्ति तत्र विधि प्रागेवोक्तः। यत्र तु न संस्तरन्ति तत्रायं विधि-प्रथमभङ्गे आगन्तुकानां द्वितीयभङ्गे वास्तव्यानामर्द्धे वा यावन्तोवा न संस्तरन्ति तावन्तो निर्गच्छन्ति, तृतीयभङ्गे द्वयोरपि वर्गयोरर्द्धाः सर्वे वा ग्लानं सप्रतिचरं मुक्त्वा निर्गच्छन्ति। एवं भिक्षाया वसतेश्च 'असति' अभावे निर्गमनं द्रष्टव्यम। के पुनस्तत्र ग्लानसन्निधौ स्थापनीयाः ? इत्याह-'तस्य' ग्लानस्य ये 'अनुमताः' अभिप्रेतास्तान् प्रतिचरकान् ग्लानस्य समीपे स्थापयेत् ।।

गतं श्रद्धावानिति द्वारम्। अथेच्छाकारद्वारमाह-

[भा.१८८३] अभणितो कोइ न इच्छइ, पत्ते थेरेहि होउवालंभो।
दिट्ठंतो महिड्ढीए, सवित्थरारोवणं कुज्ञा ।।

[भा.१८८४] बहुसो पुच्छिज्ञंता, इच्छाकारं न ते मम करिंति।
पडिमुंडणा य दुक्खं, दुक्खं च सलाहिउं अप्पा ।।

वृ- कोऽपि साधुर्वैयावृत्त्यकुशलः, परमन्येन 'अभणितः' 'आर्य! एहि इच्छाकारेण ग्लानस्य वैयावृत्त्यं कुरु' इत्यनुक्तः सन् नेच्छति वैयावृत्यं कर्त्तुम्, स च श्रुत्वाऽपि ग्लानं न तस्य समीपं गतः। कुल-गण-सङ्घस्थविराश्च ये कारणभूताः पुरुषाः 'कुत्र सामाचार्यसीदन्ति? कुत्र चोत्सर्पन्ति?' इति प्रतिचरणाय गच्छान्तरेषु पर्यटन्ति ते तत्र प्राप्ताः, तैश्च स पृष्टः-आर्य! उत्सर्पन्ति ते ज्ञान-दर्शन-चारित्राणि? सन्ति वा केचित् प्रत्यासन्नपरिसरे साधवो ग्लानो वा कुत्रापि भवता श्रुतः? इति। स प्राह-इतः प्रत्यासन्न एळग्रामे सन्ति साधवः, तेषां चास्त्येको ग्लान इति। ततस्तैस्तस्योपालम्भः

Jain Education International For Private & Personal Use Only www.jainelibrary.org

प्रदत्तः-यदि तेषां ग्लानो वर्तते ततस्त्वं त्य प्रतिचरणाय किं न गतः ? । स प्राह-'बहुशः' भूयो भूयः पृच्छयमाना अपि ते साधवः कदापि ममेच्छाकारं न कुर्वन्ति, अन्यच्च अहमनभ्यर्थितस्तत्र गतः, तैश्च प्रतिमुण्डितः-निषिद्धः, यथा-पूर्णं भवता वैयावृत्त्यकरणेति, एवं प्रतिमुण्डनया महद् मानसं दुःखमुत्पद्यते, 'यादृशं चाहं ग्लानस्य वैयावृत्त्यं करोमि ईदृशमन्यः कोऽपि न वेत्ति' एवमात्मानं श्लाघितुं 'दुःखं' दुष्करं भवति, अतः कथमनभ्यर्थितस्तत्र गच्छामि ? इति ।

ततः स्थविरैस्तस्य पुरतो महर्द्धिको राजा तस्य दृष्टान्तः कृतः । यथा-एगो राया कत्तियपुन्निमाए मरुयाणं दाणं देइ । एगो मरुगो चोद्दसविज्जाठाणपारगो भोइयाए भणिओ-तुमं सव्वमरुगाहिवो, वच्च रायसमीवं, उत्तमं तेदानंदाहिइ त्ति । सो मरुओ भणाइ-एगं ताव रायकिव्विसं गिण्हामि, बिइयं अमिमंतिओ गच्छामि, जइ से पिति-पितामहस्स अनुग्गहेण पओअणं तो मं आगंतुं तत्थ नेहिइ, इह ठियस्स वा मे दाहिइ । भोइयाए भणिओ-तस्स अत्थि बहू मरुगा तुज्झ सरिच्छा अनुग्गहकारिणो, जइ अप्पणो तद्दविणेण कज्जं तो गच्छ । जहा सो मरुओ अब्भत्थणं मग्गंतो इहलोइयाणं कामभोगाणं अनाभागी जाओ, एवं तुमं पि अब्भत्थणं मग्गंतो निज्जरालाहस्स अनाभागी भविस्ससि ॥ इत्थमुपलभ्य चतुर्गुरुकारोपणां 'सविस्तरां' परितापमादिप्रायश्चित्तविस्तरयुक्तां तस्य प्रयच्छन्ति ॥

गतमिच्छाकारद्वारम् । अथाशक्तद्वारमाह-

[भा.१८८५] किं काहामि वराओ, अहं खु ओमाणकारओ होहं ।
एवं तत्थ भणंते, चाउम्मासा भवे गुरुगा ॥

वृ- कोऽपि साधुः कुल-गण-सङ्घस्थविरैस्तथैव पृष्टः प्राह-क्षमाश्रमणाः ! लोके यः सर्वथा अशक्तः-पङ्गुप्रायः स वराक उच्यते, सोऽहं वराकस्तादृशस्तत्र गतः किं करिष्यामि ? नवरमहं तत्र प्राप्तोऽवमानकारको भविष्यामि । एवं तत्र स्थविराणां पुरतो भणतस्तस्य चतुर्मासा गुरवो भवन्ति ॥ स च स्थविरैरित्थमभिधातव्यः-

[भा.१८८६] उव्वत्त-खेल-संथार-जग्गणे पीस-भाणधरणे य ।
तस्स पडिजग्गयाण व, पडिलेहेउं पि सि असत्तो ॥

वृ-आर्य ! किं ग्लानस्योद्वर्त्तनमपि कर्तुं न शक्नोषि ? एवं खेलमल्लकस्य भस्मना भरणं भस्मपरिष्ठापनं वा संस्तारकस्य रचनं जागरणं-रात्रौ प्रहरकप्रदानं पेषणम्-औषधीनां चूर्णनं माणधरमं-सपान-भोजनभाजनानां धारणं 'तस्य' ग्लानस्यप्रतिजागरकाणां वा साधूनामुपधिमपि प्रत्युपेक्षितुमशक्तः ? येनेदं ब्रवीषि-किं करिष्यामि वराकोऽहम् ? इति ॥

अथ सुखितद्वारमाह-

[भा.१८८७] सहिया मो त्ति य भणती, अच्छह वीसत्थया सुहं सव्वे ।
एवं तत्थ भणंते, पायच्छित्तं भवे तिविहं ॥

वृ- एकत्र क्षेत्रे मासकल्पस्थितैः साधुभिः, श्रुतम्-अमुकत्र ग्लान इति । तत्र केऽपि साधवो भणन्ति-ग्लानं प्रतिजागरका व्रजामो वयम् । इतरः कोऽपि भणति-सुखितानास्मान् दुःखितान् कुरुत, यूयमपि सर्वे 'विश्स्ताः' निरुद्विग्नाः 'सुखं' सुखेन तिष्ठत किं तत्र गत्वा मुधैव दुःखस्यात्मानं प्रयच्छामः ? किं युष्माकमयं श्लोको न कर्णकोटरमुपागमत् ? । यथा-

Jain Education International For Private & Personal Use Only www.jainelibrary.org

सर्वस्य सर्वकार, स्वार्थविघाती परस्य हितकारी ।
सर्वस्य च विश्वासी, मूर्खो यो नाम विज्ञेयः ।।

एवं तत्रतस्य भणतस्त्रिविधं प्रायश्चित्तं भवति । तद्यथा-यद्याचार्य एवं ब्रवीति ततश्चतुर्गुरु, उपाध्यायो ब्रवीति चतुर्लघु, भिक्षुर्ब्रवीति मासगुरु ।। अथापमानद्वारमाह-

[भा.१८८८] भत्तादिसंकिलेसो, अवस्स अम्हे वि तत्थ न तरामो ।
काहिंति केत्तियाणं, तेणं चिय तेसु अद्दन्ना ।।

वृ- तथैव ग्लानं श्रुत्वा केचिद् भणन्ति-व्रजामो ग्लानप्रतिजागरणार्थम् । अपरे ब्रुवते-तत्राऽन्येऽपि ग्लानं श्रुत्वा बहवः प्रतिचारकाः समाया भविष्यन्ति ततो महान् भक्त-पानादिसंक्लेशो भविता, 'अवश्यम्' असन्दिग्धं वयमपि तत्र गताः 'न तरामः' न निर्वहामः, ग्लान प्रतिचारणार्थमागतानां कियतां वा ते वास्तव्या विश्रामणादि प्राघूर्णककर्म करिष्यन्ति ? यतः ते 'तेनैव' ग्लानेन 'तेषु' कार्येषु 'अद्दन्नाः' आकुलीभूताः ।।

[भा.१८८९] अम्हेहि तहि गएहिं, ओमाणं उग्गमाइणो दोसा ।
एवं तत्थ भणंते, चाउम्मासा भवे गुरुगा ।।

वृ- तथा- अस्माभिरपि तत्र गतैर्नियमाद् 'अवमानम्' अवमम् 'उद्गमदोषाश्च' आधाकर्म-मिश्रजातप्रभृतयः आदिशब्दादेषणादोषाश्च भविष्यन्ति । एवं तत्र तेषां भणतां चत्वारो मासा गुरुका भवेयुः ।।

अथ लुब्धद्वारमाह-

[भा.१८९०] अम्हे मो निज्जरट्ठी, अच्छह तुब्भे वयं से काहामो ।
अत्थि य अभाविया णे, ते वि य नाहिंति काऊण ।।

वृ- मासकल्पस्थितैः साधुभिः श्रुत, यथा-अमुकत्र ग्रामे ग्लानः सञ्जातोऽस्ति । तच्च क्षेत्रं वसति-पानक-गोरसादिभि सर्वैरपि गुणैरुपेतम्, ततस्ते लोभाभिभूतचेतसश्चिन्तयन्ति-'ग्लानमिषमन्तरेण न शक्यते क्षेत्रमिदं प्रेरयितुम्, अतो गच्छामो वयम्' इति चिन्तयित्वा तत्र गत्वा भणन्ति-वयं 'निर्जरार्थिनः' ग्लानवैयावृतत्यकरणेन कर्मक्षयमभिलषमाणा इहायाताः स्मः, अतो यूयं तिष्ठथ वयं "से" तस्य ग्लानस्य वैयावृत्यं करिष्यामः, सन्ति चास्माकमभाविताः शैक्षास्तेऽपि चास्मान् वैयावृत्त्यं कुर्वतो दृष्ट्वा ज्ञास्यन्ति ।।

[भा.१८९१] एवं गिलाणलक्खेण संठिया पाहुण त्ति उक्कोसं ।
मग्गंता चमढिंती, तेसिं चारोवणा चउहा ।।

वृ- एवं ग्लानसम्बन्धि यद् लक्ष्यं-मिषं तेन तत्र संस्थिताः सन्तः प्राघूर्णका इति कृत्वा लोकाद् 'उत्कृष्टं' स्निग्ध-मधुरद्रव्यं लभन्ते, अथ न स्वयं लोकः प्रयच्छति ततः 'मार्गयन्तः' 'प्राघूर्णका वयम्' इति मिषेमावभाषमाणास्तत् क्षेत्रं चमढयन्ति, चमढिते च क्षेत्रे ग्लानप्रायोग्यं न लभ्यते ततस्तेषामियं चतुर्विधाऽऽरोपणा कर्त्तव्या । तद्यथा-द्रव्यतः क्षेत्रतः कालतो भावतश्च ।।

तत्र द्रव्यतस्तावदाह-

[भा.१८९२] फासुगमफासुगेवा, अचित्त चित्ते परित्तऽनंते य ।
असिनेह-सिनेहकए, अनहारा-ऽऽहार लहु-गुरुगा ।।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

वृ- क्षेत्रोद्वेजनादोषेण ग्लानप्रायोग्यमलभमाना यदि प्राशुकमवभाषन्ते परिवासयन्ति वा ततश्चत्वारो लघुकाः। अथाप्राशुकमवभाषन्ते परिवासयन्ति वा ततश्चत्वारो गुरुकाः। इह च प्राशुकमेषणीयम् अप्राशुकमनेषणीयम्। आह च निशीथचूर्णिकृत्- इह फासुगं एसणिज्जं ति। अचित्ते अवभाष्यमाणे परिवास्यमाने वा चतुर्लघु। सचित्ते चतुर्गुरु। एवं परीत्ते चतुर्लघु। अनन्ते चतुर्गुरु। अस्नेहे चतुर्लघु। सस्नेहे चतुर्गुरु। अनाहारे चतुर्लघु। आहारे चतुर्गुरु॥

उक्तं द्रव्यनिष्पन्नं प्रायश्चित्तम्। अथ क्षेत्रनिष्पन्नमाह-

[भा.१८९३] लुद्धस्सऽब्भंतरतो, चाउम्मासा हवंति उग्घाता।
बहिया य अनुग्घाया, दव्वालंभे पसज्जणया॥

वृ-उत्कृष्टद्रव्यलोभेन क्षेत्रमुद्वेजयतो लुब्धस्य क्षेत्राभ्यन्तरतो ग्लानप्रायोग्येऽलभ्यमाने चत्वारो मासा उद्घाताः। क्षेत्रसय बहिरलभ्यमाने त एव चत्वारो मासाः 'अनुद्घाताः' गुरवः। अत्र च ग्लानप्रायोग्यस्य द्रव्यस्यालाभे 'प्रसजना' प्रायश्चित्तस्य वृद्धि प्राप्नोति॥ कथम्? इत्याह-

[भा.१८९४] खेत्तबहि अद्धजोअण, वुड्डी दुगुणेण जाव बत्तीसा।
चउगुरुगादी चरिमं, खेत्ते काले इमं होइ॥

वृ- क्षेत्राद् बहिरर्द्धयोजनं गत्वा ततो यदि ग्लानप्रायोग्यं द्रव्यमानयति तदा चतुर्गुरव एव। योजनादानयति षड् लघवः। योजनद्वयादानयति षड् गुरवः। योजनचतुष्टयादानयति च्छेदः। योजनाष्टकादानयति मूलम्। योजनषोडशकादानयति अनवस्थाप्यम्। द्वात्रिंशद् योजनानि गत्वा ग्लानप्रायोग्यमानयति पाराञ्चिकम्। अत एवाह-क्षेत्रबहिरर्द्धयोजनादारभ्य द्विगुणेन परिमाणेन क्षेत्रस्य वद्धिस्तावत् कर्त्तव्या यावद् द्वात्रिंशद् योजनानि। एषु च चतुर्गुरुकादिकं 'चरमं' पाराञ्चिकं यावत् प्रायश्चित्तम्। इत्थं क्षेत्रविषयं प्रायश्चित्तमुक्तम्। 'काले' कालविषयम् 'इदं' वक्ष्यमाणं भवति॥

तत्र तावत् प्रकारान्तरेण क्षेत्रनिष्पन्नमेवाह-

[भा.१८९५]अंतो बहिं न लब्भइ, ठवणा फासुग महय मुच्छ किच्छ कालगए।
चत्तारि छ च्च लहु-गुरु, छेदो मूलं तह दुगं च॥

वृ-क्षेत्रस्यान्तर्वा बहिर्वा ग्लानप्रायोग्यं न लभ्यत इति कृत्वा प्राशुकस्य 'स्थापनां' परिवासनां करोति चतुर्लघु। तेन परिवासितेन भक्तेन ग्लानो यद्यनागाढं परिताप्यते ततश्चतुर्गुरुकम्। महतीं दुःखासिकामाप्नोति षड्लघु। मूर्च्छामूर्च्छे षड्गुरु। कृच्छ्रप्राणे च्छेदः। कृच्छोच्छ्वासे मूलम्। समवहते-मारणान्तिकसमुद्धातं कुर्वाणे ग्लानेऽनवस्थाप्यम्। कालगते पाराञ्चिकम्॥

अथ कालनिष्पन्नमाह-

[भा.१८९६] पढमं राइ ठविंते, गुरुगा बिइयादिसत्तिहिं चरिमं।
परितावणाइ भावे, अप्पत्तिय-कूवणाईया॥

वृ-प्रथमां रात्रिं परिवासयतश्चतुर्गुरुकाः। द्वितीयां रात्रिमादौ कृत्वा सप्तभी रात्रिभिश्चरमम्। तद्यथा-द्वितीयां रजनीं परिवासयति षड् लघवः, तृतीयस्यां षड् गुरवः, चतुर्थ्यां छेदः, पञ्चम्यां मूलम्, षष्ठयामनवस्थाप्यम्, सप्तम्यां पाराञ्चिकम्। अथ भावनिष्पन्नमाह-"परितावणाइ" इत्यादि पश्चार्द्धम्। परितापनादि भावनिष्पन्नं मन्तव्यम्। तथा स परितापितः सन्नप्रीतिकं करोति चतुर्लघु,

Jain Education International For Private & Personal Use Only www.jainelibrary.org

कूजनं-सशब्दाक्रन्दनम्, आदिग्रहणाद् 'अनाथोऽहम्, न किमप्यमी मह्यं प्रयच्छन्ति' इत्येवमुड्डाहं कुर्यात् ततश्चतुर्गुरुकम् ॥

अथपरितापनादिपदं व्याख्यानयति-

[भा.१८९७] अंतो बहिं न लब्भइ, परितावण महय मुच्छ किच्छ कालगए ।
चत्तारि छ च्च लहु-गुरु, छेदो मूलं तह दुग च ॥

वृ- क्षेत्रस्यान्तर्बहिर्वा न लभ्यते इति कृत्वा ग्लानस्यानागाढा परितापना भवति चतुर्लघु । आगाढपरितापनायां चतुर्गुरु । दुःखादुःखे षड्लघु । मूर्च्छामूर्च्छे षड्गुरु । कृच्छ्रप्राणे च्छेदः । कृच्छ्रोच्छ्वासे मूलम् । समवहते अनवस्थाप्यम् । कालगते पाराञ्चिकम् ॥ एवंतावदाहारविषय-मुक्तम् । अथोपधिविषयमभिधीयते-

[भा.१८९८] अंतो बहिं न लब्भइ, संथारग महय मुच्छ किच्छ कालगए ।
चत्तारि छ च्च लहु-गुरु, छेदो मूलं तह दुगं च ॥

वृ- अतिचमढिते क्षेत्रेऽन्तर्वा बहिर्वा संस्तारको न लभ्यते ततो ग्लानस्यानागाढपरितापनादिषु चतुर्लघुकादिकंतथैव प्रायश्चित्तं द्रष्टव्यम् ॥ अत्रपरितापनापदं समुद्घातपदं च गाथायां साक्षान्नोक्तम्, अतो मा भूद् मुग्धमतिविनेयवर्गस्य व्यामोह इति कृत्वा साक्षात् तदभिधानार्थमिमां गाथामाह-

[भा.१८९९] परिताव महादुक्खे,मुच्छामुच्छे य किच्छपानगते ।
किच्छुस्सासे य तहा, समुघाए चेव कालगते ॥

वृ- गतार्था ॥ उक्तं लुब्धद्वारम् । अथानुवर्त्तनाद्वारमाह-

[भा.१९००] अनुयत्तमा गिलाणे, दव्वट्ठा खलु तहेव विज्जट्ठा ।
असतीइ अन्नओ वा, आनेउं दोहि वी कुज्जा ॥

वृ- ग्लानप्रायोग्यं यद् भक्त-पानादिकं द्रव्यं स एवार्थ-प्रयोजनं द्रव्यार्थस्तमुत्पाद-यद्भिर्ग्लानस्यानुवर्त्तना कर्त्तव्या । ''तहेव विज्जट्ठे''ति तथैव वैद्यस्यार्थमुत्पादयद्भिर्ग्लानस्यानुवर्त्तना विधेया । यदि स्वग्रामे द्रव्य-वैद्ययोरभावस्ततोऽन्यग्रामादपि द्रव्य-वैद्यावानीय द्वाभ्यामप्यनुवर्त्तनां कुर्यात् ॥

अथैनामेव गाथां व्याचिरव्यासुराह-

[भा.१९०१] जायंते उ अपत्थं, भणंति जायामो तं न लब्भइ णे ।
विनियट्टणा अकाले, जा वेल न बेंति उ न देमो ॥

वृ- ग्लानो यद्यपथ्यं द्रव्यंयाचते ततः साधवो भणन्ति-यवं याचामः परं किं कुर्महि ? तद् भवतामभिप्रेतं भूयोभूयः पर्यटद्भिरि न लभ्यते ''ने'' अस्माभि; इत्थं भणद्भिर्ग्लानोऽनुवर्त्तितो भवति । यद्वा ग्लानस्याग्रतः पात्रकाण्युद्राह्य प्रतिश्रयान्निर्गत्यापान्तरालपथाद् 'विनिवर्त्तनां' प्रत्यागमनं कुर्वन्ति, तस्य पुरतश्चेत्थं ब्रुवते-वयं गता अभूम परं न लब्धम्; अकाले वा गत्वा याचन्ते येन न लभ्यते । अकाले च याचमानं ग्लानं ब्रुवते-यावद् वेला भवति तावत् प्रतीक्षस्व, ततो वयमानीय् दास्याम इति, न पुनर्ब्रुवते-दद्मो वयमिति ॥

अथ क्षेत्रतो ग्लानस्यानुवर्त्तनामाह-

[भा.१९०२] तत्थेव अन्नगामे, वुत्थंतरऽसंथरंत जयणाए ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

असंथरनेसणमादी, छन्नं कडजोगि गीयत्थे ॥

वृ- प्रथमतस्तत्रैव ग्रामे ग्लानप्रायोग्यमन्वेषणीयम्। तत्र यदि न लभ्यते तदाऽन्यग्रामेऽपि। अथासावन्यग्रामो दूरतरस्ततः ''वुत्थंतर''त्ति 'अन्तरा' अपान्तरालग्रामे उषित्वा द्वितीये दिने आवयन्ति। अथैवमप्यसंस्तरणं भवति ततः ''संथरंत जयणाए''त्ति अकारप्रश्लेषादसंस्तरतो-ग्लानस्यार्थाय 'यतनया' पञ्चकपरिहाण्या गृह्णन्ति। अथ ग्लानार्थं व्यापृतानां प्रतिचरकाणामसंस्तरणं ततः ''एसमाइ''त्ति एषणादोषेषु आदिशब्दाद् उद्गमादिदोषेषु च पञ्चकपरिहाण्या यतितव्यम्। अथ प्रतिदिवसं ग्लानप्रायोग्यं न लभ्यते ततः 'छन्नम्' अप्रकटं कृतयोगी गीतार्थो वा तत्प्रायोग्यं द्रव्यं परिवासयति। इह आकर्णितच्छेदश्रुतार्थ प्रत्युच्चारणाऽसमर्थ कृतयोगी। यस्तु च्छेदश्रुतार्थं श्रुत्वा प्रत्युच्चरयितुमीशः स गीतार्थ उच्यते। एष द्वारगाथासमासार्थः ॥

अथैनामेव विवरीषुराह-

[भा.१९०३] पडिलेह पोरुसीओ, वि अकाउं मग्गणा उ सग्गामे।
खित्तंतो तद्दिवसं, असइ विणासे व तत्थ वसे ॥

वृ- अपिशब्दः सम्भावनायाम्। यदि सुलभं द्रव्यं ततः प्रत्युपेक्षणां सूत्रार्थपौरुष्यौ च कृत्वा स्वग्रामेऽनवभाषितस्य मार्गणा कर्त्तव्या। अथैवं न लभ्यते ततोऽर्थपौरुषीं हापयित्वा, यद्येवमपि न लभ्यते ततः सूत्रपौरुषीं परिहाप्योत्पादनीयम्। अथ तथापि न लभ्यते दुर्लभं वा तद् द्रव्यं ततः प्रत्युपेक्षणां द्वे अपि च पौरुष्यौ अकृत्वा स्वग्रामेऽनवभाषितं मार्गयन्ति। अथ स्वग्रामेऽनवभाषितं न लभ्यते ततः 'क्षेत्रान्तः' सक्रोशयोजनक्षेत्राभ्यन्तरे परग्रामे पौरुषीद्वयमपि कृत्वा अनवभाषित-मुत्पादयन्ति, अत्राप्यर्थपौरुष्यादिहापना तथैव द्रष्टव्या। अथ तत्राप्यनवभाषितं न लभ्यते ततः स्वक्षेत्रे स्वग्राम-परग्रामयोरवभाषितमुत्पाद्य तद्दिवसमानयन्ति। अथ स्वक्षेत्रे तद्दिवसं न प्राप्यते ततः परक्षेत्रादपि तद्दिवसमानेतव्यम्। अथ क्षेत्रबहिर्वर्त्तिनो यतो ग्रामादेरानीयते तद् न प्रत्यासन्नं किन्तु दूरतरं न तद्दिवसं गत्वा ततः प्रत्यायातुं शक्यते, विनाशि वा तद् द्रव्यं दुग्धादिकम्; ततः प्रत्यासन्नग्रामस्यासति विनाशिनिवा द्रव्ये ग्रहीतव्ये अपराह्णे गत्वा तत्र रात्रौ वसेत्, उषित्वा च सूर्योदयवेलायां गृहीत्वा द्वितीये दिने तत्रानयन्ति। अथ दवीयस्तरं तत् क्षेत्रमविनाशि द्रव्यं च ग्रहीतव्यम् ततोऽपान्तरालग्रामे रजन्यामुषिताः सूर्योदये तत्रगत्वा तद् द्रव्यं गृहीत्वा भूयः समागच्छन्ति।

एतदेवाह-

[भा.१९०४] खित्तबहिया व आने, विसोहिकोडिं वतिच्छितो काढे।
पइदिवसमलब्भंते, कम्मं समइच्छिओ ठवए ॥

वृ- क्षेत्रबहिर्वा गत्वा प्रथममनवभाषितं ततोऽवभाषितं पूर्वं तद्दिवसे ततो द्वितीयेऽपि दिवसेऽनन्तरोक्तया नीत्या यथायोगमानयेत्। एष विधिरेषणीयविषयो भणितः। अथैषणीयेन नासौ ग्लानः संस्तरति ततः सक्रोशयोजनक्षेत्रस्यान्तः स्वग्राम-परग्रामयोः पञ्चकपरिहाण्या तदप्राप्तौ क्षेत्रबहिरपि पञ्चकपरिहाण्या तद्दिवसं ग्लानप्रायोग्यमुत्पादयन्ति। एवं यदा प्रायश्चित्तानुलोम्येन क्रीतकृताऽभ्याहृतादिका विशोधिकोटीं व्यतिक्रान्तो भवति तदा ''काढि''त्ति ग्लानयोग्य-मौषधादिकमन्येन स्वयं वा यतनया क्वाथयेत्। एवं प्रतिदिवसमसमलभ्यमाने यदा आधाकर्मापि समतिक्रान्तो भवति, तदपि प्रतिदिवसं न प्राप्यत इत्यर्थः, ततो विशुद्धमविशुद्धं वा ग्लानप्रायोग्यं

Jain Education International For Private & Personal Use Only www.jainelibrary.org

द्रव्यमुत्पाद्यस्थापयेत्। ये तु ग्लानस्य प्रतिचरकास्ते यदि ग्लानकार्यव्यापृताः परक्षेत्रं वा व्रजन्तः स्वार्थमहिण्डमाना न संस्तरन्ति तत एषणादिदोषेषु पञ्चकपरिहाणियतनया गृह्णन्ति ॥

यत् तद् ग्लानार्थं रिवास्यते तत् कीदृशे स्थाने स्थाप्यते ? इत्याह-

[भा.१९०५]उव्वरगस्स उ असती, चिलिमिणि उभयं च तं जह न पासे।
तस्सऽसइ पुराणादिसु, ठविंति तद्दिवस पडिलेहा ॥

वृ- कृतयोगिना गीतार्थेन वा तद् अन्यस्मिन् गृहापवरके स्थापनीयम्। अथ नास्ति पृथगपवरकस्ततो वसतावेव योऽपरिभोग्यः कोणकस्तत्र चिलिमिलिकया आवृत्त्य 'उभयं' ग्लाना-ऽगीतार्थलक्षणं यथा न पश्यति तथा स्थाप्यम्। यदि ग्लानस्तत् पश्यति तदा स यदा तदा तस्याभ्यवहारं कुर्यात्। अगीतार्थस्य तु तद् दृष्ट्वा विपरिणामा-ऽप्रत्यवादयो दोषा भवेयुः। "तस्सऽसइ"त्ति 'तस्य' अपरिभोग्यस्थानस्याभावे पुराणः-पश्चात्कृतस्तस्य गृहे दिशब्दाद् मातापितृसमानेषु गृहेषु स्थापयन्ति। तस्य च तत्र स्थापितस्य तद्दिवसं प्रत्युपेक्षणा कर्त्तव्या। तद्दिवसं नाम प्रतिदनम्। यदुक्तं देश्याम्-तद्दिवसं अनुदिअहे इति ॥

अथ "आनेउं दोहि वी कुज्जा" इत्यस्यव्याख्यानमाह-

[भा.१९०६] फासुगमफासुगेण व अच्चित्तेतर परित्तऽनंतेनं।
आहार-तद्दिनेतर, सिहेण इअरेण वा करणं ॥

वृ- प्राशुकेन अप्राशुकेन वा अचित्तेन 'इतरेण वा' सचित्तन परीत्तेन अनन्तेन वा आहारेण अनाहारेण वा तद्दैवसिकेन 'इतरेण वा' परिवासितेन सस्नेहेन 'इतरेण वा' अस्नेहेन ग्लानस्य चिकितसायाः करणमनुज्ञातम ॥

गता ग्लानानुवर्त्तना। अथ वैद्यानुवर्त्तनामभिधित्सुः प्रस्तावनां रचयन्नाह-

[भा.१९०७] विज्जं न चेव पुच्छह, जाणंता बिंति तस्स उवदेसो।
दट्ठ-पिलगाइएसु व, अजानगा पुच्छए विज्जं ॥

वृ- ग्लानो ब्रूयात्-यूयं वैद्यं नैव पृच्छथ, आत्मच्छन्देनैव प्रतिचरणं कुरुथ। ततो यदि साधवो जानन्तःचिकितिसायां कुशलास्ततो ब्रुवते-अस्माभिर्वैद्यः प्रागेव पृष्टस्तस्यैवायमुपदेश इति। यद्वा प्रतिश्रयान्निर्गत्य किनयन्तमपि भूमागं गत्वा मुहूर्तमात्रं तत्र स्थित्वा समागत्य ब्रुवते-अयं वैद्येनोपदेशो दत्त इति। तथा दष्टं-सर्पडङ्क्रः पिलगं-गण्डः आदिग्रहणेन शीतलिका दुष्टवातो वेत्यादिपरिग्रहः, एतेष्वपि यदि ज्ञास्ततः स्वमेव कुर्वन्ति। अथाज्ञास्ततो वैद्यं पृच्छन्ति ॥

अत्र शिष्यः पृच्छति-

[भा.१९०८] किह उप्पन्नो गिलाणो, अट्ठम उण्होदगाइया वुड्ढी।
किंचि बहु भागमद्धे, ओमे जुत्तं परिहरंतो ॥

वृ- 'कथं ?' केन हेतुना ग्लान उत्पन्नः ? इति। सूरिराह-भूयांसः खलु रोगातङ्का यद्वशाद् ग्लानत्वमुपजायते। तत्र "शुष्यतस्त्रीणि शुष्यन्ति, चक्षूरोगो ज्वरो व्रणः।" इति वचनाद् यदि ज्वरादिको विशोषणसाध्यो रोगः ततो जघन्येनाप्यष्टमं कारयितव्यः। यच्च यस्य रोगस्य पथ्यं तत् तस्य कार्यम्, यथा-वातरोगिणो घृतादिपानं पित्तरोगिणः शर्कराद्युपयोजनं श्लेष्मरोगिणो

Jain Education International For Private & Personal Use Only www.jainelibrary.org

नागरादिग्रहणमिति। "उण्होदगाइया वुड्डि" त्ति उपवासं कर्त्तुमसहिष्णुर्यदि रोगेणामुक्तः पारयति तत एष क्रम-उष्णोदके प्रक्षिप्य कूरसिक्थानि अमलितानि ईषन्मलितानि वा सप्त दिनानि एकं वा दिनं दीयन्ते। ततः "किंचि" त्ति उष्णोदके मधुरोल्लणं स्तोकं प्रक्षिप्य तेन सह ओदनं द्वितीये सप्तके दिने वा दीयते। एवं तृतीये "बहु" त्ति बहुतरं मधुरोल्लणं उष्णोदके प्रक्षिप्य दीयते। "भागि" त्ति चतुर्थे सप्तके दिने वा त्रिभागो मधुरोल्लणस्य द्वौ भागावुष्णोदकस्य, "अद्धे" त्ति पञ्चमे सप्तके दिने वा अर्द्धं मधुरोल्लणस्यार्द्धमुष्णोदकस्य, षष्ठे "ओमि" त्ति त्रिभाग उष्णोदकस्य द्वौ भागौ मधुरोल्लणस्य, सप्तमे सप्तके दिने वा "जुत्तं" ति 'युक्तं' किञ्चिन्मात्रमुष्णोदकं शेषं तु सर्वमपि मधुरोल्लणमित्येवं दीयते। तदनन्तरं द्वितीयाङ्गैरपि सहापथ्यान्यवगाहिमादीनि परिहरन् समुद्दिशति यावत् पुरातनमाहारं परिणमयतुं समर्थ सम्पन्न इति। एषा उष्णोदकादिका वृद्धिर्द्रष्टव्या। इह च सर्वत्राप्येक दिनं विशेषचूर्णि बृहद्भाष्याभिप्रायेण दिनसप्तकं तु चूर्ण्यभिप्रायणेति मन्तव्यम्॥

अथ "अट्ठम" त्ति पदं व्याख्यानयन्नाह-

[भा.१९०९] जाव न मुक्को ता अनसनं तु मुक्के वि ऊ अभत्तट्ठो।
असहुस्स अट्ठ छट्ठं, नाऊण रुयं व जं जोगं॥

वृ- यावदसौ ज्वर-चक्षूरोगादिना रोगेण न मुक्तस्तावद् 'अनशनम्' अभक्तार्थलक्षणं कर्त्तव्यम्। मुक्तेनापि चैकं दिवसमभक्तार्थो विधेयः। अथासावसहिष्णुस्ततोऽष्टमं वा षष्ठं वा करोति। ज्ञात्वा वा 'रुजं' रोगविशेषं यद् यत्र योग्यं शोषणमशोषणं वा तत् तत्र कार्यम्॥

यद्येवंकुर्वाणानामसौ रोग उपशाम्यति ततः सुन्दरम्, अथ नोपशाम्यति ततः को विधिः? इत्याह-

[भा.१९१०] एवं पि कीरमाणे, विज्जं पुच्छे अठायमाणम्मि।
विज्जाण अट्ठगं दो, अनिड्ढि इड्ढी अनिड्ढियरे॥

वृ- एवमपि क्रियमाणे यदि रोगो न तिष्ठति-नोपशाम्यति ततस्तस्मिन्नतिष्ठति वैद्यं पृच्छति। अथ कियन्तो वैद्या भवन्ति? इत्याह-वैद्यानां खल्वष्टकं मन्तव्यम्। तत्र द्वौ वैद्यौ नियमाद् 'अनृद्धिकौ' ऋद्धिरहितौ, 'इतरे' षड् वैद्या ऋद्धिमन्तो अनृद्धिमन्तो वा॥

तदेव वैद्याष्टकं दर्शयति-

[भा.१९११] संविग्गमसंविग्गे, दिट्ठत्थे लिंगि सावए सन्नी।
अस्सन्नि इड्ढि गइरागई य कुसलेण तेगिच्छं॥

वृ- 'संविग्नः' उद्यतविहारी १ 'असंविग्नः' तद्विपरीतः २ 'लिङ्गी' लिङ्गावशेषमात्रः ३ 'श्रावकः' प्रतिपन्नाणुव्रतः ४ 'संज्ञी' अविरतसम्यग्दृष्टि ५ 'असंज्ञी' मिथ्यादृष्टि, स च त्रिधा-अनभिगृहीतमिथ्यादृष्टि ६ अभिगृहीतमिथ्यादृष्टि ७ परतीर्थिकश्चेति ८। "इड्ढी गइरागई कुसले" त्ति व्याख्यातार्थम्॥

अनन्तरोक्तक्रमविपर्यासे प्रायश्चित्तमाह-

[भा.१९१२] वोच्चत्थे चउलहुगा, अगीयत्थे चउरो मासऽनुग्घाया।
चउरो य अनुग्घाया, अकुसले कुलसेण करणं तु॥

वृ- संविग्नगीतार्थं मुक्त्वा असंविग्नगीतार्थेन कारयति एवमादिविपर्यस्तकरणे चत्वारो लघवः।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

गीतार्थं मुक्त्वा अगीतार्थेन कारयति चत्वारो मासा अनुद्धाताः । कुशलं विहायाकुशलेन कारयति चत्वारोऽनुद्धा मासाः । यत एवमतः कुशलेन चिकित्साकरणमनुज्ञातम् ॥

अथ वैद्यसमीपं गच्छतां विधिमभिधित्सुराह-

[भा.१९१४] चोयगपुच्छा गमने, पमाण उवगरण सउण वावारे ।
संगारो य गिहीणं, उवएसो चेव तुलना य ॥

वृ-प्रथमतो नोदकपृच्छा वक्तव्या, ततो गमनं वैद्यसकाशे साधूनाम्, ततस्तेषामेव प्रमाणम्, तत उपकरणम्, ततः शकुनाः, तदनन्तरं वैद्यस्य 'व्यापारः' प्रशस्ता-ऽप्रशस्तरूपः, ततः 'सङ्गारः' सङ्केतो गृहिणां पश्चात्कृतादीनां यथा कर्त्तव्यः, ततो वैद्येनौपधादिविषय उपदेशो यथा दीयते, ततस्तमुपदेशं श्रुत्वा यथा स्वयं तुलना कर्त्तव्या, तदेतत् सर्वमपि वक्तव्यमिति द्वारगाथासमासार्थः ।

अथ विस्तरार्थः प्रतिपाद्यते-तत्र प्रथमं नोदकपृच्छाद्वारम्, शिष्यः पृच्छति-किं ग्लानो वैद्यसमीपं नीयताम् ? अथ वैद्य एव ग्लानसकाशमानीयताम् ? अत्र कश्चिदाचार्यदेशीयः प्रतिवचनमाह-

[भा.१९१५] पाहुडिय त्ति य एगो, नेयव्वो गिलाणओ उ विज्जघरं ।
एवं तत्थ भणंते, चाउम्मासा भवे गुरुगा ॥

वृ- 'एकः' कश्चित् प्राह-वैद्ये ग्लानान्तिकमानीयमाने 'प्राभृतिका' वक्ष्यमाणलक्षणा भवति, अतो ग्लान एव वैद्यगृहं नेतव्यः । इत्यमाचार्यदेशीयेनोक्ते सूरिराह-एवं 'तत्र' ग्लाननयनविषये भणतो भवतश्चत्वारो मासा गुरुका भवन्ति ॥

केयं पुनः प्राभृतिका ? इत्यत आह-

[भा.१९१६] रह-हत्थि-जान-तुरएअनुरंगाईहि इंति कायवहो ।
आसन मट्टिय उदए, कुरुकुय सघरे उ परजोगो ॥

वृ-रथ-हस्तिनौ-प्रतीतौ यानं-शिबिकादिकं तुरगः-प्रसिद्धः अनुरङ्गा-गन्त्री एतैः आदिशब्दादपरेण वा विच्छर्दन 'आयाति' आगच्छति वैद्ये कायानां-पृथिव्यादीनां वधो भवति । तथा समायातस्यासनं दातव्यम् । ग्लानस्य च शरीरे परामृष्टे व्रणादिपाटने वा कृते कुरुकुचाकारापणे मृत्तिकाया उदकस्य च वधो भवति । तथा समायातस्यासनं दातव्यम् । ग्लानस्य च शरीरे परामृष्टे व्रणादिपाटने वा कृते कुरुकुचाकारापणे मृत्तिकाया उदकस्य च वधो भवति । स्वगृहे तु परयोगो भवति, परप्रयोगेण सर्वमपि भवति न साधूनां किमप्यधिकरणं भवतीत्यर्थः । एषा प्राभृतिका वैद्ये ग्लानसमीपमानीयमाने यतो भवति ॥

अतः किम् ? इत्याह-

[भा.१९१७] लिंगत्थमाइयाणं, छण्हं वेज्जाण गम्मऊ मूलं ।
संविग्गमसंविग्गे, उवस्सगं चेव आनेज्जा ॥

वृ- लिङ्गस्थादीनां षन्नामपि वैद्यानां गृहं ग्लानं गृहीत्वा गम्यताम् नैते उपशार्यमानेतव्याः, अधिकरणदोषभयात् । संविग्नोऽसंविग्नश्च एतौ द्वाप्युपाश्रयमेवानयेत्, दोषाभावात् ॥

एवं परेणोक्ते सूरिराह-

[भा.१९१८] वाता-ऽऽतवपरितावण, मयपुच्छा सुन्न किं सुसानकुडी ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

स च्चेव य पाहुडिया, उवस्सए फासु सा उ ॥

वृ-ग्लानो वैद्यगृहं नीयमानो वातेन आतपेन च महतीं परितापनामनुभवति। "मयपुच्छ" त्ति लोकस्तं तथानीयमानं दृष्टवा पृच्छति-किमेष मृतो यदें नीयते ? । "सुन्ने"ति स ग्लानो नीयमानोऽपान्तरालेऽपद्राणस्ततो वैद्येन यावद् मुखमुद्घाटितं तावत् 'शून्यं' जीवरहितं शबं तिष्ठतीति विज्ञाय ब्रूयात्-किं मदीयं गृहं श्मशानकुटी यदवं मृतमानयत ? । ततः स वैद्यः 'शबस्य स्पृष्टोऽहम्' इति कृत्वा सचेलः स्नायात्, फलहकाभ्यन्तरे वा छगणपानीयं दापयेत्, ततो ननु सैव प्राभृतिका समधिकतरा भवेत्। उपाश्रये पुनः प्राशुकपानकादिना सा क्रियेत ततो न काचिद् विराधना भवतीति ॥

गतं नोदकपृच्छाद्वारम्। अथ गमनद्वारमाह-

[भा.१९१९] उग्गह-धारणकुसले, दक्खे परिणामए य पियधम्मे।
कालन्नू देसन्नू, तस्सानुमए अ पेसिज्ञा ॥

वृ- वैद्येन दीयमानमुपदेशं ये झगित्येवावबुध्यन्ते न च चिरादपि विस्मारयन्ति तेऽवग्रह-धारणाकुशलास्तान् तथा 'दक्षान्' शीघ्रकारिणः 'परिणामकान्' यतास्थानमपवादपदपरिण-मनशीलान् 'प्रियधर्मिणः' धर्मश्रद्धालून् 'कालज्ञान्' वैद्यान्तिकेप्रविशतां यः कालः-प्रस्तावस्तद्वेदिनः 'देशज्ञान्' यत्र प्रदेशे वैद्य उपविष्टस्तं प्रशस्तमप्रशस्तं वा ये जानते तान् तथा 'तस्य' ग्लानस्य वैद्यस्य वा येऽनुमताः-अभिप्रेतास्तान् वैद्यसकाशं प्रेषयेत् ॥

अत्रैव व्यतिरेके प्रायश्चित्तमाह-

[भा.१९२०] एअगुणविप्पमुक्के, पेसिंतस्स चउरो अनुग्घाया।
गीयत्थेहि य गमनं, गुरुगा य इमेहि ठाणेहिं ॥

वृ- एते-अवग्रह-धारणाकुशलत्वादयो ये गुणास्तैर्विप्रमुक्तन् प्रेषयत आचार्यस्य चत्वारोऽनुद्धाताः प्रायश्चित्तम्। गीतार्थैश्च तत्र गमनं कर्त्तव्यम्। चतुर्गुरुकाश्च प्रायश्चित्तम् 'एभिः' वक्ष्यमाणैः स्थानैः क्रियमाणैर्मन्यव्यम् ॥

तान्येवाभिधित्सुः प्रमाणोपकरणद्वारद्वयमाह-

[भा.१९२१] एक्कग दुगं चउक्कं, दंडो दूया तहेव नीहारी।
किण्हे नीले मइले, चोल रय निसिज्ज मुहपत्ती ॥

वृ-यद्येकः साधुर्वैद्यसमीपे प्रेष्यते ततः स वैद्यः 'यमदण्डोऽमागतः' इति दुर्निमित्तं गृह्णीयात्, अथ द्वौ प्रेष्येते ततः 'यमदूतावेतौ' इति मन्येत, अथ चत्वारः प्रेष्यन्ते ततः 'नीहारिणः' शबस्य स्कन्धदायिनोऽमी इति मिनुयात्, एतावतां च प्रेषणे चतुर्गुरुकम्। उपकरणद्वारे- यदि कृष्णं नीलं मलिनं वा उपकरणं प्रावृण्वन्ति तदा चतुर्गुरु। उपकरणं चेह चोलपट्टको रजोहरणं निषद्याद्वयोपेतं मुखवस्त्रिका उपलक्षणत्वादौर्णिक-सौत्रिकौ च कल्पाविति मन्तव्यम् । ततः शुद्धं श्वेतं चोपकरणं ग्रहीतव्यम् ॥

अथ शकुनद्वारमाह-

[भा.१९२२] मइल कुचेले अब्भंगियल्लए साण खुज्ज वडभे य।
कासायवत्थ उद्धूलिया य कज्जं न साहंति ॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

[भा.१९२३] नंदीतूरं पुन्नस्स, दंसणं संख-पडहसद्दो य।
भिंगार छत्त चामर, एवमादी पसत्थाइं ॥

वृ- अनयोर्व्याख्या प्राग्वत्।

[भा.१९२४] आवडणमाइएसुं, चउरो मासा हवंतऽनुग्घाया।
एवं ता वच्चंते, पत्ते य इमे भवे दोसा ॥

वृ- 'आपतनं' द्वारादौ शिरसो घट्टनम्, आदिशब्दात् प्रपतनं प्रस्खलनं वा सञ्जातम्, अपरेण वा वस्त्रादौ गृहीत्वा पश्चान्मुख आकृष्टः, 'कुत्र वा व्रजसि ?' इत्यादि भणितः, गच्छतामेव वा केनापि क्षुतम्, एवमादिष्वपशकुनेषु जातेषु यदि गच्छति तदा चत्वारो मासा अनुद्धाता भवन्ति। एवं तावद् व्रजतो मन्तव्यम्। अथ वैद्यगृहं प्राप्तस्तत इमे दोषाः परिहर्त्तव्या भवन्ति ॥

तानेव प्रतिपादयन् व्यापारद्वारमाह-

[भा.१९२५] साड-ऽब्भंगण-उव्वलण-लोय-छारु-क्कुरुडे य छिंद-भिंदंतो।
सुहआसण रोगविहिं, उवएसो वा वि आगमणं ॥

वृ- एकशाटकपरिधानो यदा वैद्यो भवति तदा न प्रष्टव्यः। एवं दैलादिना अभ्यङ्गनं कल्कलोध्रादिना वा उद्वर्त्तनं लोचकर्म वा-कूर्चमुण्डनादिलक्षणं कारयन्, क्षारस्य-भस्मन उत्कुरुटकस्य कचवरपुञ्जकस्य उपलक्षणत्वाद् बुसादीनां वा समीपे स्थितः, कोष्ठादिकं वा रप्फकादिना वा दूषितं कस्याप्यङ्गं छिन्दानः, घटम् अलाबुकं वा भिन्दानः, शिराया वा भेदं कुर्वाणो न प्रच्छनीयः, अथ ग्लानस्यापि किञ्चित् छेत्तव्यं ततश्छेदन-भेदनयोरपि प्रष्टव्यः। अथासौ शुभासने उपविष्टः 'रोगविधिं' वैद्यशास्त्रपुस्तकं प्रसन्नमुखः प्रलोकयति, अथवा रोगविधि-चिकित्सा तां कस्यापि प्रयुञ्जान आस्ते ततो धर्मलाभयित्वा प्रष्टव्यः। स च वैद्यः पृष्टः सन्नुपदेशं वा दद्याद् ग्लानसमीपे वा आगमनं कुर्यात् ॥

अथ सङ्गारश्च गृहिणामिति द्वारं व्याख्यानयति-

[भा.१९२६] पच्छाकडे य सन्नी, दंसणऽहाभद्द दानसड्ढे य।
मिच्छद्दिट्ठि संबंधिए अ परतित्थिए चेव ॥

वृ- 'पश्चात्कृतः' चारित्रं परित्यज्य गृहवासं प्रतिपन्नः, 'संज्ञी' गृहीतानुव्रतः, "दंसण" त्ति दर्शनसम्पन्नोऽविरतसम्यग्दृष्टिः, 'यथाभद्रकः' सम्यक्त्वरहितः परं सर्वज्ञशासने साधुषु च बहुमानवान्, 'दानश्राद्धः' दानरुचि, 'मिथ्यादृष्टिः' शाक्यादिशासनस्थः, 'सम्बन्धी' ग्लानस्यैव स्वजनः, 'परतीर्थिकः' सरजस्क-परिव्राजकादि परं भद्रकः। एतेषां सङ्केतः क्रियते, यथा-वैद्यस्य पार्श्वे वयं गच्छामः, भवद्भिस्तत्र सन्निहितैर्भवितव्यम्, यदसौ ब्रूयात् तद् युष्माभि सर्वमपि प्रतिपत्तव्यम् ॥

ये वैद्यसमीपे प्रस्थापितास्ते वैद्यस्येदं कथयन्ति-

[भा.१९२७] वाहि नियाण विकारं, देसं कालं वयं च धातुं च।
आहार अग्गि-धिबल, समुइं च कहिंति जा जस्स ॥

वृ- 'व्याधिं' जरादिकं रोगं 'निदानं' रोगोत्थानकारणं 'विकारं' प्रवर्द्धमानरोगविशेषं 'देशं' ग्लानत्वोत्पत्तिनिबन्धनप्रवात-निवातादिप्रदेशरूपं 'कालं' रोगोत्थानसमयं पूर्वाह्णादिकं 'वयश्च'

Jain Education International For Private & Personal Use Only www.jainelibrary.org

शैशव-तारुण्यादिकं 'धातुं च' वातादीनां धातूनामन्यतमो यस्तस्योत्कटो वर्त्तते तं 'चः' समुच्चये 'आहारम्' अल्पभोजित्वादिलक्षणम् अग्निबलं-जाठरो वह्निरस्य मन्दः प्रबलो वा इत्येवं धृतिबलं-सात्त्विकः कातरो वाऽयमित्येवं तथा ''समुइं''ति प्रकृति सा च या यस्य जन्मतः प्रभृति तां च कथयन्ति ।।

अथोपदेशद्वारमाह-

[भा.१९२८] कलमोदनो य खीरं, ससक्करं तूलियाइयं दव्वे।
भूमिघरेट्टग खेत्ते, काले अमुगीइ वेलाए ।।

[भा.१९२९] इच्छानुलोम भावे, न य तस्सऽहिया जहिं भवे विसया।
अहवन दित्तादीसुं, पडिलेमा जा जहिं किरिया ।।

वृ-अनन्तरोक्तंव्याधि-निदानादिकं श्रुत्वा वैद्यः स्वगृहस्थित एव द्रव्यादिभेदात् चतुर्विधमुपदेशं दद्यात्। तद्यथा-द्रव्यतः कलमशालिरोदनस्तथा क्षीरं च सशर्करमस्य दातव्यम्, तथा तूलिकायां शाययितव्यः, आदिशब्दाद् गोशीर्षचन्दनादिना विलेपनीय इत्यादि। क्षेत्रतो भूमिगृहे पक्केष्टकागृहे वाऽयं स्थापनीयः। कालतोऽमुकस्यां वेलायां प्रथमप्रहरादौ भोजनमयं कारणीयः।

भावतो यदस्य स्वकीयाया इच्छाया अनुलोमम्-अनुकूलं तदेव कर्त्तव्यम्, नास्यज्ञा कोपनीयेति भावः, तथा यत्र 'तस्य' ग्लानस्य विषयाः 'अहिताः' अनिष्टाः क्रन्दित-विलपितादिरूपा गीतवादित्र-गोचरा वा शब्दादयो न भवन्ति तत्र स्थापनीय इति शेषः। 'अहवण'त्ति अथवा 'दृप्तादिषु' दृप्तचित्तप्रभृतिषु प्रतिलोमा क्रिया कर्त्तव्या। तत्र दृप्तचित्तस्यापमानना, यथा अपमानादिनाऽपहृत-चित्तस्य दर्पातिरेकज उन्मादः शाम्यति, क्षिप्तचित्तस्यापमानादिपोहृतचित्तस्य सम्मानना; यक्षाविष्टस्य तु यथायोगमपमानना सम्मानना वा विधेया; ज्वरादौ वा रोगे विशोषणादिका क्रिया या यत्र युज्यते सा तत्र विधेयेति ।।

अथ तुलनाद्वारमाह-

[भा.१९३०] अपडिहणंता सोउं, कयजोगाऽलंभि तस्स किं देमो।
जहविभवा तेगिच्छा, जा लंभो ताव जूहंति ।।

वृ-वैद्येन दीयमानमुपदेशम् 'अप्रतिघ्नन्तः' तद्वचनमविकुट्टयन्तः श्रुत्वाऽऽत्मानं तोलयन्ति-किमेतत् कलमशाल्यादिकं लप्स्यामहे न वा ? इति। यदि विज्ञायते 'ध्रुवं लप्स्यामहे' ततो न किमपि भणन्ति। अथ न तस्य ध्रुवो लाभः ततो भणन्ति-यथा युष्माभिरुपदेशो दत्तस्तथा वयं योगं करिष्यामः, परं यदि कृतेऽपि योगे न लभामहे ततस्तस्य किं दद्मः ?; अपि च वैद्यकशास्त्रे 'यथाविभवा' विभवानुरूपा चिकित्सा भणिता, यस्य यादृशी विभूतिस्तस्य तदनुरूपैरौषधैः पथ्यैश्च चिकित्सा क्रियते इत्यर्थः; अतो यूयमपि जानीथ, यथा-अस्माकं सर्वमपि याचितं लभ्यते नायाचितम्, अतो यदा कलमशाल्यादिकं याच्यमानमपि न प्राप्यते तदा किं तादव्यम् ? इति। एवं वैद्योपदेशमपसर्पयन्तस्तावद् ''जूहंति''त्ति देशीशब्दत्वाद् आनयन्ति यावद् यस्य द्रव्यस्य कोद्रव-कूरादेर्ध्रुवः प्रतिदिनभावी लाभो भवतीति ।।

अथ तुलनामेव प्रकारान्तरेणाह-

[भा.१९३१] नियएहिं ओसहेहिं, कोइ भणेज्जा करेमऽहं किरियं।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

तस्सऽप्पणो य थामं, नाउं भावं च अनुमन्ना ॥

वृ- तस्य ग्लानस्य 'कोऽपि' सज्ञातको वैद्यो भणेत्-निजकैरौषधैरहं ग्लानस्य रोमि क्रियाम्, प्रेषयत मदीये गृहे ग्लानमिति। ततो गुरुभि पृष्टेन ग्लानेन तस्यात्मनश्च 'स्थाम' वीर्यं तोलनीयम्-किमेष वैद्य औषधानि पूरयितुं समर्थो न वा?, अहमपि किं धृत्या बलवान्? आहोश्विदबलवान्?, भावो नाम-किमेष धर्महेतोश्चिकित्सां चिकीर्षु स्वगृहे मामाकारयति? उताहो उन्निष्क्रामणाभिप्रायेण? इति। यद्यसौ गृहस्थ औषधपूरेण समर्थो यदि च स्वयं धृत्या बलवान् यदि च धर्महेतोः सज्ञातकस्तमाकारयति तत एवं तस्यात्मनश्च वीर्यं भावं च ज्ञात्वा गुरूणामनुज्ञां गृहीत्वा तत्र गन्तव्यं नान्यथेति॥

अथासौ वैद्यो ब्रूयात्-

[भा.१९३२] जारिसयं गेलन्नं, जा य अवत्था उ वट्टए तस्स।
अद्दट्ठूण न सक्का, वोत्तुं तंवच्चिमो तत्थ॥

वृ-यादृशं युष्माभिह्व 'ग्लान्यं' ग्लानत्वमाख्यातं 'या च' यादृशी तस्यावस्था वर्त्तते तदेतददृष्ट्वा न शक्यते किमप्यौषधादि 'वक्तुम्' उपदेष्टुम्, ततः 'तत्रैव' ग्लानसमीपे व्रजाम इति॥

एवं भणित्वा प्रतिश्रयमागतस्य तस्य यो विधि कर्त्तव्यस्तमभिधित्सुर्द्वारगाथामाह-

[भा.१९३३] अब्भुट्ठाणे आसन, दायन भद्दे भती य आहारो।
गिलाणस्स य आहारे, नेयव्वो आनुपुव्वीए॥

वृ- प्रथममभ्युत्थानविषयो विधिर्वक्तव्यः, तत आसनविषयः, ततो ग्लानस्य दर्शना यथा क्रियते, ततः "भद्दे" त्ति भद्रको वैद्यो यथा चिकित्सामेवमेव करोति, इतरस्य तु 'भृतिः' मज्जनादिकं चिकित्सावेतनम् आहारश्च यथा दातव्यः, ग्लानस्य च यथा आहारे यतना कर्त्तव्या तथा सर्वोऽपि विधिरानुपूर्व्या प्ररूप्यमाणो ज्ञातव्य इति समुदायार्थः॥

अवयवार्थं तुप्रतिद्वारमभिधित्सुराह-

[भा.१९३४] अब्भुट्ठाणे गुरुगा, तत्थ वि आणाइणो भवे दोसा।
मित्थत्त रायमादी, विराधना कुल गणे संघे॥

वृ-आचार्यो यदि वैद्यस्यागतस्याभ्युत्थानं करोति तदा चत्वारोगुरुकाः। तत्राप्याज्ञादयो दोषा भवेयुः। तथा मिथ्यात्वं राजादयो व्रजेयुः, आदिग्रहणेन राजामात्यादिपरिग्रहः। ते हि चारपुरुषादिमुखादाचार्यं वैद्यस्याभ्युत्थितं श्रुत्वा स्वयं वा दृष्ट्वा चिन्तयेयुः-अमी श्रमणा अस्माकमभ्युत्थानं न कुर्वन्ति, अस्मद्भृत्यस्य तुनीचतरस्येत्थमभ्युत्तिष्ठन्ते, अहो! दुर्दृष्टधर्माणोऽमी इति। प्रद्विष्टा वा यत् तस्यैवाचार्यस्य यदि वा कुलस्य गणस्य सङ्घस्य वा विराधनां कुर्युः तन्निष्पन्नं प्रायश्चित्तम्॥

[भा.१९३५] अनब्भुट्ठाणे गुरुगा, तत्थ वि आणाइणो भवे दोसा।
मिच्छत्त सो व अन्नो, गिलाणमादीविराधनया॥

वृ- अथैतद्दोषभयादाचार्यो नोत्तिष्ठति तत्रापि चतुर्गुरुकाः। तत्राप्याज्ञादयो दोषा भवन्ति। 'स वा' वैद्योऽन्यो वा तं दृष्ट्वा मिथ्यात्वं गच्छेत्, यथा-अहो! तपस्विनोऽप्यमी गर्वमुद्वहन्ति। प्रद्विष्टो वा वैद्यो ग्लानस्य क्रियां न कुर्याद् अपप्रयोगं वा कुर्यात्, एवं ग्लानविराधना। आदि

Jain Education International For Private & Personal Use Only www.jainelibrary.org

शब्दादाचार्यादिर्वा राजवल्लभतया विराधनां कुर्यात्, यद्वा 'युष्माकं देहेऽमुको व्याधिर्वर्तते तच्चिकित्सार्थममुकमौषधं भवतां दास्यते' इति भणित्वा विरुद्धौषधप्रदानेनाचार्यं विराधयेत् ॥

यत एते दोषा अतोऽयं विधि कर्त्तव्यः-

[भा.१९३६] गीयत्थे आनयणं, पुव्विं उट्ठित्तु होइ अभिलावो ।
गिलाणस्स दावणं धोवणं च चुन्नाइगंधे य ॥

वृ- गीतार्थैर्वैद्यस्य प्रतिश्रये आनयनं कर्त्तव्यम् । यदि ते पञ्च जनास्ततः सङ्घाटकः प्रथमत एवागच्छति । अथ त्रयस्तत एकस्तन्मध्यात् प्रथममागच्छति, आगत्य च गुरूणां कथयति-वैद्य आगच्छतीति । ततो गुरवो द्वे आसने तत्र साधुभि स्थापयन्ति । स्वयं तु चङ्क्रमणलक्ष्येण 'पूर्वं' वैद्यागमनात् प्रागेवोत्थायोर्द्धव स्थिता आसते । गीतार्थैश्च निवेदयितव्यम् 'एष वैद्यः' इति । आचार्यैश्च पूर्वमनालपतोऽपि वैद्यस्याभिलापः कर्त्तव्यः, पूर्वन्यस्तेन चासनेपोनिमन्त्रणीयः । तत आचार्यो वैद्यश्च द्वावप्यासने उपविशतः । ततो ग्लानस्य दर्शना कार्या । थम् ? इत्याह-ग्लानस्य यद् उपकरणे शरीरे वा अशुचिनोपलिप्तं तस्य 'धावनं' प्रक्षालनं कर्त्तव्यम्, चशब्दात् खेल-कायिकी-संज्ञामात्रकाण्येकान्ते स्थापनीयानि, भूमिकाया उपलेपनं सम्मार्जनं च विधेयम्, तथापि यदि दुर्गन्धो भवति ततः पटवासादिचूर्णानि तत्र विकीर्यन्ते, आदिशब्दात् कर्पूरादिभि सुगन्धिद्रव्यैरशुभो गन्धोऽपनीयते, ततः प्रावृतशुक्लवासाः शुचीभूतो ग्लानो वैद्यस्य दर्श्यते । यदि तस्य किञ्चिद् व्रणादिकं पाटयितव्यं तदा तस्मिन् पाटिते सति उष्णोदकादि प्राशुकं हस्तधावनं दातव्यम् । अथोष्णोदकमसौ नेच्छथइ थथः पश्चात्कृतादयो मृत्तिकामुदकं वा प्रयच्छन्ति ॥ गतमभ्युत्थाना-ऽऽसन-दर्शनाद्वारत्रयम् ।

अथ भद्रकद्वारमाह-

[भा.१९३७] चउपादा तेगिच्छा, को भेसज्जाइँ दाहिई तुब्भं ।
तहियं च पुव्वपत्ता, भणंति पच्छाकडादऽम्हे ॥

वृ- वैद्यो ब्रूयात्-चिकित्सा चतुष्पादा भवति, चत्वारः पादाः-चतुर्थांशरूपा यस्यां सा चतुष्पादा, तद्यथा-आतुरः प्रतिचरका वैद्यो भेषजानि । एतैश्चतुर्भिर्वैद्यशास्त्रोक्तगुणोपेतैश्चिकित्सा निष्पद्यते, अतः को नाम ग्लानस्य योग्यानि भेषजानि युष्माकं प्रदास्यति ? । ततस्तत्र दत्तसङ्क्रेततया पूर्वप्राप्ताः पश्चात्कृतादयो भणन्ति-वयं दास्याम इति । एवं तावद् भद्रको वैद्यः क्रियां करोति न चान्यत् किमपि स्पृहयति ॥

यस्तु प्रान्तस्तमुद्दिश्य भृतिद्वारमाहरद्वारं चाह-

[भा.१९३८] कोई मज्जनगविहिं, सयणं आहार उवहि केवडिए ।
गीयत्थेहि य जयणा, अजयण गुरुगा य आणाई ॥

वृ- कश्चिद् वैद्यो ब्रूयात्-मज्जनं-स्नानं तस्यविधि-प्रकारः 'मज्जनविधि' तैलाभ्यङ्गनादि-प्रक्रियापुरस्सरं स्नानमित्यर्थः, एतत् सर्वं मम को नाम दास्यति ? इति । ततः पश्चात्कृतादिभिरभ्यु-पगन्तव्यम्-वयं दास्यामः । तेषामभावे गीतार्थैर्यतनया सर्वमप्यभ्युपगन्त-व्यम् । यद्ययतनया अभ्युपगच्छन्ति प्रतिषेधयन्ति वा ततश्चत्वारो गुरुकाः आज्ञादयश्च दोषाः । एषा निर्युक्तिगाथा ॥

अथैनामेव बिभावयिषुराह-

Jain Education International For Private & Personal Use Only www.jainelibrary.org

[भा.१९३९] एयस्स नाम दाहिह, को मज्झणगाइ दाहिई मज्झं।
ते चेव णं भणंती, जं इच्छसि अम्हे तं सव्वं ॥

वृ- 'एतस्य' ग्लानस्य 'नाम' इति सम्भावनयां यद् यत् प्रायोग्यं भेषजादि तत् तत् सर्वं दास्यथ, मम पुनर्मज्ञनकादिकं को दास्यति? इत्युक्ते 'त एव' पश्चात्कृतादयः "णं" इति तं वैद्यं भणन्ति-यद् इच्छसि तत् सर्वं वयं दास्यम इत ॥

[भा.१९४०] जं एत्थ अम्हे सव्वं, पडिसेहे गुरुग दोस आणादी।
एएसिं असईए, पडिसेहे गुरुग आणादी ॥

वृ- ये ते पूर्वं पश्चात्कृतादयः प्रज्ञापितास्तैः 'यदत्र ग्लानस्य युष्माकं चोपयुज्यते तत् सर्वं वयं दास्यमः' इत्युक्ते सति यः साधुस्तानधिकरणभयात् प्रतिषेधयति तस्य चत्वारो गुरुका आज्ञादयश्च दोषाः। अथ न सन्ति पश्चात्कृतादयस्तत एतेषाम् 'असति' अभावे यो वैद्यं 'प्रतिषेधयति' 'न वयं भवतो मज्ञनादि दास्यामः' इति तस्यापि चतुर्गुरुका आज्ञादयश्च दोषाः ॥

पश्चात्कृतादिषु प्रतिषिध्यमानेषु यद् वैद्यश्चिन्तयति तदाह-

[भा.१९४१] जुत्तं सयं न दाउउं, अन्ने दिंते वि ऊ निवारिंति।
न करिज्ज तस्स किरियं, अवप्पओगं व से दिज्जा ॥

वृ- युक्तममीषां स्वयमदातुम् अपरिग्रहत्वात्, यत् पुनरन्यान् ददतो निवारयन्ति तन्न युज्यते। एवं प्रद्विष्टः सन् 'तस्य' ग्लानस्य क्रियां न कुर्यात्, 'अपप्रयोगं वा' विरुद्धौषधयोगं "से" तस्य 'दद्यात्' प्रयुञ्जीत, तस्मादन्यान् न निवारयेदिति ॥

[भा.१९४२] दाहामो त्ति य गुरुगा, तत्थ वि आणाइणो भवे दोसा।
संका व सूयएहिं, हिय नट्ठे तेणए वा वि ॥

वृ- पश्चात्कृतादीनामभावे यदि साधवो भणन्ति 'वयमवश्यं ते सर्वमपि दास्यामः' इति तदा चत्वारो गुरुकाः, तत्राप्याज्ञादयो दोषा भवेयुः। तथा तस्यापि हिरण्यादौ केनचिद् हृतेऽन्यथा वा नष्टे सति शङ्का भवति-अहिरण्य-सुवर्णा अप्यमी यद् दास्याम इति भणन्ति तद् नूनमेतैरेव गृहीतामिति। यद्वा 'सूचकैः' आरक्षिकादिभिस्तच्छ्रुत्वा राजकुले गत्वा सूच्यते, यथा- स्तेनका एत श्रमणाः, येन वैद्यस्य हिरण्यादिकं दातव्यतया प्रतिपद्यन्ते। ततो ग्रहणा-ऽऽकर्षणादयो दोषाः ॥

[भा.१९४३] पडिसेह अजयणाए, दोसा जयणा इमेहि ठाणेहिं।
भिक्खण इड्ढी बिइयपद रहिय जं भाणिहिंसि जुत्तं ॥

वृ- पश्चात्कृतादीनामभावे यद्ययतनया 'प्रतिषेधयन्ति' 'प्रतिषेधयन्ति' 'न तव भृतिं वा भक्तं वा दास्यामः' इति ततश्चतुर्गुरुका आज्ञादयश्च दोषाः। तस्माद यतना एभि स्थानैः कर्त्तव्या- "भिक्खण"त्ति भिक्षां कृत्वा वयं दास्यामः, "इड्ढि"त्ति ऋद्धिमता वा निष्कामता यत् क्वापि निक्षिप्तं तद् गृहीत्वा दास्यामः, "बिइयपदे"त्ति 'द्वितीयपदे वा' क्वचित् कारणजाते सञ्जाते सति यदर्थजातं गृहीतं तद् उद्धरितं दास्यामहे। "रहिए"त्ति पश्चात्कृतादिरहिते एवं भणन्ति- "जं भाणिहिसि जुत्तं" यत् त्वं भणिष्यसि तद् यथाशक्ति करिष्यामः, यद् वा अस्माकं 'युक्तम्' उचितं तद् विधास्याम इति ॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

अथासौ वैद्यो ब्रूयात्-

[भा.१९४४] अहिरन्नग त्थ भगवं !, सक्खी ठावेह जे ममं देंति ।
धंतं पि दुद्धकंखी, न लभइ दुद्धं अधेणूतो ।।

वृ- भगवन् ! अहिरण्यकाः स्थ यूयम् अतः सक्षिणः स्थापयत ये मम पश्चात् प्रयच्छन्ति । अमुमेवार्थं प्रतिवस्तूपमया द्रढयति-''धंतं पि''त्ति देशीवचन्वाद् अतिशयेनापि दुग्धकाङ्क्ष न लभते दुग्धमधेनोः सकाशात् ।।

एवं वैद्येनोक्ते किं कर्त्तव्यम् ? इत्याह-

[भा.१९४५] पच्छाकडाइ जयणा, दावणकज्जेण जा भणिय पुव्विं ।
सद्धा-विभवविहूणा, ति च्चि इच्छंतगा सक्खी ।।

वृ- पश्चात्कृतादिविषया मज्जनकादिदापनकार्येण या पूर्वं यतना भणिता सैव इह मन्तव्या । नवरं ये पश्चात्कृतादयः श्रद्धया विभवेन च विहीनास्त एव इच्छन्तः सन्त इह साक्षिणःस्थाप्यन्ते, यथा-वयं साक्षीभवितुं नेच्छन्ति ततो य ऋद्धिमत्प्रव्रजितः स इदं ब्रूयात्-

[भा.१९४६] पंचसयदान-गहणे, पलाल-खेलाण छड्डणं व जहा ।
सहसं व सयसहस्सं, कोडी रज्जं व अमुगं वा ।।

[भा.१९४७] एवं ता गिहवासे, आसीय य दानि किं भणीहामो ।
जं तुब्भऽम्ह य जुत्तं, तं उग्गाढम्मि काहामो ।।

वृ- यथा पलाल-खेलयोश्छर्दनं विधीयते तथा दीना-ऽनाथादिभ्योवयं रूपकाणां पञ्च शतानि हेलयैव दानं दत्तवन्तः, उपार्जनामपि कुर्वाणाः पञ्चशतानां ग्रहणमेवमेव कृतवन्तः, एवं सहं शतसहं कोटिं राज्यम् 'अमुकं वा' अनिर्दिष्टं सङ्ख्यास्थानं लीलयैव वयं दत्तवन्तः स्वीकृतवन्तो वा, एवं तावदस्माकं गृहवासे विभूतिरासीत्, इदानीं पुनरकिञ्चनाः श्रमणाः सन्तः किं भणिष्यामः? किं करिष्यामः ? इति भावः, परं तथापि ग्लाने 'उद्गाढे' प्रगुणीभूते सति यत् तवास्माकं च 'युक्तम्' अनुरूपं तत् करिष्याम इति ।।

एवंतावत् स्वग्रामे वैद्यविषया यतना भणिता । अथ स्वग्रामे वैद्यो न प्राप्यते ततः परग्राम-दप्यानेतव्यः तत्र विधिमाह-

[भा.१९४८] पाहिज्जे नाणत्तं, बाहिं तु भईए एस चेव गमो ।
पच्छाकडाइएसुं, अरहिय रहिए उ जो भणिओ ।।

वृ-पाथेयंनाम- कण्हक मर्दनवेतनं यत् तष्य भक्तादि दीयते तत्र नानात्वं विशेशः वास्तव्यवेद्यस्य तत्र सम्भवत्ति अस्यतु भवतीति भावः तत्र च बहिर्ग्रामादागतस्य 'भृतो' मज्जनादौ वेतने एष एव गमोद्रष्टव्यः, पश्चात्कृतादिभिररहिते वा योऽन्तरमेव भणितः ।।

अथात्रैव यतना विशेष माह-

[भा.१९४९] मज्जनगा दिच्छंते बाहिं अब्भिमंतरे व अनुसट्ठि ।
धम्मकह-विज्जमंते, निमित्त तस्सऽट्ठ अन्नो वा ।।

वृ- मज्जनं-स्नानम् आदिशब्दाद् अभ्यङ्गनोर्द्वरत्तनादिकं 'बहि' मार्गे आगच्छन् 'अभ्यन्तरे वा ग्लानसकाशे प्राप्तो यदीच्छति ततः सर्वं तस्य पश्चात्कृतादयः कुर्वते । तेषामभावेऽनुशिष्टिः

Jain Education International For Private & Personal Use Only www.jainelibrary.org

क्रियते, यथा-यतीनां नोपरमते ततो धर्मकथा कर्त्तव्या। तथाप्यप्रतिपद्यमाने विद्या-मन्त्र-निमित्तानि 'तस्य' वैद्यस्यावर्जनार्थं प्रयुज्यन्ते, अन्यो वा तानि प्रयुज्य वशीक्रियते, ततस्तस्य वैद्यस्यासौ मज्जनादिकं काराप्यते ॥

अथ धर्मकथापदं भावयति-

[भा.१९५०] तह से कहिंति जह होइ संजओ सन्नि दानसड्ढो वा।
बहिया उ अण्हायंते, करिंति खुड्डा इमं अंतो ॥

वृ- आक्षेपणीप्रभृतिभिर्धर्मकथाभिस्तस्य तथा धर्मं कथयन्ति यथाऽसौ संयतो भवति 'संज्ञी वा' गृहीतानुव्रतोऽविरतसम्यग्दृष्टिर्वा 'दानश्राद्धो वा' मुधैव साधूनामारोग्यदाशीलो भवति। अथ धर्मकथालब्धिर्नास्ति ततो विद्या-मन्त्रादयः प्रयुज्यन्ते। तेषामभावे तस्य आमलकादीनि दीयन्ते, भण्यते चासौ-बहिर्गत्वा तडागादिषु स्नानं कुरुत। अथ बहि स्नातुं नेच्छति ततो बहिरस्नाति तस्मिन् क्षुल्लकाः 'इदं' वक्ष्यमाणम् 'अन्तः' प्रतिश्रयस्याभ्यन्तरे कुर्वन्ति ॥

किं तत्? इत्याह-

[भा.१९५१] उसिणे संसट्ठे वा, भूमी-फलगाइ भिक्ख चड्डाई।
अनुसट्ठी धम्मकहा, विज्ज-निमित्ते य अंतो बहिं ॥

वृ- 'उष्णोदकेन' प्रतीतेन 'संसृष्टेन' गोरसरसभावितेन अपरेण वा प्राशुकेन पानकेन क्षुल्लकास्तं स्नपयन्ति। शयनमाश्रित्य भूमौ फलके आदिशब्दात् पल्यङ्कादिषु वा स शाय्यते। भोजनं प्रतीत्य 'भैक्षं' भिक्षापर्यटनेन लब्धमानीय तस्य दातव्यम्। "चड्डाइ"त्ति 'चड्डुं' कमढकमयं भाजनम् आदिग्रहणात् कांस्यपात्र्यादिपरिग्रहः, एतेषु भोजनमसौ कारयितव्यः। हिरण्यादिकं द्रविणजातं याचमानस्य 'अन्तः' इति वास्तव्यवैद्यस्य 'बहिं' इत्यागन्तुकवैद्यस्योभयस्याप्य-नुशिष्टिधर्मकथा-विद्या-निमित्तानि प्रयोक्तव्यानीति निर्युक्तिगाथासमासार्थः ॥

अथैनामेव भावयन्नाह-

[भा.१९५१] तेल्लुव्वट्टण ण्हावण, खुड्डाऽसति वसभ अन्नलिंगेणं।
पट्टदुगादी भूमी, अणिच्छि जा तूलि-पल्लंके ॥

वृ- क्षुल्लकास्तं वैद्यं तैलेनाभ्यङ्गय कल्केनोद्वर्त्योर्षणोदकादिना प्राशुकेनैकान्ते स्नपयन्ति। अथ क्षुल्लका न सन्ति स्नपयितुं वा न जानते ततो ये 'वृषभाः' गच्छस्य शुभा-ऽशुभकारणेषु भारोद्वहनसमर्थास्ते 'अन्यलिङ्गेन' गृहस्थादिसम्बन्धिना स्नानादिकं वैद्यस्य कुर्वन्ति। "पट्टदुगाई" इत्यादि, स वैद्यः शयितुकामः प्रथमतो भूमौ संस्तारपट्टमुत्तरपट्टकं च प्रस्तीर्य शाय्यते। अथ नासौ पट्टद्वये स्वप्नुमिच्छति तत और्णिक-सौत्रिकौ कल्पौ प्रस्तीर्येते। तथापि यदि नेच्छति ततः काष्ठफलके संस्तारोत्तरपट्टकावास्तीर्य शयनं कार्यते। तथाप्यनिच्छति उत्तरोत्तरं तावन्नेतव्यं यावत् तूली-पल्यङ्कावप्यानीय शाययितव्य इति ॥

अथ भैक्षपदं भावयति-

[भा.१९५३] समुदानिओदनो मत्तओ चऽनिच्छंति वीसु तवणा वा।
एवं पऽनिच्छमाणे, होइ अलंभे इमा जयणा ॥

वृ- समुदानं नाम-उच्चावचकुलेषु भिक्षाग्रहणम् तत्र लब्धः सामुदानिकः, "अध्यात्मादिभ्य

Jain Education International For Private & Personal Use Only www.jainelibrary.org

इकण्'' इति इकणप्रत्ययः, स चासावोदनश्च सामुदानिकौदनः, स प्रथमतो वैद्यस्य दातव्यः। अथासौ तं भोक्तुं नेच्छति ततो मात्रकं वर्त्तापनीयम्, तत्र प्रायोग्यं तदर्थं ग्रहीतव्यमिति भावः। अथ तथापि नेच्छति ततः ''वीसु''त्ति पृथग् ओदनं व्यञ्जनमपि पृथक् तदर्थं ग्राह्यम्। अथ शीतलमिति कृत्वाऽसौ तद् नेच्छति तदा ''तवण''त्ति तदेव गृहीत्वा यतनया तापयितव्यम्। एवमप्यनिच्छति अलभ्यमाने वा 'इयं' वक्ष्यमाणलक्षणा यतना भवति ॥

तामेवाह-

[भा.१९५४] तिगसंवच्छर तिग दुग, एगमनेगे य जोणिघाए अ।
संसट्ठमसंसट्ठे, फासुयमप्फासुए जयणा ॥

वृ- येषां शालि-व्रीहिप्रभृतीनां ध्यानानां संवत्सरत्रयादूर्द्धमागमे विध्वस्तयोनिकत्वमुक्तं तेषां सम्बन्धिनो ये त्रिवार्षिकास्तन्दुलास्ते ''तिग दुग एग''न्ति प्रथमतस्त्रिच्छटिता ग्रहीतव्याः, तदभावे द्विच्छटिताः, तेषामलाभे एकच्छटिता अपि। अथ त्रिवार्षिका न प्राप्यन्ते तो द्विवार्षिकाः, तेषामलाभे एकवार्षिका अपि व्युक्रान्तयोनिकाः सन्तस्त्रिव्येकच्छटिताः क्रमेण ग्राह्याः। ''अनेगे य'' त्ति येषां धान्यानाम् 'अनेकानि' वर्षत्रयाद् बहुतराणि वर्षाणि स्थिति प्रतिपादिता, यथा-तिल-मुद्ग-माषादीनां पञ्च वर्षाणि अतसी-कङ्गु-कोद्रवप्रभृतीनां तु सप्त वर्षाणीत्यादि, तेषामपि तन्दुलाः पञ्चवार्षिकाः सप्तवार्षिका वा त्रिव्येकच्छटिताः क्रमेण ग्राह्याः। अत्रापि वर्षपरिहाणिव्युत्क्रान्त-योनिकत्वं च तथैव द्रष्टव्यम्। इह च येषां यावती स्थितिरुक्ता ते तावतीं स्थितिं प्राप्ताः सन्तो नियमाद् व्युत्क्रान्योनिकाः, ये त्वद्यापि न परिपूर्णां स्थितिं प्राप्नुवन्ति ते व्युत्क्रान्तयोनिका अव्युत्क्रान्तयोनिका वा भवेयुरिति। ''जोनिघाए अ''त्ति व्युत्क्रान्तयोनिकानामभा-वेऽव्युत्क्रान्तयोनिका अपि ये 'योनिघातेन' जीवोत्पत्तिस्थानविध्वंसनेन गृहिभि साध्वर्थमचि-त्तीकृतास्तेऽप्येवमेव वैद्यार्थं ग्रहीतव्याः। तथा पानकं पुनरिदं तस्य दातव्यम्-''संसट्ठ'' इत्यादि, दध्यादिभाजनधावनं संसृष्टपानकम्, उष्णोदकं तन्दुलधावनादि वा असंसृष्टपानकम्, उभयमपि प्रथमतः प्राशुकं तदभावेऽप्राशुकमपि यतनया यत् त्रसविरहितं तत् तदर्थं ग्रहीतव्यम् ॥

अथैनामेव निर्युक्तिगाथां भावयति-

[भा.१९५५] वक्कंतजणितिच्छडदुएक्कछडणे वि होइ एस गमो।
एमेव जोनिघाए, तिगाइ इतरेण रहिए वा ॥

वृ- त्रिवार्षिकादयो ये व्युत्क्रान्तयोनिकास्ते त्रिच्छटिता ग्राह्याः। तेषामभावे द्व्येकच्छटितानामपि 'एष एव गमः' यत्तेऽपि व्युत्क्रानतयोनिका गृह्यन्ते। एवमेव च योनिघातेऽपि साध्वर्थं कृते ''तिगाइ''त्ति त्रिव्येकच्छटिताः क्रमेण ग्रहीतवयाः। तेषामभावे त्रिवार्षिकादयो यथाक्रमं कण्डापनीयाः। अथ नास्ति कोऽपि कण्डयिता ततः 'इतरेण' अव्यक्तलिङ्गेन 'रहिते वा' सागारिकवर्जिते प्रदेशे स्वयमेव कण्डयति। यद्वा ''रहिए''त्ति पश्चात्कृतादिभिर्गृहस्थै रहिते एषा प्रागुक्ता वक्ष्यमाणा च यतना कर्त्तव्या, यत्र तु पश्चात्कृतादय भावितगृहस्थाः प्राप्यन्ते तत्र सर्वमपि वैद्यस्य समाधानं त एवोत्पादयन्तीति भावः ॥

ते च तन्दुलाः कथमुपस्कर्त्तव्याः ? इत्याह-

[भा.१९५६] पुव्वाउत्ते अवचुल्लि चुल्लि सुक्ख-घन-मज्झुसिर-मविद्धे।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

पुव्वकय असइ दाने, ठवणा लिंगे य कल्लाणे ।।

वृ- पूर्वं-प्रथमं गृहिभि काष्ठप्रक्षेपणादायुक्तः पूर्वायुक्तस्तस्मिन् 'पूर्वायुक्ते' पूर्वतप्तेऽबचुल्लके प्रथमं तन्दुलानुपस्करोति । तदभावे पूर्वतप्तायां चुल्लयाम् । अथ चुल्लयपि पूर्वतप्ता न प्राप्यते तत ईदृशानि दारूणि प्रक्षिप्योपस्करोति, तद्यथा-''सुक्खघणमज्झुसिरमविद्धि''त्ति शुष्काणिवार्द्राणि घनानि-वंशवद् न रन्ध्रयुक्तानि अशुषिराणि-अस्फुटितानि त्वचारहितानि वा अविद्धान-घुणैरकृतच्छिद्राणि । ईदृशानि दारूणि वक्ष्यमाणप्रमाणोपेतानि पूर्वकृतानि च ग्रहीतव्यानि । अथ पूर्वकृतानि न सन्ति ततः स्वयमपि तेषां प्रमाणोपेतत्वं कर्त्तव्यम् । तथा याचमानस्य वैद्यस्य ''दाने''त्ति अर्थजातदानं कर्त्तव्यम् । कथम् ? इति अत आह-''ठवण''त्ति शैक्षेण प्रव्रजता यद् निकुञ्जादिषु द्रविणजातं स्थापितं तस्य दानं कर्त्तव्यम् । ''लिङ्गि''त्ति स्वलिङ्गेन परलिङ्गेन गृहिलिङ्गेन वा अर्थजातमुत्पादनीयम् । ''कल्लाणे''त्ति प्रगुणीभूतस्य ग्लानस्यतत्प्रतिचरकाणां च पञ्चक्याणकं दातव्यम् ।।

अथ प्रक्षिप्यमाणदारूणां प्रमाणादिकमाह-

[भा.१९५७] हत्थद्धमत्त दारुग, निच्छल्लिय अघुनिया अहाकडगा ।
असईइ सयंकरणं, अघट्टणोवक्खडमहाउं ।।

वृ- हस्तार्द्ध-द्वादशाङ्गुलानि तन्मात्राणि-तावत्प्रमाणदैध्योर्पेतानि 'निच्छल्लिकानि' छल्लीरहितानि 'अघुणितानि' घुणैरविद्धानि दारूणि भवन्ति । ईदृशानि च यथाकृतानि ग्रहीतव्यानि । यथाकृतानाम् 'असति' अभावे 'स्वयंकरणम्' आत्मनैव हस्तार्द्धप्रमाणानि क्रियन्ते छल्लिश्चापनीयते इत्यर्थः । उपस्कृते च भक्ते उल्मुकानां घट्टना न कर्त्तव्या किन्तु तेऽग्निजीवा यथायुष्कमनुपाल्य स्वयमेव विध्यायन्ति ।।

अथ पानकयतनामाह-

भा (१९५८] कंजिय-चाउलउदए, उसिणे संसट्ठमेतरे चेव ।
ण्हाण-पियणाइपाणग, पादासइ वार दद्दरए ।।

वृ- पानीयं याचतो वैद्यस्य काञ्जिकं दातव्यम् । यदि तद् नेच्छति ततः 'चाउलोदकं' तन्दुलधावनम् । तदप्यनिच्छत्युष्णोकं वा संसृष्टपानकं वा । 'इतरं' ति प्राशुकमनिच्छति अप्राशुकमपि, यावत् कर्पूरवासितम् । एवं स्नान-पानादिषु कार्येषु पानकं तस्य दातव्यम् । तच्च प्रथमतः पात्रके स्थाप्यते । अथ नास्त्यतिरिक्तं पात्रकं न वाऽसौ तत्र स्थापयितुं ददाति ततो वारके स्थापयित्वा 'दर्दरयति' मुखे घनेन चीवरेण बध्नाति येन कीटिकादयः सत्त्वा नाभिपतन्ति ।।

भावितं भैक्षप-दम् । अथ ''चड्डादि'' त्ति पदं भावयति-

[भा.१९५९] चड्डग सराव कंसिय, तंबक रयए सुवन्न मणिसेले ।
भोत्तुं स एव धोवइ, अनिच्छि किढि खुड्ड वसभा वा ।।

वृ- 'चड्डकं' कमढकं तत्रासौ भोजनं कार्यते । अथ तत्र नेच्छति भोक्तुं ततः शरावे । तत्रानिच्छति कांस्यभाजने ताम्रभाजने वा । तत्राप्यनिच्छति रजतस्थाले सुवर्णस्थाले मणिशैलमये वा भाजने भोजयितव्यः । भुक्त्वा चासौ स्वयमेव तद् भाजनं धावति । अथ नेच्छति धावितुं ततः 'किढी' स्थविरश्राविका सा प्रक्षालयति । तस्या अभावे क्षुल्लकाः । क्षुल्लकाणामभावे वृषभाः ।।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

शिष्यः पृच्छति-कथमसंयतस्य संसृष्टभाजनं संयतः प्रक्षालयति ? किं निमित्तं वा वैद्यस्य मज्जनादिकमियत् परिकर्म क्रियते ? उच्यते-

[भा.१९६०] पूयाईणि वि मग्गइ, जह विज्जो आउरस्स भोगट्ठी ।
तह विज्जे पडिकम्मं, करिंति वसभा वि मुक्खट्ठा ॥

वृ- यथा वैद्यः 'भोगार्थी' भोगाङ्गद्रव्याभिलाषी 'आतुरस्य' रोगिणः 'पूयादीन्यपि' पूयं-पक्वरक्तं तदादीनि आदिशब्दात् शोणितप्रभृतीन्यप्यशुचिस्थानानि 'मार्गयति' शोधयति तथा वृषभा अपि मोक्षार्थं वैद्यस्य सर्वमपि 'प्रतिकर्म' मज्जनादिकं कुर्वन्ति ॥

यस्तु न कुर्यात् तस्य प्रायश्चित्तमाह-

[भा.१९६१] तेइच्छियस्स इच्छानुलोमगं जो न कुज्ज सइ लाभे ।
अस्संजमस्स भीतो, अलस पमादी व गुरुगा से ॥

वृ- चिकित्सया चरति जीवति वा चैकित्सिकः-वैद्यस्तस्य या मज्जनादाविच्छा तस्याः अनुलोमम्-अनुकूलं प्रतिकर्म 'सति लाभे' लाभसम्भवे "अस्संजमस्स भीउ" त्ति पञ्चम्यर्थे षष्ठी 'असंयमाद्' असंयतवैयावृत्त्यकरणलक्षणाद् भीतोऽलसः प्रमादी वा यो न कुर्यात् तस्य चत्वारो गुरुकाः ॥

अथ ग्लान-वैद्ययोर्वैयावृत्त्यकारणान्युपदर्शयति-

[भा.१९६२] लोगविरुद्धं दुप्परिचओ उ कयपडिकिई जिनाणा य ।
अतरंतकारणेते, तदट्ठ ते चेव विज्जम्मि ॥

वृ- ग्लानस्य यदि वैयावृत्त्यं न क्रियते ततो लोकविरुद्धं भवति, लोको ब्रूयात्-धिगमीषां धर्मं यत्रैवं मान्द्यसम्भवेऽपीदृशमनाथत्वमिति । तथा परस्परमेकप्रवचनप्रतिपत्त्यादिना यः कोऽपि लोकोत्तरिकः सम्बन्धः सः 'दुष्परित्यजः' दुष्परिहर इति ग्लानस्य वैयावृत्त्यं कार्यम् । कृतप्रतिकृतिश्चैवं कृता भवति, यत् तेन ग्लानेन पूर्वं हृष्टेन सता यदात्मन उपकृतं तस्य प्रत्युपकारः कृतो भवतीति भावः । 'जिनानां' तीर्थकृतां या 'आज्ञा' अग्लान्या ग्लानस्य वैयावृत्त्यं कुर्यात्' इत्यादिलक्षणा सा कृता भवति । एतानि अतरन्तः-ग्लानस्तस्य वैयावृत्त्ये कारणानि । 'तदर्थं' ग्लानार्थं यद् वैद्यस्य वैयावृत्त्यकरणं तत्रापि 'तान्येव' लोकविरुद्धपरिहारादीनि कारणानि द्रष्टव्यानि ॥

अथ ग्लानस्य मज्जनादिविधिमतिदिशन्नाह-

[भा.१९६३] एसेव गिलाणम्मि वि, गमो उ खलु होइ मज्जणाईओ ।
सविसेसो कायव्वो, लिंगविवेगेण परिहीणो ॥

वृ- एष एव ग्लानेऽपि मज्जनादिकः 'गमः' प्रकारो भवति, यथा वैद्यविषय उक्तः । नवरं 'सविशेषः' भक्ति-बहुमानादिविशेषसहितो लिङ्गविवेकेन परिहीनः सर्वोऽपि कर्त्तव्यः ॥

अथ ग्लान-वैद्ययोरनुवर्त्तनाया महार्थत्वं दर्शयन्नाह-

[भा.१९६४] को वोच्छिइ गेलन्ने, दुविहं अनुअत्तणं निरवसेसं ।
जह जायइ सो निरुओ, तह कुज्जा एस संखेवो ॥

वृ- ग्लान्ये सति या द्विविधा अनुवर्त्तना-ग्लानविषया वैद्यविषया च तां 'निरवशेषां' सम्पूर्णां को नाम वक्ष्यति ? बहुवक्तव्यत्वाद् न कोऽपीत्यभिप्रायः । अतो यथाऽसौ ग्लानो नीरुग् जायते तथा कुर्यात् । एषः 'सङ्क्षेपः' सङ्ग्रहः, उपदेशसर्वस्वमिति यावत् ॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

अथ वैद्यस्य दानं दातव्यं तत्र विधिमाह-

[भा.१९६५] आगंतु पउण जायण, धम्मावण तत्थ कइयदिट्ठंतो।
पासादे कूवादी, वत्थुक्कुरुडे तहा ओही॥

वृ- ग्लाने प्रगुणे जाते सति आगन्तुकवैद्यो यदा दक्षिणां याचते तदा तस्यानुशिष्टिर्दातव्या-यथा न वर्त्तते यतीनां हस्ताद् वेतनकं ग्रहीतुम्, मुधाकृतममीषां बहुफलं भवति, अपि च 'धर्मापणः' धर्मव्यवहरणहट्टोऽयमस्माकम्, अतो यदत् सम्भवति तदेव ग्रहीतव्यम्। क्रयिकदृष्टान्तश्च तत्रोच्यते। यथा- केनचित् क्रयिकेण गान्धिकापणे रूपकान् निक्षिप्य भणितम्-ममैतैः किञ्चिद् भाण्डजातं दद्याः। ततः सोऽन्यदा तत्रापणे मद्यं मार्गयितुं लग्नः। वणिजा प्रोक्तः-ममापणे गन्धपण्यमेव व्यवह्रियते, नास्ति मम मद्यम्, अतस्त्वं गन्धपण्यं गृहाणेति। एवमस्माकमपि धर्मापणाद् धर्मं गृह्णातु भवान्, नास्ति द्रविणजातम्॥ इत्युक्ते यदि नोपरमते ततः शैक्षेण प्रव्रजता यद् निकुञ्जादिषु परिष्ठापितं तदानीय दीयते। तस्याभावे यद् उत्सन्नस्वामिकं कापि प्रासादे कूपे वा आदिशब्दाद् निर्धमनादिषु वा निधानं तथा शटितपतितं यद् वास्तु-गृहं तद् उत्कुरुटमिवेति कृत्वा वास्तूत्कुरुटमुच्यते तत्र वा यद् निधानं तद् अवधिज्ञानिन उपलक्षणत्वाद् दशपूर्विप्रभृतीनां वा पार्श्वे पृष्ट्वा ततः प्रासादादिस्थानादानीय वैद्यस्य दातव्यम्॥

वास्तव्यवैद्यस्य दानविधिमाह-

[भा.१९६६] वत्थव्व पउण जायण, धम्मादानं पुनो अनिच्छंते।
स च्चेव होइ जयणा, रहिए पासायमाईया॥

वृ- प्रगुणीभूते ग्लाने वास्तव्यवैद्योऽपि यदि याचनं कुरुते ततस्तस्यापि धर्म एवादानं-द्रव्यं तद् दातव्यम्। "पुनो अनिच्छंते" त्ति 'पुनः' भूयो भूयः प्रज्ञाप्यमानोऽपि यदि धर्मादानं नेच्छति तदा पश्चात्कृतादिभिर्गृहस्थै रहिते सैव प्रासादादिका यतना कर्त्तव्या या अनन्तरगाथायामभि-हिता॥

द्वयोरप्यागन्तुक-वास्तव्यवैद्ययोरुपधिं याचतोर्विधिमाह-

[भा.१९६७] उवहिम्मि पडगसाडग, संवरणं वा वि अत्थुरणगं वा।
दुगभेदादाहिंडणऽनुसट्ठि परलिंग हंसाई॥

वृ- 'उपधौ' उपकरणे 'पटशाटकः' परिधानं 'संवरणं' प्रच्छदपटः 'आस्तरणं' प्रस्तरणकं तूली वा यद्येतानि मार्गयति ततस्तथैव धर्मापणदृष्टान्तः क्रियते। अथ नोपरमते ततो द्विकं-साधुयुग तल्लक्षणो यो भेदः-प्रकारसतेन आदिशब्दाद् वृन्देन वा हिण्डित्वा पटशाटकादिकमुत्पाद्य वैद्यस्य प्रयच्छन्ति। अथ सर्वथैव न प्राप्यते ततोऽनुशिष्टिः-धर्मकथादीनि प्रयोक्तव्यानि। तथाऽप्यनुपरतस्य परलिङ्गं कृत्वा हंसादिप्रयोगेणोत्पाद्य प्रयच्छन्ति॥

द्वितीयपदे न दद्यादपि, यत आह-

[भा.१९६८] बिइयपदे कालगए, देसुट्ठाणे व बोहिगाईसु।
असिवाई असईइ व, ववहारऽपमाण अदसाई॥

वृ- द्वितीयपदे वैद्ये ग्लाने वा कालगते सति वस्त्रादिकं न दय्दादपि। यद्वा बोधिकाः-म्लेच्छास्तेषाम् आदिशब्दात् परचक्रस्य वा भयेन 'देशस्योत्थाने' उद्वसीभवने। अशिवे वा आदिग्रहणाद् दुर्भिक्षे

Jain Education International For Private & Personal Use Only www.jainelibrary.org

राजद्विष्टे वा सञ्जाते सति। 'असति वा' सर्वथैव स्त्राणामलाभे व्यवहारः क्रियते, व्यवहारेण च निर्जितस्य न प्रयच्छन्ति, व्यवहारेण वा कारणिकैर्दाप्यमानाः प्रमाणहीनानि 'अदशाकानि' वस्त्राणि दर्शयन्ति-अस्माकमीदृशान्येव स्वाधीनानि न सन्ति ॥

अथ द्रविणजातं मार्गयति वैद्ये विधिमाह-

[भा.१९६९] कव्वड्डगमादी तंबे, रुप्पे पीते तहेव केवडिए।
हिंडण अनुट्ठादी, पूइयलिंगे तिविह भेदो ॥

वृ-कपर्दकादयो मार्गयित्वा तस्य दीयन्ते। ताम्रमयं वा नाणकं यद् व्यवह्रियते, यथा-दक्षिणापथे काकिणी। रूपमयं वा नाणकं भवति, यथा-भिल्लमालेद्रम्मः। पीतं नामसुवर्णं तन्मयं वा नाणकं भवति, यथा-पूर्वदिशे दीनारः। 'केवडिको नाम' यथा तत्रैव पूर्वदिशे केतराभिधानो नाणक-विशेषः। एतेषामप्युत्पादनं कुर्वता सङ्घाटकेन वृन्देन वा हिण्डनं तथैव कर्त्तव्यम्। अलब्धेऽनुशिष्टयादीनि प्रयोक्तव्यानि। लिङ्गमिति पदं व्याख्यायते-पूजितम्-अर्चितं यल्लिङ्गं तत्र त्रिविधो भेदः कर्त्तव्यः। किमुक्तं भवति? -तस्मिन् देशे यत् त्रयाणां स्वलिङ्ग-गृहिलिङ्ग-कुलिङ्गानां मध्यात् पूजितं तेन लिङ्गेन द्रविणजातमुत्पादयन्ति वैद्यं वा प्रज्ञापयन्ति ॥

द्वितीयपदे द्रविणजातमपि न दद्यात्, कथम्? इत्याह-

[भा.१९७०] बिइयपदे कालगए, देसुट्ठाणे व बोहियादीसु
असिवादी असईइ व, ववहारऽहिरन्नगा समणा ॥

वृ- द्वितीयपदे वैद्ये ग्लाने वा कालगते सति, देशस्य वा बोधिकादिभयेनोत्थाने-उद्वसने, अशिवादौवा सञ्जाते, 'असत्तायां वा' सर्वथैवालाभेऽर्थजातं वैद्यस्य न दद्यात्। व्यवहारे च समुपस्थिते ब्रुवते-अहिरण्यकाः श्रमणा भवन्तीति तावत् सर्वत्रापि सुप्रतीतम्, परं तथाप्येतेनारब्धैरस्माभिस्तदपि द्रविणजातं गवेषयितुमारब्धम्, ततो लोको ब्रवीति-न वर्त्तते शिष्टानां यतिभ्यो हिरण्यादि दातुम्।

यत उक्तम्-

गृहस्थस्यान्नदानेन, वानप्रस्थस्य गोरसात्।
यतीनां च हिरण्येन, दाता स्वर्गं न गच्छति ॥ इति।

एवं व्यवहारो लभ्यते ॥

अथ कल्याणकपदं व्याख्यानयति-

[भा.१९७१] पउणम्मि य पच्छित्तं, दिज्जइ कल्लाणगं दुवेण्हं पि।
वूढे पायच्छित्ते, पविसंती मंडलिं दो वि ॥

वृ- ग्लाने प्रगुणीभूते सति 'द्वयोरपि' ग्लान-प्रतिचरवर्गयोः 'कल्याणकं' प्रायश्चित्तं दीयते। इहैवमविशेषेणोक्तेऽपि ग्लानस्य पञ्चकल्याणकं प्रतिचरकाणां त्वेककल्याणकं दातव्यम्, आदेशान्तरेण वा द्वयोरपि पञ्चकल्याणकं मन्तव्यम्। आह च निशीथचूर्णिकृत्- आदेसन्तरेण वा दुण्ह वि पंचकल्लाणं ति। ततो व्यूढे प्रायश्चित्ते 'द्वावपि' ग्लान-प्रतिचरकवर्गौ भोजनादिमण्डलीं प्रविशतः ॥

अथोपसंहरन्नाह-

Jain Education International For Private & Personal Use Only www.jainelibrary.org

[भा.१९७२] अनुयत्तणा उ एसा, दव्वे विज्ने य यन्निया दुविहा।
इत्तो चालणदारं, वुच्छं संकामणं चुभओ ॥

वृ-ग्लानप्रायोग्यद्रव्यविषया वैद्यविषया चैषा द्विविधाऽवर्त्तना वर्णिता। इत ऊर्ध्वं चालनाद्वारं सङ्क्रामणद्वारं च 'उभयतः' ग्लानद्वयविषयं वक्ष्ये ॥

[भा.१९७३] विज्जस्स व दव्वस्स व, अट्ठा इच्छंते होइ उक्खेवो।
पंथो य पुव्वदिट्ठो, आरक्खिओ पुव्वभणिओ उ ॥

वृ- वैद्यस्य वा 'द्रव्यस्य' औषधादिलक्षणस्य वा अर्थाय यदि ग्लान इच्छति ग्रामान्तरं गन्तुं तदा तस्य 'उत्क्षेपः' चालना कर्त्तव्या। यदि रात्रौ गन्तव्यं भवति तदा पन्थाः पूर्वमेव दृष्टः कर्त्तव्यः। आरक्षिकश्च पूर्वमेव 'वयं रात्रौ ग्लानं गृहीत्वा गमिष्यामः, भवता चौरादिशङ्कया न ग्रहीतव्याः' इति भणितः कर्त्तव्य इति ॥

अथास्या एव निर्युक्तिगाथायाः पूर्वार्द्धं भावयति-

[भा.१९७४] चउपाया तेगिच्छा, इह विज्ञा नत्थि न वि य दव्वाइं।
अमुगत्थ अत्थि दोन्नि वि, जइ इच्छसि तत्थ वच्चामो ॥

वृ-क्वापि क्षेत्रे वैद्या औषधानि वा न सन्ति ततो ग्लानं प्रतिचरका ब्रुवीरन्-चिकित्सा चतुष्पादा पूर्वोक्तनीत्या भवति, तत्रेह क्षेत्रे वैद्या न सन्ति नापि च 'द्रव्याणि' औषधादीनि अत्र सन्ति, अमुकत्र ग्रामे नगरे वा द्वे अपि विद्येते, अतो यदि त्वमिच्छसि ततस्तत्र व्रजाम इति ॥

ग्लानः प्रतिभणति-

[भा.१९७५] किं काहिइ मेविज्जो, भत्ताइ अकारयं इहं मज्झं।
तुब्भे वि किलेसेमि य, अमुगत्थ महं हरह खिप्पं ॥

वृ- आर्या! यदि नाम अत्र वैद्यो भवति ततः किं ममासौ करिष्यति ? उपलक्षणमिदम्, तेन यद्यौषधान्यपि भवेयुस्तान्यपि मे किं करिष्यन्ति ? यतो भक्तादिकमकारकं ममेह विद्यते, तस्मिंश्चाकारके युष्मानपि मुधैव परिक्लेशयामि।

यत उक्तम्-

भेषजेन विना व्याधि, पथ्यादेव निवर्त्तते।
न तु पथ्यविहीनस्य, भेषजानां शतैरपि ॥

ततो माममुकत्र ग्रामे नगरे वा क्षिप्रं 'हरत' नयत, येन मे तत्र भक्तादि कारकं स्यात्। एवंब्रुवाणोऽसौ ग्रामान्तरं प्रति चालयितव्यः ॥

चालनायामेव कारणान्तरमाह-

[भा.१९७६] सानुप्पगभिक्खट्ठा, खीणे दुद्धाइयाण वा अट्ठा।
अब्भिंतरेतरा पुन, गोरससिंभुदय-पित्तट्ठा ॥

वृ- नागरं ग्लानं सानुप्रगे-प्रत्यूषवेलायां लभ्यते या भिक्षा सा सानुप्रगभिक्षा तदर्थं ग्रामं नयन्ति। नगरे हि प्राय उत्सूरे भिक्षा लभ्यते, तावतीं च वेलां प्रतीक्षमाणस्य ग्लानस्य कालातिक्रान्तभोजित्वेन जाठराग्निमान्द्यमुपजायते, अतः सानुप्रगे-सवारमेव भिक्षा यद्ग्रामे लभ्यते

Jain Education International For Private & Personal Use Only www.jainelibrary.org

तदर्थं ग्लानो ग्रामं नीयते। नगरे वा दुग्धादीनि दुर्लभद्रव्याणि क्षीणानि अतस्तेषामर्थाय आभ्यन्तराः-नगरवास्तव्यसाधवो ग्लानमन्यत्र नयन्ति। 'इतरे पुनः' ग्रामीणग्लानप्रतिचरका ग्लानस्य गोरसेन उपलक्षणत्वादन्येन तादृशेन श्लेष्मजनकद्रव्येण सिम्भः-श्लेष्मा तस्योदयो जातः पित्तं वा क्षुभितमिति परिभाव्य तदुपशामकद्रव्याणामुत्पादनार्थं ग्लानं नगरं नयन्ति ॥

अथवा नागरग्लानचालनायामिदं कारणम्-

[भा.१९७७] परिहीनं तं दव्वं, चमढिज्जंतं तु अन्नमन्नेहिं।
कालाइक्कंतेण य, वाही परिवड्ढिओ तस्स ॥

वृ-अन्यान्यग्लानसङ्घाटकैः स्थापनाकुलेषु चमढ्यमानं सत् परिक्षीणं 'तद् द्रव्यं' ग्लानप्रायोग्यम्, अथवा वैद्येन ग्लानस्योपदिष्टम्-सवारमेव भवता भोक्तव्यम्; तदानीं च नगरे न लभ्यते ततस्तेन कालातिक्रान्तेन तस्य व्याधि सुष्ठुतरं परिवर्द्धितः ॥

एवमादीनि कारणानि विज्ञाय ते परस्परं भणन्ति-

[भा.१९७८] उक्खिप्पऊ गिलाणो, अन्नं गामं वयं तु नेहामो।
नेऊण अन्नगामं, सव्वपयत्तेण कायव्वं ॥

वृ- उत्क्षिप्यतां ग्लानः, यतस्तमन्यं ग्रामं वयं नेष्याम इत्येकवाक्यतया निश्चित्य सवारमेव तैर्निर्गन्तव्यम्। यतः प्रत्युषसि शीतलायां वेलायां नीयमानो ग्लानो न परिताप्यते।

किञ्च-

प्रत्युषसि हता मार्गाः, परिहासहताः स्त्रियः
मन्दबीजं हतं क्षेत्रं, हतं सैन्यमनायकम् ॥

ततो नीत्वा ग्लानमन्यं ग्रामंसर्वपरयत्नेन प्रतिचरणं कर्त्तव्यमिति ॥

गतं चालनाद्वारम्।

अथ सङ्क्रामणाद्वारमाह-

[भा.१९७९] सो निज्जई गिलाणो, अंतर सम्मेलणा य संछोभो।
नेऊण अन्नगामं, सव्वपयत्तेण कायव्वं ॥

वृ-एमुत्क्षिप्य यं ग्रामं 'सः' नागरग्लानो नीयते ततो ग्रामादन्यो ग्लानो नगरमानीयमानोऽस्ति तेषामुभयेषामपि साधूनाम् 'अन्तरा' अपान्तराले सम्मिलना भवति ततः परस्परं वन्दनं कृत्वा निराबाधं पृष्ट्वा ग्लानयोः 'संछोभं' सङ्क्रामणं कुर्वन्ति, नागरा ग्रामीणग्लानं गृह्णन्ति ग्रामीणास्तु नागरग्लानमित्युक्तं भवति। नीत्वा चान्यं ग्रामं सर्वप्रयत्नेन प्रतिचरणमुभयैरपि कर्त्तव्यम् ॥

किं पुनरभिधाय ते ग्लानसङ्क्रामणां कुर्वन्ति ?

इति उच्यते-

[भा.१९८०] जारिस दव्वे इच्छह, अम्हे मुत्तूण ते न लब्भिहिह।
इयरे वि भणंतेवं, नियत्तिमो नेह अतरंते ॥

वृ-नागरा ग्रामेयकान् ब्रुवते-'यादृशानि' तिक्त-कटुकादीनि द्रव्याणि ग्लानार्थमिच्छत 'तानि' तादृशानि अस्मान् 'मुक्त्वा' विना न लप्स्यध्वे। 'इतरेऽपि' ग्रामेयका नागरान् एवं भणन्ति-यूयमस्माभिर्विना दुग्धादीनि न लप्स्यध्वे। ततस्ते द्वयेऽपि परस्परमभिदधति-यद्येवं ततो निवर्त्तामहे,

Jain Education International For Private & Personal Use Only www.jainelibrary.org

यूयममुम् 'अतरन्तं' ग्लानं नयत, वयं युष्मदीयं नयाम इति ॥

एवं सङ्क्रामणां कृत्वा तत्रच ग्रामे नगरे वा नीत्वा सर्वप्रयत्नेन प्रतिचरणा विधेया । न पुनर्निर्धर्मतयेत्थं चिन्तनीयं भणनीयं वा-

[भा.१९८१] देवा हुने पसन्ना, जं मुक्का तस्स ने कयंतस्स ।
सो हु अइतिक्खरोसो, अहिगं वावारणासीलो ॥

[भा.१९८२] तेनेव साइया मो, एयस्स वि जीवियम्मि संदेहो ।
पउणो वि न एसऽम्हं, ते वि करिज्ञा न व करिज्ञा ॥

वृ- 'हुः' अवधारणे, नूनं "ने" अस्माकं देवाः प्रसन्नाः यद् मुक्ता वयं तस्मात कृतान्तात्, गाथायां पञ्चम्यर्थे षष्ठी। इह कृतान्तशब्देन कृतं-निष्पादितं बह्वपि कार्यमन्तं नयतीति व्युत्पत्त्या कृतघ्न उच्यते, यद्वा कृतान्तः-यमस्तत्तुल्यत्वादसावपि कृतान्तः । अत एवाह- स हि 'अतितीक्ष्णरोषः' पुनः पुना रोषणशीलो दीर्घरोषी वेत्यर्थः । 'अधिकम्' अत्यर्थं 'व्यापारमाशीलः' कृताकृतेषु कार्येषु भूयो भूयो नियुङ्क्ते । यद्वा तेनैव ग्लानेन 'सादिताः' खेदं प्रपिता वयमतोऽस्य कर्त्तु न शक्नुमः । अथवा एतस्यापि जीविते सन्देहस्ततः किं निरर्थकमात्मानं परिक्लेशयामः ?, प्रगुणीभूतोऽपि चैष नास्माकं भविष्यि, तेऽप्यस्मदीयस्य कुर्युर्वा न वा, अतो वयमपि न कुर्महे । एवमादीनि ब्रुवाणानां तेषां निर्धर्माणामाचार्येण शिक्षा दातव्या न तूपेक्षा विधेया ॥

यत आह-

[भा.१९८३] जो उ उवेहं कुज्ञा, आयरिओ केणई पमादेणं ।
आरोवणा उ तस्सा, कायव्वा पुव्वनिद्दिट्ठा ॥

वृ- 'यस्तु' यः पुनराचार्य केनापि प्रमादेन प्रमत्तः सन्नुपेक्षां कुर्यात् तस्यारोपणा पूर्वनिर्दिष्टा कर्त्तव्या, चत्वारो गुरव इत्यर्थः ॥

अथवेयमारोपणा-

[भा.१९८४] उवेहऽप्पत्तिय परितावण महय मुच्छ किच्छ कालगए ।
चत्तारि छ च्च लहु-गुरु, छेओ मूलं तह दुगं च ॥

वृ- यो ग्लानस्योपेक्षां करोति तस्य चत्वारो गुरुकाः । उपेक्षायां कृतायां यद्यप्रीतिकं ग्लानस्य जायते ततोऽपि चत्वारो गुरवः । अनागाढपरितापे चतुर्लघु । आगाढपरितापे चतुर्गुरु । महादुःखे षडलघु । मूर्च्छायां षड्गुरु । कृच्छ्रप्राणे च्छेदः । कृच्छ्रोच्छ्वासे मूलम् । समवहतेऽनवस्थाप्यम् । कालगते पाराञ्चिकम् ॥

[भा.१९८५] उवेहोभासण परितावण महय मुच्छ किच्छ कालगए ।
चत्तारि छ च्च लहु-गुरु, छेओ मूलं तह दुगं च ॥

वृ- उपेक्षायां स ग्लानः स्वयमेव गत्वा गृहस्थानवभाषते चत्वारो लघवः । तस्य तत्र गच्छतः शीत-वाता-ऽऽतपैः परिश्रमेण वाऽनागाढपरितापनादीनि जायन्ते ततः प्रायश्चित्तमनन्तर-गाथोक्तनीत्या द्रष्टव्यम् ॥

[भा.१९८६] उवेहोभासण ठवणे, परितावण महय मुच्छ किच्छ कालगए ।
चत्तारि छ च्च लहु-गुरु, छेदो मूलं तह दुगं च ॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

वृ- उपेक्षायां ग्लानो भक्त-पानमौषधं वा अवभाषणेनोत्पाद्य स्थापयति न शक्नोम्यहं दिने दिने पर्यटितुं ततश्चत्वारो गुरवः । तेन परिवासितेन शीतलत्वाद् अनागाढपरितापनादीन्युपजायन्ते प्रायश्चित्तयोजना प्राग्वत् ॥

[भा.१९८७]उवेहोभासण करणे, परितावण महय मुच्छ किच्छ कालगए ।
चत्तारि छ च्च लहु-गुरु, छेदो मूलं तह दुगं च ॥

वृ- उपेक्षायां कृतायां यदि ग्लानोऽवभाष्य स्वयमेवौषधादिकं करोति गृहस्थैर्वा कारयति तदा चत्वारो गुरवः । स्वयंकुर्वतश्चिकित्साद्यनभिज्ञैर्गृहस्थैर्वा चिकित्सां कारयतोऽनागाढपरिता-पादीनि भवन्ति । शेषं प्राग्वत् ॥

[भा.१९८८] वेहानस ओहाणे, सलिंगपडिसेवणं निवारिंते ।
गुरुगा अनिवारिंते, चरिमं मूलं च जं जत्थ ॥

वृ-अप्रतिजागरितो ग्लानो यदि निर्वेदेन वैहायसंमरणमभ्युपगच्छति ततस्तेषामप्रतिजागरकाणां 'चरमं' पाराञ्चिकम् । अथ 'अवधावनम्' उत्प्रव्रजनं करोति ततो मूलम् । स्वलिङ्गस्थितो यद्यकल्प्यप्रतिसेवनां करोति ततश्चतुर्गुरुकाः । यदि तं तथा प्रतिसेवमानं निवारयति तदापि चतुर्गुरुकाः । अथ न निवारयति ततो यद् यत्र अप्राशुकेऽनेषणीये वा गृह्यमाणे प्रायश्चित्तं तत् तत्र प्राप्नोति ॥

अथ निर्द्धर्मा येषु स्थानेषु ग्लानं त्यजेत् तान्याह-

[भा.१९८९] संविग्गा गीयत्थाऽसंविग्गा खलु तहेव गीयत्था ।
संविग्गमसंविग्गा, नवरं पुन ते अगीयत्था ॥

[भा.१९९०] संविग्ग संजईओ, गीयत्था खलु तहेवऽगीयत्था ।
गीयत्थ अगीयत्था, नवरं पुन ता असंविग्गा ॥

वृ- संयताश्चतुर्द्धा, तद्यथा-संविग्ना गीतार्थाः १ असंविग्ना गीतार्था २ संविग्ना अगीतार्थाः ३ असंविग्ना अगीतार्थाश्च ४ इति ।

संयत्योऽपि चतुर्विधाः, तद्यथा-संविग्ना गीतार्था १ संविग्ना अगीतार्थाः २ असंविग्ना अगीतार्थाः ३ असंविग्ना अगीतार्थाश्च ४ इति ।

एतेष्वष्टसु स्थानेषु ग्लानं परित्यजतः प्रायश्चित्तमाह-

[भा.१९९१] चउरो लहुगा गुरुगा, छम्मासा होंति लहुग गुरुगा य ।
छेदो मूलं च तहा, अनवट्ठप्पो य पारंची ॥

वृ-प्रथमे स्थाने ग्लानं परित्यजति चत्वारो लघुकाः । द्वितीये चत्वारो गुरुकाः । तृतीये षण्मासा लघवः । चतुर्थे षण्मासा गुरवः । पञ्चमे च्छेदः । षष्ठे मूलम् । सप्तमेऽनवस्थाप्यः । अष्टमे पाराञ्चिको भवति ॥

यदि वा-

[भा.१९९२] संविग्ग नीयवासी, कुसील ओसन्न तह य पासत्था ।
संसत्ता विंठाया, अहछंदा चेव अट्ठमगा ॥

वृ-संविग्नाः १ नित्यवासिनः २ कुशीलाः ३ अवसन्नाः ४ पार्श्वस्थाः ५ संसक्ताः ६ वेण्ठकाः

Jain Education International For Private & Personal Use Only www.jainelibrary.org

७ यथाच्छन्दाश्चैवाष्टमाः ८ ॥

एतेषु परित्यजतो यथासङ्ख्यमिदं प्रायश्चित्तम्-

[भा.१९९३] चउरो लहुगा गुरुगा, छम्मासा होंति लहुग गुरुगा य।
छेदो मूलं च तहा, अणवट्ठप्पो य पारंची ॥

वृ- चत्वारो लघुकाः १ चत्वारो गुरुकाः २ षण्मासा लघुकाः ३ षण्मासा गुरुकाः ४ छेदः ५ मूलं च तथा ६ अनवस्थाप्यश्च ७ पाराञ्चिकः ८ ॥

अथवा-

[भा.१९९४] संविग्गा सिज्ञातर, सावग तह दंसणे अहाभद्दे।
दाने सड्ढी परतित्थिगे य परतित्थिगी चेव ॥

वृ- 'संविग्नाः' प्रतीताः १ 'शय्यातरः' प्रतिश्रयदाता २ 'श्रावकः' गृहीतानुव्रतः ३ दर्शनसम्पन्नः- अविरतसम्यग्दृष्टिः ४ 'यथाभद्रकः' शासनबहुमानवान् ५ 'दानश्राद्धिकः' दानरुचि ६ 'परतीर्थिकः' शाक्यादिपुरुषः ७ 'परतीर्थिकी' शाक्यादिपाषण्डिनी ८ ॥

एतेषु परित्यजतो यथाक्रममिदं प्रायश्चित्तम्-

[भा.१९९५] चउरो लहुगा गुरुगा, छम्मासा होंति लहुग गुरुगा य।
छेदो मूलं च तहा, अणवट्ठप्पो य पारंची ॥

वृ- उक्तार्थाः ॥

अथ क्षेत्रतःप्रायश्चित्तमाह-

[भा.१९९६] उवस्सय निवेसण साही, गाममज्झे य गामदारे य।
उज्ञाने सीमाए, सीममइक्कामइत्ताणं ॥

[भा.१९९७] चउरो लहुगा गुरुगा, छम्मासा होंति लहुग गुरुगा य।
छेदो मूलं च तहा, अणवट्ठप्पो य पारंची ॥

वृ- क्षेत्रान्तरं सङ्क्रामन्नुपाश्रये ग्लानं परित्यज्य यदि गच्छति तदा चत्वारो लगुकाः। उपाश्रयान्निष्काश्य निवेशनं यावदानीय परिहरति चत्वारो गुरुकाः। साहिकायां षण्मासा - लघवः। ग्राममध्ये षण्मासा गुरवः। ग्रामद्वारे च्छेदः। उद्याने मूलम्। ग्रामसीमनि परिष्ठापयति अनवस्थाप्यम्। स्वग्रामसीमानमतिक्राम्य परित्यजन् पाराञ्चिक इति। यत एवमतो न परित्यज-नीयः ॥

कियन्तं पुनः कालमवश्यं प्रतिचरणीयः ? उच्यते-

[भा.१९९८] छम्मासे आयरिओ, गिलाण परियट्टई पयत्तेणं।
जाहे न संथरेज्ञा, कुलस्स उ निवेदणं कुज्ञा ॥

वृ- येन स ग्लानः प्रव्राजितो यस्य वा उपसम्पदं प्रतिपन्नः स आचार्य सूत्रार्थपौरुषीप्रदानमपि परिहृत्य प्रयत्नेन षण्मासान् ग्लानं 'परिवर्त्तयति' प्रतिचरति। यदा षट्स्वपि मासेषु पूर्णेषु स ग्लानः 'न संस्तरेत्' न प्रगुणीभवेत्, यद्वा आचार्य एव स्वयमन्याभिर्गणचिन्ताभिर्न संस्तरेत् ततः 'कुलस्य निवेदनं कुर्यात्' कुलसमवायं कृत्वा तस्य समर्पयेदित्यर्थः ॥

ततः-

Jain Education International For Private & Personal Use Only www.jainelibrary.org

[भा.१९९९] संवच्छराणि तिन्नि य, कुलं पि परियट्टई पयत्तेणं ।
जाहे न संथरिज्ञा, गणस्स उ निवेदणं कुज्ञा ॥

वृ- त्रीन् संवत्सरान् कुलमपि प्रायोग्यभक्त-पानौषधादिभि प्रयत्नेन परिवर्त्तयति । ततस्त्रिषु वर्षेषु पूर्णेषु यदा न संस्तरेत् तदा गणस्य निवेदनं कुर्यात् ॥

ततः-

[भा.२०००] संवच्छरं गणो वी, गिलाण परियट्टई पयत्तेणं ।
जाहे न संथरिज्ञा, संघस्स निवेयणं कुज्ञा ॥

वृ- एकं संवत्सरं यावद् गणोऽपि ग्लानं महता प्रयत्नेन परिवर्त्तयति । ततो यदा न संस्तरेत् ततः सङ्घस्य निवेदनं कुर्यात् । ततः सङ्घो यावज्जीवं तं सर्वप्रयत्नेन परिवर्त्तयति ॥

गाथात्रयोक्तमर्थमेकगाथया संगृह्य प्रतिपादयति-

[भा.२००१] छम्मासे आयरिओ, कुलं तु संवच्छराइँ तिन्नि भवे ।
संवच्छरं गणो वी, जावज्जीवाय संघो उ ॥

वृ- व्याख्यातार्था ॥

एतच्च यो भक्तविवेकं कर्तुं न शक्नोति तमुद्दिश्य द्रष्टव्यम् । यस्तु भक्तविवेकं कर्त्तु शक्नोति तेनाष्टादश मासान् यावत् प्रथमतश्चिकित्सा कारयितव्या, विरतिसहितस्य जीवितस्य पुनः संसारे दुरापत्वात् । ततः परं यदि न प्रगुणीभवति ततो भक्तविवेकः कर्त्तव्य इति । आगाढे कारणजाते सञ्जाते सति ग्लानस्य वैयावृत्त्यं न कुर्यादपि परित्यजेद् वा ग्लानम् ।

किं पुनस्तत् कारणजातम् ? इति उच्यते-

[भा.२००२] असिवे ओमोयरिए, रायदुट्ठे भये व गेलन्ने ।
एएहि कारणेहिं, अहवा वि कुले गणे संघे ॥

वृ- अशिवे समुत्पन्ने सति ग्लानं परित्यजेद् न च प्रायश्चित्तमाप्नुयात् । एवम् अवमौदर्ये राजद्विष्टे 'भये वा' शरीरस्तेनसमुत्थे "गेलन्ने"त्ति सर्वो वा गच्छो ग्लानीभूत इत्यतः कस्य कः प्रतिचरणं करोतु ? एतैः कारणैः, अथवा कुलस्य गणस्य सङ्घस्य वा समर्पिते ग्लाने स्वयमकुर्वन्नपि शुद्धः । परित्यजने त्वियं यतना-अशिवे समुत्पन्ने देशान्तरं सङ्क्रामन् ग्लानमन्येषां प्रतिबन्धस्थितानां साधूनामर्पयति,तेषामभावे शय्यातरादीनां समीपे साधर्मिकस्थलीषु वा देवकुलिकेषु वा निक्षिपन्ति। एवमवमौदर्ये भये च द्रष्टव्यम् । राजद्विष्टे यद्येकस्य गच्छस्य प्रद्वेषमापन्नो राजा ततोऽन्येषां साधूनां समर्पयन्ति, अथ सर्वेषामपि प्रद्विष्टस्ततः श्रावकादिषु निक्षिप्य व्रजन्ति । उत्सर्गतः पुनरेतैरपि कारणैर्न नक्षिपन्ति किन्तु स्कन्धे न्यस्य वहन्तीति ॥

आह च-

[भा.२००३] एएहि कारणेहिं, तह वि वहंती न चेव छड्डिंति ।
असहू वा उवगरणं, छड्डिंति न चेव उ गिलाणं ॥

वृ- एतैः कारणैर्यद्यपि ग्लानो निक्षेप्तुं कल्पते तथापि वहन्ति नैव परित्यज्यित । अथ 'असहिष्णवः' वोढुमसमर्था तत उपकरणं पिरत्यजन्ति नैव ग्लानम् ॥

[भा.२००४] अहवा वि सो भणेज्ञा, छड्डेउ ममं तु गच्छहा तुब्भे ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

होउ त्ति भणिय गुरुगा, इणमन्ना आवई बिइया ॥

वृ- अथवा स ग्लानो भणेत्-मां 'छर्दयित्वा' परित्यज्य यूयं गच्छत । एवमुक्ते यदि कोऽपि साधुः 'भवत्वेवम्' इति भणति तदा तस्य चत्वारो गुरुकाः । 'इयं' वक्ष्यमाणलक्षणा प्रकारान्तरेण 'अन्या' द्वितीया आपदुच्यते ॥

तामेवाह-

[भा.२००५] पच्चंतमिलक्खेसुं, बोहियतेणेसु वा वि पडिएसु ।
जनवय-देसविनासे, नगरविनासे य धोरम्मि ॥

[भा.२००६] बंधुजनविप्पओगे, अमायपुत्ते वि वट्टमाणम्मि ।
तह वि गिलाण सुविहिया, वच्चंति वहंतगा साहू ॥

वृ- प्रत्यन्ताः-प्रत्यन्तदेशवासिनो ये म्लेच्छास्तेषु तथा बोधिकस्तेना नाम-ये मानुषाणि हरन्ति तेषु वा पतितेषु सत्सु यो जनपदस्य-मगधादेः देशस्य वा-तदेकदेशभूतस्य विनाशः-विध्वंसस्तस्मिन्, तथा नगरविनाशे च 'घोरे' रौद्रे उपस्थिते, बन्धुजनानां-स्वज्ञातिलोकोनां मरणभयातिरेकात् पलायमानानां यः परस्परं विप्रयोगस्तस्मिन्, कथम्भूते ?

'अमातापुत्रे' स्वस्वजीवितरक्षणा-क्षणिकतया यत्र माता पुत्रं न स्मरति पुत्रोऽपि मातरं न स्मरति तदमातापुत्रम् "मयूरव्यंसकेत्यादयः" इति समासः तस्मिन्नपि वर्त्तमाने ये 'सुविहिताः' शोभनविहितानुष्ठानास्ते तथापि ग्लानं वहन्तो व्रजन्ति न पुनः परित्यजन्ति ॥

ततोऽसौ ग्लानः प्राह-

[भा.२००७] तारेह ताव भंते !, अप्पाणं किं मएल्लयं वहह ।
एगालंबनदोसेण मा हु सव्वे विनस्सिहिह ॥

वृ- तारयत तावद् भदन्त ! यूयमात्मानमस्मादपारादापत्पारावारात्, किं मां मृतमिव मृतम्-अद्यश्वीनमृत्युसम्भवतया शबप्रायं वहत ? । अपि च 'एकालम्बनदोषेण' मदीयमेव यदेकमालम्बनं तदेव बहूनां विनाशकारणतया दोषस्तेन मा यूयं सर्वे विनङ्क्ष्यथ ॥

[भा.२००८] एवं च भणियमेत्ते, आयरिया नाण-चरणसंपन्ना ।
अचबलमणलिय हितयं, संताणकरिं वइमुदासी ॥

वृ- एवं च ग्लानेन भणितमात्रे सति आचार्या 'ज्ञान-चरणस्पन्नाः' संविग्नगीतार्था इति भावः 'अचपलाम्' अत्रितां त्वराकारमस्य मरणभयस्याभावात् 'अनलीकां' सत्यां सद्भावसारत्वात् 'हिताम्' अनुकूलां परिणामसुन्दरत्वात् 'सन्त्राणकरी' आर्त्तजनपरित्राणकारिणीं वाचमुदाहृत-वन्तः ॥

कथम् ? इत्याह-

[भा.२००९] सव्वजगज्जीवहियं, साहुं न जहामो एस धम्मो णे ।
जति य जहामो साहुं, जीवियमित्तेण किं अम्हं ॥

वृ- सर्वस्मिन् जगति ये जीवाः-त्रस-स्थावरभेदभिन्नास्तेषामभयदायकतया हितं सर्वजगज्जीवहितं साधुं 'न प्रजहिमः' न परित्यजामः, एषोऽस्माकं 'धर्म' समाचारः । यदि च साधुं प्रजहीमस्ततः किमस्माकं 'जीवितमात्रेण' सदाचारजीवितविकलेन बहिप्राणधारणमात्रेण प्रयोजनम् ? न

Jain Education International For Private & Personal Use Only www.jainelibrary.org

किञ्चिदित्यर्थः ॥

[भा.२०१०] तं वयणं हिय मधुरं, आसासंकुरसमुब्भवं सयणो ।
समणवरगंधहत्थी, बेइ गिलाणं परिवहंतो ॥

वृ- 'तद्' एवंविधं वचनं 'हितं' परिणामपथ्यं 'मधुरं' श्रोत्र-मनसां प्रल्हादकं तथाऽऽश्वास एवाङ्कुरः-प्ररोहस्तस्य समुद्भवः-उत्पत्तिर्यस्मात् तद् आश्वासाङ्कुरसमुद्भवम्, ग्लानस्याश्वासप्ररोहबीजमिति भावः, स्वजन इव स्वजनः स आचार्य 'श्रमणवरगन्धहस्ती' यथा हि गन्धहस्ती गजकलभानां यूथाधिपत्यपदमुद्वहमानो गिरिकन्दरादिविषमदुर्गेष्वपि पतितो न तत्परित्यागं करोति, एवमयमपि गणधरपदमनुपालयन् विषमदशायामपि श्रमणवरान्न परित्यजतीति श्रमणवरगन्धहस्तीत्युच्यते, स ग्लानं 'परिवहन्' परिवर्तय न्नेवमनन्तरोक्तं ब्रविति ॥

ततहत्थं तदीय बचनं श्रुत्वा समीपवर्तिनामगारिणामित्थं स्थिरीकरणमुपजायते-

[भा.२०११] जइ संजमो जइ तवो, दढमित्तित्तं जहुत्तकारित्तं ।
जइ बंभं जइ सोयं, एएसु परं न अन्नेसुं ॥

वृ- यदि 'संयमः' पञ्चाश्रवविरमणादिरूपो यदि 'तपः' अनशनादिरूपं 'दृढमैत्रीकत्वं' निश्चलसौहृदं 'यथोक्तकारित्वं' भगवदाज्ञाराधकत्वं यदि 'ब्रह्म' अष्टादशभेदभिन्नं सब्रह्मचर्यं यदि 'शौचं' निरुपलेपता सद्भावसारता वा, एतानि यदि परमेतेष्वेव साधुषु प्राप्यन्ते 'नान्येषु' शाक्यादिपरतीर्थिकेषु, तेषामेवंविधस्य ग्लानप्रतिचरणविधेरभावात् ॥

इत्थं तावद् विषमायामपि दशायां ग्लानो न परित्यक्तव्य इत्युक्तम् ।

अथात्यन्तिके भये तमपरित्यजतां यदि सर्वेषामपि विनाश उपढौकते ततः को विधि ? इत्याह-

[भा.२०१२] अच्चागाढे व सिया, निक्खित्तो जइ वि होज्ज जयणाए ।
तह वि उ दोण्ह वि धम्मो, रिजुभावविचारिणो जेणं ॥

वृ- 'अत्यागाढे' प्रत्यन्तम्लेच्छादिभये, वाशब्दः पातनायाम्, सा च प्रागेव कृता, 'स्यात्' कदाचिद् यतनया निष्प्रत्यपाये प्रदेशे यद्यप्यसौ ग्लानो निक्षिप्तो भवेत् तथापि 'द्वयोरपि' ग्लान-प्रतिचरकवर्गयोः 'धर्म' "सर्वं वाक्यं सावधारणं भवति" इति न्यायाद् धर्म एव मन्तव्यः । कुतः? इत्याह-'येन' कारणेन द्वावपि तौ ऋजुः-अकुटिलो मोक्षं प्रति प्रगुणो यो भावः-परिणामस्तत्र विचरितुं शीलमनयोरिति ऋजुभावविचारिणौ, अशठपरिणामयुक्ताविति भावः ॥

ततश्च-

[भा.२०१३] पत्तो जसो य विउलो, मिच्छत्त विराधना य परिहरिया ।
साहम्मियवच्छल्लं, उवसंते तं विमग्गंति ॥

वृ- तैराचार्यै साधुभिश्च तादृशेऽपि भये सहसैव ग्लानमपरित्यजद्भि 'विपुलं' दिग्विदिक्प्रचारि यशः प्राप्तम् । गाथायां पुंस्त्वनिर्देशः प्राकृतत्वात्, एवमन्यत्रापि यथायोगं लिङ्गव्यत्ययो मन्तव्यः। तथा 'मिथ्यात्वं' तत्परित्यागसमुत्थमन्येषां गृहस्थानां ग्लानस्य वा मिथ्यादर्शनगमनं तत् परिहृतं भवति । विराधना च ग्लानस्यसहायविरहितस्य संयमा-ऽऽत्मविषया सा च परिहृता ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

साधर्मिकवात्सल्यं चानुपालितं भवति । यदा च तदत्यागाढं भयमुपशान्तं भवि तदा 'तं' ग्लानं 'विमार्गयन्ति' शोधयन्तीत्यर्थः ॥

गतं ग्लानद्वारम् । अथ गच्छप्रतिबद्धयथालन्दिकद्वारमाह-

[भा.२०१४] पडिब्धे को दोसो, आगमनेगाणियस्स वासासु ।
सुय-संघयणादीओ, सो चेव गमो निरवसेसो ॥

वृ- प्रतिबन्धनं प्रतिबद्धं गच्छप्रतिबन्ध इत्यर्थः तत्रकारणं यथालन्दिकानां वक्तव्यम् । "को दोसो"त्ति को नाम दोषो भवति यत् ते यथालन्दिका आचार्याधिष्ठिते क्षेत्रे न तिष्ठन्ति ? । "आगमनेगाणियस्स" त्ति यद्याचार्या स्वयं क्षेत्रबहिर्गन्तुं न शक्नुवन्ति तत एकाकिनो यथालन्दिकस्यागमनं गुरूणां समीपे भवति । "वासासु"त्ति वर्षासु उपयोगं दत्त्वा यदि जानाति वर्षं न पतिष्यति तत आगच्छति यथालन्दिको गुरुसमीपे, अन्यथा तु नेति । श्रुत-संहननादिकस्तु गमः स एव निरवशेषो वक्तव्यः यो जिनकल्पिकानाम्, यस्तु विशेषः स प्रागेवोक्तः ॥

अथ प्रतिबद्धपदं व्याख्याति-

[भा.२०१५] सुत्तत्थ सावसेसे, पडिबंधो तेसिमो भवे कप्पो ।
आयरिए किइकम्मं, अंतर बहिया व वसहीए ॥

वृ- सूत्रस्यार्थस्तैर्गृहीतः परमद्यापि 'सावशेषः' न सम्पूर्ण एष तेषां गच्छविषयः प्रतिबन्धो द्रष्टव्यः । तेषां च 'अयं' वक्ष्यमाणः कल्पः, यथा-आचार्यस्यैव 'कृतिकर्म' वन्दनकं तैर्दातव्यं नान्येषां साधूनाम् । तथा यद्याचार्यो न शक्नोति गन्तुं ततोऽन्तरा वा ग्रामस्य बहिर्वा वसतौ यथालन्दिकस्य वाचनां ददाति । एदुत्तरत्र भावयिष्यते ॥

अथ कोदोष इति द्वारम् । शिष्यः पृच्छति-यद्याचार्याधिष्ठिते क्षेत्रे ते तिष्ठेयुस्ततः को दोषः स्यात् ? उच्यते-

[भा.२०१६] नमनं पुव्वब्भासा, अणमे दुस्सील थम्भगासंका ।
आयइ कुक्कुड त्ति य, वातो लोगे ठिई चेव ॥

वृ- यथालन्दिकानां न वर्त्तते आचार्यं मुक्त्वा अन्यस्य साधोः प्रणामं कर्त्तुम्, तथाकल्पत्वात् । ततस्ते क्षेत्रान्तस्तिष्ठन्तः पूर्वाभ्यासाद् 'नमनं' प्रणामं साधूनां कुर्युः । गच्छवासिनश्च यथालन्दिकान् वन्दन्ते, ते पुनर्यथालन्दिकास्तान् भूयो न प्रतिवन्दन्ते, ततस्तेषामनमने लोको ब्रूयात्-'दुःशीलाः' शैलस्तम्भकल्पा अमी, येनान्येषामित्थं वन्दमानानामपि न प्रतिवन्दनं प्रयच्छन्ति, न वा कमप्यालापं कुर्वन्ति । गच्छवासिषु वा लोकस्य स्थाप्यकाशङ्का भवति, अवश्यं स्थाप्याः-दुःशीलत्वादन्दनीयाः कृता अमी, अन्यथा कथं न प्रतिवन्द्यन्ते ?, आत्मार्थिका वा अमी येनाप्रतिवन्दमानानपि वन्दन्ते, 'कौत्कुटिका वा' मातृस्थानकारिणोऽमी लोकपङ्क्तिनिमित्तमित्थं वन्दन्ते । एवं लोके वाद उपाजायते । एतैः कारणैः क्षेत्रबहिस्ते यथालन्दिकास्तिष्ठन्ति । अपि च 'स्थितिरेव' कल्प एवायममीषाम्, यत् क्षेत्राभ्यन्तरे न तिष्ठन्ति ॥

अथामीषामेव कल्पमाह-

[भा.२०१७] दोन्नि वि दाउं गमनं, धारणकुसलसस खेत्तबहि देइ ।
किइकम्म चोलपट्टे, ओवग्गहिया निसिज्ञा य ॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

वृ-आचार्य सूत्रार्थपौरुष्यौ द्वे अपि गच्छवासिनां दत्त्वा यथालन्दिकानां समीपे गमनं करोति। गत्वा च तत्र तेषामर्थं कथयति। अथाचार्यो न शक्नोति तत्र गन्तुं ततो यस्तेषां यथालन्दिकानां मध्ये धारणाकुशलः-अवधारणाशक्तिमान् स क्षेत्रबहिरन्तरा पल्लिकायाः प्रत्यासन्ने भूभागे समायाति, तत्र च गत्वा आचार्यस्तस्यार्थं ददाति। स च श्रुतभक्तिहेतोराचार्याणां 'कृतिकर्म' वन्दनकं दत्त्वा चोलपट्टकद्वितीय औपग्रहिक्यां निषद्यायामुपविष्टश्चार्थं श्रृणोति ॥

अथ "दोन्नि वि दाउं गमनं" इत्यपवदन्नाह-

[भा.२०१८] अत्थं दो व अदाउं,वच्चइ वायावए व अन्नेणं।
एवं ता उडुबद्धे, वासासु य काउमुवओगं ॥

वृ-यद्याचार्यो द्वे अपि पौरुष्यौ दत्त्वा गन्तुं न शक्नोति ततोऽर्थमदत्त्वा, तथाप्यशक्तौ 'द्वावपि' सूत्रार्थावदत्त्वा व्रजति, अन्येन वा शिष्येण स्वशिष्यान् 'वाचयति' वाचनां दापयति। अथाचार्यस्तत्र गन्तुमशक्तस्ततो यथालन्दिक एकः सूरिसमीपमायाति। एवं तावद् ऋतुबद्धे द्रष्टव्यम्।

वर्षासु चशब्दः पुनरर्थे वर्षासु पुनरयं विशेषः-'उपयोगं कृत्वा' 'किं वर्षं पतिष्यति न वा?' इति विमृश्य यदि जानाति पतिष्यति ततो नाचार्याणां समीपमायाति, अथ जानाति न पतिष्यति ततः समायाति ॥

अथ गुरवस्तत्र गताः कथं समुद्दिशन्ति? इत्याह-

[भा.२०१९] संघाडो मग्गेणं, भत्तं पानं च नेइ उ गुरूणं।
अच्चुण्हं थेरा वा, तो अंतरपल्लिए एइ ॥

वृ- 'गुरूणां' यथालन्दिकसमीपमुपगतानां योग्यं भक्तं पानं च गृहीत्वा सङ्घाटकः 'मार्गेण' पृष्ठतो गत्वा तत्र नयति। अथ यावता कालेन यथालन्दिकानामुपाश्रयं गुरवो व्रजन्ति तावता 'अत्युष्णम्' अतीवातपश्चटति 'स्थविरा वा' वार्द्धकवयःप्राप्तास्ते आचार्यास्ततोऽन्तरपल्लिकायामेको यथालन्दिको धारणासम्पन्नः समायाति। तत्र गुरवोऽपि गत्वा तस्य वाचनां दत्वा सङ्घाटकेनानीतं भक्त-पानं समुद्दिश्य सन्ध्यासमये मूलक्षेत्रमायान्ति ॥

अथान्तरपल्लिमपि गन्तुमसमर्थाः गुरवस्ततः किम्?

इत्याह-

[भा.२०२०] अंतर पडिवसभे वा, बिइयंतर बाहि वसभगामस्स।
अन्नवसहीए तीए, अपरीभोगम्मि वाएइ ॥

वृ-अन्तपल्लिका-प्रतिवृषभग्रामयोः 'अन्तरा' अपान्तराले गत्वा यथालन्दिकं वाचयति। तत्र गन्तुमशक्तौ प्रतिवृषभग्रामे। अथ तत्रापि गन्तुं न शक्नोति ततः "बिइयंतर"त्ति द्वितीयं-प्रतिवृषभ-मूलक्षेत्रयोरपान्तराललक्षणं यदन्तरं यत्र गत्वा वाचनां प्रयच्छति। तत्रापि गमनाशक्तौ 'वृषभग्रामस्य' मूलक्षेत्रस्य बहिर्विजने प्रदेशे गत्वा वाचयति। यदि तत्रापि गन्तुं न प्रभविष्णुस्ततो मूलक्षेत्र एवान्यस्यां वसतौ। तत्रापि गन्तुमशक्तौ तस्यामेव मूलवसतावपरिभोग्येऽवकाशे वाचयति ॥

तत्र चेयं सामाचारी-

[भा.२०२१] तस्स जई किइकम्मं, करिंति सो पुन न तेसि पकरेइ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

जा पढइ ताव गुरुणो, करेइ न करेइ उ परेणं ॥

वृ- 'तस्य' यथालन्दिकस्य 'यतयः' गच्छवासिनः साधवः कृतिकर्म कुर्वन्ति, 'स पुनः' यथालन्दिकः 'तेषां' गच्छवासिनां पर्यायज्येष्ठानामपि कृतिकर्म न करोति । यावच्च 'पठति' अर्थशेषमधीते गुरोरपि तावदेव करोति, परतस्तु न करोति, तथाकल्पत्वात् ॥

अमीषामेव मासकल्पविधिमाह-

[भा.२०२२] एक्को वा सवियारो, हवंतऽहालंदियाण छ ग्गामा ।
मासो विभज्जमाणो, पनगेण उ निट्ठिओ होइ ॥

वृ- यदि गुर्वधिष्ठितमूलक्षेत्रस्य बहिरेको ग्रामः 'सविचारः' सविस्तरो वर्त्तते । इह विचारशब्देन विस्तार उच्यते, ततः सह विचारेण वर्त्तते यः स सविचारो विस्तीर्ण इत्यर्थः । आह च चूर्णिकृत्- सवियारो त्ति वित्थिन्नो । ततस्तस्मिन् ग्रामे षड् वीथीः परिकल्प्य यथालन्दिका एकैकस्यां वीथ्यां पञ्च पञ्च दिवसान् भिक्षामटन्ति, तस्यामेव च वीथ्यां वसतिमपि गृह्णन्ति । एवं प्रतिवीथ्यां "पनगेण" रात्रिन्दिवपञ्चकेन मासो विभज्यमानः सन् षड्भिरहोरात्रपञ्चकैः 'निष्ठितः' सम्पूर्णो भवति । अथ नास्ति विस्तीर्णो ग्रामस्ततः "हवंतऽहालंदियाण छ ग्गामा" इति मूलक्षेत्रपार्श्वतो ये लघुतराः षड् ग्रामा भवन्ति तेषु प्रत्येकं पञ्च पञ्च दिवसान् पर्यटतां यथालन्दिकानां तथैव षड्भिरहोरात्रपञ्चकैर्मासः परिपूर्णो भवतीति ॥ गतं गच्छप्रतिबद्धयथालन्दिकद्वारम् ।

अथोपरि दोषा अपवादश्चेति द्वारद्वयमाह-

[भा.२०२३] मासस्सुवरिं वसती, पायच्छित्तं च होंति दोसा य ।
बिइयपदं च गिलाणे, वसही भिक्खं च जयणाए ॥

वृ- मासस्य उपलक्षणत्वात् चतुर्णां वा मासानामुपरि यदि वसति तदा प्रायश्चित्तं दोषाश्च भवन्ति । द्वितीयपदं च 'ग्लाने' ग्लनार्थम् उपलक्षणत्वादशिवादिभिश्च कारणैर्मासस्योर्द्धव- मप्यवस्थानलक्षणं भवति । तत्र च वसतिर्भैक्षं च यतनया ग्रहीतव्यम् ॥

अथैनामेव निर्युक्तिगाथां विवरीषुः पार्यश्चित्तापत्तिस्थानानि तावदाह-

[भा.२०२४] परिसाडिमपरिसाडी, संथाराऽऽहार दुविह उवहिम्मि ।
डगलग-सरक्ख-मल्लग-मत्तगमादीण पच्छित्तं ॥

वृ- संस्तारको द्विधा-परिशाटी अपरिशाटी च । परिशाटी-तृणमयः परिशटति-उत्पाट्यमानः सन्नवश्यंविशीर्यते इतिव्युत्पत्तेः, तद्विपरीतो अपरिशाटी फलकादिरूपः । एवं द्विविधमपि संस्तारकं यत्रम मासकल्पं वर्षावासं वा कृतवन् तत्रैव ग्रामादौ गृह्णतः । एवमाहारमपि तेष्वेव कुलेषु गृह्णतः । औधिकौपग्रहिकभेदाद् द्विविधो य उपधिस्तस्मिंश्च तत्रैव गृह्यमाणे । तथा डगलकानि- पुतप्रोञ्छनलेष्टुकाः सरजस्कः-क्षारः मल्लक-मात्रके प्रतीते तेषामादिशब्दात् काष्ठकिलिञ्चादीनां च तत्रैव ग्रहणे प्रायश्चित्तं वक्ष्यमाणलक्षणं भवति ॥

[भा.२०२५] ओवासे संथारे, वीयारुच्चार वसहि गामे य ।
मास-चउम्मासाधिगवसमाणे होइमा सोही ॥

वृ- तथा 'अवकाशः' प्रतिश्रयैकदेशः 'संस्तारः' संस्तारकभूमि, एतौ पूर्वपरिभुक्तावेव परि- भुङ्क्ते । 'विचारः' प्रश्रवणम् 'उच्चारः' संज्ञा, एतौ तत्रैव स्थण्डिले समाचरति । वसतिं प्राक्परिभुक्तां

Jain Education International For Private & Personal Use Only www.jainelibrary.org

परिभुङ्क्ते। ग्रामस्योपरि ममत्वं करोति, यद्वाऽवकाशादिषु सर्वेष्वपि ममत्वं करोति। तथा ऋतुबद्धेमासाधिकंवर्षावासेचतुर्मासाधिकंवसति।एतेषुस्थानेषु 'इयम्' अनन्तरमेव वक्ष्यमाणा शोधिः॥

तामेवाह-

[भा.२०२६] उक्कोसोवहि-फलए, वासातीए अ होंति चउलहुगा।
डगलग सरक्ख मल्लग, पनगं सेसेसु लहुओ उ॥

वृ-उत्कृष्टे उपधौ-वर्षाकल्पादिके फलके च तत्रैव गृह्यमाणे वर्षातीते चत्वारो लघवः। डगलक-सरजस्क-मल्लकेषु उपलक्षणत्वात् काष्ठ-किलिञ्चादौ च रात्रिन्दिवपञ्चकम्। 'शेषेषु' परिशाटिसंस्तारकादिषु सर्वेष्वपि अनन्तरगाथाद्वयोक्तेषु स्थानेषु लघुको मासः॥

अथ मासाद्युपरि तिष्ठतो दोषानाह-

[भा.२०२७] संवासे इत्थिदोसा, उग्गमदोसा व नेहतो कुज्जा।
चमढण गिलाणदुल्लभ, वारत्तिसिभासियाहरणं॥

वृ- ऋतुबद्धे वर्षावासे वा यथोक्तकालावधेरुपरि 'संवासे' एकत्रावस्थाने क्रियमाणे सन्दर्शनसम्भाषणादिना स्त्रीविषया आत्मपरोभयसमुत्थादोषा भवेयुः। प्रभूतकालावस्थानतश्च साधूनामुपरि भद्रकगृहिणां गाढतरः स्नेह उपजायते, ततश्च ते स्नेहतः 'उद्गमदोषान्' आधाकर्मादीन् कुर्युः। ये तु प्रान्ता गृहपतयस्ते ब्रूयुः-कियद्भिरमस्माभिरमीषामद्यापि दातव्यं तिष्ठति? इति। अतिचमढणया च क्षेत्रं नीरसं भवति, ततो ग्लानस्य उपलक्षणत्वादाचार्यादीनां च प्रायोग्यं दुर्लभं भवेत्। अत्र च वारत्तकमहर्षे कृतस्वल्पमात्रगृहिसङ्गस्य प्रद्योतनृपेणोपहसितस्याहरणम्। अत एव तेन भगवता ऋषिभाषितेषु यत् सप्तविंशमध्ययनं विरचितं तत्रादावेवेदमुपदेशसूत्रमभाणि-

न चिरं जनि संवसे मुनी, संवासेण सिनेहि वड्ढई।
भिक्खुस्स अनिच्चचारिणो, आयट्ठे जम्हा उहायई॥ इति।

गतमुपरि दोषा इति द्वारम्। अथ द्वितीयपदं भावयति-

[भा.२०२८] बहुदोसे वऽतिरित्तं, जइ लब्भे वेज्ज-ओसहानि बहिं।
चउभाग तिभागऽद्धे, जयंतऽनिच्छे अलंभे वा॥

वृ-ग्लाननिमित्तमतिरिक्मपि कालं वसेत्। अथोद्गमादिभिर्दोषैर्बहुदोषं तत् क्षेत्रं तत उत्पाट्य ग्लानं बहिर्गन्तव्यं यदि वैद्यौषधानि तत्र लभ्यन्ते। अथ ग्लानो बहिर्गन्तुं नेच्छति वैद्यौपधानि वा बहिर्न लभ्यन्ते ततोऽनिच्छति अलाभे वा तत्रैव ग्रामे चतुर्भागीकृते ग्राममषटौ भागान् कृत्वा यतन्ते, तथा चेन्न संस्तरति ततः सप्त भागान्, एवं यावदेकभागमपि कृत्वा यतन्ते इति पुरस्ताद् वक्ष्यते, तथापि चतुर्भाग-त्रिभागा-ऽर्द्धग्रहणं "तुलादण्डमध्यग्रहण" न्यायेनाष्टभागादीनामपि ग्रहणार्थम्॥ प्रकारान्तरेण द्वितीयपदमाह-

[भा.२०२९] ओमा-ऽसिव-दुट्ठेसुं, चउभागादि न करिंति अच्छंता।
पोरुसिमाईवुड्ढी, करिंति तवसो असंथरणे॥

वृ- अवमा-ऽशिव-राजद्विष्टेषु बहि सञ्जातेषु तत्रैव क्षेत्रेऽतिरिक्तमपि कालं तिष्ठन्ति यावद् बहि सुभिक्षादीनि जायन्ते। तच्च क्षेत्रं यदि लघुतरं ततस्तत्र तिष्ठन्तोऽसंस्तरणे सति चतुर्भागादिरचनां न कुर्वन्ति, किन्तु तत्र पौरुष्यादितपसो वक्ष्यमाणनीत्या वृद्धिं कुर्वन्ति। अथ बृहत्तरं तत् क्षेत्रं

Jain Education International For Private & Personal Use Only www.jainelibrary.org

पूर्यते चतुर्भागादिरचनयाऽपि क्रियमाणं परं तत्राप्यवमादीनि समुत्पन्नानि, तत्रावमं तादृशमुत्पन्नं यादृशे चतुर्भागादिपरिपाट्या पर्यटन्तो न संस्तरन्ति, अशिवे भागाद् भागान्तरेषु सङ्क्रामतामशिवं सञ्चरति, राजद्विष्टेऽपरापरभागेषु सञ्चरन्तः प्रकटीभवन्ति, अतस्त्रिष्वप्यवमा-ऽशिव-राजद्विष्टेषु पूर्वार्द्धप्रत्याचक्षते, ये पूर्वार्द्धप्रत्याख्यातारस्ते एकाशनं प्रत्याख्यान्तीत्यादि ॥ अथ यतनामेव स्पष्टयति-

[भा.२०३०] मासे मासे वसही, तण-डगलादी य अन्न गिण्हंति ।
भिक्खायरिय-वियारा, जहिं ठिया तत्थ नऽन्नासु ॥

वृ- मासे मासे वसतिरन्या तृण-डगलादीनि च पूर्वपरिभुक्तानि परित्यज्य अन्यानि गृह्णन्ति । यस्मिंश्च भागे मासकल्पं स्थितास्तत्रैव भागे तस्मिन् मासे भिक्षाचर्यां विचारभूमिं च गच्छन्ति 'नान्यासु' भिक्षा-विचारभूमिषु ॥ अथ भागकरणस्यैव विधिमाह-

[भा.२०३१] अट्ठाइ जाव एक्कं, करिंति भागं असंथरे गामं ।
अट्ठाइ च्चिय वसही, जयंति जा मूलवसही उ ॥

वृ- कदाचिदष्टौ ऋतुबद्धमासान् ग्लानकार्येण स्थातव्यं भवेद् अतो ग्राममष्टौ भागान् कुर्वन्ति । ततः प्रथमेऽष्टभागे वसतिं तृण-डगलादीनि च गृह्णन्ति, मासं च यावत् प्रथम एवाष्टभागे भिक्षाचर्यां विचारभूमिगमनं च कुर्वन्ति । ततो यदि मध्येमासं पूर्णे वा मासे ग्लानः प्रगुणीभतस्ततस्तदैव निर्गन्तव्यम् । अथ न प्रगुणीभूतस्ततः पूर्णे मासे द्वितीयेऽष्टभागे तिष्ठन्ति, तत्राप्येष एव विधिर्मन्तव्यः । एवं तृतीयमष्टभागमादौ कृत्वा अष्टममष्टभागं यावद् द्रष्टव्यम् । अथाष्टभिर्भागैर्विभक्ते ग्रामे न संस्तरति ततः सप्तभागीकृत्य तथैव यतन्ते । एवमप्यसंस्तरणे षड् भागानादौ कृत्वा यावदेकमपि भागं कुर्वन्ति । एवं वसतीरपि प्रथमतः पृथक् पृथग् मासकल्पप्रायोग्या अष्टौ गृह्णन्ति । तदभावे सप्त-षट्-पञ्चादिक्रमेण यतन्ते, यावत् तस्यामेव मूलवसतौ तिष्ठन्ति ॥

अथात्रैव भङ्गकानाह-

[भा.२०३२] इत्थं पुन संजोगा, इक्किक्कस्स उ अलंभे लंभे य ।
नेगा विहाणगुणिया, तुल्ला-तुल्लेसु ठाणेसु ॥

वृ- अत्र पुनः क्रमे 'एकैकस्य' वसतिभागस्य भिक्षाचर्याभगस्य वा अलाभे लाभे च यानि तुल्यानि-समानसङ्ख्याकानि स्थानानि अतुल्यानि-विसदृशसङ्ख्याकानि तेषु विधानेन-चारणिकाविधिना गुणिताः सन्तः 'अनेके' बहवः 'संयोगाः' भङ्गका भव्ति । चारणिकाक्रमश्चायम्-अष्टौ वसतयोऽष्टौ भिक्षाचर्या १ अष्टौ वसतयः सप्त भिक्षाचर्या २ एवं षड् भिक्षाचर्या ३ पञ्च भिक्षाचर्या ४ चतस्रो भिक्षाचर्या ५ तिस्रो भिक्षाचर्या ६ द्वे भिक्षाचर्ये ७ एका भिक्षाचर्या ८,

एवं सप्त वसतयोऽष्टौ भिक्षाचर्या १ सप्त वसतयः सप्त भिक्षाचर्या २ इत्यादिचारणिकया सप्तादिसङ्ख्यास्वपि वसतिविषयासु प्रत्येकमष्टावष्टौ भङ्गकाः प्राप्यन्ते, सर्वसङ्ख्यया लब्धा भङ्गकानां चतुःषष्टिरिति ॥ अथैतेष्वेव भङ्गकेषु विधिमाह-

[भा.२०३३] एक्काइ वि वसहीए, ठिया उ भिक्खयरियाए पयतंति ।
वसहीसु वि जयणेवं, अवि एक्काए वि चरियाए ॥

वृ- येषु भङ्गकेष्वेकैव वसति प्राप्यते तेष्वेकस्यामपि वसतौ स्थिता भिक्षाचर्यायां प्रयतन्ते, प्रथममष्टौ भागान् ग्रामं विभज्य भिक्षां पर्यटन्ति, असंस्तरणे यावदेकमपि भागं कृत्वेति भावः ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

अपिशब्दो दूव्यादिसङ्ख्याकासु वसतिषु तिष्ठन्तः सुतरां भिक्षाचर्यायां पर्यतन्ते इति सूचनार्थं । यत्र त्वेकैव भिक्षाचर्या प्राप्यते तत्रैकस्यामपि भिक्षाचर्यायां पर्यटद्भिः एवमेव वसतिष्वपि यतना कर्त्तव्या ।। उक्तमपवादद्वारम् । तदुक्तौ च समर्थितं "पडिलेहण निक्खमणे" इति द्वारगाथा-द्वयम् ।।

सूत्रम्-

मू. (७) से गामंसि वा जाव रायहाणिंसि वा सपरिक्खेवंसि सबाहिरियंसि कप्पइ निग्गंथाणं हेमंत-गिम्हासु दो मासे वत्थए । अंतो इक्कं मासं, बाहिं इक्कं मासं । अंतो वसमाणाणं अंतो भिक्खायरिया, बाहिं वसमाणाणं बाहिं भिक्खायरिया ।।

वृ- अस्य सम्बन्धो व्याख्या च प्राग्वत् । नवरं 'सबाहिरिके' प्राकारबहिर्वर्तिगृहपद्धतिरूपया बाहिरिकया सहिते कल्पते निर्ग्रन्थानां हेमन्त-ग्रीष्मेषु द्वौ मासौ वस्तुम् । कथम् ? इत्याह- 'अन्तः' प्राकाराभ्यन्तरे एकं मासम्, 'बहिः' बाहिरिकायामप्येकं मासम् । अन्तर्वसतामन्तर्भिक्षाचर्या, बहिर्वसतां बहिर्भिक्षाचर्येति ।। अथ भाष्यविस्तरः-

[भा.२०३४] एसेव कमो नियमा, सपरिक्खेवे सबाहिरीयम्मि ।
नवरं पुन नाणत्तं, अंतो मासो बहिं मासो ।।

वृ- 'एष एव' प्रथमसूत्रोक्तः क्रमः सपरिक्षेपे सबाहिरिकेऽपि ग्रामादौ नियमाद् वक्तव्यः । नवरं पुनः 'नानात्वं' विशेषोऽयम्- 'अन्तः' प्राकाराभ्यन्तरे मासो बहिरपि मास इत्येवं मासद्वयं ऋतुबद्धे स्थातव्यम् ।।

[भा.२०३५] पुन्नम्मि मासकप्पे, बहिया संकमण तं पि तह चेव ।
नवरं पुन नाणत्तं, तणेसु तह चेव फलएसु ।।

वृ- आभ्यन्तरे मासकल्पे पूर्णे 'बहिः' बाहिरिकायां सङ्क्रमणं कर्त्तव्यम् । तदपि सङ्क्रमणं 'तथैव' पूर्वसूत्रवद् द्रष्टव्यम् । नवरं पुनरत्र नानात्वं तृणेषु तथा फलकेषु । तत्र यदि बाहिरिकायामेव तृण-फलकानि प्राप्यन्ते ततस्तत्रैव ग्रहीतव्यानि । अथ तत्र तानि न लभ्यन्ते ततोऽन्यं ग्रामं व्रजन्तु, अथ तत्राशिवादीनि कारणानि तत आभ्यन्तराण्येव तृण-फलकानि बाहिरिकायां नेतव्यानि ।। तत्र विधिमाह-

[भा.२०३६] अन्नउवस्सयगमणे, अनपुच्छा नत्थि कंचि नेयव्वं ।
जइ नेइ अनापुच्छा, तत्थ उ दोसा इमे होंति ।।

वृ- द्वितीये मासकल्पे बाहिरिकायामन्यमुपाश्रयं गच्छद्भिरनापृच्छया नास्ति किञ्चित् तृण-फलकादि नेतव्यम् । बाहिरिकायामन्यमुपाश्रयं गच्छद्भिरनापृच्छया नास्ति किञ्चित् तृण-फलकादि नेतव्यम् । यद्यनापृच्छया नयति ततस्तत्रेमे दोषा भवन्ति ।।

[भा.२०३७] ताइं तण-फलगाइं, तेनाहडगाइं अप्पणो वा वि ।
निज्जंतय-गहियाइं, सिट्ठाइँ तहा असिट्ठाइं ।।

वृ- तानि तृण-फलकानि येन साधूनां दत्तानि तस्य स्तेनाहृतानि वा भवेयुः आत्मसम्बन्धीनि वा । तानि च प्रतिश्रयान्तरं नीयमानानि-प्राप्यमाणानि गृहीतानि वा-नीतानि सन्ति शिष्टानि अशिष्टानि वा भवेयुः ।। शिष्टा-ऽशिष्टपदद्वयं व्याख्यानयति-

[भा.२०३८] कस्सेते तण-फलगा, सिट्ठे अमुकस्स तस्स गहणादी ।
निण्हवइ व सो भीओ, पच्चंगिर लोगमुड्डाहो ।।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

वृ- सेतनाहृतानि तृण-फलकान्यनापृच्छया नीयमानानि पूर्वस्वामिना राजपुरुषैर्वा दृष्टानि ततः साधुः पृष्टः-कस्यैतानि ? साधुः प्राह-अमुकस्य गृहपतेः इति 'शिष्टे' कथिते सति तस्य ग्रहणाऽऽकर्षणादयो दोषा भवन्ति। अथासौ साधुः भीतः सन् 'निह्नुते' अपलपति न कथयतीत्यर्थः ततोऽशिष्टे साधोः प्रत्यङ्गिरादोषो भवति, तृण-फलकदायकस्य गृहपतेः सम्बन्धी यश्चौर्यकरणलक्षणो दोषः स परकीयोऽप्यात्मनि लगतीत्यर्थः ।

लोके चोड्डाहो भवति-अहो ! साधवोऽपि परद्रव्यमपहरन्ति ।। अथात्रैव प्रायश्चित्तमाह-

[भा.२०३९] नयने दिट्ठे सिट्ठे, गिण्हण कड्ढण ववहारमेव ववहरिए ।
लहुओ लहुगा गुरुगा, छम्मासा छेय मूल दुगं ।।

वृ- स्तेनाहृततृणानामपृच्छया बाहिरिकायां नयनं करोति लघुको मासः । अथ तानि नीयमानानि राजपुरुषैर्दृष्टानि ततश्चत्वारो लघुकाः । तैः पृष्टे साधुना 'शिष्टं' कथितं यथा अमुकस्येति ततश्चत्वारो गुरुकाः । अथ स गृही राजपुरुषैर्गृहीतस्ततो ग्रहणेऽपि चत्वारो गुरुकाः । अथासौ तै राजपुरुषै राजकुलाभिमुखमाकर्षितस्ततः षण्मासा लघवः । अथ राजकुलाभिमुखमाकर्षतस्तान् स गृहस्थः प्रतिलोममाकर्षति ततः षड् गुरुकाः । अथ राजकुलं नीत्वा व्यवहारं कारितस्ततः छेदः । व्यवहृते सति यदि स गृहस्थः पश्चात्कृतस्ततो मूलम् । ततो बहुलोकसमक्षमुद्दग्धे हस्त-पाद्याद्यवयवव्यङ्गिते वा कृतेऽनवस्थाप्यम् । अपद्राविते निर्विषये वाकृते पाराञ्चिकम् । सर्वत्र संयतस्यैतत् प्रायश्चित्तम् ।। अथ निह्नवनपदं व्याख्याति-

[भा.२०४०] अहवा वि असिट्ठम्मी, एसेव उ तेण संकणे लहुगा ।
नीसंकियम्मि गुरुगा, एगमनेगे य गहणादी ।।

वृ- अथवा मया कथिते सत्येष तृणफलकदाता ग्रहणा-ऽऽकर्षणादिकं प्राप्स्यते इति मत्वा यदि न कथयति ततः 'अशिष्टे' अकथिते एष एव स्तेनः सम्भाव्यत इत्येवं 'शङ्कने' शङ्कायां राजपुरुषैः क्रियमाणायां चतुर्लघुकाः । निशङ्किते चत्वारो गुरवः । ततश्च तस्यैवैकस्यानेकेषां वा साधूनां ग्रहणादयो दोषा भवन्ति ।। तद्यथा-

[भा.२०४१] नयने दिट्ठे गहिए, कड्ढण ववहारमेव ववहरिए ।
उड्डहणे य विरुंगण, उद्दवणे चेव निव्विसए ।।

[भा.२०४२] लहुओ लहुया गुरुगा, छल्लहु छग्गुरुग छेय मूलं च ।
अनवट्ठप्पो दोसु अ, दोसु अ पारंचिओ होइ ।।

वृ- तृणानि प्रतिश्रयान्तरमनापृच्छया नयति लघुको मासः । राजपुरुषैर्दृष्टेषु चत्वारो लघवः । ततः पृष्टे साधुना च निह्नुते नृपपुमांसस्तस्य साधोर्ग्रहणं कुर्वन्ति चत्वारो गुरवः । राजपुरुषैः 'त्वं चौरः' इत्युक्त्वा राजकुलाभिमुखमाकर्षणे कृते सति षण्मासा लघवः । अथ ते राजकुलाभिमुखमाकर्षन्ति साधुश्च तान् प्रतीपमाकर्षति एवं कर्षणाकर्षणे षण्मासा गुरवः । व्यवहारे प्रारब्धे छेदः । व्यवहृते यदि संयतः पश्चात्कृतस्ततो मूलम् । उड्डहन-व्यङ्गनयोर्द्वयोरनवस्थाप्यः । अपद्रावण-निर्विषयाज्ञापनयोर्द्वयोः पाराञ्चिक इति ।।

आह कथं पुनस्तृणानि स्तेनाहृतानि सम्भ-वन्ति ? इत्युच्यते-

[भा.२०४३] दंतपुरे आहरणं, तेनाहड बब्बगादिसु तनेसु ।

छायण मीराकरणे, अत्थिरफलगं च चंपादी ॥

वृ-स्तेनाहतेषुतृणेषु दन्तपुरविषयमुदाहरणं वक्तव्यम्, यथा आवश्यके योगसङ्ग्रहेषु "दंतपुर दतचक्के०" इत्यस्यां गाथायां यन्निदर्शनमुक्तम्, तत्र यथा 'दन्ताः केनापि न ग्रहीतव्याः' इति राजाज्ञया प्रतिषिद्धत्वाद् धनमित्रसार्थवाहमित्रेण दृढमित्रेण दन्ता दर्भपूलकैराच्छाद्य प्रच्छन्नमानीताः स्तेनाहृताः संवृत्ताः, एवं राज्ञा प्रतिषिद्धानि सम्भवन्ति तृणान्यपि स्तेनाहृतानीति । तैश्च वव्बकादिभिस्तृणैर्ग्लानादीनां छादनं प्रतिश्रयस्य वा मीराकरणं विधीयते । मीराकरणं नाम-कटैर्द्वारादेराच्छादनम्, उपलक्षणमेतत्, तेन प्रस्तरणार्थमपि तृणानि गृह्यन्ते । फलकं तु प्रस्तरणार्थं मीराकरणार्थं वा । तच्चास्थिरफलकं चम्पकपट्टादि मन्तव्यम् । अस्थिरफलकं नाम-उपविशतां यदधो यातीव, तच्चैवंविधं चम्पकपट्टादि ॥ अस्तेनाहततृणानां नयने दोषानाह-

[भा.२०४४] अतेनाहडाण नयने, लहुओ लहुया य होंति सिट्ठम्मि ।

अप्पत्तियम्मि गुरुगा, वोच्छेद पसज्जणा सेसे ॥

वृ-अस्तेनाहृतानां तृणानामनापृच्छ्य बहिर्नयने लघुको मासः । अपरेण केनापि तस्य 'शिष्टं' कथितं 'त्वदीयानि तृणानि संयतैर्बाहिरिकायां नीतानि' तदा चतुर्लघु । कथिते यद्यसावनुग्रहं मन्यते ततोऽपि चतुर्लघु । अथाप्रीतिकं करोति तदा चतुर्गुरु । व्यवच्छेदं वा तद्द्रव्यस्य तस्य साधोर्भूयः प्रदाने कुर्यात् । "पसज्जणा सेस"त्ति 'शेषाणाम्' अन्येषामप्यशन-पानकादिद्रव्याणा-मपरेषां वा साधूनां प्रसङ्गतो दानव्यवच्छेदं कुर्यात् ॥

[भा.२०४५] एसेव गमो नियमा, फलएसु वि होइ आनुपुव्वीए ।

नवरं पुन नाणत्तं, चउरो मासा जहन्नपदे ॥

वृ-एष एव 'गमः' प्रकारः फलकेष्वपि भवत्यानुपूर्व्या यस्तृणेषु "नयणे दिट्ठे सिट्ठे" इत्यादिनां भणितः । नवरं पुनरत्र नानात्वं चत्वारो मासा जघन्यपदे भवन्ति । जघन्यपदं नाम-यत्र तृणेषु लघुमासिकमापद्यते तच्चानापृच्छया बहिर्नयनमिति द्रष्टव्यम् तत्र फलकेषु चतुर्लघु ॥

अथमासद्वयादूर्द्धमवस्थाने दोषान् द्वितीयपदं चाह-

[भा.२०४६] दोण्हं उवरिं वसती, पायच्छित्तं च होंति दोसा य ।

बिइयपदं च गिलाणे, वसही भिक्खं च जयणाए ॥

वृ-सबाहिरिके क्षेत्रे द्वयोर्मासयोरुपरि यदि वसति ततः प्रायश्चित्तं प्रागुक्तमेव मासलघुकाख्यम्, दोषाश्च त एवावसातव्याः ये अबाहिरिके क्षेत्रे "संवासे इत्थिदोसा" इत्यादिना उक्ताः । द्वितीयपदं च ग्लानविषयं तदेव वक्तव्यम् । तत्र च तिष्ठता वसतिर्भैक्षं च यतनया ग्रहीतव्यम् ॥

मुनि दीपरत्नसागरेण संशोधिता सम्पादिता बृहत्कल्पसूत्रे
प्रथमोद्देशकस्य [सप्तसूत्रपर्यन्तः] संघदासगणि विरचितं भाष्यं
एवं मलयकीर्ति- क्षेमकीर्ति आचार्याभ्यां विरचिता टीका परि समाप्त ॥

३५/१ द्वितीयं छेदसूत्रं बृहत्कल्प-१-समासम्

भाग : १८ - बृहत्कल्पस्य पीठिका एवं उद्देशकः -१ (मू. १....७)

Jain Education International For Private & Personal Use Only www.jainelibrary.org

ભાવભરી વંદના

જેમના દ્વારા સૂત્રમાં ગુંથાયેલ જિનવાણીનો ભવ્ય વારસો
વર્તમાનકાલીન ''આગમસાહિત્ય''માં પ્રાપ્ત થયો
એ સર્વે સૂરિવર આદિ આર્ષ પૂજ્યશ્રીઓને-

પંચમ ગણધર શ્રી સુધર્મા સ્વામી		ચૌદ પૂર્વધર શ્રી ભદ્રબાહુ સ્વામી	
દશ પૂર્વધર શ્રી શય્યંભવસૂરિ		(અનામી) સર્વે શ્રુત સ્થવીર મહર્ષિઓ	
દેવવાચક ગણિ		શ્રી શ્યામાચાર્ય	
દેવર્દ્ધિગણિ ક્ષમાશ્રમણ		જિનભદ્ર ગણિ ક્ષમાશ્રમણ	
સંઘદાસગણિ		સિદ્ધસેન ગણિ	
જિનદાસ ગણિ મહત્તર		અગત્સ્યસિંહ સૂરિ	
શીલાંકાચાર્ય		અભયદેવસૂરિ	
મલયગિરિસૂરિ		ક્ષેમકીર્તિસૂરિ	
હરિભદ્રસૂરિ		આર્યરક્ષિત સૂરિ (?)	
દ્રોણાચાર્ય		ચંદ્ર સૂરિ	
વાદિવેતાલ શાંતિચંદ્ર સૂરિ		મલ્લધારી હેમચંદ્રસૂરિ	
શાંતિચંદ્ર ઉપાધ્યાય		ધર્મસાગર ઉપાધ્યાય	
ગુણરત્નસૂરી		વિજય વિમલગણિ	
વીરભદ્ર	ઋષિપાલ	બ્રહ્મમુનિ	તિલકસૂરિ
સૂત્ર-નિર્યુક્તિ - ભાષ્ય - ચૂર્ણિ - વૃત્તિ - આદિના રચયિતા અન્ય સર્વે પૂજ્યશ્રી			

વર્તમાન કાલિન આગમ સાહિત્ય વારસાને
સંશોધન-સંપાદન-લેખન આદિ દ્વારા મુદ્રીત/અમુદ્રીત સ્વરૂપે રજૂ કર્તા
સર્વે શ્રુતાનુરાગી પૂજ્યપુરુષોને

આનંદ સાગરસૂરિજી	ચંદ્રસાગર સૂરિજી	મુનિ માણેક
જિન વિજયજી	પુન્યવિજયજી	ચતુરવિજયજી
જંબુ વિજયજી	અમરમુનિજી	કનૈયાલાલજી
લાભસાગરસુરિજી	આચાર્ય તુલસી	ચંપક સાગરજી

સ્મરણાંજલિ

બાબુ ધનપતસિંહ	પં૦ બેચરદાસ	પં૦ જીવરાજભાઈ
પં૦ ભગવાનદાસ	પં૦ રૂપેન્દ્રકુમાર	પં૦ હીરાલાલ
શ્રુત પ્રકાશક સર્વે સંસ્થાઓ		

Jain Education International For Private & Personal Use Only www.jainelibrary.org

૪૫ આગમ મૂળ તથા વિવરણનું શ્લોક પ્રમાણદર્શક કોષ્ટક

क्रम	आगमसूत्रनाम	मूल श्लोक प्रमाण	वृत्ति-कर्ता	वृत्ति श्लोकप्रमाण
१.	आचार	२५५४	शीलाङ्काचार्य	१२०००
२.	सूत्रकृत	२१००	शीलाङ्काचार्य	१२८५०
३.	स्थान	३७००	अभदेवसूरि	१४२५०
४.	समवाय	१६६७	अभयदेवसूरि	३५७५
५.	भगवती	१५७५१	अभयदेवसूरि	१८६१६
६.	ज्ञाताधर्मकथा	५४५०	अभयदेवसूरि	३८००
७.	उपासकदशा	८१२	अभयदेवसूरि	८००
८.	अन्तकृद्दशा	९००	अभयदेवसूरि	४००
९.	अनुत्तरोपपातिकदशा	१९२	अभयदेवसूरि	१००
१०.	प्रश्नव्याकरण	१३००	अभयदेवसूरि	५६३०
११.	विपाकश्रुत	१२५०	अभयदेवसूरि	९००
१२.	औपपातिक	११६७	अभयदेवसूरि	३१२५
१३.	राजप्रश्निय	२१२०	मलयगिरिसूरि	३७००
१४.	जीवाजीवाभिगम	४७००	मलयगिरिसूरि	१४०००
१५.	प्रज्ञापना	७७८७	मलयगिरिसूरि	१६०००
१६.	सूर्यप्रज्ञप्ति	२२९६	मलयगिरिसूरि	९०००
१७.	चन्द्रप्रज्ञप्ति	२३००	मलयगिरिसूरि	९१००
१८.	जम्बूद्वीपप्रज्ञप्ति	४४५४	शान्तिचन्द्रउपाध्याय	१८०००
१९थी	निरयावलिका	११००	चन्द्रसूरि	६००
२३.	(पञ्च उपाङ्ग)	–	–	–
२४.	चतुःशरण	८०	विजयविमलयगणि	(?) २००
२५.	आतुर प्रत्याख्यान	१००	गुणरत्नसूरि (अवचूरि)	(?) १५०
२६.	महाप्रत्याख्यान	१७६	आनन्दसागरसूरि (संस्कृतछाया)	१७६
२७.	भक्तपरिज्ञा	२१५	आनन्दसागरसूरि (संस्कृतछाया)	२१५
२८.	तन्दुल वैचारिक	५००	विजयविमलगणि	(?) ५००
२९.	संस्तारक	१५५	गुणरत्न सूरि (अवचूरि)	११०
३०.	गच्छाचार★	१७५	विजयविमलगणि	१५६०
३१.	गणिविद्या	१०५	आनन्दसागरसूरि (संस्कृतछाया)	१०५

Jain Education International For Private & Personal Use Only www.jainelibrary.org

क्रम	आगमसूत्रनाम	• मूल श्लोक प्रमाण	वृत्ति-कर्ता	• वृत्ति श्लोकप्रमाण
३२.	देवेन्द्रस्तव	३७५	आनन्दसागरसूरि (संस्कृत छाया)	३७५
३३.	मरणसमाधि ★	८३७	आनन्दसागरसूरि (संस्कृत छाया)	८३७
३४.	निशीथ	८२१	जिनदासगणि (चूर्णि)	२८०००
			सङ्घदासगणि (भाष्य)	७५००
३५.	बृहत्कल्प	४७३	मलयगिरि+क्षेमकीर्ति	४२६००
			सङ्घदासगणि (भाष्य)	७६००
३६.	व्यवहार	३७३	मलयगिरि	३४०००
			सङ्घदासगणि (भाष्य)	६४००
३७.	दशाश्रुतस्कन्ध	८९६	- ? - (चूर्णि)	२२२५
३८.	जीतकल्प ★	१३०	सिद्धसेनगणि (चूर्णि)	१०००
३९.	महानिशीथ	४५४८	—	—
४०.	आवश्यक	१३०	हरिभद्रसूरि	२२०००
४१.	ओघनिर्युक्ति	नि.१३५५	द्रोणाचार्य	(?)७५००
-	पिण्डनिर्युक्ति ★	नि. ८३५	मलयगिरिसूरि	७०००
४२.	दशवैकालिक	८३५	हरिभद्रसूरि	७०००
४३.	उत्तराध्ययन	२०००	शांतिसूरि	१६०००
४४.	नन्दी	७००	मलयगिरिसूरि	७७३२
४५.	अनुयोगद्वार	२०००	मलधारीहेमचन्द्रसूरि	५९००

નોંધ :-

(૧) ઉક્ત ૪૫ આગમ સૂત્રોમાં વર્તમાન કાળે પહેલાં ૧ થી ૧૧ अंगसूत्रो, १२ थी २૩ उपांगसूत्रो, २४थी૩૩ प्रकीर्णकसूत्रो ૩૪થી ૩૯ छेदसूत्रो, ४० थी ४૩ मूळसूत्रो, ४४-४५ चूलिकासूत्रोના નામે હાલ પ્રસિદ્ધ છે.

(૨) ઉક્ત શ્લોક સંખ્યા અમે ઉપલબ્ધ માહિતી અને પૃષ્ઠ સંખ્યા આધારે નોંધેલ છે. જો કે તે સંખ્યા માટે મતાંતર તો જોવા મળે જ છે. જેમકે આચાર સૂત્રમાં ૨૫૦૦, ૨૫૫૪, ૨૫૨૫ એવા ત્રણ શ્લોક પ્રમાણ જાણવા મળેલ છે. આવો મત-ભેદ અન્ય સૂત્રોમાં પણ છે.

(૩) ઉક્ત वृत्ति-આદિ જે નોંધ છે તે અમે કરેલ સંપાદન મુજબની છે. તે સિવાયની પણ वृत्ति-चूर्णि આદિ સાહિત્ય મુદ્રિત કે અમુદ્રિત અવસ્થામાં હાલ ઉપલબ્ધ છે જ.

(૪) गच्छाचार અને मरणसमाधि ના વિકલ્પે चंदावेज्झय અને वीरस्तव प्रकीर्णक આવે છે. જે અમે "आगमसुत्ताणि" માં મૂળ રૂપે અને "આગમદીપ"માં અક્ષરશઃ ગુજરાતી અનુવાદ રૂપે આપેલ છે. તેમજ जीतकल्प જેના વિકલ્પ રૂપે છે એ

Jain Education International For Private & Personal Use Only www.jainelibrary.org

पंचकल्पनुं भाष्य अमे ''आगमसुत्ताणि''मां संपादीत कर्युं छे.

(५) ओघ अने पिण्ड ए बंने निर्युक्ति विकल्पे छे. जे हाल मूळसूत्र रूपे प्रसिध्ध छे. जे बंनेनी वृत्ति अमे आपी छे. तेमज तेमां भाष्यनी गाथाओ पण समाविष्ट थई छे.

(६) चार प्रकीर्णक सूत्रो अने महानिशीथ ए पांच आगमनी कोई वृत्ति आदि उपलब्ध थवानो उल्लेख मळतो नथी. प्रकीर्णक नी संस्कृत छाया उपलब्ध छे तेथी मूकी छे. निशीथ-दशा-जितकल्प ए त्रणेनी चूर्णि आपी छे. जेमां दशा अने जीतकल्प ए बंने उपरवृत्ति मळती होवानो उल्लेख छे, पण अमे ते मेळवी शक्या नथी. ज्यारे निशीथ उपर तो मात्र वीसमा उद्देशकःनी ज वृत्ति नो उल्लेख मळे छे.

➡ वर्तमान काळे ४५ आगममां उपलब्ध निर्युक्तिः ⬅

क्रम	निर्युक्ति	श्लोकप्रमाण	क्रम	निर्युक्ति	श्लोकप्रमाण
१.	आचार-निर्युक्ति	४५०	६.	आवश्यक–निर्युक्ति	२५००
२.	सूत्रकृत-निर्युक्ति	२६५	७.	ओघनिर्युक्ति	१३५५
३.	बृहत्कल्प-निर्युक्ति ★	–	८.	पिण्डनिर्युक्ति	८३५
४.	व्यवहार-निर्युक्ति ★	–	९.	दशवैकालिक-निर्युक्ति	५००
५.	दशाश्रुत०-निर्युक्ति	१८०	१०.	उत्तराध्ययन-निर्युक्ति	७००

नोंध :-

(१) अहीं आपेल श्लोक प्रमाण ए गाथा संख्या नथी. ''३२ अक्षरनो एक श्लोक'' ए प्रमाणथी नोंधायेल श्लोक प्रमाण छे.

(२) ★ बृहत्कल्प अने व्यवहार ए बंने सूत्रोनी निर्युक्ति हाल भाष्य मां भळी गई छे. जेनो यथासंभव उल्लेख वृत्तिकार महर्षि ए भाष्य उपरनी वृत्तिमां कर्यो होय तेवुं जोवा मळेल छे.

(३) ओघ अने पिण्डनिर्युक्ति स्वतंत्र मूलआगम स्वरूपे स्थान पामेल छे तेथी तेनुं स्वतंत्र संपादन आगम-४१ रूपे थयेल छे. (तेमज आ संपादनमां पण छे.)

(४) बाकीनी छ निर्युक्तिमांथी दशाश्रुतस्कन्ध निर्युक्ति उपर चूर्णि अने अन्य पांच निर्युक्ति उपरनी वृत्ति अमे अमारा संपादनमां प्रकाशीत करी छे. ज्यां आ छ निर्युक्ति स्पष्ट अलग जोई शकाय छे.

(५) निर्युक्तिकर्ता तरीके भद्रबाहुस्वामी नो उल्लेख ज जोवा मळे छे.

Jain Education International For Private & Personal Use Only www.jainelibrary.org

વર્તમાન કાળે ૪૫ આગમમાં ઉપલબ્ધ ભાષ્યં

क्रम	भाष्य	श्लोकप्रमाण	क्रम	भाष्य	गाथाप्रमाण
१.	निशीषभाष्य	७५००	६.	आवश्यकभाष्य ★	४८३
२.	बृहत्कल्पभाष्य	७६००	७.	ओघनिर्युक्तिभाष्य ★	३२२
३.	व्यवहारभाष्य	६४००	८.	पिण्डनिर्युक्तिभाष्य ★	४६
४.	पञ्चकल्पभाष्य	३१८५	९.	दशवैकालिकभाष्य ★	६३
५.	जीतकल्पभाष्य	३१२५	१०.	उत्तराध्ययनभाष्य (?)	--

નોંધ :-

(૧) निशीष , बृहत्कल्प અને व्यवहारभाष्य ના કર્તા सङ्घदासगणि હોવાનું જણાય છે. અમારા સંપાદનમાં निशीष भाष्य તેની चूर्णि સાથે અને बृहत्कल्प તથા व्यवहार भाष्य તેની-તેની वृत्ति સાથે સમાવિષ્ટ થયું છે.

(૨) पञ्चकल्पभाष्य અમારા आगमसुत्ताणि भाग-३८ માં પ્રકાશીત થયું.

(૩) आवश्यकभाष्य માં ગાથા પ્રમાણ ૪૮૩ લખ્યું જેમાં ૧૮૩ ગાથા મૂળભાષ્ય રૂપે છે અને ૩૦૦ ગાથા અન્ય એક ભાષ્યની છે. જેનો સમાવેશ आवश्यक सूत्रं-सटीकं માં કર્યો છે. [જો કે विशेषावश्यक भाष्य ખૂબજ પ્રસિધ્ધ થયું છે પણ તે સમગ્ર आवश्यकसूत्र- ઉપરનું ભાષ્ય નથી અને अध्ययनो અનુસારની અલગ અલગ वृत्ति આદિ પેટા વિવરણો તો आवश्यक અને जीतकल्प એ બંને ઉપર મળે છે. જેનો અત્રે ઉલ્લેખ અમે કરેલ નથી.]

(૪) ओघनिर्युक्ति, पिण्डनिर्युक्ति , दशवैकालिकभाष्य નો સમાવેશ તેની તેની वृत्ति માં થયો જ છે. પણ તેનો કર્તા વિશેનો ઉલ્લેખ અમોને મળેલ નથી. [ओघनिर्युक्ति ઉપર ૩૦૦૦ શ્લોક પ્રમાણ ભાષ્યનો ઉલ્લેખ પણ જોવા મળેલ છે.]

(૫) उत्तराध्ययनभाष्यની ગાથા निर्युक्तिમાં ભળી ગયાનું સંભળાય છે (?)

(૬) આ રીતે अंग - उपांग - प्रकीर्णक - चूलिका એ ૩૫ आगम सूत्रो ઉપરનો કોઈ ભાષ્યનો ઉલ્લેખ અમારી જાણમાં આવેલ નથી. કોઈક સ્થાને સાક્ષી પાઠ-આદિ સ્વરૂપે भाष्यगाथा જોવા મળે છે.

(૭) ભાષ્યકર્તા તરીકે મુખ્ય નામ सङ्घदासगणि જોવા મળેલ છે. તેમજ जिनभद्रगणि-क्षमाश्रमण અને सिद्धसेन गणि નો પણ ઉલ્લેખ મળે છે. કેટલાંક ભાષ્યના કર્તા અજ્ઞાત જ છે.

Jain Education International For Private & Personal Use Only www.jainelibrary.org

વર્તમાન કાળે ૪૫ આગમમાં ઉપલબ્ધ ચૂર્ણિ:

क्रम	चूर्णि	श्लोकप्रमाण	क्रम	चूर्णि	श्लोकप्रमाण
१.	आचार-चूर्णि	८३००	९.	दशाश्रुतस्कन्धचूर्णि	२२२५
२.	सूत्रकृत-चूर्णि	९९००	१०.	पञ्चकल्पचूर्णि	३२७५
३.	भगवती-चूर्णि	३११४	११.	जीतकल्पचूर्णि	१०००
४.	जीवाभिगम-चूर्णि	१५००	१२.	आवश्यकचूर्णि	१८५००
५.	जंबूद्वीपप्रज्ञप्ति-चूर्णि	१८७९	१३.	दशवैकालिकचूर्णि	७०००
६.	निशीथचूर्णि	२८०००	१४.	उत्तराध्ययनचूर्णि	५८५०
७.	बृहत्कल्पचूर्णि	१६०००	१५.	नन्दीचूर्णि	१५००
८.	व्यवहारचूर्णि	१२००	१६.	अनुयोगदारचूर्णि	२२६५

નોંધ :-

(૧) ઉક્ત ૧૬ चूर्णिમાંથી निशीथ , दशाश्रुतस्कन्ध, जीतकल्प એ ત્રણ चूर्णि અમારા આ સંપાદનમાં સમાવાઈ ગયેલ છે.

(૨) आचार, सूत्रकृत, आवश्यक, दशवैकालिक, उत्तराध्ययन, नन्दी, अनुयोगद्वार એ સાત चूर्णि પૂજ્યપાદ આગમોદ્ધારક શ્રી એ પ્રકાશીત કરાવી છે.

(૩) दशवैकालिकની બીજી એક चूर्णि જે अगत्स्यसिंहसूरिकृत છે તેનું પ્રકાશન પૂજ્ય શ્રી પુન્યવિજયજીએ કરાવેલ છે.

(૪) जंबूद्वीपप्रज्ञप्तिचूर्णि વિશે હીરાલાલ કાપડીયા પ્રશ્નાર્થચિહ્ન ઉભું કરે છે. भगवती चूर्णि તો મળેજ છે, પણ હજી પ્રકાશીત થઈ નથી. તેમજ बृहत्कल्प , व्यवहार, पञ्चकल्प એ ત્રણ હસ્તપ્રતો અમે જોઈ છે પણ પ્રકાશીત થયાનું જાણમાં નથી.

(૫) चूर्णिकार તરીકે जिनदासगणिमहत्तरનું નામ મુખ્યત્વે સંભળાય છે. કેટલાકના મતે અમુક चूर्णिના કર્તાનો સ્પષ્ટોલ્લેખ મળતો નથી.

"આગમ-પંચાંગી" એક ચિન્ત્ય બાબત"

૧ *વર્તમાન કાળે પ્રાપ્ત આગમ સાહિત્યની વિચારણા પછી ખરેખર આગમના પાંચ અંગોમાં કેટલું અને શું ઉપલબ્ધ છે તે જાણ્યા પછી એક પ્રશ્ન થાય કે આગમ પંચાંગી ની વાતો કેટલી ચિન્ત્ય છે. अंग-उपांग-प्रकीर्णक-चूलिका એ ૩૫ આગમો ઉપર भाष्य નથી. એટલે ૩૫ આગમનું એક અંગ તો અપ્રાપ્ય જ બન્યું. સૂત્ર પરત્વે ઉપલબ્ધ निर्युक्ति ફક્ત છ છે. એટલે ૩૯ આગમોનું એક અંગ અપ્રાપ્ય જ બન્યું. આ રીતે ક્યાંક भाष्य, ક્યાંક निर्युक्ति અને ક્યાંક चूर्णिના અભાવે વર્તમાન કાળે સુવ્યવસ્થિત पंचांगी એક માત્ર आवश्यक सूत्रની ગણાય.*

૨ *नंदीसूत्रમાં पंचांगीને બદલે संग्रहणी, प्रतिपत्तिઓ વગેરેના પણ ઉલ્લેખ છે.*

Jain Education International For Private & Personal Use Only www.jainelibrary.org

➡ ૪૫ આગમ અંતર્ગત વર્તમાન કાળે ઉપલબ્ધ વિભાગો ⬅

[સૂચના :- અમે સંપાદીત કરેલ आगमसुत्ताणि-सटीकं માં બેકી નંબરના પૃષ્ઠો ઉપર જમણી બાજુ आगमसूत्र ના નામ પછી અંકો આપેલ છે. જેમકે ૧/૩/૬/૨/૫૪ વગેરે. આ અંકો તે તે આગમના વિભાગીકરણને જણાવે છે. જેમકે आचारમાં પ્રથમ અંક श्रुतस्कन्धનો છે તેના વિભાગ રૂપે બીજો અંક चूला છે તેના પેટા વિભાગ રૂપે ત્રીજો અંક अध्ययन નો છે. તેના પેટા વિભાગ રૂપે ચોથો અંક उद्देशक નો છે. તેના પેટા વિભાગ રૂપે છેલ્લો અંક મૂલનો છે. આ મૂલ ગદ્ય કે પદ્ય હોઈ શકે. જો ગદ્ય હોય તો ત્યાં પેરેગ્રાફ સ્ટાઈલથી કે છુટુ લખાણ છે અને गाथा/પદ્ય ને પદ્યની સ્ટાઈલથી ॥ - ॥ ગોઠવેલ છે.

પ્રત્યેક આગમ માટે આ રીતે જ ઓબ્લિકમાં (/) પછી ના વિભાગને તેના-તેના પેટા-પેટા વિભાગ સમજવા.

જ્યાં જે-તે પેટા વિભાગ ન હોય ત્યાં (/-) ઓબ્લિક પછી ડેસ મુકીને તે વિભાગ ત્યાં નથી તેમ સુચવેલું છે.]

(૧) **आचार** - श्रुतस्कन्धः/चूला/अध्ययनं/उद्देशकः/मूलं
चूला નામક પેટા વિભાગ બીજા શ્રુતસ્કન્ધ માં જ છે.

(૨) **सूत्रकृत** - श्रुतस्कन्धः/अध्ययनं/उद्देशकः/मूलं

(૩) **स्थान** - स्थानं/अध्ययनं/मूलं

(૪) **समवाय** - समवायः/मूलं

(૫) **भगवती** - शतकं/वर्गः-अंतरशतकं/उद्देशकः/मूलं
અહીં शतकના પેટા વિભાગમાં બે નામો છે. (૧) वर्गः (૨) अंतर्शतक કેમકે शतक ૨૧, ૨૨, ૨૩ માં शतक ના પેટા વિભાગનું નામ वर्गः જ જણાવેલ છે. शतक - ૩૩,૩૪,૩૫,૩૬,૪૦ ના પેટા વિભાગને अंतरशतक અથવા शतकशतक નામથી ઓળખાવાય છે.

(૬) **ज्ञाताधर्मकथा-** श्रुतस्कन्धः/वर्गः/अध्ययनं/मूलं
પહેલા श्रुतस्कन्ध માં अध्ययन જ છે. બીજા श्रुतस्कन्ध નો પેટાવિભાગ वर्ग નામે છે અને તે वर्ग ના પેટા વિભાગમાં अध्ययन છે.

(૭) **उपासकदशा-** अध्ययनं/मूलं

(૮) **अन्तकृद्दशा-** वर्गः/अध्ययनं/मूलं

(૯) **अनुत्तरोपपातिकदशा-** वर्गः/अध्ययनं/मूलं

(૧૦) **प्रश्नव्याकरण-** द्वारं/अध्ययनं/मूलं
आश्रव અને संवर એવા સ્પષ્ટ બે ભેદ છે જેને आश्रवद्वार અને संवरद्वार કહ્યા છે. (કોઈક द्वार ને બદલે श्रुतस्कन्ध શબ્દ પ્રયોગ પણ કરે છે)

(૧૧) **विपाकश्रुत-** श्रुतस्कन्धः/अध्ययनं/मूलं

(૧૨) **औपपातिक-** मूलं

(૧૩) **राजप्रश्नीय-** मूलं

Jain Education International For Private & Personal Use Only www.jainelibrary.org

(१४) **जीवाजीवाभिगम-** *प्रतिपत्तिः/* उद्देशकः/मूलं
આ આગમમાં ઉક્ત ત્રણ વિભાગો કર્યા છે તો પણ સમજણ માટે પ્રતિપત્તિઃ પછી એક પેટાવિભાગ નોંધનીય છે. કેમકે प्रतिपत्ति -३-માં नेरइय, तिरिक्खजोणिय, मनुष्य, देव એવા ચાર પેટાવિભાગો પડે છે. તેથી तिपत्ति/(नेरइयआदि)/उद्देशकः/मूलं એ રીતે સ્પષ્ટ અલગ પાડેલા છે, એજ રીતે દશમી प्रतिपत्ति ના उद्देशकः નવ નથી પણ તે પેટાવિભાગ प्रतिपत्तिः નામે જ છે.

(१५) **प्रज्ञापना-** पदं/उद्देशकः/द्वारं/मूलं
પદના પેટા વિભાગમાં ક્યાંક उद्देशकः છે, ક્યાંક द्वारं છે પણ પદ-૨૮ના પેટા વિભાગમાં उद्देशकः અને તેના પેટા વિભાગમાં द्वारं પણ છે.

(१६) **सूर्यप्रज्ञप्ति-** प्राभृतं/प्राभृतप्राभृतं/मूलं

(१७) **चन्द्रप्रज्ञप्ति-** प्राभृतं/प्राभृतप्राभृतं/मूलं
આગમ ૧૬-૧૭માં प्राभृतप्राभृत ના પણ प्रतिपत्तिः નામક પેટા વિભાગ છે. પણ उद्देशकः આદિ મુજબ તેનો વિશેષ વિસ્તાર થાયેલ નથી.

(१८) **जम्बूदीपप्रज्ञप्ति-** वक्षस्कारः/मूलं

(१९) **निरयावलिका** - अध्ययनं/मूलं

(२०) **कल्पवतंसिका** - अध्ययनं/मूलं

(२१) **पुष्पिता** - अध्ययनं/मूलं

(२२) **पुष्पचूलिका** - अध्ययनं/मूलं

(२३) **वण्हिदशा** - अध्ययनं/मूलं
આગમ ૧૯ થી ૨૩ निरयावलिकादि નામથી સાથે જોવા મળે છે કેમકે તેને ઉપાંગના પાંચ વર્ગ તરીકે સૂત્રકારે ઓળખાવેલા છે. જેમાં વર્ગ-૧, निरयावलिका, વર્ગ-૨ कल्पवतंसिका... વગેરે જાણવા

(२४ थी ३३) **चतुःशरण (आदि दशपयन्ना) मूलं**

(३४) **निशीथ** - उद्देशकः/मूलं

(३५) **बृहत्कल्प** - उद्देशकः/मूलं

(३६) **व्यवहार** - उद्देशकः/मूलं

(३७) **दशाश्रुतस्कन्ध** - दशा/मूलं

(३८) **जीतकल्प** - मूलं

(३९) **महानिशीथ** - अध्ययनं/उद्देशकः/मूलं

(४०) **आवश्यक** - अध्ययनं/मूलं

(४१) **ओघ/पिण्डनिर्युक्ति** - मूलं

(४२) **दशवैकालिक** - अध्ययनं/उद्देशकः/मूलं

(४३) **उत्तराध्ययन** - अध्ययनं//मूलं

(४४- ४५) **नन्दी-अनुयोगद्वार** - मूलं

Jain Education International For Private & Personal Use Only www.jainelibrary.org

અમારા સંપાદીત ૪૫ આગમોમાં આવતા મૂલ નો અંક તથા તેમાં સમાવિષ્ટ ગાથા

क्रम	आगमसूत्र	मूलं	गाथा	क्रम	आगमसूत्र	मूलं	गाथा
१.	आचार	५५२	१४७	२४.	चतु:शरण	६३	६३
२.	सूत्रकृत	८०६	७२३	२५.	आतुरप्रत्याख्यान	७१	७०
३.	स्थान	१०१०	१६९	२६.	महाप्रत्याख्यानं	१४२	१४२
४.	समवाय	३८३	९३	२७.	भक्तपरिज्ञा	१७२	१७२
५.	भगवती	१०८७	११४	२८.	तंदुलवैचारिक	१६१	१३९
६.	ज्ञाताधर्मकथा	२४१	५७	२९.	संस्तारक	१३३	१३३
७.	उपासक दशा	७३	१३	३०.	गच्छाचार	१३७	१३७
८.	अन्तकृद्दशा	६२	१२	३१.	गणिविद्या	८२	८२
९.	अनुत्तरोपपातिक	१३	४	३२.	देवेन्द्रस्तव	३०७	३०७
१०.	प्रश्नव्याकरण	४७	१४	३३.	मरणसमाधि	६६४	६६४
११.	विपाकश्रुत	४७	३	३४.	निशीष	१४२०	–
१२.	औपपातिक	७७	३०	३५.	बृहत्कल्प	२१५	–
१३.	राजप्रश्निय	८५	–	३६.	व्यवहार	२८५	–
१४.	जीवाभिगम	३९८	९३	३७.	दशाश्रुतस्कन्ध	११४	५६
१५.	प्रज्ञापना	६२२	२३१	३८.	जीतकल्प	१०३	१०३
१६.	सूर्यप्रज्ञप्ति	२१४	१०३	३९.	महानिशीथ	१५२८	८
१७.	चन्द्रप्रज्ञप्ति	२१८	१०७	४०.	आवश्यक	९२	२१
१८.	जम्बूदीपप्रज्ञप्ति	३६५	१३१	४१.	ओघनिर्युक्ति	११६५	११६५
१९.	निरयावलिका	२१	–	४१.	पिण्डनिर्युक्ति	७१२	७१२
२०.	कल्पवतंसिका	५	१	४२.	दशवैकालिक	५४०	५१५
२१.	पुष्पिता	११	२	४३.	उत्तराध्ययन	१७३१	१६४०
२२.	पुष्पचूलिका	३	१	४४.	नन्दी	१६८	९३
२३.	वण्हिदशा	५	१	४५.	अनुयोगद्वार	३५०	१४१

નોંધ :- ઉક્ત ગાથા સંખ્યાનો સમાવેશ મૂલં માં થઈ જ જાય છે. તે મૂલ સિવાયની અલગ ગાથા સમજવી નહીં. મૂલ શબ્દ એ અમો સૂત્ર અને ગાથા બંને માટે નો આપેલો સંયુક્ત અનુક્રમ છે. ગાથા બધાંજ સંપાદનોમાં સામાન્ય અંક ધરાવતી હોવાથી તેનો અલગ અંક આપેલ છે. પણ સૂત્રના વિભાગ દરેક સંપાદકે ભિન્નભિન્ન રીતે કર્યા હોવાથી અમે સૂત્રાંક જુદો પાડતા નથી.

Jain Education International For Private & Personal Use Only www.jainelibrary.org

—: અમારા પ્રકાશનો :—

[૧] अभिनव हेम लघुप्रक्रिया - १ - सप्ताङ्ग विवरणम्
[२] अभिनव हेम लघुप्रक्रिया - २ - सप्ताङ्ग विवरणम्
[३] अभिनव हेम लघुप्रक्रिया - ३ - सप्ताङ्ग विवरणम्
[४] अभिनव हेम लघुप्रक्रिया - ४ - सप्ताङ्ग विवरणम्
[૫] कृदन्तमाला
[૬] चैत्यवन्दन पर्वमाला
[૭] चैत्यवन्दन सङ्ग्रह - तीर्थजिनविशेष
[૮] चैत्यवन्दन चोविशी
[૯] शत्रुञ्जय भक्ति [आवृत्ति-दो]
[૧૦] अभिनव जैन पञ्चाङ्ग - २०४६
[૧૧] અભિનવ ઉપદેશ પ્રાસાદ - ૧- શ્રાવક કર્તવ્ય - ૧ થી ૧૧
[૧૨] અભિનવ ઉપદેશ પ્રાસાદ - ૨- શ્રાવક કર્તવ્ય - ૧૨ થી ૧૫
[૧૩] અભિનવ ઉપદેશ પ્રાસાદ - ૩- શ્રાવક કર્તવ્ય - ૧૬ થી ૩૬
[૧૪] નવપદ - શ્રીપાલ (શાશ્વતી ઓળીના વ્યાખ્યાન રૂપે)
[૧૫] સમાધિ મરણ [વિધિ - સૂત્ર - પદ્ય - આરાધના-મરણભેદ-સંગ્રહ]
[૧૬] ચૈત્યવંદન માળા [૭૭૯ ચૈત્યવનંદનોનો સંગ્રહ]
[૧૭] તત્વાર્થ સૂત્ર પ્રબોધટીકા [અધ્યાય-૧]
[૧૮] તત્વાર્થ સૂત્રના આગમ આધાર સ્થાનો
[૧૯] સિદ્ધાચલનો સાથી [આવૃત્તિ - બે]
[૨૦] ચૈત્ય પરિપાટી
[૨૧] અમદાવાદ જિનમંદિર ઉપાશ્રય આદિ ડિરેક્ટરી
[૨૨] શત્રુંજય ભક્તિ [આવૃત્તિ - બે]
[૨૩] શ્રી નવકારમંત્ર નવલાખ જાપ નોંધપોથી
[૨૪] શ્રી ચારિત્ર પદ એક કરોડ જાપ નોંધપોથી
[૨૫] શ્રી બારવ્રત પુસ્તિકા તથા અન્ય નિયમો - [આવૃત્તિ - ચાર]
[૨૬] અભિનવ જૈન પંચાંગ - ૨૦૪૨ [સર્વપ્રથમ ૧૩ વિભાગોમાં]
[૨૭] શ્રી જ્ઞાનપદ પૂજા
[૨૮] અંતિમ આરાધના તથા સાધુ સાધ્વી કાળધર્મ વિધિ
[૨૯] શ્રાવક અંતિમ આરાધના [આવૃત્તિ ત્રણ]
[૩૦] વીતરાગ સ્તુતિ સંચય [૧૧૫૧ ભાવવાહી સ્તુતિઓ]
[૩૧] (પૂજ્ય આગમોદ્ધારક શ્રી ના સમુદાયના) કાયમી સંપર્ક સ્થળો
[૩૨] તત્વાર્થાધિગમ સૂત્ર અભિનવ ટીકા - અધ્યાય-૧
[૩૩] તત્વાર્થાધિગમ સૂત્ર અભિનવ ટીકા - અધ્યાય-૨
[૩૪] તત્વાર્થાધિગમ સૂત્ર અભિનવ ટીકા - અધ્યાય-૩
[૩૫] તત્વાર્થાધિગમ સૂત્ર અભિનવ ટીકા - અધ્યાય-૪

Jain Education International For Private & Personal Use Only www.jainelibrary.org

[૩૬] તત્વાર્થાધિગમ સૂત્ર અભિનવ ટીકા - અધ્યાય-૫
[૩૭] તત્વાર્થાધિગમ સૂત્ર અભિનવ ટીકા - અધ્યાય-૬
[૩૮] તત્વાર્થાધિગમ સૂત્ર અભિનવ ટીકા - અધ્યાય-૭
[૩૯] તત્વાર્થાધિગમ સૂત્ર અભિનવ ટીકા - અધ્યાય-૮
[૪૦] તત્વાર્થાધિગમ સૂત્ર અભિનવ ટીકા - અધ્યાય-૯
[૪૧] તત્વાર્થાધિગમ સૂત્ર અભિનવ ટીકા - અધ્યાય-૧૦

પ્રકાશન ૧ થી ૪૧ અભિનવશ્રુત પ્રકાશને પ્રગટ કરેલ છે.

[४२]	आयारो	[आगमसुत्ताणि-१]	पढमं अंगसुत्तं
[४३]	सूयगडो	[आगमसुत्ताणि-२]	बीअं अंगसुत्तं
[४४]	ठाणं	[आगमसुत्ताणि-३]	तइयं अंगसुत्तं
[४५]	समवाओ	[आगमसुत्ताणि-४]	चउत्थं अंगसुत्तं
[४६]	विवाहपन्नति	[आगमसुत्ताणि-५]	पंचमं अंगसुत्तं
[४७]	नायाधम्मकहाओ	[आगमसुत्ताणि-६]	छट्ठं अंगसुत्तं
[४८]	उवासगदसाओ	[आगमसुत्ताणि-७]	सत्तमं अंगसुत्तं
[४९]	अंतगडदसाओ	[आगमसुत्ताणि-८]	अट्ठमं अंगसुत्तं
[५०]	अनुत्तोववाइयदसाओ	[आगमसुत्ताणि-९]	नवमं अंगसुत्तं
[५१]	पण्हावागरणं	[आगमसुत्ताणि-१०]	दसमं अंगसुत्तं
[५२]	विवागसूयं	[आगमसुत्ताणि-११]	एक्कारसमं अंगसुत्तं
[५३]	उववाइयं	[आगमसुत्ताणि-१२]	पढमं उवंगसुत्तं
[५४]	रायप्पसेणियं	[आगमसुत्ताणि-१३]	बीअं उवंगसुत्तं
[५५]	जीवाजीवाभिगमं	[आगमसुत्ताणि-१४]	तइयं उवंगसुत्तं
[५६]	पन्नवणासुत्तं	[आगमसुत्ताणि-१५]	चउत्थं उवंगसुत्तं
[५७]	सूरपन्नतिः	[आगमसुत्ताणि-१६]	पंचमं उवंगसुत्तं
[५८]	चंदपन्नत्तिः	[आगमसुत्ताणि-१७]	छट्ठं उवंगसुत्तं
[५९]	जंबूद्दीवपन्नति	[आगमसुत्ताणि-१८]	सत्तमं उवंगसुत्तं
[६०]	निरयावलियाणं	[आगमसुत्ताणि-१९]	अट्ठमं उवंगसुत्तं
[६१]	कप्पवडिंसियाणं	[आगमसुत्ताणि-२०]	नवमं उवंगसुत्तं
[६२]	पुप्फियाणं	[आगमसुत्ताणि-२१]	दसमं उवंगसुत्तं
[६३]	पुप्फचूलियाणं	[आगमसुत्ताणि-२२]	एक्कारसमं उवंगसुत्तं
[६४]	वण्हिदसाणं	[आगमसुत्ताणि-२३]	बारसमं उवंगसुत्तं
[६५]	चउसरणं	[आगमसुत्ताणि-२४]	पढमं पईण्णगं
[६६]	आउरपच्चक्खाणं	[आगमसुत्ताणि-२५]	बीअं पईण्णगं
[६७]	महापच्चक्खाणं	[आगमसुत्ताणि-२६]	तीइयं पईण्णगं
[६८]	भत्तपरिण्णा	[आगमसुत्ताणि-२७]	चउत्थं पईण्णगं

Jain Education International For Private & Personal Use Only www.jainelibrary.org

[६९]	तंदुलवेयालियं	[आगमसुत्ताणि-२८]	पंचमं पईण्णगं
[७०]	संथारगं	[आगमसुत्ताणि-२९]	छट्ठं पईण्णगं
[७१]	गच्छायार	[आगमसुत्ताणि-३०/१]	सत्तमं पईण्णगं-१
[७२]	चंदावेज्झयं	[आगमसुत्ताणि-३०/२]	सत्तमं पईण्णगं-२
[७३]	गणिविज्जा	[आगमसुत्ताणि-३१]	अठ्ठमं पईण्णगं
[७४]	देविंदत्थओ	[आगमसुत्ताणि-३२]	नवमं पईण्णगं
[७५]	मरणसमाहि	[आगमसुत्ताणि-३३/१]	दसमं पईण्णगं-१
[७६]	वीरत्थव	[आगमसुत्ताणि-३३/२]	दसमं पईण्णगं-२
[७७]	निसीह	[आगमसुत्ताणि-३४]	पढमं छेयसुत्तं
[७८]	बुहत्कप्पो	[आगमसुत्ताणि-३५]	बीअं छेयसुत्तं
[७९]	ववहार	[आगमसुत्ताणि-३६]	तइयं छेयसुत्तं
[८०]	दसासुयक्खंधं	[आगमसुत्ताणि-३७]	चउत्थं छेयसुत्तं
[८१]	जीयकप्पो	[आगमसुत्ताणि-३८/१]	पंचमं छेयसुत्तं-१
[८२]	पंचकप्पभास	[आगमसुत्ताणि-३८/२]	पंचमं छेयसुत्तं-२
[८३]	महानिसीहं	[आगमसुत्ताणि-३९]	छठ्ठं छेयसुत्तं
[८४]	आवसस्सयं	[आगमसुत्ताणि-४०]	पढमं मूलसुत्तं
[८५]	ओहनिज्जुत्ति	[आगमसुत्ताणि-४१/१]	बीअं मूलसुत्तं-१
[८६]	पिंडनिज्जुत्ति	[आगमसुत्ताणि-४१/२]	बीअं मूलसुत्तं-२
[८७]	दसवेयालियं	[आगमसुत्ताणि-४२]	तइयं मुलसुत्तं
[८८]	उतरज्झयणं	[आगमसुत्ताणि-४३]	चउत्थं मूलसुत्तं
[८९]	नंदीसूयं	[आगमसुत्ताणि-४४]	पढमा चूलिया
[९०]	अनुओगदारं	[आगमसुत्ताणि-४५]	बितिया चूलिया

પ્રકાશન ૪૨ થી ૯૦ આગમશ્રુત પ્રકાશને પ્રગટ કરેલ છે.

[૯૧]	આયાર -	ગુજરાતી અનુવાદ	[આગમદીપ-૧]	પહેલું અંગસૂત્ર
[૯૨]	સૂયગડ -	ગુજરાતી અનુવાદ	[આગમદીપ-૧]	બીજું અંગસૂત્ર
[૯૩]	ઠાણ -	ગુજરાતી અનુવાદ	[આગમદીપ-૧]	ત્રીજું અંગસૂત્ર
[૯૪]	સમવાય -	ગુજરાતી અનુવાદ	[આગમદીપ-૧]	ચોથું અંગસૂત્ર
[૯૫]	વિવાહપન્નત્તિ -	ગુજરાતી અનુવાદ	[આગમદીપ-૨]	પાંચમું અંગસૂત્ર
[૯૬]	નાયાધમ્મકહા -	ગુજરાતી અનુવાદ	[આગમદીપ-૩].	છઠ્ઠું અંગસૂત્ર
[૯૭]	ઉવાસગદસા -	ગુજરાતી અનુવાદ	[આગમદીપ-૩]	સાતમું અંગસૂત્ર
[૯૮]	અંતગડદસા -	ગુજરાતી અનુવાદ	[આગમદીપ-૩]	આઠમું અંગસૂત્ર
[૯૯]	અનુત્તરોપપાતિકદસા-	ગુજરાતી અનુવાદ	[આગમદીપ-૩]	નવમું અંગસૂત્ર
[૧૦૦]	પણ્હાવાગરણ-	ગુજરાતી અનુવાદ	[આગમદીપ-૩]	દશમું અંગસૂત્ર

Jain Education International For Private & Personal Use Only www.jainelibrary.org

[૧૦૧]	વિવાગસૂય -	ગુજરાતી અનુવાદ	[આગમદીપ-૩]	અગિયારમું અંગસૂત્ર
[૧૦૨]	ઉવવાઇય	ગુજરાતી અનુવાદ	[આગમદીપ-૪]	પહેલું ઉપાંગસૂત્ર
[૧૦૩]	રાયપ્પસેણિય -	ગુજરાતી અનુવાદ	[આગમદીપ-૪]	બીજું ઉપાંગસૂત્ર
[૧૦૪]	જીવાજીવાભિગમ -	ગુજરાતી અનુવાદ	[આગમદીપ-૪]	ત્રીજું ઉપાંગસૂત્ર
[૧૦૫]	પન્નવણાસુત્ત	ગુજરાતી અનુવાદ	[આગમદીપ-૪]	ચોથું ઉપાંગસૂત્ર
[૧૦૬]	સૂરપન્નત્તિ -	ગુજરાતી અનુવાદ	[આગમદીપ-૫]	પાચમું ઉપાંગસૂત્ર
[૧૦૭]	ચંદપન્નતિ -	ગુજરાતી અનુવાદ	[આગમદીપ-૫]	છઠ્ઠું ઉપાંગસૂત્ર
[૧૦૮]	જંબુદ્દીવપન્નતિ -	ગુજરાતી અનુવાદ	[આગમદીપ-૫]	સાતમું ઉપાંગસૂત્ર
[૧૦૯]	નિરયાવલિયા -	ગુજરાતી અનુવાદ	[આગમદીપ-૫]	આઠમું ઉપાંગસૂત્ર
[૧૧૦]	કપ્પવડિંસિયા -	ગુજરાતી અનુવાદ	[આગમદીપ-૫]	નવમું ઉપાંગસૂત્ર
[૧૧૧]	પુપ્ફિયા -	ગુજરાતી અનુવાદ	[આગમદીપ-૫]	દશમું ઉપાંગસૂત્ર
[૧૧૨]	પુપ્ફચૂલિયા -	ગુજરાતી અનુવાદ	[આગમદીપ-૫]	અગિયારમું ઉપાંગસૂત્ર
[૧૧૩]	વણ્હિદસા -	ગુજરાતી અનુવાદ	[આગમદીપ-૫]	બારમું ઉપાંગસૂત્ર
[૧૧૪]	ચઉસરણ -	ગુજરાતી અનુવાદ	[આગમદીપ-૬]	પહેલો પયન્નો
[૧૧૫]	આઉરપ્પચ્ચક્ખાણ -	ગુજરાતી અનુવાદ	[આગમદીપ-૬]	બીજો પયન્નો
[૧૧૬]	મહાપચ્ચક્ખાણ -	ગુજરાતી અનુવાદ	[આગમદીપ-૬]	ત્રીજો પયન્નો
[૧૧૭]	ભત્તપરિણ્ણા -	ગુજરાતી અનુવાદ	[આગમદીપ-૬]	ચોથો પયન્નો
[૧૧૮]	તંદુલવેયાલિય -	ગુજરાતી અનુવાદ	[આગમદીપ-૬]	પાંચમો પયન્નો
[૧૧૯]	સંથારગ -	ગુજરાતી અનુવાદ	[આગમદીપ-૬]	છઠ્ઠો પયન્નો
[૧૨૦]	ગચ્છાયાર -	ગુજરાતી અનુવાદ	[આગમદીપ-૬]	સાતમો પયન્નો-૧
[૧૨૧]	ચંદાવેજ્ઝય -	ગુજરાતી અનુવાદ	[આગમદીપ-૬]	સાતમો પયન્નો-૨
[૧૨૨]	ગણિવિજ્જા -	ગુજરાતી અનુવાદ	[આગમદીપ-૬]	આઠમો પયન્નો
[૧૨૩]	દેવિંદત્થઓ -	ગુજરાતી અનુવાદ	[આગમદીપ-૬]	નવમો પયન્નો
[૧૨૪]	વીરત્થવ -	ગુજરાતી અનુવાદ	[આગમદીપ-૬]	દશમો પયન્નો
[૧૨૫]	નિસીહ -	ગુજરાતી અનુવાદ	[આગમદીપ-૬]	પહેલું છેદસૂત્ર
[૧૨૬]	બુહતકપ્પ -	ગુજરાતી અનુવાદ	[આગમદીપ-૬]	બીજું છેદસૂત્ર
[૧૨૭]	વવહાર -	ગુજરાતી અનુવાદ	[આગમદીપ-૬]	ત્રીજું છેદસૂત્ર
[૧૨૮]	દસાસુયક્ખંધ -	ગુજરાતી અનુવાદ	[આગમદીપ-૬]	ચોથું છેદસૂત્ર
[૧૨૯]	જીયકપ્પો -	ગુજરાતી અનુવાદ	[આગમદીપ-૬]	પાંચમું છેદસૂત્ર
[૧૩૦]	મહાનિસીહ -	ગુજરાતી અનુવાદ	[આગમદીપ-૬]	છઠ્ઠું છેદસૂત્ર
[૧૩૧]	આવસ્સય -	ગુજરાતી અનુવાદ	[આગમદીપ-૭]	પહેલું મૂલસુત્ર
[૧૩૨]	ઓહનિજ્જુત્તિ -	ગુજરાતી અનુવાદ	[આગમદીપ-૭]	બીજું મૂલસુત્ર-૧
[૧૩૩]	પિંડનિજ્જુત્તિ -	ગુજરાતી અનુવાદ	[આગમદીપ-૭]	બીજું મૂલસુત્ર-૨
[૧૩૪]	દસવેયાલિય -	ગુજરાતી અનુવાદ	[આગમદીપ-૭]	ત્રીજું મુલસૂત્ર

Jain Education International For Private & Personal Use Only www.jainelibrary.org

[૧૩૫] ઉત્તરજ્ઝયણ - ગુજરાતી અનુવાદ [આગમદીપ-૭] ચોથું મૂલસુત્ર
[૧૩૬] નંદીસુત્તં - ગુજરાતી અનુવાદ [આગમદીપ-૭] પહેલી ચૂલિકા
[૧૩૭] અનુયોગદ્વાર - ગુજરાતી અનુવાદ [આગમદીપ-૭] બીજી ચૂલિકા

પ્રકાશન ૯૧ થી ૧૩૭ આગમદીપ પ્રકાશને પ્રગટ કરેલ છે.

[૧૩૮] દીક્ષા યોગાદિ વિધિ
[૧૩૯] ૪૫ આગમ મહાપૂજન વિધિ
[१४०] आचाराङ्गसूत्रं सटीकं आगमसुत्ताणि सटीकं-१
[१४१] सूत्रकृताङ्गसूत्रं सटीकं आगमसुत्ताणि सटीकं-२
[१४२] स्थानाङ्गसूत्रं सटीकं आगमसुत्ताणि सटीकं-३
[१४३] समवायाङ्गसूत्रं सटीकं आगमसुत्ताणि सटीकं-४
[१४४] भगवतीअङ्गसूत्रं सटीकं आगमसुत्ताणि सटीकं-५/६
[१४५] ज्ञाताधर्मकथाङ्गसूत्रं सटीकं आगमसुत्ताणि सटीकं-७
[१४६] उपासकदशाङ्गसूत्रं सटीकं आगमसुत्ताणि सटीकं-७
[१४७] अन्तकृद्दशाङ्गसूत्रं सटीकं आगमसुत्ताणि सटीकं-७
[१४८] अनुत्तरोपपातिकदशाङ्गसूत्रं सटीकं आगमसुत्ताणि सटीकं-७
[१४९] प्रश्नव्याकरणाङ्गसूत्रं सटीकं आगमसुत्ताणि सटीकं-७
[१५०] विपाकश्रुताङ्गसूत्रं सटीकं आगमसुत्ताणि सटीकं-८
[१५१] औपपातिकउपाङ्गसूत्रं सटीकं आगमसुत्ताणि सटीकं-८
[१५२] राजप्रश्नियउपाङ्गसूत्रं सटीकं आगमसुत्ताणि सटीकं-८
[१५३] जीवाजीवाभिगमउपाङ्गसूत्रं सटीकं आगमसुत्ताणि सटीकं-९
[१५४] प्रज्ञापनाउपाङ्गसूत्रं सटीकं आगमसुत्ताणि सटीकं-१०/११
[१५५] सूर्यप्रज्ञप्तिउपाङ्गसूत्रं सटीकं आगमसुत्ताणि सटीकं-१२
[१५६] चन्द्रप्रज्ञप्तिउपाङ्गसूत्रं सटीकं आगमसुत्ताणि सटीकं-१२
[१५७] जम्बूद्वीवप्रज्ञप्तिउपाङ्गसूत्रं सटीकं आगमसुत्ताणि सटीकं-१३
[१५८] निरयावलिकाउपाङ्गसूत्रं सटीकं आगमसुत्ताणि सटीकं-१४
[१५९] कल्पवतंसिकाउपाङ्गसूत्रं सटीकं आगमसुत्ताणि सटीकं-१४
[१६०] पुष्पिताउपाङ्गसूत्रं सटीकं आगमसुत्ताणि सटीकं-१४
[१६१] पुष्पचूलिकाउपाङ्गसूत्रं सटीकं आगमसुत्ताणि सटीकं-१४
[१६२] वण्हिदसाउपाङ्गसूत्रं सटीकं आगमसुत्ताणि सटीकं-१४
[१६३] चतुःशरणप्रकीर्णकसूत्र सटीकं आगमसुत्ताणि सटीकं-१४
[१६४] आतुरप्रत्याव्यानप्रकीर्णकसूत्रं सटीकं आगमसुत्ताणि सटीकं-१४
[१६५] महाप्रत्याख्यानप्रकीर्णकसूत्रं सच्छायं आगमसुत्ताणि सटीकं-१४
[१६६] भक्तपरिज्ञाप्रकीर्णकसूत्रं सच्छायं आगमसुत्ताणि सटीकं-१४

Jain Education International For Private & Personal Use Only www.jainelibrary.org

[१६७]	तंदुलवैचारिकप्रकीर्णकसूत्रं सटीकं	आगमसुत्ताणि सटीकं-१४
[१६८]	संस्तारकप्रकीर्णकसूत्रं सच्छायं	आगमसुत्ताणि सटीकं-१४
[१६९]	गच्छाचारप्रकीर्णकसूत्रं सटीकं	आगमसुत्ताणि सटीकं-१४
[१७०]	गणिविद्याप्रकीर्णकसूत्रं सच्छायं	आगमसुत्ताणि सटीकं-१४
[१७१]	देवेन्द्रस्तवप्रकीर्णकसूत्रं सच्छायं	आगमसुत्ताणि सटीकं-१४
[१७२]	मरणसमाधिप्रकीर्णकसूत्रं सच्छायं	आगमसुत्ताणि सटीकं-१४
[१७३]	निशीथछेदसूत्रं सटीकं	आगमसुत्ताणि सटीकं-१५-१६-१७
[१७४]	बृहत्कल्पछेदसूत्रं सटीकं	आगमसुत्ताणि सटीकं-१८-१९-२०
[१७५]	व्यवहारछेदसूत्रं सटीकं	आगागम सुत्ताणि सटीकं-२१-२२
[१७६]	दशाश्रुतस्कन्धछेदसूत्रं सटीकं	आगमसुत्ताणि सटीकं-२३
[१७७]	जीतकल्पछेदसूत्रं सटीकं	आगमसुत्ताणि सटीकं-२३
[१७८]	महानिशीथसूत्रं (मूलं)	आगमसुत्ताणि सटीकं-२३
[१७९]	आवश्यकमूलसूत्रं सटीकं	आगमसुत्ताणि सटीकं-२४-२५
[१८०]	ओघनिर्युक्तिमूलसूत्रं सटीकं	आगम सुत्तामि सटीकं-२६
[१८१]	पिण्डनिर्युक्तिमूलसूत्रं सटीकं	आगमसुत्ताणि सटीकं-२६
[१८२]	दशवैकालिकमूलसूत्रं सटीकं	आगमसुत्ताणि सटीकं-२७
[१८३]	उत्तराध्ययनमूलसूत्रं सटीकं	आगमसुत्ताणि सटीकं-२८-२९
[१८४]	नन्दी-चूलिकासूत्रं सटीकं	आगमसुत्ताणि सटीकं-३०
[१८५]	अनुयोगद्वारचूलिकासूत्रं सटीकं	आगमसुत्ताणि सटीकं-३०

પ્રકાશન ૧૩૯ થી ૧૮૫ આગમશ્રુત પ્રકાશને પ્રગટ કરેલ છે.

—: સંપર્ક સ્થળ :—

'આગમ આરાધના કેન્દ્ર'

શીતલનાથ સોસાયટી-વિભાગ-૧, ફ્લેટ નં-૧૩, ૪થે માળે

શ્રી નમિનાથ જૈન દેરાસરજી પાછળ, બ્હાઈ સેન્ટર, ખાનપુર

અમદાવાદ-૧

Jain Education International For Private & Personal Use Only www.jainelibrary.org

"आगमसुत्ताणि-सटीकं" ભાગ ૧ થી ૩૦ નું વિવરણ

आगमसुत्ताणि	समाविष्टाआगमाः
भाग-१	आयार
भाग-२	सूत्रकृत
भाग-३	स्थान
भाग-४	समवाय
भाग-५-६	भगवती (अपरनाम व्याख्याप्रज्ञप्ति)
भाग-७	ज्ञाताधर्मकथा, उपासकदशा, अन्तकृद्दशा, अनुत्तरोपपातिकदशा, प्रश्नव्याकरण
भाग-८	विपाकश्रुत, औपपातिक, राजप्रश्निय
भाग-९	जीवाजीवाभिगम
भाग-१०-११	प्रज्ञापना
भाग-१२	सूर्यप्रज्ञप्ति, चन्द्रप्रज्ञप्ति
भाग-१३	जम्बूद्वीपप्रज्ञप्ति
भाग-१४	निरयावलिका, कल्पवतंसिका, पुष्पिका, पुष्पचूलिका वण्हिदशा, चतुःशरण, आतुरप्रत्याख्यान, महाप्रत्याख्यान, भक्तपरिज्ञा, तन्दुलवैचारिक, संस्तारक, गच्छाचार, गणिविद्या, देवेन्द्रस्तव, मरणसमाधि
भाग-१५-१६-१७	नीशीथ
भाग-१८-१९-२०	बृहत्कल्प
भाग-२१-२२	व्यवहार
भाग-२३	दशाश्रुतस्कन्ध, जीतकल्प, महनिशीथ
भाग-२४-२५	आवश्यक
भाग-२६	ओघनिर्युक्ति, पिण्डनिर्युक्ति
भाग-२७	दशवैकालिक
भाग-२८-२९	उत्तराध्ययन
भाग-३०	नन्दी, अनुयोगद्वार

Jain Education International For Private & Personal Use Only www.jainelibrary.org



Jain Education International For Private & Personal Use Only www.jainelibrary.org